शार्ङ्गधरसंहिता।

दामोदरसूनुना श्रीशार्ङ्गधराचार्य्येण
विरचिता

आढ़मल्लेन विरचितया
दीपिकाख्यटीकया समन्विता च।

पण्डित-श्री-आशुबोध-विद्याभूषणेन
तथा
पण्डित-श्री-नित्यबोध-विद्यारत्नेन च
विविधटिप्पन्या समलङ्कृता
संशोधिता प्रकाशिता च।

प्रथमसंस्करणम्।

कलिकाता महानगर्य्यां

वाचस्पत्ययन्त्रे

मुद्रिता।

इं १८३१।

सर्वं स्वत्वं संरक्षितम्। शार्ङ्गधरसंहितायाः।

सूचीपत्रम् ।

विषयाः	पृष्ठाङ्काः ।
पूर्वखण्डः ।	
प्रथमोऽध्यायः ।	
अथ परिभाषाध्यायः ...	१
ग्रन्थकरणप्रतिज्ञाचरणम् ...	,,
ग्रन्थस्य प्रामाणिकत्वनिर्देशः...	२
वैद्यस्य कर्त्तव्यनिर्देशः ...	३
ग्रन्थस्य अभिधेयः ...	५
पूर्वखण्डानुक्रमणिका ...	६
मध्यखण्डानुक्रमणिका ...	७
उत्तरखण्डानुक्रमणिका ...	,,
श्लोकाना सङ्ख्यासमष्टिः ...	८
मानपरिभाषायाः प्रयोजननिर्देशः	,,
मागधीयं मानम् ...	,,
गुञ्जादिकुडवान्तमानस्य समतानिर्देशः	१२
हैगुण्यपरिभाषाया. विषयनिर्देशः	१२
कुडवमितद्रवद्रव्यमानार्थं पात्रविशेष-निर्देशः	१३
योगाना नामकरणविधिः ...	,,
अथ कालिङ्गपरिभाषा ...	,,
औषधाना मात्रास्थिरीकरणविधिः	,,
कालिङ्गमानीतौ हेतुः ...	१४
अथ कालिङ्गमानम् ...	,,
कालिङ्गान्मागधमानस्य श्रेष्ठतानिर्देशः ...	१५

विषयाः	पृष्ठाङ्काः ।
युक्तायुक्तविचारः ...	१५
शुष्कद्रव्यग्रहणस्य हैगुण्यपरिभाषाया-श्चापवादः ...	१६
अनुक्तविषयिणी परिभाषा ...	,,
द्विरुक्तद्रव्ये कर्त्तव्योपदेशः ...	१७
द्विविधचन्दनयोः प्रयोगस्थलम्	,,
औषधाना गुणस्थितौ गुणहानौ च कालनिर्देशः ...	,,
युक्तायुक्तद्रव्ययोः ग्राह्यवर्ज्यत्वनिर्देशः	१९
औषध्याहरणोपयोगिदेशनिर्देशः	,,
औषध्याहरणविधिः	,,
औषध्याहरणे अनुपयोगिदेशः	२०
प्रयोगविशेषे औषध्याहरणकालः	,,
द्रव्यविशेषे ग्राह्याङ्गनिर्देशः ...	२१
द्वितीयोऽध्यायः ।	
अथ भैषज्याख्यानकाध्यायः	२२
औषधभक्षणे पञ्चविधकालनिर्देशः	,,
तत्र प्रथमकालः ...	२३
,, द्वितीयकालः ...	,,
,, तृतीयकालः ...	२४
,, चतुर्थकालः ...	,,
,, पञ्चमकालः ...	२५
द्रव्ये रसादिपञ्चकाना सम्बन्धनिर्देशः	,,

विषयाः	पृष्ठाङ्काः।
षड्रसाः	२६
भूतविशेषसंयोगे रसविशेषोत्पत्तिः	,,
भूतविशेषाधिक्ये गुणविशेष'...	,,
वीर्य्यम्	२७
रसविशेषे विपाकविशेषः ...	,,
रसाना विपाकविशेषे दोष-विशेषोत्पत्तिः ...	,,
प्रभावः	२८
रसादिपञ्चकानां पृथक् पृथक् कार्य्यकारिता ...	,,
दोषाणा चयादौ ऋतुषट्काना हेतुता	२९
राशिविशेषे ऋतुविशेषः ...	,,
ऋतुविशेषे दोषाणा चयकोपप्रशमनाः	३०
यमदष्ट्रा	३२
दोषाणा चयादौ विहाराहारादीना-मपि हेतुता ...	,,
वायौ प्रकोपे प्रशमे च कारणानि	३३
पित्तस्य ,, ,, ,, ,,	,,
कफस्य ,, ,, ,, ,,	३४

तृतीयोऽध्यायः।

अथ नाड़ीपरीक्षादिविधि-रध्यायः ...	३४
नाडीपरीक्षास्थानम् ...	,,
वातकोपे पित्तकोपे च नाडीलक्षणम्	३५
श्लेष्मकोपे त्रिदोषकोपे ,, ,,	,,
त्रिदोषकोपे ,,	,,
असाध्य ,,	३६
ज्वररोगे कामक्रोधादौ च नाडीलक्षणम्	३६
मन्दाग्नि-धातुक्षीणादौ ,,	,,
दीप्ताग्न्यादौ ,,	३७
दूतलक्षणम् ...	,,
शकुनम् ...	३९
चिकित्स्यरोगिलक्षणम् ...	४०
स्वप्नलक्षणम् ...	४१
तत्र दुःस्वप्नानि ...	४१
दुःस्वप्नप्रतीकारः ...	४३
सुखस्वप्नानि ...	४४

चतुर्थोऽध्यायः।

अथ दीपनपाचनाध्यायः	४५
दीपन पाचनं दीपनपाचनञ्च	,,
शमनम्	४६
अनुलोमनम् ...	,,
संशमनम्	४७
भेदनम्	,,
रेचनम्	,,
वमनम्	४८
शोधनम्	,,
छेदनम्	४९
लेखनम्	,,
याहि	५०
स्तम्भनम्	,,
रसायनम्	,,
वाजीकरणम्	५१
शुक्रलम्	,,

विषयाः	पृष्ठाङ्काः।
शुक्रस्य प्रवर्त्तकं जनकञ्च ...	५१
,, प्रवर्त्तन-रेचन-स्तम्भन-शोषण-कारकाणि ...	५२
सूक्ष्मम्	,,
व्यवायि	,,
विकाशि	५३
मदकारि	,,
जीवितहरम्	५४
प्रमाथि	,,
अभिष्यन्दि	५५

पञ्चमोऽध्यायः।

अथ कलादिकाख्या-नाध्यायः ...	५५
कलास्वरूपम्	,,
कलादीना सङ्ख्यानिर्देशः ...	,,
कलाना विवरणम् ...	५७
आशयाना ,, ...	५८
धातूनां ,, ...	५९
पूर्वपूर्वधातुभ्यः उत्तरोत्तरधातूना-मुत्पत्तिः	,,
मलाना विवरणम् ...	६०
,, अन्यविधविवरणम् ...	,,
उपधातूना विवरणम् ...	६१
ओजःस्वरूपम् ...	६२
त्वचा विवरणम् ...	६२

विषयाः	पृष्ठाङ्काः।
दोषाणा पर्य्यायाः ...	६३
दोषादीना निरुक्तिः ...	६३
दोषेषु वायोः प्रभावः ...	६३
वायोः स्वरूपम् ...	६४
,, पञ्चस्थानानि ...	६४
पञ्चवायोः नामानि ...	६४
पित्तस्य स्वरूपम् ...	६५
पञ्चाना पित्ताना स्थानानि कार्य्याणि च ...	६५
पञ्चाना पित्ताना नामानि ...	६६
कफस्य स्वरूपम् ...	६६
पञ्चाना कफाना स्थानानि कार्य्याणि च ...	६६
पञ्चाना कफाना नामानि ...	६६
स्नायूना सन्धीनाञ्च स्वरूपम्...	६७
सिरा मर्म्मणाञ्च स्वरूपम् ...	६८
शिराणा धमनीनाञ्च स्वरूपम्	६८
मासपेशीना कण्डराणाञ्च स्वरूपम्	६९
स्रोतसाणा विवरणम् ...	७०
फुप्फुस-प्लीह यकृतां स्थाननिरूपणम्	७०
फुप्फुसस्य क्लोम्नश्च स्वरूपम् ...	७१
यकृतः तिलस्य (क्लोम्नः) च स्वरूपम्	७१
वृक्कयोः वृषणयोश्च स्वरूपम् ...	७१
लिङ्गस्य हृदयस्य च ,, ...	७१
शिराधमनीना शरीरपोषकत्वम्	७२
प्राणवायोः कार्य्यविशेषः ...	७३
आयुषः पञ्चत्वस्य च लक्षणम् ...	७४
जीवानां मरणधर्म्मित्वोक्तिः ...	७४

विषयाः	पृष्ठाङ्काः ।
रोगाप्रतीकारे दोषोक्तिः ...	७४
रोगप्रतीकारे गुणोक्तिः ...	७५
धात्वादीनां वैषम्ये साम्ये च दोषगुणौ	७५
अथ सृष्टिक्रमः ...	७६
अव्यक्तम्	७६
महान्	७७
अहङ्कारः	७७
एकादशेन्द्रियाणि ...	७७
बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च	७८
पञ्चतन्मात्रम्	७८
पञ्चभूतम्	७९
इन्द्रियार्थाः	७९
बुद्धीन्द्रियाणां विषयाः ...	७९
कर्मेन्द्रियाणां ,, ...	७९
प्रकृतेः पर्यायाः ...	८०
चतुर्विंशतितत्त्वानि ...	८०
जीवात्मनो विवरणम् ...	८०
,, बन्धनकारणानि ...	८१
,, बन्ध मुक्ति-दुःख-सुखहेतवः	८२

षष्ठोऽध्यायः ।

अथ आहारादिगतिरध्यायः ८३

आहारपरिपाके प्रथमक्रमः	८३
,, ,, द्वितीयतृतीयक्रमनिर्णयम्	८३
ग्रहणीनिर्देशः ...	८४
सुपक्वापक्वाहारयोः क्रिया ...	८४
सम्यक्पक्वरसस्य ,, ...	८४
असम्यक् पक्वरसस्य क्रिया ...	८५
आहारस्य सारमलयोर्निर्देशः मूत्रस्वरूपञ्च ...	८५
मलस्य स्वरूपम् ...	८५
वलिवयस्य नामानि ...	८५
रक्तोत्पत्तिक्रमः ...	८६
रक्तस्य विवरणम् ...	८६
शुक्रस्य रजसश्च उत्पत्तिविवरणम्	८७
गर्भस्य ,, ,,	८८
कन्या-पुत्र-नपुंसकोत्पत्तौ हेतुः	८८
बाले औषधप्रयोगनियमः ...	८८
,, अञ्जनादीनामपि कर्त्तव्यता-निर्देशः ...	९०
,, कवलादीनां कालनिर्देशः	९०
वयोऽनुसारेण बाल्यादीनां क्रमनिर्देशः	९१
वातप्रकृतेः लक्षणम् ...	९१
पित्तप्रकृतेः लक्षणम् ...	९२
श्लेष्मप्रकृतेः लक्षणम् ...	९२
द्वन्द्वसन्निपातप्रकृतीनां लक्षणम्	९३
वयसः प्रकृतेश्च त्रैविध्यनिर्देशः	९३
वयोऽनुसारेण बाल्यादीनां सीमानिर्देशः ...	९३
निद्रामूर्च्छाभ्रान्तितन्द्राणां दोषनिर्देशः	९३
ग्लानेरालस्यस्य च लक्षणम्	९४
जृम्भायाः लक्षणम् ...	९४
क्षवस्य लक्षणम् ...	९५
उद्गारस्य लक्षणम् ...	९५

सप्तमोऽध्यायः ।

विषयाः पृष्ठाङ्काः ।

अथ रोगगणनाध्यायः ९६

रोगगणनायाः प्रतिज्ञा ... ९६
पञ्चविंशतिज्वराणां विवरणम् ९६
षड्तीसाराणां विवरणम् ... ९८
पञ्चग्रहणीनां विवरणम् ... ९९
चतुर्विधपवाहिकाणां विवरणम् ९९
चतुर्विधार्शसां विवरणम् ... ९९
त्रिविधालसकानां विवरणम् १००
त्रिविधविसूचीनां विवरणम् ... १००
एकविधदण्डकालसकस्य विवरणम् १०१
एकविधविलम्बिकायां विवरणम् १०१
षडग्निसां ,, १०१
त्रिविधचर्मकीलानां ,, १०२
एकविंशतिक्रिमीणां ,, १०३
पञ्चपाण्डूनां ,, १०४
एकैककामला-कुम्भकामला-
हलीमकानां विवरणम्... १०५
त्रिविधरक्तपित्तानां विवरणम् १०५
पञ्चकासानां विवरणम् ... १०५
पञ्चच्छर्दीनां विवरणम् ... १०६
षट्शोफानां विवरणम् ... १०६
पञ्चश्वासानां विवरणम् ... १०७
पञ्चहिक्कानां विवरणम् ... १०७
चतुर्विधाग्निविकाराणां विवरणम् १०८
पञ्चारोचकानां विवरणम् ... १०८
सप्तच्छर्दीनां विवरणम् ... १०९
षट्स्वरभेदानां विवरणम् ... १०९

विषयाः पृष्ठाङ्काः ।

षट्तृष्णानां विवरणम् ... १०९
चतुर्विंशमूर्च्छानां विवरणम् ... ११०
एकैकमदात्यत्युद्रासत्र्यास्वप्नानां
विवरणम् ... ११०
सप्तमदानां विवरणम् ... १११
चतुर्विधमदात्ययानां विवरणम् १११
एकैकपरमद-पानाजीर्ण-पानविषम-
पानात्ययानां विवरणम्... १११
सप्तदाहानां विवरणम् ... ११२
षड्उन्मादानां विवरणम् ... ११२
विंशतिभूतोन्मादानां विवरणम् ११३
चतुर्विधापस्मारानां विवरणम् ११३
चतुर्विधानिलजातानां विवरणम् ११४
अष्टशूलानां विवरणम् ... ११४
अष्टपरिणामशूलानां विवरणम् ११४
एकैकान्नद्रव-जरत्पित्तशूलयोः
विवरणम् ११५
त्रयोदशोदावर्तानां ,, ११५
त्रिविधानाहस्य ,, ११६
एकविधोरोगृहस्य ,, ११६
पञ्चगुल्मानां ,, ११६
अष्टोदराणां ,, ११७
अष्टयुक्तानां ,, ११८
त्रयोदशमूत्राघातानां ,, ११९
अष्टमूत्रक्षयाणां ,, १२०
चतुर्विधाश्मरीणां ,, १२०
विंशतिमेहेषु दशश्लेष्ममेहानां ,, १२१
तत्र षट्पित्तमेहानां ,, १२१
,, चतुर्विधवातमेहानां ,, १२२

विषयाः		पृष्ठाङ्काः।
एकसोमरोगस्य	विवरणम्	१२२
दृष्टप्रनेष्टपिडकानां	,,	१२२
एकमेदोरोगस्य	,,	१२४
नवग्रीथानां	,,	१२४
सप्तत्वङ्गतीनां	,,	१२५
एकविधाखण्डखण्डेः	,,	१२५
एकगण्डनालायाः	,,	१२५
एकगण्डालज्या	,,	१२५
नवगलगण्डीनां	,,	१२६
षडर्बुदानां	,,	१२७
त्रिविधस्फीपदानां	,,	१२७
षड्विद्रधीनां	,,	१२८
षष्ठदशव्रणानां	,,	१२८
अष्टनाडीव्रणानां	,,	१३०
त्रिविधौष्ठभेदस्य	,,	१३१
अष्टास्यभङ्गानां	,,	१३१
चतुर्विंधाग्निदग्धव्रणानां	,,	१३२
षष्ठनाडीव्रणानां	,,	१३३
अष्टभगन्दराणां	,,	१३४
षष्ठीपदंशानां	,,	१३५
चतुर्विंशतिशूकदोषाणां	,,	१३६
अष्टादशकुष्ठानां	,,	१३८
त्रिविधश्वित्राणां	,,	१४०
षष्टिक्षुद्ररोगाणां	,,	१४०
तत्र चतुर्विंधव्यङ्गानां	,,	१४५
,, अष्टविस्फोटानां	,,	१४६
,, चतुर्दशमसूरिकाणां	,,	१४६
नवविसर्पाणां	,,	१४७
एकैकोदकमीतपित्तयोः	,,	१४८

विषयाः		पृष्ठाङ्काः।
त्रिविधास्रपित्तानां	विवरणम्	१४८
अष्टविधवातरक्तानां	,,	१४९
अशीतिवातरोगाणां	,,	१४९
चत्वारिंशत्-पित्तरोगाणां	,,	१५७
विंशतिकफरोगाणां	,,	१५९
दशरक्तरोगाणां	,,	१६०
चतुःसप्ततिमुखरोगाणां	,,	१६०
तत्र एकादशौष्ठरोगाणां	,,	१६०
,, दशदन्तरोगाणां	,,	१६१
,, नवोदशदन्तमूलरोगाणां	,,	१६३
,, षट्जिह्वारोगाणां	,,	१६४
,, अष्टतालुरोगाणां	,,	१६५
,, अष्टादशगलरोगाणां	,,	१६५
,, अष्टत्रिंशत्सप्तशिरोरोगाणां	,,	१६८
अष्टादशकर्णरोगाणां	,,	१६९
सप्तत्रिंशत्पालीगतरोगाणां	,,	१७२
पञ्चकर्णमूलगतरोगाणां	,,	१७३
अष्टादशनासारोगाणां	,,	१७३
दशाक्षिरोगाणां	,,	१७६
नवकपालरोगाणां	,,	१७९
चतुर्दशतिनेत्ररोगाणां	,,	१८०
तत्र चतुर्विंशतिनेत्रवर्त्मगत-रोगाणां विवरणम्		१८१
तत्र नवनेत्रसन्धिगतरोगाणां विवरणम्		१८६
तत्र दशनेत्रशुक्लगतरोगाणां विवरणम्		१८८
तत्र पञ्चनेत्रकृष्णगतरोगाणां	,,	१८९
तत्र सप्तविंशतिनेत्रदृष्टिगत-रोगाणां विवरणम्		१९१

विषया:	पृष्ठाङ्का: ।
तत्र षोडशसर्वनेत्रगतरोगाणां विवरणम्	१९६
पञ्चविधक्लैव्यानां ,,	१९९
अष्टविधशुक्लरोगाणां ,,	२००
अष्टविधार्त्तवदोषाणां ,,	२००
चतुर्विंधरक्तप्रदराणां ,,	२०१
विंशतिशोणितव्यापदां ,,	२०१
चतुर्विंधकन्दरोगाणां ,,	२०४
अष्टविधगर्भरोगाणां ,,	२०५
पञ्चस्तनरोगाणां ,,	२०८
पञ्चस्तन्यरोगाणां ,,	२०८
त्रिविधस्त्रीदोषाणां ,,	२०९
सूतिकारोगाणां ,,	२०९
द्वाविंशतिबालरोगाणां ,,	२०९
द्वादशबालग्रहाणां ,,	२१२
द्विचत्वारिंशत्क्षुद्ररोगाणां निर्देश: ...	२१४
द्विषष्टिदोषभेदानां निर्देश: ...	२१४
पञ्चदशपञ्चकर्मजरोगाणां निर्देश:	२१६
अष्टादशस्नेहादिजव्यापदां ,,	२१७
चतुर्विंधशीतादुपद्रवाणां ,,	२१७
विविधविषाणां विवरणम्	२१८
विषोपमविविधमदरोगाणां ,,	२२१

मध्यखण्ड: ।

प्रथमोऽध्याय: ।

स्वरसादिकल्पना ...	२२२
पञ्चकषाया: ...	२२२
स्वरसलक्षणम् ...	२२३
स्वरसानुकल्प: ...	२२३
,, ...	२२३
स्वरसक्वाथयो: मात्रा ...	२२३
स्वरसे मध्वादीनां प्रक्षेपमात्रा	२२४
प्रमेहे स्वरसद्वयम् ...	२२४
रक्तपित्तादौ स्वरस: ...	२२५
कामलाया स्वरसा: ...	२२५
विषमज्वरेषु स्वरसद्वयम् ...	२२५
रक्तातीसारे स्वरस: ...	२२५
अतीसारे स्वरसा: ...	२२६
हृद्ग्रहश्वासादौ स्वरस: ...	२२६
पार्श्वशूलादौ स्वरस: ...	२२६
पित्तशूलप्लीहादौ स्वरसौ ...	२२७
अपच्यादौ स्वरस: ...	२२७
सूर्य्यावर्त्तादौ स्वरस: ...	२२७
उन्मादे स्वरसा: ...	२२८
कोद्रवमदे स्वरस: ...	२२८
छिन्नव्रणे स्वरस: ...	२२८
पुटपाकस्वरसविधि: ...	२२८
पुटपाकस्वरसस्य तत्र प्रक्षेपस्य च मात्रा	२२९
कुटजपुटपाक: ...	२२९
तण्डुलीयकविधि: ...	२३०
अरलुपुटपाक: ...	२३०
तित्तिरिपुटपाक: ...	२३०
दाडिमीपुटपाक: ...	२३१
बीजपूरादिपुटपाक: ...	२३१
वासापुटपाक: ...	२३२
कपोतकारीपक्षाङ्गपुटपाक: ...	२३२

विषयाः		पृष्ठाङ्काः ।
विभीतकपुटपाकः	...	२३२
गुण्ठीपुटपाकः	...	२३२
द्वितीयगुण्ठीपुटपाकः	...	२३३
शूरणपुटपाकः	...	२३३
शृङ्गवेरपुटपाकः	...	२३३

द्वितीयोऽध्यायः ।

क्वाथकल्पना	...	२३४
क्वाथविधिः	...	२३४
क्वाथस्य पर्य्यायः	...	२३५
क्वाथसेवने कालो मात्रा च	...	२३५
क्वाथे प्रक्षेप्याणां माननिर्देशः		२३५
अनाहृतमुखपात्रे क्वाथकरणे दोषनिर्देशः	...	२३६
सर्वज्वरे गुडूच्यादिः	...	२३६
वातज्वरे ,,	...	२३७
,, शालपर्ण्यादिः	...	२३७
,, काश्मर्य्यादिः	...	२३८
पित्तज्वरे कट्फलादिः	...	२३८
,, पर्पटादिः	...	२३८
,, द्राक्षादिः	...	२३९
,, पर्पटकादिः	...	२३९
कफज्वरे बीजपूरमूलादिः	...	२३९
,, भूनिम्बादिः	...	२३९
,, पटोलादिः	...	२४०
वातपित्तज्वरे पञ्चभद्रम्	...	२४०
वातकफज्वरे लघुपञ्चमूलादिः	...	२४०
आरग्वधादिः	...	२४१
पित्तकफज्वरे अमृताष्टकम्	...	२४१
,, पटोलादिः	...	२४१
सर्वज्वरे कण्टकार्य्यादिः	...	२४१
वातश्लेष्मज्वरे दशमूलम्	...	२४२
सन्निपातज्वरे अभयादिः	...	२४२
,, पिप्पल्यादिः	...	२४३
,, अष्टादशाङ्गः	...	२४३
वातश्लेष्मज्वरे कट्फलादिः	...	२४३
जीर्णज्वरे गुडूचीक्वाथः	...	२४४
पित्तज्वरे पर्पटादिः	...	२४४
जीर्णज्वरे निदिग्धिकादिः	...	२४५
सूतिकाज्वरे देवदार्वादिः	...	२४५
शीतज्वरे हृबेर चुटादिः	...	२४५
विषमज्वरे मूर्वादिः	...	२४६
,, पटोलादिः	...	२४६
ऐकाहिके ,,	...	२४६
तृतीयके गुडूच्यादिः	...	२४६
चातुर्थके देवदार्वादिः	...	२४७
ज्वरातीसारे हृबेर गुडूच्यादिः		२४७
,, नागरादिः	...	२४७
आमशूले धान्यपञ्चकम्	...	२४८
आमवाते धान्यनागरक्वाथः	...	२४८
सामरक्तातीसारे वत्सकादिः		२४८
,, कुटजाष्टकम्	...	२४९
अतीसारे श्रीवेरादिः	...	२४९
बालातीसारे धातक्यादिः	...	२४९
यष्ट्याह्वा शालपर्ण्यादिः	...	२५०
,, गुडूच्यादिः	...	२५०

विषयाः	पृष्ठाङ्काः ।
अतीसारे यवादिः ...	२५०
क्रिमिरोगे विफलादिः ...	२५०
„ फलत्रिकादिः ...	२५१
पाण्डुरोगे पुनर्नवादिः ...	२५१
रक्तपित्ते वासादिः ...	२५१
रक्तपित्तादौ वासाक्वाथः ...	२५१
कासे वासादि ...	२५२
„ क्षुद्रादिः ...	२५२
हिक्काधा रेणुकादिः ...	२५२
कृच्छ्रे योगत्रयम् ...	२५२
ग्रन्थ्या दशमूलक्वाथ. निर्गुण्डी-क्वाथश्च ...	२५३
आमवाते रास्नापञ्चकम् ...	२५३
„ रास्नासप्तकम् ...	२५३
वातव्याधौ महारास्नादिः ...	२५४
स्नायादिगतशूले एरण्डसप्तकम्	२५४
वातशूले नागरादिः इन्द्रयवक्वाथश्च	२५५
पित्तशूले विफलादि ...	२५५
कफशूले एरण्डमूलक्वाथः ...	२५५
हृदागादौ दशमूलक्वाथः ...	२५६
मूत्रकृच्छ्रे हरीतक्यादिः ...	२५६
अश्मर्यां वीरतरादिः ...	२५६
„ पलादि. ...	२५७
मूत्रकृच्छ्रे गोक्षुरमूलक्वाथः ...	२५७
प्रमेहे वरादिर्वल्कादिश्च ...	२५७
प्रमेहे फलत्रिकादिः ...	२५८
प्रदरे दार्व्यादि. ...	२५८
व्रणरोगे न्यग्रोधादि. ...	२५८

विषयाः	पृष्ठाङ्काः ।
स्थौल्ये बिल्वादिपञ्चमूलम् ...	२५९
„ विफलाक्वाथः उष्णाम्बु-योगश्च ...	२५९
उदरे चव्यादि ...	२५९
श्वयथूदरे पुनर्नवादिः ...	२६०
यकृदादौ पथ्यादिः ...	२६०
श्वयथे पुनर्नवादिः ...	२६०
वृद्धिरोगे विफलाक्वाथः ...	२६०
अन्त्रवृद्धौ रास्नादिः ...	२६०
गण्डमालाया काञ्चनारवरुणक्वाथौ	२६१
श्लीपदे शाखोटवल्कक्वाथ ...	२६१
अन्तर्विद्रधौ पुनर्नवादिः शिग्रुक्वाथश्च	२६१
„ वरुणादिः ...	२६१
वरुणादिगणः ...	२६१
भगन्दरे खदिरादिः ...	२६२
उपदंशे पटोलादिः ...	२६३
वातरक्ते अमृतादिः ...	२६३
„ पटोलादिः ...	२६३
श्वित्रे घावन्यादिः ...	२६३
वातरक्ते खल्पमञ्जिष्ठादिः ...	२६४
कुष्ठादौ बृहन्मञ्जिष्ठादिः ...	२६४
शिरोरोगादौ पथ्यादिः ...	२६५
नेत्ररोगे वासादिः ...	२६५
„ अमृतादिः ...	२६६
व्रणादौ पञ्चवल्कलम् ...	२६६
व्रणस्यालक्षणम् ...	२६६
रक्तातीसारे मुस्तादिप्रयोगा	२६७
यवागूसाधनविधि. ...	२६७

विषया:	पृष्ठाङ्का: ।
यवखान आसादियवागू: ...	२६८
यूषसाधनविधि: ...	२६८
त्रिदोषज्वर समसुष्टिकयूष: ...	२६८
पानीयसाधनविधि ...	२६९
पिपासाज्वर षड्ङ्गपानीयम्	२७०
उष्णोदकविधि: ...	२७०
रात्रौ उष्णोदकपानस्य गुणा:	२७१
क्षीरसाधनविधि: ...	२७१
जीर्णज्वरे पञ्चमूलीक्षीरम् ...	२७२
„ विकङ्कतादिक्षीरम्	२७२
यवागूकशरयो: साधनविधि:	२७२
यवागूगुणा:	२७४
विलेप्या. साधनविधिगुणाश्च...	२७४
पेयायूषयो. „ ...	२७४
„ गुणा: ...	२७५
भक्तस्य साधनविधि: गुणश्च ...	२७५
मण्डस्य „ „ ...	२७६
अष्टगुणमण्डस्य „ „ ...	२७६
वाष्यमण्डस्य „ „ ...	२७७
खाजमण्डस्य „ „ ...	२७७

तृतीयोऽध्याय: ।

फाण्टकल्पना ...	२७८
फाण्टस्य साधनविधिर्मात्राविधिश्च	२७८
वातपित्तज्वरे मधूकपृष्यादि:	२७९
पित्तज्वरे आम्रादि: ...	२८०
दाहतृष्णादौ मधूकपृष्यादि ..	„
फाण्टभेदमन्थस्य साधनविधि: मात्रा च ...	२८०
मद्यार्थे खर्जूरादि: ...	२८१
छर्द्यां मसूरप्रयोग: ...	„
तृष्णादौ यवप्रयोग: ...	„

चतुर्थोऽध्याय: ।

हिमकल्पना ...	२८२
शीतस्य साधनविधि: मात्राविधिश्च	२८२
रक्तपित्ते आम्रादि ...	२८३
तृष्णादौ सरिच्चादि: ...	„
वातपित्तज्वरे नीलात्पलादि.	„
जीर्णज्वरे गुडूचीप्रयोग: ...	२८४
कासादौ वासाप्रयोग: ...	„
अन्तर्दाहादौ धन्याकप्रयोग:	„
रक्तपित्तादौ धन्याकादि: ...	„

पञ्चमोऽध्याय: ।

कल्ककल्पना ...	२८५
कल्कस्य साधनविधि: पर्य्यायो मात्रा च ...	२८५
कल्के प्रक्षेप्याणां मात्रा ...	„
पाण्डुरोगादौ पिप्पलीवर्द्धमान-प्रयोग:	२८६
व्रणादौ निम्बपत्रप्रयोग: ...	„
गण्डेषु महानिम्बप्रयोग: ...	२८७
वातव्याधौ रसोनप्रयोग. ...	„
वातव्याधौ रसोनपिण्ड: ...	२८७
रसोनप्रयोगे अपथ्यानि ...	२८८
„ पथ्यानि ...	२८९

विषयाः	पृष्ठाङ्काः।
ऊरुस्तम्भे पिप्पल्यादिः ...	२८९
परिणामशूले अपराजितायोगः	,,
परिणामशूलादौ शुण्ठ्यादिः...	,,
रक्तार्शःसु अपामार्गप्रयोगः ...	२९०
रक्तातीसारे बदर्यादि. ...	,,
रक्तपित्तादौ लाक्षाप्रयोग. ...	,,
रक्तप्रदरे तण्डुलीयप्रयोगः ...	२९१
अतीसारादौ अङ्कोठप्रयोगः ...	,,
विषे बस्त्राकर्कोटिकादिप्रयोगत्रयम्	,,
सन्निपाते अमयादिः ...	,,
अग्निमान्द्यादौ पथ्यादिः ...	,,
क्रिमिरोगे विडङ्गादिः ...	२९२
रक्तार्शःसु तिलप्रयोग-नागकेशरप्रयोगौ	,,
ग्रहण्या शुण्ठ्यादि. ह्रस्वतीप्रयोगश्च	,,

विषयाः	पृष्ठाङ्काः।
विजातकचातुर्जातके ...	२९७
जीवनीयगणः ...	२९८
अष्टवर्गः	,,
पञ्चलवणम्	२९९
चारट्यम्	३००
सर्वाक्षिज्वरे सुदर्शनचूर्णम् ...	,,
कासादौ विल्वादि ...	३०२
,, कट्फलादि ...	,,
,, द्वितीयकट्फलादि ...	,,
,, तृतीयकट्फलादि ...	३०३
बालस्य कासादौ शुण्ठ्यादि ...	३०३
,, कासे यवचारादि ...	३०३
आमातीसारे शुण्ठ्यादि ...	३०३
,, हरीतक्यादि ...	३०४
अतीसारे खल्वगङ्गाधरचूर्णम्	३०४
,, हृद्दृगङ्गाधरचूर्णम्	३०४
,, अजमोदादिचूर्णम्	३०५
ग्रहण्या मरिचादि चूर्णम् ...	,,
,, कपित्थाष्टक ,, ...	,,
अरुच्यादौ दाडिमाष्टकम् ...	३०६
अतीसारादौ हृद्दृग दाडिमाष्टकम्	३०७
वातग्रहण्या पिप्पल्यादिचूर्णम्	३०७
अरोचकादौ लवङ्गादि ,, ...	,,
ग्रहण्या जातीफलादि ,, ...	३०८
अरुच्यादौ महाषाडवम् ...	३१०
उदरादौ नारायणचूर्णम् ...	३११
अजीर्णादौ हृद्यसंज्ञं ,, ...	३१५
शूलादौ पञ्चसमं ,, ...	,,

षष्ठोऽध्यायः।

चूर्णकल्पना ... २९३

चूर्णलक्षणं तस्य पर्य्यायौ मात्रा च	,,
चूर्णे गुडादीना द्रवाणाञ्च मात्रानिर्देशः	,,
दोषभेदेन अनुपानानां ,,	२९४
अनुपानस्य गुणः ...	,,
भावनार्थे द्रवपरिमाणनिर्देशः	२९५
सर्वाक्षिज्वरे आमलक्यादि. ...	,,
कासज्वरादौ पिप्पलीप्रयोगः	,,
मेढ्रादौ विल्वा ,,	२९६
अग्निमान्द्यादौ विकटु ,,	,,
अरुच्यादौ पञ्चकोलम् ...	२९७

विषया:	पृष्ठाङ्का: ।
आध्मानादौ नाराच चूर्णम् ...	३१४
यकृच्छूलादौ लवणभास्कर चूर्णम्	३१५
शूलादौ तुम्बुर्वादि चूर्णम् ...	३१६
ग्रहण्या चित्रकादि ...	३१७
अग्निमान्द्ये वडवानलचूर्णम् ...	,,
आमवातादौ अजमोदादिचूर्णम्	३१८
श्वासादौ शुण्ठ्यादि ,,	,,
गुल्मादौ हिङ्ग्वादि ,,	३१९
अरोचकादौ यमानीषाडव: ...	३२०
कासादौ तालीशादिचूर्णम् ...	,,
क्षयादौ मितोपलादिचूर्णम्...	३२१
गुल्मादौ भास्करलवणम् ...	३२२
कुर्याम् पलादिचूर्णम् ...	३२३
ऊर्ध्ववातादौ व्याघ्र्यादि चूर्णम्	३२४
कुष्ठादौ पञ्चनिम्बादि „ ...	,,
वाजीकरणे शतावर्य्यादि „ ...	३२५
„ अश्वगन्धादि „ ...	३२६
„ मुसल्यादि „ ...	,,
पाण्डुरोगादौ नवायस ,, ...	,,
स्नाने आकारकरभादि „ ...	३२७

सप्तमोऽध्याय: ।

वटकादिकल्पना ...	३२८
वटकपर्य्याया: ...	,,
वटकादीना प्रस्तुतविधि: ...	,,
वटकादिषु शर्करादीना मात्रा	,,
वटकादीना ,,	३२९
अर्श:प्रभृतिषु श्रीवाडवाग्नी गुड:	,,

विषया:	पृष्ठाङ्का: ।
कासे मरिचादिचूर्णम् ...	३३०
श्वासकासे गुडादिवटिका ...	३३१
तृष्णायाम् आमलक्यादिगुडिका	,,
अजीर्णादौ सञ्जीवनीवटी ...	,,
पीनसादौ व्योषादिगुडिका...	३३२
आमादौ गुडशुण्ठ्यादियोगचतुष्टयम्	,,
अर्शःसु वडवाग्न्यादिमोदक:	३३३
,, शूरणपिण्डो ...	,,
,, शूरणवटक: ...	,,
कामलादौ मण्डूरवटक. ...	३३४
विषमज्वरादौ पिप्पलीमोदक:	३३५
प्रमेहादौ चन्द्रप्रभागुग्गुलु ...	३३६
गुल्मादौ कांड्यायनगुडिका ...	३३७
आमवाते योगराजगुग्गुलु ...	३३८
वातरक्तादौ कैशोरगुग्गुलु ...	३४१
भगन्दरादौ त्रिफला ,, ...	३४३
प्रमेहादौ गोक्षुरादि „ ...	३४४
कुष्ठादौ त्रिफलामोदक. ...	,,
गण्डमालादौ कांचनारगुग्गुलु:	३४६
पुष्टौ माषादिमोदक ...	,,

अष्टमोऽध्याय: ।

अवलेहकल्पना ...	३४७
अवलेहस्य स्वरूप पर्य्यायो मात्रा च	,,
अवलेहे सितागुडद्रव्याणा मात्रा	३४८
सम्यक्पक्वावलेहलक्षणम् ...	,,
अवलेहे अनुपानम् ...	३४९
कासे कण्टकार्य्यवलेह: ...	,,

विषयः	पृष्ठाङ्काः ।
क्षयचीणादौ च्यवनप्राशः ...	३५०
रक्तपित्ते कूष्माण्डावलेहः ...	३५३
अर्शोरोगे खण्डसूरणावलेहः	३५४
कासे अगस्त्यहरीतक्यवलेहः	,,
अर्शोरोगादौ कुटजावलेहः...	३५६
रक्तातीसारादौ कुटजाष्टकम्	३५७

नवमोऽध्यायः ।

अथ स्नेहपरिभाषा ...	३५७
स्नेहस्य पाकविधिः मात्रा च	,,
स्नेहपाकार्थं क्वाथसाधनविधिः	३५८
क्वाथस्य मृदुमध्यादिभेदेन जलपरिमाणम्	,,
क्वाथद्रव्यस्य परिमाणभेदेन जलपरिमाणम्	,,
स्नेहपाके जलादिद्रवभेदेन कल्कस्य परिमाणम्	३५९
पञ्चादिद्रवेण स्नेहपाके द्रवपरिमाणम्	३६०
केवलकल्कसाध्यस्नेहपाकपरिभाषा	,,
कल्कोल्लेखविरहितस्नेहपाकपरिभाषा	,,
अकल्कस्नेहपाकपरिभाषा ...	३६१
पुष्पकल्कस्नेहपाकपरिभाषा ...	,,
स्नेहपाकसिद्धिलक्षणम् ...	३६२
स्नेहस्य विविधपाकलक्षणम् ...	,,
दग्धानपक्वस्नेहयोः दोषः ...	,,
पाकविशेषेण स्नेहस्य उपयोगिता	३६३
पुराण पुराण घृतादीनां गुणाधिक्यम्	,,
विषमज्वरादौ चीरषट्पलघृतम्	,,
ग्रहण्यादौ चाङ्गेरी घृतम् ...	३६४
,, मसूर ,, ...	,,
रक्तपित्तादौ कामदेव ,, ...	३६५
उन्मादादौ पानीयकल्याणक घृतम्	३६७
वातरक्ते अमृता घृतम् ...	३६८
कुष्ठादौ महातिक्तकं ,, ...	,,
,, काशीशाद्य ,, ...	३६९
व्रणशोथे जात्यादि ,, ...	३७०
उदरे बिन्दु ,, ...	३७१
नेत्ररोगे त्रिफला ,, ...	३७२
व्रणशोथे गौराद्य ,, ...	३७३
शिरोरोगे माधुर ,, ...	,,
योनिव्यापत्सु हृतफलघृतम्	३७४
,, स्वल्पफलघृतम ...	३७५
विषमज्वरादौ पञ्चतिक्तकं घृतम्	३७६

दशमोऽध्यायः ।

तैलकल्पना ...	३७७
विषमज्वरादौ लाक्षादि तैलम्	,,
जीर्णज्वरे भृङ्गराज ,,	,,
वातव्याधौ नारायण ,,	३७८
वैपथुवाते वाकुची ,,	३८०
वातव्याधौ बला ,,	,,
,, प्रसारणी ,,	३८१
,, माष ,,	३८२
,, शतावरी ,,	३८३
अर्शसु काशीशाद्यं ,,	३८५
वातरक्ते पिण्ड ,,	३८६

विषयाः	पृष्ठाङ्काः।
पामादौ अर्क तैलम् ..	३८६
कुष्ठे मरिचाद्य ,, ...	,,
अरुषिकाया विषलाद्य तैलम्	३८७
पलिते निम्बबीज ,,	,,
,, यष्टिमधुकाद्यं ,,	३८८
इन्द्रलुप्ते करञ्जाद्य ,,	,,
पलिते नीलिकाद्यं ,,	,,
पलितादौ भृङ्गराज ,,	३८९
मुखरागे हरिमेदाद्य ,,	३९०
नाडीव्रणादौ नाल्याद्यं ,,	,,
कर्णशूले छिङ्गाद्य ,,	३९१
बाधिर्ये बिल्व ,,	,,
कर्णरोगे चार ,,	३९२
मधुगुक्तम् ...	३९३
पीनसे पाठाद्यं तैलम ...	,,
पूतिनासाया व्याघ्राद्यं तैलम्	,,
क्षवथौ कुष्ठाद्य ,,	३९४
नासार्शसु गृहधूमाद्य ,,	,,
कुष्ठे वज्रोक्षीराद्य ,,	,,
स्त्रीनशातने करवीराद्यं ,,	३९५
क्षये चन्दनाद्य ,,	,,
गण्डमालाया वचाद्य ,,	३९६
,, लाङ्गली ,,	,,
वातव्याध्यादौ धुस्तूराद्य ,,	,,

एकादशोऽध्यायः।

सम्भानकल्पना ...	३९८
आसवारिष्टादीना सामान्यलक्षणम्	,,

विषयाः	पृष्ठाङ्काः।
आसवारिष्टयोः भेदो मात्रा च	३९८
अनुक्तमानारिष्टादौ गुडक्षौद्रादीनां मात्रा ...	३९९
क्षौद्ररस-पक्वरसमधुनो लक्षणम्	,,
विविधसुराभेदाना ,,	४००
वारुणी ,,	,,
शुक्ल ,,	,,
चुक्र ,,	४०१
गुडयुक्त ,,	,,
इक्षुयुक्त मृद्वीकाशुक्तच ...	,,
तुषाम्बु सौवीरकयोः लक्षणम्	४०२
काञ्जिकलक्षणम ...	,,
शिखाक्षीलक्षणम् ...	,,
रक्तपित्ते सुरासवः ...	,,
परिणामशूलादौ कुमार्य्यासवः	४०३
क्षयादौ पिप्पल्याद्यासवः ...	४०४
पाण्डुरोगादौ लोहासवः ...	४०५
ग्रहण्यादौ मृद्वीकारिष्टः ...	,,
ज्वरे कुटजारिष्टः ...	४०६
विद्रध्यादौ विडङ्गारिष्टः ...	,,
प्रमेहादौ देवदार्वाद्यरिष्टः ...	४०७
कुष्ठादौ खदिरारिष्टः ...	४०८
क्षयादौ बब्बूलारिष्टः ...	४०९
,, द्राक्षारिष्टः ...	,,
प्लीहादौ रोहीतकारिष्टः ...	४१०
वाजीकरणादौ दशमूलारिष्टः	,,

विषया:	पृष्ठाङ्का: ।
द्वादशोऽध्याय: ।	
धातूनां शोधनमारणाधिकार: ...	४१३
सप्तधातुनिर्देश: ...	,,
स्वर्णादिधातुपञ्चकानां शोधनम्	,,
नागवङ्गयो: शोधनम् ...	४१४
स्वर्णमारणम् ...	,,
मतान्तरे स्वर्णमारणम् ...	४१५
,, ,, ...	,,
,, ,, ...	४१६
,, ,, ...	,,
,, ,, ...	,,
हतस्वर्णस्य गुणा: ...	४१७
रौप्यमारणम् ...	,,
मतान्तरे रौप्यमारणम् ...	,,
पित्तलमारणम् ...	४१८
कांस्य ,, ...	,,
ताम्रपित्तलकांस्यमारणानि ...	,,
ताम्र मारणम् ...	,,
सीसक ,, ...	४२०
मतान्तरे सीसकमारणम् ...	,,
वङ्गमारणम् ...	४२१
लौह ,, ...	४२२
मतान्तरे लौहमारणम् ...	४२३
,, ,, ,, ...	,,
,, ,, ,, ...	४२४
सर्वधातूनां ,, ...	,,
उपधातुनिर्देश: ...	४२५

विषया:	पृष्ठाङ्का: ।
स्वर्णमाक्षिकशोधनम् ...	४२५
,, मारणम् ...	,,
रौप्यमाक्षिकशोधनम् ...	,,
तुत्थक शोधनम् ...	४२६
अभ्रक ,, ...	,,
,, मारणम् ...	४२७
हताभ्रस्य प्रयोगार्हताकरणम्	,,
,, गुणा: ...	,,
मतान्तरे अभ्रमारणम् ...	४२८
,, ,, ...	,,
नीलाञ्जन शोधनम् ...	,,
गैरिकादि ,, ...	४२९
मन:शिला ,, ...	,,
हरिताल ,, ...	४३०
खर्पर ,, ...	,,
सर्वधातूना सत्त्वपातनम् ...	,,
क्षीरक शोधनम् ...	४३१
,, मारणम् ...	४३२
मतान्तरे क्षीरकमारणम् ...	,,
,, ,, ,, ...	,,
वैक्रान्त शोधनम् ...	४३३
,, मारणम् ...	,,
सर्वरत्नाना शोधनम् ...	,,
,, मारणम् ...	,,
मतान्तरे सर्वरत्नानां शोधनमारणम्	४३५
शिलाजतुशोधनम् ...	,,
मतान्तरे शिलाजतुशोधनम्	४३६
मण्डूर शोधनम् ...	४३७
चारप्रक्षुततविधि: ...	४३८

विषया:	पृष्ठाङ्का: ।

त्रयोदशोऽध्याय: ।

रसगन्धकशोधनमारणा-
धिकार: ... ४३९
पारदप्रशंसा ... ,,
पारदपर्य्याया: ... ४४०
नवविधधातूना नवग्रहसञ्ज्ञकत्वम् ४४१
पारद शोधनम् ... ,,
गन्धक ,, ... ४४६
हिङ्गुल ,, ... ४४७
हिङ्गुलात् रसाकर्षणविधि: ... ,,
शुद्धरसस्य सुखकरणविधि. ... ४४८
मतान्तरे शुद्धरसस्य सुखकरणविधि: ४४९
,, ,, ,, ,,
गन्धकमारणम् ... ,,
पारदमारणम् ... ४५०
मतान्तरे पारदमारणम् ... ४५१
,, ,, ,, ... ४५२
,, ,, ,, ... ४५३

चतुर्दशोऽध्याय: ।

रसकल्पना ... ४५३
सर्वज्वरे ज्वराङ्कुश रस: ... ,,
विषमज्वरे ज्वरारि ,, ... ४५४
,, शीतज्वरारि रस: ४५५
सर्वज्वरे ज्वरघ्नी गुटिका ... ४५६
त्रयोदशो लोकनाथ रस. ... ४५७
,, मृगाङ्कपोटलि ,, ... ४६०

विषया:	पृष्ठाङ्का: ।
त्रयोदशो हिमगर्भपोटलि रस: ...	४६२
,, ,, ,, ...	४६३
विषमज्वरे ज्वराङ्कुशो ,, ...	४६४
अतिसारे आनन्दभैरवो ,, ...	४६५
सन्निपातज्वरे लघुसूचिकाभरणो रस: ...	४६६
,, लघुवसन्त रस:	४६७
,, पञ्चवक्त्र. ,, ...	,,
,, उन्मत्त ,, ...	४६८
,, अञ्जनम् ...	,,
उदावर्त्ते नाराचो रस: ...	४६९
विरचने इच्छाभेदी ,, ...	,,
सर्वमेहे वसन्तकुसुमाकरो रस:	,,
त्रयो राजमृगाङ्को रस: ...	४७०
त्रयकासे त्रयमग्नि रस: ...	४७१
कासे अमृतार्णवो रस: ...	४७२
श्वासे सूर्य्यावर्त्तो रस: ...	,,
वातव्याधौ खच्छन्दभैरवो रस:	४७३
यक्ष्मा हंसपोटली रस: ...	,,
अश्मर्य्यां विक्रमो रस. ...	४७४
कुष्ठे महाताण्डेश्वरी रस: ..	,,
,, कुष्ठकुठारो रस: ...	४७५
कुष्ठे श्वित्रे च उदयादित्यो रस:	४७६
सन्निकुष्ठे सर्वेश्वरो रस: ...	४७८
,, स्वर्णचौरी रस: ...	४७९
प्रमेहे मेहवज्री ,, ...	,,
उदररोगे महावह्नि. ,, ...	४८०
गुल्मप्लीहादौ विद्याधरो रस:	४८१
परिणामशूले त्रिनेत्रो ,,	,,

विषया:	पृष्ठाङ्का: ।
शूले शूलगजकेशरी रस: ...	४८२
अग्निमान्द्ये अग्नितुण्डीवटी रस:	,,
अजीर्णे अजीर्णकण्टको रस:	४८३
कफे मन्थानभैरवो रस: ...	,,
वातव्याधौ वातगोग्निनो रस:	४८४
सन्निपाताटौ कनकसुन्दरी रस:	,,
सन्निपाते सन्निपातभैरवो रस	४८५
ग्रहण्या ग्रहणीकपाटो रस: ...	४८६
,, ग्रहणीवज्रकपाटे ...	४८७
वाजीकरणे मदनकामटेवी रस:	४८८
,, कन्दर्पसुन्दरो रस:	४८९
रसायने लोहरसायनम् ...	४९१
जैपालशोधनम् ...	४९३
विष ,, ...	,,

उत्तरखण्ड: ।

प्रथमोऽध्याय: ।

अथ स्नेहपानविधि: ...	४९४
चतुर्विध: स्नेह: स्नेहपानकालश्च	,,
स्नेहस्य द्विविधयोनि: तयो: श्रेष्ठनिर्देशश्च ...	४९५
भिन्नस्नेहानां नामानि ...	,,
स्नेहपाने तस्य सात्म्यीभवने च कालनियम: ...	,,
दोषादीना बलाबलानुसारेण पानीयस्नेहस्य मात्रा ...	४९६
अमात्रादिविहितस्य स्नेहस्य अपकारिता ...	,,
अग्निबलभेदेन पानीयस्नेहस्य मात्रा	४९७
मतान्तरे ,, ,, ,,	
मात्राभेदेन स्नेहस्य गुणविशेष:	४९८
दोषभेदेन स्नेहप्रयोगनियम:	४९९
घृतपानार्हा: ...	,,
तैलपानार्हा: ...	५००
वसापानार्हा: ...	,,
मज्जपानार्हा: ...	५०१
ऋतुभेदेन दोषभेदेन च स्नेहपान-काल: ...	,,
नस्यादिषु प्रयोज्यस्नेहनियम:	,,
स्नेहविशेषे अनुपानविशेष: ...	५०२
स्नेहाद्यडाढोना स्नेहप्रयोगनियम:	,,
सम्य स्नेहनकरी योगी ...	५०३
स्नेहाजीर्णे चिकित्सा ...	५०४
,, चिकित्सान्तरम् ...	,,
स्नेहव्यापज्जनिततृष्णाया: चिकित्सा	,,
स्नेहपानानर्हा: ...	५०५
स्नेहपानार्हा: ...	,,
सम्यक् स्निग्धस्य तथा रूक्षस्य च लक्षणम् ...	,,
अतिस्निग्धस्य लक्षणम् ...	५०६
रूक्षातिस्निग्धयो: चिकित्सा ...	,,
स्नेहसेविन: लक्षणम ...	५०७
,, अपथ्यम् ...	,,

द्वितीयोऽध्याय: ।

अथ स्वेदविधि: ...	५०८

विषयाः	पृष्ठाङ्काः।
चतुर्विधस्वेदानां नामानि ...	५०८
दोषविशेषे स्वेदविशेषः ...	,,
प्रवरावरमध्यस्वेदस्य विषयः	५०९
दोषविशेषे रुक्षादिस्वेदनियमः	,,
प्राक् स्वेदार्हाः ...	५१०
पश्चात् ,, ...	५११
पूर्वं पश्चाच्च ,, ...	,,
सर्वविधस्वेदस्य सामान्यकाल- नियमः ...	५१२
स्वेदस्य फलम् ...	,,
स्वेदकाले वृन्नेक्षयोः रक्षाविधिः	,,
स्वेदानर्हाः ...	५१३
अतिस्वेदजा रोगाः तेषां सामान्य विधिश्च ...	,,
तापस्वेदस्य नियमः ...	५१४
ऊष्मस्वेदस्य ,, ...	,,
,, अन्यविधनियमः ...	,,
,, ,, ...	५१५
उपनाहस्वेदस्य नियमः ...	५१६
महाशाल्वणस्वेदस्य नियमः ...	,,
द्रवस्वेदस्य नियमः ...	५१८
द्रवस्वेदार्थे द्रवस्य परिमाणम्	,,
स्वेदार्थं द्रवावगाहने कालनियमः	,,
,, स्वेदावगाहने फलम्	५१९
सम्यक् स्विन्नस्य लक्षणम् ...	५२०
,, ,, आचारनिर्देशः	५२१
मंशोधनस्य कालनिर्देशः ...	५२१
वमनार्हाः ...	५२२
वमनसाध्या रोगाः ...	,,
वमनानर्हाः ...	५२३
वमनानर्हाणामवस्थाविशेषे वमनविधिः ...	,,
सुकुमारादीनां वमनविधिः ...	५२४
वमनस्य पूर्वकर्त्तव्यनिर्देशः ...	,,
वामकद्रव्ये अवश्यदेयद्रव्यनिर्देशः	,,
वमनविरेचनोपयोगिद्रव्यनिर्देशः	५२५
वमनार्थं क्वाथविधिः ...	,,
,, क्वाथपानस्य उत्तमादिमात्रा	,,
,, कल्कादीनाम् ,, ,,	५२६
उत्तमादिभेदेन वमनस्य वैगिकात्तिक- माननिर्देशः ...	,,
वमनादौ प्रस्थमानस्य पारिभाषिकार्थः	,,
दोषभेदेन वमनद्रव्यस्य भेदनिर्देशः	५२७
वमनविधिः ...	,,
दुर्वान्तस्य लक्षणम् ...	५२८
अतिवान्तस्य ,, ...	,,
वमनातियोगे चिकित्सा ...	५२९
सम्यक् वमनलक्षणम् ...	५३०
,, वमने पथ्यम् ...	५३१
,, वमनस्य फलम् ...	,,
वमने अपथ्यम् ...	५३२

तृतीयोऽध्यायः।

अथ वमनविधिः ... ५२१

चतुर्थोऽध्यायः।

अथ विरेचनविधिः ... ५३३

विषया:	पृष्ठाङ्का: ।
विरेचनात् पूर्वकर्त्तव्यनिर्देश: ...	५३३
,, पूर्वं वमने अकृते दोषनिर्देश: ,,	
,, ,, कर्त्तव्यान्तरनिर्देश: ,,	
वैरेचनिक-ऋतुनिर्देश: ...	५३४
विरेचनार्हरोगनिर्देश: ...	५३५
संशोधनस्य गुणा: ...	,,
विरेचनानर्हा: ...	५३६
विरेचनार्हा: ...	५३७
दोषभेदेन कोष्ठभेदनिर्देश: ...	,,
मृदादिकोष्ठभेदेन मृद्वादिमात्रा-निर्देश: ...	५३८
मृदुमध्यतीक्ष्णविरेचनद्रव्यनिर्देश:	,,
उत्तमादिभेदेन वैगिकी आन्तिकी च मात्रा ...	,,
,, मानिकी मात्रा	५३९
दोषभेदेन विरेचनद्रव्यनिर्देश:	५४०
एरण्डतैलप्रयोग: ...	,,
वर्षासु विल्वप्रयोग: ...	५४१
शरदि ,, ...	,,
शिशिरवसन्तयो: ,, ...	,,
ग्रीष्मे ,, ...	,,
अभयामोदक: ...	५४२
विरेचकपानानन्तरं कर्त्तव्यनिर्देश:	५४३
सम्यक् वमनविरेचनयो: लक्षणम्	५४४
विरेचनायोगस्य ,,	,,
,, चिकित्सा ...	५४४
विरेचनातियोगस्य लक्षणम् ...	५४५
,, चिकित्सा ...	,,
सम्यक् विरिक्तस्य लक्षणं तत्र कर्त्तव्यञ्च ...	५४६

विषया:	पृष्ठाङ्का: ।
विरेचनस्य गुणा: ...	५४६
विरिक्तस्य अपथ्यम् ...	५४७
,, पथ्यम् ...	,,
सम्यक् विरेचनाभावे कर्त्तव्यनिर्देश:	,,

पञ्चमोऽध्याय: ।

अथ वस्तिविधि: ...	५४८
वस्ते: द्वैविध्यं निरुक्तिश्च ...	,,
द्विविधवस्ते: लक्षणम् ...	,,
त्रिविधवस्ते: क्रमविधि: ...	,,
अनुवासनस्य भेद: भेदस्य तस्य मात्रा च ...	५४९
अनुवासनार्हा: ...	,,
अनुवासनानर्हा: ...	५५०
वस्तिनेत्रप्रस्तुतविधि: ...	५५१
त्रुटे वस्तिनेत्रप्रस्तुतविधि: ...	५५३
वस्तिप्रयोगस्य गुणा: ...	,,
ऋतुभेदे स्नेहवस्तिप्रयोगस्य काल:	५५४
स्नेहवस्तिप्रयोगे भोजनविधि:	,,
अयोगातियोगयुक्तवस्ते: निष्फलता	,,
उत्तमादिभेदेन वस्तेर्मात्रा ...	,,
अनुवासने प्रयोज्यद्रव्यस्य उत्तमादि-भेदेन मात्रा ...	५५५
अनुवासनप्रयोगविधि: ...	,,
सम्यगनुवासितस्य लक्षणम् ...	५५८
स्नेहे प्रत्यागते कर्त्तव्यनिर्देश: ...	,,
अनुवासनव्यापत्तौ चिकित्सा ...	,,
वस्तिदानस्य सङ्ख्यानिर्देश: ...	५५९

विषया:	पृष्ठाङ्का: ।
अष्टादशवारदृष्टिवस्ते: प्रत्येकस्य फलम्	५६०
अनुवासनस्नेहे सम्य प्रत्यागते पुनर्दान- विधि: ...	५६१
स्नेहे अनागते दोषनिर्देश चिकित्सा च ,,	
,, अनागतेऽपि अनुपद्रवे कर्त्तव्य- निर्देश: ...	५६२
अनागते स्नेहे कर्त्तव्यनिर्देश ...	,,
अनुवासनार्थं गुडूच्यादि तैलम ...	५६३
वस्तिव्यापद सङ्ख्या ...	,,
अनुवासने पथ्यविधि: ...	५६४

षष्ठोऽध्याय: ।

अथ निरूहविधि: ...	५६४
कारणभेदेन निरूहस्य भेदोक्ति:	,,
निरूहस्य पर्य्यायो निरुक्तिश्च ...	५६५
,, उत्तमादिमात्रा ...	,,
निरूहानर्हा: ...	५६६
निरूहार्हा: ...	,,
निरूहस्य स्थानकालावस्थानिर्देश:	५६७
निरूहदानविधि: ...	,,
सम्यक् निरूहस्य लक्षणम् ...	५६८
असम्यक् ,, ,, ...	,,
निरूहस्य अनुवासनवत दैयतानिर्देश:	५६९
निरूढे दोषभेदेन भोजनादिविधि:	,,
सुकुमारादौ तीक्ष्णवस्तिदाने दोष- निर्देश: ...	५७०
वस्तिदानक्रम: ...	,,
उत्क्लेशनवास्ति. ...	,,
दोषहर वस्ति: ...	५७०
संशमन ,, ...	,,
संशोधन ,, ...	५७१
लेखन ,, ...	,,
बृंहण ,, ...	,,
पिच्छिल ,, ...	,,
निरूहापथोमित्रव्याणां परिमाण- विधि: ...	५७२
निरूहे दोषभेदेन क्षौद्रस्नेहयोर्मात्रा भेद: ...	५७३
माधुतैलिकवस्ति: ...	,,
यापना ,, ...	,,
युक्तरथ ,, ...	५७४
सिद्ध ,, ...	,,
निरूहे पथ्यापथ्यविधि: ...	,,

सप्तमोऽध्याय: ।

अथ उत्तरवस्तिविधि:	५७५
उत्तरवस्त्यर्थं नेत्रस्वरूपम् ...	,,
वयोभेदेन दैयस्नेहस्य मात्रानिर्देश:	,,
उत्तरवस्तिप्रयोगविधि: ...	५७६
स्त्रीणा नेत्रस्वरूपम् ...	५७७
बालाना ,, ...	,,
स्त्रीबालयोर्दैयस्नेहस्य मात्रानिर्देश:	,,
स्त्रीषु वस्तिप्रयोगविधि: ...	,,
वस्तिदाहे प्रतीकार: ...	५७८
उत्तरवस्तेर्गुण: ...	,,
अतिदैयेन उत्तरवस्तेर्लिङ्गादि- निर्देश: ...	५७९

विषयाः	पृष्ठाङ्काः ।
फलवर्त्तेः स्वरूपं प्रयोगविधिश्च	५७९

अष्टमोऽध्यायः ।

अथ नस्यविधिः ...	५८०
नस्यस्य निरुक्तं पर्य्यायश्च ...	,,
द्विविधं नस्यं तयोः कार्य्यञ्च ...	,,
नस्यप्रयोगस्य अवस्था कालश्च	५८१
नस्यानर्हाः ...	,,
नस्यार्हव्योनिर्देशः ...	५८२
वैरेचननस्यस्य द्रव्यनिर्देशः ...	,,
,, मात्रा ,, ...	५८३
नस्यार्हद्रव्याणां परिमाणम् ...	,,
वैरेचननस्यस्य द्वौ भेदौ ...	,,
अवपीडस्य स्वरूपम् ...	५८४
प्रधमनस्य ,, ...	,,
वैरेचननस्यार्हरोगाः ...	,,
स्नेहननस्यार्हाः ...	,,
अवपीडनस्यार्हाः ...	५८५
प्रधमननस्यार्हाः ...	,,
गुडादि-पिप्पल्यादिनस्ये ...	,,
संज्ञाप्रबोधने मधूकसारादि नस्यम्	५८६
तन्द्रायां सैन्धवादि ,,	,,
,, भावितसैन्धवादि ,,	,,
स्नेहननस्यस्य भेददयनिर्देशः ...	,,
स्नेहनभेदनर्शस्य मात्रा ,, ...	५८७
नर्शःप्रयोगस्य अवधि ,, ...	,,
नर्शःप्रयोगे विविधव्यापन्निर्देशः	५८८
नर्शःव्यापदः चिकित्सा ...	,,
स्नेहननस्यार्हरोगाः ...	५८८
सूर्य्यावर्त्तादौ कुडुमादि नस्यम्	,,
,, अणुतैलादि ,,	५८९
दोषभेदेन नस्ये स्नेहभेदनिर्देशः	,,
पक्षाघातादौ माषादिनस्यम् ...	,,
प्रतिमर्शस्य मात्रानिर्देशः ...	५९०
बिन्दुमात्रायाः परिमाणनिर्देशः	,,
मर्शनस्ये प्राणस्य ,, ...	,,
प्रतिमर्शनस्यस्य कालः ...	,,
प्रतिमर्शस्य मात्रान्तरनिर्देशः ...	,,
,, गुणाः ...	५९१
पलिते स्नेहनस्यानि ...	,,
नस्यप्रयोगविधिः ...	,,
नस्यग्रहणानन्तरम् आचारनिर्देशः	५९२
नस्ये सम्यग्योगायोगातियोगनिर्देशः	,,
,, सम्यग्योगलक्षणम् ...	,,
,, हीनयोग ,, ...	५९३
नस्ये अतियोग ,, ...	,,
,, हीनातिसम्यग्योगे क्रियासूत्रम्	,,
नस्यातियोगे लक्षणान्तरं चिकित्सान्तरञ्च ...	,,
पञ्चकर्मणां सञ्ज्ञानिर्देशः ...	५९४

नवमोऽध्यायः ।

अथ धूमपानविधिः	५९४
षड्विधधूमानां नामनिर्देशः	,,
शमनादिद्रव्याणां पर्य्यायकथनम्	५९५
धूमपानानर्हाः ...	,,

विषया:	पृष्ठाङ्का: ।
अविधिपीतधूमस्य दोषनिर्देश:	
प्रतीकारनिर्देशश्च ...	५९६
धूमयोग्यवयोनिर्देश: ..	५९७
सम्यग्युक्तस्य धूमस्य गुणा: ..	,,
सामान्यतो धूमनेत्रस्य स्वरूपनिर्देश:	,,
धूमनेत्रस्य शमनादिविशेषत:	
स्वरूपनिर्देश. ...	५९८
धूमनेत्रविधि. धूमपानविधिश्च	५९९
व्रणधूपनविधि. ...	६००
शमनादिधूमाना पृथक् द्रव्यनिर्देश. ..	
बालग्रहादौ अपराजितो धूप:	६०१
धूमप्रयोगे अपथ्यनिर्देश धूम-	
नेत्रस्य उपादाननिर्देशश्च	६०२

दशमोऽध्याय: ।

अथ गण्डूष-कवल-प्रति-	
सारणविधि: ...	६०३
चतुर्विधगण्डूषकवलयो. नामनिर्देश:	,,
दोषभेदेन तथा प्रयोगनिर्देश.	
द्रव्यनिर्देशश्च ..	,,
गण्डूषकवलयोर्भेद. ...	६०४
,, द्रव्याणा परिमाणनिर्देश:	,,
,, वयोनिर्देश: ...	६०५
गण्डूषस्य कतिवारकर्त्तव्यतानिर्देश:	,,
स्नेहिकगण्डूषस्य द्रव्यम् ...	,,
हनुवक्त्रादाहे गण्डूष: ...	६०६
मुखव्रणादौ ,, ...	,,
विषादौ दन्तचाले च गण्डूषौ	,,

विषया:	पृष्ठाङ्का: ।
मुखशोषे कफे च गण्डूषौ ...	६०६
कफे रक्तपित्ते च गण्डूष: ...	६०७
मुखपाके ,, ...	,,
कवलप्रतिसारणयोर्द्रव्यनिर्देश:	,,
मुखजाड्यादौ कवल: ...	,,
प्रतिसारणस्य त्रैविध्यनिर्देश:	६०८
दन्तमूलात् रक्तस्रावादौ कुष्ठादि-	
प्रतिसारणम् ...	,,
क्षीणातियोगयुक्तगण्डूषादिलक्षणम्	,,
सम्यग्योगयुक्त ,, ,,	६०९

एकादशोऽध्याय: ।

अथ प्रलेपमूर्द्धतैलकर्ण-	
पूरणविधि: ...	६०९
प्रलेपस्य पर्य्यायाश्च भेदश्च ...	,,
लेपस्य प्रमाणनिर्देश: आर्द्रशुष्कयो:	
गुणनिर्देशश्च ...	६१०
शोथे पुनर्नवादिलेप: ...	,,
दाहे विभीतकमज्जालेप: ...	,,
विसर्पादौ दशाङ्गलेप: ...	६११
भल्लातकशोथे अजादुग्धादिलेपद्वयम्	,,
कोठजविस्फोटे खाङ्कल्यादिलेप:	,,
व्यङ्गे रक्तचन्दनादिलेप: ...	६१२
मुखपिडकादौ मातुलुङ्गजटादिलेप:	,,
तारुण्यपिडकाया लोध्रादिलेप-	
द्वयम् ...	,,
व्यङ्गे अर्जुनत्वगादिलेपद्वयम् ...	,,
मुखकार्ष्ण्ये अर्कक्षीरादिलेप....	६१३

विषयः	पृष्ठाङ्कः ।
तारुण्यपिडकादौ वटपत्रादिलेपः	६१३
अर्शोऽधिकाया पुराणपिण्याकादिलेप.	,,
,, खदिरादिलेपः	,,
दारुणे प्रियालबीजादि ,,	६१४
,, खाखसबीज ,,	,,
,, भासबीजादि ,,	,,
क्षुद्रलुप्त तिक्तपटोलरस ,,	,,
,, हृद्तोरसादिलेपत्रयम्	,,
,, गोक्षुरादिलेपः ...	६१५
,, कृमिदन्तलसण्यादिलेपः	,,
,, यष्ट्यादिलेपः ...	,,
रोमसञ्जनने चतुष्पदाना त्वगादि-भस्मलेपः ...	,,
पलिते इन्द्रवारुणीबीजतैलाभ्यङ्गः	६१६
,, अयश्चूर्णादिलेपः ...	,,
,, विफलादिलेप. ...	,,
,, ,, ...	,,
,, ,, ...	६१७
रोमशातने शङ्खचूर्णादिलेपः	,,
,, तालकादिलेपः ...	६१८
श्वित्रे सुवर्णपुष्प्यादिलेपः ...	,,
,, वायसादिलेपः ...	,,
,, तालकादिलेपः ...	,,
,, वाकुच्यादिलेप. ...	६१९
सिध्मे धात्र्यादिलेपः ...	,,
,, दार्व्यादिलेपः ...	,,
नेत्ररोगे हरीतक्यादिलेपः ...	६२०
अञ्जननामिकाया रसाञ्जनादिलेपः	,,
दद्रौ प्रपुन्नाडबीजादिलेपः	,,

विषयः	पृष्ठाङ्कः ।
पामादौ हैमचौर्यादिलेपः ...	६२०
कण्डूदौ दूर्वादिलेपः ...	६२१
,, ,, ...	,,
दद्रुरोगे सिद्धार्थादिलेपः ...	,,
वातविसर्पे रास्नादिलेपः ...	,,
पित्तविसर्पे मृणालादिलेपः	,,
श्लेष्मविसर्पे विफलादिलेपः ...	६२२
वातरक्त-रक्तपित्तयोः सान्ध्यादिलेपः	,,
नासासुतरक्ते आमलकीलेपः	,,
वातशिरारोगे कुष्ठादिलेपत्रयम्	,,
,, देवदार्वादिलेपः	६२३
रक्तपित्तजशिरोरोगे चन्दनादिलेप.	,,
पित्तशिरोरोगादौ धात्र्यादिलेपः	,,
कफशिरोरोगे हरेण्वादिलेपः	,,
,, शुण्ठ्यादिलेपः	६२४
सूर्यावर्त्ताङ्गावभेदकयोः शारिवादि-लेपः ...	,,
शङ्खकानन्तवातयोः शतावर्य्यादिलेपः	,,
प्रलेपस्य हैविध्यनिर्देशः ...	,,
द्विविधयोस्तयोर्लक्षणे ...	६२५
तयो. प्रयोगविधिः ...	,,
अवस्थाविशेषे रात्रौ प्रलेपदानस्य कर्त्तव्यतानिर्देशः ...	६२६
व्रणस्य सप्तविधोपक्रमाः ...	,,
वातजव्रणशोथे बीजपूरजटादिलेपः	६२७
पित्तजव्रणशोथे मधुकादिलेपः	,,
कफजव्रणशोथे क्षणादिलेपः ...	,,
रक्तजागन्तुजव्रणशोथयोः निशादि-लेपः ...	६२८

विषयाः	पृष्ठाङ्काः।	विषयाः	पृष्ठाङ्काः।
व्रणशोथे पाचनः श्रृणवीजादिलेपः	६२८	शिथिलयोनौ पलाशफलादिलेपः	६३५
,, दारणो दन्त्यादिलेपः	,,	,, माकन्दफलादिलेपः	,,
,, ,, चिरबिल्वादि-लेप ...	६२९	खिल्लखल्लादौ मरिचादिलेपः ...	,,
,, ,, व्रजिकादिलेपद्वयम्	,,	खिल्लखल्ली सिताद्दिलेपः ...	,,
,, शोधन. तिलादिलेपः	,,	योनिद्वारणे इन्द्रवारुणिकादिलेपः	,,
,, शोधनरोपणः निम्ब-पत्रादिलेपः ...	६३०	गाढदौर्गन्ध्ये ताम्बूलपत्रादिलेपः	६३६
,, त्रिफला करञ्जादिलेपा	,,	,, कुलत्थाद्यवधूलनम्	,,
दूषितव्रणशोथे शोधनरोपणः निम्ब-पत्रादिलेपः ...	,,	वर्त्मीकरणे वचादिलेपः ...	,,
मूले मदनफलादिलेपः ...	,,	मूर्द्धतैलस्य चतुर्विधत्वनिर्देशः ..	,,
वातजविद्रधौ शिग्रुमूलादिलेपः	,,	अभ्यङ्गादीनां विधिः ...	,,
पित्तजविद्रधौ लाक्षादिलेपद्वयम्	६३१	शिरोवस्तिदानस्य दिनसङ्ख्या ...	६३८
कफज.वद्रधौ इष्टकादिलेपः ...	,,	शिरोवस्तेरनन्तर कर्त्तव्यनिर्देशः	,,
रक्तजागन्तुजविद्रध्यौ रक्तचन्दनादि-लेपः ...	,,	वस्तेर्गुणः ...	,,
वातजगण्डे निचुलादिलेपः	,,	कर्णपूरणविधिः ...	६३९
कफजगण्डे देवदार्वादिलेपः	६३२	कर्णपूरणधारणार्थं मात्रानिर्देशः	,,
ग्रन्थिमालादौ निचुलादिलेपः	,,	मात्रालक्षणम् ...	,,
अर्बुदादौ गुञ्जाफललेपः	,,	कर्णपूरणार्हद्रव्यभेदात् कालभेदः	६४०
श्लीपदे धुस्तूरादिलेपः ...	६३३	कर्णशूले अर्कपत्ररसपूरणम् ...	,,
क्षुरग्रे भल्लात्यादिलेपः ...	,,	,, छागमूत्रादिपूरणम् ...	,,
उपदंशे करवीरमूललेपः ...	,,	,, शृङ्गवेरादिपूरणम् ...	,,
,, विषलाचारलेपः ...	,,	,, कपित्थादिपूरणम् ...	६४१
,, रसाञ्जनादिलेपः ...	,,	,, पुटपक्वार्कपत्ररसपूरणम् ...	,,
क्लिन्नदग्धे तुत्थाद्यौद्यादिलेपः	६३४	,, दौपिकातैलम् ...	,,
,, बिल्वकल्कलेपः	,,	,, श्लेष्मातकतैलम् ...	६४२
,, शबलसलेपः	,,	कर्णनादे यष्टिमधुकादिक्वेथः	,,
		कर्णनादादौ खार्जकादितैलम्	,,
		बाधिर्य्यादौ अपामार्गक्षारतैलम्	,,
		कर्णनाड्या शम्बूकतैलम् ...	६४३
		कर्णक्लेदे पक्वकषायादिपूरणम्	,,

विषया:	पृष्ठाङ्का: ।
पञ्चकषाया: ...	६४३
कर्णस्रावादौ बीजपूररसपूरणम्	»
पूतिकर्णे भास्वादितैलम् ...	»
कर्णकोटे गोमूत्रहरितालादि- पूरणद्वयम् ...	६४४
कर्णकोटे शिग्रुरसादिपूरणम्	»

द्वादशोऽध्याय: ।

अथ शोणितस्रावविधि:	६४५
स्वास्थरक्तस्य मात्रानिर्देश: ...	,,
रक्तस्रावणार्हा: कृतं रक्तस्रावणस्य गुणाश्च	,,
रक्तस्य स्वरूपम् ...	६४६
रक्ते पाञ्चभौतिकगुणा: ...	,,
दूषितरक्तस्य लक्षणम् ...	६४७
प्रवृद्धरक्तस्य » ...	,,
क्षीणरक्तस्य ,, ...	,,
वातेन दुष्टरक्तस्य लक्षणम् ...	६४८
पित्तेन ,,	,,
कफेन ,, ,, ...	,,
द्विदोषेण ,, » ...	,,
विषेण » ,, ...	६४९
प्रकृतिस्थरक्तस्य... ,, ...	,,
रक्तस्रावणार्हरोगा: ...	»
रक्तस्रावणोपाया: ...	६५०
शिराभोक्षे: रक्तस्रावणानर्हा:	,,
रक्तस्रावणानर्हाणामवस्थाविशेषे स्रावणविधि: ...	६५१
वातादिदूषितरक्तस्य स्रावणोपाया:	६५२
द्विदोषदूषितरक्तस्य स्रावणोपाय:	६५२
रक्तस्रावणोपायानां शक्तिनिर्देश:	,,
प्रयुक्तेऽपि स्रावणोपाये तदप्रवर्तनहेतु:	६५३
अप्रवर्त्तितरक्ते तत्प्रवर्त्तनविधि:	,,
रक्तस्रावणस्य कालावस्थादिनिर्देश:	,,
रक्तस्य अतियोगे हेतु: ...	६५४
अतिप्रवृत्तरक्ते चिकित्सा ...	,,
,, चतुर्विधप्रयोगस्य फलम्	,,
मुक्तशोणिते शिरादाहविधि: ...	६५५
विसूचिकाया ,, ...	,,
वक्तशूलेऽहृद्ये ,, ...	,,
अतिरक्तस्रावणनिषेध: ...	,,
अतिरक्तस्रावणे दोषा: ...	६५६
रक्तरक्षाया हेतुनिर्देश: ...	,,
रक्तस्रावजनितवातकोपे प्रतिकार:	,,
क्षीणरक्तस्य प्रतीकार: ...	,,
सम्यक् स्रुतरक्तस्य लक्षणम् ...	६५७
रक्तमोक्षणे अपथ्यम् ...	

त्रयोदशोऽध्याय: ।

अथ नेत्रकर्मविधि: ...	६५७
नेत्रप्रसादनकर्माणि ...	»
सेकविधि: ...	६५८
दोषभेदेन सेकस्य त्रैविध्यनिर्देश:	,,
सेकप्रयोगस्य कालमात्रा ...	६५९
,, काल: ...	»
वाताभिष्यन्दे एरण्डादिक्षीरसेक:	६६०
,, दुग्धादिसेकद्वयम्	»

विषयाः	पृष्ठाङ्काः ।
मारुतपर्य्याय-युक्ताधिपाकयोः सेकः	६६१
पित्तरक्ताभिष्यन्दे सावरादिसेकः	,,
रक्ताभिष्यन्दे त्रिफलादिसेकः ...	,,
,, लाजादिसेकः ...	,,
अभिष्यन्दनयुते श्वेतलोध्रसेकः	६६२
आश्योतनविधिः ...	,,
लेखनादिभेदेन विविधाश्योतनस्य विन्दुमात्रानिर्देशः ...	,,
शीतोष्णभेदेन तस्य प्रयोगविधिः	,,
दोषभेदेन आश्योतने तिक्तरसादि-प्रयोगविधिः ...	६६३
आश्योतनधारणस्य कालमात्रा	,,
वाताभिष्यन्दे विल्वाद्याश्योतनम्	,,
वाताद्यभिष्यन्दे लोध्राश्योतनम्	,,
सर्वाभिष्यन्दे त्रिफलाश्योतनम्	६६४
रक्ताद्यभिष्यन्दे खल्वाश्योतनम्	,,
वातरक्ताभिष्यन्दे चौरपृष्ठाद्या-श्योतनम् ...	,,
पिण्डौविधिः ...	,,
अभिष्यन्दादौ क्रियाविशेषः ...	६६५
वाताभिष्यन्दे एरण्डादिपिण्डो	,,
पित्ताभिष्यन्दे धात्रीपिण्डो महा-निम्बपिण्डो च ...	,,
श्लेष्माभिष्यन्दे शिग्रुपिण्डो ...	,,
पित्तश्लेष्माभिष्यन्दे निम्बादि-पिण्डौद्वयम् ...	,,
रक्ताभिष्यन्दे लोध्रपिण्डो ...	६६६
चक्षुःशोथादौ गुरुवादिपिण्डो	,,
विडालकविधिः ...	

विषयाः	पृष्ठाङ्काः ।
सर्वाक्षिरोगे यष्ट्यादिविडालकः	६६६
,, रसाञ्जनादिविडालकाः	६६७
,, सैन्धवादिविडालकः	,,
,, निम्बुकविडालकः	,,
अर्मणि मरिचविडालकः ...	६६८
अञ्जननामिकाया शिलादिविडालकः	,,
तर्पणाक्षिरोगाः ...	,,
तर्पणानर्हकालादयः ...	६६९
तर्पणप्रयोगविधिः ...	६७०
वर्त्मादिगतरोगे तर्पणधारणस्य काल-परिमाणम् ...	६७१
तर्पणजनितव्रणकफप्रतीकारः	६७२
तर्पणप्रयोगस्य दिननियमः ...	,,
सम्यक् तर्पणस्य लिङ्गानि ...	,,
अतितर्पण-हीनतर्पणयोः लिङ्गानि	६७३
,, ,, चिकित्सा	,,
पुटपाकविधिः ...	,,
विविधपुटपाकाना नामानि ...	६७४
,, ,, प्रयोगविषयः	,,
लेखनपुटपाकस्य द्रव्याणि धारणस्य कालपरिमाणञ्च ...	,,
लेखनपुटपाकस्य द्रव्याणि धारणस्य कालपरिमाणञ्च ...	,,
रोपणपुटपाकस्य द्रव्याणि धारणस्य कालपरिमाणञ्च ...	६७५
पुटपाकव्यापत्तौ चिकित्सा ...	,,
ऋतुभेदे अञ्जनप्रयोगस्य समयः	६७६
विविधाञ्जनानां नामानि तेषां द्रव्याणि च ...	

विषयाः	पृष्ठाङ्काः ।
विविधाञ्जनानान्तरं तेषां श्रेष्ठत्वादि-निर्देशश्च ...	६७६
अञ्जनानर्हाः ...	६७७
तीक्ष्णाद्यञ्जनवर्त्तीनां मात्रा ...	,,
रसक्रियाया उत्तमादिमात्रा	,,
नेत्रवैरेचनिकचूर्णानां तीक्ष्णादिमात्रा	६७८
अञ्जनशलाकायाः स्वरूपम् ...	,,
लेखनाद्यञ्जनशलाकाना द्रव्याणि	,,
अञ्जनप्रयोगस्य कालः ...	६७९
,, ,, स्थानम् ...	,,
तिमिरादौ चन्द्रोदया वर्त्तिः ...	,,
नेत्रपुष्पे करञ्जबीजवर्त्तिः ...	६८०
नेत्रशुक्रादौ समुद्रफेनादिवर्त्तिः	,,
नेत्रशुक्रे दन्तादिवर्त्तिः ...	,,
अतिनिद्रायां नीलोत्पलादिवर्त्तिः	६८१
तिमिरादौ कुसुमिका वर्त्तिः ...	,,
वर्त्मन्ये रसाञ्जनादिवर्त्तिः ...	,,
नेत्रस्रावे धात्र्यादिवर्त्तिः ...	६८२
वर्त्मरोगादौ तुत्थादि रसक्रिया	,,
नेत्रपुष्पे कर्पूर ,,	,,
अतिनिद्रायां मरिच ,,	६८३
तन्द्राया जातीपुष्पादि ,,	,,
संज्ञाजनने शिरीषबीजादिरसक्रिया	,,
नेत्रदाहादौ दार्व्यादिरसक्रिया	,,

विषयाः	पृष्ठाङ्काः ।
प्रक्लिन्नवर्त्मनि रसाञ्जनादि रसक्रिया	६८४
पिल्लादौ गुडूचीस्वरसादि ,, ,,	,,
नेत्रकण्डूादौ पुनर्नवास्वरस ,,	६८५
नेत्रस्रावे बब्बूल ,, ,,	,,
,, हिज्जल ,, ,,	,,
नेत्रप्रसादने कतक ,, ,,	,,
शिरोत्पाते रसाञ्जन ,, ,,	,,
आम्ये क्षत्रसर्षपवसादि ,,	६८६
नेत्रपुष्पादौ कुक्कुटाण्डादि चूर्णाञ्जनम्	,,
नक्ताम्ये पिप्पलीमरिचाञ्जनद्वयम्	,,
नेत्रकण्डूादौ मरिचादि चूर्णाञ्जनम्	६८७
सर्वनेत्रगतरोगे रसक्रादि ,, ,,	,,
,, खोवीर ,,	६८८
,, नागशलाका ...	,,
प्रत्यञ्जनविधिः ...	६८९
सर्वनेत्रगतरोगे नयनामृताञ्जनम्	,,
सर्पविषे सञ्जीवनाञ्जनम् ...	,,
तिमिरे मुष्टियोगः ...	६९०
,, ,, ...	,,
चक्षुरक्षाया आवश्यकता ...	,,
ग्रन्थकृन्निवेदनम् ...	,,
शार्ङ्गधरसंहिताया उपयोगिता	६९१
शार्ङ्गधरपाठस्य ,, ...	६९२

सटीक-

शार्ङ्गधरसंहिता।

[पूर्वखण्डः]।

प्रथमोऽध्यायः।

अथ परिभाषाध्यायः।

ग्रन्थकृन्मङ्गलाचरणम्।—

श्रियं स दद्याद्भवतां पुरारिर्यदङ्गतेजःप्रसरे भवानी।
विराजते निर्मलचन्द्रिकायां महौषधीव ज्वलिता हिमाद्रौ॥१॥

टीकाकृन्मङ्गलाचरणम्।—

करशिरसाऽच्युतमीशं भवभवपृष्टिच्यालमुपायम्। स्वर्गापवर्गयोरपि तापत्रयनाशार्थमभिवन्दे ॥१॥ सगणगणेश मतिद विघ्नसमूहाष हन्ति यः। स्मरणे तदनु गुरोरपि चरणं गदहीन(हीन)मनुजानाम् ॥२॥ ये दुर्जना. परगुणानुभूचयन्ति तेऽपि स्वभाववशगा: किमु वारणीया:। ये शास्त्रबोधगुणदोषविचारदक्षास्ते सज्जना: प्रणुतिभि: खलु वन्दनीया: ॥३॥ श्रीवास्तव्यकुलप्रकाशमणयो ये पूर्वजा विश्रुता: श्रीहम्मीरपुरे महाजनतते येषां स्थिति: काव्यते। ये कामं मद्विद्वत्तामिव रवे: चौराब्धिपारङ्गतामस्थाश्चर्यसुचान्द्रकान्तिविततां प्रख्यातकीर्तिं गता: ॥४॥ तदन्वये किं बहुना प्रसिद्ध: श्रीचक्रपाणि: कुलकैरवेन्दु:। नानागुणालीयमभूच्च यस्य समस्तवेद्योद्घटनादिरूपा ॥५॥ तस्य बुद्धिसुभगस्य तनूजो भावसिद्ध इति भूपतिमान्य:। सुयुतादिकरहस्यविधिज्ञो यो यशांसि विपुलानि च लेभे ॥६॥ तस्मात्सुतो दीर्घमति: प्रहृष्टो नाम्नाऽऽढमल्लोऽत्यनिबन्धदर्शी। तेन स्वगुर्वर्चनतत्परेण विधास्यते शार्ङ्गधरप्रकाश: ॥७॥ केचिच्छास्त्रविशारदा: कतिपये दिव्यौषधीकोविदा: नानाव्याधिपरीक्षणेषु चतुरा: कर्मोत्सुकाश्चापरे। काम तानधिकर्तुमुत्सुकमना नाहं समर्थो यतस्तेषा सन्निधिमेत्य चाव रचित यत्किञ्चिदेव श्रुतम् ॥८॥ इक्ष्वाकान्वयपूरी पुरा पुरजिता काशीव विद्वज्जनैर्न्यासा यत्र सर: सरिद्वरवरा चर्मण्वती पापहा। यस्यां कृत्तवासुदेवचरणद्वन्द्वाम्बुज: श्रीपति: ख्यातो धर्म इवाङ्गि धर्मगतिषु

ग्रन्थस्य प्रामाणिकत्वनिर्देशः।—

प्रसिद्ध-*-योगा मुनिभिः प्रयुक्ताश्चिकित्सकैर्ये बहुशोऽनुभूताः।
विधीयते शार्ङ्गधरेण तेषां सुसङ्ग्रहः सज्जनरञ्जनाय ॥ २ ॥

श्रीजैत्रसिंहः प्रभुः ॥९॥ तस्या शार्ङ्गधरोक्तानां योगानाञ्च प्रकाशिनी। क्रियते साऽऽढमल्लेन संहिताया: प्रदीपिका ॥१०॥ अभिनवनिबन्धरचनां श्रोतुं कः कोऽत्र श्रोतुपो भवति। यः कृपया परकाव्य पश्यति सुवं स वै धीरः ॥११॥

अथेह पृथुतरदुरधिगमायुर्वेदतत्त्वाङ्कितसङ्ग्रन्थपरिसमाप्त्यर्थं श्रोतृणामपि प्रत्यूहव्यपोहार्थं मनसि विशिष्टेष्टदेवताप्रणामपूर्वकमाशीर्वृत्तमादौ निबद्धवान् ग्रन्थकारः; तद्यथा. श्रियमित्यादि।—यदङ्गतेजःप्रसरे भवानी विराजते स पुरारिर्भवतां श्रियं दद्यादित्यन्वयः। यथा हिमाद्रौ ज्वलिता महौषधी राजते; क्व? सत्या निर्मलचन्द्रिकाया निर्मला या चन्द्रिका ज्योत्स्ना तस्यामित्यर्थः। "निर्मलचन्द्रिकायाम्" इत्यस्य स्थाने "निर्मलचन्द्रिकातः" इति क्वचित पठन्ति व्याख्यानयन्ति च। पुरारिः पुरनामा दैत्यविशेषः स एवारिर्यस्य, यद्वा—पुरस्यारिः पुरारिः शिव इत्यर्थः। श्रियमिति कल्याणं लक्ष्मी वा। भवतामित्यत्र यच्छै दित्या रोचते धारयते वा तत सम्प्रदानमित्यनेन चतुर्थी न स्यादित्यत आह—"विवक्षातः कारकाणि भवन्ति" इति न्यायादिह दित्यार्थे षष्ठ्यपि भवतीत्यर्थः। यदङ्गतेजःप्रसरे तेजःसमूहे अर्द्धाङ्गे इति सम्बन्धः। एतेन विभूत्यलिप्ताङ्गस्यापि शुभत्वाद्विभास्यम्। † "भवानी पार्वती चण्डी" इत्यमरः। अनेनाशीर्निर्देशं कथितवानाचार्यः, यत.,—"आशीर्नमस्क्रिया वस्तु-निर्देशो वाऽपि तन्मुखम्" इति विविधं प्रबन्धमुखलक्षणं भवति। आशीर्यद्दर्शनमेव दुष्कृतादीनां विपाकजन्यदुःखस्वरूपरोगनिवृत्त्यर्थं, तन्निवृत्त्या सुखश्रियः प्राप्तिरिति भावः ॥ १ ॥

अथ ग्रन्थोऽयं सकलजनोपकारार्थं भवतु इति मत्वा सङ्ग्रन्थस्य सम्बन्धः कथनीयः; तद्यथा—"सिद्धि श्रोतृप्रवृत्तीनां सम्बन्धकथनात् यतः। तस्मात् सर्वेषु शास्त्रेषु सम्बन्धः पूर्वमुच्यते ॥" इति। अनेन तावत पूर्वं तमाह, प्रसिद्धयोगा इत्यादि।—ये प्रसिद्धयोगाः सन्ति तेषां सुसङ्ग्रहं सज्जनरञ्जनाय मया शार्ङ्गधरेण विधीयते विशेषेण क्रियते इत्यभिप्रायः, न तु क्रियते (?), यतश्चरकसुश्रुतादिमुनिभिरितस्ततो विस्तृता, मया सङ्ग्रह्य प्रकारान्तरेण लिख्यते (?) इति भावः। एतेन ग्रन्थस्य विशिष्टत्वं दर्शितम्।

---

* "युज्यते इति योगः क्वाथचूर्णादिगणः" इति गूढार्थदीपिकाकारः।

† अमरकोषे तु "शिवा भवानी रुद्राणी सर्वाणी सर्वमङ्गला। अपर्णा पार्वती दुर्गा मृडानी चण्डिकाऽम्बिका ॥" इति पाठः।

वैद्यस्य कर्त्तव्यनिर्देशः।—

हेत्वादिरूपाकृतिसात्म्यजाति-भेदैः समीक्ष्यातुरसर्वरोगान्।
चिकित्सितं कर्षणबृंहणाख्यं कुर्वीत वैद्यो विधिवत् सुयोगैः॥३॥

कीदृशा योगाः? मुनिभिः प्रयुक्ताः इति—वैकालिकदर्शिभिः पुरुषातिशयैर्हि मुनिरुच्यते; तैः पूर्वं कथिता इत्यर्थः। एतेन शास्त्रस्य प्रामाण्यं कथितम। पुनः कीदृशाः? चिकित्सकैर्वैद्यैर्बहुशो वारं वारमनुभूता मानरूपयोजनादिभिर्दृष्टप्रत्यया इत्यर्थः। एतेनाव सज्जनानां दर्शनाद्युत्कण्ठा स्वादित्यभिप्रायः॥ २॥

इदानीं "रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्" इत्यादिमतमालोच्य शार्ङ्गधरोऽप्याह, हेत्विति।—वैद्य आतुरसर्वरोगान् समीक्ष्य पश्चात् चिकित्सितं विधिवत् कुर्वीतेति, अन्यथा दोषः स्यात्। तथा चोक्तं—"यस्तु रोगमविज्ञाय कर्माण्यारभते भिषक्। न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥" इति। कैः कृत्वा समीक्ष्येत्याह—हेतुर्निदानम्, आदिरूपम् पूर्वरूपम्, आकृतिः स्वरूपं, सात्म्यम् उपशयः, जातिः सम्प्राप्तिरिति, एषां भेदैः नानात्वकल्पनेन एते व्यक्ताः समस्ताश्च व्याधिबोधका ज्ञेया इत्यर्थः; यद्वा—हेतुरादिर्येषां ते हेत्वादयः, ते च रूपादयश्च तैरित्यर्थः, एतेन हेत्वादिपञ्चभिः रूपादिभिश्च आतुररोगान् परीक्ष्येति भावः। तथा हि वाग्भटे—"दर्शनस्पर्शनप्रश्नैः परीक्षेताथ रोगिणम्। रोग निदानपूर्वरूपसम्प्राप्तिभिः॥" (सू० १म अ०) इति। हेत्वादिपञ्चकं पूर्वं व्याख्यातमेव। रूपादिवयं यथा—रूपमिति चाक्षुषं, तेन शरीरस्य स्थूलकृशतावर्णविकारादयः, एतेन दर्शनज्ञानमलङ्करोति। आकृतिरिति वा समत्वादेव कृतिः कृतिकारणमिति समुचितकौशल्येनैव नाड्यादिभिः शीतोष्णादिकज्ञानरूपमित्यर्थः, एतेन स्पर्शनज्ञानमलङ्करोति। सात्म्येन हितं कथ्यते, भवता किं सात्म्यम्? इत्यादिवाक्येन प्रश्नज्ञानमलङ्करोति; अथवा—सात्म्यमभिलषितं वदन्त्यन्ये, यतो येन यत् वाञ्छितं भवति तस्य तेनैव दोषादीनां चौषधत्वं ज्ञायते, इति दर्शनादिकं वयं कथितम्। जातिशब्देन विशिष्टेन्द्रियज्ञानमभिधीयते; यतः सुश्रुते—"षड्विधो हि रोगाणां विज्ञानोपायः, तद्यथा—पञ्चभिः श्रोत्रादिभिः प्रश्नेन च" (सू० १०म अ०) इति। अतो दर्शनादयश्च एवादौ व्याख्याताः, शेषाः श्रोत्रादयो जातिभेदेन कथिताः। तदुक्तं सुश्रुताचार्येण—"तत्र श्रोत्रेन्द्रियविज्ञेया विशेषा रोगेषु प्रनष्टशब्दविज्ञानबधिरादिषु वक्तव्ये सफेनं रक्तमीरयन्निलः सशब्दो निर्गच्छतीत्येवमादयः। स्पर्शनेन्द्रियविज्ञेयाः शीतोष्णश्लक्ष्णकर्कशमृदुकठिनत्वादयः स्पर्शविशेषा ज्वरशोषादिषु। चक्षुरिन्द्रियविज्ञेया, शरीरोपचयापचयायुर्बलवर्ण-

दिव्यौषधीनां बहवः प्रभेदा इन्द्रारकाणामिव विस्फुरन्ति।
ज्ञात्वेति सन्देहमपास्य धीरैः सम्भावनीया विविधप्रभावाः ॥४॥
स्वाभाविकागन्तुककायिकान्तरा रोगा भवेयुः किल कर्मदोषजाः।
तच्छेदनार्थं दुरितापहारिणः श्रेयोमयान् योगवरान्नियोजयेत् ॥५॥

विकारादयः। रसनेन्द्रियविज्ञेयाः प्रमेहादिषु रसविशेषाः। गन्धेन्द्रियविज्ञेयाः पूतिरिष्टलिङ्गादिषु व्रणानामव्रणानाञ्च गन्धविशेषाः" (सूत्र० १०म अ०) इति हेत्वादयो व्याख्याताः। तत्राद्यः पञ्चौ व्यवहारसिद्धः, द्वितीयस्तु कल्पितोऽपि साधुः। समीक्ष्येति सम्यक्प्रकारेण विचार्य, एतद्ग्रहणं तज्ज्ञानविच्छेदार्थं, यतः "मिथ्यादृष्टा विकारा हि दुराख्याताश्चयेव च। तथा दुष्परिदृष्टाश्च नीहयेयुश्चिकित्सकम् ॥" इति। चिकित्सा रोगापनयनं कर्म व्याधिप्रतीकारः धातुसाम्यार्था क्रिया चैत्यादिपर्यायवाचकैः शब्दैश्चिकित्सा कथिता। तथा चोक्तं—"चतुर्णां भिषगादीनां शस्तानां धातुवैकृते। प्रवृत्तिर्धातुसाम्यार्था चिकित्सेत्यभिधीयते ॥" (च० सूत्र० १म अ०) इति। तत्राद्यं द्विविधं कर्म—कर्षणं बृंहणाख्यमिति। कर्षणमिति प्रवृद्धदोषाणां, बृंहणमिति क्षीणानाम्; तथा च—"क्षीणा वर्द्धयितव्याः" (सु० चि० ३३म०) इत्यादि। तथा—"रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता" (वा० सूत्र० १म अ०) इति वचनात्। सुयोगैरिति शोभनद्रव्यकृतप्रयोगैः शीघ्रमारोग्योत्पादकैरित्यर्थः। इदानीं द्रव्याणां विविधप्रभावाः सन्ति तेषां हेतुभिः परीक्षा निराकर्तुमाह, दिव्यौषधीनामिति।—दिव्यौषधीनां बहवः प्रभेदा इन्द्रारकाणामिव विस्फुरन्ति प्रकटीभवन्ति इत्यर्थः, इति ज्ञात्वा विचार्यं तदा (?) सन्देहमपास्य दूरीकृत्य विविधप्रभावा अपरिमितशक्तयोऽविच्छिन्नशक्तयो वा सम्भावनीयाः तेषां सम्भावना कर्त्तव्येत्यर्थः, धीरैरिति ज्ञेयम्। एतेनाचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इति तात्पर्यार्थः। दिव्यौषधीनामिति—दिव्यग्रहणमद्रव्याणां विशिष्टत्वज्ञानार्थम्। इन्द्रारकाणामिति—यथा देवानां भेदा अपरिमितास्तथैव द्रव्यभेदा इत्यभिप्रायः। प्रभावास्तेषांचिन्तनीयाः। धीरैरिति गम्भीरबुद्धिभिः, धीरा हि वाङ्माध्यात्मिकानां हिताहितपरिच्छेदकारिणो भवन्ति, अतो धीरग्रहणमवश्यार्थज्ञापकत्वात्यवच्छेदार्थम्। अथ प्रयोजनमपि सर्वस्यैव स्यात्, तथा हि—"सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित्। यावत् प्रयोजनं नोक्तं तावत् तेन न गृह्यते ॥" इति। अत एव तदभिधित्सयाह, स्वाभाविकेति।—स्वाभाविकादयो रोगाः कर्मदोषजा भवेयुः। क्रियेत्यागमनिश्चयार्थम्। तच्छेदनार्थं तेषामुपशमनिमित्तम्। योगवरान् प्रयोगश्रेष्ठान् नियोजयेत एतेन समस्तार्थतन्त्राधिकारान् योगान्

ग्रन्थस्य अभिधेयः।—

प्रयोगानागमात् सिद्धान् प्रत्यक्षादनुमानतः।
सर्वलोकहितार्थाय वक्ष्याम्यनतिविस्तरान् ॥ ६ ॥

विचिन्त्य आचार्येणाद्य ते युज्यन्त इति भावः। स्वाभाविका इति—स्वभावेन भवाः स्वाभाविकाः, ते क्षुत्पिपासाजराहत्युनिद्राप्रभृतयः। आगन्तुका इति अभिघात-निमित्ताः, ते व्यालादिकृताश्च। कायिकान्तरा इति शारीरा अन्तर्जाताश्च, शारीरास्तेऽन्नपानमूलाः वातादिदोषहाराऽसृक्पित्तकासादयः। अन्तःशब्देन मनोऽभिधीयते, तदुद्भवा मानसा इत्यर्थः, ते कामक्रोधादिनिमित्ता मदमूर्च्छासंन्यास-ग्रहभूतोन्मादादय इति। सुश्रुते स्वाभाविकादयो दर्शिताः। कर्मदोषजा इति—एके कर्मजाः, एके दोषजाः, अपरे कर्मदोषजाश्च। तथा चोक्तं—"कर्मप्रकोपेण कदाचिदेके दोषप्रकोपेण भवन्ति चान्ये। तथाऽपरे प्राणिषु कर्मदोष-प्रकोपजाः कायमनोविकाराः॥" इति। कर्मजादीनां संज्ञा केषाञ्चित् ज्ञापनार्थं लिख्यते यथा —"ये चामयाः सुरपरद्रविणापहाराद्गर्वद्रुनागमनविप्रवधादिभिर्यैः। दुष्कर्मभि-स्तनुभृतामिह कर्मजास्ते नोपक्रमेण भिषजामुपयान्ति शान्तिम्॥" किञ्च— "दानैर्दयादिभिरतिथिद्विजदेवतानां गुर्वर्चनाप्रणतिभिश्च जपैस्तपोभिः। इत्युक्तपुण्य-निचयैरुपचीयमानाः प्राक्कर्मजा यदि कृशं प्रशमं प्रयान्ति॥" इति। अथ दोषजा यथा—"स्वहेतुदुष्टैरनिलादिदोषैरुपप्लुते खेषु परिस्रवद्भिः। भवन्ति ये प्राणभृतां विकारास्ते दोषजा भेषजसिद्धिसाध्याः॥" उभयोत्पन्ना यथा—"दानादिभिः कर्मभिरौषधैश्च कर्मक्षये दोषपरिक्षये च। सिध्यन्ति ये यत्नवता कदाचित ते कर्मदोषप्रभवा विकाराः॥" इति। दुरितापहारिण इति—दुरितशब्देन दुःख-मभिधीयते, तत्संयोगा व्याधय इत्युक्तत्वात्। श्रेयोमयानिति पुण्यस्वरूपान्। येऽन्येऽपि पुण्यमयास्ते दुःखच्छेदनाय सम्भवन्ति, उच्यते—"परदुःखविनाशार्थं महान्तो निज-शक्तिभिः। कर्म कुर्वन्ति यत् पुण्यं तेन पुण्यमयाः स्मृताः॥" इति ॥ ३—५ ॥

इदानीं प्रत्यक्षसिद्धयोगानां कथनेन संक्षेपकरणेन च निजग्रन्थस्य माहात्म्या-माह, प्रयोगानिति।—आगमादिसिद्धान् प्रयोगान् सर्वलोकहितार्थाय अनति-विस्तरान् वक्ष्यामि कथयिष्यामीत्यर्थः। "अनतिविस्तरं यथा स्यात्" इत्येके पठन्ति। आगमादीनां लक्षणन्तु जेज्जडादिभिराचार्यैरुक्तं, तदेव सुबोधार्थं लिख्यते; यथा —आगमो वेदः, आप्तानां शास्त्रं वा। तथा हि—"सिद्धं सिद्धैः प्रमाणैस्तु हितायैव परत्र च। आगमः शास्त्रमाप्तानामाप्ताः सत्यार्थवेदिनः॥" इति। आगमात् सिद्धाः

अथानुक्रमणिका।—

पूर्वखण्डानुक्रमणिका।—

प्रथमं परिभाषा स्याद्भैषज्याख्यानकं तथा।
नाड़ीपरीक्षादिविधिस्ततो दीपनपाचनम् ॥ ७ ॥
ततः कलादिकाख्यानमाहारादिगतिस्तथा।
रोगाणां गणना चेति पूर्वखण्डोऽयमीरितः ॥ ८ ॥

श्रूयन्ते, यथा—"जीवेद्वर्षसहस्राणि योगस्यास्य प्रभावतः। दृष्ट्वा च शतवर्षीया भवेत् षोडशवार्षिको ॥" इत्यादि। प्रत्यक्षादिति—यत्किञ्चिदेवार्थस्य साक्षात्कारि ज्ञानं तदेव प्रत्यक्षं, तथा हि—"मनोऽचिगतमभ्रान्तं वस्तु प्रत्यक्षमुच्यते। इन्द्रियाणामसंज्ञानं वस्तु तद्धि भ्रमः स्मृतः ॥" इति। तल्लिङ्गा यथा—वमनवैरेचनादिकयोगा प्रत्यक्षफलाः। अनुमानत इति—अनु पश्चादन्यभिचारिलिङ्गाल्लिङ्गि ज्ञायते येन तदनुमानम्। तल्लिङ्गा यथा—कृत्याकुरोगेण सङ्क्षणमनुमीयते, कृत्या मक्षिकादिभक्षण, त्वक्परिपाटनादिभि. पक्षामव्रणमिति। केन हेतुना त्वया क्रियते इति विवक्षायां सर्वलोकहितार्थायेति यद्गण कृतम्। सर्वलोक इति—लोको हि द्विविधः स्थावरजङ्गमात्मकभेदेन, अत्र पुरुषप्राधान्यात् जना एव लोकशब्देन गृह्यन्ते। आर्षेणापि यत्नेन ज्ञानं भविष्यति किमनेन तदुपजीविना ग्रन्थेनेत्याशङ्क्य अनतिविस्तरानिति यद्गणं कृतं, न अतिग्रन्थेन विस्तरो यत्र तानिति। यतो बहुप्रपञ्चरचितानि ऊहापोहपूर्वपक्षसमाधानादिना तन्त्राणि सोद्वेगकराणि भवन्ति तस्मात् सङ्क्षिप्यानुलिखतीत्यर्थः ॥६॥

अथानुक्रमणिकामाह, अथेति।—अथ शब्दः आनन्तर्यार्थे मङ्गलार्थे वा। अनुक्रमणिका इति अध्यायानामनुक्रमणं विखण्डानामित्यर्थः। इदानीं तामनुक्रमणिकां दर्शयितुमाह, प्रथममित्यादि।—परिभाषादिरोगगणनान्तैः सप्तभिरध्यायैः कृत्वा पूर्वखण्डोऽयमीरितः कथित इत्यर्थः, आचार्येण इति शेषः। ते के अध्याया इत्याह, प्रथममिति—प्रथममादौ परिभाषा तुलनादिकम्। द्वितीये भैषज्याख्यानकम्; भैषज्याख्यानकमित्यौषधभक्षणविधिः। तथेति यद्गणात् द्रव्यरसगुणविपाकादीना कथनम् ऋतुषट्ककथनञ्च। नाडीपरीक्षादिविधिरिति तृतीयम्; आदियद्गणादिह स्वप्नादीना कथनम्। ततोऽनन्तर दीपनपाचनादिलक्षणकथनं

---

* टीकाकारकृतव्याख्यादर्शनात् "अथानुक्रमणिका" इति पाठो मूलग्रन्थे आसीदित्यनुमीयते, अन्यथा "अथेति" इत्यारभ्य "विखण्डानामित्यर्थः" इत्यन्तो ग्रन्थः टीकाकारस्य उन्मत्तप्रलाप इत्याशङ्का दुरपनेया इति।

मध्यखण्डानुक्रमणिका।—

स्वरसः क्वाथफाण्टौ च हिमः कल्कश्च चूर्णकम्।
तथैव गुटिकालेहौ स्नेहः सन्धानमेव च।
धातुशुद्धी रसाश्चैव खण्डोऽयं मध्यमः स्मृतः॥ ९॥

उत्तरखण्डानुक्रमणिका।—

स्नेहपानं स्वेदविधिर्वमनञ्च विरेचनम्।
ततस्तु स्नेहवस्तिः स्यात्ततश्चापि निरूहणम्।
ततश्चाप्युत्तरो वस्तिस्ततो नस्यविधिर्मतः॥ १०॥

चतुर्थम्; * आदिशब्दात् स्वेदन-भेदनानुलोमन-वमन-लेखन-स्नेहनादिकथनम्। ततोऽनन्तरं कलादिकाख्यानमिति पञ्चमम्, आदिग्रहणात् सृष्टिक्रमशरीरादिकथनम्। तथेत्यनन्तरं आहारादिगतिरिति षष्ठम्; आदिशब्दात् गर्भोत्पत्तिकुमारपोषणप्रकृत्यादिलक्षणकथनञ्च। रोगाणां गणना चेति—इतिशब्देनावशिष्टं सप्तममित्यर्थः, एतेन साध्या ये उक्ता रोगा ज्वरादयः तेषां गणना सङ्ख्याकथनमिति पूर्वखण्डाध्यायानुक्रमः कथितः॥ ७।८॥

अथ मध्यमखण्डानुक्रमणिका दर्शयन्नाह, स्वरस इत्यादि।—स्वरसादिरसान्तैर्द्वादशभिरध्यायैर्मध्यमः खण्डः स्मृतः कथित इत्यर्थः। स्वरसादयो विख्याता एव, ते चाग्रे वक्ष्यमाणाः सन्ति। तत्र स्वरसेषु पुटपाकविधिकथनम्। क्वाथे प्रमथ्यादृषीदकक्षीरपाकान्नक्रियाविधिकथनम्। फाण्टे मद्यविधिकथनम्। स्नेहग्रहणात् घृतकल्पना तैलकल्पना च। सन्धानमित्यनेन मद्यभेदकथनम्। धातुशुद्धिरित्यत्र समस्तधातूपधातूनां शोधनमारणादिकथनम्। रसा इति बहुवचनेन सर्वेषां रसोपरसादीनां शोधनमारणादिकथनम्। इति मध्यमखण्डस्याध्यायानुक्रमो व्याख्यातः॥ ९॥

इदानीमुत्तरखण्डानुक्रमणमाह, स्नेहपानमिति।—स्नेहपानादिनेत्रकर्मप्रकारान्ते-

---

* "दीपनपाचनम्" इति मूलोक्तपाठे 'आदि'शब्दाभावात् टीकाकारस्य "आदिशब्दात्" इत्यादिग्रन्थः स्वोक्तस्य "दीपनपाचनादिलक्षणकथनम्" इत्यस्यैव व्याख्या न वा तत् सुधीभिः स्वयमेव विचार्यमिति। वस्तुतस्तु, चतुर्थे दीपनपाचनाध्याये स्वेदनादीनां लक्षणसत्त्वात्, "नाडीपरीक्षादि" "कलादि" इति पूर्वापरयोः आदिशब्दसङ्गावाच्च दीपनपाचनमित्यत्र अनुक्तोऽपि आदिशब्दः सन्दंशपतितन्यायेन पूर्वापरत आकृष्य योज्य इति।

धूमपानविधिश्चैव गण्डूषादिविधिस्तथा।
लेपादीनां विधिः ख्यातस्तथा शोणितविस्रुतिः।
नेत्रकर्मप्रकारश्च खण्डः स्यादुत्तरस्त्वयम् ॥ ११ ॥

श्लोकाना सङ्ख्यासमष्टिः।—

द्वात्रिंशत्सम्मिताध्यायैर्युक्तेयं संहिता स्मृता।
षड्विंशतिशतान्यत्र श्लोकानां गणितानि च ॥ १२ ॥

मानपरिभाषाया प्रयोजननिर्देशः।—

न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित्।
अतः प्रयोगकार्य्यार्थं मानमत्रोच्यते मया ॥ १३ ॥

मागधीयं मानम्।—

त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः।
त्रसरेणुस्तु पर्य्यायनाम्ना * ध्वंसो निगद्यते ॥ १४ ॥

त्रयोदशभिरध्यायैरुत्तरः खण्डः स्यात। तत्र धूमपाने व्रणधूपनं गण्डूषधूपनञ्च। गण्डूषे कवलादीनां लक्षणग्रहणात् कवलप्रतिसारणकथनम्। लेपेत्यादिग्रहणात मूर्द्धतैलकर्ण-पूरणविधिकथनम्। शेषं सुबोधम्। इत्युत्तरखण्डाध्यायानुक्रमः कथितः ॥१०।११॥

इदानीं संहितानिरुक्तिपूर्वकं श्लोकसङ्ख्यामाह, द्वात्रिंशदिति।—यतः पूर्वोक्तानां त्रिखण्डाना द्वात्रिंशदध्यायैर्युक्तेयं, तस्मात् संहिता कथिता। "सम्मित" स्थाने "संहित" इति केचित् पठन्ति; तत्रापि स एवार्थः। अत्र संहितायां श्लोकानां गणितानि गणनानि षड्विंशतिशतानि, भवन्तीत्यध्याहार्य्यम्। अध्याय इति—पदसमूहो वाक्यं, वाक्यसमूहः प्रकरणं, प्रकरणसमूहोऽध्याय इति ॥१२॥

अथेदानीं तावत् पूर्वं परिभाषा दर्शयितुमाह, न मानेनेति।—मानेन परि-माणेन विना द्रव्याणा युक्तिः कर्त्तव्यविधिः क्वचित् कुत्रापि न जायते नोत्पद्यते, अत इत्यस्मात् प्रयोगकार्य्यार्थं प्रयोगाणां योगानां कार्य्यार्थं कर्त्तव्यविधिनिमित्तं मानं तुलनादि अत्र संहितायां मया आचार्य्येण उच्यते कथ्यते इत्यर्थः। भक्ष्य-मान-व्यवच्छेदार्थमुक्तं, तद्भक्ष्य-मानं वक्ष्यमाणमस्ति ॥ १३ ॥

इदानीं परमाण्वादिगम्य-मानार्थं लक्षणाभ्याह, त्रसरेणुरिति।—परमाणुभिर्यः

---

* "वंशी" इति गूढार्थदीपिकासम्मतः पाठः। "वंशरन्ध्रं प्रविष्टं यत् रजः, तत वंशी, तस्याः त्रिंशता परमाणुना या सङ्ख्या सा वंशीत्यर्थः" इति गूढार्थदीपिकाकारः।

(जालान्तरगतं भानौ यत् सूक्ष्मं दृश्यते रजः।
तस्य त्रिंशत्तमो भागः परमाणुः स कथ्यते ॥
जालान्तरगतैः सूर्यकरैर्ध्वंसी विलोक्यते ॥)
षड्ध्वंसीभिर्मरीचिः स्यात्ताभिः षड्भिस्तु राजिका।
तिस्रश्नी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः ॥१५॥
यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम्।
षड्भिस्तु रक्तिकाभिः स्यान्माषको हैमधान्यकौ ॥१६॥
माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते।
टङ्कः स एव कथितस्तद्वयं कोल उच्यते ॥१७॥
क्षुद्रमोरटकश्चैव द्रङ्क्षणं तन्निगद्यते।
* (क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ॥)
कोलद्वयञ्च कर्षः स्यात् स प्रोक्तः पाणिमानिका ॥१८॥

त्रिंशता स एव वसरेणुः प्रोक्तः कथितो बुधैस्तद्विदिभिः पुरुषैः। "परमाणुः सुसूक्ष्मः स्वभावतो यान्नो न चक्षुषा मनुजानेन च" इति केचित्। तथा हि—"जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः। तस्य त्रिंशत्तमो भागः परमाणुः स उच्यते ॥" इति। त्रिंशतेति—परमाणूना दशत्रिंशद्भिरित्यर्थः। वसरेणुरेव पर्य्यायनाम्ना एकार्थवाचकशब्देन क्रत्वा ध्वंसीति निगद्यते कथ्यते, यव समानार्थकता शब्दाना तव ते पर्य्याया उच्यन्ते इत्यर्थः। ध्वंसीलक्षणन्तु एतस्याग्रे केचित् पठन्ति, यथा—"जालान्तरगतैः सूर्यकरैर्ध्वंसी विलोक्यते" इति। सूर्यकरैरादित्यरश्मिभिः। अथ मरीचिप्रभृतीनां परम्परामाह, षड्ध्वंसीभिरिति।—षड्ध्वंसीभिरेका मरीचिर्भवेदिति। मरीचिभिर्मानसंज्ञकाभिर्मरीचिभिः षड्भिः सङ्ख्याभिरेका राजिका, कथिता इत्यध्याहारः, राजिका सर्षपभेदः। तिस्रश्नी राजिकाभिरिति—राजिकात्रितयेनैकः सर्षपः प्रोच्यते कथ्यते बुधैरिति, सर्षपग्रहणेनात्र गौरसर्षपो ज्ञेय इति। अष्टसर्षपैः क्रत्वा एको यवः कथितः, यवोऽन्नविशेषः। गुञ्जामाह—तच्चतुष्टयमित्यनेन गुञ्जा स्यात्, तेन एका गुञ्जा कथिता इत्यभिप्रायः, गुञ्जा रक्तिका वाच्या। अथ माषकमाह—षड्भिः षट्सङ्ख्याभिः रक्तिकाभिः गुञ्जाभिरेको माष इति ख्यातः, स एव हैमधान्यकपर्य्यायनाम्ना कथित इति स्मर्यते, क्वचित् सप्तभिः क्वचित् पञ्चभिर्दशभिर्वा गुञ्जाभिः क्रत्वा

* पाठोऽयं गूढार्थदीपिकाकारसम्मतः।

अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम्।
विडालपदकश्चैव तथा षोडशिका मता ॥१८॥
करमध्यो हंसपदं सुवर्णं कवलग्रहः।
उडुम्बरश्च पर्य्यायैः कर्ष एव निगद्यते ॥२०॥
स्यात् कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा।
शुक्तिभ्याञ्च पलं ज्ञेयं मुष्टिरास्यं चतुर्थिका ॥२१॥
प्रकुञ्चः षोडशी बिल्वं पलमेवात्र कौर्त्यते।
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते ॥२२॥
प्रसृतिभ्यामञ्जलिः स्यात् कुडवोऽर्द्धशरावकः।
अष्टमानञ्च स ज्ञेयः कुडवाभ्याञ्च मानिका ॥२३॥

माषकः कथितः, स एव माषको मरीच्यादिभिर्विचार्य्यमाणोऽत्र न विवक्षितः, तच्च विस्तरभयान्न लिख्यते। इदानीं शाणपरिमाणं कोलपरिमाणञ्च वक्तुमाह, माषैरिति। —चतुर्भिर्माषकैरेकः शाणो धरणः टङ्कश्च कथितः। माषोऽत्र षड्भिर्गुञ्जाभिस्तुलित इति सर्ववैद्यानाम्। तद्वयमिति—शाणद्वयेनैकः कोलः। "कोलो बदरसंज्ञः" इति केचित्। तस्य पर्य्यायवाचकाः क्षुद्र-मीरटक-द्रङ्क्षणादयः, तेऽत्र टङ्कद्वयमानसंज्ञकाः बोद्धव्याः। कर्षमाह, कोलद्वयमिति।—कोलद्वितयमेव कर्षः स्यात्, स चतुःशाण इत्यर्थः। तस्य पर्य्यायसंज्ञकाः पाणिमानिकादयः, पाणिमानिका करतलं विदुरिति भावः। अक्ष इति विभीतकफलं, तच्च कर्षमानसंज्ञम्। तिन्दुकं तिन्दुकफलम्। विडालपदकम् अङ्गुलित्रयग्राह्यं चूर्णद्रव्यं, तत् कर्षसंज्ञमित्यर्थः। षोडशिका षोडशमाषकपरिमितेत्यर्थः। शेषं सुगमम्। अर्द्धपलं पलमानञ्चाह, स्यात् कर्षाभ्यामिति। —कर्षद्वयेनार्द्धपलं कथितं, तदेव शुक्तिः। अष्टमिका च शुक्तिः प्रसिद्धा, अष्टमिका अष्टशाणसंज्ञमानविशेषः। पलमप्याह, शुक्तिभ्यामिति।—शुक्तिद्वयेनैव पलं बोद्धव्यं, पलं प्रसिद्धम्। एतस्यापि मुख्यादयः पर्य्यायवाचका ज्ञेयाः। अत्र मुख्यादिषु पलमेव कौर्त्यते नान्यत्। मुष्टिः नखाग्रमुष्टिः। आस्यं फलम्। चतुर्थिकेति चतुःकर्ष इति भावः। षोडशी षोडशशाणमिता, शाणोऽत्रैवोक्तो ज्ञातव्यः न तु व्यावहारिकः। बिल्वं बिल्वफलम्, एतत्संज्ञा पले बोद्धव्या। इदानीं प्रसृतिपूर्वकं मानिकान्तं मानमाह, पलाभ्यामिति।—पलद्वयेनैका प्रसृतिर्ज्ञेया, प्रसारिताङ्गुलिकरतलं प्रसृतिः, सैव द्वात्रिंशच्छाणमिता। प्रसृतिभ्यामिति—प्रसृतिद्वयेनैकाञ्जलिः, अञ्जलिस्तु करद्वय-

शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः।
शरावाभ्यां भवेत् प्रस्थश्चतुःप्रस्थैस्तथाढकम् ॥२४॥
भाजनं कंसपात्रञ्च चतुःषष्टिपलञ्च तत्।
चतुर्भिराढकैर्द्रोणः कलशो नल्वणोऽर्मणः ॥२५॥
उन्मानञ्च घटो राशि-द्रोणपर्य्यायसंज्ञकाः।
द्रोणाभ्यां शूर्पकुम्भौ च चतुःषष्टिशरावकः ॥२६॥
शूर्पाभ्याञ्च भवेद्रोणी वाही गोणी च सा स्मृता।
द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः ॥२७॥
चतुःसहस्रपलिका षष्यवत्यधिका च सा।
पलानां द्विसहस्रञ्च भार एकः प्रकीर्त्तितः ॥
तुला पलशतं ज्ञेया सर्वत्रैवेष निश्चयः ॥२८॥

मिलितसम्पुटकाकारः प्रसिद्धः, स एव कुडवः अर्द्धशरावकश्च कथितः, कुडवः प्रसिद्धश्चतुःपलप्रमितः अर्द्धशरावकश्चतुःषष्टिशाणसंज्ञः। कुडवाभ्यामिति—कुडवद्वयेनैका नालिका, सैव शरावः, अष्टपलश्च शरावः, स तु साष्टाविंशतिशतसङ्ख्याकशाणैः कथितः। अथ प्रस्थाऽऽढके दर्शयितुमाह, शरावाभ्यामिति।—शरावद्वयेन एकः प्रस्थः, स च षोडशपलपरिमितो भवति। चतुःप्रस्थैः कृत्वा आढकमेकं, तच्च भाजनं कंसं पात्रञ्च कथितं, भाजनादयोऽप्याढकस्यैव पर्य्याया इत्यर्थः, एतच्चतुःषष्टिपलपरिमितं बोद्धव्यम्। अथ द्रोणप्रभृति द्रोणीपर्य्यन्तमानमाह, चतुर्भिरिति।—चतुर्भिश्चतुःसङ्ख्याकैः आढकैः कृत्वा एको द्रोणः, स च कलशादिपर्य्यायनामभिरुपलक्षितो द्वात्रिंशच्छरावतुलितो ज्ञेयः। द्रोणाभ्यामिति—द्रोणद्वयेन शूर्पकुम्भौ कथितौ, शूर्पस्य कुम्भश्चेति। शूर्पश्चतुःषष्टिशरावको ज्ञेयः। शूर्पाभ्यामिति—शूर्पद्वयेन एका द्रोणी, सैव वाही गोणी च कथिता, अत्र चतुःषष्टिप्रस्था भवन्तीति तात्पर्य्यार्थः। इदानीं खारीपरिमाणमाह, द्रोणीचतुष्टयमिति।—द्रोणीचतुष्टयं सम्भार तत खारीशब्दवाच्यं, तेन षण्णवत्यधिकचतुःसहस्रपलमानेन सा ज्ञातव्या, अत एव सूक्ष्मबुद्धिभिरिति ग्रहणम्। अथ भारपरिमाणं तुलापरिमाणमप्याह, पलानामिति।—पलानां पूर्वप्रतिपादितानां यत् सहस्रद्वयं तेन एको भारः प्रकीर्त्तितः कथितः; एतेन विंशतितुलाभिः परिमितो भवति। तुला च पलशतपरिमिता ज्ञेया। तथा चोक्तं—"तुला पलशतं ज्ञात्वा विंशति

माषटङ्काक्षविल्वानि कुड़वः प्रस्थ आढ़कम्।
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणाः ॥२८॥

गुञ्जादिकुड़वान्तमानस्य समतानिर्देशः।—

गुञ्जादिमानमारभ्य यावत् स्यात् कुड़वस्थितिः।
द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम् ॥३०॥

द्विगुणपरिभाषाया विषयनिर्देशः।—

प्रस्थादिमानमारभ्य द्विगुणं तत् द्रवार्द्रयोः।
मानं तथा तुलायाश्च द्विगुणं न क्वचित् स्मृतम् ॥३१॥

मौर उच्यते। खारी भारद्वयेनैव स्मृता षड्भाजनाधिका॥" इति। एष निश्चयः सर्वत्रैव सर्वदेशेष्वेव प्रयोगेषु वा ज्ञेय इत्यर्थः, न तु केवलं मगधदेशे। एवेति निश्चयार्थबोधकः। इदानीं सकलमानसङ्ग्रहणार्थं श्लोकेनैकेन मानमाह, माषेत्यादि।—माषादिखार्यवसाना यथोत्तरं चतुर्गुणा ज्ञेयाः। यो यस्मादुत्तरो यथोत्तरम्; एतेन किमुक्तं भवति? "माषाश्चतुर्गुणः शाणः शाणात् कर्षश्चतुर्गुणः। कर्षांश्चतुर्गुणं बिल्वमित्याद्या अपरे मिताः॥" इति। बिल्वमत्र पलं, राशिर्द्रोणसंज्ञः, गोणीत्यनेन द्रोणौ कथिता ॥१४—२९॥

इदानीं द्रवार्द्रशुष्कद्रव्याणामनुक्तानां मानं निर्दिष्टमाह, गुञ्जादीति।—गुञ्जाप्रभृतिमानमारभ्य यावत् कुड़वस्थितिः स्यात तावद्द्रवादीनां मानं समं ज्ञेयम्। गुञ्जा आदिर्येषां ते माषक-कोलाक्ष-शुक्ति-प्रकृताः कुडवपर्य्यन्ताः। द्रव तोयादि, आर्द्रं तत्क्षणोद्धृतं, शुष्कं सूर्य्यांशुभिः शोषितं चिरकाल धृतञ्च। एके "यावन्न कुडवस्थितिः" इति पठन्ति, तत्र—कुड़वादर्वाक् समभिति। तथा हि—"रक्तिकादिषु मानेषु यावन्न कुडवो भवेत्। शुष्के द्रवार्द्रयोस्तावत् तुल्य मानं प्रकीर्त्तितम्॥" इति। एतदपि तन्मान्तरे यथा—"प्रस्थादिमानमारभ्य द्विगुणश्च द्रवार्द्रयोः। * कुड़वोऽपि क्वचिद्दृष्टो यथा दक्षोदृते मतम्॥" इति ॥ ३० ॥

प्रस्थादिमानमिति।—प्रस्थादिपरिमाणमारभ्य यावत् तुला पूर्य्यते, तावद्द्रवार्द्रयोर्द्विगुणपरिमाणं ज्ञेयम्। द्विगुणन्तु शुष्कद्रव्यादित्यर्थः, तथा च—"शुष्कद्रव्यस्य या मात्रा तार्द्रस्य द्विगुणा हि सा। शुष्कस्य गुरुतीक्ष्णात्तन्मात्रादर्द्धं प्रयोजयेत्॥"

---

* हारीतः कुडवस्यापि द्विगुणमाह, तथा च—"आर्द्रद्रव्यस्य कुडवः पलैरष्टाभिरेव च। शुष्कद्रव्यचतुष्केण कुडवः समुदाहृतः॥" इति।

कुडवमितद्रवद्रव्यमानार्थं पात्रविशेषनिर्देश ।—

मृदृच्चवेणुलोहादेर्भाण्डं यच्चतुरङ्गुलम् ।
विस्तीर्णञ्च तथोच्चञ्च तन्मानं कुडवं वदेत् ॥३२॥

योगाना नामकरणविधि ।—

यदौषधन्तु प्रथमं यस्य योगस्य कथ्यते ।
तन्नाम्नैव स योगो हि कथ्यतेऽत्र विनिश्चयः ॥३३॥

अथ कालिङ्गपरिभाषा ।—

औषधाना मात्रास्थिरीकरणविधि ।—

स्थितिर्नास्त्येव मात्राया' कालमग्निं वयो बलम् ।
प्रकृति दोषदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत् ॥३४॥

प्रस्थादिमानमित्यादिशब्दात षोडशपलमारभ्य यावत पलशत पूर्यते तावदित्यर्थ । मान तथा तुलाया तुलाया उपरि मान क्वचित कुत्रापि द्विगुण न, तत्कार्य द्रवाद्रव्योरिति शेष । उपरि माननिति द्रोणादिकम् । तथा च—"द्वैगुण्य न तुलामानादिति मानविदो विदु । यतो द्रवाद्रंशुष्कादे प्रसिद्धित्वात लोकत ॥" एतदभिप्राय क्वेदपाकविषये प्रायशो मन्यन्ते केचित ॥ ३१ ॥

इदानी द्रवमानार्थं कुडवपात्रनिर्माणमाह, मृदिति ।—मृदादिवस्तुभिर्निर्मित यत् भाण्ड भवति तत्परिमित द्रवद्रव्यं कुडवसज्ञित वदेत । कथम्भूतम ? आयाम-परिणाहाभ्या चतुरङ्गुलप्रमाण, तथा उच्चेनापि (?) चतुरङ्गुलम् । वेणु वश, लोहमष्टविध, तच्च सुवर्ण-रजत ताम्रार-घोष-वपु सीसक लोहभेदम् , आदि-ग्रहणात्तेन शृङ्ग दन्तीपलादय । अङ्गुलशब्देनात्राङ्गुष्ठनखतलभाग गृह्यन्ति । केचित् मध्यमाङ्गुलिकायास्तु मध्यमपर्वमिताङ्गुलमिति । यद्वा—चतुभिरङ्गुलिभि परिमितं चतुरङ्गुलम् इति प्रसिद्धम् । एतत परिमाण द्रवद्रव्यार्थ बोद्धव्यम् ॥ ३२ ॥

अथ प्रयोगाणामादिद्रव्याङ्कितसज्ञा निर्देष्टुमाह, यदिति ।—यस्य योगस्य गण स्वरूपस्य प्रथममादिपठित यदौषध भवति तन्नाम्नैव स योग कथ्यते इत्यत्र विनिश्चयो ज्ञातव्य । यथा—चुट्टादि, गुडूच्यादीत तात्पर्यार्थ । मगधदेशे प्रायश प्रचरतीत्यतो मागधपरिभाषा कथ्यत ॥ ३३ ॥

इदानी कालिङ्गपरिभाषा दर्शयितुमाह—अथेति । तत्रादौ मात्राव्यवच्छेदार्थं श्लोकमेक पठन्ति केचित, तमाह, स्थितिरिति ।—मात्राया परिमाणस्य स्थिति. व्यवस्था नास्ति, यत कालादिकमवेक्ष्य परिमाण युञ्जादित्यभिप्राय. । कालः

कालिङ्गमानोक्तौ हेतु ।—

यतो मन्दाग्नयो रूक्षा हीनसत्त्वा नराः कलौ।
अतस्तु मात्रा तद्योग्या प्रोच्यते सुश्रुतसम्मता ॥३५॥

अथ कालिङ्गमानम्।—

यवो द्वादशभिर्गौर-सर्षपैः प्रोच्यते बुधैः।
यवद्वयेन गुञ्जा स्यात्तिस्रोगुञ्जो वल्ल उच्यते ॥३६॥
माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत् क्वचित्।
स्याच्चतुर्माषकैः शाणः स निष्कष्टङ्क एव च ॥३७॥
शाणो माषकैः षड्भि कर्षः स्याद्दशमाषकः।
चतुःकर्षैः पलं प्रोक्तं दशशाणमितं बुधैः ॥
चतु पलैश्च कुडवः प्रस्थाद्या. पूर्ववन्मता. ॥३८॥

प्रीतीक्ष्णवर्षालक्षण., मेघजग्रहणकालो वा। अग्निरपि चतुर्विधो मन्दतीक्ष्णविषमसमभेदेन। वयोऽपि त्रिविधमादिमध्यान्तम्। बलमपि हीनोत्तममध्यमम्। प्रकृतिरपि त्रिधा हीनमध्योत्तमा, अथवा देशजातिशरीरादिभि. प्रकृतेर्बहवो भेदा। दोषोऽपि त्रिविधो वातादिभेदेन। देशोऽपि त्रिविधो भूमिदेहप्रभेदेन। भूमिदेशस्तु त्रिधा जाङ्गलानूपसाधारणभेदेन, देहदेशोऽपि त्रिधैव पूर्वोक्त ॥ ३४ ॥

अथ भक्षणार्थं प्रागुक्ता कालिङ्गपरिभाषाऽस्मि अतस्तामपि दर्शयन्नाह, यत इति।—यत कारणात् कलौ कलियुगे ईदृशा नरा सन्ति, अत स्थितिहेतौ. तद्योग्यैषा नराणा विहिता मात्रा भक्षणद्रव्यपरिमाण प्रोच्यत कथ्यत इत्यर्थ। कथम्भूता ? सुश्रुतसम्मता इति मानवेदिभि पुरुषैर्विचार्य्यमाणा इत्यर्थ। कीदृशास्ते नरा ? मन्दाग्नय इति खलाहारिण। रूक्षास्नेत्यल्पकाया। हीनसत्त्वा इति खल्पबला ॥३५॥

इदानीं तत्तुलनमाह, यव इत्यादि।—द्वादशभिर्द्वादशसङ्ख्याकैर्गौरसर्षपैरेको यव, कोरयदृश्य तदन्यजातिव्यवच्छेदार्थम्। ईदृशेन यवद्वयेन एका गुञ्जा स्याद्भवेत्। त्रिगुञ्जा गुञ्जात्रय एको वल्लसज्ञ, वल्ल प्रसिद्ध परिमाण.। अष्टाभिरष्टसङ्ख्याभि गुञ्जाभि कृत्वा एको माष कथित., माषोऽत्र टङ्कस्य चतुर्थांश। क्वचिदिति कुत्रापि स्थानभेदगुञ्जाभि कृत्वा माषश्चो ज्ञेय इति तन्त्रान्तरीयमत, तच्च विषकाले प्रचरित स्थिति वदन्ति केचित सर्वत्राप्रसिद्धत्वात्। गुञ्जाऽत्रापेक्षिता ज्ञेया। चतुर्माषकै.

कालिङ्गान्मागधमानस्य श्रेष्ठतानिर्देश ।—

कालिङ्गं मागधञ्चेति द्विविधं मानमुच्यते ।
कालिङ्गान्मागधं श्रेष्ठं मानं मानविदो विदुः ॥३९॥

युक्तायुक्तविचार ।—

नवान्येव हि योज्यानि द्रव्याण्यखिलकर्मसु ।
विना विडङ्गकृष्णाभ्यां गुडधान्याऽऽज्यमाक्षिकैः ॥४०॥

कृत्वा एक माण, स एव निष्क टङ्क्य पर्यायनामा कथित । षड्भि सङ्ख्याकः माषकै कृत्वा एको गद्याण, स च सार्द्धटङ्केन परिमितो भवति । गद्याण इति परिमाणसज्ञाशब्द । दशमाषकैरेव एक कर्ष स्यात्, कर्षोऽत्र कथित, स च सार्द्धद्विशाणमित । चतु कर्षै कृत्वा पलमेक प्रोक्त कथितम, पलं प्रसिद्ध कर्षैरेव उक्त, मानतस्तत् पल दशशाणमित बोद्धव्यम । दृढशैश्चतुर्भि पलै कृत्वा कुडवमेक, तेऽत्वारिशच्छाणपरितुलित भवति । प्रस्थाद्या पूर्ववत मता इति प्रस्थाद्यवशिष्ट मागधपरिभाषावत ज्ञेयमनुक्तमेतेऽर्थ, न तु तत्तुल्यमानम, एतेन कुडवाच्चतुर्थमानमत्रैव प्रतिपादितपलेन परिमित बोद्धव्यम, न तु मागधपरिभाषोक्तपलनेति तात्पर्यार्थ ॥ ३६—३८ ॥

यद्यपि देशान्तरे बहूनि मानानि सन्ति तथाऽपि हे परिमाणे प्रसिद्धे इति विचार्याह, कालिङ्गमिति ।—"कलिङ्गम" इति केचित पठन्ति । कलिङ्गदेशे प्रचुर प्रसिद्ध यत तत कालिङ्गम् । मगधदेशे प्रायश प्रचरतीति मागधमानम् । इति द्रव्याणां परिमाणमिति द्विविध द्विप्रकारमुच्यते मानवेदिभि, कथ्यते इत्यर्थ । इति कालिङ्गपरिभाषा ॥ ३९ ॥

इदानीं द्रव्याणां युक्तायुक्तविचारमाह, नवानीति ।—अखिलकर्मस्विति दशधा द्रव्यकल्पनाविषयेषु नूतनद्रव्याणि योज्यानीति भाव, यत "सर्वेषु चौरवह्नीर्ये-वृद्धं भवति भेषजम् । तेषामलाभे गृह्णीयादनतिक्रान्तवत्सरम् ॥" इति । विडङ्गादिद्रव्यं विना तेन विडङ्गप्रभृतिक पुरातन गुणकरमिति तात्पर्यार्थ । पुरातनत्व नवत्सरादुपरि भवति । तत्र धान्यं धान्यकम, आज्य घृत, तदवापक्वं ज्ञेय, पक्वन्तु हीनवीर्यं स्यात् । तथा हि—"घृतमब्दात पर पक्व हीनवीर्यं प्रजायते । तैलं पक्वमपक्व वा चिरस्थायि गुणाधिकम् ॥" इति । पुराण रूक्षादिगुणसंयुक्तत्वात् ॥ ४० ॥

अष्टद्रव्यग्रहणस्य द्विगुणपरिभाषायाश्चापवाद ।—

गुडूची कुटजो वासा कुशाण्डश्च शतावरी ।
अश्वगन्धा सहचरः शतपुष्पा प्रसारिणी ॥
प्रयोक्तव्या सदैवार्द्राः द्विगुणान् नैव कारयेत् ॥४१॥
(शुष्कं नवीनं यद्द्रव्यं योज्यं सकलकर्मसु ।
आर्द्रञ्च द्विगुणं युञ्ज्यादेष सर्वत्र निश्चयः ॥)

अनुक्तविषयिणी परिभाषा ।—

कालेऽनुक्ते प्रभातं स्यादङ्गेऽनुक्ते जटा भवेत् ।
भागेऽनुक्ते तु साम्यं स्यात् पात्रेऽनुक्ते च मृन्मयम् ॥४२॥
(द्रवेऽनुक्ते जलं ग्राह्यं तैलेऽनुक्ते तिलोद्भवम् ॥)

इदानीं ये सर्वकालेष्वार्द्रा अद्विगुणा द्रव्यविशेषा योज्यास्तानाह, गुडूचीति ।—गुडूचीपूर्वकप्रसारिणीपर्य्यन्ता औषध्य सदैव सर्वस्मिन् काले कृतौ वा तात्कालीनोद्धृता प्रयोक्तव्या, एते च द्रव्यविशेषा द्विगुणा न कार्य्या वीर्य्योत्कृष्टत्वात्। गुडूची प्रसिद्धा। कुटजो वृक्षविशेष स च कौरैयाशब्दवाच्य । वासा आटरूषक.। सहचर कुरण्टक, पियावासा इति ख्यात । प्रसारिणी स्वनामख्याता। एतत्स्थाने "शुष्कं नवीनं यद्द्रव्यं योज्यं सकलकर्मसु। आर्द्रञ्च द्विगुणं युञ्ज्यादेष सर्वत्र निश्चय ॥" इति श्लोकं पठन्ति केचित, स चौक्तमेवार्थं दृढयति, अतो न दोष पौनरुक्त्या। द्विगुणमत्र एकद्रव्यभागापेक्षया, तत् पूर्वमुक्त, न तु सकलभागात। सर्वत्रेति कल्पनाम् ॥ ४१ ॥

इदानीमनुक्तप्रयोगे तद्वचनकालादिकमाह, काले इत्यादि।—काले भेषजभक्षणसमयेऽनुक्ते अप्रकाशिते सति प्रभात प्रातःकालमेव स्यात्। तथा अङ्गे द्रव्यावयवेऽनुक्ते सति जटा मूल स्यादित्यर्थ । भागे द्रव्याणा परिमाणेऽनुक्ते सति साम्य स्यात् सर्वेषा समता भवतीत्यर्थ । पात्रे इति द्रव्यस्य करणार्थं स्थापनार्थञ्च भाजनेऽनुक्ते सति तदा मृन्मय मृत्पात्र ग्राह्यम् । चकारात् द्रवानुक्तविषये पानीय, तथा चोक्त —"द्रवेऽप्यनुक्ते जलमेव देय भागेऽप्यनुक्ते समता विधेया। अङ्गेऽप्यनुक्ते विहितन्तु मूल कालेऽप्यनुक्ते दिवसस्य पूर्वम् ॥" इति ॥ ४२ ॥

द्विरुक्तद्रव्ये कर्त्तव्योपदेश ।—

एकमप्यौषधं योगे यस्मिन् यत् पुनरुच्यते ।
मानतो द्विगुणं प्रोक्तं तद्द्रव्यं तत्त्वदर्शिभिः ॥४३॥

द्विविधचन्दनयो प्रयोगस्थलम् ।—

चूर्णस्नेहासवा लेहाः प्रायशश्चन्दनान्विताः ।
कषायलेपयो प्रायो युज्यते रक्तचन्दनम् ॥४४॥

औषधाना गुणस्थितौ गुणहानौ च कालनिर्देश ।—

गुणहीनं भवेद्वर्षादूर्द्धं तद्रूपमौषधम् ।
मासद्वयात्तथा चूर्णं हीनवीर्य्यत्वमाप्नुयात् ॥४५॥

अथ योगेषु पुनरुक्तद्रव्यस्य मानमाह, एकमिति ।—यत्र योगे एक वाऽपि द्रव्यं द्विपर्य्यायनाम्ना कथितं तदौषध मानत परिमाणात द्विगुण कार्य्यं, द्विगुणिता च एकद्रव्यभागापेक्षया इति तत्त्वदर्शिभिरायुर्वेदरहस्यज्ञापकै प्रोक्तमित्यर्थ । तथा हि —"घृते तैले च योगे च यद्द्रव्य पुनरुच्यते । तत ज्ञातव्यमिहार्य्येण मानतो द्विगुणं भवेत् ॥" इति ॥ ४३ ॥

इदानी सामान्यचन्दनग्रहण योगविशेषेषु विभजनमाह, चूर्णेति ।—चूर्णादय कल्पना चन्दनग्रहणेन रक्तचन्दनान्विता ज्ञेया , आसवग्रहणेन सर्वे सन्धानकाश्च, लेहग्रहणेन गुटिकाग्रहण, यथा—लवङ्गादिचूर्णं लाक्षादितैले विफलाघृते द्राक्षासवे च्यवनप्राशावलेहे द्रष्टव्यम्। कषायलेपयोस्तु चन्दनग्रहणेन रक्तचन्दनं बोध्यमित्यर्थ । कषाय स्वरसादिपञ्चक , तेन स्वरसक्वाथफाण्टहिमकल्कादय । लेपो दशाङ्गप्रभृतय । प्राय इति ग्रहणात् कुत्रापि व्याध्यनुरूप बोद्धव्यम् । न चाव नियमार्थ, प्राय.शब्दो यतो न्यूनमाचष्टे क्वचित्। तथा हि—"प्राय शब्दो विशेषाय क्वचिन्न्यूनेऽपि दृश्यते" इति। क्वथमेलादिचूर्णं रक्तचन्दनान्वितमिति प्रसिद्धि, व्याधिविहितत्वात। तथा चोक्तं—"रक्त शीत गुरु स्वादु छर्दिदाहाऽस्रपित्तनित्। तिक्त नेत्रहित हृद्य ज्वरतृष्णविषापहम् ॥" इति ॥ ४४ ॥

इदानी प्रसिद्धद्रव्याणा कालातिक्रमेण हीनगुणत्वमाह,गुणहीनमिति ।—वर्षादूर्द्धं सवत्सरादुपरि तद्रूपमौषध गुणहीन भवेत स्वकार्य्यकर न भवतीत्यर्थ । तद्रूपमिति यादृशं द्रव्यस्वरूप तादृशमेव तद्रूप कथित न तु चूर्णादि कल्पितम्। तथा च— "धातुरूपद्रव्यवर्जे न श्रेष्ठ वत्सरोषितम्" इति। तथा चूर्णं तालीशाद्यादिक, मास-

हीनत्वं गुटिकालेहौ लभेते वत्सरात् परम्।
हीनाः स्युर्घृततैलाद्याश्चतुर्मासाधिकात्तथा ॥४६॥
ओषध्यो लघुपाकाः स्युर्निर्वीर्या वत्सरात् परम्।
पुराणाः स्युर्गुणैर्युक्ता आसवा धातवो रसाः ॥४७॥

इत्यादुपरि हीनवीर्यत्व भाव हीनवीर्यत्वमाप्नुयात्, वीर्यहानिरप्यत्र भावमात्र, न तु सर्वथा वीर्यरहितत्वम्, यतस्तन्मान्तरे दृश्यते हि लवणभास्करादीना बहुपरिमाणं चिरकालसेवनार्थम्। तदुक्त—"पिप्पली पिप्पलीमूल धान्याकक्षणजीरकम्। सैन्धवञ्च विडञ्चैव पञ्च तालीशकेशरम्॥ एषा द्विपलिकान् भागान् पञ्च सौवर्चलस्य च। मरिचाजाजिशुण्ठीनामेकैकस्य पल पलम्॥ त्वमेले चाष्टभागे च सामुद्रात कुडवद्वयम्। दाडिमात् कुडवञ्चैव हे पले चाम्लवेतसात्॥" इति। एतत् सम्भार बहुकालीपयोगिकम्, अन्यथा व्यर्थमेतत्, तस्मात् भावमात्र चूर्णस्य मासद्वयादुपरि हीन स्यादित्यभिप्राय। गुटिका विजयादिगुटिका, लेहा खण्डखाद्यावलेहप्रभृतयश्चिरकालस्थिता अपि स्वगुण न परित्यजन्ति, किन्तु किञ्चिद्गुणरहिता इति भाव। तथा तैलघृताद्यास्तु मासाधिकादपि वत्सरात् पर स्वगुण न परित्यजन्ति, किन्तु किञ्चिद्गुणरहिता इति भाव, चतुर्मासाधिकात् वत्सरात् पर षोडशमासादुपरि इत्यर्थ। एके "चतुर्मासाधिकात्तथा" इति पठन्ति, तच—चतुर्मासशब्देन वर्षाकाल मन्यन्ते, "वर्षायामुषित स्नेह पक्वो हीनत्वमाप्नुयात्" इति वचनात्। तथेति ग्रहणात् अत्रापि भावमात्र, किन्तु द्रव्यसमूहपाकजस्य गुणस्य हानिर्न तु प्रकृतिगुणहानि। तथा च "लेह सिद्धो गुडादीना गुणहीनो भवेद्ध्रुवम। लेहाद्या पूर्णवीर्या स्युस्ते चतुर्मासतस्तथा" इति। केचित् "हीनत्व स्यात् घृते पक्वे तैले वा वत्सरात् परम्" इति केषाञ्चिन्मतमवलोक्य पठन्ति, तत्र सर्वसम्मत, यत सर्वसम्मत वाक्यमिद दृश्यते, "घृतमब्दात पर किञ्चिद्धीनवीर्यत्व माप्नुयात। तैल पक्वमपक्व वा चिरस्थायि गुणाधिकम्॥" इति। लघुपाका ओषध्यो वर्षादुपरि निर्वीर्या निःशेषेण वीर्यरहिता इत्यर्थ, स्यु, न तु हीनत्वम्, तासु यवगोधूमप्रमुखा, तथा च—'एतेषु यवगोधूमतिलमाषा नवा हिता। दढा पुराणा विरसा न तथा गुणकारिण॥" इति। अथ चिरकालस्थिता ये उत्कृष्टगुणा स्युस्तानाह, पुराणा इत्यादि।—पुराणाश्चिरकालस्थिता, बहुसवत्सरोषिता अपीत्यर्थ, गुणैर्युक्ता इति।—ते आसवादयो विशिष्टगुणान्विता, भवन्तीत्यध्याहार्यम्। आसवा मद्यभेदा, आसवा इति बहुवचनेन सर्वे सन्धानकाश्च ज्ञेया। धातव इति सुवर्णरजतादय, बहुवचनाच्च सशिङ्गमृगाङादयोऽपि बोद्धव्या॥४५—४७॥

युक्तायुक्तद्रव्ययो याच्यवर्ज्यत्वनिर्देश ।—

व्याधेरयुक्त यद्द्रव्य गणोक्तमपि तत् त्यजेत् ।
अनुक्तमपि यद्युक्तं योजयेत्तत्र तद्बुधः ॥४८॥

औषध्याहरणोपयोगिदेशनिर्देश ।—

आग्नेया विन्ध्यशैलाद्याः सौम्यो हिमगिरिर्मतः ।
अतस्तदौषधानि स्युरनुरूपाणि हेतुभिः ॥
अन्येष्वपि प्ररोहन्ति वनेषूपवनेषु च ॥४९॥

औषध्याहरणविधि ।—

गृह्णीयात्तानि सुमना शुचिः प्रातः सुवासरे ।
आदित्यसम्मुखो मौनी नमस्कृत्य शिवं हृदि ॥
साधारणधराद्रव्यं गृह्णीयादुत्तराश्रितम् ॥५०॥

इदानीं रोगाणामुक्तानुक्तद्रव्यविशेषमाह, व्याधेरिति ।—यस्य व्याधेरयुक्तमसात्म्यं यत् द्रव्यं गणेषूक्तमपि तत् त्याज्यम्, यथा—अतीसारे पथ्या । यत् गणेऽनुक्तमपि व्याधे सात्म्यं तत्र तत् योज्यमिति व्यवहारः । यथा—अतीसारे स्वल्पनार्थं वत्सक पाठादि । तथा चोक्तं—"गणोक्तमपि यत् द्रव्यं भवेत् व्याधावयौगिकम् । तदुक्तरेत् यौगिकन्तु प्रचिपेदप्यकीर्त्तितम् ॥" (सु० चि० १अ०) इति ॥ ४८ ॥

इदानीं द्रव्याहरणार्थं देशादिकथनमाह, आग्नेया इति ।—यतो विन्ध्य शैलाद्या आग्नेया अग्निगुणभूयिष्ठा, आदित्यहरणान्मलयसह्यपरियात्रा(पर्वता)दय । हिमगिरिस्तु सौम्यो मत सौम्यगुणभूयिष्ठ इत्यर्थ, अतो हेतोस्तदुद्भवानि द्रव्याणि तद्रूपाणि स्युरुष्णशीतवीर्याणि भवन्तीत्यर्थ । न केवल शैलजातानि, अन्येष्वपि वनेषूपवनेषु च यानि प्ररोहन्ति तान्यपि हेतुभि कृत्वा शीतोष्णवीर्याणि भवन्तीति तात्पर्यार्थ । हेतुरपि ऋतुस्वरूपमिति, एतेन याद्दशम ऋतुरूप शीतोष्णादिक भवति ताद्दशमेव तज्जातद्रव्यस्य वीर्यमित्यर्थ । आगमेऽपि "अग्नीषोमीयत्वाज्जगत" इति । वनमुद्यानम् । उपवन पुरुषव्यापारकृत पूर्वमुक्तम् ॥ ४९ ॥

इदानीं द्रव्याणामाहरणकालमाह, सुमना इति ।—सुमना शोभनचित्त, पुरुष इति शेष, तानि पूर्वोक्तानि द्रव्याणि प्रातररुणोदये गृह्णीयादुत्पाट्य धारयेदिति भाव । कथम्भूत, ? शुचिरिति बाह्याभ्यन्तरेण । आदित्यमुख इति पूर्वाभिमुख । मौनीत्यनुल्बण । सुवासरे इति विशिष्टनक्षत्रादियुक्ते दिने । किं कृत्वा ? चित्ते

ओषध्याहरणे अनुपयोगिदेश ।—

वल्मीककुत्सितानूप-श्मशानोषरमार्गजाः ।
जन्तुवह्निहिमव्याप्ता नौषध्य कार्यसाधिकाः ॥५१॥

प्रयोगविशेषे ओषध्याहरणकाल ।—

शरद्यखिलकार्यार्थं ग्राह्यं सरसमौषधम् ।
विरेकवमनार्थं च वसन्तान्ते समाहरेत् ॥५२॥

ईश्वरं नमस्कृत्य। * साधारणधराद्रव्यमिति साधारणधरा जाङ्गलानूपमिश्रिता पृथ्वी तत्रोत्पन्नद्रव्यम। उत्तराश्रितमिति उत्तरदिग्विभागस्थित, मूल द्रव्यमिति शेष। एतेन द्रव्याणा सवीर्यत्व दर्शितम्। केचित "उत्तराश्रित" इति पुरुषविशेषणं पठन्ति, स च उत्तराभिमुखो भूत्वा च गृह्णीयादिति। गृह्णीयादिति क्रियोक्ति निश्चयार्थज्ञापनार्थ, नान्यथा गृह्णीयादित्यस्य तात्पर्यार्थ। एके तु गृह्णीयादिति पद पूर्वश्लोकेन योजनीयमिति वदन्ति ॥ ५० ॥

इदानी कुत्सितस्थानजातद्रव्यस्य परित्यागमाह, वल्मीकेति।—वल्मीकादिषु स्थानेषु जाता उत्पन्ना ओषध्यो न कार्यकरा। तथा जन्तुवह्निहिमव्याप्ताश्च, अत्र व्याप्तशब्दो जन्त्वादिभि प्रत्येकमभिसम्बध्यते। कुत्सितं बीभत्सस्थानम। आनूप जल-प्रायस्थान, जलव्याप्तमित्यर्थ। जन्तुव्याप्ता इति क्रिमिभक्षिता, वह्निव्याप्ता दावाग्नि दग्धा, हिमव्याप्तास्तुषाराभिव्याप्ता। ओषध्य इति बहुवचनेन अत्र पुष्पफलमूल-त्वक्सारनिर्यासादयो बोद्धव्या ॥ ५१ ॥

इदानीमृतुविशेषेण विरेकवमनार्थमपि द्रव्याहरणकालमाह, शरदीति।—शरदि शरत्काले अखिलकार्यार्थं सकलप्रयोगनिमित्त ग्राह्यम्। वसन्तान्ते वसन्तकाले समाहरेत् गृह्णीयादित्यर्थ। यद्यपि अखिलकार्यग्रहणेनैव विरेकवमनमपि ग्राह्यमेव, तथापि वाक्यानां वैचित्र्येण सामान्यविशिष्टत्व दर्शितमिति न दोषोऽखिल-

---

* "ग्रन्थान्तरात भूमेर्लक्षणमाह—'गन्धवर्णरसोपेता षड्विधा भूमिरिष्यते'। (सु० सू० ३७५०) तत्र समा गौरी कृष्णा लोहिता दृषद्वती बहुजला कठिनाश्च भूमिमौषधग्रहणाय परीक्षेत। तत्र साधारणा भूमि श्रेष्ठा। सुश्रुत साधारणा भूमि-माह—'सर्वलक्षणसम्पन्ना भूमि साधारणा स्मृता। द्रव्याणि यत्र तत्रैव तद्गुणानि विशेषत॥' (सु० सू० ३७५०) इति" इति गूढार्थदी०।

द्रव्यविशेषे ग्राह्याङ्गनिर्देश ।—

अतिस्थूलजटा या स्युस्तासां ग्राह्यास्त्वचो ध्रुवम् ।
गृह्णीयात् सूक्ष्ममूलानि सकलान्यपि बुद्धिमान् ॥५३॥
न्यग्रोधादेस्त्वचो ग्राह्याः सारः स्याद्बीजकादितः ।
तालीमादेश्च पत्राणि फलं स्यात्त्रिफलादितः ॥
धातक्यादेश्च पुष्पाणि क्षुद्घाटेः क्षीरमाहरेत् ॥५४॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधरेण विरचितायां शार्ङ्गधरसंहितायां
पूर्वखण्डे परिभाषा नाम प्रथमोऽध्यायः ॥ १ ॥

ग्रहणेन । तथा च—"ग्रीष्मे मञ्जरिकाग्रेषु वर्षासु दलचर्मणि । वसन्ते मूलमाश्रित्य हेत्वाणाञ्च रसस्य च ॥" ॥ ५२ ॥

अथानुक्तावयवानां द्रव्याणामङ्गग्रहणमाह, अतिस्थूलेति ।—या ओषध्य अतिस्थूलजटा पृथुतरमूला, तासामोषधीनां त्वचो वल्कला ग्राह्या, तास्व वटनिम्बास प्रभृतय । ध्रुवमिति निश्चयेन । यानि सूक्ष्ममूलानि द्रव्याणि तानि सकलान्यपि गृह्णीयात, बुद्धिमानिति सङ्केत्य । सूक्ष्ममूलानि गोक्षुरकगुडूचिकारिप्रभृतीनि । सकलानीति मूलपत्रपुष्पशाखान्वितानि इत्यर्थ । "अतिस्थूलजटाया स्यु" इति केचित् पठन्ति, तत्र अतिस्थूलजटाना त्वचो ग्राह्या इति दशमूलपक्षे प्रचार । अथ द्रव्याणा प्रसिद्धाङ्गाहरणत्वेन विशेषमाह, न्यग्रोधादेरित्यनेन विशेषो दर्शित, न्यग्रोधो वटश्चत्तदादेर्द्रव्यस्यानुक्तात्वचो वल्कला ग्राह्या', आदिशब्दात प्लक्षाश्वत्थोदुम्बरपोतनकाम्पिल्यप्रभृतय । बीजकादित इति बीजको विजयासारो वृक्षविशेषस्तदादितस्तत्प्रभृते सारो मध्यस्थित काष्ठविशेषो ग्राह्य, आदिशब्दात खदिरासनबन्धूकवव्वूलादीना ग्रहणम् । तालीमादेरिति तालीश्च खनामख्यात तदादेस्तत्पूर्वकात् पत्राणि पलाशानि ग्राह्याणि, आदिग्रहणात् पत्रकक्कोलीरीनाग वल्लीपत्रशाकादय । त्रिफलादित इति त्रिफला प्रसिद्धा, तदादितस्तत्प्रभृते फल ग्राह्यम्, आदिग्रहणात प्रियङ्गुकक्कोलमदनफलादय । तालीमादेरिति चकारादनुक्तान्यपि पुष्पनिर्य्यासशुङ्गादीन्यनुमानतो बोद्धव्यानि ॥ ५३।५४ ॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन
विरचितायां शार्ङ्गधरदीपिकायां प्रथमखण्डे
परिभाषानाम प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ।

अथ भैषज्याख्यानकाध्यायः ।

औषधभक्षणे पञ्चविधकालनिर्देश ।—

भैषज्यमभ्यवहरेत् प्रभाते प्रायशो बुधः ।
कषायाश्च विशेषेण तत्र भेदस्तु दर्शितः ॥ १ ॥
ज्ञेयः पञ्चविध कालो भैषज्यग्रहणे नृणाम् ।
किञ्चित् सूर्योदये जाते तथा दिवसभोजने ॥
सायन्तने भोजने च मुहुश्चापि तथा निशि ॥२॥

पूर्वमुक्तं "भैषज्याख्यानकं तथा" इति, इदानीं तद्दर्शयन्नाह, अथेति ।—भैषज्यस्य आख्यानकं भक्षणकालादिकथनम् । तदधिकृत्याह, भैषज्यमिति ।—बुधो भैषज्यं प्रायशो बाहुल्येन प्रभाते अभ्यवहरेत भक्षयेदित्यर्थः । भिषजा स्मृतं द्रव्यं भैषज्यम् । बुध इत्यनेन औषधकालान् वीक्ष्य खबुद्ध्या शोधयेदित्यर्थः । नात्र प्रभातमेव सर्वेषां नियतकालम्, अत एव वक्ष्यते अत्रैव विशेषा, यथा—कषायाश्च विशेषेणेति । विशेषग्रहणेन कषायान् प्रातरेवाभ्यवहरेत नान्यत्र । कषायाणीति बहुवचनेन स्वरसादय पञ्च कषायसंज्ञका ज्ञातव्या, तद्यथा—"स्वरस कल्कनिर्यूहौ हिमफाण्टौ च विश्रुता" इति । तत्र औषधभक्षणे भेद कालभेद दर्शित कथित इत्यर्थः, वक्ष्यमाण इति शेष । इदानीं तद्दर्शयन्नाह, ज्ञेय इति ।—भैषज्यग्रहणे औषधभक्षणनिमित्ते नृणा पञ्चविध पञ्चप्रकार काल 'समयो ज्ञेयः' । एतच्चातिपातिव्याधिषु न कालनियम इत्येके भाषन्ते, यत' "अतिपातिषु रोगेषु नेच्छेद्विधिमिम भिषक् । प्रदीप्तागारवच्छीघ्रं तत्र कुर्यात् प्रतिक्रियाम् ॥" (सु० सू० ५अ०) इति । सत्य तथाऽपि कर्त्तव्यमेतत् । अथ पञ्चप्रकारान् तानाह, किञ्चिदिति ।—तत्र किञ्चित सूर्योदये जाते सति एक काल, स तु प्रायश कषायाद्यर्थमादौ प्रतिपादित, "कषायाश्च विशेषेण" इति वचनात् । द्वितीयस्तु दिवसभोजने भेषजकाल, स पञ्चविधो भवति । भोजनाग्रे यथा—लवणार्द्रक, भोजनमध्ये यथा—हिङ्गुघृतादिक, भोजनमध्ये यथा—पानीयभृतिक, भोजनान्ते यथा—लवङ्गहरीतक्यादि, भोजनपूर्वान्ते चेति यथा—धात्रीलोहमण्डपित्ते । तृतीयकालस्तु सन्ध्यासमयभोजने

तत्र प्रथमकाल ।—

प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः।
लेखनार्थञ्च भैषज्यं प्रभाते तत् समाहरेत् ॥
एवं स्यात् प्रथम कालो भैषज्यग्रहणे नृणाम् ॥३॥

तत्र द्वितीयकाल.।—

भैषज्यं विगुणेऽपाने भोजनाग्रे प्रशस्यते।
अरुचौ चित्रभोज्यैश्च मिश्र रुचिरमाहरेत् ॥ ४ ॥
समानवाते विगुणे मन्देऽग्नावग्निदीपनम्।
दद्याद्भोजनमध्ये च भैषज्य कुशलो भिषक् ॥ ५ ॥

क्षेय सोऽपि विविध, यासे यासान्तरे भुक्तान्ते चेति, स चानुमानतो (?) बोद्धव्य। चतुर्थकालस्तु वारंवार कथित, स द्विविध, तत्र द्रव्य साम्र निरन्नचेति। पञ्चमः कालस्तु निशि रात्रौ बोद्धव्य ॥ १।२ ॥

अथ तेषा प्रत्येक विशेषविवरणमाह, प्राय इति।—पित्तकफोद्रेके सति विरेक वमनार्थयो द्रव्य प्रभाते भक्षयेदित्यभिप्राय। यथा—पित्तोद्रेके विरेक कफोद्रेके वमनम् इति। उद्रेक दोषोत्कट। * अन्यथा अस्मिन् कालेऽपि वमनविरेकयोर्न निषेध। तथा हि "सद्योभुक्तस्य वा जाते † ज्वरे सामे विशेषत। वमन वमनार्हस्य श्लेष्मलित्याह वाग्भट ॥" इत्यादिवचनात्। वमनातियोगेन विरेक स्वट् कारयेत् इत्यपि। न केवल वमनविरेकनिमित्त, लेखनार्थञ्च प्रातरेव, ‡ लेखन पक्वलीकरणं पुरुषाणा दोषाणाञ्च। पुरुषाणा यथा—स्थूलस्य मध्वम्बुनी, दोषाणा यथा—वायोस्तैल, पित्तस्य घृत, कफस्य मधु इति। एवमिति परिसमाप्त प्रथमः काल ॥ २ ॥

अथ द्वितीयकालमाह, भैषज्यमिति।—अपाने गुदस्थिते वाते विगुणे क्रुद्धे भोजनाग्रे भुक्तादौ, भक्षयेत भैषज्यमिति शेष। अरुचौ सत्या चित्रभोज्यैर्भोज्य व्यञ्जनादिकै सह मिश्र मिलित रुचिर रुचिकर यथा स्यात्तथा, भक्षयेत् भैषज्यमिति

---

* "अन्यथा अस्मिन्" इत्यत्र "अन्यस्मिन्" इति पाठो युक्तत्वेन प्रतिभाति।

† "ज्वरे सामे विशेषत" इत्यत्र "ज्वरे सन्तर्पणोत्थिते" इति चक्रपाणि।

‡ "लेखनार्थं कृशीकरणार्थं मेदोरोगादौ दृढधावनार्थं च" इति गूढार्थदी०।

व्यानकोपे च भैषज्यं भोजनान्ते समाहरेत्।
हिक्काक्षेपककम्पेषु पूर्वमन्ते च भोजनात्॥
एव द्वितीयकालश्च प्रोक्तो भैषज्यकर्मणि॥६॥

तत्र तृतीयकाल।—

उदाने कुपिते वाते स्वरभङ्गादिकारिणि।
ग्रासे ग्रासान्तरे देयं भैषज्यं सान्ध्यभोजने॥७॥
प्राणे प्रदुष्टे सान्ध्यस्य भुक्तस्यान्ते च दीयते।
औषध प्रायशो धीरैः कालोऽयं स्यात्तृतीयकः॥८॥

तत्र चतुर्थकाल।—

मुहुर्मुहुश्च तृट्छर्दि-हिक्काश्वासगरेषु च।
सान्नञ्च भेषजं दद्यादिति कालश्चतुर्थकः॥९॥

पूर्ववन्मात्रव्यम्। समानवाते नाभिस्थिते वायौ विगुणे प्रकुपिते सत्यग्निमान्द्येऽपि च अग्निदीपननग्निकर द्रव्य भोजनमध्ये दद्यादित्यर्थ। तथा हिक्काक्षेपककम्पेषु सत्सु भोजनस्य पूर्वमन्ते च दद्यात्। आक्षेपको वातरोगे पठित, कम्पोऽपि वातरोगे॥ ४—६॥

अथ तृतीयकालमाह, उदाने इति।—उदाने कण्ठस्थिते वाते कुपिते, कथम्भूते? स्वरभङ्गादिकारिणि, स्वरभङ्गो विकृतस्वरत्व मूकत्व वा आदिग्रहणात् कण्ठगतरोगाणा ग्रहणम्। सान्ध्यभोजने सन्ध्यासमयभोजनेऽग्ने ग्रासे कवले ग्रासान्तरे कवलयोर्मध्ये भैषज्य देयमित्यभिप्राय। तथा प्राणे हृदयस्थिते प्राणवाते प्रदुष्टे सति सान्ध्यस्य भुक्तस्याहारस्य अन्ते प्रान्ते औषध देयमित्यर्थ। धीरैरिति गम्भीरबुद्धिभिः पुरुषै। अय तृतीय काल स्याज्ज्ञानीयात्। ननु वायो प्राणादय पञ्च भेदा दर्शिता, पित्तकफयोस्तु कथ नोदाहृता? उच्यते—अनिलस्तु दोषधातुमलादीना प्रधानतमः प्रकोपकारणत्व, अत एवास्य प्रकोपेण पित्तकफयो प्रकोप एव "एक प्रकुपितो दोष सर्वानेव प्रकोपयेत्" इति वचनात्। अन्यदपि "स्वयम्भूरेष भगवान् वायुरित्यभिसंज्ञितः। अचिन्त्यवीर्यो दोषाणा नेता रोगसमूहराट्"॥ ७।८॥

अथ चतुर्थकालमाह, मुहुर्मुहुरित्यादि।—तृडादिषु सत्सु मुहुर्मुहुर्वारंवार सान्नमिति भक्तमिश्रित द्रव्य दद्यात्। चकारात् क्वचिन्निरन्नव्यवहाराच्च दोष,। तृट् तृष्णा। गरमत्र विषम्। इति चतुर्थ काल॥९॥

तत्र पञ्चमकाल :—

ऊर्ध्वजत्रुविकारेषु लेखने बृंहणे तथा।
याचनं शमनं देयमन्नं भेषजं निशि।
इति पञ्चमकालः स्यात् प्रोक्तो भैषज्यहेतवे ॥१०॥

द्रव्ये रसादिपञ्चकाना सम्बन्धनिर्देश :—

द्रव्ये रसो गुणो वीर्य्यं विपाकः शक्तिरेव च।
सम्बन्धेन क्रमादेताः पञ्चावस्थाः प्रकीर्त्तिताः ॥ ११ ॥

अथ पञ्चमकालमाह, ऊर्ध्वेति।—रात्रौ याचनशमनरूपमौषध चान्नरहित देयमिति भाव। कुत्र ? ऊर्ध्वजत्रुविकारेषु तथा लेखने बृंहणे च। जत्रु ग्रीवामूल, तदूर्ध्वविकारा शिरोरोगादय। तथा च—"ऊर्ध्वजत्रुगरोगघ्नी सा च स्यादवलेहिका" इत्यादिवचनात्। लेखन प्रह्लदरीत्यादाम्। इत्यना बृंहणमिति चौण्यदीपवर्द्धनमिति भाव.। निशीति सामान्येन सकलरात्रावित्येके भाषन्ते, सम्प्रदाये तु प्रथम यामं वरमित्यर्थ। "इति पञ्चम काल स्यात्" इत्यस्य स्थाने "इत्येव प्रथम काल" पाठ. साधु। भैषज्यहेतवे द्रव्यभक्षणनिमित्ते इत्येव पञ्चम काल कथित ॥ १० ॥

इदानी द्रव्ये रसादीना विशेषावस्थामाह. द्रव्ये इति।—द्रव्ये प्रधानभूते रसादय: पञ्चावस्था कथिता, सम्बन्धेन क्रमादिति ज्ञानक्रमात्, तास्च रसगुणवीर्य्यविपाक-प्रभावादय। रसा षट् मधुरादय. ते तु मधुराम्ललवणतिक्तोषणकषाया। गुणा विंशति, ते यथा—गुरु-मन्द-हिम-स्निग्ध-श्लक्ष्ण-सान्द्र-मृद स्थिर-सूक्ष्म विशदा इति दश। विपर्य्ययास्तु—लघु-तीक्ष्णोष्ण-रूक्ष खर द्रव-कठिन-सर-स्थूल-पिच्छिला, एवं विंशतिगुणा कथिता। वीर्य्यमिति द्विविध, शीतमुष्णञ्चेति। केचिदष्टविधमाहु,—"शीतोष्णस्निग्धरूक्षविशदपिच्छिलमृदुतीक्ष्णञ्च" इति, यत,—"वीर्य्यसज्ञा गुणा ह्येते तेऽपि द्रव्याश्रया मता" इति वचनात्। विपाकस्तु त्रिविध, स्वादम्लकटुकात्मक इति। केचिद्रूक्षलघुहारेण द्विविधमाह। तत्र मधुर कटुरूक्ष, यतो मधुराख्यो गुरु कटु-काख्यो लघुरिति। शक्तिश्चाचिन्त्यप्रभावो द्रव्याणा, यथा—मणिमन्त्रौषधीना विधि। एतेऽपि रसाद्यो द्रव्याश्रिता भवन्ति, तस्मात द्रव्य प्रधानमित्याहु। यदुक्तं—"पाको नास्ति विना वीर्य्याद्वीर्य्यं नास्ति विना रसात्। रसो नास्ति विना द्रव्याद् द्रव्य श्रेष्ठमत स्मृतम्॥" (सु० सू० ४० अ०) इति। द्रव्यमिति सामान्यग्रहणेन मूलत्वक्सारनिर्य्यासादीन्यभिधीयन्ते। तत यथा—"मूलत्वक्सारनिर्य्यास-नालस्वरस-पल्लवा.। क्षारा क्षीर फल पुष्प भस्म तैलानि कण्टका.॥

षड्रसा ।—

मधुरोऽम्लः पटुश्चैव कटुतिक्तकषायकाः ।
इत्येते षड्रसाः ख्याताः नानाद्रव्यसमाश्रिताः ॥ १२ ॥

भूतविशेषसंयोगी रसविशेषोत्पत्ति ।—

धराऽम्बुवह्न्याऽनलजल-ज्वलनाकाशमारुतैः ।
वायुग्निक्ष्माऽनिलैर्भूत-द्वयैः रसभवः क्रमात् ॥१३॥

भूतविशेषाधिक्यं गुणविशेष ।—

गुरुः स्निग्धश्च तीक्ष्णश्च रूक्षो लघुरिति क्रमात् ।
धराऽम्बुवह्निपवन-व्योम्ना प्रायो गुणाः मताः ।
एष्वेवान्तर्भवन्त्यन्ये गुणेषु गुणसञ्चयाः ॥१४॥

पत्राणि शुष्का कन्दाश्च प्ररोहास्तूद्भिदादय ॥" (च० सू० दीर्घञ्जीवि०) "द्रव्यशब्देन गृह्यन्ते जङ्गमा पार्थिवास्तथा ॥" इति । जङ्गमा अपि यथा—"मधूनि गोरसा पित्त वसा मज्जास्थगामिषम् । विण्मूत्रचर्मरेतोऽस्थिस्नायुशृङ्गनखा खुरा ॥ जङ्गमेभ्य' प्रयुज्यन्ते केशा लोमानि रोचना ॥" (च० सू० दीर्घञ्जीवि०) इति । पार्थिवाश्च यथा—"सुवर्ण रसला पत्र लोहा ससिकता सुधा । मन शिलालि मण्यो लवण गैरिकाञ्जने ॥" (च० सू० दीर्घञ्जीवि०) इत्यादि ॥ ११ ॥

अथ तेषा रसादीना खल्वयमाह, मधुर इति ।—मधुरादय षड्रसा द्रव्याश्रिता अन्योऽपि विख्याता एव । तत्र मधुरो घृतगुडादि, अम्ल अम्लीकामातुलुङ्गादि, पटुर्लवणपर्य्याय स च सैन्धवादि, कटुका मरीचादि, तिक्तो निम्बादि, कषायो हरीतक्यादि ॥ १२ ॥

एतेषा मूर्त्तीनाम् (१) उत्पत्तिमाह, धरेत्यादि ।—उत्पत्तिस्तु भूतद्वयेन भवति । भूतं पृथिव्यादि । क्रमादिति युक्तक्रमेण, तत् यथा—धराम्बुभ्या मधुरो रस, तेन पृथिव्यम्बुबाहुल्येन मधुररस' उत्पद्यते । एव क्ष्माऽनलाभ्यामम्ल, अनलज्वलनाभ्या लवण, आकाशमरुद्भ्या कटुक, वायुग्निभ्या तिक्त, क्ष्माऽनिलाभ्या कषाय इति रस ॥ १३ ॥

अथ गुणा, गुरुरिति ।—गुरुस्निग्धादयो गुणा क्रमात धरादीना कथिता' । क्रमो यथा—धराया गुरु, अम्बुन स्निग्ध, वह्नेस्तीक्ष्ण, पवनस्य रूक्ष, व्योम्नो लघुरिति । प्राय इति प्रायेण एतेऽन्ये सूक्ष्मा गुणा गुणाना मध्ये कथिता ।

वीर्य्यम।—

वीर्य्यमुष्णं तथा शीत प्रायशो द्रव्यसञ्चयम्।
यत् सर्वमग्निषोमीय दृश्यते भुवनत्रयम्।
अत्रैवान्तर्भविष्यन्ति वीर्य्याण्यन्यानि यान्यपि ॥१५॥

रसविशेषे विपाकविशेष।—

(त्रिधा विपाको द्रव्यस्य स्वादम्लकटुकात्मकः।)
मिष्ट पटुश्च मधुरमम्लोऽम्लं पच्यते रसः।
कषायकटुतिक्तानां पाक. स्यात् प्रायश. कटुः ॥१६॥

रसाना विपाकविशेषे दोषविशेषोत्पत्ति।—

मधुराज्जायते श्लेष्मा पित्तमम्लाच्च जायते।
कटुकाज्जायते वायुः कर्माण्येतानि पाकतः ॥१७॥

पञ्चगुणग्रहणं भूतक्रमेण कृतम्। एवमेव पञ्चगुणेषु अन्येऽपि सूक्ष्मस्थान्द्रस्वटुप्रभृतिगुणसञ्चया बोद्धव्या, ते चाप्यनुमानतो निरूपणीया। गुणा इति बहुवचनत्वेन व्यवायौ विकासी चापरौ द्वौ द्वाविंशत्यर्थमिति केचित्, सत्त्वं रजस्तमश्चेति त्रयो महागुणा कथिता इति कैश्चित ॥ १४ ॥

अथ वीर्य्यम।—वीर्य्यमिति शक्ति। तद्विविधमपि प्रायशो बाहुल्येन द्रव्यसञ्चयं द्रव्याधीन भवति, द्विविध शीतोष्णभेदेन, यस्माद्भुवनत्रयमग्न्यात्मक सोमात्मकञ्च दृश्यते। अत्रैव शीतोष्णवीर्य्ये अन्यानि यानि वीर्य्याणि तान्यन्तर्भविष्यन्ति इति केचित् वदन्ति न खलतं, यत प्रायश इति ग्रहणेन शीतोष्ण विशिष्टवीर्य्यम्। अन्यानीति स्निग्धरूक्षविशदपिच्छिलमृदुतीक्ष्णादीनि। महाभूतानि तु व्याख्युर्जलनाकाशमारुता ॥१५॥

अथ विपाकमाह, मिष्ट इति।—प्रायशो बाहुल्येनाव विविध एव विपाक मधुरोऽम्ल कटुक इति। विशिष्टो पाको विपाक। तत्र मिष्टो मधुर, पटुर्लवण एतयोर्मधुर इति मधुरविपाक इत्यभिप्राय। अम्लोऽम्लमिति अम्लो रस अम्लमेव पच्यते। कटुतिक्तकषायाणा रसाना कटुरिति कटुकविपाक स्यात्। एतदभिप्रायेण तन्त्रान्तरे चोक्त—"त्रिधा विपाको द्रव्यस्य स्वादम्लकटुकात्मक" (वा० सू० १अ०) इति ॥१६॥

अत एव विपाकाना त्रिविध कर्म भवति, तदाह, मधुरादित्यादि।—मधुरात्

प्रभाव ।—

प्रभावस्तु यथा धात्री लघुरस्ति रसादिभिः ।
समाऽपि कुरुते दोष-त्रितयस्य विनाशनम् ॥ १८ ॥
क्वचित्तु केवल द्रव्यं कर्म कुर्यात् प्रभावतः ।
ज्वरं हन्ति शिरोबद्धा महदेवीजटा यथा ॥१९॥

रसादिपञ्चकाना पृथक पृथक् कार्यकारिता ।—

क्वचिद्रसो गुणो वीर्यं विपाकः शक्तिरेव च ।
कर्म स्वं स्वं प्रकुर्वन्ति द्रव्यमाश्रित्य ये स्थिताः ॥२०॥

मधुरविपाकात् श्लेष्मा प्रजायते प्रकोपमापद्यते इत्यर्थः । अम्लाद्विदग्धविपाकात् पित्तमिति । कटुकादिति कटुकविपाकात् वायुरिति । एतानि कर्माणि यत् कुर्वन्ति तत् कर्म, कर्मशब्देनात्र दोषप्रकोपव्यापारलक्षणं धर्म इति ॥ १७ ॥

इदानीं प्रभावमाह, प्रभाव इति ।—विशिष्टो भाव उत्कृष्टा शक्तिरित्यर्थः । यथा धात्री आमलकीफल रसादिभिरिति रसगुणवीर्यविपाकादिभि समा समानगुणा लघुरस्ति, तथापि तदेवामलकीफल प्रभावाद्दोषत्रयनाशन नियतमेव । इति रसादिप्रभाव । केवल द्रव्यप्रभावमाह, क्वचिदित्यादि ।—कुर्वापि केवलमेकद्रव्यमेव प्रभावतः कर्म कुर्यात् । यथा महदेवीजटा शिरोबद्धा सती ज्वर हन्तीति । अत एवाचिन्त्यो मणिमन्त्रौषधीना प्रभाव इति विश्रुति । एके—"प्रभावस्तु यथा धात्री - लकुचस्य रसादिभिः" इति पठन्ति, तत्र—लकुचफलस्य रसादिभिः सह धात्री समानधर्मा, तथापि धात्री प्रभावादेव दोषत्रयनाशिनी भवति। लकुचफल लकुचः क्षुद्रफलस्य, "नारङ्गफलम्" इत्येके ॥१८।१९॥

अथ द्रव्याश्रितानां रसादीना निजोत्कृष्टतामाह, क्वचिदिति ।—द्रव्यमाश्रित्य स्थिता ये रसादयस्ते स्व स्व कर्म प्रकुर्वन्ति । क्वचिद्रस इति, यथा—तिक्ता गुडूची उष्णवीर्याऽपि पित्त शमयति । क्वचिद्गुणो यथा—कटुक मूलकं श्लेष्माणञ्च वर्द्धयति स्निग्धगुणत्वात् । क्वचिद्वीर्यमिति, यथा—महत् पञ्चमूलं कषाय तिक्तानुरस वातं शमयति उष्णवीर्यत्वात् । ननु गुणवीर्ययो. को भेद ? उच्यते—य एव गुणा धात्रीफले त एव हरीतक्या सन्ति, वीर्यविशेषोऽस्ति, यत. उष्णवीर्या हरीतकी शीतवीर्यं धात्रीफलमिति, तस्माद्भिन्नत्व प्रतिपादितमिति न दोष । क्वाचिद्विपाक इति, यद्द्रव्य परिणामकाले

अयमेव पाठ. साधु. ।

दोषाणां चयादौ ऋतुषट्कानां हेतुता।—

चयकोपशमा यस्मिन् दोषाणां सम्भवन्ति हि।
ऋतुषट्कं तदाख्यातं रवे राशिषु सङ्क्रमात् ॥२१॥

राशिविशेषे ऋतुविशेष।—

ग्रीष्मो मेषवृषौ प्रोक्तौ प्रावृट् मिथुनकर्कयोः।
सिंहकन्ये स्मृता वर्षासुलावृश्चिकयो शरत्॥
धनुर्ग्राहौ च हेमन्तो वसन्तः कुम्भमीनयोः ॥२२॥

स्वाभाविक रस परित्यज्य रसान्तर भजते तत्र विपाक इति सज्ञा, यथा—शुण्ठी कटुकोऽपि वात शमयति मधुरपाकत्वात्। क्वचित शक्तिरिति, यथा—शक्तित प्रभावत, यतो रसगुणवीर्य्यविपाकैर्यत कर्म कर्तु न शक्नुते तत कर्म कुर्वन् प्रभाव इति सज्ञा, यथा—खदिर कुष्ठ हन्ति। अत एवाह सुश्रुत,—"अमोघास्यान्यचिन्त्यानि प्रसिद्धानि स्वभावत। आगमेनोपयोज्यानि भेषजानि विचक्षणै॥" (सु० सू० ४० अ०) इति द्रव्यादिकथनम् ॥२०॥

अथ दोषोपचयप्रकोपोपशमान् दर्शयन्नाह, चयकोपशमा इति।—दोषाणां वातादीना चयकोपशमा इति चय सञ्चय, स च महतिरूपा वृद्धि, "स्वस्थानवृद्धि" इत्यन्ये। कोप प्रकोप स च प्रविलयरूपा वृद्धि प्रकोप। शम इत्युपरम, यथा—वातपित्तकफाना शरत्तेमन्तग्रीष्मेषु यथासङ्ख्यमुपशम स्वभावत एव। तत् ऋतुषट्क ग्रीष्मप्रावृड्वर्षाशरद्धेमन्तवसन्ताख्यमित्यर्थ। कुत इत्याह—रवे राशिषु सङ्क्रमादिति * रवे सूर्यस्य राशिषु मेषादिषु सङ्क्रमात् प्रवेशादित्यर्थ॥ २१॥

इदानीमृतुषट्क राशिद्वयेन दर्शयन्नाह, ग्रीष्म इति।—मेषसङ्क्रान्तिप्रभृति द्वय-

---

* "जीवितमरणे च मनुष्याणामायत्तेति स सूक्ष्मामपि कला न लीयते इति काल, कलयति उत्पादयति मरणं नयति वा भूतानीति काल। तस्य सवत्सरात्मनो भगवानादित्या गतिविशेषेण अक्षिनिमेषिकाकाष्ठाकलामुहूर्त्ताहोरात्रपक्षमासर्त्वयनसवत्सरयुगप्रविभाग करोति। तत्र लघुचरोच्चारणमात्रोऽक्षिनिमेष, पञ्चदशाक्षिनिमेषा काष्ठा, त्रिंशत्काष्ठा कला विंशतिकलो मुहूर्त्त कलादशभागश्च, त्रिंशन्मुहूर्त्तमहोरात्र, पञ्चदशाहोरात्राणि पक्ष, स च द्विविध, शुक्ल कृष्णश्च, तौ मास, तत्र माघादयो द्वादश मासा, द्विमासिकम् ऋतुं कला षड्ऋतवो भवन्ति" इति गूढार्थदीपिका।

ऋतुविशेषे दोषाणां चयकोपप्रशमा :—

ग्रीष्मे सञ्चीयते वायुः प्रावृट्काले प्रकुप्यति।
वर्षासु चीयते पित्तं शरत्काले प्रकुप्यति॥
हेमन्ते चीयते श्लेष्मा वसन्ते च प्रकुप्यति॥२३॥

सङ्ग्रान्त्यवसान ग्रीष्म-ऋतु प्रोक्त कथित इत्यर्थ। एव मिथुनादिककान्त प्रावृट्, सिंहादिकत्यान्त वर्षा-ऋतु, तुलादिवृश्चिकान्त शरत्, धनुरादिमीनान्त हेमन्त, माघो मकर, कुम्भादिमीनान्त वसन्त इति। एतेन राशिद्वयेन द्विमासिकमपि ऋतुषट्क भवति। तद्दोषचयादिनिमित्तमभिहित तत्त्वज्ञानार्थम्। यदुक्त सुश्रुतेन—"दोषोपचयप्रकोपोपशमनानिमित्त, ते तु भाद्रपदाद्येन द्विमासिकेन व्याख्याता" (सु० सू० ६ अ०) वर्षादयो यथासङ्ख्याता। ये तु तन्मात्तरे—"मासैर्द्विसङ्ख्यैर्नामाद्यो" (वा० सू० ३ अ०) इत्यादिना शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ता भवन्ति ते तु शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययो कालविभागकरत्वाच्चायननिमित्ता, यतो "मासराशिस्वरूपाख्यस्तौ यल्लक्षणवयम्" इति वचनात्। ननु प्रावृड्वर्षयो को भेद? उच्यते—* प्रथम प्रवृत्त काल प्रावृट् तस्यानुबन्धो वर्षा इत्यत्र भेद। एव "शिशिरे शीतसविक" (सु० सू० ६ अ०) "रौक्ष्यदानकालजम्" (वा० सू० ३अ०) इत्यनेन शिशिरहेमन्तयोरपि भेदोऽस्ति॥२२॥

पूर्वसूक्त चयकोपशमा ऋतवो भवन्ति, तयोर्मध्ये आदौ मधुमाधवादिभ्योऽप्यक्तत्वात् केवलप्रकोपे ऋतुमाह—'ते शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ता, † तेषा माघफाल्गुनौ शिशिर, चैत्रवैशाखौ वसन्त, ज्येष्ठाषाढौ ग्रीष्म, श्रावणभाद्रपदौ वर्षा, आश्विनकार्त्तिकौ शरत, मार्गपौषौ हेमन्त इति। ते एते शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययो कालप्रविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरञ्च, तथोर्दक्षिण वर्षाशरद्धेमन्ता, तेषु भगवानाप्यायते सोम, अम्ललवणमधुराश्च रसा बलवन्तो भवन्ति उत्तरोत्तरञ्च सर्वप्राणिना बलमभिवर्द्धते। उत्तरञ्च शिशिरवसन्तग्रीष्मास्तेषु भगवानाप्यायते अर्क तिक्तकषायकटुकाश्च रसा बलवन्तो भवन्ति उत्तरोत्तरञ्च

---

* "प्रथम प्रवृत्ते काल" (च० वि० रोगभिषग्०) इति पाठ।

† "तेषा तपस्तपस्यौ शिशिर, मधुमाधवौ वसन्त, शुचिशुक्रौ ग्रीष्म, नभोनभस्यौ वर्षा, इषोर्जौ शरत, सह सहस्यौ हेमन्त, इति" सुश्रुते "तेषाम्" इत्यारभ्य "हेमन्त इति" इत्यन्तस्थाने पाठ।

प्रायेण प्रशम याति स्वयमेव समीरणः।
शरत्काले वसन्ते च पित्त प्रावृट्-ऋतौ कफः ॥२४॥

सर्वप्राणिना बलमपहीयते। भवति चात्र—शीतासु क्लेदयत्युर्वी विवस्वान् शोषयत्यपि। तावुभावपि सश्रित्य वायु पालयति प्रजा॥" (सु० सू० ६अ०) इति। अतस्तानाह शीते इति।—वायुर्शीते सञ्चीयते सञ्चयमापद्यते इत्यर्थः। एव पित्तश्लेष्माणावपि स्वस्व-ऋतुषु चयकोपावापद्येते। सम्यग्-ग्रहण स्वसञ्चयकारणार्थं बोद्धव्यम्, तत् सञ्चयकारण तन्त्रान्तरादवगन्तव्यम्। तद्यथा—'ता एवौषधयो निदाघे नि सारा रूक्षा अतिमात्र लघ्वी भवन्त्यापश्च, ता उपयुज्यमाना सूर्यप्रतापोप शोषितदेहाना देहिना रौक्ष्याल्लघुत्वाद्वैशद्याच्च वायो सञ्चयमापादयन्ति" (सु० सू० ६अ०) इति। ननु शीतस्य वायोरुष्णे शीते सञ्चय कथ सम्भवति? उच्यते—सर्वेषु वातगुणेषु रौक्ष्य प्रधान, तेनौषधीनामत्यथरौक्ष्येण रूक्षस्य वायोर्शीते सञ्चय स्यादित्यदोष। यदेव चयमेती भवति प्रावृट्काले प्रकुप्यतीति प्रावृट्काले प्रावृषि, प्रकुप्यतीति प्रशब्दोऽत्र प्रकर्षकारण सूचयति, तदृयथा—"स सञ्चय प्रावृषि चात्यर्थं जलोपक्लिन्नाया भूमौ क्लिन्नदेहाना प्राणिना शीतवातवर्षैरिती वातिकान् व्याधीन् जनयति" (सु० सू० ६अ०)। वायु प्रकोपमापद्यते इति तात्पर्यार्थः। एव पित्तमपि वर्षासु सञ्चितं शरत्काले प्रकुप्यति। कफोऽपि हेमन्ते सञ्चयमापद्य वसन्ते प्रकोप करोतीत्यर्थः। अनयो कारण तन्त्रान्तराद्वगन्तव्यम्। केषाञ्चित् ज्ञापनार्थं लिख्यते, यथा—"तव वर्षास्वोषधयस्तरुण्याऽल्पवीर्या आपश्चाप्रसन्ना क्षितिमलप्राया., ता उपयुज्यमाना नभसि मेघावतते जलप्लिन्नाया भूमौ क्लिन्नदेहाना प्राणिना शीतवातविष्टब्धिताग्नीना विदह्यन्ते, विदाहात् पित्तसञ्चयमापादयन्ति, स सञ्चय शरदि प्रविरलमेघे विवस्वत्यप्युष्णपडे अर्ककिरणप्रविलायित पैत्तिकान् व्याधीन् जनयति। ता एवौषधय काल-परिणामात् परिणतवीर्या बलवत्यो हेमन्ते भवन्त्यापश्च प्रसन्ना स्निग्धा अत्यर्थं गुर्व्यं, ता उपयुज्यमाना मन्दकिरणत्वाज्ञानी सतुषारपवनोपस्तम्भितदेहाना देहिनामविदग्धा क्षेत्रात् श्लैत्यात् गौरवादुपलेपाच्च श्लेष्मण सञ्चयमापादयन्ति, स सञ्चयो वसन्तेऽर्करश्मिप्रविलायित ईषत्तप्तदेहाना देहिना श्लैष्मिकान् व्याधीन् जनयति" (सु० सू० ६अ०)। इत्येव दोषाणा सञ्चयप्रकोपौ दर्शितौ। ननु दोषाणा सञ्चितेषु ऋतुषु कथ न प्रकोप? इति। उच्यते—शीतस्य वायोर्ग्रीष्मस्थाति उष्णत्वात्तस्मिन्नेव काले न प्रकोप.। सञ्चीयमानमपि पित्तम् ऋतुशैत्यात् तस्मिन्

यमदष्ट्रा।—

* कार्त्तिकस्य दिनान्यष्टावष्टाग्रैहायणस्य च।
यमदंष्ट्रा समाख्याता स्वल्पभुक् चात्र जीवति॥

दोषाणां चयादौ विहाराहारादीनामपि हेतुता।—

चयकोपशमान् दोषा विहाराहारसेवनैः।
समानैर्यान्त्यकालेऽपि विपरीतैर्विपर्य्ययम्॥२५॥

काले न प्रकुप्यति ऋत्वादिस्वभावात्। कफस्य सञ्चीयमानस्य हिमानीवशात् तदानीं स्थानतैव भवति न प्रकोप। वसन्ते च प्रकुप्यति इति च-कारग्रहणेनात्र संसर्गादिक्रमोरावर्त्तेऽपि जानीयात्। तदंयथा—"तत्र पूर्वाह्णे वसन्तस्य लिङ्ग, मध्याह्ने ग्रीष्मस्य अपराह्णे प्रावृष, प्रदोषे वार्षिक शरदभ्रराज्ञे, प्रत्यूषसि हैमन्तमुपलक्षयेत" (सु० सू० ६ अ०)। अथ दोषाणामुपशममाह प्रायेणेत्यादि।— समीरणो वायु, शरत्काले स्वयमेव कारणं विना प्रशम याति प्राप्नोति; स्वयमेवेति स्वभावत स्वलक्षणत इत्यर्थ। स्वलक्षण पुनरेषा शीतोष्णवर्षादि। एव वसन्तेऽपि पित्त, प्रावृट्काले कफ इति। अत्र यत शरद्वसन्तप्रावृट् चयोपशमार्थमुक्तं तद्राश्यि-परिवर्त्तनात्, अन्यथा तन्मान्तरविरोध। प्रायेणेतिग्रहणात् दोषजा अपि व्याधय प्रशम यान्ति स्वयमेवेति सुश्रुत। तथा हि—तत्र "पैत्तिकाना व्याधीनामुपशमो हैमन्ते, श्लैष्मिकाणा निदाघे, वातिकाना शरदि स्वभावत एव" (सु० सू० ६ अ०)। अत्र शीतोष्णवर्षालक्षणकालप्रभावादपशम, तस्मात् पूर्वेभ्यो न विरोध॥ २३।२४॥

इदानी दोषाणामकालेऽपि चयादिनिमित्त हेतुमाह, चयेत्यादि।—दोषा वातादय समानैर्विहाराहारसेवनै' कृत्वा चयादीन् यान्ति प्राप्नुवन्तीत्यर्थ। विपरीतै-रसमानै कृत्वा अकाले अप्रशम-ऋतावपि विपर्य्ययं नाश प्राप्नुवन्तीत्यर्थ। समानैरिति दोषानुरूपकारणै, तदंयथा—लघुरूक्षशीतादयो वातगुणसमाना, विदाहिकटु-काम्लोष्णादय पित्तगुणसमाना, मधुरस्निग्धशीतादयोऽपि श्लेष्मगुणसमाना इति। एषा विपरीतैर्विपर्य्यये, यथा—गुरुस्निग्धोष्णादयो वातगुणविपर्य्यया, अविदाहि-मधुरशीतादय पित्तगुणविपरीता, तिक्तोष्णरूक्षादय श्लेष्मगुणविपरीता इति॥२५॥

---

* श्लोकोऽय प्रक्षिप्त इति केचिन्मन्यते।

वायो प्रकोपे प्रशमे च कारणानि।—

लघुरूक्षमिताहारादतिशीताच्छमात्तथा।
प्रदोषे कामशोकाभ्यां भी-चिन्ता-रात्रिजागरैः ॥२६॥
अभिघातादपां गाहाज्जीर्णेऽन्ने धातुसङ्क्षयात्।
वायुः प्रकोपं यात्येभिः प्रत्यनीकैश्च शाम्यति ॥२७॥

पित्तस्य प्रकोपे प्रशमे च कारणानि।—

विदाहिकटुकाम्लोष्ण-भोज्यैरत्युष्णसेवनात्।
मध्याह्ने क्षुत्तृषो रोषाज्जीर्यत्यन्नेऽर्द्धरात्रके ॥
पित्तं प्रकोपं यात्येभिः प्रत्यनीकैश्च शाम्यति ॥२८॥

अथ दोषाणां प्रत्येकं प्रकोपशमकारणान्याह, लघ्वित्यादि।—लघ्वादिधातुसङ्क्षयात्ते कारणैर्वायुः प्रकोपं याति प्राप्नोतीत्यर्थः। एतैश्च प्रत्यनीकैर्विपरीतैश्च शाम्यतीत्यर्थः। आहारशब्दो लघ्वादिभिः प्रत्येकं सम्बध्यते, तेन लघ्वाहारात् रूक्षाहारात् मिताहारादित्यर्थः। लघ्विति पाकतः, मितं खलु रूक्षमस्निग्धम्। अतिशीतादित्यतिशीतसेवनात्। अतिश्रमादिति अतिशरीरायासात्, अतिशब्दोऽपि वीप्स्यः। प्रदोषे रजनीमुखे। कामशोकाभ्यामिति कामोऽभिलाषः स च स्त्रीसङ्कल्परूपः, अभिमतकामिन्यायत्तप्राप्तिरिति भावः, शोको धनबन्धुनाशादिना, भीर्भयं, कामशोकभयाद्यैरिति। अभिघात अस्त्रलगुडादीनाम्। अपां गाहात् अतिजलावगाहात्, अतिशब्दोऽत्र पूर्वादनुवर्तते। जीर्णेऽन्ने आहारे परिपाकं गते सति। धातुसङ्क्षयादिति रसादिधातूनां क्षीणत्वात्, यदुक्तं—"धातुक्षयात् क्षुते रक्ते मन्दे सञ्जायतेऽनले। पवनश्च परं कोपं याति तस्मात् प्रयत्नतः॥" (सु० सू० १४ अ०) इत्यादि। प्रत्यनीकैरिति लघ्वादीनां विपर्ययैः, तेऽप्यनुमानतोऽवगन्तव्याः ॥२६।२७॥

अथ पित्त—विदाहीति।—विदाहिभोज्यादिभिः कारणैः पित्तं प्रकोपं याति। एषां प्रत्यनीकैर्विपरीतैः कृत्वा शाम्यतीति। भोज्यशब्दो विदाहादिभिः प्रत्येकमभिसम्बध्यते, तेन विदाहिभोज्यैः कटुकभोज्यैरम्लभोज्यैरुष्णभोज्यैरिति। यद्वा—विदाहीति भिन्नार्थतूचकं ज्ञेयं, तेन विदाहि वशकरीरादि पित्तकरत्वात्। उष्णभोजनञ्च वीर्यात् स्वभावात्। अत्युष्णसेवनादित्यातपाग्नीनाम्। क्षुत्तृषो रोषादिति क्षुत् क्षुधा तस्या

कफस्य प्रकोपे प्रशमे च कारणानि।—

मधुरस्निग्धशीतादि-भोज्यैर्दिवसनिद्रया।
मन्देऽग्नौ च प्रभाते च भुक्तमात्रे तथाऽश्नतः॥
श्लेष्मा प्रकोपं यात्येभि प्रत्यनीकैश्च शाम्यति॥२८॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधरेण विरचितायां शार्ङ्गधरसंहितायां
पूर्वखण्डे भेषज्याख्यानक नाम द्वितीयोऽध्याय॥२॥

तृतीयोऽध्यायः।

अथ नाडीपरीक्षादिविधिरध्यायः।

नाडीपरीक्षाख्यानम्।—

करस्याङ्गुष्ठमूले या धमनी जीवसाक्षिणी।
तच्चेष्टया सुखं दुःखं ज्ञेयं कायस्य पण्डितैः॥१॥

रोधात क्षुट् तृषा तस्मा अवरोधात, अवरोधो वेगधारणम्। एके "क्षुत्तृषो रोधात्" इति पठन्ति, तत्र—क्षुत्तृषोर्वेगवेगात्,' रोधात क्रोधात, तथा च—"क्रोधात् पित्त प्रकुप्यति" इति। प्रत्यनीकैरिति विदाहिभोज्यादीना विपरीतैरिति सुगमम॥२८॥

अथ कफस्य—मधुरेति।—मधरभोज्यादिभि श्लेष्मा प्रकोप याति। एषां प्रत्यनीकै नाशकरै शाम्यति शान्ति प्राप्नातीत्यर्थ। भोज्यशब्दोऽत्रापि मधुरादिभि प्रत्येकमभिसम्बध्यत, तेन मधरभोज्ये स्निग्धभोज्ये शीतादिभोज्यैश्च। आदिशब्दात् गुरुश्लक्ष्णादीना ग्रहणम्। दिवसनिद्रया कफवृद्धि स्यात, यत,—"रात्रौ जागरणं कृत्वा स्निग्ध प्रस्वपन दिवा" (च० सू० अष्टौ निन्दितीय०) इति वचनात्। अश्नत इति अभ्यासात "व्यायाम कफनाशनम्" इत्युक्ते॥२९॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यश्रीभवसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधर-
दीपिकायां प्रथमखण्डे भेषज्याख्यानक नाम द्वितीयोऽध्याय॥२॥

पूर्वमुक्त नाडीपरीक्षादिविधिरिति अनन्तरं नाडीपरीक्षामाह—अथेति। करस्येति।—जीवसाक्षिणी या धमनी सा करस्याङ्गुष्ठमूलेऽस्तीति क्रियापदं योज्य, पण्डितैः

वातकोपे पित्तकोपे च नाडीलक्षणम्।—

नाडी धत्ते मरुत्कोपे जलौकासर्पयोर्गतिम्।
कुलिङ्गकाकमण्डूक-गतिं पित्तस्य कोपतः॥ २॥

श्लेष्मकोपे त्रिदोषकोपे च नाडीलक्षणम्।—

हंसपारावतगतिं धत्ते श्लेष्मप्रकोपतः।
लावतित्तिरवर्त्तीना गमनं सन्निपातजः॥३॥

त्रिदोषकोपे नाडीलक्षणम्।—

कदाचिन्मन्दगमना कदाचिद्वेगवाहिनी।
त्रिदोषकोपतो ज्ञेया—" ॥४॥

तज्ज्ञेष्टया कृत्वा कायस्य शरीरस्य सुखं दुःखञ्च ज्ञेयम् इति। धमनीति शब्दवाहिनी नाडी, धमनी जीवन तनौ इत्यतो धमनी जीवसाक्षिणीति प्राणवायो साक्षिभूता, अत एव कुत्रचिज्जीवनाडीति कथिता। तथा हि—"प्रदर्शयेच्छोषनिजस्वरूप व्यक्तं समस्त युगलौकतत्त्व। मूकस्य मुग्धस्य विमोहितस्य दीप पदार्थानिव जीवनाडी॥" इति। लक्षणमपि च—"अस्थ्नः प्रकीर्णबाह्यस्य मध्यमानामिकाश्रिता। जीवनाडीति सा प्रोक्ता नन्दिनी तत्त्ववेदना॥" इति। तज्ज्ञेष्टया दुःखमिति दोषादिवैषम्यधर्म, यत "रोगस्तु दोषवैषम्यम्" (वा० सू० १ अ०) इत्यादिवचनात्। परिज्ञैरिति प्रवीणैः नाडीग्रहणस्य समयविशेषज्ञैरित्यर्थ। यत,—'सद्य स्नातस्य भुक्तस्य क्षुत्तृष्णा-र्तस्यौषधेन। व्यायामश्रान्तदेहस्य सम्यङ्नाडी न बुध्यते॥" इति॥१॥

इदानी दोषाणा निजस्वरूपचेष्टामाह, नाडीति।—नाडी मरुत्कोपे वात-प्रकोपे जलौकासर्पयोर्गतिं गमन धत्ते। जलौकासर्पयोरित्यग्रतिरित्यभिप्राय; तद्वदपि। पित्तप्रकोपतस्तु कुलिङ्गादीना गतिं धत्ते, कुलिङ्गो गृहचटक। काकमण्डूकौ प्रसिद्धौ, एतेषामुत्प्लवनगतिरित्यर्थ। एके कुलिङ्गस्थाने "कलापी" इति पठन्ति व्याख्यानयन्ति च—कलापी मयूर। श्लेष्मप्रकोपात् हंसपारावतगतिं धत्ते, अत्रापि नाडीति सम्बध्यते। एतेन मन्दगतिवाहिनी भवतीत्यभिप्राय; यतो हंसपारावतयोरपि मन्दगति स्यात्। अथ सन्निपातसमुद्भवीनाडीचेष्टामाह, लावेति।—सन्निपातस्त्रिदोषकोपात् लावादीना गमन नाडी धत्ते इति पूर्वादनु-वर्त्तते। लावतित्तिरौ प्रसिद्धौ। वर्त्तीति वर्त्तिका "धरधर" शब्दवाच्या। गडूकाभि-धानेत्यन्ये। एतेषा सोत्तालां गतिं सूचयते। त्रिदोषकोपादपि नाडी कदाचिन्मन्द-गामिनी कदाचिद्वेगवाहिनीति॥२—४॥

असाध्यनाडीलक्षणम्।—

"—हन्ति च स्थानविच्युता।
स्खित्वा स्खित्वा चलति या सा स्मृता प्राणनाशिनी।
अतिक्षीणा च शीता च जीवितं हन्त्यसंशयम् ॥५॥

ज्वररोगे कामक्रोधादौ च नाडीलक्षणम्।—

ज्वरकोपेन धमनी सोष्णा वेगवती भवेत्।
कामक्रोधादिवेगवहा क्षीणा चिन्ताभयप्लुता ॥६॥

मन्दाग्निधातुक्षीणादौ नाडीलक्षणम्।—

मन्दाग्नेः क्षीणधातोश्च नाडी मन्दतरा भवेत्।
असृक्पूर्णा भवेत् कोष्णा गुर्वी सामा गरीयसी ॥७॥

इदानीमसाध्याया लक्षणमाह, हन्तीति।—स्थानविच्युता स्वस्थानाच्चलिता, नाडीति शेषः, हन्तीति आतुरमिति शेषः। या स्खित्वा स्खित्वा चलति गच्छति साऽपि प्राणनाशिनी ज्ञेया, एतेन कदाचिद्वहति कदाचिन्न वहतीत्यभिप्रायः। अतिक्षीणा चेति विततन्तुवत्, अतिशीता चेति हिमस्पर्शवत्। असंशयं निश्चयेन जीवितं प्राणान् हन्ति, नाडीति शेषः। चकारात् कुटिला क्षीणक्रोधीभयमनःक्षोभादपि प्राणनाशिनी बोद्धव्या। तथा चोक्तं—"नाडी मध्यवहाऽङ्गुष्ठ-मूले याऽत्यर्थमुच्छ्वसेत्। अनेकक्षीणक्रोधीभयमना कुटिला हन्ति मानवम्॥" इति ॥५॥

अथ ज्वरादीना धमनीलक्षणमाह, ज्वरकोपेनेति।—ज्वरकोपेन सामान्यज्वरस्य प्रकोपेण कृत्वा धमनी नाडी सोष्णा उष्णयुक्ता भवेत्, ज्वरस्योष्णात्मकत्वात्, न केवलं सोष्णा, वेगवती भवेत्, ज्वरस्य देहेन्द्रियमनःसन्तापित्वात्। कामक्रोधादपि वेगा वेगयुक्ता अनौष्ण्येन ज्वरान्विता। कामोऽभिमतकामिन्याद्यप्राप्तिः। क्रोधो हिंसात्मकादिरूपः। चिन्ताभयप्लुतेति चिन्ताभययुक्ता नाडी क्षीणा सुसूक्ष्मा ज्ञेया। चिन्ता मनोदैन्यरूपा। भयं शत्रुप्रभृतीनाम्। एके "चिन्ताभयश्रमात्" इति पठन्ति, चिन्ताभयश्रमाद्वाडी क्षीणा सुसूक्ष्मा ज्ञेया। चिन्ता मानसोदैन्यरूपा ज्ञेया। तत्र श्रमात् क्लान्ते ॥६॥

मन्दाग्नेः क्षीणधातोश्च पुरुषस्य नाडी मन्दतरा भवेत् अत्यर्थं मन्दगतिरित्यर्थः। असृक्पूर्णा रुधिरप्रकोपात् पूरिता नाडी कोष्णा गुर्वी च भवेत्। कोष्णा ईषदुष्णा गुर्वी गुरुतरा पाषाणवद्भित्यर्थः। एके "सोष्णा" इति पठन्ति। सामा आमयुक्ता

दीप्ताग्न्यादौ नाडीलक्षणम्।—

लघ्वी वहति दीप्ताग्नेस्तथा वेगवती मता।
सुखितस्य स्थिरा ज्ञेया तथा बलवती स्मृता।
चपला क्षुधितस्यापि तृप्तस्य वहति स्थिरा ॥८॥

दूतलक्षणम्।—

दूता: स्वजातयोऽव्यङ्गा: पटवो निर्मलाम्बरा:।
सुखिनोऽश्ववृषारूढा: शुभ्रपुष्पफलैर्युता ॥९॥

नाडी गरीयसी स्यात् अत्यर्थं गुर्वी भवतीति भाव। आमेन सह वर्त्तते इति सामा, आमोऽपरिपक्करस, तत यथा—"अकरानलदौर्बल्यादविपक्वस्तु यो रस। स आमसञ्ज्ञको देहे सर्वदोषप्रकोपक ॥" इति। अथवा आमयुक्तेन आमादिवयमनुजनमजीर्णं गृह्यते, तेन तैर्युक्तेत्यर्थ। तच्च आम विदग्ध विष्टब्ध चेति। एके "सामा गरीयसी" (१) इति पठन्ति, आमेन सह वर्त्तते इति सामा ने च दोषदूष्यतादय *। यत "आमेन तेन सयुक्ता दोषा दूष्याश्च दूषिता। सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवा ॥" (वा० सू० १३ अ०) इति। एतेन किमुक्त भवति सामदोषात् † सामदूष्यात् सामदूषितात् सामरोगाच्चेति। दूष्या रसादयो धातव। दूषितानि मलमूत्रप्रभृतीनि ॥७॥

दीप्ताग्ने प्रबलाग्ने पुरुषस्य लघ्वी वेगवती च वहति। लघ्वी तूलवत्, नैव वेग-युक्ता ज्ञेया न तु पूर्वोक्ता ज्ञेया। सुखितस्य स्वस्थस्य स्थिरा प्रकृतिस्था भवतीत्यर्थ। न केवल स्वस्था तथा बलवती बलयुक्ता, न क्षीणेत्यभिप्राय। क्षुधितस्य बुभुक्षित-स्यापि चपला चञ्चला, न मन्देत्यर्थ; एतेन प्रकृतिस्थितावग्निरिति भाव। तृप्तस्य भोजनादिना सन्तुष्टस्य पुरुषस्य स्थिरा निश्चलैव ॥ ८ ॥

इति नाडीपरीक्षा।

पूर्वमुक्तमादित्यहृष्यात् दूतस्यप्रादीना लक्षणकथनम। अथ दूतलक्षणान्याह, दूता इति।—एवविधा दूता यदा भिषजं वैद्यं प्राप्तास्तदा रोगिण आतुरस्य सुखहेतवे भवन्तीत्यध्याहार्यम्। वैद्यात्राहानाय प्रश्नाय आगता पुरुषा दूता कीदृशास्तानाह, स्वजातय इति।—स्वस्या जातौ स्वगोत्रे वा जाता:

---

* दूष्यादय इति साधु।

† "सामदोषात्" इत्यादि व्याख्यानमसमीचीनम्।

सुजातय. सुचेष्टाश्च सजीवदिशि सङ्गता:।
भिषज समये प्राप्ता रोगिण. सुखहेतवे ॥१०॥

सुजातय। एके "सजातय" इति पठन्ति, तत्र सपत्ना इत्यर्थ.। यदुक्त —"पाषण्डाश्रमवर्णाना सपत्ना कर्मसिद्धये। त एव विपरीता सुर्दूता कर्मविपत्तय॥" (सु० सू० २९ अ०) इति। अव्यङ्गा इति।—व्यङ्गा हस्तादयवहीना न व्यङ्गा अव्यङ्गा। पटव इति प्रवीणा। एतेन विचिवकालज्ञा कथिता। निर्मलाम्बरा इति शुभवस्त्रधारिण, तेन रक्तकृष्णवस्त्रादिरहिता इत्यर्थ। सुखिन इति भटीना। अश्वपृषारूढा इति अश्वारूढा, वृषारूढाश्च। आ समन्तात्कारिण रूढा इति यद्रूढ़ण तन्मक्षिकाष्ट खरादियाननिषेधार्थम्। शुभपुष्पफलैर्युता इति श्वेतपुष्पैरेभि सारफलैश्च सयुक्ता इत्यभिप्राय। एतेन रक्तपीतकृष्णादिभि सारफलरहिता (?) इत्यर्थ, यत उक्तविधानि पुष्पफलान्यसङ्गलानि भवन्ति। तथा चोक्त—"तैलकर्दमदिग्धाङ्गा रक्तस्रगनुलेपना। फल पक्वमसार वा गृहीत्वाऽन्यच्च तद्विधम्॥ वैद्य य उपसर्पन्ति दूतास्ते चापि गर्हिता॥" (सु० सू० २९ अ०) इति। सुजातय इति शोभना जातिर्येषा ते तथाविधा। एतेनान्यजातिजनिता निषिद्धा, पाप-कृतगर्भोत्पत्तिरहिता इत्यर्थ। यद्वा—विज्ञातजातय इति पिण्डार्थ। सुचेष्टा-श्चेति चेष्टाव कायकृतो व्यापार, शोभनव्यापार इत्यभिप्राय, शोभनग्रहण दुश्चेष्टितव्यवच्छेदार्थम्। तथा ह्युक्त—"छिन्नत्वक्तृणकाष्ठानि सृशन्तो नासिका ननम। वस्त्रान्तानासिकाकेशनखरोमदशासृश॥ स्रोतोऽवरोधकृच्छ्रमूर्धोर-कृचिपाण्य। कपालोपलभस्मास्थितुषाङ्गारकराश्च ये॥ विलिखन्तो मही किञ्च क्षुवन्तो लोष्टभेदिन॥" (सु० सू० २९ अ०) इत्यादि दुश्चेष्टिता दर्शिता। सुचेष्टाश्चेति चकारग्रहणात सुदर्शना सुवेशा आप गृह्यन्ते, अन्यथा गर्हिता स्यु। तथा हि— "नपुसक स्त्री बहवो नैककार्या असूयका.। गर्दभोष्ट्ररथप्राप्ता प्राप्ता वा स्यु परम्परा॥ पाशदण्डायुधधरा पाण्डुरेतरवाससः॥ आर्द्रजीर्णोपसव्येकमलिन-ध्वस्तवाससः। न्यूनाधिकाङ्गा उद्विग्ना विकृता रौद्ररूपिण॥ वैद्य य उपसर्पन्ति दूतास्ते चापि गर्हिता॥" (सु० सू० २९ अ०) सजीवदिशि सङ्गता इति —जीवनेन प्राणालिङ्गेन सह या दिक् न क्षीरस्था सङ्गता प्राप्ता इत्यर्थ.। तथा च—"यस्या प्राणसहचारि सा नाडी जीवसयुता" इति। नाडी चात्र नासासञ्चारिणी ज्ञेया। यद्वा—जीवन सह वर्तते इति या दिक् दिशा

शकुनम् ।—

वैद्यस्यानाय दूतस्य गच्छतो रोगिणः कृते ।
न शुभं सौम्यशकुनं प्रदीप्तञ्च सुखावहम् ॥११॥
चिकित्सां रोगिणः कर्त्तुं गच्छतो भिषजः शुभम् ।
यात्रेयं सौम्यशकुनं प्रोक्तं दीप्तं न शोभनम् ॥१२॥

तस्यामित्यर्थः, तेन याम्यदिग्हितदिशायां प्राप्ता इति तात्पर्यार्थं, यतो याम्यदिक् निन्दिता, तथा हि—"याम्या दिश प्राङ्मनयो विषमैकपदे स्थिता । वैद्य उपसर्पन्ति दूतास्ते चापि गर्हिता ॥" (सु० सू० २९ अ०) इति । समये प्राप्ता इति समये शुभवेलातिथिनक्षत्रादियुक्ते काले अन्यथा अशुभकरा इति भाव । तदुक्तं—"वैद्यस्य पैत्रे दैवे वा कार्ये चोत्पातदर्शने । मध्याह्ने चार्द्रारवे वा सन्ध्ययो क्रत्तिकासु च ॥ आर्द्राश्लेषामघामूलपूर्वासु भरणीषु च । चतुर्थ्यां वा नवम्यां वा षष्ठ्या सन्धिदिनेषु च ॥ दक्षिणाभिमुख देशे त्वशुचौ वा हुताशनम् । ज्वलन्त पचन्तं वा क्रूरकर्मणि चोद्यतम् ॥ नग्नं भूमौ शयान वा वैगोत्सर्गेषु वाऽशुचिम् । प्रकीर्णकेशमश्रुक्त स्विन्न विक्लवमेव च । वैद्य य उपसर्पन्ति दूतास्ते चापि गर्हिता ॥" (सु० सू० २९ अ०) इति ॥ ९।१० ॥

इति दूतलक्षण सम्पूर्णम् ।

इदानी गच्छतो दूतस्य शकुनान्याह, वैद्यस्यानायेति ।—रोगिण आतुरस्य कृते निमित्ते वैद्यस्यानाय गच्छतो दूतस्य सौम्यशकुन भेरीमृदङ्गादि न शोभनमित्यर्थः । प्रदीप्तमसौम्य सुखावहं भवति । गच्छत इति मार्गे चलितस्य । एतेन विपरीतशकुनान्यत्र शुभकराणि बोद्धव्यानि । उक्तञ्च ज्योतिःशास्त्रे—"सद्यो रणे कर्मणि च प्रवेशे शुक्लग्रहे नष्टविलोकने च । व्याधौ च नक्षत्ररणे भयार्त्ते शस्त प्रयाणादिपरीतभाव ॥" ११ ॥

इदानी गच्छतो वैद्यस्यापि शकुनानि दर्शयन्नाह, चिकित्सामिति ।—रोगिण आतुरस्य चिकित्सा रोगापनयन कर्म कर्त्तुं गच्छतो मार्गे चलितस्य भिषजो वैद्यस्य यात्रेय सौम्यशकुन प्रोक्तमिह शुभ कथितं, दीप्तमशुभशकुन न शोभन मित्यर्थः । यात्रेयं यात्रायोग्यं यथा—"भेरीमृदङ्गमृदुमर्दलशङ्खवेणुवेदध्वनिर्मधुरमङ्गलगीतघोषा । पुत्रान्विता च युवति सुरभि सवत्सा धौताम्बरश्च रजकोऽभिमुख प्रशस्त" ॥ अन्यच्च—"भद्रासनवर्द्धमानकुलावडेकपक्षिमिथुनं शुद्धक्षीरनृपान्नपूर्णकलशश्चक्षूंषि सिद्धार्थका । वीणाकेतनमीनपङ्कजदधिक्षौद्राज्य-

चिकित्स्यरोगिलक्षणम्।—

निजप्रकृतिवर्णाभ्या युक्त सत्त्वेन संयुत'।
चिकित्स्यो भिषजा रोगी वैद्यभक्तो जितेन्द्रिय' ॥१२॥

गोरोचना, कन्याशङ्खसितेत्युक्तसुमनोविप्राश्च रत्नानि च॥" इति। दीक्षनित्ययातेर्य, तद्यथा—'गमन दक्षिणे वामान्न शस्त स्मशानयो॥" "वाम नकुलचाषाणा नोभय शस्यमर्पयो। भानकौशिकयोश्चैव न प्रशस्त किलीभयम्॥ दर्शन च कृतज्ञापि न गोधाकृकलासयो। कुलत्थतिलकार्पासतुषपाषाणभस्मनाम्॥ पात्र नेष्ट तथाऽङ्गारतैलकर्दमपूरितम्। प्रसन्नेतरमद्यानां पूर्ण वा रक्तमर्षपै॥ शवकाष्ठपलाशाना शुष्काणा पथि सङ्गमा। नेच्छन्ति पतितास्यदोलाश्च रिपवस्तथा॥" (सु० सू० २९ अ०) इति॥ १२॥

अथ कीदृशो रोगी चिकित्स्यस्तदृश्यत्राह, निजप्रकृतीति।—भिषजा वैद्येन दृष्टशो रोगी चिकित्स्य, चिकित्सा रोगापनयन कर्म तद्योग्यो भवतीत्यभिप्राय। कीदृश? तमाह, निजप्रकृतिवर्णाभ्या युक्त इति।—याद्दशौ यस्य प्रकृतिवर्णौ स्त, ताद्दशाभ्यामेव संयुक्त इत्यर्थ। ननु केय प्रकृति? कति भेदा? कि कारण वा अस्या इति? तदुच्यते—केय प्रकृति स्वभाव इत्यर्थ; सा चाबालप्रवृत्ता निषेकादा वातारब्धाद्या आश्रयाणादनुवर्त्तते। कति भेदा इति। सप्त प्रकृतयो भवन्ति पृथग्दोषैर्द्वन्द्वै समस्तैश्च। कि कारणमिति तदाह सुश्रुत,—"शुक्रशोणितसयोगे यो भवेद्दोष उत्कट। प्रकृतिर्जायते तेन तस्या मे लक्षण शृणु॥" (सु० शा० ४ अ०) इति। सा हि प्रकृतिर्जात्यादीन् षड्पाधीनपेक्षते। तदुक्त चरके—"तत्र प्रकृतिर्हि जातिप्रसक्ता च कुलप्रसक्ता च देशानुपातिनी च कालानुपातिनी च वयोऽनुपातिनी च प्रत्यात्मनियता च" (च० इ० वर्णस्वरीय०) इति। तत्र जातिप्रसक्ता नाम तासु तासु मनुष्यादिजातिषु ते ते वरवरणादय स्वभावविशेषा, वचनेषु च नानाविधा एव व्यक्तादयो धर्मविशेषा, मनसि च धर्माधर्ममेधुनाहारप्रभृतयोऽपि भावा। कुलप्रसक्ता नाम द्विजकुले तप प्रियतादय, क्षत्रियकुले समरप्रियतादयो धर्मविशेषा भवन्ति। देशानुपातिनी नाम लाटकर्णाटायनाटीना काये वाचि मनसि च ते ते स्वभावविशेषा भवन्ति। कालानुपातिनी नाम देहादिषु दौर्बल्यादिकमादायनायपेक्षा मदेषु च दोषायपेक्षणीया। वयोऽनुपातिनी नाम बाल्यादिवयस्सु कफादो मध्यादयो धर्मा। प्रत्यात्मनियता, चेति

स्वप्नलक्षणम्।—

तत्र तु स्वप्नानि।—

स्वप्नेषु नग्नान् मुण्डाश्च रक्तकृष्णाम्बरावृतान्।
व्यङ्गाश्च विकृतान् कृष्णान् मषाशान् सायुधानपि ॥१४॥

आत्मनि निष्ठता प्रतिपुरुषनियतेत्यर्थः। ते पुनः कायो वाचि मनसि च स्वभावविशेषा प्रकृतिपुरुषभेदभिन्ना दृश्यन्ते इति। केचित्तु पाञ्चभौतिकीं प्रकृतिमाहुः। अन्ये तु प्रकृति सत्त्वरजस्तमोमयीमाहुः। पूर्वमुक्ता प्रकृतिवर्णाभ्या युक्ता अतस्तावत् प्रकृतिस्तु सङ्क्षेपेणोक्ता। इदानीं वर्णमाह—वर्णशब्देन प्रभा कथ्यते। छाया प्रभाप्यभिन्नता। एतेषां भेदोऽप्यस्तीत्येके भाषन्ते। स यथा—"वर्णप्रभानिश्रिता या छाया सा परिकीर्त्तिता। वर्णमाक्रामति च्छाया प्रभा वर्णप्रकाशिनी॥ आसन्ना लक्ष्यते छाया प्रभा दूरात्तु लक्ष्यते॥" (वा० शा० ५ अ०, च० इ० पञ्चरूपीय०) इति। न केवलं वर्णप्रभाच्छायानां लक्षणभेदः सङ्ख्याभेदोऽप्यस्ति। स यथा चतुर्द्धा वर्णाः,—गौरः, कृष्णः, श्यामः, गौरश्यामः इति। प्रभा सप्तविधा—रक्ता, पीता, सिता, श्यावा, हरिता, पाण्डरा, असितेति। छायाऽपि पञ्चविधा—स्निग्धा, विमला, रूक्षा, मलिना, सङ्क्लिष्टा। पुनः कीदृशो रोगी चिकित्स्यः? सत्त्वेन समृत इति।—सत्त्वन्तु व्यवसायाध्यवहारक्रियादिस्थानेष्वपि कर्मकरम। यत,—'सत्त्ववान् सहते सर्वं समस्तास्वात्मानमात्मना। राजसस्त्वभ्यसानोऽन्ये सहते नैव तामसः॥' (सु० सू० ३५ अ०) इति। चक्षुषोपपन्नार्थे प्रवरावरमध्यमवत्त्व त्रिविधम्। एतेषां लक्षणं न लिखितमत्र ग्रन्थबाहुल्यात्। पुनः कीदृशः? वैद्यभक्त इति वैद्यानुकारकः तदाज्ञापालनेऽनुरक्त इत्यर्थः। यतः "आढ्यो रोगी भिषग्वश्यो ज्ञापकः सत्त्ववानपि" इति वचनात्। पुनः कथम्भूतः? जितेन्द्रियो जितेन्द्रियविषयः, विषयास्तु सक्चन्दनवनितादयः॥ १३॥

इति आतुरलक्षणम्।

अथानन्तरं स्वप्नाध्याह, स्वप्नेष्विति।—एवविधान् स्वप्नान् स्त्रीपुरुषयोर्मध्ये यस्यैक पश्यति स एव यदि स्वस्थोऽनातुरस्तर्हि व्याधिं लभते। यदा रोगी पश्यति तदा पञ्चत्वं मरणं याति प्राप्नोतीत्यर्थः। कीदृशान् स्वप्नान्? तानाह—नग्नान् वस्त्रादिरहितान्। मुण्डानिति मुण्डितान्। रक्तकृष्णाम्बरावृतानिति रक्तकृष्णवस्त्रवेष्टितान इत्यर्थः। व्यङ्गानिति अवयवादिरहितान् नासाकर्णलादिभिरपि व्यङ्गानित्यभि-

बध्नतो निघ्नतश्चापि दक्षिणा दिशमाश्रितान्।
महिषोष्ट्रखरारूढान् स्त्रीपुंमोर्यस्तु पश्यति॥
स स्वप्नो लभते व्याधिं रोगी यात्येव पञ्चताम् ॥१५॥
अधो यो निपतत्युच्चाज्जलेऽग्नौ वा विलीयते॥
श्वापदैर्हन्यते योऽपि मत्स्याद्यैर्गिलितो भवेत्॥१६॥
यस्य नेत्रे विलीयेते दीपो निर्वाणतां व्रजेत्॥
नैलं सुरां पिबेद्वाऽपि लोहं वा लभते तिलान्॥१७॥
पक्वान्नं लभतेऽश्नाति विशेत् कुड्यञ्च मातरम्।
स स्वप्नो लभते रोगं रोगी यात्येव पञ्चताम्॥१८॥

प्रायं। विकृतानिति पङ्कुलप्रभृतीन्। कृष्णानिति चिचकल्पितवत् कार्ष्ण्याभान्। पाशानिति पाशप्रतान्, पाशो दीर्घ पशूना बन्धनरज्जुः। बध्नतो निघ्नत इति निष्ठुरप्रहननकर्मकारिण। दक्षिणा दिशमाश्रितानिति एते तु यदा दक्षिणां दिशमाश्रिता भवन्ति तदा प्रचुरमनिष्टं स्यादित्यभिप्रायः। तत्र नैर्ऋत भाग देवमिति वदन्ति। महिषोष्ट्रखरारूढानिति महिषादिवाहनेषु आरोहितान् इत्यर्थः, ते तु यमसन्निधिनस्यागमकरा इति भावः॥ १४।१५॥

अथापराणि तु स्वप्नान्याह, अध इति।—स्वप्नेषु योऽपि एवविधो भवति सोऽप्यनिष्टः। कौट्टणस्तमाह, अधो यो निपतत्युच्चादित्यादि।—पुरुष उच्चात्-उच्चस्थानादधो निम्नस्थाने निपतति स्खलतीत्यर्थः। अत्युच्चं पर्वतादिकम्। यो जलेऽग्नौ वा विलीयते नौको भवति। एतेन जले बुडति अग्नौ प्रतप्तवत् प्रतप्तीत्यभिप्रायः। योऽपि श्वापदैर्हन्यते शुनस्वरशैराक्रष्यते इति। एके "स्वापदै" इति पठन्ति, तत्र स्वापदैर्निजबन्धुनाशादिभिरुपहन्यते पीड्यते इत्यर्थः। मत्स्याद्यै-रिति गिलितो भक्षितो यो भवेत्। आदिग्रहणान्मकरनक्रशिशुमारप्रभृतीनां ग्रहणम्। यस्य पुरुषस्य च नेत्रे विलीयेते विलीनतां प्राप्ते इति, स्वप्नेष्विति शेषः, एतेन स्वचक्षुषो विमलिते पश्यतीत्यर्थः। दीपो निर्वाणतां व्रजेत इति। एतेन किमुक्तम्? य स्वप्नेऽप्यकस्माद्दीप विनष्टं पश्यतीत्यभिप्रायः। यश्च नैलं सुरां वा पिबेत्, यश्च लोहं लभते, तिलान् वा लभते, यश्च पक्वान्नं सिद्धमन्नं लभते, यश्च

श्वापदैः व्याघ्रादिभिर्हिंस्रप्राणिभिरित्यर्थः समीचीनः, न तु शुनस्वरशैरिति, श्वापदशब्दस्य हिंस्रप्राणिषु रूढ्यर्थत्वात्।

दुःस्वप्नप्रतीकार।—

दुःस्वप्नान्येवमादीनि दृष्ट्वा ब्रूयान्न कस्यचित्।
स्नानं कुर्य्यादुषस्येव दद्याद्धेम तिलानयः॥१९॥
पठेत् स्तोत्राणि देवाना रात्रौ देवालये वसेत्।
क्लैव्यं त्रिदिनं मर्त्यो दुःस्वप्नात् परिमुच्यते॥२०॥

तदश्नाति भक्षति च, यो मातर कुड्य विशेत मातुर्गृह प्रविशतीत्यर्थ*, एतेषा स्वप्नोक्तानि सम्बन्ध। सुराऽत्र पिष्टमयी न तु मद्यविशेष स्वप्ने विशिष्टमद्यपान प्रशस्तम्। तदुक्त—"रुधिर पिबति स्वप्ने मद्य वाऽपि कथञ्चन ब्राह्मणो लभते विद्यामितरस्तु धन लभेत॥" इति। "लोहम" इत्यस्य स्थाने "लौहम इति पाठान्तर, तत्र लौह लोहमय यष्ट्यादि। वा-ग्रहणात् कार्पासपिण्याकक्लैव्यादीन ग्रहणम, एतेषा लाभेऽप्यनिष्ट भवति। एके "विशेत कुड्यञ्च मातरम्" इत्यत्र कुड्यमुत्सङ्ग व्याख्यानयन्ति। "जननी प्रविशेन्नर" इति पठन्ति केचित्, तत्र मातृकुक्षिं प्रविशतीत्यर्थ। तत्र मात्रा सह शयन करोतीत्यन्ये॥ १६—१८॥

इदानी दुःस्वप्नदर्शनोत्पन्नारिष्टनिहत्यर्थं किञ्चित प्रतीकारमाह, दुःस्वप्नानीति।—एवमादीनि पूर्वोक्तानग्रमुण्डादीनि दुःस्वप्नानि दुःखोत्पादकानि ज्ञात्वा स्वभावस्थात्-माधीक्य कस्यचित पुरतो न ब्रूयात न प्रकाशयेत इत्यर्थ, परमुन्निनानिष्ट-श्रवणभयात्। तदन् किं कुर्य्यात्? तदाह, स्नानमिति।—उषास प्रातरेव स्नान कुर्य्यात क्षेमतिलानयश्च दद्यात। क्षेम सुवर्णं, तिलान कृष्णान्, अथो लोहम्। पुन. किं कुर्य्यादित्याह, पठेदिति।—देवाना स्तोत्राणि देवाना विष्णु प्रभृतीना स्तोत्राणि अग्निवयादीनि। यथा—"अग्निवय्य यौणि च पुष्करारणि नाम-चय यौणि पदानि विष्णो। रुद्रस्त्रिनेत्रस्त्रिपथा च गङ्गा एतानि दुःस्वप्नविनाश नानि॥" इति। इति दिनकृत्य, रात्रावपि देवालये देवमण्डपे वसेत। तत्र जागरण कुर्य्यादिति केषाञ्चिन्मतम्। अथ दुःस्वप्नमुपसहरन् फलमाह क्लैव्यमिति।—एवमुक्तप्रकारेण, प्रकार तु स्नानदानादिक कर्म कृत्वा सन्यक् त्रिदिन दिनत्रय यथा स्यात् मर्त्यो पुरुष दुःस्वप्नात् दुःस्वप्नजनकनिमित्तात् परि-मुच्यते मुक्तो भवतीत्यर्थ॥ १९।२०॥

---

* कुड्य भित्ति तथा मातर जननी विशेत, गृहभित्ति प्रविशेत जनन-जठर वा प्रविशेत इत्यर्थो युक्त, न तु मातुर्गृह, चरकादौ तादृशव्यवहाराऽदर्शनादिति।

सुखप्राप्ति।—

स्वप्नेषु यः सुरान् भूपान् जीवतः सुहृदो द्विजान्।
गोसमिद्वह्नितीर्थानि पश्येत् सुखमवाप्नुयात् ॥२१॥
तीर्त्वा कलुषनीराणि जित्वा शत्रुगणानपि।
आरुह्य सौधगोशैल-करिवाहान् सुखी भवेत् ॥ २२ ॥
शुभ्रपुष्पाणि वासांसि मांसमत्यफलानि च।
प्राप्यातुरः सुखी भूयात् स्वस्थो धनमवाप्नुयात् ॥२३॥
अगम्यागमनं लेपो विष्ठया रुदितं स्मृतिः।
आममामाशये स्वप्ने धनारोग्यक्षये विदुः ॥ २४ ॥

अथ दुःस्वप्नानि प्रतिपाद्य सम्प्रति प्रशस्तस्वप्नानि दर्शयन्नाह, स्वप्नेष्विति।—य पुरुष स्वप्नेषु सुरादीन पश्येत स सुखमाप्नुयादित्यर्थ। सुरानितीन्द्रप्रभृतिर्देवान। भूपानिति राज्ञ। सुहृदो मित्राणि। द्विजान ब्राह्मणान्। एतान्तु जीवत इति प्रकृतिप्राणयुतानित्यर्थ। तथाऽग्न्यानपि। गौ। समिद्वाग्नि प्रज्वलितवह्नि। तीर्थानि प्रयागादीनि ॥ २१ ॥

अपराण्याह, तीर्त्वेति।—य पुरुष स्वप्नेष एवविधो भवति स सुखी भवेदित्यर्थ। कीदृशस्तमाह—कलुषनीराणि सकर्दमपानीयानि तीर्त्वा उत्तीर्य स्थितमिति भाव। शत्रुगणान् रिपुसमूहान् जित्वा आगत इति तात्पर्यार्थ। सौधगोशैलादीनारुह्य प्राप्त इति भाव। सौधो धवलगृह, गोवृषभ, शैल पर्वत, करी हस्ती, वाहानश्वादीन। कलुषनीराणीति बहुवचनेन नदीनद-समुद्रादीना ग्रहणम्। तदुक्त—"नदीनदसमुद्राश्च क्षमिताः कलुषोदकाः। तरेत कल्याणलाभाय व्याधेरपगमाय च॥" (सु० सू० २९ अ०) इति ॥ २२ ॥

अन्यान्यप्याह, शुभ्रेति।—आतुरो रोगी शुभ्रपुष्पादीनि प्राप्य सुखी भूयादनातुर स्यादित्यर्थ। यदा स्वस्थोऽपीदृश स्यात तदा धनमाप्नुयादिति भाव। शुभ्र-पुष्पाणीति शुभ्रपुष्पप्रभृतीनि। वासांसि चात्र शुभ्राणि ज्ञातव्यानि। मांसमत्र आमं न तु परिपक्व, वक्ष्यमाणत्वात। फलानीति आम्रप्रभृतीनि ॥ २३ ॥

अथेतरानाह, अगम्येति।—अगम्यागमनम् अनुचितस्थानगमनम। विष्ठाया * पुरीषस्य लेप करचरणादिषु। रुदितमिति रोदनम। आत्मन परस्य वा स्मृति-

* "विष्ठया" इति मूलोक्तपाठ, समीचीन,।

जलौका भ्रमरो सर्पो मक्षिका वाऽपि य दशेत् ।
रोगी स भूयादरोग: स्वस्थो धनमवाप्नुयात् ॥२५॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधरेण विरचितायां शार्ङ्गधरसंहितायां
पूर्वखण्डे नाडीपरीक्षादिविधिर्नाम तृतीयोऽध्याय: ॥ ३ ॥

चतुर्थोऽध्याय: ।

अथ दीपनपाचनाध्याय: ।

दीपन पाचन दीपनपाचनञ्च ।—

पचेन्नामं वह्निञ्च दीपन तत् यथा मिसि: ।
पचत्यामं न वह्निञ्च कुर्यादुयत्तद्धि पाचनम् ।
नागकेशरवत् विद्याच्चिचो दीपनपाचन: ॥१॥

भैरवम् । "आमसंशोषणम्" इत्यत्र परे "पक्वसंशोषणम्" इति पठन्ति । एतच्च स्वप्ने धनारोग्यप्राप्तये धनप्राप्तये आरोग्यप्राप्तये च ॥ २४ ॥

जलौकेति ।—जलौकादयो य पुरुष दशन्ति भक्षयन्ति, स्वप्नेष्विति शेष, स यदा रोगी भवति तदा अरोग: स्यात । स्वस्थोऽपि धनं प्राप्नोतीत्यभिप्राय । जलौका प्रसिद्धा । समरीति कृष्णवर्णमधुमक्षिकाभेद । सर्पोऽजगरप्रभृतिक । मक्षिकाश्च खल्या । वा-ग्रहणात् वरटा-मधुमक्षिका-मशकादीना ग्रहणम् ॥ २५ ॥

इति स्वप्नलक्षणम् ।

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधर-
दीपिकायां प्रथमखण्डे नाडीपरीक्षादिविधिरध्यायस्तृतीय ॥ ३ ॥

पूर्वमुक्त "ततो दीपनपाचनम्" अतो दीपनपाचनादीना लक्षणान्याह, पचेदिति । —यद्द्रव्यमाम न पचेद्वह्निञ्च भवति तद्दीपन जानीयात् । यथा मिसि शतपुष्पा । तथा चोक्त द्रव्यगुणवल्या—"शतपुष्पा लघ्वीक्ष्णा पित्तकृद्दीपनी कटु" इति । दीपन कठराग्ने, अग्निगुणभूयिष्ठत्वात् । ननु कथमेतद्गुणयुक्तमिसिनामग्नौ

शमनम्।—

न शोधयति न हेष्टि समान् दोषास्तथोद्धतान्।
समीकरोति विषमान् शमनं तद्यथाऽमृता ॥२॥

अनुलोमनम्।—

कृत्वा पाकं मलानां यद्बलित्वा बन्धमधो नयेत्।
तच्चानुलोमनं ज्ञेयं यथा प्रोक्ता हरीतकी ॥३॥

भवति? तदविनाशकत्वेन कथमग्रे प्रबोध स्यात्? उच्यते—द्रव्याणा प्रभावो विचारणीय इति सुश्रुत न हेतुभिर्विचार्यते। तदुक्त—"नौषधौर्हेतुभिर्विद्वान् परीक्षेत कथञ्चन। सहस्रेणापि हेतूना नाम्बष्ठादिवरेचयेत्॥" (सु० सू० ४० अ०) इति। आम इत्यपरिपक्वरस। तदुयथा—"जठरानलदौर्बल्यादविपक्वस्तु यो रस। स आमसज्ञको ज्ञेयो दूषदोषप्रकोपण॥" इति। अथ पाचनमाह, पचत्यानमित्यादि।—यद्बृंहणमाम पचति वह्निं न कुप्यति तत् पाचन ज्ञेयम्। अत्रापि द्रव्यप्रभावो बीडव्य। तत्र नागकेशरवर्हिद्याज्ञानीयात्, यत "नागकेशरक रुक्षमुष्ण लघ्वामपाचनम्" इति। आमपाचनमिति विरुक्षणम्। सामाना दोषधातुमलानामित्येके। उभयात्मकमाह, चित्रो दीपनपाचन इति।—चित्रक उभयकार्यकरो भवति, दीपन पाचनञ्च। तदुक्त—"चित्रक कटुक पाके वह्निकृत्पाचनो लघु" इति॥ १॥

अथ शमनमाह, न शोधयतीत।—यत किञ्चित पीतलौढाग्नितप्तनिर्हृत्य दोष शमयति तत शमनम्। एतेन किमुक्त यद्बृंह्य न वामयति न विरेचयति। द्रव्य व्याधिना सह एकीभूय तत्क्षणमेव व्याधिमुपशमयति तत शमनमिति भाव। दोषशब्दोऽत्र दोषेषु कार्यव्याधिष्वपि वर्त्तते, कार्ये कारणोपचारात्। अमृत समं करोति समीकरोति। यथा—अमृता गुडूची शमनी प्रसिद्धा। तदुक्त—"रसायनी शमनी दोषाणा ज्वरनाशिनी। गुडूची कटुका लघ्वी तिक्ताऽग्निदीपनी मता॥" इति। केचित्तु—'न शोधयति यद्दोषान् समान् नोदीरयत्यपि। समीकरोति च क्रुद्धान् तत शमनमुच्यते॥" इति पठन्ति। अत्रापि स एवाभिप्राय। सम्यक् शमयतीति शमन, सम्यग् दुष्टदोषस्यानिर्हरणपूर्वक शमनम अदुष्टस्यानुदीरणञ्च व्याधिशमने तु प्रस्तुतव्याधिशमनम्, अप्रस्तुतव्याधेरनुदीरणमिति स्पष्टार्थज्ञापनाय न दोष, पुनभावकथनात॥ २॥

अथानुलोमनमाह, कृत्वेति।—यद्बृंह्य मलाना दोषाणा पाक कोपशान्ति कृत्वा

स्रसनम्।—

पक्वाव्यं यदपक्वैवाश्लिष्टं कोष्ठे मलादिकम्।
नयत्यधः स्रसनं तदुयथा स्यात् कृतमालकः॥४॥

भेदनम्।—

मलादिकमबद्धं यत् बद्धं वा पिण्डितं मलैः।
भित्त्वाऽध पातयति तद्भेदनं कटुकी यथा॥५॥

रेचनम्।—

विपक्वं यदपक्वं वा मलादि द्रवतां नयेत्।
रेचयत्यपि तज्ज्ञेयं रेचनं त्रिवृता यथा॥६॥

बन्धं विबन्धं च भित्त्वा भिन्नता नीत्वा अधो नयेत् अध करोति वातादिक-मिति शेष तेन प्रतिलोमादनुलोम करोतीत्यर्थः। तच्चानुलोमन ज्ञेयम्, अनुलोमन वातादीनामध प्रवर्त्तन सरगुणत्वात्, यथा हरीतकी। सैवानुलोमिनी प्रसिद्धैव। बन्धमिति दोषाणा परस्परग्रथितत्वम्। एके वातमूत्रपुरीषादीनामप्रवृत्तिरूप विबन्धमाहु॥३॥

अथ स्रसनमाह, पक्वाव्यमिति।—यद्द्रव्य मलादिकम् अपक्वैव तेषा पाकमकृत्वा अधो नयति अध पतनं करोति तत स्रसन स्यात्, यथा कृतमालक। कीदृश मलादि-कम्? इत्याह, पक्वाव्यमिति।—पच्यमानम् अत एव कोष्ठे आश्लिष्ट, कोष्ठे इति पाचकस्थाने, आश्लिष्टमित्याश्रितम्। केचित कोष्ठशब्देन हृदयादीन्यपि गृह्णन्ति तथा हि—"स्थानान्यामाग्निपक्वाना मूत्रस्य रुधिरस्य च। हृदण्डुक फुप्फुसश्च कोष्ठ इत्यभिधीयते॥" इति। एतदभिप्रायेणापि शोधनमस्याहु॥४॥

अथ भेदनमाह, मलैरिति।—यन्मलादिकमबद्ध मलबद्ध वा, अत एव मलैर्दोषैस्तु कृत्वा पिण्डित परिपाकात् पिण्डीभूतम्, ईदृश मलादिक भित्त्वा स्थानात् तच्चाध्य पातयति तद्भेदन, ज्ञातव्यमिति शेष। यथा कटुकी। बद्ध द्विविध, शुष्क ग्रथितच्च। तत्र शुष्क पुरीषविषय ग्रथित दोषादीनाम्। अबद्धमपि द्विविध, तथा एक द्रवरूप पुरीषविषय स्वतन्त्रमेक मलादिकमिति। मलोऽत्र दोष। आदिग्रहणात् कृच्छदूषितादीनामपि ग्रहणम्। भित्त्वेति।—तत्पुरीष भित्त्वा विदार्य्याध पातयति, द्रव्यमिति शेष॥५॥

अथ रेचनमाह, विपक्वमिति।—यद्द्रव्य विपक्वमपक्व वा मलादि दोषादिकं

वमनम्।—

अपक्वं पित्तश्लेष्माणं बलादूर्ध्वं नयेत्तु यत्।
वमनं तद्धि विज्ञेयं मदनस्य फलं यथा ॥७॥

शोधनम्।—

स्थानाद्दहिर्नयेदूर्ध्वमधो वा मलसञ्चयम्।
देहे तच्छोधनं यत् स्यादेवदालीफलं यथा ॥८॥

द्रवता नयेत द्रवभाव करोतीत्यर्थ, न केवल द्रवता नयेत रेचयत्यपि च तद्रेचनं ज्ञेयम। यथा द्रवता निसीत। यतो विरेचनद्रव्याणि गुर्वम्बुगुणभूयिष्ठानि तानि गुरुत्वादधो गच्छन्ति। गुरुत्वादिति गुरुत्वं चेह प्रभावविशेषाधिष्ठितं विद्रवतादिक समवेत ग्राह्य, न तु गुरुत्वमात्रम्। अन्यथा मत्स्यपिष्टान्नमसूरादीना विरेचकत्व स्यात। अम्बुगुणभूयिष्ठमित्यत्र, प्रभावात्। मलादिकमिति आदियहणात दुग्धदूषितादीनामत्र सङ्ग्रह ॥ ६ ॥

अथ वमनमाह, अपक्वमिति।—यद्द्रव्यमपक्व पाकमगच्छन्त पित्तश्लेष्माण त्यक्तं मिश्रित वा बलात हठात्कारेण ऊर्ध्व नयेत मुखे कृत्वा वामयेत इत्यभिप्राय, तद्वमन विज्ञेय, यथा मदनस्य फलम्। बलादिति प्रभावसूचकशब्द, यतो वमनद्रव्याणि वायुग्नि-गुणभूयिष्ठानि, वायुग्नी हि लघुत्वात्ता न्यूर्ध्वमुत्तिष्ठन्ति। लघुत्व चेह प्रभाव-विशेषाधिष्ठित मदनफलादिद्रव्यसमवेत ग्राह्य, न तु लघुत्वमात्रम्, अन्यथा कपिञ्जल-लाजादीना च वामनीयत्व स्यात। ननु कफस्य वमन पित्तस्य विरेचन प्रशस्त-मिति प्रसिद्धि, तत कथ पित्तस्य वमनमिति? उच्यते—अपक्वपित्तस्य वमनादेव निबर्हण बोद्धव्यम्। तच्च दृश्यते हि कटुतिक्तादरित्यौतात्तवमनत्वेन, यत पित्त दग्धमलतामुपैतीति। अत एवास्रपित्तचिकित्सायामादौ वमनमित्यदोष ॥ ७ ॥

अथ शोधनमाह, स्थानादिति।—यद्द्रव्य स्थानात प्रकुपितस्थानात मलसञ्चय दोषादीना स्वस्थानादूर्ध्वमधो वा बहिर्नयेत् बहि करोति तद्देहे शरीरे शोधनं कथितम्। यथा देवदालीफलम्। देवदाली वल्लीसज्ञा। ऊर्ध्वं मुखनासिकाभ्याम्, अध' पायुमेढ्रमार्गेण। देहग्रहणेन शोणितावसेचनमपि गृह्यते शोधनत्वात्। यत, शोधन द्विविधमाचक्षते, बहिराश्रयमभ्यन्तराश्रयञ्च। तत्र बहिराश्रय अस्त्र-चाराग्निप्रलेपादय। अभ्यन्तराश्रय तु चतुःप्रकार वमनरेचनास्थापनशोणित-

छेदनम्।—

श्लिष्टान् कफादिकान् दोषानुन्मूलयति यद्बलात्।
छेदनं तदृयथा क्षारो मरिचानि शिलाजतु ॥९॥

लेखनम्।—

धातून् मलान् वा देहस्य विशोष्योल्लेखयेच्च यत्।
लेखनं तदृयथा क्षौद्रं नीरमुष्णं वचा यवाः ॥१०॥

मोक्षणञ्च। एके शिरोविरेचनं मन्यन्ते, तच्चात्र वमनान्तर्भूतं बोद्धव्यम्, ऊर्ध्वशोधनत्वात् ॥ ८ ॥

अथ छेदनमाह, श्लिष्टानिति।—यद्द्रव्यं श्लिष्टान् सञ्चितान्, "परस्परग्रथितान्" इत्येके, "अत्यर्थं कुपितान्" इत्यपरे, कफादिकान् दोषान्, आदिग्रहणेन वातपित्तशोणितक्लमिग्रहणं, न तु दूष्यदूषितादिकं, यतो दोषानिति पुनर्ग्रहणं क्लमिशोणितयोरपि दोषसञ्ज्ञा। तदुक्तं सुश्रुते—"नर्ते देहं कफादस्ति न पित्तान्न च मारुतात्। शोणितादपि वा नित्यं दृष्टं एतेषु गण्यते ॥" (सु० सू० २१ अ०) इत्यादि प्रतिपादितत्वात्। क्लमिस्तु गुग्गुलुकल्पे यथा "पञ्चादि दोषान् शमयेत्" इत्यादिप्रन्थे क्लमिदोषनिबर्हणादित्यादिना, तत्रते क्लमिस्तु दोषसञ्ज्ञा। बलादिति स्वशक्तितः, उन्मूलयति उच्छेदयति, तच्छेदनं ज्ञेयम्। यथा क्षारो यवक्षारादयः, मरिचानीति बहुवचनत्वेन श्वेतमरिचमपि ग्राह्यम्। ननु वातादिक्रमं परित्यज्य कफादिक्रमेण श्लोकः कस्मादिह कृतः? तदुच्यते—देहस्य ऊर्ध्वमूलत्वमध आखुत्वं प्रतिपादितं पूर्वाचार्यैः, ऊर्ध्वभागे च कफाधिष्ठानत्वात्ततोऽनेन कफ एव प्रथमं दर्शितः। तदुक्तम्—"ऊर्ध्वमूलमधः शाखं विस्तीर्णं पञ्चदैवतम्। छेदज्ञाधिष्ठितं विद्वान् यो वेद स वेदवित्" ॥ ९ ॥

अथ लेखनमाह, धातूनिति।—यद्द्रव्यं धातून् रसादीन् मलान् वा, अत्र "मलान् वा" यद्ग्रहणं कृतं, तन्मनोदोषव्यवच्छेदार्थम्, यतो मनोदोषप्रतीकारमन्यदभ्यस्तीति। तथा हि—"धीर्धृतिस्मृतिविज्ञानं मनोदोषौषधं परम्" इति। के ते मनोदोषाः? इत्युत्तरमाह—"रजश्चमश्च मानसौ द्वौ च दोषावुदाहृतौ" (वा० सू० १ अ०) इत्यादि। एके—"लेखनं तदृयथा क्षौद्रं नीरे क्षौमं वचा यवाः" इति पठन्ति। तत्र—क्षौद्रं नीरे मध्वम्बुनी मिलिते इति योगी लेखनसञ्ज्ञः, क्षौममित्युष्णपानीयं "क्षौमं तु जलमाख्यातम्" इति वचनात्। उष्णञ्च तत् कथमिति क्षौमम्, अल्पस्वरत्वात् पूर्व-

याहि।—

दीपनं पाचनं यत् स्याद्दुष्णत्वाद्द्रवशोषकम्।
ग्राहि तच्च यथा शुण्ठी जीरक गजपिप्पली ॥११॥

स्नेहनम्।—

रौक्ष्याच्छैत्यात् कषायत्वाल्लघुपाकाच्च यद्भवेत्।
वातकृत् स्नेहन तत् स्याद्यथा वत्सकटुण्टुकौ ॥१२॥

रसायनम्।—

रसायनञ्च तज्ज्ञेयं जराव्याधिनाशनम्।
यथाऽमृता कुदन्ती च गुग्गुलुश्च हरीतकी ॥१३॥

तिपात। अय पाठ स्वकपोलकल्पनया केनापि लिखित.. यतो बहुपुस्तकेषु न दृश्यते। यवा इति बहुवचनग्रहणेन एव-गुणविशिष्टा अन्येऽपि बोद्धव्या ॥ १० ॥

अथ ग्राहिलक्षणमाह, दीपनमिति।—यद्द्रव्य दीपनमग्निकर, पाचननामादीना, द्रवशोषकमिति द्रवस्यकपाणा दोषधातुमलादीना शोषकमित्यर्थ, उष्णत्वात् उष्णवीर्य्यत्वात् द्रवशोषकमिति योज्य, दीपनादिकार्य्यकरत्वेन उपलक्षितमिति भाव, तद्ग्राहि विज्ञेयम्। यथा शुण्ठी, जीरक, गजपिप्पली, गजपिप्पली अव्यफलम्। ननु सड्ग्राहकमनिलगुणभूयिष्ठ, यतोऽनिलस्य शोषणात्मकत्वात्, तत कथमुष्णत्वादिति? उच्यते—पक्वानयाहकत्वेन द्विविध हि सड्ग्राहकत्व, तच्च यत् ग्रहण्यामान सम्याच्च वह्निं कृत्वा तदस्थ द्रवञ्च शोषयित्वा स्नेहन करोति तदग्न्याग्राहक ज्ञेयम्। यद्द्रव्यमतीसारादौ पक्वमलादिकं सस्थ्य सड्ग्रह करोति तच्छीतयाग्राहक ज्ञेयम्, एतदनिलगुणभूयिष्ठमित्यदोष ॥ ११ ॥

अथ च तदेव स्नेहनमाह, रौक्ष्यादिति।—यद्द्रव्य रौक्ष्यात रूक्षगुणत्वात्, शैत्यादिति शीतवीर्य्यत्वात्, कषायत्वादिति कषायरसत्वात्, लघुपाकाच्च लघुपरिपाकात् वातकृद्भवति तत स्नेहन स्यात। वातगुणसाधर्म्यं हेतुश्चतुष्टयम्। अनिलस्य शोषणात्मकत्वेनानिलगुणभूयिष्ठ द्रव्यं स्नेहन भवति इत्यभिप्राय। यथा वत्सक-टुण्टुकौ, यथेति दृष्टान्तत्वेनोपदर्शितम्, वत्सक कुटज। टुण्टुक श्योनाक। वातकृदित्यनेन कोष्ठवायोर्विष्टम्भक, तस्मात् तद्द्रव्य स्नेहन भवति इत्यर्थ ॥ १२ ॥

अथ रसायनमाह, रसायनञ्चेति।—यद्द्रव्य जराव्याधिनाशन भवति तद्रसायन ज्ञेय, रसादीना धातूनामयनमाप्यायनरूप रसायनम्। यथा—अमृता गुडूची,

वाजीकरणम्।—

यस्माद्द्रव्याद्भवेत् स्त्रीषु हर्षो वाजीकरञ्च तत्।
यथा नागबलाद्याः स्युर्बीजञ्च कपिकच्छुजम् ॥१४॥

शुक्रलम्।—

यस्माच्छुक्रस्य वृद्धिः स्याच्छुक्रलञ्च तदुच्यते।
यथाऽश्वगन्धा मुषली शर्करा च शतावरी ॥१५॥

शुक्रस्य प्रवर्त्तक जनकञ्च।—

दुग्धं माषाश्च भल्लात-फलमज्जाऽऽमलानि च।
प्रवर्त्तकानि कथ्यन्ते जनकानि च रेतसः ॥१६॥

कदली आकभेद, पश्चिमे अतीव विख्यात। गुग्गुलु * शालनिर्य्यास प्रसिद्ध। हरीतकी प्रसिद्धा। जरा वार्द्धक्य, व्याधयो ज्वरादयो रोगा वाच्या। ननु व्याधिग्रहणेन जरायाहणं, तत् कथमत्र जरा पृथगभिहिता? उच्यते—जरा स्वाभाविकी ज्ञेया, स्वभावकथनत्वेन पृथगभिधानमित्यदोष, यत सप्ततेरूर्द्ध स्वभाववद्भवतीति ॥ १३ ॥

अथ वाजीकरणमाह, यस्मादिति।—यस्माद्द्रव्यात् स्त्रीषु स्त्रीपुरुषयो (?) हर्ष ज्ञानशक्तिसुरतसुख भवेत तद्वाजीकर ज्ञातव्यम्। यथा नागबलाद्या स्युरिति—नागबला गाङ्गेरुकी, आदिशब्दात जातिफलाद्यभिनभङ्गाप्रभृतीना ग्रहणम्। कपिकच्छुबीजमपि वाजीकरण, कपिकच्छुर्वानरी। द्विविधदृष्टान्तेनात्र द्विविध वाजीकरण सूचितम्, एक वीर्य्यस्तम्भनरूपम्, अपर वीर्य्यवर्द्धनमित्यनेन पौनरुक्त्यस्याप्यदोष ॥ १४ ॥

अथात्र तदेव वीर्य्यकरद्रव्य प्रकटयन्नाह, यस्मादिति।—शुक्रलमिति शुक्रवृद्धिकरम्। शेष सुबोधम् ॥ १५ ॥

अथ शुक्रस्य प्रवर्त्तकानि जनकानि च द्रव्याण्याह, दुग्धमिति।—रेतस शुक्रस्य दुग्धादीनि द्रव्याणि प्रवर्त्तकानि कथ्यन्ते, न केवल प्रवर्त्तकानि, उत्पादकरानि

---

* शालशब्दोऽत्र सामान्यतया वृक्षवाचीति ज्ञेयं, न तु शालाख्यविशेषवृक्षवाचो, तन्निर्य्यासस्य राजसङ्गकत्वात्। "शालः पादपमात्रे स्यात् प्राकारे सर्जपादपे" इति मेदिनी।

शुक्रस्य प्रवर्त्तनरेचनस्तम्भनशोषणकारकाणि।—

प्रवर्त्तनी स्त्री शुक्रस्य रेचन वृहतीफलम्।
जातीफलं स्तम्भकञ्च शोषणी च हरीतकी ॥१७॥

सूक्ष्मम्।—

देहस्य सूक्ष्मच्छिद्रेषु विशेद्यत् सूक्ष्ममुच्यते।
तद्यथा सैन्धव क्षौद्रं निम्बतैलं कुवङ्गवम् ॥१८॥

व्यवायि।—

पूर्वं व्याप्याखिलं कायं ततः पाकञ्च गच्छति।
व्यवायि तद्यथा भङ्गा फेनञ्चाहिममुङ्गवम् ॥१९॥

च कथ्यते प्रभावात्। माषोऽन्नविशेष.। आमलानीति आमलकफलानि। शेषं प्रसिद्धम् ॥ १६ ॥

वाजीकरणानामौषधाना विशेषानाह, प्रवर्त्तनीति।—शुक्रस्य वीर्य्यस्य प्रवर्त्तनी प्रकटकारिणी स्त्री कथितेत्यर्थ। रेचन वृहतीफलमिति शुक्रस्येत्यत्रापि सम्बन्ध। वृहती वृहत्कण्टकारिका तस्या फलम्। स्तम्भकमवरोधकरं जातीफल भवति, अत्रापि वीर्य्यस्येति सम्बन्ध.। शोषणी क्षीणकारिणी हरीतकी कथिता, चकारादत्रापि शुक्रस्येत्यर्थ। एके "शोषणी च हरीतकी" इत्यस्य स्थाने "कालिङ्ग च्यवकारि च" इति पठन्ति व्याख्यानयन्ति च—"कालिङ्ग फलवर्त्तुलम् इति ॥ १७ ॥

अथ सूक्ष्मद्रव्यमाह देहस्येति।—यद्द्रव्य देहस्य शरीरस्य सूक्ष्मच्छिद्रेषु रोमकूप प्रभृतिषु विशेत प्रवेश करोति तत् सूक्ष्ममुच्यते, यथा सैन्धवादिकम्। सूक्ष्मो गुण-विशेष, स्रोतोऽनुसरणशीलत्वात्। सैन्धव प्रसिद्धम। क्षौद्र मधु। निम्बतैलं निम्बस्य तैलञ्च, यद्वा—निम्बस्य तैल कुवङ्गवं तैलञ्च, कुवङ्गवमेरण्डसम्भवम् ॥ १८ ॥

अथ व्यवायिद्रव्यमाह, व्यवायीति।—व्यवायीति गुणविशेष अपक्वमेवाखिल देह व्याप्नोति पश्चान्मद्यविषवत् * पाकं याति। एव भङ्गा, अहिफेनञ्च, अहिफेनम् "आफू" शब्दवाच्यम्। अन्ये तु "तदभावाय (?) † कल्पते" इति पठन्ति। तत्रापि—स्थितये कल्पते नोर्द्धमधो वा प्रवर्त्तते इति स एवार्थ। अन्ये पुनर्भाव-

* "मद्यविषवत्" इत्यत्र "मद्यविषवत्" इति पाठ सङ्गत। एवमग्रेऽपि।

† अन्ये, प्रमादात "ततो भावाय" इति पाठस्थले "तदभावाय" इति पाठ. सन्निविष्टोऽभूत्, वक्ष्यमाणव्याख्याऽसङ्गतेरिति।

विकाशि।—

सन्धिबन्धांस्तु शिथिलान् यत् करोति विकाशि तत्।
विश्लेष्यौजश्च धातुभ्यो यथा क्रमुककोद्रवाः॥ २०॥

मदकारि।—

बुद्धिं लुम्पति यद्द्रव्यं मदकारि तदुच्यते।
तमोगुणप्रधानञ्च यथा मद्यं सुरादिकम्॥२१॥

शब्दमभिप्रायार्थकमिच्छन्ति, तत्र—नियतद्रव्यप्रभावेणात्मग्रहणानुरूपं तद्द्रव्यं मद्यविषयवत् (?) विशेषाभिप्रायाय कल्पते इत्यर्थः॥ १९॥

अथ विकाशिद्रव्यस्यापि किञ्चिद्वैदं दर्शयन्नाह, सन्धिबन्धानिति।—यद्द्रव्यं सन्धिबन्धान् शिथिलीभूतान् करोति तद्विकाशि बोद्धव्यं, विकाशि इत्यपि गुणविशेषः, न केवलं सन्धिबन्धान् शिथिलान् करोति, किन्तु धातुभ्य ओजो बलं विश्लेष्य विभज्य, पाकं गच्छति इत्यध्याहारः, धातुश्लैथिल्यमपि करोति इत्यभिप्रायः। चकारादपक्वमेवेत्यपि सम्बध्यते। क्रमुककोद्रवा इति—क्रमुकः पूगफलं, कोद्रवः कुधान्यविशेषः, अतः क्रमुककोद्रवा मदकरा ज्ञेयाः, धातुश्लैथिल्यात्। ओजो बलमिति। सुश्रुतेन तदुक्तं—"रसादीनां शुक्रान्तानां धातूनां यत् परं तेजस्तत् खल्वोजस्तदेव बलमित्युच्यते" (सु० सू० १५ अ०) यतः,—"देहः सावयवस्तेन व्याप्तो भवति देहिनाम्" (सु० सू० १५ अ०) इति। सन्धिप्रभृतीनां शिथिलत्वेन श्रमाणां (?) * क्षीणता भवति, तेन ओजः क्षयी भवतीत्यभिप्रायः। अतः एवाह कश्चित्—"अभिघातात् क्षयात् कोपात् ध्यानाच्छोकाच्छ्रमात् क्षुधः। ओजः सञ्जायते क्षीणो धातुग्रहणमित्यतः॥" (सु० सू० १५ अ०) इति। अन्ये तु सविशेषी (?) † व्यवायी तीक्ष्णविशेषा विकाशीति ब्रुवते, तन्न सम्मतम्॥ २०॥

अथ मदकारिद्रव्यस्य लक्षणानि दर्शयन्नाह, बुद्धिमिति।—यद्द्रव्यं बुद्धिं ज्ञानविषयं लुम्पति आच्छादयति तन्मदकारि कथ्यते, अत एव तमोगुणप्रधानं तमोगुणबहुलमित्यर्थः। यथा सुरादिकं मद्यादिकम्। बुद्धिस्तु मेधाधृतिस्मृतिमतिप्रतिपत्तिषु वर्त्तते। एतेषां लक्षणं प्रसङ्गादुच्यते, तद्यथा—मेधा

---

* श्रमादिकम् इति पाठः सङ्गतः।

† मन्ये, "सरविशेषः" इति पाठोऽत्र भाव्यः, "सविशेषः" इत्यस्य निरर्थकत्वात्।

जीवितहरम्।—

व्यवायि च विकाशि स्यात् सूक्ष्मं छेदि मदावहम्।
आग्नेय जीवितहर योगवाहि स्मृत विषम् ॥२२॥

प्रमाथि।—

निजवीर्य्येण यद्द्रव्यं स्रोतोभ्यो दोषसञ्चयम्।
निरस्यति प्रमाथि स्यात्तद्यथा मरिचं वचा ॥२३॥

यस्याकर्षणसामर्थ्यम्। धृति सन्तुष्टि, अन्ये "नियमात्मिका बुद्धिम" आहु'। स्मृति: पूर्वानुभूतस्य स्मरणम, "अयधारणाशक्ति" इत्यन्ये। मतिरनागतविषयोपदेश', "विकालविषया बुद्धि" इत्यन्ये। प्रतिपत्तिरर्थावबोधप्रागल्भ्यमिति। सुरादिकमित्यादि-ग्रहणात सर्वे मद्यविकारा गृह्यन्ते। ननु, मद्यस्य बुद्धिस्मृतिवाग्विचेष्टादिकरमुक्तम, तदुक्त—"बुद्धिस्मृतिप्रीतिकर सुखस्य पानान्ननिद्रारतिवर्द्धनस्य। सम्पाठगीत स्वरवर्द्धनस्य प्रोक्तोऽतिरस्य प्रथमो मदो हि॥" (मा० नि० मदात्यय) तत कथ बुद्धिलोपकरमभिहितम्? उच्यते—मद्यस्य यतस्य पानावस्था कथिता, तत्र—प्रथमो मद' बुद्ध्यादिक करोति, ग्रेषास्तु बुद्ध्यादिक लुम्पन्तीत्यदोष। तदुक्तं माधवेन—"अव्यक्तबुद्धिस्मृतिवाग्विचेष्ट सोन्मत्तलीलाऽतिरप्रशान्त। आलस्य-निद्राभिहतो मुहुश्च मध्येन मत्त पुरुषो मदेन॥" (मा० नि० मदात्यय) इत्यादि॥ २१॥

अथ प्राणहरद्रव्यमाह, व्यवायि चेति।—यद्द्रव्य व्यवाय्यादिगुणयुक्त भवति तज्जीवितहर प्राणहर स्मृत कथितम्, यथा विष, तदेव योगवाहि स्मृतमित्यर्थ। व्यवायीति—समस्तदेह व्याप्य पश्चात पाक गच्छतीति व्यवायी गुण। विकाशी गुणश्च सकलदेह व्याप्य धातुग्रैथिल्य करोति। सूक्ष्मो गुणस्तु सूक्ष्मात सूक्ष्मेषु स्रोत खनुसर स्मृत। छेदन मलीदोषधातुमलादीन् बलादुन्मूलयति तच्छेदि कथितम्। मदावहमिति मदकारकम्। आग्नेयमित्याग्नेयगुणभूयिष्ठम्। योगवाहीति रसादिषु द्रष्टव्यम्॥ २२॥

अथ प्रमाथिद्रव्यमाह, निजवीर्य्येणेति।—यद्द्रव्य निजवीर्य्येण स्वप्रभावेण कृत्वा स्रोतोभ्य कर्णमुखनासादीनाम् अन्यविवरेभ्यश्च वा दोषवाहुल्य निरस्यति तत् प्रमाथिसज्ञ कथितम्। यथा मरिच वचा। दोषशब्दोऽत्र व्याधिष्वपि वर्त्तते कारणे कार्य्योपचारात्, तेन व्याधिसञ्चयमपीत्यर्थ॥ २३॥

अभिष्यन्दि।—

पैच्छिल्याद्गौरवाद्द्रव्यं रुद्ध्वा रसवहाः शिराः।
धत्ते यद्गौरवं तत् स्यादभिष्यन्दि यथा दधि ॥२४॥

इति श्रीदामोदरसूनुना श्रीमदार्ङ्गधरेण विरचितायां श्रार्ङ्गधरसंहितायां सूत्रस्थाने दीपनपाचन नाम चतुर्थोऽध्याय ॥ ४ ॥

इति सूत्रस्थानम्।

पञ्चमोऽध्यायः।

अथ कलादिकाख्यानाध्यायः।

कलास्वरूपम।—

(धात्वाशयान्तरस्थस्तु यः क्लेदस्त्वधितिष्ठति।
टेहोष्मणा विपक्वो यः सा कलेत्यभिधीयते ॥)

कलादीना सङ्ख्यानिर्देश।—

कलाः सप्ताशयाः सप्त धातवः सप्त तन्मलाः।
सप्तोपधातवः सप्त त्वचः सप्त प्रकीर्त्तिताः ॥ १ ॥

अथाभिष्यन्दिलक्षणमाह, पैच्छिल्यादिति।—यद्द्रव्यं पैच्छिल्यात् पिच्छिलगुणयोगात्, गौरवात् गुरुगुणयोगात्, गुरुपाकस्वभावाद्वा रसवहाश्चतुर्विंशति सङ्ख्याका शिरा रुद्ध्वा सरुध्य गौरवं गुरुतां धत्ते तदभिष्यन्दि कथितम। यथा दधि। अभिष्यन्दीति श्लेष्मप्रकोपीति रूढि गुणसाधर्म्यात्, श्लेष्मापि पिच्छिलगौरवाद्गुणयुक्त ॥ २४ ॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां श्रार्ङ्गधरदीपिकायां प्रथमखण्डे दीपनपाचनादिविधिरध्यायश्चतुर्थ ॥ ४ ॥

पूर्वमुक्त कलादिकाख्यान इति, अतस्तद्दर्शयन्नाह, कला इति।—कलादि-

---

एके श्लोकमिमं प्रक्षिप्तं वदन्ति।

त्रयो दोषा नवशत स्नायूना सन्धयस्तथा।
दशाधिकञ्च द्विशतमस्थ्नाञ्च त्रिशत मतम् ॥२॥
सप्तोत्तरं मर्मशतं शिराः सप्तशतानि च।
चतुर्विंशतिराख्याता धमन्यो रसवाहिकाः ॥३॥
मासपेश्यः समाख्याता नृणा पञ्चशत बुधैः।
स्त्रीणाञ्च विंशत्यधिकाः कण्डराश्चैव षोडश ॥४॥
नृदेहे दश रन्ध्राणि नारीदेहे त्रयोदश।
एतत् समासत प्रोक्तं विस्तरेणाधुनोच्यते ॥५॥

प्रतानानामेतन्नामसङ्ग्राहकवचनम्। समासत सङ्क्षेपात्, प्रोक्त कथितमित्यन्वयः। तद्यथा—कला सप्तसङ्ग्राका., तास्च धात्वाशयान्तरमर्यादा.। तथा हि—"धात्वाशयान्तरस्थस्तु य क्लेदस्त्वधितिष्ठति। देहोष्मणा विपक्वस्य सा कलेत्यभिधीयते ॥" इति। आशया सप्त, आशया स्थानानि, तानि कोष्ठशब्देनोपलक्षितानि, तथा हि—"स्थानान्यामाशयिकाना मूत्रस्य रुधिरस्य च। हृदुण्डुक फुप्फुसश्च कोष्ठ इत्यभिधीयते ॥" (सु० चि० २ अ०) इति। धातव सप्त कथिता, धातवो रसादय, ते "रसाऽसृङ्मासमेदोऽस्थिमज्जशुक्राणि धातव" (वा० सू० १ अ०) इति। सप्त तन्मला धातुमला, तेषा धातूना प्रतिपाकात कफादिसज्ञा इत्यर्थ। सप्तोपधातव इति—धातुसमीपे भवा उपधातव, यथा गोमयादिभ्यो हस्तिकादिसम्भव, ते स्नन्यरज प्रभृतय। त्वच सप्त प्रकीर्त्तिता इति—शुक्रशोणितस्याभिपच्यमानस्य चीरस्येव सन्तानिका सप्त त्वचो भवन्ति। त्रयो दोषा वातपित्तकफसज्ञा, धात्वादीन् दूषयन्ति इति। सन्धिरवयवादीना सन्धान, यस्थिरिति लोके। अत्र चकारग्रहणात दशोत्तरशतद्वयादपि अधिका बोद्धव्या। तदुक्त—"शेष चिकित्सकैर्नून सन्धीनाञ्च शतद्वयम्। दशोत्तर सहस्रे द्वे निजगादात्रिनन्दन ॥" इति। अस्थ्नाञ्च त्रिशत मतमिति—अस्थि सारभूत शरीरस्याधारूपञ्च कथितम्। सप्तोत्तर मर्मशतमिति—मर्माणि जीवस्याधारूपाणि, तानि सप्ताधिकशतसङ्ग्राकानि। तथा शिरा सप्त शतानि चेति—दोषधातुजलवाहिन्य शिरा. कथिता'। चकारादत्र न च सप्तशत नियतम् अन्याश्च सन्तीत्येके भाषन्ते, तदुक्त—"द्विसप्ततिसहस्राणि नाडीना तद्विनिर्गता। ताभ्यो विनिर्गता नाड्यस्ताभ्योऽथान्या पुन. पुन ॥ तावत्यो नाडिका देहे यावन्तो रोमकूपका.। स्थूलमूला सुसूक्ष्माग्रा, पद्मरेखा-

कलाना विवरणम् ।—

मांसासृङ्मेदसा तिस्रो यकृत्प्लीह्नोश्चतुर्थिका ।
पञ्चमी च तथाऽन्त्राणां षष्ठी चाग्निधरा मता ॥
रेतोधरा सप्तमी स्यादिति सप्त कलाः स्मृताः ॥६॥

प्रतानवत् ॥" इति । धमन्यो नाडीविशेषाश्चतुर्विंशतिसङ्ख्याका कथिता, ताश्च रसवहा ज्ञेया, शिरा धमन्यो नाड्यश्च परस्परपर्य्यायवाचका ज्ञेया, भिन्नत्वमासां कार्य्यतो । मांसपेश्य इति—नृणां पुरुषाणां मांसपेश्य पञ्चशतसङ्ख्याका समाख्याता, बुधैरिति शेषः, पेशी दीर्घाकृतिर्मांसखण्ड । अपरैश्चतुरस्रा पेशीत्युच्यते । तथा चोक्तं —"चतुरस्रा भवेत् पेशी वृत्ता पिण्डी घन स्मृत । आलम्बीमुकुलाकारमर्बुदं परिचक्षते ॥" इति । स्त्रीणां विंशत्यधिका इत्यनेन मांसपेश्य कथिता, अधिकाश्च पञ्चशतात्, तेन विंशत्यधिकपञ्चशतमांसपेश्य स्त्रीणा भवन्तीत्यभिप्राय । विंशतेर्विवरणमाह—स्तनयो पञ्च पञ्च, वृषणस्य योनौ, गर्भमार्गे तिस्र, गर्भाशये च तिस्र इति । कण्डरास्त्वेव षोडशेति—कण्डरा महास्नायु षोडशेति षोडशसङ्ख्याका', तद्यथा—चतस्र पादयो, हस्तयोश्चतस्र, ग्रीवाया चतस्र, पृष्ठे चतस्र । वृद्दे दश रन्ध्राणि नारीदेहे त्रयोदशेति—वृद्दे पुरुषशरीरे दशसङ्ख्याकानि रन्ध्राणि छिद्राणि, सन्तीत्यध्याहार्य्यम् । नारीदेहे स्त्रीशरीरे त्रयोदश रन्ध्राणीति भाव, तान्यये वक्ष्यमाणानि ज्ञातव्यानि । एतत् सर्वं कलादिक समासत सङ्क्षेपात् प्रोक्त कथितमित्यर्थ ॥ १—५ ॥

अथ "विस्तरेणाधुनोच्यते" इत्युक्त प्राक्, इदानीं विस्तरमेतेषा दर्शयन्नाह, मांसेति ।—मांसासृङ्मेदसा तिस्र कला, तासां सज्ञा यथा—मांसधरा, रक्तधरा, मेदोधरा इति । चतुर्थिका यकृत्प्लीह्नो सा श्लेष्मधरा यकृत्प्लीह्नोर्मध्ये इत्यभिप्राय । पञ्चमी कला चान्त्राणा, सा पुरीषधरा । षष्ठी चाग्ने, सा पित्तधरा । सप्तमी कला रेतोधरा इति सप्त कला स्मृता कथिता । तदुक्त सुश्रुते—"तासा प्रथमा मासधरा नाम, यस्यां मासे शिरास्नायुधमनीस्रोतसा प्रताना भवन्ति । यथा विसदृणालानि विवर्द्धन्ते समन्तत । भूमौ पद्मोदकस्थानि तथा मासे शिरादय. ॥" (सु० शा० ४ अ०) इति । ननु रसाद्रक्त ततो मांसमित्यादि क्रम, तत्कथ प्रागेव मासधरा कथिता ? उच्यते—शरीरपोषणार्थं रसादिक्रमोऽय, न तु धारणे, अत एव मासधरत्वेन पूर्वं प्रतिपाद्य कला निर्दिष्टा परम्परानुग्रहात । "द्वितीया रक्तधरा नाम मासस्याभ्यन्तरत., तस्या शोणितं विशेषतस्य शिरासु यकृत्प्लीह्नोश्च भवति । उक्तात्

आशयाना विवरणम्।—

श्लेष्माशय स्यादुरसि तस्मादामाशयस्त्वध:।
ऊर्ध्वमन्त्याशयो नाभेर्वामभागे व्यवस्थित:॥७॥
तस्योपरि तिल ज्ञेय तदध पवनाशय:।

यथाभिप्रहृतात् चौरिण चौरमावहेत्। नासादेव चतात् क्षिप्र शोणित सम्प्रसिच्यते॥" इति। "द्वतीया मेदोधरा नाम, मेदो हि सर्वभूतानामुदरस्थ-मखस्थिषु च, मस्तु च मज्जा भवति। स्थूलास्थिषु विशेषेण मज्जा तत्थन्तरास्थित। अथेतरेषु सर्वेषु सरक्त मेद उच्यते॥" इति। "चतुर्थी श्लेष्मधरा नाम सवसन्धिषु प्राणभृता भवति। स्नेहाभ्यक्ते यथा चक्रे चक्र साधु प्रवर्तते। सन्धय, साधु वर्त्तन्ते सस्निष्टा श्लेष्मणा तथा॥" इति। "पञ्चमी पुरीषधरा नाम याऽन्त्र कीष्ठे मलमभि-विभजते पक्वाशयस्था। यत्कल्यमन्तात् कोष्ठच तथाऽन्त्राणि समाश्रिता। उण्डुकस्थ विभजत मल मलधरा कला।" (सु० शा० ४ अ०) इति। "षष्ठी पित्तधरा नाम, या चतुर्विधमन्नपानमुपयुक्तमामाशयात् प्रच्युत पक्वाशयोपस्थित धारयति। अश्रित खादित पीत लीढ कोष्ठगत नृणाम्। तज्जीर्य्यति यथाकाल शोणित पित्ततेजसा॥" (सु० शा० ४ अ०) इति। "सप्तमी शुक्रधरा नाम या सर्वप्राणिना सर्व शरीरव्यापिनी। यथा पयसि सर्पिस्तु गुडश्चेक्षुरसे यथा। शरीरेषु तथा शुक्र नृणा विद्याद्विपश्चित्॥ द्वाङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाश्रय। मूत्रस्रोत प्रपद्याच्छुक्र पुरुषस्य प्रवर्त्तते॥ कृत्स्नदेहाश्रित शुक्र प्रसन्नमनसस्तथा। स्त्रीषु व्यायच्छतश्चापि हर्षात तत् सम्प्रवर्त्तते॥" (सु० शा० ४ अ०)॥ ६॥

इदानी सप्ताऽऽशयानाह, श्लेष्माशय इति।—उरसि वक्षःस्थले श्लेष्माशय, आशयो-ऽधिष्ठान तत विशिष्टस्थान कफस्येत्यर्थ'। तस्मात् श्लेष्माशयादध आमाशय, आमो-ऽपरिपक्वाहार तस्याऽऽशय स्थानमित्यर्थ, स एव स्थानान्तरात् किञ्चदधो ज्ञातव्य, तथा चोक्त—"नाभिस्थनान्तर जन्तोरामाशय उदाहृत॥" (च० वि० त्रिविधकुक्षीय०) नाभेरूर्ध्वमन्त्राशय, स एव ग्रहणीस्थान कथितम्। "अन्त्रधिष्ठानसन्नस्य ग्रहणात् ग्रहणी मता। नाभेरुपरि सा ह्यग्निबलोपष्टम्भबृंहिता॥" (च० चि० ग्रहणी०) इति वचनात्। वामभागे व्यवस्थित इति स्त्रीपुंयन्त्राशयस्तु नाभेर्वामभागे आश्रित इत्यर्थ; वामभागे पुरुषस्य इति व्याख्यान वा। तस्योपरि तिलं ज्ञेय—तिलमित्यनेन क्लोम कथित, तत पिपासास्थानमित्यभिप्राय। अत एव जलवाहिशिरामूल तिल-मित्युक्तमाचार्येण। एके—"तस्योपरि जल ज्ञेयम्" इत्येव पठन्ति व्याख्यानयन्ति च।

मलाशयस्त्वधस्तस्मात् वस्तिर्मूत्राशयस्त्वधः ॥
जीवरक्ताशयमुरो ज्ञेयाः सप्ताशयास्त्वमी ॥८॥
पुरुषेभ्योऽधिकाश्चान्ये नारीणामाशयास्त्रयः।
धरा गर्भाशयः प्रोक्तः स्तनौ स्तन्याशयौ मतौ ॥९॥

धातूना विवरणम्।—

रसासृङ्मांसमेदोऽस्थि-मज्जाशुक्राणि धातवः।
जायन्तेऽन्योऽन्यतः सर्वे पाचिताः पित्ततेजसा ॥१०॥

पूर्वपूर्वधातुभ्य उत्तरोत्तरधातूनामुत्पत्तिः।—

* (रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते।
मेदसोऽस्थि ततो मज्जा मज्जायाः शुक्रसम्भवः ॥)

तथा चोक्तम्—"अग्नेरूर्द्धं जलं ज्ञाप्यं तदग्नेश्च जलोपरि। अग्नेरधः क्षयं वायुः स्थितोऽग्निं धमते भृशम्॥ वायुना धममानोऽग्निरत्युष्णं कुरुते जलम्। तदग्न्युष्णतोयेन समन्तात् पच्यते भृशम्॥" इति। तदधः पवनाशय इति—तत् तस्मान्नाभ्याशयस्याधः पवनाशयो वायोः स्थानमित्यर्थः, तस्य वायोः समान इति संज्ञा। मलाशयस्त्वधस्तस्मादिति—तस्य पवनाशयस्याधो मलाशयः, स च पक्वाशयः कथितः। तस्यैकदेशे वा विभक्तः मलाधारः उण्डुको विद्यते, अत एवौण्डुकात् पक्वाशयो भिन्न इति। उण्डुकः पोटलक इति लोके। चरके तु पुरीषान्त्र शब्देनौण्डुकः प्रतिपादित इति। वस्तिर्मूत्राशयस्त्वध इति—अत्रापि पवनाशयस्याध इति सम्बन्धः। वस्तिस्तु चर्मखट्वाटकाकारो मूत्राधारः, स च पक्वाशयसमीपे स्थितः। जीवरक्ताशय इति—जीवतुल्यं रक्तं, तस्याशयः स्थानं, तच्च "श्रीहा" इति प्रसिद्धं हृदयस्य वामभागाश्रितं भवति। अत एव जीवरक्ताशयमुर इति प्रतिपादितम्। ज्ञेया सप्ताशयास्त्वमीति—अमी पूर्वोक्ता सप्ताशया बोद्धव्याः। तदुक्तं वाग्भटेन—"तत्र सप्त सप्त चाधारा रक्तस्याद्या ऋतात् परे। कफामपित्तपक्वानां वायोर्मूत्रस्य च स्मृताः॥" (वा० शा० ३ अ०) इति। नारीणामाशयास्त्रय इति—पुरुषाशयेभ्योऽधिकाः, स्त्रीणां त्रय एवाशया विज्ञेयाः, एको गर्भाशयः, द्वौ स्तन्याशयौ च। गर्भाशयस्य पक्वाशयान्तरे वर्त्तते। स्तन्याशयौ चीराशयौ ॥ ७—९ ॥

अथ धातूना सप्तसङ्ख्याविवरणं दर्शयन्नाह, रसेति।—रसादय सर्वे धातवः, पित्ततेजसा प्रतिधात्वग्निना पाचिता परिपाच्यमाना अन्योऽन्यत परस्परानुग्रहात्

---

* क्वचित् स्त्रीकामिन श्लोकोऽयं दृश्यते।

मलाना विवरणम्।—

जिह्वानेत्रकपोलाना जल पित्तञ्च रञ्जकम्।
कर्णविड्घ्राणदन्त-कक्षामेढ्रादिजं मलम् ॥ ११ ॥
नखनेत्रमलं वक्त्रे स्निग्धत्वं पिण्डिकास्तथा।
जायन्ते सप्तधातूनां मलान्येतान्यनुक्रमात् ॥१२॥

मलानाम् अन्यविधविवरणम्।—

कफः पित्त मलः खेषु प्रस्वेदो नखरोम च।
नेत्रविट्त्वक्षु च स्नेहो धातूना क्रमशो मलाः ॥१३॥

जायन्ते उत्पद्यन्ते इति भाव। तदुक्त—"रसाद्रक्त ततो मास मासान्मेदः प्रजायते। मेदसोऽस्थि ततो मज्जा मज्जाया शुक्रसम्भव ॥" (सु० सू० १४ अ०) इति। परिणामस्त्रिविध एव धातूना मलस्थूलाणुभागविशेषेण भवति। तद्यथा—अन्नात् पच्यमानाद्विष्वग् मल, सारो रस.। रसादग्निपक्वात् मल कफ, स्थूलो भागो रस, सूक्ष्मभागो रक्तम्। रक्तादग्निपक्वात मल पित्त, स्थूलभाग श्रोणितम्, अणुभागो मासमिति। मासादग्निपच्यमानात् मल श्रोत्रनासाप्रजननादिस्रोतोमल, स्थूलो भागो मासं, सूक्ष्मभागो मेद। ततोऽपि निजवाङ्गपच्यमानान्मल स्वेद, स्थूलोऽग्रो मेद, सूक्ष्मभागोऽस्थि। ततोऽपि पच्यमानात मल केशलोमश्मश्रूणि, स्थूलाऽस्थि, सूक्ष्मस्तु मज्जा। ततो मज्ज्ञ पावकपच्यमानादपि मलो नयनपुरीषत्वचा स्नेह, स्थूलो भागो मज्जा, सूक्ष्मभाग शुक्रम्। तत पुन पच्यमानादपि मलो नोत्पद्यते, स हि सहजघाऽऽघातसुवर्णवत् स्थूलो भाग। शुक्रमेव (?) स्नेहभाग सूक्ष्मस्नेहीभूत ओज इति ॥ १० ॥

इदानीं मलानाह, जिह्वेति।—सप्तधातूना रसादीनाम् एतानि मलान्यनुक्रमात् जायन्ते, जिह्वानेत्रकपोलाना जलमिति—तेन जिह्वाजल नेत्रजलम्। जलमत्र कफद्रवमेतद्रसस्य मलमिति भाव.। रञ्जक पित्त रक्तस्य मल, रञ्जक रसस्य रागकरमित्यक्तत्वात्। कर्णविट् मासस्य मल, नासामलश्लेष्मेति। रसनादन्तकक्षामेढ्रादिज मल मेदस। आदिग्रहणात् स्वेदमपि कैश्चित, न त्वमत, यत स्वेदस्तु उपधातुषु पतित एव। नखा इति बहुवचनेन केशलोमादीना ग्रहणम्। नेत्रमल वक्त्रास्निग्धता च मज्ज्ञो मल, नेत्रमल नयन

उपधातूना विवरणम्।—

स्तन्यं रजश्च नारीणां काले भवति गच्छति।
शुद्धमांसभवः स्नेहः सा वसा परिकीर्त्तिता ॥१४॥
स्वेदो दन्तास्तथा केशास्तथैवौजश्च सप्तमम्।
इति धातूंश्च विज्ञेयाः एते सप्तोपधातवः ॥१५॥

पुरीषम्। पिच्छिका इति—शुक्रस्य पिच्छिकाऽपि यौवनोद्भवा। तथेति ग्रहणात् श्मश्रूण्यपि गृह्यन्ते, यत आकृष्टाङ्कोषस्य पुंसः श्मश्रुपातात् श्मश्रु शुक्रमलमित्येके। अपरे षडेव मलान् यथाक्रमं कथयन्ति। ते तु नेत्रमल वक्त्रस्थिरत्व पिच्छिकादिकञ्च मज्ञो मलमिति व्याख्यानयन्ति। तदुक्तं—"किट्टमन्नस्य विण्मूत्रे रसस्य तु कफोऽसृज। पित्त मांसस्य तु मलो स्वेषु स्वेदस्तु मेदस ॥ नखमस्थ्नस्तु लोमास्रा मलञ्च स्वेदोऽचिविट्त्वच। प्रसादकिट्टे धातूना पाकादेवविध स्मृत ॥ शुक्रस्यातिप्रसन्नत्वान्मलाभाव इति स्मृति ॥" इति ॥ ११—१३ ॥

इदानीमुपधातूनामपि विवरणं दर्शयन्नाह, स्तन्यमिति।—स्तन्यादय सप्तोपधातवो धातूवा बोद्धव्या। स्तन्य क्षीर रसस्योपधातु, रजश्चार्त्तवो धातु एतद्द्वयञ्च स्त्रीणा काले समये भवति गच्छति च। तथा च रोमराज्यादयश्च विशेषा नारीणा कालान्तरेणाभिव्यक्ति गच्छन्ति इति सम्बन्ध। आदिशब्दात् स्तन्यार्त्तवादयो गृह्यन्ते। आर्षवमपि तन्त्रान्तरे यथा—"रसादेव स्त्रिया रक्त रज सञ्ज प्रवर्त्तते। तद्वर्षाद्द्वादशाद्ऊर्द्ध याति पञ्चाशत क्षयम्॥" (सु० सू० १४ अ०) इति। शुद्धमांसभव स्नेहो मांसस्योपधातु, एष एव वसा कथिता। शुद्धमांस स्थूलभावप्राप्तमांसमिति भाव, तत्रस्थो य स्नेह स एव च वसाशब्दवाच्य, "मांसस्नेहो वसा मता" इति वचनात्। स्वेदो मेदस उपधातु, स्वेद प्रस्वेद। दन्ता अस्थ्नामुपधातु। केशा मज्ज्ञोपधातु। ओज शुक्रस्योपधातु। धातूंश्चा इति धातूत्पत्रा, तेषा परिपाकविषयत्वात्। कुत्रचिदेते तु मलान्तर्भूतत्वेन तत्रैव गणिता। एते सप्तोपधातव इत्यनेन सप्तोपधातव नियता ज्ञेया। अन्यत्राप्युक्त—"रसात् स्तन्य ततो रक्तमसृज स्नायुकण्डरा। मांसादसा त्वच स्वेदो मेदस स्नायुसम्भव ॥*

* चरके तु—'रसात् स्तन्य ततो रक्तमसृज कण्डरा शिरा। मांसादसा त्वच षट् च मेदस स्नायुसम्भव ॥" इतिमात्रपाठ परिदृश्यते।

ओज स्वरूपम् ।—

ओजः सर्वशरीरस्थं शीतं स्निग्धं स्थिरं मतम्।
सोमात्मकं शरीरस्य बलपुष्टिकरं मतम् ॥१६॥

त्वचा विवरणम् ।—

ज्ञेयाऽवभासिनी पूर्वं सिध्मस्थानञ्च सा मता।
द्वितीया लोहिता ज्ञेया तिलकालकजन्मभूः ॥१७॥
श्वेता तृतीया सङ्घाता स्थान चर्मदलस्य च।
ताम्रा चतुर्थी विज्ञेया किलासश्वित्रभूमिका ॥१८॥
पञ्चमी वेदिनी ख्याता सर्वकुष्ठोद्भवा तनुः।
विख्याता रोहिणी षष्ठी ग्रन्थिगण्डापचीस्थितिः ॥१९॥
स्थूला त्वक् सप्तमी ख्याता विद्रध्यादेः स्थितिश्च सा।
इति सप्त त्वचः प्रोक्ताः स्थूला व्रीहिद्विमात्रया ॥२०॥

अस्थ्नो दन्तास्तथा मज्ञश्च केशा ओजश्च सप्तमात्। धातुभ्यश्चोपजायन्ते तस्मात्ते उपधातव ॥"* इति ॥ १४।१५ ॥

ओजसो लक्षणमेतत्स्थाने पठन्ति केचित, तद्यथा—ओजइत्यादि ॥१६॥

ज्ञेयाऽवभासिनीति।—इति वक्ष्यमाणप्रकारेण, व्रीहिद्विमात्रया यवद्वयपरिमाणेन स्थूला सोत्सेधा सप्त त्वचो ज्ञेया। कथमिति तत्प्रकारमाह—तत्र पूर्वम् अवभासिनी नाम अवभासयति पराजयतीति (?) भाजकाग्निना सर्ववर्णान् पञ्चविधाश्च छाया प्रकाशयति, सैव सिध्मस्थान कथितम्। चकारात् पद्मकण्टकाधिष्ठानमपि ज्ञेयं, सा व्रीहेरष्टादशभागप्रमाणा। द्वितीया लोहिता ज्ञेया इत्यादि—द्वितीया त्वक् लोहिता नाम कथिता, सा तिलकालकजन्मभूर्ज्ञेया। तिलकालकग्रहणेनैव न्यच्छव्यङ्गादयोऽपि गृह्यन्ते। तिलकालकप्रभृतयश्च क्षुद्ररोगे पठिता, सैव व्रीहेः षोडशभागप्रमाणा बोद्धव्या। श्वेता तृतीया सङ्घातेत्यादि—तृतीया त्वक् श्वेता नाम कथिता, सा चर्मदलस्य स्थान, चर्मदल कुष्ठभेद। चकारान्मषकालजगल्लीप्रभृतीना स्थान, सा व्रीहेर्द्वादशभागप्रमाणा। ताम्रा चतुर्थी विज्ञेयेत्यादि—चतुर्थी त्वक् ताम्रा नाम विज्ञेया, सा किलासश्वित्रभूमिका कथिता। किलास कुष्ठभेद,

* "उपगत वैकृत्य प्राप्त धातु उपधातु" इति गू० दी०।

दोषाणां पर्य्यायाः।—

वायुः पित्तं कफो दोषाः धातवश्च मलाः मताः।
तत्रापि पञ्चधा ख्याताः प्रत्येकं देहधारणात् ॥२१॥

दोषादीनां निरुक्तिः।—

* (शरीरदूषणाद्दोषाः धातवो देहधारणात्।
वातपित्तकफाः ज्ञेया मलिनीकरणान्मलाः॥

दोषेषु वायोः प्रभावः।—

पित्तं पङ्गुः कफः पङ्गुः पङ्गवो मलधातवः।
वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत्॥)

श्चित्र प्रसिद्धः सैव व्रीहेरष्टभागप्रमाणा। पञ्चमी त्वक् वेदिनी नाम ख्याता, सा सर्वकृष्ठेष्वा ज्ञेया, सर्वकृष्ठान्यष्टाद्यसङ्ख्याकानि। तत इति ग्रहणेन विसर्पादीनामधिष्ठानं, सैव व्रीहेः पञ्चभागप्रमाणा विख्याता। रोहिणी षष्ठीति—षष्ठी त्वक् रोहिणी नाम विख्याता सा ग्रन्थिगण्डापचीस्थितिः कथिता। ग्रन्थ्यादयः कफमेदःप्रधानाः, अतः साधर्म्यात् श्लीपदार्बुदादीनामपि स्थानं, सा च व्रीहिप्रमाणा। स्थूला त्वक् सप्तमी ख्याता इत्यादि—सप्तमी त्वक् स्थूला† नाम कथिता, सा विद्रध्याटेः स्थितिभवति। आदिग्रहणात् भगन्दरार्शसो ग्रहणं, सैव व्रीहित्रयप्रमाणेन बोद्धव्या। मांसेषु मानमिदं न ललाटसृक्काङ्गुल्यादिषु, "यत्रो वक्ष्यत्युदरेषु व्रीहिमुखेनाङ्गुष्ठोदरप्रमाणमवगाढं विध्येदिति" (सु० शा० ४ अ०)॥ १७—२०॥

अथ दोषाणां विवरणमाह, वायुरिति।—वायुः पित्तं कफश्च त्रयो दोषाः प्रसिद्धाः। एते एव देहधारणात् धातवः कथिताः। धातूनां मलिनीकरणात् मलाश्च मताः कथिताः। तत्रापि देहधारणात् प्रत्येकं पञ्चधा पञ्चप्रकाराः ख्याताः। तदुक्तं सुश्रुते—"तत्र प्रस्यन्दनोद्हनपूरणविवेकधारणलक्षणो वायुः पञ्चधा प्रविभक्तः शरीरं धारयति। रागपक्त्यौजस्तेजोमेधोष्मकृतं पित्तं पञ्चधा प्रविभक्तमग्निकर्मणाऽनुगृह्णाति करोति। सन्धिसंश्लेषणस्नेहनरोपणपूरणबलस्थैर्यकृतः श्लेष्मा पञ्चधा प्रविभक्तः उदककर्मणाऽनुगृह्णाति करोति" (सु० सू० १५ अ०) इति ॥२१॥

---

* श्लोकाविमौ प्रक्षिप्ताविति केषाञ्चित् मतम्।

† सुश्रुते इयं "मांसधरा" नाम्ना कथिता।

वायो स्वरूपम्।—

पवनस्तेषु बलवान् विभागकरणान्मतः।
रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्चलः॥२२॥

वायो पञ्चस्थानानि।—

मलाशये चरेत् कोष्ठ-वह्निस्थाने तथा हृदि।
कण्ठे सर्वाङ्गदेहेषु वायुः पञ्चप्रकारतः॥२३॥

पञ्चवायो नामानि।—

अपानः स्यात् समानश्च प्राणोदानौ तथैव च।
व्यानश्चेति समीरस्य नामान्युक्तान्यनुक्रमात्॥२४॥

इदानीं तेषु वातप्राधान्यपूर्वकं तत्स्वरूपमाह, पवन इति।—तेषु वातादिदोषेषु पवनो वायुः विभागकरणात् पृथक्करणात् बलवान् मतः। तदुक्तं—"पित्तं पङ्गु कफः पङ्गुः पङ्गवो मलधातवः। वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत्॥" इति। रजोगुणमय इत्यादि—अनिलो रजोगुणमयो रजोगुणभूयिष्ठ इति भावः। सूक्ष्म इति खात् प्रवेशित्वात्। शीत शीतस्वभावात्। रूक्षो रूक्षगुणयोगात्। लघुरगुरु। चलो नैकत्र स्थितिशील॥२२॥

स एवोक्तस्थानेषु चानुगच्छन् वायुः पञ्चप्रकारो ज्ञेयः। कीदृशीत्याह, मलाशये इत्यादि।—मलाशये पक्वाशये। कोष्ठवह्निस्थाने इति—कोष्ठाग्निस्थाने, कोष्ठग्रहणं बालाग्निनिरासार्थम्। हृदि उरःस्थाने। कण्ठे कण्ठदेशे। सर्वाङ्गदेहेष्विति—सर्वाङ्गयुक्तो देहः, तान्यङ्गानि षट् प्रसिद्धानि। ननु, देहग्रहणेनैवाङ्गान्यपि प्राप्यन्ते, तत् कथं पृथक् ग्रहणम्? उच्यते—अङ्गग्रहणमत्र प्रत्यङ्गादीनां निरासार्थं, तेन प्रत्यङ्गेषु वातस्य विशेषस्थानं न प्रतिपादितम्, तस्मादविशेषस्थानत्वेन सर्वाङ्गदेहग्रहणं कृतमित्यदोषः॥२३॥

तेषां वायूनामुक्तनामानि यथा, अपान इत्यादि।—अपानो वातविशेषः गुददेशे। समानो नाभिदेशे स्यात्, समानो वह्निस्थाने। प्राणो हृदि। उदानः कण्ठदेशे। व्यानः सर्वशरीरेष्विति। तदुक्तं—"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः। उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः॥" इति। केचिदनिलनामान्यन्यान्यपि पठन्ति, तद्यथा—"नागः कूर्मोऽथ कृकलो देवदत्तो धनञ्जयः" इति। एते तत्तन्नाडीषु ज्ञातव्याः॥२४॥

पित्तस्य स्वरूपम्।—

पित्तमुष्णं द्रवं पीतं नीलं सत्त्वगुणोत्तरम्।
कटुतिक्तरसं ज्ञेयं विदग्धं चाम्लता व्रजेत् ॥२५॥

पञ्चाना पित्तानां स्थानानि कार्य्याणि च।—

अग्न्याशये भवेत् पित्तमग्निरूपं तिलोन्मितम्।
त्वचि कान्तिकरं ज्ञेयं लेपाभ्यङ्गादिपाचकम् ॥२६॥
दृश्यं यकृति यत् पित्तं तत् रसं शोणता नयेत्।
यत् पित्तं नेत्रयुगले रूपदर्शनकारि तत्॥
यत् पित्तं हृदये तिष्ठेन्मेधाप्रज्ञाकरञ्च तत् ॥२७॥

इदानीं पित्तविवरणमाह, पित्तमिति।—पित्तमुष्णमित्युष्णयोगात्। द्रवमकठिनम्। पीतं वर्णतः। नीलञ्च तन्नीलवर्णं सामावस्थाया भवति पीतं निरामावस्थायाञ्च। सत्त्वगुणोत्तरं सत्त्वगुणबहुलम्। कटुतिक्तरसं प्रकृतिस्थं प्रसिद्धम्। यदा विदग्धं तदाम्लता व्रजेदिति वक्ष्यिगुणत्वात्, तदुक्तं—"पित्तं विदग्धमम्लतामुपैति आग्नेयत्वात्" इति। अत एवाह कश्चित्—"विदग्धाजीर्णसंसृष्टं पुनरम्लरसं भवेत्" इति। विदग्धं पित्तं पुनरम्लपित्तमिति रोगविशेषमपरे प्रतिपादयन्ति इति ॥२५॥

तत्स्थानानि यथा—अग्न्याशये पित्तमग्निरूपं तिलोन्मितञ्च ज्ञेयं, पक्वामाशयमध्ये अग्न्याशयमिति वाच्यं, तत्रस्थं चतुर्विधमन्नपानं पचति। न केवलं तिलोन्मितमग्निरूपञ्च वदन्त्येके। तदुक्तं यथा—"स्थूलकायेषु सत्त्वेषु यवमात्रं प्रमाणतः। क्षुद्रमात्रेषु सत्त्वेषु तिलमात्रं प्रमाणतः॥ कृमिकीटपतङ्गेषु बालमात्रं हि तिष्ठति॥" इति। यत् पित्तं त्वचिस्थं तत् कान्तिकरं ज्ञेयं लेपाभ्यङ्गादिपाचकञ्च भवति तदुष्णगुणयोगात्। ऊष्मा शरीरस्योष्णत्वम्। लेपाभ्यङ्गादीत्यादिग्रहणात् स्नानावगाहनादीनां ग्रहणम्। त्वगत्र अवभासिनी नाम ज्ञेया, बाह्यत्वगित्यभिप्रायः। यत् पित्तं यकृति कालखण्डं दृश्यं दृष्टिगोचरं तद्रसं शोणतां नयेत् करोतीत्यर्थः। तादृशमिति यादृक् श्लोकास्थानेऽस्ति तादृक् भवतीति भावः (?)। यत् पित्तं नेत्रयुगलेऽस्ति तद्रूपदर्शनकारि भवति, रूपं पीतशुक्लादिकम्। यत् पित्तं हृदये चेतनास्थानेऽस्ति तन्मेधाप्रज्ञाकरं बोद्धव्यं, यस्मात् हृदयस्थकफतमोऽपनोदनविस्पष्टीकृतत्वात्। मेधा धीधारणावती बुद्धिः, प्रज्ञा अनागतोपद्रवरूपा मतिः। चकारादभिप्रार्थितमनोरथसाधनञ्चोक्तम् ॥२६।२७॥

पञ्चाना पित्तानां नामानि।—

पाचकं भ्राजकञ्चैव रञ्जकालोचके तथा।
साधकञ्चेति पञ्चैव पित्तनामान्यनुक्रमात् ॥२८॥

कफस्य स्वरूपम्।—

कफः स्निग्धो गुरु श्वेतः पिच्छिल शीतलस्तथा।
तमोगुणाधिकः स्वादुर्विदग्धो लवणो भवेत् ॥२९॥

पञ्चाना कफाना स्थानानि कार्याणि च।—

कफस्त्वामाशये मूर्ध्नि कण्ठे हृदि च सन्धिषु।
तिष्ठन् करोति देहेषु स्थैर्यं सर्वाङ्गपाटवम् ॥३०॥

पञ्चाना कफाना नामानि।—

क्लेदनः स्नेहनश्चैव रसनश्चावलम्बनः।
श्लेष्मकश्चेति नामानि कफस्योक्तान्यनुक्रमात् ॥३१॥

पित्तनामान्याह, पाचकमित्यादि।—पित्तनामानि अनुक्रमात् पञ्चैव ज्ञातव्यानि, क्रमो यथा—पाचकमग्निस्थाने, भ्राजक त्वचि, रञ्जक यकृति, आलोचक नेत्रयो', साधक हृदीति ॥ २८ ॥

इदानी कफस्य विवरण दर्शयितुमाह, कफ इति।—कफोऽपि द्रष्टव्य। कीदृश ? तमाह, स्निग्ध इति—स्नेहगुणयोगात्। गुरुरलघ। श्वेतो वर्णत। पिच्छिल इति—स्पृश्यमान सन्नङ्गुलयाही। शीतलोऽनुष्ण सौम्यत्वात्। तमोगुणाधिकत्वमौगुणबहुत्व। स्वादुर्मधुर, मधुरत्वमज्ञाविदग्धत्वात्। विदग्धस्तु लवणो भवेदिति, तदुक्त—"प्रकृतिस्थोऽविदग्धश्चाप्रदुष्टो मधुर कफ। विदग्धो विकृतश्च स्यात् प्रदुष्टो लवणस्तथा॥" इति। यद्वा—विदग्ध अल्पमाकाङ्क्षवण ॥२९॥

स्थानानि यथा, कफ इत्यादि।—कफोऽप्यतेषु स्थानेषु तिष्ठन् देहेषु स्थैर्यं करोति सर्वाङ्गपाटव करोति, कथमित्याह—आमाशये चतुर्विधस्याहारस्याधारे माधुर्यात पिच्छिलत्वात् प्रक्लेदित्वान्मधुरशीतलोऽपि स्वगत्या श्लेष्मस्थानाना शरीरस्य च उदककर्मणा क्लोपकार करोति। मूर्ध्नि शिरसि स्थित, स्नेहेन तर्पणाधिक्यत्वादिन्द्रियाणा स्वकार्यसामर्थ्यं जनयति। कण्ठे जिह्वामूलेस्थित सौम्यत्वाज्जिह्वेन्द्रियस्य रसज्ञानाज्ञानयोर्वर्त्तते। हृदि उरसि स्थित शिरोबाहुहृदयसन्धानस्थानस्य सन्धारण प्राकृतगुणेन अन्नरससहितेन हृदये स्वकार्यसामर्थ्यं करोति। सन्धिषु स्थित, सर्वसन्धिस्नेषादनुग्रह करोति ॥३०॥

अथ नामान्यनुक्रमादुक्तानि, तानि कानीत्याह—क्लेदन आमाशये, तत्र

स्नायूना सन्धीनाञ्च स्वरूपम्।—

स्नायवो बन्धनं प्रोक्ता देहे मांसास्थिमेदसाम्।
सन्धयश्चाङ्गसन्धानात् देहे प्रोक्ता: कफान्विता: ॥३२॥

औदकैर्गुणैराहार प्रक्लिन्नो भिन्नसङ्घात सुखकरो भवति इति क्लेदनस्याभिप्राय। स्नेहनो मूर्ड्डि भवति, तत्र स्थितस्य स्नेहविषयस्य सन्तर्पण करोतीति तात्पर्य्यार्थ, स्नेहगुणाधर्म्यात्। रसन कफपर्य्याय (?) कण्ठेऽस्मि स च रसज्ञाने वर्त्तते। अवलम्बनो हृदि वर्त्तते, स च हृदयावलम्बन करोतीत्यर्थ। श्लेषक सन्धिष्विति, स च सन्धिश्लेषणकृत्भवति, सन्धिसन्धान करोतीत्यभिप्राय ॥३१॥

इदानी स्नायूना विवरण दर्शयन्नाह, स्नायव इति।—स्नायवो नवशतसङ्ख्याका, तासु प्रतानवत्यो द्वात्रिंशत् पृथ्व्या शुषिराश्च देहे मांसास्थिमेदसा बन्धन प्रोक्ता, कथिता इत्यर्थ। तद्यथा—शाखासु षट्शतानि तासु प्रतानवत्यो द्वात्रिंशत्, विंसप्तत्यधिकसप्तशत प्रतानवत्य, द्वात्रिंशत् वर्त्तुला, महास्नायव इत्यर्थ। ये शेते विश्रेत्ते कोष्ठे, तासु शुषिरा पृथुलाश्च। ग्रीवा प्रत्यूहे सप्तति, तासु अपि पृथुला शुषिराश्च, एव नवशतसङ्ख्या स्नायवो व्याख्याता। बन्धनमिति—सर्वशरीरावयवनिबन्धन, तदुक्त—"नौर्यथा फलकाकीर्णा बन्धनैर्बहुभिर्युता। भारक्षमा भवेदप्सु तृयुक्ता सुसमाहिता॥ एवमेव शरीरेऽस्मिन् यावन्त सन्धय स्मृता। स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नरा॥" (सु० शा० ५ अ०) इति। सन्धिलक्षणमाह, सन्धय इति।—अङ्गग्रहणेन प्रत्यङ्गान्यपि गृह्यन्ते। सन्धयो द्विविधाश्चला अचलाश्च। यदुक्त—"हन्वो कट्याञ्च शाखासु सन्धयस्तु चला स्मृता। शेषास्तु सन्धय सर्वे विज्ञेया अचला बुधै॥" कट्याञ्चेति चकारात् ग्रीवायामपि चला ज्ञेया। केचिदत्र सन्धिलक्षणपटे इय पठन्ति (?)। तान् सन्धीनस्थ्याश्रिता नव मन्यन्ते * ॥३२॥

* मन्ये "तान् सन्धीनस्थ्याश्रिता नव मन्यन्ते" इत्यत्र "तान् सन्धीनस्थ्याश्रितानेव मन्यन्ते" इति पाठो युक्त, यत सश्रुते चलाचलसन्धीना दशोत्तरशतद्वयत्व तेषा विवरणादिकञ्च उक्त्वा "अस्थ्नान्तु सन्धयो ज्ञेते केवला परिकीर्त्तिता। पेश्यस्नायुशिराणान्तु सन्धिसङ्ख्या न विद्यते॥" इत्युक्तम्, अतश्च टीकाकृता हन्वादिषु ये सन्धय प्रदर्शिता ते अस्थ्याश्रिता एव, न तु पेश्याद्याश्रिता इत्येवार्थ युज्यते, तान् सन्धीन् अस्थ्याश्रिता नव इति पाठस्य व्याकरणदृष्टत्वात् अर्थासङ्गतेश्चेति।

अस्थां मर्मणाञ्च स्वरूपम्।—

आधारश्च तथा सार कायेऽस्थीनि बुधा विदुः।
मर्माणि जीवाधाराणि प्रायेण मुनयो जगुः ॥३३॥

शिराणां धमनीनाञ्च स्वरूपम्।—

सन्धिबन्धनकारिण्यो दोषधातुवहाः शिराः।
धमन्यो रसवाहिन्यो धमन्ति पवनं तनौ ॥३४॥

अथास्थिलक्षणमाह, आधारश्चेति।—अस्थीनि पञ्चविधानि भवन्ति कपाल-रुचक वलय तरुण-नलकसञ्ज्ञानि, काये आधार शरीरधारणविषय, तदुक्त—"मांसान्यत्र निबद्धानि शिराभि स्नायुभिस्तथा। अस्थीन्यालम्बन कृत्वा न शीर्य्यन्ते पतन्ति वा॥" (सु० शा० ५ अ०) इति। तथा सार इति—अस्थीनि शरीरे सारभूत कथित, यथा—"अभ्यन्तरगते सारैर्यथा तिष्ठन्ति भूरुहा। अस्थिसारैस्तथा देहा ध्रियन्ते देहिना ध्रुवम्। तस्मादस्थिविनष्टेषु लक्ष्यासेषु शरीरिणाम्। अस्थीनि न विनश्यन्ति सारास्येतानि देहिनाम॥" (सु० शा० ५ अ०) इति। इदानी मर्माणि निदर्शयन्नाह, मर्माणीति।—मर्माणि समोत्तरशत-सङ्ख्यकानि प्रायेण बाहुल्येन जीवाधाराणि प्राणाधाराणि मुनय जगु, तानि मर्माणि पञ्च प्रकाराणि भवन्ति, तद्यथा—मांसमर्माणि त्र्यधिकादशसङ्ख्यानि, शिरामर्माणि एकचत्वारिंशत्, स्नायुमर्माणि सप्तविंशति, अस्थिमर्माणि अष्टौ सन्धि मर्माणि विंशतिरिति। एतान्यपि सद्य प्राणहराणि कालान्तरप्राणहराणि विशल्यघ्नानि वैकल्यकराणि रुजाकराणीति कथितानि। एतेषां स्वरूप न लिखितमत्र विस्तरभयात्। जीवाधाराणीति—जीव आत्मा तस्याधाराणीत्यर्थ। तदुक्त—"सोमसायततेजांसि रज सत्त्वतमांसि च। मर्मसु प्रायश पुंसा भूतात्मा चावतिष्ठते॥ मर्मस्वभिहतास्तस्मान्न जीवन्ति शरीरिण॥" (सु० शा० ६ अ०) इति ॥३३॥

इदानी शिरालक्षणं प्रकटयन्नाह, सन्धीति।—शिराश्च स्थूलसूक्ष्मभेदेन द्विविधा, तासा नाभिर्मूल, तत प्रसरन्त्यूर्ध्वमधश्चैर्य्यक् च। तथा च्युक्त—"यावत्यस्तु शिरा काये सम्भवन्ति शरीरिणाम्। नाभ्या सर्वा निबद्धास्ता प्रतन्वन्ति समन्तत॥" (सु० शा० ७ अ०) इति। तासा विभागोऽप्युक्त, यथा—"तासा मूलशिराश्चत्वारिंशत्, तासा वात-वाहिन्य, दश, पित्तवाहिन्य, दश, कफवाहिन्य, दश, दश रक्तवाहिन्य, इति। तासान्तु

मांसपेशीनां कण्डराणाञ्च स्वरूपम्।—

मांसपेश्यो बलाय स्युरवष्टम्भाय देहिनाम्।
प्रसारणाकुञ्चनयोरङ्गानां कण्डरा मताः ॥३५॥

वातवाहिनीनां वातस्थानगतानां पञ्चसप्तत्यधिकशतं भवति। तावत्य एव पित्तवाहिन्यः पित्तस्थाने, कफवाहिन्यश्च कफस्थाने, रक्तवाहिन्यश्च यकृत्प्लीह्नी" (सु० शा० ७ अ०)। सन्धिबन्धनकारिण इति—आकुञ्चनप्रसारणादिभिर्विशेषैरित्यर्थः। इदानीं धमनीलक्षणमाह, धमन्य इति।—धमनादनिलपूरणात् धमन्यः। रसवाहिन्य इति—चतुर्विंशतिसङ्ख्याकाः। तासाञ्च नाभिप्रभवाणामूर्ध्वगा दश, दश चाधोगामिन्यश्चतस्रस्तिर्य्यग्गामिन्यो भवन्ति। अधोगतास्तु वातमूत्रपुरीषयुक्तास्तेनाधो वहन्ति। अन्नपानरसवाहिन्यो दशोर्ध्वगाः। तिर्य्यग्गाणान्तु चतसृणां धमनीनामेकैका शतधा सहस्रधा चोत्तरोत्तरं विभज्यते। तास्त्वसङ्ख्याः, ताभिरिदं शरीरं जालकैरिव व्याप्तं, तासान्तु मुखानि रोमकूपप्रतिबद्धानि ये स्वेदमिवहन्ति, रसञ्चापि सन्तर्पयन्त्यन्तर्बहिश्च, तैरेव चाभ्यङ्गपरिषेकावगाहालेपनवीर्य्याण्यन्तः शरीरमभिप्रतिपद्यन्ते ॥ ३४ ॥

अथ पेशीवर्णनमाह, मांसपेश्य इति।—मांसावयवसङ्घाता परस्परं विभक्ताः पेश्य इत्युच्यन्ते। तासु बलाय ओजसे स्यु कथिता। अत एवाह कश्चित्—"शिरास्नायुस्त्वपर्वाणि सन्धयश्च शरीरिणाम्। पेशीभिः सन्ततान्येव बलवन्ति भवन्त्यतः॥" (सु० शा० ५ अ०) इति। तासान्तु स्थानविशेषान्नानास्वरूपत्वं दर्शितम्। तद्यथा—"बहुलपेलवस्थूलाणुपृथुवृत्तह्रस्वदीर्घस्थिरसृष्टसंश्लिष्टकर्कशभावाः" (सु० शा० ५ अ०)। प्रत्येकलक्षणमेतेषाञ्च न लिखितमत्र ग्रन्थगौरवभयात्। अथ कण्डराः,—कण्डरा महास्नायवः, अङ्गानां हस्तपादशिरःपृष्ठप्रभृतीनां प्रसारणाकुञ्चने कर्मविशेषौ तयोर्व्यापारो यासां ताः। कण्डराः षोडश, तासां प्ररोहा यथा—"हस्तपादगतानां कण्डराणां नखाः प्ररोहाः, ग्रीवाहृदयनिबन्धिनीनाम् अधोभागगतानां मर्म्म। श्रोणिपृष्ठनिबन्धिनीनामधोभागगतानां विद्ध मूर्द्धोरुवर्चोऽवपिण्डादीनाञ्च"।

---

* आदौ अधोगता उक्त्वा पश्चात् ऊर्ध्वगाया उक्तिः प्रक्रमभङ्गदोषदुष्टा न समीचीना, तथा "अन्नपानरसवाहिन्यो दशोर्ध्वगाः" इति पाठोऽपि सुश्रुतविरुद्धतया न युक्तः, तथा च सुश्रुतः,—"ऊर्ध्वगा शब्दस्पर्शरूपरसगन्धप्रश्वासोच्छ्वासजृम्भितक्षुद्धसितकथितरुदितादीन् विशेषानभिवहन्त्यः शरीरं धारयन्ति" इति।

रन्ध्राणां विवरणम्।—

नासानयनकर्णानां द्वे द्वे रन्ध्रे प्रकीर्त्तिते।
मेहनापानवक्त्राणामेकैक रन्ध्रमुच्यते॥
दशम मस्तके प्रोक्त रन्ध्राणीति नृणा विदुः॥३६॥
स्त्रीणां त्रीण्यधिकानि स्यु. स्तनयोर्गर्भवर्त्मनः।
सूक्ष्मच्छिद्राणि चान्यानि मतानि त्वचि जन्मिनाम्॥३७॥

फुप्फसप्लीहायकृता स्थाननिरूपणम्।—

तद्वामे फुप्फुसप्लीहौ दक्षिणाङ्गे यकृन्मतम्॥३८॥

(सु० शा० ५ अ०)। षोडशग्रहणमत्र शस्त्रव्यापारनिषेधार्थम्, तथा हि—"जालानि कण्डराश्चाग्रे पृथक् षोडश निर्दिशेत्। षट् कूर्चा सप्त सेवन्यौ मेढ्रनिष्ठाग्निरोगता॥ शस्त्रेण ता परिहरेच्चतस्रो मांसरज्जव॥" इति॥ २५॥

अथ रन्ध्राण्याह, नासेत्यादि।—नासादीना त्रयाणा द्वे द्वे रन्ध्रे प्रकीर्त्तिते। तेन द्वे नासाया, द्वे नयनयो, द्वे कर्णयोरिति। मेहनापानवक्त्राणामेकैकम्। मेहन मेढ्रम्, अपान गुदसज्ञ, वक्त्र मुखकुहरम्। दशम रन्ध्र मस्तके प्रोक्तम्, तद्ब्रह्मरन्ध्र मित्याहुरेके। एतानि नव स्रोतासि नराणा बहिर्मुखानि भवन्ति दशम मस्तके प्रच्छन्नमिति। स्त्रीणामपराणि च त्रीणि, तानि कानि? इत्याह, स्त्रीणामिति।—द्वे स्तनयो स्त्रीरवहे, एक गर्भवर्त्मन अधस्तात्तद्वहमित्यर्थ.। अन्यान्यपि स्रोतासि सूक्ष्मीत्याह, सूक्ष्मच्छिद्राणीति।—जन्मिना पुरुषाणा त्वचि विषये अन्यानि सूक्ष्मच्छिद्राणि मतानि कथितानीत्यर्थ। तान्यसङ्ख्येयानि, यस्मात सूचीलाक्ष्न दृश्यन्ते अतोऽन्तर्मुखानि वदन्त्यत्रे। चकारादन्यान्यपि स्रोतासि मन्यन्ते केचित्। तानि तु प्राणान्नोदकरसरक्तमासमेदोमूत्रपुरीषशुक्रार्त्तववहानि। एतेषा स्वरूपमत्र बाहुल्यान्न लिखितम्॥ ३६।३७॥

इदानी शारीरकथनप्रसङ्गेनान्येषामपि फुप्फुसादीना स्वरूप निदर्शयन्नाह, तद्वामे इति।—तद्वामे हृदयस्य वामभागे फुप्फुसप्लीहानौ भवत। फुप्फुस खनामख्यात शोणितफेनप्रभवौ हृदयनाडिकालग्न, प्लीहा च शोणितज खनाम्ना प्रसिद्ध, एतद्द्वयञ्च वामपार्श्वे स्थितमिति भाव'। दक्षिणाङ्गे दक्षिणपार्श्वे यकृत् कालखण्ड मतम्, एतदपि शोणितजम्॥३८॥

फुप्फुसस्य प्लीहश्च स्वरूपम्।—

उदानवायोराधारः फुप्फुसः प्रोच्यते बुधैः।
रक्तवाहिशिरामूलं प्लीहा ख्याता महर्षिभिः ॥३९॥

यकृत तिलस्य (क्लोम) च स्वरूपम्।—

यकृत् रञ्जकपित्तस्य स्थानं रक्तस्य सञ्चयः।
जलवाहिशिरामूलं तृष्णाच्छादनकं तिलम् ॥४०॥

वृक्कयो वृषणयोश्च स्वरूपम्।—

वृक्कौ पुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः।
वीर्यवाहिशिराधारौ वृषणौ पौरुषावहौ ॥४१॥

लिङ्गस्य हृदयस्य च स्वरूपम्।—

गर्भाधानकरं लिङ्गमयनं वीर्यमूत्रयोः।
हृदयं चेतनास्थानमोजसश्चाश्रयं मतम् ॥४२॥

अथ तेषां शरीरे व्यापारमाह, उदानवायोरित्यादि।—फुप्फुसं उदानवायोः कण्ठस्थितवायोराधारं आश्रयं बुधैः प्रोच्यते। प्लीहा रक्तवाहिशिरामूलमाख्यातम्, प्लीहेति "वनड्वा" शब्दवाच्यं ॥३९॥

यकृत् रञ्जकस्य पित्तस्य स्थानं रक्तस्य च स्थानमिति। तिलन्तु श्लेष्मितकिण्वप्रभवं दक्षिणाश्रितं यकृत्प्लीहोपरि क्लोमसञ्ज्ञकं भवति, तच्च जलवाहिशिरामूलं कथितम्, अत एव तृष्णाच्छादनकं प्रतिपादितं, तृष्णा पिपासा तस्या आच्छादनकारीत्यर्थः ॥४०॥

वृक्कवृषणयो स्वरूपमाह,—वृक्कौ कुक्षिगोलकौ, तौ तु रक्तमेद प्रसादसम्भवौ, प्रसाद सार, अत एव जठरस्थस्य मेदसः पुष्टिकरौ कथितौ, तत्सम्भवत्वात्। जठरग्रहणमन्यस्थानाश्रितमेदोनिषेधार्थम्। तथा हि—"स्थूलास्थिषु विशेषेण मज्जा लभ्यत्वराश्रितः। अथेतरेषु सर्वेषु सरक्तं मेद उच्यते॥" (सु० शा० ४ अ०) इति। वृषणौ अण्डौ, तौ च मांसासृक्कफमेद प्रसादसम्भवौ वीर्यवाहिना शिराणामाधारा-श्रयावित्यर्थः, अत एव पौरुषावहौ पुरुषस्य धर्मं पौरुषं तदावहौ पुरुषार्थकारिणा-वित्यर्थः, यत "श्राक्षिप्ताण्डस्य पुंसः स्त्रीप्रहर्षो न जायते" इति ॥४१॥

गर्भाधानकरमिति।—लिङ्गं मेहनं, तच्च योन्या सह हृदयनियन्त्रणेना चेतनया कण्डूराया प्ररोहमिति, गर्भाधानकरं गर्भोत्पादकमित्यर्थः। अत एव

शिराधमनीनां शरीरपोषकत्वम्।—

सिरा धमन्यो नाभिस्था सर्वां व्याप्य स्थितास्तनुम्।
पुष्णन्ति चानिशं वायोः संयोगात् सर्वधातुभिः॥४३॥

वीर्य्यमूवयीरथन मार्गमिति। तदुक्तं—"द्वाङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यध। मूवस्रोत पथात शुक्रं पुरुषस्य प्रवर्त्तते॥" (सु० शा० ४ अ०) इति। हृदयं कमलमुकुलाकारमधोमुखं, तच्च शोणितकफप्रसादज, चेतनास्थानमिति—तद्विशेषेण चेतनास्थानं कथितं, सामान्येन तु सकलशरीरमेव चेतनास्थानम्, तदुक्तं चरके—"चेतनानामधिष्ठानं मनो देहस्य सेन्द्रियं। केशश्मश्रुनखास्थ्यान्नमलवत्वगुपैर्विना॥" (च० शा० कतिधापु०) इति। ओजसश्चाश्रय मतमिति—ओजोऽपि कृत्स्नधातुस्नेहः, यथा कृत्स्नक्षीरस्नेहः घृतं तथा ओजोऽपि सर्वधातूना तेजःशब्देनामनन्ति। यदुक्तं—"रसादीना शुक्रान्तानां धातूना यत परं तेजः तत् खल्वोजस्तदेव बलमित्युच्यते" (सु० सू० १५ अ०)। तन्त्रान्तरे तु ओजःशब्देन रसोऽप्युच्यते। जीवशोणितमपि ओजःशब्देन कथयन्ति क्वचित्। श्लेष्माणमविकृतमोजःशब्देनापरे वदन्तीति॥४२॥

इदानीं शरीरपोषणव्यापारमाह, सिरा इति।—नाभिस्था नाभिस्थितमूला सिरा धमन्यः सरणात् सिरा, धमनाद्धमन्यः, सर्वां तनुं सकलशरीरं व्याप्य स्थिताश्च मता। अनिशमित्यहर्निशं तनुं शरीरं पुष्णन्ति पोषयन्ति, चकारादनुगृह्णन्ति अर्थात परिपालयन्तीत्यर्थः, तत्र तरुणानां शरीरं पुष्णन्ति, वृद्धानान्तु पालयन्तीत्यभिप्रायः। तदुक्तं—"स एवान्नरसो वृद्धानां जरापरिपक्वशरीरत्वादपीणनो भवति" (सु० सू० १४ अ०) इति। कुत पोषयन्तीत्यत आह, वायोः संयोगादित्यादि।—वायोरनिलस्य संयोगात् प्राकृतसहायात्। तथा च्युक्तं—"क्रियाणामप्रतिघातमभीक्ष्णं बुद्धिकर्मणां। करोत्यन्यान् गुणाश्चापि स्वा सिरा पवनश्चरन्॥" (सु० शा० ७ अ०) इति। कं कृत्वा? इत्याह, सर्वधातुभिरिति।—सर्वे धातवो रसाद्याः। एतेन सवासा सामान्य कर्म निर्दिष्टम्, तथा च—"याभिरिद शरीरमारामं इव जलवाहिनीभिः केदार इव च कुल्याभिरुपस्निह्यते अनुगृह्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः" (सु० शा० ७ अ०) इति। ननु, नाभिस्थाः कथं सकलशरीरं पुष्णन्तीत्याशङ्क्य तन्त्रान्तरात् समाधानमाह, तदुक्तं—"व्याप्नुवन्त्यभितो देहं नाभितः प्रसृता सिरा। प्रतानाः पद्मिनीकन्दादिसादीना यथा जलम्॥" (सु० शा० ७ अ०) इति॥४३॥

प्राणवायो कार्य्यविशेष ।—

नाभिस्थः प्राणपवनः सृष्ट्वा हृत्कमलान्तरम् ।
कण्ठाद्दक्षिर्विनिर्याति पातुं विष्णुपदामृतम् ॥४४॥
पीत्वा चाम्बरपीयूषं पुनरायाति वेगतः ।
प्रीणयन् देहमखिलं जीवञ्च जठरानलम् * ॥४५॥

अथ प्राणानिलस्य शरीरव्यापारमाह, नाभिस्थ इति ।—प्राणपवन' प्राणानिल, प्राणाश्रितो वायुरिति तात्पर्य्यार्थं , प्राणा अग्निसोमादय , नाभिस्थ इति कारणात ; नाभौ स्थित सकलशरीरव्यापकत्वात्, एतेन नाभ्यावरकशिरास्ववस्थित इति भाव । तदुक्त—"नाभिस्था प्राणिना प्राणा प्राणान्नाभिर्व्यपाश्रिता । शिराभिराहृता नाभिश्चक्रनाभिरिवारकै ॥" (सु० शा० ७ अ०) इति । यथा—"ब्रह्मरन्ध्रान्नाभिचक्र द्वादशारमवस्थितम् । लूनेव तन्तुजालस्था तव जीवो भ्रमत्ययम् ॥ सुषुम्नया ब्रह्मरन्ध्रमारोहत्यवरोहति । जीव प्राणसमारूढो रज्जुक' स्फटिको यथा ॥" इति । तस्य कारणत्वञ्च तत्वान्तरैऽपि कथितम् , यथा—"तेषामुपरितन प्राणो नाभिकन्दादध: स्थित । चरत्यास्ये नासिकाया नाभौ हृदयषड्जे ॥ शब्दोच्चारणनिश्वासोच्छ्वासकासादि कारणम् ॥" इति । एवविध' प्राणानिल हृत्कमलान्तर हृदयकमलस्याभ्यन्तर सृष्ट्वा प्रवीश्य कण्ठाद्दक्षिर्विनिर्याति, अर्थात कण्ठमुल्लङ्घ्य शिरसि प्राप्य इति तात्पर्य्यार्थ , कुत इत्याह—विष्णुपदामृत पातु विष्णुपद ब्रह्मरन्ध्राश्रितं, तत्राश्रितममृत पीयूषम् । अत एवाङ्गिराचार्य्या ,—"चक्रं सहस्रपत्रन्तु ब्रह्मरन्ध्रे सुधाधरम् । तत्सुधासारधाराभि-रभिवर्द्धयते तनुम ॥" इति । मूलभारतेऽपि—"ब्रह्मरन्ध्रे स्थितो जीव सुधया सप्लुतो यदा । तुष्टिगीतादिकार्य्याणि सप्रकर्षाणि साधयेत् ॥" इति । पीत्वेत्यादि ।—स एवानिल अम्बरपीयूष ब्रह्मरन्ध्राश्रितममृत, पीत्वा अर्थात समादाय, पुनरिति तेनैव पथा, वेगतस्तत्क्षणादेव आयाति, स्वस्थाने इति शेष । तादृशस्य तस्य कार्य्यमाह, प्रीणयन्नित्यादि ।—अखिल देह प्रीणयन् सन्तर्पे इति भाव., अखिलमिति—शिखादिचरणपर्य्यन्त, न केवल देह पुष्णाति अपि तु जीव जठरानलञ्च । जीव पूर्व व्याख्यात, स च ब्रह्मरन्ध्रे स्थित । जठरानल पाचकाग्नि, तस्य पाचकादिशक्तिं करोतीत्यभिप्राय । ननु देहग्रहणेन जीवानलादीना ग्रहणमेव, तत्कथ पृथगुक्त. ? उच्यते—देहग्रहणात सामान्येनाङ्गप्रत्यङ्गविभागोऽभिहित, जीवानलौ तु विशेषेण

* "जीवयन् जठरानलम्" इति गूढार्थदीपिकासम्मत पाठ ।

आयुष पञ्चत्वस्य च लक्षणम्।—

शरीरप्राणयोरेवं सयोगादायुरुच्यते।
कालेन तद्वियोगाच्च पञ्चत्व कथ्यते बुधै. ॥ ४६ ॥

जीवाना मरणधर्मित्वोक्ति ।—

न जन्तु कश्चिदमर: पृथिव्या जायते क्वचित्।
अतो मृत्युरवार्य्य. स्यात् किन्तु रोगान्निवारयेत् ॥४७॥

रोगाप्रतीकारे दोषोक्ति ।—

याप्यत्व याति साध्यस्तु याप्यो गच्छत्यसाध्यताम्।
जीवित हन्त्यसाध्यस्तु नरस्याप्रतिकारिण' ॥ ४८ ॥

लन्मूलौ, अत एव "शरीराङ्गिनौ जीव" इति श्रुति, तस्मात् पृथगुक्तौ न दोष। यत,—"आयुर्वर्णौ बल स्वास्थ्यमुत्साहोपचयौ प्रभा। ओजस्तेजोऽग्नय प्राणाश्चेष्टाग्निहेतुका ॥ म्रान्तेऽग्नौ म्रियते युक्ते चिर जीवत्यनामय। रोगी स्यादिकृते लूलमग्नित्वान्निरुच्यते ॥" (च० चि० ग्रहणी०) इति ॥ ४४।४५ ॥

अथायुर्लक्षण तद्विपरीतलक्षणञ्चाह, शरीरेति।—एव पूर्वोक्ताभिप्रायात् शरीरप्राणयो सयोगादायुरुच्यते कथ्यते, आयुरिति—भूतात्मन शरीरनिधनपर्य्यन्त धर्माधर्मनिमित्तकसासारिकसुखदु खोपभोगसाधनम्। तद्विपरीतमाह, कालेनेत्यादि। —कालोऽपि स्वयभूरेव कथित। तथा च—"कालो हि नाम भगवान् स्वयभूरनादि-मध्यनिधन" (सु० सू० ६ अ०) इत्यादि, भूतानि सङ्कलयति सहरणादिति काल, सुखदु खाभ्या भूतानि योजयतीति वा काल, अथवा—कलयति मृत्युसमीप नयति इति काल, ईट्टम्विधेनेत्यर्थ, तद्वियोगादिति—तयो प्राणशरीरयोर्वियोगात् विश्लेषात् बुधै पञ्चत्व मरण कथ्यते। अत एवाह आचार्य्य,—न जन्तु-रित्यादि। रोगान् निवारयेत्, वैद्य इति शेष। तदुक्त वैद्यलक्षणे—"व्याधित्तत्त्व-परिज्ञान वेदनायाश्च निग्रह। एतद्वैद्यस्य वैद्यत्व न वैद्य प्रभुरायुष ॥" (हारी० १म स्था० ३अ०) इति। शेष सुबोधम् ॥ ४६।४७ ॥

इदानी साध्यस्य व्याधेरप्रतिक्रियमाणत्वादवस्थान्तरप्राप्तिमाह, याप्यत्वमिति।— अप्रतिकारिणो नरस्यातुरस्य सुसाध्यो व्याधिर्याप्यत्व याति, किन्तु उक्तव्याधि साध्यता प्राप्य पश्चात् याप्यत्व प्राप्नोतीति भाव। याप्योऽप्यसाध्यता गच्छति, असाध्योऽपि जीवित हन्तीति। अप्रतिकारिण इति—रोगापनयनादिक्रिया-

रोगप्रतीकारे गुणोक्ति ।—

धर्मार्थकाममोक्षाणां शरीरं साधनं यतः ।
अतो रुग्भ्यस्तनुं रक्षेन्नरः कर्मविपाकवित् ॥ ४९ ॥

धात्वादीनां वैषम्ये साम्ये च दोषगुणौ ।—

धातवस्तन्मला दोषा नाशयन्त्यसमास्तनुम् ।
समाः सुखाय विज्ञेयाः बलायोपचयाय च ॥ ५० ॥

रहितस्य, अत एवोत्पन्नमात्रं एव व्याधिं प्रतिकार्यं । तदुक्तं—"जातमात्रं चिकित्स्यन्तु नोपेक्ष्योऽल्पतया गदः । वह्निश्चस्त्रविषैस्तुल्यं स्वल्पोऽपि विकरोत्यसौ ॥" इति । याप्य इत्यसाध्यभेदः । तथा च—"असाध्यो द्विविधो ज्ञेयो याप्यो यश्चाप्रतिक्रियः" इति । तत्र तु—"यापनीयं विजानीयात् क्रिया धारयते तु यम् । क्रियायान्तु निवृत्तायां सद्य एव विनश्यति ॥" (सु० सू० २३ अ०) इति । अप्रतिक्रियश्चिकित्सावर्जितः, नियतप्राणहर इत्यर्थः । साध्योऽपि द्विविधः सुखसाध्यः कृच्छ्रसाध्यश्च । तत्रैकदोषोत्पन्नो निरुपद्रवोऽचिरोत्पन्न इत्यादिलक्षणः सुखसाध्यः, अस्त्रादिसाधनः कृच्छ्र इति ॥ ४८ ॥

इदानीं देहस्य चतुःपदार्थसाधनभूतस्य रक्षां निर्दिशन्नाह, धर्मेति ।—यतो हेतोः शरीरं धर्मादीनां साधनमस्ति, अतः कारणात् रुग्भ्यो व्याधिभ्यस्तनुं शरीरं रक्षेत्, कीदृशं रक्षेत् ? इत्याह, नरः कर्मविपाकविदिति—कर्म शुभाशुभं, तस्य विपाकः फलं, तं जानातीति कर्मविपाकवित्, एतेनाहृष्टजन्यफलं सञ्चित्य तत्परो भूत्वा कृतदानपूर्वकं कर्म कुर्यादित्यभिप्रायः । यतः,—"पूर्वजन्मकृतं पापं व्याधिरूपेण तिष्ठति । अतो दानादिकं कुर्यात् प्रसमीक्ष्य विचक्षणः ॥" इति ॥ ४९ ॥

अथ दोषादीनां वैषम्येणावस्थामाह, धातव इति ।—सुखं स्वस्थता, बलमाधिक-मोजः सञ्चयः, उपचयः शरीरस्य वृद्धिरूपा सन्ततिः । तन्मला इति—धातुमलाः । समा इति—स्वपरिमाणस्थिताः, इति यद्विवरणं कृतं तत् तेषां स्वभावपरिमाणञ्च तन्त्रान्तरीयवाक्येन दर्शयन्नाह, तद्यथा—"यः प्रसादपरोऽन्नस्य परः सौम्यस्य सर्वशः । स रसोऽञ्जलयस्तस्य नव देहेषु देहिनः ॥ रक्तस्याञ्जलयस्त्वष्टौ प्रकृत्या सप्त सर्वशः । पित्तस्याञ्जलयः पञ्च षट् कफस्य प्रचक्षते ॥ मूत्रस्य विंशतिश्चत्वारो वसायाश्चाञ्जलित्रयम् । द्वावञ्जली मेदसस्तु मज्ञः एकाञ्जलिर्मतः ॥ शुक्रस्यार्द्धाञ्जलिर्ज्ञेयो ह्यस्थिजस्त्वोजसस्तथा । चत्वारोऽञ्जलयः स्त्रीणां रजसः प्रकृतिस्थितिः ॥ द्वावञ्जली

अथ सृष्टिक्रम.।—

अव्यक्तम्।—

जगदृयोनेरनिच्छस्य चिदानन्दैकरूपिणः।
सा नित्या प्रकृतिरस्ति * प्रतिच्छायेव भास्वतः॥ ५१॥
अचेतनादि चैतन्य † योगेन परमात्मनः।
अकरोत् विश्वमखिलमनित्य नाटकाकृति॥ ५२॥

प्रसूताया स्त्रयस्यापि हि योषित। प्रमाणमेतद्धातूनामदुष्टानामुदाहृतम्॥ क्षीणाः क्षुब्धप्रमाणाश्च प्रकृतावापि धातवः। योजयन्ति विकारेषु दोषा इति क्षयप्रदा॥" इति। अत एवाह वाग्भट,—"रोगस्तु दोषवैषम्य दोषसाम्यमरोगता" (वा० सू० १ अ०) इति। अन्यत्र—"विकृताऽविकृता देह घ्नन्ति ते वर्त्तयन्ति च" (वा० सू० १अ०) इति। तथा च चरकेऽपि—"विकारो धातुवैषम्य साम्य प्रकृतिरुच्यते। सुखसञ्ज्ञकमारोग्य विकारो दुःखमेव च॥" (च० सू० खुड्डाकचतु०) इति॥ ५०॥

पूर्वमुक्तमादिशब्दात् सृष्टिक्रमशरीरग्रहणम्, अतस्तं दर्शयन्नाह, जगदृयोनेरिति। —जगदृयोनेरित्यादिषु सा नित्या प्रकृतिरस्ति इति विधेयः। यथा भास्वतो भास्वरूपस्य प्रतिच्छायेव प्रतिबिम्बमिव सा नित्या अस्तीति युतिः। प्रकृतेः पर्य्याय अव्यक्त नाम कथितम्। कीदृशस्य? तमाह, जगदृयोनेरिति।—अखिलस्य जगतो योनिः कारणहेतुरस्येति, यद्वा—जगच्छब्देन पृथिव्यादयोऽभिधीयन्ते, कार्य्ये कारणोपचारात्, तेषां योनिरुत्पत्तिहेतुरस्येत्यर्थः, एतेनाभिव्यक्तिहेतुत्वमुक्तम्। पुनः कीदृशस्य? अनिच्छस्येति—इच्छा अहङ्कारस्योत्पादिनी प्रतिपादिता, तया रहितस्येत्यर्थः; एतेन निर्विकारत्वमुक्तम। पुनः किम्भूतस्य? चिदानन्दैकरूपिण इति—चित् ज्ञानम्, आनन्द परब्रह्मावबोधलक्षणं धर्मं, तद्द्वयमेवैक रूपं यस्य, यद्वा—चित्स्वरूपानन्दमेवैकं रूपं यस्य ज्ञानानन्दस्येत्यभिप्रायः। तथा चोक्तम्—"अस्ति ब्रह्म चिदानन्द स्वयंज्योतिर्निरञ्जनम्। ईश्वरी लिङ्गनिर्मुक्तमद्वितीयमयं विभु॥ निर्विकारं निराकार सर्वेश्वरमनीश्वरम्। सर्वशक्ति च सर्वज्ञ तदंशा जीवसंज्ञकाः॥ अनाद्यविद्योपहता यथाग्नेर्विस्फुलिङ्गकाः॥" इति। अत

---

* "पुंसोऽस्ति प्रकृतिर्नित्या" इत्यत्र गूढार्थदीपिकासम्मत पाठः समीचीनः।

† "अचेतनादि चैतन्यम्" इत्यत्र "अचेतनाऽपि चैतन्य" इति गूढार्थदीपिकासम्मत पाठः समीचीनः।

महान्।—

प्रकृतिर्विश्वजननी पूर्वं बुद्धिमजीजनत्।
इच्छामयीं महद्रूपाम्—" ॥ ५३ ॥

अहङ्कार।—

"—अहङ्कारस्ततोऽभवत्।
त्रिविधः सोऽपि सञ्जातो रजःसत्त्वतमोगुणैः ॥५४॥

एकादशेन्द्रियाणि।—

तस्मात् सत्त्वरजोयुक्तादिन्द्रियाणि दशाभवन्।

ऊर्ध्वत्वनिमित्ततया पूर्वश्लोकेन सम्बन्धः, तेन सा मूलप्रकृतिः परमात्मनो योगेन कृत्वा अखिलं विश्वमकरोदिति तात्पर्यार्थः। अखिलं चराचरात्मकं, कीदृशम्? तदाह, अचेतनादीति।—अचेतनमव्यक्तमादिर्यस्य तदचेतनादि। चैतन्यमिति—चेतनान्वितम्। ननु कथमचेतनस्य कारणत्वं प्रवर्त्तते? तदसङ्गतमिति सत्यं, यथा वत्सविवृद्ध्यर्थं क्षीरमज्ञं कारणत्वेन प्रवर्त्तते तद्वदिति। अन्यत्र सविस्तरं विचारणयाऽत्र लिखितम्। पुनः कीदृशम्? अनित्यमिति—विनाशि, घटपटादिवत्। पुनः कथम्भूतम्? नाटकाकृति नाटकस्वरूपम्, ऐन्द्रजालिकवस्तु वदिति भावः ॥ ५१।५२ ॥

इदानीमेकेन कारणेन सर्वेषां कार्याणामुत्पत्तिक्रममाह, प्रकृतिरिति।—प्रकृतिरित्यव्यक्तापरपर्यायाः * पूर्वमादौ बुद्धिं महानिति विकारसञ्ज्ञम् अजीजनदित्यादयामास। कीदृशीम्? इच्छामयीं सत्त्वरजस्तमोगुणस्वभावां नानात्मिकामित्यर्थः। पुनः कीदृशीम्? महद्रूपाम् † इति—महानिति रूपं पर्य्यायनाम यस्याः, सा तथा ताम्, यद्वा—निर्मलस्फटिकोपलप्रख्यां, सत्त्वसमुद्रेकत्वात्। तत इति—बुद्धितत्त्वात्, अहङ्कारोऽभिमानव्यापारलक्षणोऽभवत्। सोऽपि सत्त्वादिगुणं कृत्वा त्रिविध सञ्जातः, त्रिविध इति—वैकारिकस्तैजसो भूतादिरित्यर्थः। तत्र वैकारिकः सात्त्विकः, तैजसो राजसः, भूतादिस्तामस इति ॥ ५३।५४ ॥

अथ त्रिविधस्यापि तस्य कार्य्यमाह, तस्मादिति।—तस्मादिति—अहङ्कारात्

* "प्रकर्षेण क्रियते अनया इति प्रकृतिः, गुणानां साम्यं प्रकृतिः, सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरिति साङ्ख्याः" इति गू० दी०।

† "महद्रूपां बहुरूपाम्" इति गू० दी०।

मनश्च जातं तान्याहुः श्रोत्रत्वङ्नयनं तथा ॥
जिह्वा-घ्राण-वचो-हस्त-पादोपस्थ-गुदानि च ॥५५॥

बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च।—

यच्च बुद्धीन्द्रियाण्याहुः प्राक्तनानीतराणि च।
कर्मेन्द्रियाणि पञ्चैव कथ्यन्ते सूक्ष्मबुद्धिभिः ॥ ५६ ॥

पञ्चतन्मात्रम्।—

रजःसत्त्वगुणोत्कृष्टादहङ्कारादथाभवत्।
तन्मात्रपञ्चकं तस्य नामान्युक्तानि सूरिभिः ॥ ५७ ॥
शब्दतन्मात्रकं स्पर्श-तन्मात्रं रूपमात्रकम्।
रसतन्मात्रकं गन्ध-तन्मात्रञ्चेति तद्विदुः ॥ ५८ ॥

दशेन्द्रियाण्यभवन्, न केवलं दशसङ्ख्याकानि, मनोऽपि इन्द्रियसञ्जमुत्पन्नम। कीदृशादहङ्कारादित्याह, सत्त्वरजोयुक्तादिति।—सत्त्वरजोयुक्तात् तमोऽपि प्राप्तमेव, यत सात्त्विकादहङ्कारात् राजससहायात् तमोमात्रयानुविद्धाद्भूतादीनि दशेन्द्रियाण्युत्पद्यन्ते इति भाव। एके "तस्मात्" इत्यस्य स्थाने "अत्र सत्त्वरजोयुक्तात्" इति पठन्ति व्याख्यानयन्ति च। तानीन्द्रियाणि च सात्त्विकाहङ्कारकार्याणि कथितानि, वैद्यके तु भौतिकानीत्यभिप्रायः। तत्र पञ्च प्राक्तनानि श्रोत्रादीनि बुद्धीन्द्रियाण्याहुः, बुद्धेराश्रयत्वात्। प्राक्तनानि पूर्वपठितानि। इतराण्यवशिष्टानि पञ्च कर्मेन्द्रियाणि कथ्यन्ते, तेषु कर्मणामाश्रयत्वात्। पूर्वाणि पञ्च श्रोत्रत्वङ्नयनजिह्वाघ्राणानि, इतराणि च पञ्च वचोहस्तपादोपस्थगुदानि। सूक्ष्मबुद्धिभिरिति ग्रहणेन मनोऽप्युभयात्मकं सूच्यते, बुद्ध्यात्मकं कर्मात्मकञ्चेत्यर्थः, बुद्धीन्द्रियाणां कर्मेन्द्रियाणाञ्च मनोऽधिष्ठानानामेव प्रवृत्तेः ॥ ५५।५६ ॥

त्रिविधाहङ्कारात्तन्मात्रपञ्चकं भवति, अतस्तदाह, रजः इत्यादि।—अथानन्तरम्, अहङ्कारादिति—अहङ्कारो भूतादिर्मत्र तस्मादिति तामसरूपादित्यभिप्रायः। कीदृशादित्याह, रजःसत्त्वगुणोत्कृष्टादिति—राजससहायात् सत्त्वमात्रयाऽनुविद्धात् तामसादहङ्कारादित्यर्थः, ईदृशात्तन्मात्रपञ्चकं भवति इति तात्पर्यार्थः। सा सा मात्रा यस्मिन् तत्तन्मात्रं, तच्चानुद्भूतत्वभाव वाच्येन्द्रियाग्राह्यं, वक्ष्यमाणशब्दादीन्येव पञ्चतन्मात्राणीति, तत्त्वं योगिभिरेव ग्राह्यम् ॥५७।५८॥

पञ्चभूतम्।—

तन्मात्रपञ्चकात्तस्मात् सञ्जातं भूतपञ्चकम्।
व्योमानिलानलजल-क्षीणीरूपञ्च तन्मतम्॥ ५९॥

इन्द्रियाणि।—

शब्दः स्पर्शश्च रूपञ्च रसगन्धावनुक्रमात्।
तन्मात्राणा विशेषा स्युः स्थूलभावमुपागता॥ ६०॥

बुद्धीन्द्रियाणा विषया।—

बुद्धीन्द्रियाणां पञ्चैव शब्दाद्या विषया मताः॥ ६१॥

कर्मेन्द्रियाणा विषया।—

कर्मेन्द्रियाणा विषया भाषाऽऽदानविहारिताः।
आनन्दोत्सर्गको चैव कथितास्तत्त्वदर्शिभिः॥६२॥

तन्मात्रपञ्चकादिति।—तस्मात् पूर्वोक्तात्तन्मात्रपञ्चकात् शब्दादिभूतपञ्चकं व्योमादिक सञ्जात सम्यक्प्रकारेणोत्पद्यते इति। सम्यक्प्रकारग्रहणेनैकोत्तर-परिवृद्धि सूचने, तद्यथा—शब्दतन्मात्राच्छब्दतन्मात्र व्योम शब्दतन्मात्रसहितात् स्पर्शतन्मात्रात् शब्दस्पर्शगुणो वायु, शब्दस्पर्शतन्मात्रसहितात् रूपतन्मात्राच्छब्दस्पर्शगुण तेज, शब्दस्पर्शरूपतन्मात्रसहिताद्रसतन्मात्रात् शब्दस्पर्शरूपरसगुणा आप, शब्दस्पर्शरूपरसतन्मात्रसहितात् गन्धतन्मात्रात् शब्दस्पर्शरूपरसगन्धगुणा पृथिवी। पतञ्जलिमतानुसारिणश्च शब्दादिभ्यो व्योमादीनामुत्पत्तिमिच्छन्ति॥ ५९॥

इदानी पञ्चकाना तन्मात्रकाणां विशेषा उच्यन्ते, शब्द इति।—अनुभवयोग्ये सुखदुःखमोहरूपधर्मैर्विशिष्यन्ते इति विशेषा, ते शब्दस्पर्शरूपरसगन्धा। तन्मात्राण्यपि त्वविशेषाणि, यतस्तानि अनुभवयोग्ये सुखादिभिर्विशेष कर्तुं न शक्यन्ते सूक्ष्मत्वात, अत एव स्थूलभावमुपागता अमी विशेषा इत्यर्थ। केचिदमुं श्लोक तन्मात्रपञ्चका-दनन्तर पठन्ति, सङ्गतत्वात्॥ ६०॥

अथेन्द्रियाणा विशेषाणा विषयान् दर्शयन्नाह, बुद्धीन्द्रियाणामिति—श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाना, शब्दाद्या इति—शब्दस्पर्शरूपरसगन्धा, एते तु तेषामनुक्रमेण बोद्धव्या। कर्मेन्द्रियाणामिति—वचोहस्तपादोपस्थगुदाना यथाक्रम भाषाऽऽदान विहारानन्दोत्सर्गा विषया कथिता। भाषा वचनम आदान ग्रहण, विहारोऽत्र चलनादिकम्, आनन्दो रूप, उत्सर्गो मलपरित्याग इति। तत्त्वदर्शिभि, पुरुषै यतुर्दशगतितत्त्वरहस्यज्ञापकैरित्यर्थ॥ ६१।६२॥

प्रकृते पर्य्यायाः।—

प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा।
एतानि तस्या नामानि शिवमाश्रित्य या स्थिता ॥६३॥

चतुर्विंशतितत्त्वानि।—

महानहङ्कृतिः पञ्च-तन्मात्राणि पृथक् पृथक्।
प्रकृतिर्विकृतिश्चैवं सप्तैतानि बुधा जगुः ॥ ६४ ॥
दशेन्द्रियाणि चित्तञ्च महाभूतानि पञ्च च।
विकाराः षोडश ज्ञेया सर्वं व्याप्य जगत् स्थिताः ॥६५॥

जीवात्मनो विवरणम्।—

एवं चतुर्विंशतिभिस्तत्त्वैः सिद्धे वपुर्गृहे।
जीवात्मा नियत नित्यो वसति स्वान्तदूतवान् ॥६६॥

इदानीं मूलप्रकृतेः पर्य्यायनामान्याह,—प्रधानमिति। प्रधानं प्रकृतिरिति—मूलप्रकृतिः, शक्तिरिति—कारणरूपा, नित्या अविनाशिनी, अविकृतिर्विकाररहिता। तस्या प्रकृतेः। शिवमिति—परब्रह्मलक्षणम् आश्रित्य या स्थिता सूर्य्यस्य प्रतिबिम्बवत्, सा च सत्त्वरजस्तमःस्वरूपा भवति। तदुक्तं—"सर्वभूतानां कारणमकारणं सत्त्वरजस्तमोलक्षणमष्टरूपमखिलस्य जगतः सञ्चयहेतुरव्यक्तं नाम" (सु० शा० १ अ०) इति ॥६३॥

इदानीं चतुर्विंशतिकेषु तत्त्वराशौ प्रकृतित्वं निरस्यन कथितमुपसंहरन्नाह, महानिति।—एतानि सप्त महदादीन्येव प्रकृतिविकृतिश्च भवन्तीति पिण्डार्थः। प्रकृतिरित्यपरेषां कारणभूता, विकृतिरिति मूलप्रकृतेः कार्य्यरूपा। अत्र यद्यव्यक्तग्रहणं न कृतं तत विकृतिपदग्रहणात्, अव्यक्तन्तु केवलं हेतुभावेन प्रकृतिरेव, महदादयः सप्त कार्य्यत्वेन विकृतयोऽपि ज्ञेयाः। पञ्चतन्मात्राणीति—शब्दादीनि। इत्येवं बुधाः पण्डिता जगुः कथितवन्तः। इदानीं षोडश विकारान् दर्शयन्नाह, दशेन्द्रियाणीति।—षोडश विकाराः कार्य्याणि, ते विकाराः दशेन्द्रियाणीति—श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाग्घस्तोपस्थपायुपादानि। चित्तञ्चेति—मनोऽपीन्द्रियभूतमिति भावः। महाभूतानि आकाशपवनदहनतोयभूमय इति। एवं षोडश विकाराः, एते तु सर्वे चराचरात्मकं जगत् संसारं व्याप्य स्थिता

स देही कथ्यते पाप-पुण्यदु खसुखादिभिः।
व्याप्तो बद्धश्च मनसा कृत्रिमैः कर्मबन्धनैः॥ ६७॥

जीवात्मनो बन्धनकारणानि।—

कामक्रोधौ लोभमोहावहङ्कारश्च पञ्चमः।
दशेन्द्रियाणि बुद्धिश्च तस्य बन्धाय देहिनः॥ ६८॥

पूरणार्थं। एवमिति—पूर्वोक्तप्रकारेण, चतुर्विंशतिभिस्तत्त्वैरिति—अव्यक्त, महान्, अहङ्कार, शब्दतन्मात्र, स्पर्शतन्मात्र, रूपतन्मात्र, रसतन्मात्र, गन्धतन्मात्र, श्रोत्र, त्वक्, चक्षु, घ्राण, रसना, वाक् हस्तौ, पादौ उपस्थ, पायु, मन, पृथिवी, आप, तेज, वायु, आकाश, चतुर्विंशतितत्त्वानि पृथक् दर्शितानि, एभि सह जीवात्मा लिङ्गशरीर नित्य अविनाशी, नियत सर्वकाल वपुर्गृहे स्थूलशरीरे वसति तिष्ठतीत्यर्थ। कीदृश ? तमाह, क्षान्तदूतवानिति—क्षान्त मनसदेव दूतो यस्य स तथा मनोदूत इत्यर्थ। "क्षान्त तृप्तमनस मन" इत्यभिधानात्। स देही कथ्यते इति—स जीवात्मा देही पुरुषव्यक्ति, देह महदादिकृतसूक्ष्मलिङ्ग-शरीरमुच्यते, तदस्यास्तीति देही कथ्यते, सोऽपि कर्मपुरुषो वाच्य पञ्चविंशततम: कथित, अत एव पापपुण्यसुखदु खादिभिर्व्याप्त, मनसा कृत्रिमै कर्म-बन्धनैश्च बद्ध, एतेन कर्मपुरुषस्य शरीरात्मनो सयोगकारकेण मनसा सयोगी पापपुण्यसुखदु खादयो गुणा उत्पद्यन्ते इति भाव। आदिशब्दात् इच्छाद्वेषप्रयत्न-प्राणापानोन्मेषनिमेषबुद्धिमन सङ्कल्पविचारणाधृतिविज्ञानाध्यवसायविषयोपलब्धिगुणा ज्ञातव्या। नन्वविकृतो जीवात्मा कथ विकारिवस्तुभिर्व्याप्त ? सत्यं, निर्विकार-स्यापि विकारिवस्तुसयोगेन विकारित्वं स्यात; यथा सन्ध्यारागिरविकरनिकर-सयोगादरुण गगनतलं भवति तद्वदित्यभिप्राय। तत् लिङ्गशरीरे विकारा: प्रतिबिम्बिता इव तिष्ठन्तीत्येके भाषन्ते, यथा तडागोदके प्रतिबिम्बितो द्रुमस्तडागोदकप्रकम्पेन प्रकम्पात्मक कथ्यते इति॥ ६४—६७॥

कर्मबन्धनैर्बद्धश्चेति यदुक्त तदिदानीं तस्य बन्धनान्याह, कामक्रोधाविति।—तस्य देहिन इति—पूर्वोक्तस्य पुरुषस्य कामादयो बन्धनाय भवन्तीत्यर्थ। कामो मनस सङ्कल्पविशेष, तदुक्त—"स्त्रीषु लाभो मनुष्याणा स्त्रीणाञ्च पुरुषेषु वा। परस्परकृत खेद काम इत्यभिधीयते॥" इति। क्रोधस्तु मनसो व्याधिरूपो हिंसात्मक, तथा हि—"यदूधा हृदयाज्जन्तो समुत्तिष्ठति वै सकृत्। पर-हिंसात्मक. क्लेश: क्रोध इत्यभिधीयते॥" इति। लोभो गर्द., तृष्णा, तथा

जीवात्मन बन्ध-मुक्ति दुःख-सुखहेतव ।—

आप्नोति बन्धमज्ञानादात्मज्ञानाच्च मुच्यते।
तद्दुःखयोगकृत् व्याधिरारोग्यं तत्सुखावहम् ॥ ६९ ॥

इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां शार्ङ्गधरसंहितायां कलादिकाख्यान नाम पञ्चमोऽध्याय ॥ ५ ॥

योक्त—"परार्थं परभोगाय परस्यानर्थमेव च। दृष्ट्वा श्रुत्वा च या तृष्णा जायते लोभ एव स ॥" इति। मोहस्तु मिथ्याबोध सर्वपापमूलम्, यथा—"अश्रेय-श्रेयसीमध्ये श्रेयसो मरणं सश्रयो भवेत। मिथ्याज्ञानन्तु त प्राहुरहिते हितदर्शनम् ॥" इति। अहङ्कारोऽभिमानव्यापारलक्षण, यथा—"अहमित्यभिमानेन य क्रियासु प्रवर्तते। कार्यकारणयुक्तासु तदहङ्कारलक्षणम् ॥" इति। दशेन्द्रियाणि प्रसिद्धानि। बुद्धिश्चेति—मनोव्यापार ॥ ६८ ॥

इदानीं बन्धनहेतुमाह, आप्नोतीति।—अज्ञानादिति—मोहात् बन्ध क्लेश-माप्नोतीति, पुरुष इति शेष, स एव पुरुष आत्मज्ञानाऽभावधर्मविचारणान्मुच्यते बन्धनादेव, कैवल्य प्राप्नोतीति भाव। अत एव व्याधिस्तद्दुःखयोगकृद्भवति तत्सुखावहमारोग्यमिति। तद्दुःखयोगकृदिति—तत् तयो शरीरशरीरिणो, शरीरमनसोरिति केचित, * दुःखसंयोगकृदिति—दुःखन्तु स्वभावत प्रतिकूल-वेदनीयम। सुखन्तु स्वभावतोऽनुकूलवेदनीयम्। आरोग्य स्वास्थ्यव्यापारलक्षणम्। इति सृष्टिक्रमशारीरम् ॥६९॥

इति श्रीबालव्याख्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेन आढमल्लेन विरचितायां शार्ङ्गधर-दीपिकायां प्रथमखण्डे कलादिकाख्यान नाम पञ्चमोऽध्याय ॥ ५ ॥

---

* नेय व्याख्या समीचीना, यत निबन्धसङ्गृहे "तच्छब्देनानन्तरनिर्दिष्ट. पुरुषो-ऽधिक्रियते। दुःख कायवाङ्मानसपीडा, विविधदुःखमादधतीति व्याधय। तस्य पुरुषस्य दुःखाय सयोगो येषामागन्तुप्रभृतीना ते व्याधय., अथवा, तस्य पुरुषस्य येषु सत्सु यैर्वा कारणभूतै' यैर्वा दुःख जायते ते व्याधय.। एतौ वाक्यार्थौ व्याधौ। अन्ये तु—तस्य पुरुषस्य दुःखाना वेदनाना ये सयोगास्ते व्याधय। अपरे तु—दुर्दृष्टानि खानि श्रोतासि दुःखानि, तस्य पुरुषस्य दुःखाना दुष्टश्रोतसा निमित्तं सयोगो येषा ते तथोक्ता" इति व्याख्या परिदृश्यते।

षष्ठोऽध्यायः ।

अथ आहारादिगतिरध्यायः ।

आहारपरिपाके प्रथमक्रम ।—

यात्यामाशयमाहारः पूर्वं प्राणानिलेरितः ।
माधुर्य्यं फेनभावञ्च षड्रसोऽपि लभेत सः ॥१॥

आहारपाके द्वितीयतृतीयक्रमद्वयम् ।—

अथ पाचकपित्तेन विदग्धश्चाम्लतां व्रजेत् ।
ततः समानमरुता ग्रहणीमभिनीयते ॥२॥

इदानीमाहारादिगतिरध्याय पूर्वं दर्शितस्तमाह,—अथेति । यातीत्यादि ।—आहार पाञ्चभौतिकस्वरूपनाशननिमित्यर्थ, तदुक्त सुश्रुते—"पञ्चभूतात्मके देहे आहारः पाञ्चभौतिक" (सु० सू० ४६ अ०) इति । एवविध स आहार पूर्वमादौ आमाशय याति प्राप्नोतीत्यर्थ । आमाशयश्च नाभिस्तनान्तरे कोष्ठविशेषमाह., यथा—"नाभिस्तनान्तर जन्तोराहुरामाशय बुधा" (च० वि० त्रिविधकुक्षीय०) इति । कीदृश ? तमाह प्राणानिलेरित इति—प्राणवायुना प्रेरित इति भाव । "हृदि प्राणानिलो मत" इति वचनात् । तत्र षड्रसयुक्तोऽपि स आहार माधुर्य्य मधुररसबाहुल्य फेनभावञ्च लभते प्राप्नोति, कफस्थानगतत्वात् , कफोऽपि मधुर इति प्रसिद्ध , अत एवाह तत्रान्तरे—भुक्तादौ कफस्य हृद्गिरिति, रसस्वाधर्म्यात् अस्यैवामाजीर्णसज्ञा, यत ,—"माधुर्य्यमत्र गतमामसज्ञम्" (सु० सू० ४६ अ०) इति ॥ १ ॥

अथ स्थानान्तरप्राप्तिमाह,—अथ पाचकेति ।—अथानन्तर स एवामाशयस्थिताहार पाचकपित्तेन पाचकाग्नितेजसा विदग्ध सन् पच्यमानाभिमुख सन्नम्लता व्रजेत्, यतोऽम्लात् पित्त जायते , तदावस्थाया—"विदग्धमम्ल गतमम्लभावम्" (सु० सू० ४६ अ०) इति । आमाशयाच्छ्लितोऽप्राप्तग्रहणीपदो यदा भवति तत्र स्थानान्तर वदन्त्येके, नैव सर्वमत, किन्तु पाचकाग्निस्थानसमीपवर्त्ती यदा भवति तदा विदग्धो भवतीत्येके भाषन्ते। स्वमते तु आमाशयस्थावस्थायामेव पित्तवैदग्ध्यादम्ल एव स्यात्, यत पित्त विदग्धमम्लतामुपैति। इदानी तृतीयावस्थागतस्य कार्य्यमाह, तत इत्यादि ।—ततस्तस्मात् स्थानात् समाननरुता नाभिगतवायुना क्षिप्ता ग्रहणी ग्रहणिस्थानमभिनीयते प्राप्यते, आहार इति शेष । एतत् स्थान कलाशब्देन वाच्य, यत ,—"षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता । पक्वामाशयमध्यस्था

ग्रहणीनिर्देश ।—

(षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता।
पक्वामाशयमध्यस्था ग्रहणीत्यभिधीयते ॥ *)

सुपक्वापक्वाहारयो क्रिया ।—

ग्रहण्यां पच्यते कोष्ठ-वह्निना जायते कटुः।
रसो भवति सम्यक्पादपक्वादामसम्भवः ॥३॥

सम्यक्पक्वरसस्य क्रिया ।—

वह्नेर्बलेन माधुर्य्यं स्निग्धतां याति तद्रसः।
पुष्णाति धातूनखिलान् सम्यक् पक्वोऽमृतोपमः ॥४॥

ग्रहणी सा प्रकीर्त्तिता ॥" (सु० उ० ४० अ०) इति। ग्रहण्यामपि कोष्ठवह्निना कृत्वा पच्यते, कोष्ठग्रहण धात्वग्निनिरासार्थम्, तस्मात् कटुको जायते इति तात्पर्य्यार्थ। यत "कटुकाज्जायते वायु" इति तद्विरुद्धव्याख्यीर्णमाहुरित्येके, यदुक्त—"भक्षतोदयूल विष्टभ्यमानङ्विरुद्धवातम्" (सु० सू० ४६ अ०) इति। अथ ताद्दश्याहारस्य द्विविधावस्था वक्तुमाह, रस इति।—वह्निस्थाने स्थितस्याहारस्य सम्यक् पाकाद्रसो जायते, असम्यक् पाकादाम सम्भवति इति। रस इति —समाग्निपरिपाचितत्वात् सारभूतो यो द्रवांश स रस इत्युच्यते, आमश अपरिपाकाद्भवति, तदुक्त—"जठरानलदौर्बल्यादविपक्वन्तु यो रस। स आमसञ्ज्ञको ज्ञेहि सर्वदोषप्रकोपक ॥" इति ॥ २।३ ॥

इदानी तयो रसानयोर्व्यापार दर्शयन्नाह, वह्नेरिति।—तद्रस इति पूर्वोक्त, वह्नेर्बलेनेति—रसगताग्निप्राबल्यात् मधुरता स्निग्धताच्च याति प्राप्नोति सन्न चाखिलान् रक्तादीन् धातून् पुष्णाति, तस्मात् सम्यक् पक्वो रस अमृतोपम स्यात्, यथा अमृत जीवन मधुरादिगुणयुक्तम् इति श्रुति, तथा अयमपि जीवनधारणतर्पणादिगुणयुक्त इत्यभिप्राय सौम्यत्वात्, तदुक्त सुश्रुते—"स खलु द्रवानुसारी स्नेहनजीवनतर्पणधारणादिभिर्विशेष. सौम्य इत्यवगम्यते" (सु० सू० १४ अ०) इति ॥ ४ ॥

---

* आचक्षीऽयमिति टीकाकर्तुरभिमतम्।

असम्यक्पक्वरसस्य क्रिया।—

मन्दवह्निविदग्धश्च कटुर्वाऽम्लो भवेद्रसः।
विषभाव व्रजेद्वाऽपि कुर्य्याद्वा रोगसङ्करम् ॥५॥

आहारस्य सारमलयोर्निर्देश मूत्रस्वरूपञ्च।—

आहारस्य रसः सारः सारहीनो मलद्रवः।
शिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात् ॥६॥

मलस्य स्वरूपम्।—

तत्किट्टञ्च मलं ज्ञेयं तिष्ठेत् पक्वाशये च तत्।
बलित्रितयमार्गेण यात्यपानेन नोदितम् ॥७॥

बलित्रयस्य नामानि।—

प्रवाहणी सर्जनी च ग्राहिकेति बलित्रयम् ॥८॥

अथैव स्वरूपान्तरमाह, मन्दवह्निविदग्ध इत्यादि।—स एव रसो यदा मन्दवह्निविदग्धो भवति अग्नेर्नान्द्येनासम्यक् पक्व इति भाव, तदा कटरस्रो वा भवेत्, विषभाव सारण सारणात्मकरूपता व्रजेत प्राप्नोति वा, यदि सारणात्मको न भवति अल्पत्वात्, तदा रोगसङ्कर रोगसमूह कुर्य्यात दोषदूषितत्वात् न तु स्वयमेव, यत स्नेहदग्धव्यपदेशवत्, तदुक्तं—"रसादिस्थेषु दोषेषु व्याधय सम्भवन्ति ये। ते ज्ञायन्त इत्युपचारेण (?) तानाहुर्घृतदग्धवत् ॥" इति ॥५॥

अथाहारस्य रससारत्वनिरूप्य मलस्य निःसारत्व दर्शयन्नाह, आहारस्येति।—आहारस्य पूर्वप्रतिपादितस्य यो रसो विदितस्वरूप स सार इत्यभिहित, सारो मुख्यत्वेन तर्पणादिकृतत्वात्। सारहीन इति साररहित आहारस्यागो वर्त्तते स मलद्रवसज्ञ, मल पुरीष, द्रव मूत्रम्। तयोर्भिन्नगमनस्थानविशेषमाह, शिराभिरित्यादि।—तज्जलमिति पुरीषनिःसृत द्रवविशेष शिराभिर्मूत्रवाहिनीभि कृत्वा वस्तौ मूत्राधारे नीत तदेव मूत्रत्वमाप्नुयादिति। तत्किट्ट मलमिति—मूत्रावशिष्ट मलं किट्टसज्ञक ज्ञेय, निर्द्रवत्वात्, तच्च पक्वाशये तिष्ठेदिति। अथ पक्वाशये स्थितस्य तादृशस्य तस्याधोगमनशीलत्व दर्शयन्नाह, बलीति।—अपानेन गुदस्थितवायुना नोदित प्रेरित, मलमिति शेष, तच्च बलित्रितयमार्गेण कृत्वा याति बहिर्निःसरतीत्यर्थ ॥६।७॥

बलित्रितयनामान्याह, प्रवाहणीत्यादि।—प्रवाहणी सर्जनी ग्राहिकेति, तासां

रक्तोत्पत्तिक्रम ।—

रसस्तु हृदयं याति समानमरुतेरितः ।
रञ्जितः पाचितस्तत्र पित्तेन याति रक्तताम् ॥९॥

रक्तस्य विवरणम् ।—

रक्तं सर्वशरीरस्थ जीवस्याधारमुत्तमम् ।
स्निग्धं गुरु चल स्वादु विदग्ध पित्तवद्भवेत् ॥१०॥

नाभिरेवाक्षतयो बोद्धव्या । बलिस्तु गुदस्यावयवभूता, तालिसी बलय उपर्य्युपरि व्यवस्थिता शङ्खावर्त्तनिभा इति ॥८॥

इदानी मलत्रय निरूप्य सारभूतस्य रसस्यापि कार्य्यत्वेन स्थानान्तरप्राप्तिमाह, रसस्त्विति ।—स रस समानमरुता नाभिगतवायुना कृत्वा दूरित ऊर्द्ध प्रेरितो हृदय याति प्राप्नोति, एतेन किमुक्तम् ? सारभूतो रसो ग्रहणीस्थानात् हृदयमागच्छतीति भाव , सकलशरीरगमनशीलत्वात् । तदुक्त सुश्रुते—"तस्य च हृदय स्थान, स हृदयाद्दशधमनीरनुप्रविश्यौर्द्धगा दश दश चाधोगामिन्यश्चतस्रश्चित्यग्रा कृत्स्न शरीरमहरहस्तर्पयति, वर्द्धयति, धारयति, यापयति, जीवयति चाहृष्टहेतुकेन कर्मणा । तस्य शरीरमनुधावतोऽनुमानात् गतिरुपलक्षयितव्या" (सु० सू० १४ अ०) इति । हृदयशब्देनात्र हृदयोपलक्षित प्रदेश उच्यते, न तु साक्षात् हृदय, कुत ? हृदयस्य ओज स्थानत्वात् । तत्र सोऽपि रस पित्तेन रञ्जकपित्तेन कृत्वा पाचित, अत एव रञ्जित राग प्राप्त सन् रक्तता याति प्राप्नोति, यतो रसाद्रक्त भवतीति वचनात् । रक्तस्य भावो रक्तता, तेन आदावीषद्रक्तभावं प्राप्य पश्चात् क्रमेण आरक्त स्यात् । तदुक्त—"रस सप्ताहादवाक् परिवर्त्तमान श्वेतकपोतहरितहारिद्र-पद्मकिंशुकालक्तकरसप्रख्याय यथाक्रम दिवसपरिवर्त्ताद्वर्णपरिवर्त्तनापद्यमान पित्तोष्मोपरागात् शोणितत्वमापद्यते" (सु०) इति ॥९॥

अथ रक्तप्राधान्य दर्शयन्नाह, रक्तमिति ।—तद्रक्त सर्वशरीरस्थित भवति पाञ्चभौतिकत्वात्, यत ,—"विस्रता द्रवता राग स्यन्दन लघुता तथा । भूम्यादीना गुणा ह्येते दृश्यन्ते चात्र शोणिते ॥" (सु० सू० १४ अ०) इति । जीवस्योत्तममाधारश्चेति दृढमूलत्वात् । तदुक्त—"देहस्य रुधिर मूल रुधिरेणैव धार्य्यते । तस्मात् यत्नेन संरक्ष्य रक्त जीव इति स्थिति ॥" (सु० सू० १४ अ०) इति । पुन कीदृश्य तदाह, स्निग्ध-मित्यादि ।—स्निग्धमरूक्षम् । गुरु अलघु । चल नैकत्र स्थितिशील द्रवत्वात् । स्वादु मधुर स्वभावात् । यदा विदग्ध तदा पित्तवद्भवेत् इति—यथा विदग्ध पित्तमम्लत्वं

शुक्रस्य रक्तस्य चोत्पत्तिविवरणम्।—

पाचिताः पित्ततापेन रसाद्या धातवः क्रमात्।
शुक्रत्वं याति मासेन तथा स्त्रीणां रजो भवेत् ॥११॥

व्रजेत् कटुकत्वं भवेत् * तथेदमपीति भावः। उक्तमन्यत्रापि—"अनृणशीतं मधुरं स्निग्धं रक्तं च वर्णतः। शोणितं गुरु विस्रं स्याद्विदाहश्चास्य पित्तवत्॥" सु० सू० २१ अ०) इति। कार्यत्वेनापि तस्य लघुता च दर्शिता इति न दोषः ॥१०॥

इदानीं धातूनामुत्पत्तिपरम्परापूर्वकं शुक्रस्यापि विषयं दर्शयन्नाह, पाचिता इति।—पित्ततापेन पित्ततेजसा पाचिताः परिपाचिताः रसाद्या धातवः क्रमात् शुक्रत्वं मासेन याति प्राप्नोति। रसाद्या इत्यत्र रसग्रहणात् रस एव शुक्रत्वं प्राप्नोति, अत एव यातीत्येकवचनं कृतम्। आदिग्रहणात् रक्तमांसमेदोमज्जास्थीनीति। एके—रसाद्या धातवो मासेन शुक्रत्वं यान्तीति † पठन्ति व्याख्यानयन्ति च। तेषां मते तु कार्यकारणयोरभेदोपचारात्। न केवलं शुक्रत्वं स्त्रीणामपि रजो भवेत्। तदुक्तम्—"रसादेव स्त्रियो रक्तं रजः सर्गे प्रवर्तते। तद्वर्षाद्द्वादशाद्दूर्ध्वं याति पञ्चाशतश्चयम्॥" (सु० सू० १४ अ०) इति। तथेति ग्रहणात् शुक्रत्वमपि स्त्रीणामेव भवति, यतो दृश्यते हि तत्स्रावणादिभिः प्रयोगैः, अन्यथा तासां सहर्षं कथं स्यादिति। तदुक्तम्—"सौम्यं लघ्वाश्यं स्वच्छं स्निग्धं योनिसुखोद्भवम्। स्त्रीणां शुक्रं न गर्भाय भवेत् गर्भाय चार्त्तवम्॥" इति। मासेनेति—त्रिंशद्भिर्दिनैरिति भावः। त्रिंशद्दिनविवरणं सुश्रुताचार्य्येणोक्तं, तद्यथा—"स खलु त्रीणि त्रीणि कलासहस्राणि पञ्चदश च कला एकैकस्मिन् धाताववतिष्ठते, एवं मासेन रसः शुक्रीभवति स्त्रीणामार्त्तवम्" (सु० सू० १४ अ०) इति। उक्तमपि समुच्चयेन दर्शयति—"अष्टादश सहस्राणि सङ्ख्या ह्यस्मिन् समुच्चये। कलानां नवतिः प्रोक्ता स्वतन्त्रपरतन्त्रयोः॥" (सु० सू० १४ अ०) इति। विंशतिकलो मुहूर्त्तः कलादशभागश्चेत्यादिना मासः सङ्ख्या ज्ञातव्या। एतेन किमुक्तम्? रस एकैकाहेनैव सम्पद्यते, अन्ये वै धातवस्ते पञ्चभिः पञ्चभिरहोभिः सम्पद्यन्ते इति भावः ॥११॥

---

* व्याख्येयं न समीचीना, यतः प्रकृतिस्थमेव पित्तं कटुरसं, न तु विदग्धं, तस्माच्छब्दात्, उक्तञ्च—"पित्तं तीक्ष्णं द्रवं पूति नील पीतं तथैव च। उष्णं कटुरसञ्चैव विदग्धञ्चाम्लमेव च॥" (सु० सू० २१ अ०) इति। ततश्च—यथा कटुकमपि पित्तं विदग्धमम्लतां व्रजेत्, तथेदमपि इति पाठकल्पनं सङ्गतम् इति।

† अयमेव पाठः साधुः।

गर्भोत्पत्तिविवरणम्।—

कामान्मिथुनसयोगे शुद्धशोणितशुक्रज।
गर्भः सञ्जायते नार्य्याः स जातो बाल उच्यते ॥१२॥

कन्या-पुत्र-नपुंसकोत्पत्तौ हेतु।—

आधिक्ये रजसः कन्या पुत्रः शुक्राधिके भवेत्।
नपुंसकं समत्वेन यथेच्छा पारमेश्वरी ॥१३॥

बाले औषधप्रयोगनियम।—

बालस्य प्रथमे मासि देया भेषजरक्रिका।
अवलेहोक्ततैवैव क्षौद्रसिताघृते ॥१४॥

गर्भोत्पत्तिमाह, कामादिति।—शुद्धशोणितशुक्रजो गर्भो नार्य्या स्त्रियाः सञ्जायते इति। कुत ? कामात् कामोऽभिलाषः, क्व ? मिथुनसयोगे मिथुनं इन्द्र स्त्रीपुरुषविषय तस्य सयोगो मेलन तस्मिन् सति। शुद्धशोणितशुक्रयोर्लक्षणञ्च तन्त्रान्तरे यथा—'यच्छालक्तप्रतिमं यच्च यद्वा लाचारसोपमम्। तदार्त्तवं प्रशसन्ति यदासीन विरञ्जयेत्॥" (सु० शा० २ अ०) "दिनत्रय प्रहृष्टा च कुरुते शोणितं स्त्रिया। व्यवायस्नुतशुक्रेण गर्भलक्षात्ततो भवेत्॥" "तद्वैवातिप्रसङ्गेन प्रवृत्तमनृतावपि। असृग्दर विजानीयादतोऽन्यद्रक्तलक्षणात्॥" (सु० शा० २ अ०) इति। शुद्ध शुक्र यथा—"स्फटिकाभ द्रव स्निग्ध मधुर मधुगन्धि च। शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभ तथा॥" (सु० शा० २ अ०) इति। "वातादिदूषित पूति कुणप यन्निष्फलं च। क्षीणं मूत्रपुरीषाभ्या गन्धि शुक्रन्तु निष्फलम्॥" इति। गर्भ इति—शुक्रशोणित गर्भाशयस्थमात्मप्रकृतिविकार-सम्मूर्च्छित गर्भ इत्युच्यते। स जातो बाल उच्यते इति—स गर्भो यदा जातो वर्द्धिनं सरति तदा बाल इत्युच्यते ॥१२॥

बालशब्द कन्यापुरुषनपुंसकेष्वपि वर्त्तते, अत एवाहाचार्य्य, आधिक्ये इति।—तत्र च गर्भाशये यदा रजस आर्त्तवस्य आधिक्य भवति तदा कन्या भवेत् इत्यर्थः, आर्त्तवाधिक्यशुक्रादित्यभिप्राय। यदि शुक्राधिक्यन्तर्हि पुत्र, शुक्राधिक्यात्तं-वादित्यर्थ। समत्वेनेति—शुक्रशोणितयो साम्येन समभागेन ज्ञात्वा नपुंसक स्यात्, यथा पारमेश्वरीच्छा अस्ति तथैव भवति, नात्र विचार कर्त्तव्य इति भाव। इच्छेत्यनेनैव यत्सजातमपि सूचितम्। तद्यथा—"बीजेऽन्तर्वायुना भिन्ने द्वौ जीवौ कुक्षिमागतौ। यमावित्यभिधीयेते धर्मेतरपुरःसरौ॥" (सु० शा० २ अ०) इति ॥१३॥

इदानीं बालस्य प्रथममासादारभ्य भेषजक्रिया दर्शयन्नाह, बालस्येति।—बालस्य

वर्द्धयेत्तावदेकैकां यावद्भवति वत्सरः ।
माषैर्वृद्धिस्तदूर्द्धं स्यात् यावत् षोडशवत्सरः ॥१५॥
तत. स्थिरा भवेत्तावत् यावत् वर्षाणि सप्ततिः ।
ततो बालकवन्मात्रा ह्रासनीया शनैः शनैः ॥
मात्रेयं कल्कचूर्णानां कषायाणां चतुर्गुणा ॥१६॥

प्रथमे मासि भेषजरक्तिका देया । बालोऽयं चीराद, यतस्त्रिविधो बाल आषोडशवर्षाद्भवति । स च चीराद चीरान्नाद अन्नाद इति । अत एव चीरचौद्र सिताघृतैरिति वक्ष्यमाणानुपानादयो दर्शिता यथासम्भवोपयोगित्वेन । भेषजमत्र सुवर्णरजतशिलाजत्वादिकम् । रक्तिका गुञ्जा तत्परिमाणमित्यर्थः । प्रथमे मासीति प्रथमग्रहणं जातदिनमारभ्य भेषजं दद्यादित्यभिप्राय । तथा च सुश्रुते—"अथ कुमारं शीताभिरद्भिराश्वास्य जातकर्मणि कृते मधुसर्पिरनन्तासुवर्णचूर्णानिश्यनङ्गुल्याऽनामिकया लेहयेत्" (सु० शा० १० अ०) इति । अनन्तमूलचूर्णं सुवर्णचूर्णञ्च । भेषजरक्तिकेति—सामान्यभेषजग्रहणेन यत्यान्तरोक्तमपि योगचतुष्टयमत्र बोद्धव्यम । तद्यथा—"सौवर्णं सुक्ष्तं चूर्णं कुष्ठं मधु घृतं वचा । मत्स्याक्षकं शङ्खपुष्पी मधु सर्पिः सकाञ्चनम् ॥ अर्कपुष्पी घृतं क्षौद्रं चूर्णितं कनकं वचा । हैमचूर्णानि कैटर्य्यं लेह्या दूर्वा घृतं मधु ॥ चत्वारोऽभिहिता प्राशा श्लोकार्द्धेषु चतुष्वपि । कुमाराणां वपुर्मेधाबलबुद्धिविवर्द्धना ॥" (सु० शा० १० अ०) इति । एके प्राक्तनीं मात्रामनिच्छन्ति, तन्मते तु विंशतिगुञ्जा मात्रा प्रचरति । तद्यथा—'विडङ्गफलमात्रन्तु जातमात्रस्य भेषजम् । एतेनैव प्रमाणेन मासि मासि प्रवर्द्धितम ॥ कोलास्थिमात्रं चीराद्यं दद्याद्भैषज्यकोविदः । चीरान्नादे कोलमात्रमन्नादे (ऽ) ङ्गुष्ठरोपमम ॥" इति । अवलेहीकृतैकैवेत्यादि—एकैव रक्तिका अवलेहीकृता, कैः कृतेत्याह, चीरचौद्रसिताघृतैरिति—एतेन चीरादिभिर्व्यस्तैर्यथायोग्यं सम्पाद्यावचारयेदित्यभिप्रायः । चौद्रं स्त्रीसम्भवम् अज वा । घृतमत्र गव्यम् । अथ भेषजस्यास्य रक्तिकासंख्यामाह, वर्द्धयेत्तावदेकैकामित्यादि ।—सा भेषजरक्तिका तावदेकैका वर्द्धयेत् यावत वत्सरो भवति, एतेन प्रतिमासवृद्धा, द्वादशमासेषु द्वादशैव रक्तिका भवन्तीत्यर्थः । अत्यदमाह, तदूर्द्धमिति—वत्सरादुपरि तावन्माषकैर्वृद्धिर्यावत षोडशवत्सरं स्यात्, एतेन प्रतिवर्षवृद्धा षोडशमाषका भवन्तीत्यर्थः । माषोऽत्र मागधपरिभाषोक्त षड्गुञ्जापरिमित । तत इति —षोडशवर्षादुपरि तावत् स्थिरा भवेत् यावत् सप्तति वर्षाणि भवन्ति । स्थिरेति

बाले अञ्जनादीनामपि कर्त्तव्यतानिर्देश ।—

अञ्जनञ्च तथा लेप स्नानमभ्यङ्गकर्म च ।
वमन प्रतिमर्शञ्च जन्मप्रभृति शस्यते ॥१७॥

बाले कवलादीना कालनिर्देश ।—

कवल: पञ्चमाद्वर्षादष्टमान्नस्यकर्म च ।
विरेक षोडशात् वर्षात् विंशतेश्चैव मैथुनम् ॥१८॥

—षोडशमासिका न तु वृद्धि । तत इति—सप्ततेरूर्ध्वं सैव मात्रा बालकवच्छनै शनैः ह्रासनीया, तेन सा मात्रा यथैव पूर्वं वर्द्धिता तथैवापकर्षणीया इत्यभिप्राय । अत एव बालवृद्धयो साम्यक्रिया कार्य्येति न तु सर्वेषाम् । कल्कचूर्णादीनामियमेव मात्रा सम्मता किमुतान्या वा ? तदाह, मात्रेयमित्यादि ।—इय पूर्वोक्ता मात्रा कल्कचूर्णाना तद्योगानाञ्च, कषायाणा चतुर्गुणा विज्ञेया । एतेन किमुक्तम् ? रक्तिपरिमाणे चतस्र राक्तिका कार्य्या, माषकपरिमाणे चतुर्माषक इति ॥१४—१६॥

इदानी तस्य बालकस्याञ्जनादिक कर्म निदर्शयन्नाह, अञ्जनमिति ।—बालकस्याञ्जनादि प्रतिमर्शपर्य्यन्त जन्मप्रभृतीव शस्यते, जन्मदिनादारभ्य यत यत्र विहितं तत तत्र कुर्य्यादिति भाव । अञ्जन सौवीराञ्जनादिक, लेप उद्वर्त्तनप्रभृतिक, स्नान परिषेक, अभ्यङ्ग अभ्यञ्जन, वमन वान्ति, प्रतिमर्शन बृहणम् * इति ॥१७॥

अपराण्याह, कवल इत्यादि ।—कवलो गण्डूषभेद, स तु पञ्चमात वर्षादुपरि कार्य्य न तु तदवाक् । नस्यकर्मेति—नासाया यद्दीयते तन्नस्यमिति, तस्य कर्म क्रिया, चतुर्थे (?), † तच्चाष्टमात वर्षादुपरि कार्य्यं, षोडशवर्षादुपरि विरेको देय, विशेषेण रेको विरेक इत्यनेन अपूर्णवीर्यस्य कोष्ठस्य रेचनस्य निषेध षोडशवर्षाभ्यन्तरे भवति, न तु मृदुरेचनस्य निषेध । तदुक्तम्— "अग्निचारविरेकैस्तु बालवृद्धौ विवर्जयेत् । तत्साध्येषु विकारेषु मृदौ कुर्यात् क्रिया शनै ॥" (सु० सू० २५ अ०) इति । विंशतेश्चैव मैथुनमिति—मैथुन स्त्रीपुरुषमयोगलक्षण, तच्च

---

* प्रतिमर्शनं बृहणं नस्य बोध्यमित्यर्थं । "प्रतिमर्श नस्यभेद मृदु न तु तीक्ष्णं, तीक्ष्णस्य अष्टमाब्दादभिधानात्" इति सू० टी० । "प्रतिमर्श स्नेहनस्यविशेष." इत्यन्ये टीकाकृत ।

† मन्ये, "चतुर्थे" इत्यत्र "चतुर्विंधम्" इति पाठो भविष्यति, पञ्चविधेषु नस्येषु प्रतिमर्शस्य पूर्वमुक्तत्वात् ।

वयोऽनुसारेण बाल्यादीनां ह्रासनिर्देश।—

बाल्यं वृद्धिस्त्वविर्मेधा त्वग्दृष्टि शुक्रविक्रमौ।
बुद्धिः कर्मेन्द्रियं चेतो जीवित दशती ह्रसेत् ॥१९॥

वातप्रकृते लक्षणम्।—

अल्पकेशः कृशो रूक्षो वाचालश्चलमानसः।
आकाशचारी स्वप्नेषु वातप्रकृतिको नरः ॥२०॥

विंशतिवर्षादुपरि समानवीर्यत्व स्यादित्याह। तथा च—"पञ्चविंशे ततो वर्षे पुमान् नारी तु षोडशे। समत्वागतवीर्यौ तौ जानीयात कुशलो भिषक ॥" (सु० सू० ३५ अ०) इति ॥१८॥

अथ बाल्यप्रभृतीनां जीवितावसानानां वर्षसङ्ख्यां ह्रासत्वमाह, बाल्यमिति।—तत् बाल्यप्रभृतिक दशत इति—दशवर्षादुपरि ह्रसेत् हानि प्राप्नोतीत्यर्थ। एतेन किमुक्तम्? दशवर्षादुपरि बाल्यावस्था, विंशतिवर्षादुपरि वृद्धिर्वर्द्धन, त्रिंशद्वर्षादुपरि त्वचि शरीरे, चत्वारिंशद्वर्षादुपरि मेधा, मेधा तु ग्रन्थाकर्षणसामर्थ्यरूपा, पञ्चाशद्वर्षादुपरि त्वक्, सा शैथिल्यरूपा भवतीति भाव, षष्टिवर्षादुपरि दृष्टि, सप्ततिवर्षादुपरि शुक्रम्, अशीतिवर्षादुपरि विक्रम, तच्च साहसादिरूप पराक्रमसञ्ज्ञ, नवतिवर्षादुपरि बुद्धि, शतवर्षादुपरि कर्मेन्द्रिय, दशाधिकशतवर्षादुपरि चेतश्चेतनास्थान, विंशत्यधिकशतवर्षादुपरि जीवित प्राणमिति। तेन विंशत्यधिकशत परमायुर्मनुष्याणा भवतीति तात्पर्यार्थ। तदुक्त—"समा षष्टिर्हिमा मनुजकरिणा पञ्च च निशा, हयाना द्वात्रिंशत खरकरभयो पञ्चकमिति। रिपा सत्यायुर्वृषभहरिणयोर्दशैव शुन स्यृतं छागादीना दशकसहित षट् च परमम् ॥" ॥१९॥

इदानी प्रकृतिलक्षणमाह, अल्पेत्यादि।—वातप्रकृतिको नर * दुष्टश्री भवति, कीदृशस्तमाह, अल्पकेश इति—तुच्छकेश, अदीर्घकेश इत्यर्थ, यतो वातस्यातिरौक्ष्यत्वेन त्वक्पारुष्यादल्पकेशत्वम। पुन कीदृश? कृशो दुर्बल वातस्य शोषकत्वात। रूक्ष रूक्षगुणत्वादस्निग्ध। वाचाल इति—प्रवचनशील। चलमानस इति—चञ्चलचित्त, वातस्य चलगुणत्वात्। स्वप्नेष्वपि आकाशचारी भवतीति यथा वायुराकाशे चरतीति स्वभावात्। प्रकृतिस्तु स्वभाव एवेत्याहुराचार्या यत,—

---

* "नरशब्दोऽत्र सामान्यमनुष्यवाचक स्त्रीपुविषय, यत. स्त्रीणा भिन्ना प्रकृतिर्नोक्ता" इति गु० दी०।

पित्तप्रकृते लक्षणम्।—

अकालपलितैर्व्याप्तो धीमान् स्वेदी च रोषणः।
स्वप्नेषु ज्योतिषा दृष्टा पित्तप्रकृतिको नरः॥२१॥

श्लेष्मप्रकृते लक्षणम्।—

गम्भीरबुद्धि. स्थूलाङ्ग स्निग्धकेशो महाबलः।
स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः॥२२॥

"शुक्रशोणितसंयोगे यो भवेद्दोष उत्कट। प्रकृतिर्जायते तेन तस्या मे लक्षणं शृणु॥" (सु० शा० ४ अ०) इति॥२०॥

अथ पित्तप्रकृतिमाह, अकालपलितैरिति।—पित्तप्रकृतिको नर ईदृशो भवति, कौदृशस्तमाह, अकालपलितैर्व्याप्त इति—अकाले असमये पलितैर्वार्द्धक्यैर्व्याप्त, पित्तस्योष्मगुणत्वात्*। तदुक्तं—"क्रोधशोकश्रमकृत शरीरोष्मा शिरोगत। पित्तञ्च केशान् पचति पलित तेन जायते॥" (सु० नि० १३ अ०) इति। पुन कौदृश? धीमान् बुद्धिमान् सत्त्वगुणबाहुल्यात्। स्वेदीति—प्रस्वेदयुक्त, पित्तस्योष्मणत्वात् द्रवगुणत्वाच्च। रोषण इति—रोषयुक्त पित्तस्य तीक्ष्णत्वात्। स्वप्नेष्वपि ज्योतिषामग्न्यादीना तारकादीनाञ्च द्रष्टा अवलोकक यत तत पित्तमुष्णमुक्त तद्गुणत्वात्॥२१॥

अथ कफप्रकृतिको नर ईदृशो भवति, कौदृशस्तमाह, गम्भीरबुद्धिरिति।—गम्भीरबुद्धि गम्भीरा अतलस्पर्शा बुद्धिर्यस्य स तथा सर्वकार्यक्षमा†, कफस्य तमोगुणाधिकत्वात्। स्थूलाङ्ग स्थूलशरीर, मेदोऽधिकत्वात्, यत कफस्तु मेदोऽङ्गेर्मूल एव। स्निग्धकेश इति—तस्य स्नेहगुणत्वात्। महाबल इति—ओजसा शरीरे कर्मसामर्थ्य, यत,—"धातूना यत पर तेजस्तत खलु ओजस्तदेव बलमित्युच्यते"

---

* ऊष्मगुणत्वात् ऊष्मणो य गुण, तद्वत्त्वादित्यर्थ, न तु ऊष्म एव गुण ऊष्मगुण इति व्याख्या। तथा च डल्हण,—"क्रोधादिकृतेन शरीरोष्मणा शिरोगतेन वैकृतपित्तेन पुन प्राकृत पक्षितम्, अन्यथा पित्तोष्मणोरभेदात पुनरुक्तिदोष स्यात। पञ्जिकाकारस्तु—शरीरोष्मा पावक पित्त तदाश्रय, एतौ पित्तपावकौ एकीभूय केशान् पचेत, एतेन केवलोष्मकृतस्य विकृतस्य दोषप्रसङ्गो निराकृत इति मन्यते" इति।

† "अचञ्चलबुद्धि." इति गृ० दी०।

द्वन्द्वसन्निपातप्रकृतीनां लक्षणम्।—

ज्ञातव्या मिश्रविश्लेषैः द्वित्रिदोषोल्बणा नराः ॥२३॥

वयसः प्रकृतेश्च वैविध्यनिर्देशः।—

* (कौमारं यौवनं वार्द्धं प्राणिनां त्रिविधं वयः।
कफपित्तानिलप्रायं क्रमतः प्रकृतिस्त्रिधा ॥

वयोऽनुसारेण बाल्यादीनां सीमानिर्देशः।—

आषोडशात् भवेद्बालो वर्षात् क्षीरान्नवर्द्धितः।
मध्यमः सप्ततिर्यावत्तदूर्द्धं वृद्ध उच्यते ॥)

निद्रामूर्च्छाभ्रान्तितन्द्राणां दोषनिर्देशः।—

तमःकफाभ्यां निद्रा स्यान्मूर्च्छा पित्ततमोभवा।
रजःपित्तानिलैर्भ्रान्तिस्तन्द्रा श्लेष्मतमोऽनिलैः ॥२४॥

(सु० सू० १५ अ०) अत एव कफवाहुल्याच्छुक्लं गुणायत्तं बलमिति वचनम्। स्वप्नं जलाशयालोकौति—जलाशय नदीनदतडागादिकं कफस्य सौम्यगुणत्वात् ॥२२॥

इदानीं द्विदोषजत्रिदोषजप्रकृतेर्लक्षणानि दर्शयन्नाह, ज्ञातव्या इति।—मिश्रविश्लेषैर्मिलितलक्षणैः ज्ञात्वा द्वित्रिदोषोल्बणा नरा बोद्धव्याः, तेन पूर्वोक्तयोर्दोषयोर्मिलितलक्षणैर्द्विदोषजा प्रकृतिः ज्ञेया इत्यभिप्रायः, त्रयाणां दोषाणां मिलितलक्षणैस्त्रिदोषजा प्रकृतिरवगन्तव्येति ॥२३॥

अधुना शरीरप्रसङ्गेन निद्रादीनामपि विशेषोत्पत्तिमाह, तम इति।—निद्रा स्वप्नः, सा तमःकफाभ्यां स्यात् तमोगुणकफसंसर्गेण भवतीत्यर्थः। पित्ततमोभवा मूर्च्छा, मूर्च्छा च रूपादिविज्ञानमोहसञ्जनकम् अचेतनत्वमेत्यर्थः। यद्यपि वातादिभिस्त्रिभिर्दोषैः शोणितेन मद्येन विषेण च मूर्च्छा अभिमता तथाऽपि तस्याः पित्तप्रधानत्वेन दर्शितत्वात्। तदुक्तम्—"वातादिभिः शोणितेन मद्येन च विषेण च। षट्स्वप्येतासु पित्तन्तु प्रभुत्वेनावतिष्ठते ॥" (सु० उ० ४६ अ०) इति। रजःपित्तानिलैः ज्ञात्वा भ्रान्तिः भ्रमः, तदुक्तम्—"योऽनायासः श्रमो देहे प्रबुद्धः श्वासवर्जितः। भ्रमः स इति विज्ञेयः इन्द्रियार्थप्रबाधकः †॥" इति। श्लेष्मतमोऽनिलैः

* प्रक्षिप्ताविमौ इति केषाञ्चिन्मतम्।

† लक्षणमिदं भ्रमस्य, न तु भ्रमस्य, यदुक्तम्—"योऽनायासः श्रमो देहे प्रबुद्धः श्वासवर्जितः। भ्रमः स इति विज्ञेयः इन्द्रियार्थप्रबाधकः॥" (सु० शा० ४ अ०) इति। अत्र चास्य समुद्देशः, अप्रासङ्गिकः, प्रासादिकस्य।

ग्लानेरालस्यस्य च लक्षणम्।—

ग्लानिरोज क्षयाद् दुःखादजीर्णाच्च श्रमाद्भवेत्।
यः सामर्थ्येऽप्यनुत्साहस्तदालस्यमुदीर्यते ॥२५॥

जृम्भाया लक्षणम्।—

चैतन्यशिथिलत्वात् यः पीत्वैकं श्वासमुद्गिरेत्।
विदीर्णवदनः श्वासं जृम्भा सा कथ्यते बुधैः ॥२६॥

क्लत्वा तन्द्रा स्यात्, तन्द्रा निद्राक्षम, तदुक्तम—"इन्द्रियार्थेष्वसम्प्राप्तिर्गौरव जृम्भणं क्लम। निद्रार्त्तस्येव यस्येहा तस्य तन्द्रा विनिर्दिशेत ॥" (सु० शा० ४ अ०) इति ॥२४॥

अथ ग्लानिमाह, ग्लानिरिति।—ग्लानिस्तु क्लमापरपर्यायवाचको हर्षक्षय इत्यर्थः। स च कारणचतुष्टयाद्भवति। किं तत कारणचतुष्टयम्? ओज क्षयादित्यादि।—ओज शुक्रम्, अग्नीषधातुधामाभिश्चाब्दतमोज इत्येके, तस्य क्षयात बलक्षयादिति स्पष्टार्थ। दुःखादिति—मानसोद्वेगादिकमण। तच्च दुःख विविधमिति सुश्रुत,—"आध्यात्मिकमाधिदैविकमाधिभौतिकम" (सु० सू० २४ अ०) इति। एषां विवरण न लिखितमत्र विस्तरभयात। अजीर्णादिति—अपारपक्वान्नरूपात। एतदपि विविध चतुर्विध वा। विविधमन्नज विष्टब्धादिसज्ञ चतुर्थं रसशेषमिति। श्रमादिति—शरीरायासजननकर्मण, स च व्यायामापरपर्यायवाचकशब्देन कथित, "शरीरायासजनन कर्म व्यायाम उच्यते" इति। ग्लानिलक्षणन्तु प्रसङ्गात्तल्लक्षणोक्त—"वक्त्रे मधुरता तन्द्रा हृदयोद्वेष्टन क्लम। न चान्नमभिकाङ्क्षेत ग्लानि तस्य विनिर्दिशेत ॥" (सु० शा० ४ अ०) इति। प्रसङ्गात तल्लक्षणोक्त क्लमलक्षण यथा—"यो ऽनायासः श्रमो दृष्टे प्रवृद्ध श्वासवर्जितः। क्लम स इति विज्ञेय इन्द्रियाग्रबाधक ॥" (सु० शा० ४ अ०) इति। अथाऽऽलस्यमाह, य इति।—सामर्थ्ये कर्मणि सामर्थ्ये सत्यपि योऽनुत्साहोऽप्रहर्ष स आलस्यशब्देन वाच्य। लक्षणमप्युक्त यथा—"सुखस्यार्थप्रसक्तित्वं दुःखद्वेषणशीलता। अक्तस्य चाप्यनुत्साह कर्मस्वालस्यमुच्यते ॥" (सु० शा० ४ अ०) इति ॥२५॥

इदानीं जृम्भालक्षणमप्याह, चैतन्येति।—पुरुषस्यैतन्यशिथिलत्वात् चैतन्यशिथिलीभावात, चैतन्यस्य ज्ञानलक्षणस्य शिथिलीभाव किञ्चिन्नूनतामनुभूय इव स्थित सन् विदीर्णवदनो व्यक्तमुखो भूत्वा एक श्वासमूर्द्धगत पीत्वा अपरं श्वासमधोगत यदुद्गिरेत् त्यजेत, सा बुधै पण्डितै सुश्रुतादिभिर्जृम्भा इति कथ्यते।

क्षवस्य लक्षणम्।—

उदानप्राणयोरूर्ध्वयोगान्मौलिकफस्रवात्।
शब्दः सञ्जायते तेन क्षुत तत् कथ्यते बुधैः॥ २७॥

उद्गारस्य लक्षणम्।

उदानकोपादाहार-स्रस्थितत्वाच्च यद्भवेत्।
पवनस्योर्ध्वगमनं तमुद्गार प्रचक्षते॥ २८॥

इति श्रीहालोदरसूनुना श्रीआर्द्धरेण विरचितायां आर्द्धरसंहितायां शारीरे आहारादिगतिर्नाम षष्ठोऽध्याय॥६॥

जृम्भाकाले उद्वेष्टनं नेत्राश्रुस्रवणञ्च वीक्ष्य, यदुक्तं सुश्रुतेन—"पौत्तैकमनिलोच्छ्वास-मुद्वेष्टन् विहतानन। यन्मुञ्चति सनेत्राक्ष स जृम्भ इति संज्ञित॥" (सु० शा० ४ अ०) चित्तस्य विषयान्तरव्यासक्तिविनिवृत्तये जृम्भाकाले क्षोटिकादान लौकिकं सिद्ध, वचन हि—"क्षुत्पतनजृम्भासु जीव तिष्ठाङ्गुलिध्वनि" इति॥२६॥

अथ क्षिक्कालक्षण दर्शयन्नाह, उदानेति।—य उदानप्राणयोरूर्ध्वयोगात मूर्द्धि स्रोत पथस्थितात् कफस्रवाच्च य शब्द सञ्जायते उत्पद्यते तेन शब्देन बुधै तत् क्षुत क्षिक्का कथ्यते। "तेन" इति स्थाने "नस्य" इति पठन्त्येके, तत्र—नस्यो नासात। अन्यत्रापुक्त—"प्राणोदानौ च तौ स्याता मूर्द्धि स्रोत पथस्थितौ। नस्य प्रवर्त्तते शब्द क्षुत तदभिनिर्दिशेत्॥" इति॥२७॥

अथोद्गारमाह, उदानकोपादिति।—आहारस्रस्थितत्वाच्चेति—आहारोऽग्न तस्य स्रस्थाने यदा स्थितिर्भवति तस्मादित्यर्थ, पवनस्य वायोर्यदूर्ध्वगमन भवेत् तमुद्गार प्रचक्षते इति। उदानवायोरेव प्रकोप, प्रकोपादेव तस्यैवोर्ध्वगमनमित्याचक्षते। सुश्रुतवायोरूर्ध्वगमनमित्येके॥२८॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां आर्द्धर-दीपिकायां प्रथमखण्डे आहारादिगतिर्नाम षष्ठोऽध्याय॥६॥

इति शारीरस्थानम्।

अथ सप्तमोऽध्यायः ।

अथ रोगगणनाध्यायः ।

रोगगणनाया प्रतिज्ञा ।—

रोगाणां गणना पूर्वं मुनिभिर्या प्रकीर्त्तिता ।
मयाऽत्र प्रोच्यते सैव तद्भेदा बहवो मताः ॥१॥

पञ्चविंशतिज्वराणां विवरणम् ।—

पञ्चविंशतिरुद्दिष्टा ज्वरास्तद्भेद उच्यते ।
पृथग्दोषैस्त्रयो द्वन्द्व भेदेन त्रिविधः स्मृत ॥२॥

पूर्वमुक्त रोगाणा गणना चेति, अतस्तामपि दर्शयन्नाह, रोगाणामिति ।—मुनिभिस्त्रैकालिकज्ञानदर्शिभि रोगाणा ज्वरादीना गणना सङ्ख्याकरण पूर्वमादौ या प्रकीर्त्तिता कथिता सैव गणना मया, आचार्येणेति शेष, अवास्मिन् ग्रन्थे प्रोच्यते कथ्यते । तद्भेदा रोगभेदा बहवो मता कथिता, अत्रापि मुनिभिरिति शेष । रोगज्ञेन रोगाणा सङ्ख्यामावश्यक यावज्ज्ञ नान्यदित्यभिप्राय । सङ्ख्यामावश्यमपि प्रयोजनार्थं, निदानादिपञ्चक रोगज्ञापक दर्शित, तच सम्प्राप्तिषु कथिता, तस्मा. सङ्ख्या पर्य्यायनामेति * । तदुक्त—"सङ्ख्याविकल्पप्राधान्यबलकालविशेषत । सा भिद्यते यथाऽत्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति ॥" (वा० नि० १ अ०) इति न्यायात् सङ्ख्यामावश्यमपि नात्र निरर्थकम् ॥१॥

इदानी सङ्ख्यामाव प्रकटयन्नाह, पञ्चविंशतिरिति ।—ज्वरा पञ्चविंशतिरुद्दिष्टाः कथिता । पञ्चविंशतिरेवात्र हेतु ज्वरैरेव दर्शिता । सन्तापलक्षणो ज्वर इति । तदुक्त—"क्रोधात पित्तमेवाग्निदूषा ज्वर" इति । अत एवाह माधवकरेण —"दत्वापनानसक्लुद्धरुद्धनिश्वाससम्भव । ज्वरोऽष्टधा पृथग्द्वन्द्वसङ्घाताऽऽगन्तुज. स्मृत ॥" (रो० वि० ज्वर०) इति । अष्टप्रकारस्यैव पञ्चविंशतिभेदा दर्शिता । अथ पञ्चविंशतिविवरणमाह, पृथग्दोषैरित्यादि ।—पृथग्दोषे कृत्वा त्रयो भेदा. तेन वातेन पित्तेन कफेनेत्यर्थ । द्वन्द्वभेदेनापि त्रिविध, द्वन्द्वभेदेन द्विदोषसंसर्गेण, तेन वातपित्ताभ्या, वातश्लेष्माभ्या, श्लेष्मपित्ताभ्यामिति ।

---

* सङ्ख्या न सम्प्राप्ते पर्य्याय., किन्तु भेदविशेष ।

एकश्च सन्निपातेन तस्येदा बहव स्मृताः।
प्रायश्च सन्निपातेन पञ्च स्युर्विषमज्वरा. ॥३॥
सन्ततः सततश्चैव अन्येद्युष्कस्तृतीयकः।
चातुर्थकश्च पञ्चैते कीर्त्तिता विषमज्वराः ॥४॥
तथाऽऽगन्तुज्वरोऽप्येकस्त्रयोदशविधो मतः।
अभिचारग्रहावेश-शापैरागन्तुकस्त्रिधा ॥ ५ ॥
श्रमाच्छेदात् क्षताद्दाहाच्चतुर्धाऽऽघातजो ज्वरः।
कामाद्भीतेः शुचो रोषाद्विषादोषधिगन्धत ॥
अभिषङ्गज्वराः षट् स्युरेवं ज्वरविनिश्चय ॥६॥

एको भेदस्तु सन्निपातेन लिखितदोषत्रयेण भवति। तस्येदा बहव स्मृता इति—तस्य सन्निपातस्य ज्वरस्य बहवो भेदास्त्रयोदशविधा स्मृता कथिता। ते तु नात्र गणिता, यतो सान्निपातज्वर एक एव निदानद्वारेण पूर्वाचार्यैर्दर्शित। भेदास्तु दोषाणा हीनमध्याधिकभावेन कथिता। तथा हि—"द्वन्द्वजेकोल्बणे षट् स्युर्हीनमध्याधिकैश्च षट्। समैस्त्रैको विकाराख्ये सान्निपातान्त्रयोदश॥" (च० सू० त्रिंशत्त्रिशत्तमीय०) इति पञ्च विषमज्वरास्तु सन्निपातेनैव स्यु, यदुक्त—"ज्वराश्च विषमा सर्वे सन्निपातसमुद्भवा" इति वचनात्। ते च—"सन्तत सततोऽन्येद्युष्कतृतीयकचतुर्थकौ" (च० चि० ज्वर०) इति। एके "चत्वार सन्तत हित्वा ज्ञेयास्ते विषमज्वरा" (खरनाद) इति वदन्ति, तन्मते तु विवाद सविस्तर, (१) तन्नात्र लिखित विस्तरभयात यतस्तत्रैवोक्तज्ञातव्यमेव। आगन्तुकोऽप्येक, स च त्रयोदशविधो भिन्नहेतुत्वात, तद्-यथा—त्रयोऽभिचारादिजनिता, चत्वार आघातजा, षडभिषङ्गजाश्चेति। अभिचारादीनामपि व्याख्या लिख्यते यथा—अभिचारो मन्त्रादिभिर्मारणप्रयोग। ग्रहावेशो दुष्टग्रहावेश, भूतादीनाञ्च मन्त्रेणावेशो वा। शापो ब्राह्मणगुरुतपस्विदानं मनिष्टाभिशपनम। श्रम इति—शरीरायास जननव्यापारलक्षण कर्म, तत श्रमायासशब्देन वाच्यम। छेदोऽस्त्रप्रभृतिभि। क्षत प्रहार, स च लोष्टशस्त्रलगुडादिजनित। दाहोऽग्न्यादिसम्भव। कामोऽभिलाष, स चाभिमतकामिन्याद्यप्राप्तिनिमित्त। भीतिर्भय, सा च प्रभृतिनिमित्तादिका। शुक शोक, स च धनबन्धुनाशादिनिमित्त। रोष क्रोध, स तु परामिद्रोहादिलक्षण। विष स्थावरजङ्गमादिरूप, तज्जनित इत्थ। ओषधिगन्धत इव—तीव्रौषधिगन्ध-

षडतीसाराणां विवरणम्।—

पृथग्दोषैः समस्तैश्च शोकादामाङ्गयादपि।
अतीसारः सप्तधा स्यात्—" ॥७॥

ज्ञाणादिति भाव। एवमिति—अनेन प्रकारेण, ज्वरविनिश्चय कथित ज्वराणा विनिश्चयो ज्ञान, ज्वरसङ्ख्याया मेव ज्ञानमित्यर्थ, यत सङ्ख्याविकल्पेत्यादिना। ननु कथमादौ ज्वर एव प्रोक्तो नान्ये रोगा? सत्य, ज्वरस्तु सर्वेषा प्रधानतम, तदुक्त—'टिट्टिद्रियमनस्तापो सर्वरोगायजा बलो। ज्वर प्रधान रोगाणामुक्तो भगवता पुरा॥" (च० चि० ज्वर०) इति ॥ २—६ ॥

इदानीमतीसारादीना रोगाणा भेदान् दर्शयन्नाह, पृथमिति।—अतीसरतीत्यतीसारो गुटेन, स च सप्तप्रकारो भवति, तद्यथा, पृथक् दोषैरित्यादि—पृथक् दोषैरित्यनेन वातेन पित्तेन कफेन त्रय। समस्तैरिति—मिलितदोषत्रयेणैक। शोकादिति—इष्टादिवियोगनिमित्तात्। आमादपरिपक्वरसात आमाजीर्णाद्वा, अजीर्ण मपक्वञ्च वचादिना। भयाद्वौने। ननु साधवेन षड्विधोऽतीसार निगदित, यथा—"एकैकश सर्वशश्चापि दोषै शोकेनान्य षष्ठ आमेन चोक्त" (सु० उ० ४० अ०) इति तत कथमत्र सप्तविध इति? उच्यते, निदानन्तु नियतानियतभेदेन द्विविध, शोकाजीर्णादिभ्योऽपि कदाचिदतीसार उत्पद्यते, भयनिदानेनाप्यावश्यकम् (?) अतीसारो * भयतीत्यदोष, यतो दृश्यते हि सभयपुरुषस्य तत्क्षणमेव द्रवसरण

"भयजस्य सुश्रुते वातिकातिसारावरुद्धत्वात षड्विध, चरकमते भयजस्य लिखितत्वात अत्र सप्तविध कृत, अतो न दोष" इति गू० टी०। "ननु चरकादौ दोषरकैकशस्त्रय सन्निपातेनैक भयशोकजौ द्वौ एव षड्विध, अत्र त्वन्यथा इति कोऽभिप्राय? उच्यते, चरके भयशोकजौ लक्षणभज्ञाकाव्यभेदात् भिन्नावुक्तौ, आमजस्तु अन्नाजीर्णकृपितत्रिदोषजत्वेन सन्निपातेनावरुद्ध इति न सङ्ख्यातिरेक। सुश्रुते तु हेतुप्रत्यनीकचिकित्सार्थं शोकजामजौ पठितौ वातजत्वसान्नपातजत्वा-भेदऽपि, यथा वातादिजत्वाभेदऽपि स्नायुकाज पाण्डुरोग इति। एव भय शोकजावपि चरके हेतुप्रत्यनीकचिकित्सार्थं पृथक् पाठतौ, सुश्रुत भयज केवल-वातिके अवरुद्ध मानसत्वाविशेषाद्वा शोकजे अवरुद्ध इति ज्ञेयम्" इत्यादि व्याख्या-मनुकीर्ष। संहिताकारोऽय चरकसुश्रुतयोरुभयोरेव मतमवलम्ब्य सप्तविध, अतीसार इति कृतवान्।

पञ्चग्रहणीना विवरणम्।—

"—ग्रहणी पञ्चधा मता।
पृथग्दोषै. सन्निपातात्तथा चामेन पञ्चमी ॥८॥

चतुर्विधप्रवाहिकाणां विवरणम्।—

प्रवाहिका चतुर्धा स्यात् पृथग्दोषैस्तथाऽसृतः ॥९॥

चतुर्विधाजीर्णाना विवरणम्।—

अजीर्णं त्रिविधं प्रोक्तं विष्टब्ध वायुना मतम्।
पित्ताद्विदग्धं विज्ञेयं कफेनामं तदुच्यते॥
विषाजीर्णं रसादेकं—" ॥१०॥

गुदेनेति। तस्मादत्र निश्चतहेतुको नाम षष्ठमी भयात प्रतिपादित इत्यर्थ। इति षड्धा प्रतिपादित ॥७॥

ग्रहणी पञ्चधा मतेत्यादि।—ग्रहणी वह्निस्थान, तदाश्रितो दोष एव ग्रहणीशब्दवाच्य, कुत्रचित ग्रहणीदोष इत्युपदर्शनात्, तदुक्त—"षष्ठी पित्तधरा' नाम या कला परिकीर्त्तिता। पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्तिता॥" (सु० उ० ४० अ०) इति। ग्रहणात ग्रहणी मतेत्यपि, यत —"अन्त्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता" (च० चि० ग्रहणी०) इति। पञ्चधा पञ्चप्रकारा। तथा चामेन पञ्चभीति—आमेन आमवातेनेत्यर्थ ॥८॥

प्रवाहिका चतुर्द्धा स्यादित्यादि।—सशब्द कण्ठवलेन वायोरपानमार्गेण वह्निर्नि सारण प्रवाहिका। अस्या पर्य्यायनामानि तन्त्रान्तरप्रतिपादितानि, यथा—केचन विस्रंसीति नाम्ना कथयन्ति, एके चान्त्रग्रन्थिरिति केऽपि निस्सार, निवाहिकामित्यपरे। चतुर्द्धेति—वातपित्तकफे रक्तस्य। असृक रुधिरम्। ननु प्रवाहिकाऽतीसारयोः को भेद? यस्माद्द्रवसरणत्वेनामपक्वलक्षणयोगात साधर्म्यम्। उच्यते—नानाद्रवधातुसरणमतीसार, प्रवाहिकायान्तु केवल कफसरणमिति भेद ॥९॥

अथाजीर्णान्याह, अजीर्णमिति।—अजीर्णं त्रिविध प्रोक्तमिति—अजीर्णमित्यपरिपक्वान्नजनित, त्रिविधमिति वातादिभेदेन। एके "अजीर्णं विविध प्रोक्तम इत्यपि पठन्ति। तन्मतन्तु साधवेनोक्त यथा—"आम विदग्ध विष्टब्ध कफपित्तानिलैस्त्रिभि.। अजीर्णं केचिदिच्छन्ति चतुर्थं रसशेषत ॥" (सु० सू० ४६ अ०) "अजीर्णं पञ्चम

त्रिविधालसकाना विवरणम्।—

"—दोषे स्यादलसस्त्रिधा।

त्रिविधविसूचीना विवरणम्।—

विसूची त्रिविधा प्रोक्ता दोषैः सा स्यात् पृथक् पृथक् ॥११॥

केचिन्निर्दोष दिनपाकि च। वदन्ति षष्ठजाजीर्णं प्राकृत प्रतिवासरम॥" (वी० वि० अग्निमान्द्यादि०) इति। यत रसादिक्रमजीर्णं तत विषाजीर्णमत्र प्रतिपादित, विषवन्मारणात्मकत्वात रोगमङ्कुरकरमित्यर्थे। ननु आमाजीर्णादिभ्यो रसशेषस्य को भेद? उच्यते—आमादिवयमन्नज रसशेषस्तु आहाररसज ॥१०॥

दोषे स्यादलसस्त्रिधा इति।—दोषैर्वातादिभि अलस इति—विष्टब्धाजीर्णाङ्गवति, * तस्य च दोषभिरत्वनिमित्तादलसकसज्ञा, यदुक्त—"प्रयाति नौर्न नाधस्तादाहारो न विपच्यते। आमाशयेऽलसीभूतस्तेन चालसक स्मृत॥" (वा० सू० ८ अ०) इति। ननु विष्टब्धाजीर्णादलसकोत्पत्ति, यदुक्तम्—"अजीर्णमाम विष्टब्ध विदग्धञ्च यदीरितम्। विसूच्यलसकौ तस्माद्वेवेद्यापि विलम्बिका॥" (सु० उ० ५६ अ०) इति, विष्टब्धस्तु वातेनैव सम्भवति, कथमलसको वातादिभिस्त्रिभिर्दोषै स्यात्? नैष दोष, दोषकार्ये दोषान्तरप्रकोप एव, यथा सामान्यज्वरप्रकोपात् श्वासादुपद्रवा, अथवा—"एक प्रकुपितो दोष सर्वानेव प्रकोपयेत्" इत्यादिवचनात्। विसूची त्रिविधा प्रोक्तेति।—दोषैर्वातपित्तकफै, पृथक्पृथगिति—व्यस्ता दोषाणा तथा भेदा इत्यभिप्राय। सा विसूची त्वामाजीर्णाङ्गवति †। विशेषेण सूचीभिरिव मर्माणि पीडयति इति विसूची, तदुक्तं—"सूचीभिरिव गात्राणि तुदन् सन्तिष्ठतेऽनिल। यस्माजीर्णेन सा वैद्यैर्विसूचीति निगद्यते॥" (सु० उ० ५६ अ०) इति ॥११॥

---

* मतमिद मधुकोषविरुद्ध, तथा च—"आमविष्टब्धविदग्धेषु विसूच्यलसकविलम्बिका यथासङ्ख्य भवन्तीति कार्त्तिककुण्ड। तन्नेति वकुलकर:, यथासङ्ख्ये हि सति विदग्धे विलम्बिका प्राप्नोति, तत्र कफवाताभ्या पठिष्यति, तस्मात त्रिविधादजीर्णात् यथासम्भव विसूचाटीनामुत्पाद इति युक्तम्, उक्त हि—अजीर्णात पवनादीना विषमो बलवान् भवेत्" इति विजयरक्षित।

† एषाऽभ्युक्ति मधुकोषविरुद्धा।

एकविधदण्डकालसकस्य विवरणम्।—

दण्डकालसकश्चैकः—"

एकविधविलम्बिकाया विवरणम्।—

"—एकैव स्याद्विलम्बिका ॥१२॥

षडशीतेर्विवरणम्।—

अशींसि षड्विधान्याहुर्वातपित्तकफास्रतः।
सन्निपाताच्च संसर्गात्तेषां भेदो द्विधा मतः॥
सहजोत्तरजन्मभ्यां तथा शुष्काद्रभेदतः॥ १३॥

एको दण्डकालसक इति।—स चालसकभेदः, भिन्नलक्षणत्वेन पृथगुद्दर्शितः, तद्यथा—"तिर्यग्गतालसान् दोषान् दण्डवत् स्तम्भयन्ति ये। स दण्डालसकस्त्याज्यः शीघ्रं हेतुविनाशजः॥" इति। विलम्बिकाऽप्येका, सा विदग्धाजीर्णप्रभवा कथिता, * इयमपि विदोषजनितेत्युक्तत्वात्, यथा—"दुष्टस्तु भुक्तं कफमारुताभ्यां प्रवर्त्तते जोर्णमधस्य यस्य। विलम्बिका तां भृशदुःखितस्यामाचक्षते शास्त्रविदः पुराणाः॥" (सु० उ० ५६ अ०) इति। ननु विलम्बिकालसकयोरपि वातकफप्रबलयोरूर्द्ध्वाधोऽप्रवर्तनशीलयोश्शुल्यवात को भेदः? उच्यते—अलसके तीव्रा शूलादयो भवन्ति, विलम्बिकायां न भवन्तीति भेदः॥ १२॥

अर्शांसीति।—अरिवत् प्राणान् क्षणन्ति छिनन्ति इत्यर्शांसि अपाने मांसाङ्कुरकृपाणीत्यर्थः। षड्विधानीति—दोषभेदेन, तच्चासृतो रुधिरात्। यद्यपि तन्त्रान्तरे इन्द्रजानि प्रकृतिसमसमवायारब्धत्वात् पृथक् न गणितानि तथाऽपि दोषद्वयस्य निदानमेलने लक्षणमेलने च इन्द्रोल्बणानि इन्द्रजानि प्रतिपादितानि, तदुक्तं—'हेतुलक्षणसंसर्गात् विद्याद्वन्द्वोल्बणानि च। सर्वाणि हेतुलिङ्गाभ्यां सहजैर्लक्षणैः समम्॥" (च० चि० अर्श०) इति। इन्द्रोल्बणमिति यद्येन सर्वेषामर्शसां विदोषजत्वम्, अधिकेन तु व्यपदेश इति दर्शितम्, यदाह चरकः,—"अर्शांसि खलु जायन्ते नासन्निपतितैस्त्रिभिः। दोषैर्दोषविशेषात्तु विशेषः कथ्यतेऽर्शसाम्॥" (च० चि० अर्श०) इति। इन्द्रजाना-

---

* इदमपि मतं पूर्वपूर्ववत् विरुद्धम्। किञ्च "इयमपि विदोषजनिता" इत्युक्तिरपि समनन्तरमेव प्रमाणत्वेन प्रदर्शितश्लोके "कफमारुताभ्याम्" इत्युक्त्या विरुध्यते इति विद्वद्भिर्द्रष्टव्यम्।

त्रिविधचर्मकीलाना विवरणम्।—

त्रिधैव चर्मकीलानि वातात् पित्तात् कफादपि ॥ १४ ॥

मवैकभेदो नास्त्येकवचनत्वात्। तेषा भेदो द्विधा मत इति—तेषा षड्विधाना, द्विधेति—सहजोत्तरजन्मभ्या सूचित सह शरीरेण जातानि गुदवल्यारभ्यकवीर्य्य-भागस्थ दोषदूषितत्वात, कुलजानामित्यर्थ (१) *। उत्तरजन्मेति—जन्मोत्तरसम्बन्धी-न्यर्शांसि मिथ्याऽऽहारविहाराभ्यामुद्भूतैर्दोषैर्भवन्तीत्युत्तरजन्मानीत्यर्थ। माधवेन तु सहजार्श षड्विधसङ्ख्याया पठितमव, यदाह—"पृथग्दोषै समस्तैश्च शोणितात् सहजानि च। अर्शांसि षट्प्रकाराणि विद्याद्गुदवलिवये ॥" (रो० वि० अर्श०) इति। सहजार्शोभिन्नलक्षणोक्तत्वात प्रसङ्गतोऽपि सहजार्शसा लक्षणान्याह सुश्रुत,—"दर्शनानि परुषाणि पारुषाणि दारुणान्यन्तर्मुखानि च। तैरुपद्रुत क्षयोऽल्पमुक् शिरासन्ततगात्रोऽल्पप्रज शीर्णरेता चामस्वर क्रोधनोऽल्पाग्निर्म्रियतेऽचिरेण शिरोऽक्षिश्रवण-रोगवान् सततमन्त्रकूजाटोपहृदयोपलेपारोचकप्रभृतिभि पीड्यते" (सु० नि० २ अ०) इति सहजाना लक्षणम। शेषाणि तूत्तरजन्मशब्दवाच्यानि। न केवलं सहजोत्तरजन्मभ्या द्विधा, किन्तु शुष्कार्द्रभेदतोऽपि द्विधा भवन्ति, तेन तु गुदाङ्कुरा एके शुष्का स्रावरहिता भवन्ति अत्यनिलत्वात् एके आर्द्रा स्रावयुक्ता पित्तरक्तातिप्रकोपत्वात ॥१३॥

त्रिधैव चर्मकीलानीति।—गुदौष्ठ परित्यज्य कीलसदृशमग्र कुर्य्यात तत कीलक-मिति, तत्राग्रसामेवानग्रवत्वादसौ भेद (१), तदुक्त—"व्यानो गृहीत्वा श्लेष्माण करोत्यग्रस्थचो बहि। कीलोपम स्थिरखर चर्मकीलन्तु तद्विदु ॥" (वा० नि० ७ अ०) इत्यत्रापि त्वचो बहिरित्यनेन गुदौष्ठ व्यज्यते इति व्याख्यानयन्ति। स च गुदौष्ठ कियत्परिमाण इति विवक्षाया सुश्रुत —अङ्गुष्ठपर्व्वाङ्गुलपरिमाण गुदमिति, तस्यावयवभूतास्त्रिसो वलय उपर्य्युपरि व्यवस्थिता शङ्खावर्त्तनिभा प्रवाहणी विसर्जनी सवरणी चेति। तत्र गुदौष्ठ अर्द्धाङ्गुल सार्द्धयव, एकाङ्गुलीप्रमाणा प्रथमा वलि, द्वितीया सार्द्धैकाङ्गुली तृतीयाऽपि सार्द्धैकाङ्गुली, एवमङ्गुष्ठपर्व्वाङ्गुल-मिति †। भोजेऽप्युक्त—"रोमान्तेभ्यो यवार्द्धञ्च गुदौष्ठ परिचक्षते। गुदौष्ठादङ्गुलं चैव प्रथमा तां वलि विदु ॥ सार्द्धैकाङ्गुलमानेन अन्ये च परिकीर्त्तिते ॥" इति ॥१४॥

---

* कुलजानीत्यर्थ इति पाठ कथञ्चित सङ्गच्छते, परन्तु सहजानि इत्यस्य कुलजानि इत्यर्थ न समीचीन।

† नाय ग्रन्थो यथायथ सुश्रुते परिदृश्यते, दृश्यते च मधुकोषे।

एकविंशतिक्रिमीणां विवरणम्।—

एकविंशतिभेदेन क्रमयः स्युर्द्विधा च ते।
बाह्यास्तथाऽऽभ्यन्तराः स्युस्तेषु यूका बहिश्चराः॥ १५॥
लिख्यास्त्वन्येऽन्तरचराः कफान्ते हृदयादकाः।
अन्त्रादा उदरावेष्टाश्चुरवश्च महागुदाः॥१६॥
सुगन्धा दर्भकुसुमास्तथा रक्ताश्च मातरः।
सौरसा लोमविध्वंसा रोमद्वीपा उडुम्बराः॥ १७॥
केशादाश्च तथैवान्ये शङ्खज्ञाता मकेरुकाः।
लेलिहाश्च सशूलाश्च सौसुरादाः ककेरुकाः॥१८॥

एकविंशतिभेदेनेति।—क्रमयस्तु एकविंशतिभेदेन विख्याता, ते तु बाह्याभ्यन्तरभेदेन द्विधा भवन्ति। तेषु यूका बहिश्चरा इति—तेषु क्रमिसमूहेषु यूका लिख्याश्च बहिश्चरा बाह्या बहिःशरीरे जाता। अन्ये अवशिष्टास्तु अन्तरचरा, ज्ञातव्या इति शेषः। अन्तरे कोष्ठे चरन्तीति। ते चाष्टादशप्रकारा भवन्ति, तद्यथा—हृदयादकादिदर्भकुसुमान्ता सप्त। कफादिति—कफपायदोषजा। एतेषां स्वरूपमपि तत्रान्तरे प्रोक्तं—"पृथुवृत्तनिभा केचित् केचिच्चक्षुष्पदोपमाः। कठिनाश्चाकृतयश्चैव दीर्घाश्चैवाणवस्तथा॥ श्वेताश्चाताम्रवर्णाश्च नानात्वं सप्तधा तु ते॥" (वा० नि० १४ अ०) इति। तथा रक्ताश्चेति—षट् क्रमयो भवन्ति, ते च मातरप्रभृतिकेशादपर्यन्ताः। आकारादयश्चैते यथा—"रक्तवाहिशिराख्यानरक्तजा जन्तवोऽणवः। अपादा वृत्ततास्राश्च सौक्ष्म्यात् केचिददर्शनाः॥" (वा० नि० १४ अ०) इति। एते षड्भेदाः कण्ठैककारका विज्ञेयाः। तथाऽन्ये पञ्च क्रमयः शङ्खज्ञाता भवन्ति, शङ्खत पुरोभवम्, तदुक्तं—"पञ्चाग्र्ये पुरोगोत्था जायन्तेऽधो विसर्पिणः" (वा० नि० १४ अ०) इति। ते तु मकेरुकादिककेरुकान्ताः पञ्च। स्वरूपतो यथा—"पृथुवृत्ततनुश्यूला श्यावपीतसितासिताः" (वा० नि० १४ अ०) इति। इत्थमेकविंशतिक्रमयो व्याख्याताः *। ननु माधवेन विंशतिक्रमिभेदा दर्शिताः,

---

* एकविंशति क्रिमय इति टीकाकर्तुर्व्याख्या सर्वतन्त्रविरुद्धा, स्वस्यैव विकृतिविरुद्धा च, चरकसुश्रुतादिषु सर्वतन्त्रेष्वेव विंशतिविधा एव क्रिमय इति पाठः। टीकाकारोऽयमपि "तेषु यूकाः" इत्यादिना "मकेरुकादि-ककेरुकान्ताः पञ्च" इत्यन्तेन यद्विवरणं कृतं, तेनापि विंशतिरेवेति लभ्यते, न तु एकविंशतिरिति सुधीभिर्द्रष्टव्यम्।

तथाऽन्य कफरक्ताभ्या मज्ञात स्नायुक स्मृत।
व्रणस्य क्रमयस्वान्ये विषमा वाह्ययोनय: ॥ १९॥

पञ्चपाण्डूना विवरणम् ।—

पाण्डुरोगाश्च पञ्च स्युर्वातपित्तकफैस्त्रिधा।
त्रिदोषैर्मृत्तिकाभिश्च —" ॥२०॥

"नामतो विंशतिविधा" (वा० नि० १४ अ०) इत्यादिवचनात्, तत कथमत्रैक-विंशतिर्निगद्यते ? उच्यते—साधर्म्येण तु बाह्यगता क्रमयो द्विभेदा कथिता, तद्यथा —"तिलप्रमाणमध्यानवर्णा केशाम्बुराशया। बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामत ॥ द्विधा ते कोठपिडकाकण्डूगण्डान् प्रकुर्वते ॥" (वा० नि० १४ अ०) इति। अत्र तु विंश इति मज्ञावर्णभेदात् स्थानभेदाच्च पृथङ् न गणिता (?) इति न दोष। अन्य स्नायुकर्मज्ञ क्रमिरेव स तु कफरक्ताभ्या सज्ञात। ननु यद्येवं तर्हि द्वाविंशतिक्रमय कथ न गणिता ? सत्यम्—अयमपि कफजेषु सप्तसु क्रमिषु यो दीर्घास्येषा भेद एव, अत एव "कफरक्ताभ्या सज्ञात" इत्युक्तम्, यत "कफादामाशये जाता हृद्या सर्पन्ति सर्वत" (वा० नि० १४ अ०) इत्यादिवचनात्। स्नायुकवृद्धिलिंगेनैव भिन्नचिकित्सार्थदर्शनाच्च पृथक् गणितो न दोष ॥ १५—१९ ॥

पाण्डुरोगाश्चेति।—पाण्डुवर्णत्वेनोपलक्षितो रोग पाण्डुरोग इति रूढि। पञ्च स्युरिति—पञ्च प्रकारा भवन्ति। ते के ? वातपित्तकफे कृत्वा व्यस्तास्त्रयो भेदा। त्रिदोषैरिति—मिलितदोषत्रयेणैको भेद। मृत्तिकाभि इति—सहजेनैक, एवं पञ्च प्रकारा पाण्डुरोगभेदा बोद्धव्या। मृत्तिकाभि इति बहुवचनत्वेन बह्वी मृत्तिका दोषप्रकोपविशेषेण दर्शिता, तथा हि—"मृत्तिकाऽदनशीलस्य कृष्यत्यन्न-मलो मल। कषाया मारुत पित्तमूषरा मधुरा कफम॥ कोपयेन्मृद्रसादीश्च रौक्ष्याद्रूक्षत्व रुजेत्॥" (च० चि० पाण्डु०) इति। प्रसङ्गतश्च तत्स्वरूप सुश्रुतोक्तमाह—"या पीतवर्णा मधुरा कषाया क्षणा मधुक्षारगुणोपपन्ना। रक्ता च तिक्ता कटुका च नीला सिता च माधुर्यगुणा सहा स्यात्॥" * इत्युक्तत्वात ॥२०॥

* मुद्रितसुश्रुतग्रन्थेषु श्लोकोऽय न दृश्यते, चरकवाग्भटहारीतेष्वपि तथा।

एकैककामला कुम्भकामला-हलीमकाना विवरणम्।—

"—तथैका कामला मता।
स्यात् कुम्भ-कामला चैका तथैकञ्च हलीमकम् ॥२१॥

त्रिविधरक्तपित्तानां विवरणम्।—

रक्तपित्तं त्रिधा प्राक्तमूर्ध्वगं कफमध्यवम्।
अधोग मारुतात् ज्ञेयं तद्वयेन द्विमार्गगम् ॥२२॥

पञ्चकासाना विवरणम्।—

कासाः पञ्च समुद्दिष्टास्ते त्रयस्तु त्रिभिर्मलै.।
उर क्षताच्चतुर्थ. स्यात् क्षयाद्धातोश्च पञ्चमः ॥२३॥

तथैका कामला मतेति।—उपेक्षित पाण्डुरोग एव कामलायै भवति, तदुक्त—"पाण्डुरोगी च योऽत्यर्थं पित्तलानि निषेवते। तस्य पित्तमसृग्मांस दग्ध्वा रोगाय कल्पते॥" (च० चि० पाण्डु०) इति। रोगाय कामलात्वदुपायत्वमभिप्राय। स्यात कुम्भकामला चैकेति—कुम्भकामलाऽपि एका भवति, कामलाया अवस्थान्तर कुम्भकामलेत्युच्यते, यत,—"कालान्तरात् खरीभूता क्लेदा स्यात् कुम्भकामला" (च० चि० पाण्डु०) इत्यादिवचनात। एकञ्च हलीमकमिति—तदपि पाण्डुरोगावस्थायामेव भवति, तदुक्त—'यदा तु पाण्डोर्वर्ण स्याद्धरित: श्यावपीतक। बलोत्साहक्षयक्लान्द्रा मन्दाग्नित्व सदज्वर॥ स्त्रीष्वहर्षोऽङ्गमर्दश्च दाहस्तृष्णाऽरुचिस्तम। हलीमक तदा तस्य विद्यादानलपित्तत॥" (च० चि० पाण्डु०) इति॥ २१॥

रक्तपित्तमिति।—रक्तञ्च पित्तञ्चेति सुश्रुत। चरके तु—रागप्राप्त पित्त रक्तपित्तमित्युच्यते, यदुक्त—"रक्तस्थ पित्तमाख्यात रक्तपित्त मनीषिभि' (च० चि० रक्तपि०) इति। उभयत्रापि न कश्चिद्भेद। ऊर्ध्वगमिति—नासाक्ष्यक्षर्णाचिरन्ध्रेषु। अधोगामति—मेढ्योनिगुदमार्गेषु। तद्वयेन द्विमार्गगमिति—तद्वयेन कफवाताभ्या, द्विमार्गगमित्यूर्ध्व प्रवृत्तिपरम्। एके "तद्वयेन विमार्गगम्" इति पठन्ति, तत्र—रोमकूपेभ्योऽपि तत प्रवर्त्तते इति व्याख्यानयन्ति, तदुक्त—"कुपितं रोमकूपेभ्य सलक्लेदत प्रवर्त्तते" (वा० नि० ३ अ०) इति॥ २२॥

कासा इति।—कसन कास, "भिन्नस्वर कासति शुष्कमेव" (रो० वि० कास०) इति सुश्रुतवचनात्। तथा हि—"प्राणो ह्युदानानुगत प्रदुष्ट सन्भिन्नकांस्यस्वन-

पञ्चक्षयाणां विवरणम्।—

क्षयाः पञ्चैव विज्ञेयास्त्रिभिर्दोषैस्त्रयश्च ते।
चतुर्थः सन्निपातेन पञ्चमः स्यादुरःक्षतात् ॥२४॥

षट्शोषाणां विवरणम्।—

शोषाः स्युः षट्प्रकारेण स्त्रीप्रसङ्गात्क्षुचो व्रणात्।
अध्वश्रमाच्च व्यायामात् वार्द्धक्यादपि जायते ॥ २५ ॥

तुल्यघोषः। नरति वक्त्रात् सहसा सदाधो मनोषाभः कास इति प्रदिष्टः॥" (रो० वि० कास०) इति।* पञ्चेति—पञ्च प्रकाराः।' ते के प्रकाराः ? इत्यत आह, ते त्रयस्तु त्रिभिर्मलैरिति—ते कासा त्रिभिर्मलोल्बणैर्दोषैस्त्रय एव कथिताः। उरःक्षताच्चतुर्थः स्यादिति—उरसि प्रहार इव वेदनाविशेषादुरःक्षतकाससंज्ञः, तथा चोक्तम्—"अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः। क्षतस्योरःक्षतं वायुर्गृहीत्वा कासमावहत्॥ स पूर्वं कासते शुष्कं ततः श्लेष्मितसंज्ञितम्। कण्ठेन रुजताऽत्यर्थं विभिन्नेनेव चोरसा॥" (सु० उ० ५२ अ०) इति। क्षयाद्धातोश्च पञ्चम इति—धातवो रसाद्या तेषां क्षयान्नाशात्। एकैकधातोरित्येकवचनत्वेन शुक्रक्षयादिति व्याख्यानयन्ति, तत् प्रतिलोमानुलोमेन धातुत्रयं उक्तं न दोषः, तदुक्तम्—"अतिव्यवायिनो वाऽपि क्षीणे रेतस्यनन्तरा। क्षीयन्ते धातवः सर्वे ततः शुष्यति मानवः॥" (सु० उ० ४१ अ०) इत्यादिदर्शनात्॥ २३॥

क्षया इति।—उपेक्षितकासात् क्षयी भवतीति एके, "कासात् सञ्जायते क्षयः" (च० नि० यक्ष्मा०) इत्युक्तत्वात् कदाचित् क्षयत्वे, न तु नियतमेव। क्षयोऽपि राजयक्ष्मसंज्ञः कथ्यते, तदुक्तम्—"राजयक्ष्मसमो यक्ष्मादभूदस्ति किलानयः। तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनोषिणः॥" (सु० उ० ४१ अ०) इति। पञ्चम स्यादुरःक्षतादिति—उरःक्षतो रोगविशेषः सर्वत्र प्रतिपादितत्वात्॥ २४॥

शोषाः स्युः षट्प्रकारेणेति।—"शोषोऽपि क्षयभेदः स्यात्" इति वचनात्, यतः,—"शोषणाच्च रसादीनां शोषः इत्युच्यते बुधैः। क्रियाक्षयकरत्वाच्च क्षयः इत्यभिधीयते॥" इति। षट्प्रकाराः यथा, स्त्रीप्रसङ्गादिति—स्त्रीनिषेवणात्, अयं व्यवायशोषी कथितः। क्षुचः शोकात्, अयं शोकशोषी। व्रणादिति—शारीराऽऽगन्तुव्रणविशेषात्, यतः,—"रक्तक्षयादिदनाभिरक्षश्चैवाहारयन्त्रणात्। व्रणितस्य भवेच्छोषः स चासाध्यतमो

---

* "भिन्नस्वरः" इत्यादि श्लोकार्धं तथा "प्राणी हि" इत्यादि श्लोकश्च सुश्रुते स्वरूपतो न दृश्यते, दृश्यते च माधवनिदाने।

पञ्चश्वासाना विवरणम्।—

श्वासाश्च पञ्च विज्ञेया क्षुद्रः श्वात्तमकस्तथा।
ऊर्ध्वश्वासो महाश्वासश्छिन्नश्वासश्च पञ्चमः॥ २६॥

पञ्चहिक्काना विवरणम्।—

कथिता. पञ्च हिक्कास्तु तास्तु क्षुद्राऽन्नजा तथा।
गम्भीरा यमला चैव महती पञ्चमी स्मृता॥ २७॥

नत॥" (सु० उ० ४१ अ०) अध्वश्रमादिति—अतिमार्गगमनजनितश्रमाच्च, अध्वश्रमशीषी। व्यायामादिति—शरीरायासजननकर्मस्वरूपात्। ननु व्यायामाध्वश्रमयोरायासजननसाधर्म्यात् को भेद? उच्यते—व्यायामो यदा अकस्मादेवातिक्रियते तदैव भवति, मार्गगमनशीलत्वादेवाध्वशीष स्यात्, तदुक्तम्—"अध्वशीषी च सस्नाङ्ग सम्भृष्टपरुषच्छवि" (सु० उ० ४१ अ०) इत्यदोष। वार्द्धक्यादिति—जराभिव्याप्तशरीरत्वात्, अय जराशीषी कथित, तदुक्त—"जराशीषी क्षशी क्षुन्दुर्बोध्यबुद्धिबलेन्द्रिय" (सु० उ० ४१ अ०) इत्यादि॥ २५॥

श्वासाश्चेति।—श्वास इति—वेगवदूर्ध्वगतत्वम्, यत,—'श्वासश्च भस्त्रिकाधान समवातोर्ध्वगामिता" इति। पञ्चेति—पञ्चप्रकारा। ते के प्रकारा? इत्याह, क्षुद्र इत्यादि।—दुःखेनाङ्गप्रबाधकोऽल्पवातजनित क्षुद्रश्वासस्तत्र। प्रतिलोमेन वायुना यो वा शिरश्च सङ्कृत्य तीव्रवग करोति, स च तमसि निमग्न इव तिष्ठति, तेन तमःश्वास इति सज्ञा। यो दीर्घं श्वसिति ऊर्ध्वदृष्टिञ्च करोति इतस्ततो विधावतनेव स ऊर्ध्वश्वासार्दित कथित। य शब्दवान् दुःखित उच्चै श्वसिति प्रनष्टज्ञानविज्ञानो विशीर्णवाक् स महाश्वासपीडितोऽभिधित। यो विच्छिन्न श्वसिति सर्वप्राणेन पीडित आनाहस्वेदमूर्च्छात्त स छिन्नश्वासार्दित इति॥२६॥

हिक्कामाह, कथिता इति।—त्वरित प्राणहरत्वेन हिक्का कथिता, तदुक्त—"काम प्राणहरा रोगा बहवो न तु ते तथा। यथा श्वासश्च हिक्का च हरत प्राणमाशु च॥" (च० चि० हिक्काश्वा०) इति। हिक्काश्वरूपन्तु घोषवत्त्वेन प्रतिपादितम्, यत,—"मुहुर्मुहुर्वायुरुदेति सस्वनो यकृत्प्लीहान्त्राणि मुखादिवाक्षिपन्। स घोषवानाशु हिनस्त्यतून् यत. ततस्तु हिक्केत्यभिधीयते बुधै॥" (सु० उ० ५० अ०) इति। पञ्चेति—पञ्चप्रकारा। तान् प्रकारान् आह, क्षुद्रेति—या मन्दवेगा कृत्वा जठरमूलादेव प्रधावति सा क्षुद्रा नाम हिक्का कथिता। योऽतिप्रयुक्तपानान्ने पीडितो

चतुर्विधाग्निविकाराणां विवरणम्।—

चत्वारोऽग्नेर्विकाराः स्युर्विषमो वातसम्भवः।
तीक्ष्णः पित्तात् कफान्मन्दो भस्मको वातपित्तयोः॥ २८॥

पञ्चारोचकानां विवरणम्।—

पञ्चैवारोचका ज्ञेया वातपित्तकफैस्त्रिधा।
सन्निपाताच्चतुर्थात्—" ॥२९॥

मायुरुच्छ्वासागत्य हिक्कयति तामन्नजा विद्यात्। या घोरा गम्भीरनादिनी नाभिप्रभवा सा गम्भीरा ज्ञेया। या चिरेण यमलैर्वेगे कृत्वा प्रवर्त्तते शिरो ग्रीवाश्च कम्पयति सा यमला नाम कथिता। या सतत प्रवर्त्तते मर्माण्युत्पीडयन्तीव सर्वगात्रप्रकम्पिनी च सा महती नाम हिक्का कथिता॥ २७॥

चत्वार इति।—अग्निश्चात्र जठराग्निः तज्जनितो विकारश्चात्र कुपितदोषत्वाच्च, अत एव सन्नाग्निग्रहणं नात्र कृतं दोषसाम्यत्वात्, यतः,—"समाग्निः श्रेष्ठ उच्यते" (रो० वि० अग्निमा०) इति वचनात्। के ते चत्वारः? इत्याह, विषम इत्यादि—यो भुक्तमन्नं कदाचित् पचति कदाचिदाशु पचति स विषमः। यो मात्रातिमात्रमप्यन्नं सुखं पचति स तीक्ष्णः। य स्वल्पमप्यन्नं न पचति स मन्द इति। भस्मकस्तु तीव्राग्निसन्नः, स च वातपित्तजनितः, तदुक्तम्—"अतिप्रवृद्धः पवनान्वितोऽग्निः क्षणाद्रसं शोषयति प्रसह्य। भुक्तं क्षणाद्भस्म करोति यस्मात्तस्मादयं भस्मकसञ्ज्ञकस्तु॥" इति॥ २८॥

पञ्चैवेति।—अरोचकस्तु पञ्चायतनभिरेव विधा कथितः, तद्यथा—सत्यामपि बुभुक्षायामन्यव्यवहारासाम्यमित्यरुचिः, अभिलषितमप्यन्नं दीयमानं नाभ्यवहरतीत्यनन्नाभिनन्दनम्, अन्नस्य श्रवणस्मरणदर्शनगन्धास्यग्रहणैर्यो द्विजते स भक्तद्वेषः, एवं त्रिविधोऽपि रोगस्तरकसुश्रुताभ्यामरोचकशब्देन सङ्गृहीतः। वृद्धभोजनेन सञ्जातरागोऽपि दर्शनादि, कानि तानि? आह—"प्रक्षिप्तन्तु मुखे चान्नं जन्तोर्न स्वदते मुहुः। अरोचकं स विज्ञेयो भक्तद्वेषमतः शृणु॥ चिन्तयित्वा तु मनसा दृष्ट्वा श्रुत्वा च भोजनम्। द्वेषमायाति यो जन्तुर्भक्तद्वेषः स उच्यते॥ यस्य नाम्ने भवेत् श्रद्धा सोऽभक्तच्छन्द उच्यते। कुपितस्य भयार्त्तस्य यस्य भक्तनिराकृतः॥" इति॥ २९॥

सप्तच्छर्दीना विवरणम्।—

"—छर्दयः सप्तधा मताः।
त्रिभिर्दोषैः पृथक् तिस्रः क्रमिभिः सन्निपाततः॥
घृणया च तथा स्त्रीणां गर्भाधानाच्च जायते॥ ३०॥

षट्स्वरभेदाना विवरणम्।—

स्वरभेदाः षडेव स्युर्वातपित्तकफैस्त्रयः।
मेदसा सन्निपातेन क्षयात् षष्ठः प्रकीर्त्तितः॥३१॥

षट्तृष्णाना विवरणम्।—

तृष्णा च षड्विधा प्रोक्ता वातात् पित्तात् कफादपि।
त्रिदोषैरुपसर्गेण क्षयाद्धातोश्च षष्ठिका॥३२॥

छर्दिमाह, छर्दय इति।—छर्दिर्वमनविशेष। वेगे कृत्वा आननं छादयतीति छर्दिः, तदुक्तं—"छादयत्याननं वेगैरर्दयन्नङ्गमङ्गनै। निरुच्यते छर्दिरिति दोषो वक्त्रं प्रधावित॥" (सु० उ० ४९ अ०) इति। क्रमिभिरिति—क्रमिरोगजनिता, तथा चोक्तं—"गुल्महृल्लासबहुला क्रमिजा च विशेषतः। क्रमिहृद्रोगतुल्येन लक्षणेन च लक्षिता॥" (सु० उ० ४९ अ०) इति। सन्निपातत इति—मिलितदोषत्रयात्। घृणया चेति—घृणया कृत्वा छर्दिर्भवतीत्यभिप्राय, घृणा च पूत्यमेध्यादिगन्धास्वाद-नैकृत्यजते। घृणया चेति चकारात् बीभत्साद्यवलोकनाच्च भवतीति केचित्, तदुक्तं—"बीभत्सैर्हेतुभिश्चान्यैर्दुतमुत्क्लेशिती बलात्" (सु० उ० ४९ अ०) इति। तथा स्त्रीणां गर्भाधानाच्च जायते इति—गृहीतगर्भायां स्त्रियाश्छर्दिर्भवतीति, यत,—"नार्य्याश्चापन्नसत्त्वायास्तथाऽतिद्रुतमन्नत" (सु० उ० ४९ अ०) इत्यादिवचनात्॥३०॥

स्वरभेदा इति।—प्रकृतिरूपस्य स्वरस्यान्यथाभाव स्वरभेद, स च षड्विधो भवति, वातादिभि व्यक्तास्त्रयो भेदा, मेदसा मेदोऽङ्गैकको भेद, सन्निपातेन मिलितदोषत्रयेण चैक, क्षयात् क्षयरोगादेक, धातुक्षयादिति केचित्॥३१॥

तृष्णेति।—तृष्णा पानीयस्याभिलाषः, तदुक्तं—"सतत य पिबेद्वारि न तृप्तिमधिगच्छति। पुन काङ्क्षति यत्नेन त तृष्णार्तिमादिशेत्॥" (सु० उ० ४८ अ०) इति। त्रिदोषैरिति—मिलितदोषत्रयेण। उपसर्गागन्तुक, स च क्षतादिशब्दवाच्यत्वेन कथिता उपसर्गिका। क्षयाद्धातोरिति—रसादिधातुक्षयात्। चकारात् सप्तमी तु अक्तोऽहा इति मन्यन्ते केचित्, यदुक्तं—"स्निग्ध तथाऽन्न लवणञ्च भुक्त गुर्वन्नमेवाशु

चतुर्विधमूर्च्छाना विवरणम्।—

मूर्च्छा चतुर्विधा ज्ञेया वातपित्तकफैः पृथक्।
चतुर्थी सन्निपातेन—" ॥३३॥

एकैकभ्रम-निद्रा-तन्द्रा-सन्यास ग्लानीना विवरणम्।—

"—तथैकश्च भ्रमः स्मृतः।
निद्रा तन्द्रा च सन्यासो ग्लानिश्चैकैकशः स्मृतः॥ ३४॥

ऊषा करोति" (सु० उ० ४८ अ०)। अपरे लालसञ्ज्ञा वदन्ति, सा दोषजान्तर्गतेति अत्यनेन शार्ङ्गधरेण नात्र स्वीकृता इति ॥३२॥

मूर्च्छेति।—मूर्च्छा मोहसञ्ज्ञा विख्याता, यत,—"मोहो मूर्च्छेति तामाहु" (सु० उ० ४६ अ०) इत्यादि वचनात्। सा चतुर्विधा चतुःप्रकारा दोषभेदेन भवति। एको भ्रम स्मृत इति—भ्रमस्तु रज पित्तानिलाद्भवति, स तु चक्राऽढक्षेवाथसविति। निद्रादयश्चत्वार एकैकगणिता। निद्रेति—स्वपनम्, तथा हि—"यदा तु मनसि क्लान्ते कर्मात्मान क्लमान्विता। विषयेभ्यो निवर्त्तन्ते तदा स्वपिति मानव॥" (च० सू० अष्टौनिन्दितीय०) इति। तन्द्राऽपि निद्राभेद, कथ भिन्नत्वेन पठ्यते? उच्यते, निद्रायामिन्द्रियमनोमोह, तन्द्रायामिन्द्रियमोह इत्यत्र भेद, तदुक्तम्—"इन्द्रियार्थेष्वसम्प्राप्तिर्गौरव जृम्भण क्लम। निद्रार्त्तस्येव यस्येहा तस्य तन्द्रा विनिर्दिशेत्॥" (सु० शा० ४ अ०) इति। सन्यास इति—मूर्च्छादिभ्यो भिन्न एव, यत,—"वाग्देहमनसा चेष्टामाचिव्यातिबला नरा। सन्यस्यन्त्यबल जन्तु प्राणायतननाश्रिता॥ स ना सन्यासतस्यक्त काष्ठीभूतो यतोपम। प्राणैर्विमुच्यते शीघ्र मुक्त्वा सद्य फला क्रियाम्॥" (च० सू० विधिशोणितीय०) इति। ग्लानिरिति—* क्लमापरपर्य्यायसज्ञ, यदुक्त—"क्लमे मधुरता तन्द्रा हृदयोद्वेष्टन भ्रम। न चान्नमभिकाङ्क्षेत ग्लानि तस्य विनिर्दिशेत्॥" (सु० शा० ४ अ०) इति। स च हेतुचतुष्टयाद्भवति, "ग्लानिरोज क्षयाद्रु खादजीर्णाच्च श्रमादिवत्" इत्यादिवचनात्। ननु भावेन मूर्च्छा षड्विधा स्मृता, यथा—'वातादिभि शोणितेन मद्येन च विषेण च। षट्स्वप्यतासु पित्तन्तु प्रभुत्वेनावतिष्ठते॥" (सु० उ० ४६ अ०) इति,

---

* क्लम इति नामान्तर ग्लानेरायुर्वेदाप्रसिद्ध, ग्लानिक्लमयोर्भिन्नलक्षणत्वात्, लक्षणञ्च तयो, सौश्रुतशारीरे ४थाध्याये द्रष्टव्यम्। ग्लानिर्हर्षाभाव, इति तु टीकाकारा,।

सप्तमदाना विवरणम् ।—

मदाः सप्त समाख्याता वात-पित्त-कफैस्त्रयः ।
त्रिदोषैरसृजो मद्यात् विषादपि च सप्तम. ॥३५॥

चतुर्विधमदात्ययाना विवरणम् ।—

मदात्ययश्चतुर्धा स्यात् वातात् पित्तात् कफादपि ।
त्रिदोषैरपि विज्ञेय.—" ॥३६॥

एकैकपरमद पानाजीर्ण-पानविभ्रम-पानात्ययाना विवरणम् ।—

"—एक' परमदस्तथा ।
पानाजीर्णं तथा चैकं तथैक' पानविभ्रमः ॥
पानात्ययस्तथा चैको—" ॥३७॥

तत् कथमव चतुर्विधा ? सत्यम् , * पित्तप्रभुत्वेन श्रोणितस्य पित्तकार्थित्वात् मद्यविषयोश्च पित्तकोपत्वाच्च पित्तसम्भवायामव श्रोणितादीना मूर्च्छा ज्ञातव्येति न दोष , यत ,—"मूर्च्छा पित्ततम प्राया" (सु० शा० ४ अ०) इत्यादिवचनात् ॥३३।३४॥

मदा इति ।—चित्तविप्लुतिलक्षणो मद , यथा पूगटष्टकोटवभक्षणादौ चित्तऽनवस्थिति , तद्वत विद्यादिति । त्रिदोषैर्मिश्रितदोषत्रयै । असृज अतिरुधिरकोपात्, कोपोऽस्य पित्तवत् । एके असृज असृग्दरादिति व्याख्यानयन्ति , यत —"असृग्दरो भवेत् सर्व' साङ्गमर्द' सवेदन । तस्यातिवृत्तौ दौर्बल्य भमो मूर्च्छा मदस्तथा ॥" (सु० शा० २ अ०) इति । मद्यादिति—मद्यपानात, आसवारिष्टादीना पानेन मद्याभिसंज्ञो मद इत्यभिप्राय । विषादिति—विषभक्षणात् सर्पादिविषाक्रान्ताद्वापि ॥३५॥

मदात्यय, इत्यादि ।—यथोक्तविधिविपर्ययेण सेव्यमान मद्यं विकाराय भवति स विकारो मदात्ययशब्देन वाच्य , यत ,—'ये विषस्य गुणा प्रोक्तास्ते मद्येऽपि प्रतिष्ठिता । तेन मिथ्योपयुक्तेन भवत्युग्रो मदात्यय ॥" इति । त्रिदोषैरिति—मिश्रितदोषत्रयेण ॥३६॥

एक परमदस्तथेति ।—परमदादयश्चत्वारो मदात्ययभेदा उक्ता भिन्नलक्षणत्वात । तथेति यद्यपेन दोषत्रयाभेदभिन्ना (?) एतेऽपि बोद्धव्या । लक्षणान्यपि यथा—

---

* "पित्तप्रभुत्वेन—" इत्यादिग्रन्थस्थले पित्तस्य प्रभुत्वेन श्रोणितकोपस्य पित्तकार्थित्वात् मद्यविषयोश्च पित्तप्रकोपकत्वेन पित्तसम्भवाया श्रोणितादिजन्या इत्यादि पाठ. सङ्गत: ।

सप्तदाहाना विवरणम्।—

"—दाहा सप्त मतास्तथा।
रक्त-पित्तात्तथा रक्तात्तृष्णायाः पित्ततस्तथा॥
धातुक्षयान्मर्मघाताद्रक्तपूर्णोदरादपि॥ ३८॥

षडुन्मादाना विवरणम्।—

उन्मादा षट् समाख्यातास्त्रिभिर्दोषैस्त्रयश्च ते।
सन्निपाताद्विषात् क्षेयः षष्ठो दुःखेन चेतसः॥ ३९॥

"श्लेष्मोक्लेदोऽङ्गगुरुता विरसास्यता च विस्रंसनाक्षरथ तन्द्रिररोचकश्च। लिङ्गं परस्य तु वदन्ति तज्ज्ञास्तृष्णा दृजा शिरसि सन्धिषु चापि भेदः॥ आध्मानमुद्गमथ चोद्गिरणं विदाहः पाने त्वजीर्णमुपगच्छति लक्षणानि। दुष्टावतीव-कफसञ्चयकण्ठधूमा मूर्च्छावमिज्वरशिरोरुजनप्रदाहाः। ईषं सुरान्नविकृतेषु च तेषु तेषु त पानविभ्रममुशन्त्यखिलेन धीराः। क्षीणोत्तरौष्ठमतिशीतमनन्नदाहं तैल-प्रभाक्षमतिपानहृतं त्यजेत्तु॥" (रो० वि० मदात्ययाऽ०) इति॥३७॥

दाहा इति।—दह्यते इति दाहः, यत्,—"त्वच प्राप्य सुपानीया पित्तरक्ताभि-मूर्च्छितः। दाहः प्रकुरुते घोरं पित्तवत्तत्र भेषजम्॥" (सु० उ० ४७ अ०) इति। तथा रक्तादिति—उद्रिक्तश्लेष्मणात्। तृष्णाया इति—तृष्णानिरोधादजातौ क्षीणे सति तेज समुद्भवतीत्यर्थः। पित्तत इति—विकृतपित्तात् पित्तज्वरसमो दाहो भवतीति। धातुक्षयादिति—रसादिधातूना क्षीणत्वादतीव दाहो भवति। मर्मघातादिति—मर्माभिघातजनितोऽपि दाहो भवति। रक्तपूर्णोदरादिति—रक्तेन * उदरपूर्णत्वा-द्दाहो भवति। † दाहेन पीडित निद्रा निष्कृष्य वेपते इति लक्षणोक्तत्वात्॥३८॥

उन्मादा इति।—क्षोभविभ्रमसञ्ज्ञो वातादिना जनित उन्माद इति प्रसिद्ध, तदुक्तं—"मदक्षयक्षुद्वता दोषा यस्मादुन्मार्गमाश्रिताः। मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः॥" (सु० उ० ६२ अ०) इति। विषादिति—विषाभिव्याप्तशरीरत्वात्।

---

* उदरशब्देनात्र कोष्ठोऽभिप्रेत, सुश्रुतादौ "भक्षता पूर्णकोष्ठस्य दाहोऽन्यः स्यात् सुदुस्तर" इत्युक्ते।

† लक्षणमिद तृष्णानिरोधजदाहस्य, न तु रक्तपूर्णोदरजदाहस्य, तथा च —"तृष्णानिरोधादजातौ क्षीणे तेज समुद्भवतम्। सर्वाङ्गाभ्यन्तर देह प्रदहेन्मन्द-चेतस॥ सशुष्कगलताल्वोष्ठो निद्रा निष्कृष्य वेपते॥" (सु० उ० ४७ अ०) इति।

विंशतिभूतोन्मादाना विवरणम्।—

भूतोन्मादा विंशतिः स्युस्ते देवाद्दानवादपि।
गन्धर्वात् किन्नरात् यक्षात् पितृभ्यो गुरुशापतः॥४०॥
प्रेताच्च गुह्यकाद्दैत्यात् सिद्धाद्भूतात् पिशाचतः।
जलाधिदेवतायाश्च नागाच्च ब्रह्मराक्षसात्॥
राक्षसादपि कुष्माण्डात् कृत्या-वेतालयोरपि॥४१॥

चतुर्विधापस्मारणा विवरणम्।—

अपस्मारश्चतुर्धा स्यात् समीरात् पित्ततस्तथा।
श्लेष्मणोऽपि तृतीयः स्याच्चतुर्थः सन्निपातत॥४२॥

षष्ठी दुःखेन चेतस इति—दुःखन्तु त्रिविधम्, आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकमिति। ननु तद्दुःखसयोगा व्याधय इत्युच्यते, तत् कथ भूतोन्मादा. कथिता.? दुःखेनेति प्राप्तार्थत्वात्, सत्यम्, दुःखजनका अन्येऽपि भावा सन्ति, यथा धनबन्धुनाशादय, यदुक्त—"चौरैर्नरेन्द्रपुरुषैरभिभक्षणाऽन्यैर्विनाशितस्य धनबान्धवसङ्ख्यादा। गाढं क्षते मनसि च प्रियया विरसोर्जायेत चोत्कटतरो मनसो विकार॥" (सु० उ० ६२ अ०) इति, एतदभिप्रायेण स्यादद्दोष॥३९॥

भूतोन्मादा विंशतिरिति।—तद्विंशतेर्विवरणमाह, ते देवाद्दानवादपीत्यादि।—देवा देवयद्दा', तेन गणमाहात्म्यादयोऽपि ग्राह्या। दानवा असुरा, पापबुद्धयो देवशत्रव इत्यर्थ। गन्धर्वा देवगायका। किन्नराश्चद्दैदा विख्याता। यक्षा धनदादय। पितर. अग्निष्वात्तादय। गुरवो ब्राह्मणा वृद्धादयश्च। प्रेता प्रसिद्धा। गुह्यका देवयोनय। सिद्धा सनकादय। भूता विख्याता। पिशाचा पिशिताशना। जलाधिदेवता प्रतीता। नागा शेषनागप्रभृतय। ब्रह्मराक्षसा राक्षसभेदा। राक्षसा रावणादय। कुष्माण्डा अपि राक्षसभेदा। कृत्या प्रसिद्धा, ताश्च मन्त्रादिमारणात्मकरूपा। वेतालाश्च देवयोनय इति। एते ग्रहास्तु यदा शरीर प्रविशन्ति तदा भूतोन्मादा इति सज्ञयाऽभिहिता भूतचेष्टाकरत्वेनाद्दष्टत्वात, तदुक्त—"दर्पणादीन् यथा च्छाया शीतोष्ण प्राणिनो यथा। स्वप्नेषु भास्करार्चिश्च यथा देहञ्च देहधृक्। विशन्ति च न दृश्यन्ते ग्रहास्तद्दच्छरीरिणम्॥" (सु० उ० ६ अ०) इति॥४०।४१॥

अपस्मार इति।—हृतस्मृते पुरुषस्य तम प्रवेश इव तथा सरम्भश्च अपस्मार इत्यभिहित., तथा चोक्त—"तम प्रवेश. सरम्भा दोषोद्रेकाद्धृतस्मृते.। अपस्मार

चतुर्विधामवाताना विवरणम्।—

चत्वारश्चामवाता स्युर्वात-पित्त-कफैस्त्रिधा।
चतुर्थः सान्निपातेन—" ॥४२॥

अष्टशूलाना विवरणम्।—

"—शूलान्यष्टौ बुधा जगुः।
पृथग्दोषैस्त्रिधा द्वन्द्व-भेदेन त्रिविधान्यपि॥
आमेन सप्तमं प्रोक्तं सन्निपातेन चाष्टमम्॥ ४४॥

अष्टपरिणामशूलाना विवरणम्।—

परिणामभवं शूलमष्टधा परिकीर्त्तितम्।
मलैर्यैः शूलमुद्भूतं स्वात्तैरेव परिणामजम्॥४५॥

इति त्रेयो गदो घोरश्चतुर्विध॥" (रा० वि० अपस्मार०) इति। चतुर्द्धा स्वादिति—अत्र समीरादिति अनिलकोपात्। सन्निपातत इति—मिलितदोषत्वात्॥४२॥

चत्वारश्चामवाता इति।—आमेन दुष्टो वात आमवात, यद्वा—आमसम्पृक्तो दुष्टो वात आमवात इति, तद्दयमसङ्गतं कारणत्वात (?) किन्तु दुष्टामवातयो सयोगश्चामवात इति कथित, यदुक्त—"युगपत् कुपितावत्र विकसन्धिप्रवेशकौ। स्तब्ध वा कुरुतो गात्रमामवात स उच्यते॥" (रो० वि० आमवात०) इति। एके द्वन्द्वभेदान् कथयन्ति, यत,—"एकदोषानुग साध्यो द्विदोषो याप्य उच्यते। सर्वदेहचर शोथ स कृच्छ्र सान्निपातिक॥" (रो० वि० आमवात०) इत्यादिवचनात्॥४३॥

शूलानीति।—शूलनिखातवत् वेदनाजनकत्वात् शूलसज्ञा, यत,—"शङ्कु-स्फोटनवत् तस्य यस्मात् तीव्राश्च वेदना। शूलासदृश्य लक्ष्यन्ते तस्माच्छूलमिहोच्यते॥" (सु० उ० ४२ अ०)। इति। द्वन्द्वभेदेन द्विदोषजनितेनाश्च त्रयो भेदा। आमेनापरिपक्वरूपेण वातकारणत्वात, यत,—"सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः" (रो० वि० शूल०) इति॥४४॥

परिणामभवं शूलमिति।—परिणामकालसम्बन्धि परिणामशूल, तच्चोक्तशूल सङ्ख्याकैरेव बोद्धव्यम्। सङ्कालरैरप्येतच्च दर्शितम्, तद्यथा—"भुक्ते जीर्य्यति यच्छूल तदेव परिणामजम्। कैश्चिदन्नद्रव प्राहुरन्ये तत् पक्त्वदोषजम्॥ शुक्तिशूल वदन्त्येके केचिदन्नविदाहजम्॥" इति॥४५॥

एकैकान्नद्रव-जरत्पित्तशूलयोर्विवरणम्।—

अन्नद्रवभवं शूलं जरत्पित्तभवं तथा।
एकैकं गणितं सुज्ञैः—" ॥४६॥

त्रयोदशोदावर्त्तानां विवरणम्।—

"—उदावर्त्तास्त्रयोदश।
एकः क्षुन्निग्रहात् प्रोक्तस्तृष्णारोधाद्द्वितीयकः॥ ४७॥
निद्राघातात्तृतीयः स्याच्चतुर्थः श्वासनिग्रहात्।
छर्दिरोधात् पञ्चमः स्यात् षष्ठः क्षवथुनिग्रहात्॥४८॥
जृम्भारोधात् सप्तमः स्यादुद्गारग्रहतोऽष्टमः।
नवमः स्यादश्रुरोधाद्दशमः शुक्रधारणात्॥४९॥
मूत्ररोधान्मलस्यापि रोधात् वातविनिग्रहात्।
उदावर्त्तास्त्रयश्चैते घोरोपद्रवकारकाः॥५०॥

एवञ्चान्नद्रवभव शूलमत्र पृथक् गणित लक्षणान्तरवत्वात्, तदुक्त—"जीर्णे जीर्यत्यजीर्णे वा यच्छूलमुपजायते। पच्यापच्यप्रयोगेण भोजनाभोजनेन च॥ न शम याति नियमात सोऽन्नद्रव उदाहृत॥" (रो० वि० शूल०) इति। पिष्टाकृतिद्रवरूपो यो मूत्रमार्गेण स्रवेत् सोऽन्नद्रवसज्ञ इति केचित, तन्न सर्वसमतम्। जरत्पित्तभव शूलमिति—जरत्पित्तसज्ञितम्, अम्लशूलमित्यन्ये॥४६॥

उदावर्त्ता इति।—उद्वृतेन वेगविधारणेनाहतस्य वायोर्ऊर्ध्वगमित्युदावर्त्तः, अथवा—वायोरूर्ध्वभावर्त्तौ गमनमित्युदावर्त्त., यत सर्वेषु वायुरेव कारणम्, तदुक्त—"सर्वेष्वेतेषु विधिवदुदावर्त्तेषु तत्त्वज्ञ। वायौ क्रिया विधातव्या स्वमार्गप्रतिपत्तये॥" (सु० उ० ५५ अ०) इति। त्रयोदशविधाना विवरणमाह, एक क्षुन्निग्रहादित्यादि।—क्षुत् भोजनेच्छा तस्या नियही धारणमिति भाव। एव तृष्णा पानीयस्याभिलाष। निद्रा स्वप्नेच्छा। श्वास उच्छ्वास.। छर्दिर्वमनम्। क्षवथुश्छिक्का। जृम्भा जम्भणं प्रसिद्धम्। उद्गारो वातोद्गिरणम्। अश्रु नेत्राम्बुसज्ञम्। शुक्र रेत। मूत्र प्रसिद्धम्। मल पुरीषम्। वातविनिग्रहादिति—अधोवातरोधात्। एव त्रयोदश व्याख्याता। एतेषा मध्ये ये मूत्रविनिग्रहजादयस्ते घोरोपद्रवकारका ज्ञातव्या। घोरोपद्रवकारका इत्यनेन मारणात्मकरूपा इत्यभिप्राय। ननु * चतुर्दशविधा उदावर्त्ता अन्यत्र प्रति-

---

* चतुर्दशविधा उदावर्त्ता. चरकादौ कुत्रापि नोक्ता., सर्वेष्वेव तन्त्रेषु

द्विविधानाहस्य विवरणम्।—

आनाहो द्विविधो ज्ञेय एकः पक्वाशयोद्भवः।
आमाशयोद्भवश्चान्यः प्रत्यानाह स कथ्यते ॥५१॥

एकविधोरोगस्य विवरणम्।—

उरोग्रहस्तथा चैको—"

पञ्चहृद्रोगाणां विवरणम्।—

"—हृद्रोगाः पञ्च कीर्त्तिताः।

पादिता, तथा हि—"वेगान्न धारयेद्वातविण्मूत्रक्षवथूद्गमान्। निद्राकासश्रम-श्वासजृम्भाश्रुच्छर्दिरेतसाम्॥" (वा० सू० ४ अ०) इत्यादिना, तत कथमत्र त्रयोदश भेदा? उच्यते, श्रमेण श्वास उत्पद्यते तस्य धारणमिति व्याख्याया श्वासान्तर्गतः एव श्रमभेदोऽत्र दर्शितः। उद्गारस्थाने कास इति केचित् वातकारणत्वादिति ॥४७—५०॥

आनाह इति।—* आनाह उदरपूरणलक्षण, स च वातोत्कटदोषैर्जनित, आमाशयोद्भवत्वात् न स्वतन्त्रेण वायुना, अन्यथा प्रत्यानाहे तृष्णाप्रतिश्यायशिरोविदाहादय कथ सम्भवन्ति? तथा चोक्त—"तस्मिन् सवन्त्यानसमुद्भवे तु तृष्णा-प्रतिश्यायशिरोविदाहाः। आमाशये शूलमथो गुरुत्व हृत्स्तम्भ उद्गारविघातनञ्च॥" (सु० उ० ५६ अ०) इति वदन्ति। "एक प्रकुपितो दोष सर्वानेव प्रकोपयेत्" इत्यभिप्रायेण वातकोपेन पित्तकफावपि प्रकुपितौ भवत इति ॥५१॥

उरोग्रह इति।—उरो गृहीतमिव मन्यते, तत कफमारुतावाह्वयति, तथा हि—"सास मास यकृत्प्लीह्नो सद्यो हृदि यदा गतम्। उरोग्रह तदा कुर्यो कुरुत कफमारुतौ॥" इति। हृद्रोगा पञ्च कीर्त्तिता इति।—हृदि रोगो हृद्रोग, हृदि

त्रयोदशविधा उक्ता, टीकाकारस्त्वेयमाशङ्क्य सर्वथैव भिन्नत्वेन, "श्रमश्वास" इति वाग्भटीयवाक्यस्य एकविधत्वेनुलेन गणनात।

* आनाहोऽत्र आध्मानार्थक इति मन्ये, आस्ये प्रत्यानाहाख्यरोगादर्शनात्, वातव्याधिविवरणे आध्मानशब्दादर्शनाच्च, न तु "आम यकृद्वा" इत्यादिलक्षणक आनाह, एवञ्च "तृष्णाप्रतिश्याय" इत्यादि टीकाकारोक्ति न सङ्गच्छते इति, किञ्च एष एव आनाह "आम यकृद्वा निचित क्रमेण" इत्याद्युक्तलक्षणक आनाह, ग्रन्थकर्त्तुरभिप्रेतश्चेत् यकृज्जन्यत्वेन आनाहसत्त्वात् केवलवातजन्यत्वञ्च तथा आमजस्य

वातादिभिस्त्रय. प्रोक्ताश्चतुर्थः सन्निपातत. ॥
पञ्चमः क्रिमिसञ्जातः—" ॥५२॥

अष्टोदराणां विवरणम्।—

"—तथाऽष्टावुदराणि च।
वातात् पित्तात् कफात्त्रीणि त्रिदोषेभ्यो जलादपि ॥
प्लीहः क्षतात् बद्धगुदादष्टमं परिकीर्त्तितम् ॥५३॥

बाधेत्यन्ये, यदुक्त—"दूषयित्वा रस दोषा विगुणा हृदय गता। हृदि बाधां प्रकुर्वन्ति हृद्रोग त प्रचक्षते॥" (सु० उ० ४३ अ०) इति। पञ्चम क्रिमिसञ्जात इति—क्रिमिरोगात् पञ्चमो हृद्रोगो भवतीत्यर्थः, तथोक्तत्वात, तदुक्तम्—"ज्वरो विवर्णता शूल हृद्रोग सदन भ्रम। भक्तद्वेषोऽतिसारश्च सञ्जातक्रिमिलक्षणम्॥" (सु० उ० ५४ अ०) इति ॥५२॥

तथाष्टावुदराणि चेति।—अथोदरस्थो रोगोऽप्युदरशब्देन वाच्यलक्षणत्वात; अत,—"तात्स्थ्यात्तद्धर्मताध्यासात् तत्समीपतयाऽपि च। तत्सहचर्य्याच्छब्दानां वृत्तिरेषा चतुर्विधा॥" इति। तत्र वातादीना पृथक् त्रयो भेदा, तेन वातोदर पित्तोदर श्लेष्मोदरञ्च। त्रिदोषेभ्य इति—मिलितदोषत्रयाच्चतुर्थ, अस्य सन्निपातोदरस्य दूष्योदरं नामान्तर वदन्त्येके, तदुक्त—"स्त्रियोऽन्नपान नखरोमसूर्वाविड्वान्तवेर्युक्तरसाधुसात्म्या। यस्मै प्रयच्छन्त्यरयो गराय दुष्टाम्बुदूषीविषसेवनाद्वा॥ तेनाशु रौक्षं कुपिताश्च दोषा कुर्य्युः सुघोरं जठर विलिङ्गम्। तच्छीतवाते भृशदर्दिने च विशेषतः क्रुध्यति दह्यते च॥ स चातुरो मुह्यति हि प्रसक्त पाण्डु क्लम शुष्यति तृष्णया च। दूष्योदर कीर्त्तितमेतदेव—" (सु० नि० ७ अ०) इति। जलादपि जलपानात, अप्रशस्तजलपानादित्यभिप्राय। अस्यापि दकोदरसज्ञा प्रवदन्ति, यदुक्त—"य श्लेष्मपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथवा निरूढ। पिबेज्जल श्लोतसमाशु तस्य स्रोतासि दुष्यन्ति हि तद्वहानि॥ श्लेष्मोपलिप्तेष्वथवापि तेषु दकोदर पूर्ववदभ्युपेति॥" (सु० नि० ७ अ०) इति। प्लीह्न इति प्लीहवृद्धे प्लीहोदरसज्ञा, प्लीहा "सनडवा" शब्दवाच्य। अस्य भेदो यकृद्वाल्युदरम्, तथा च—"विदाह्यभिष्यन्दिरतस्य

प्रत्यानाहसज्ञता कफवातजत्वञ्च युज्यते, एवञ्च, "आनाह उदरपूरणलक्षण:, स च उत्कटवातेन जनित, प्रत्यानाहस्य आमाशयोद्भवत्वात् न खतन्त्रेण वायुना, अन्यथा तत्र तृष्णाप्रतिश्यायः—" इत्यादिरूपपाठकल्पन सङ्गतम् इति सुधीभिर्विवेच्यम्।

अष्टगुल्मानां विवरणम्।—

गुल्माश्चत्वारो मताख्याता वात-पित्त-कफैस्त्रयः।
द्वन्द्वभेदात्त्रयः प्रोक्ताः सप्तमः सन्निपातजः॥
रक्तादष्टमकः ख्यातो—" ॥५४॥

जन्तो प्रदुष्टमत्यर्थमसृक् कफश्च। प्लीहाभिवृद्धिं कुरुत प्रबद्धौ प्लीहोत्थमेतज्जठरं वदन्ति॥ तद्वामपार्श्वे परिवृद्धिमेति विशेषतः सोदति चातुरोऽत्र। मन्दज्वराग्निः कफपित्तलिङ्गैरुपद्रुतः चौणबलोऽतिपाण्डुः॥ सव्यान्यपार्श्वं यकृति प्रवृद्धे ज्ञेयं यकृद्ग्ल्यु दरं तदेव॥" (रो० वि० उदर०) इति। चतादिति—प्रहारक्षुपादन्तादिषु, तत परिखाव्युदरमिति संज्ञा, यदुक्तं—"अल्पं तथाऽन्नोपहितं यदन्तं भुक्तं भिनत्त्यागतमन्यथा वा। तस्मात् स्रतोऽन्तात् सलिलप्रकाशः स्रावः सवेदं गुदतस्तु भूयः॥ नाभेरधश्चोदरवृद्धिमेति निरुध्यते वाप्यति नाभवम्। एतत् परिखाव्युदरं प्रदिष्टं दकोदरं कीर्त्यतो निबोध॥" (रो० वि० उदर०) इति। बद्धगुदादिति—अष्टमसुदरञ्च बद्धोदरसंज्ञमिति, बद्धगुदोदरमित्यन्ये, यत,—"यस्यान्नमन्नैरुपलेपिभिर्वा वातादिभिर्वा पिहितं यथावत्। सञ्चीयते तस्य मलः सदोषः शनैः शनैः सङ्करवच्च नाद्यात्॥ निरुध्यते तस्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्पमल्पम्। तन्नाभिमध्ये परिवृद्धिमेति तद्बोदरं बद्धगुदं वदन्ति॥" (रो० वि० उदर०) इति॥५५॥

गुल्माश्चिति।—कीलान्तर्ग्रन्थिरूपिणं गुटिकाकारं गोलमिति प्रसिद्धम्, यदुक्तं—"वृत्ताश्चीरलतास्थि सञ्चारो यदि वाऽचलः। वृत्तश्चयापचयवान् स गुल्म इति कीर्त्तितः॥" (सु० उ० ४२ अ०) इति। ते तु वातादिभेदेन पृथक् त्रयो गणिताः। द्वन्द्वभेदादिति—द्विदोषजनिताश्चय। सप्तम सन्निपातज इति—सप्तमो गुल्मो त्रिदोषजनितश्चयाङ्गवति। रक्तादष्टमक इति—दुष्टरुधिरादष्टमो गुल्मो भवतीत्यर्थः, स च प्रायश स्त्रीणाञ्च प्रसूत्यनन्तर भवति, तदुक्तं—"नवप्रसूताऽहितभोजना या या चामगर्भं विसृजेदृतौ वा। वायुर्हि तस्या परिगृह्य रक्तं करोति गुल्मं सरुजं सदाहम्॥" (सु० उ० ४२ अ०) इति। ननु माधवेन पञ्चधा गुल्मो लिखितः, तत् कथमत्राष्टविध? सत्यम्, माधवेन तु * पञ्चस्थानविशेषेण पञ्चधा

* पञ्चस्थानविशेषेण पञ्चधा कथित इति तु न सम्यक्, "स व्यस्तैर्जायते दोषैः समस्तैरपि चोच्यते। पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरः॥" (रो० वि० गुल्म०) इत्यनन्तरोक्तः, वातपित्तकफसन्निपातरक्तजभेदेन पञ्चविधो गुल्मः माधवेन निर्दिष्ट इति।

त्रयोदशमूत्राघातानां विवरणम्।—

"—मूत्राघातास्त्रयोदश।
वातकुण्डलिका पूर्वो वाताष्ठीला ततः परः॥५५॥
वातवस्तिस्तृतीयः स्यान्मूत्रातीतश्चतुर्थकः।
पञ्चमो मूत्रजठरः षष्ठो मूत्रक्षयः स्मृतः॥५६॥
मूत्रोत्सङ्गः सप्तमः स्यात् मूत्रग्रन्थिस्तथाऽष्टमः।
मूत्रशुक्रन्तु नवमो विड्घातो दशमः स्मृतः॥५७॥
मूत्रसादश्चोष्णवातो वस्तिकुण्डलिका तथा।
त्रयोऽप्येते मूत्राघाताः पृथक् घोराः प्रकीर्त्तिताः॥५८॥

कथित, तथा हि—"दुष्टा वातादयोऽत्यर्थं मिथ्याऽऽहारविहारतः। कुर्वन्ति पञ्चधा गुह्य कोष्ठान्तग्रन्थिरूपिणम्॥ तस्य पञ्चविध स्थान पार्श्वहृन्नाभिवस्तयः॥" (रो० वि० गुल्म०) इति। अत्र तु चिकित्सार्थं द्वन्द्वभेदास्त्रयो गणिता इत्यदोष, यत,—निमित्तलिङ्गान्युपलभ्य गुल्मे द्विदोषजे दोषबलाबलत्व। व्याधिमुखिङ्गानपराश्च गुल्मास्त्रीनादिशेद्दोषधकल्पनार्थम्॥" (च० चि० गुल्म०) इति॥५४॥

मूत्राघाता इति।—मूत्रस्याभिघाती मूत्राघात। आघाती वेदनाविशेषवान् मूत्रनिरोध इत्यपरे। स च वातादिदोषजनित। त्रयोदश इत्यस्य विवरणमाह, वातकुण्डलिका पूर्वं इत्यादि।—पूर्वं, प्रथम वातकुण्डलिका कथिता, तदृयथा—यत्र सवेदनो वायुर्वस्तौ मूत्रमाविश्य कुण्डलीवत् विगुणो भूत्वा सञ्चरति सा वातकुण्डलिका ज्ञेया। वाताष्ठीला तत परः इति—तत परः द्वितीय, यत्रानिलः पाषाणग्रन्थिवत् वस्तौ वृत्तमुन्नत मूत्रविण्मार्गरोधिन व्याधिं कुर्य्यात् सोऽष्ठीलाशब्दवाच्य। अयन्तु वातरोगे पठिताष्ठीलाया, वस्तिगतत्वाद्भिन्न। वस्तिकुक्षिनिपीडितो यत्र मूत्रसङ्गो भवेत स वातवस्तिः। यत्र मूत्र चिर तिष्ठति शीघ्र न प्रवर्त्तते मन्द वा प्रवर्त्तते स मूत्रातीत। यत्र नाभेरधस्तात् तीव्रवेदनमाधान भवति तन्मूत्रजठरं ज्ञेयम्। यत्र वस्तिस्थौ पित्तमारुतौ सरुग्दाह मूत्रक्षय कुरुत स मूत्रक्षयो ज्ञेय। यत्र शनैरल्पमल्प सरुज नीरुजं वा मूत्रं स्रवेत् स मूत्रोत्सङ्ग। यत्रान्तर्वस्तिमुखे स्थिरोऽल्पो वृत्तो ग्रन्थि, अत्र तु अश्मरीतुल्यरूपभवति स मूत्रग्रन्थिः अश्मरी तु भिन्नदोषदूषितत्वात (?)। यत्र भस्मोदकप्रतीकाश स्थानाच्युत शुक्रं मूत्रयत प्राक् प्रस्रावा प्रवर्त्तते तन्मूत्रशुक्रमित्युच्यते। यत्र तु विट्सदृष्ट विड्गन्ध

अष्टमूत्रकृच्छ्राणां विवरणम्।—

मूत्रकृच्छ्राणि चाष्टौ स्युर्वात-पित्त-कफैस्त्रिधा।
सन्निपाताच्चतुर्थः स्याच्छुक्र-कृच्छ्रश्च पञ्चमम् ॥५८॥
विट्कृच्छ्रं षष्ठमाख्यातं घातकृच्छ्रश्च सप्तमम्।
अष्टमश्चाश्मरीकृच्छ्रं—" ॥६०॥

चतुर्विधाश्मरीणां विवरणम्।—

"—चतुर्धा चाश्मरी मता।
वातात् पित्तात् कफाच्छुक्रात्—" ॥६१॥

कृच्छ्रान्मूत्रयेत स विड्घात इति। यत्र सदाह रोचनाशङ्खचूर्णवत् सलवर्णं वा मूत्रयेत स मूत्रसाद। यत्र कृच्छ्रात् पुनः पुनः हारिद्रमथवा रक्तं मूत्रं मूत्रयेत स पोथवात। य शूलस्यन्दनदाहार्त्तो बिन्दु बिन्दु मूत्रयेत् पीडितस्तु धारां स्रवेत् तस्य वस्तिकुण्डलिका कथिता। वयोऽप्येते मूत्राघाता इति—चयस्तु मूत्रसादादय प्रत्याख्येया, ते तु घोरा बहुदुःखकरा इत्यथ ॥५५—५८॥

मूत्रकृच्छ्राणीति।—मूत्रस्य कृच्छ्रेण महता दुःखेन प्रवृत्तिर्मूत्रकृच्छ्रम्, तच्चाष्टविध भवति, वातादिभि पृथक् त्रयो भेदा। सन्निपाताच्चतुर्थ। यत्र तु वस्तिमेढ्रनगूलं भवति सशुक्रं मूत्रयेत तत्तु शुक्रकृच्छ्रम्। यत्र पुरीषाघातात् विगुणता गतो वायु-राध्मानशूले करोति तत विट्कृच्छ्रम्। यत्र शल्येन मूत्रवाहिस्रोत स्वभिहतेषु सत्सु भृश दारुणं मूत्रकृच्छ्र भवति तत् वातकृच्छ्र ज्ञेयम्। अश्मरीवदश्मरीकृच्छ्र, तत् वस्ति-मेढ्रनगूलान्वित भवति। अश्मरीभेदोऽपि शर्करेति केचित, यत,—"अश्मरी शर्करा चैव तुल्यसम्भवलक्षणे। विशेष शर्करायाश्च शृणु कौन्तेयतो मम॥ पच्यमानाऽश्मरी पित्तात् शोष्यमाणा च वायुना। विमुक्तकफसन्धाना चरन्ती शर्करा मता॥" (रो० वि० मूत्रकृच्छ्र०) इति। ननु मूत्रकृच्छ्रमूत्राघातयो-र्वस्तिगतदोषसाधर्म्यात् को भेद ? उच्यते, मूत्रकृच्छ्रे कृच्छ्रत्वमधिक विलम्बशाल्यः, मूत्राघाते तु विलम्बो बलवान् कृच्छ्रत्वमल्पञ्चेति भेद ॥५९।६०॥

चतुर्धा चाश्मरी मतेति।—या वस्तिगता पाषाणगुटिकावच्च वति सा अश्मरी-शब्दवाच्या, तदुक्त—"विशोषयेद्वस्तिगत सशुक्र मूत्र सपित्त पवन कफ वा। यदा तदाऽश्मर्य्युपजायते तु क्रमेण पित्तेष्विव रोचना गो॥" (च० चि० विसर्पीय०) इति। क्रमोऽत्र प्रसङ्गतोऽभि लिख्यते, यथा—"अम्लु खच्छास्वपि यथा निषिक्तासु

विंशतिमेहेषु दशश्लेष्ममेहाना विवरणम्।—

"—तथा मेहाश्च विंशतिः।
इक्षु-मेहः सुरा-मेहः पिष्ट-मेहश्च सान्द्रक ॥६२॥
शुक्र-मेहोऽटकाख्यो च लाला-मेहश्च शीतक।
सिकताख्य शनैर्मेहो दशैते कफ-सम्भवा. ॥ ६३ ॥

तत्र षट्पित्तमेहाना विवरणम्।—

मञ्जिष्ठाख्यो हरिद्राख्या नील मेहश्च रक्तकः।
क्षण मेह. क्षार मेह षड़ेते पित्त-सम्भवाः ॥६४॥

जवे घटे। कालान्तरेण षड् स्यादश्मरीसम्भवस्तथा ॥" (सु० नि० ३ अ०) इति। सा अश्मरी चतुःप्रकारा भवति, वातादिभेदात् शुक्रादिति। वातादीना पृथक् त्रयो भेदा। वातपित्तकफादिसन्निपातेन विदोषसम्भवेत्यपरे, यत.—"नैकदोषाश्रया. सर्वा" (रो० वि० अश्मरी०) इत्यादिवचनात्। शुक्रादिति—शुक्रधारणात् शुक्राश्मरी भवतीत्युच्यते, "शुक्राश्मरी तु महता जायते शुक्रधारणात्। स्थानाच्युतमसृक्तं हि मुष्कयोरन्तरेऽनिल ॥ शोषयत्युपसङ्दृश्य शुक्र तत शुक्रनश्मरी॥" (वा० नि० ९ अ०) इति ॥६१॥

तथा मेहाश्च विंशतिरित्यादि।—तत्रेति—वस्तिगतदोषत्वाद्वचनम्। मेह' प्रमेह, प्रकर्षेण मेदोमासक्लेदादि मेहतीति प्रमेह, तदुक्त—"मेदश्च मासञ्च शरीरजञ्च क्लेद कफो वस्तिगत प्रदूष्य। करोति मेहान् समुदीर्णमुष्णेस्थानेव पित्तं परिदूष्य चापि ॥ चापेषु दोषेष्वकृष्य धातून् सन्दूष्य मेहान् कुरुतेऽनिलश्च ॥" (च० चि० प्रमेह०) इति। विंशतिरिति—विंशतिभेदा, तद्यथा—इक्षुरसतुल्यम् इक्षुमेह, तुल्यता मूत्रस्यभिप्राय। सुरा मदिरावर्णेन, तत्तुल्य सुरामेह। पिष्ट तण्डुलकल्क, तद्रसतुल्य पिष्टमेह। सान्द्र घनम् आविलञ्च सान्द्रमेह। शुक्रतुल्य शुक्रमेह। श्वेतवर्णमुदकसदृशमुदकमेह। तन्तुयुक्तमिव पिच्छिल लालामेह। बहुवारान्मुहुरतिशीतल शीतमेह। सान्द्र सिकतारूप सिकतामेह। शनै शनै सकफ कृच्छ्र शनैर्मेह, एते दश भेदा कफजा ज्ञेया। अथ पित्तजानाह—मञ्जिष्ठासदृशीवर्ण विस्रञ्च मञ्जिष्ठामेह। सदाह हरिद्रासन्निभञ्च हरिद्रामेह। सफेनमच्छ नीलवर्णञ्च नीलमेह। विस्रमुष्णञ्च शोणितप्रकाशञ्च रक्तमेह। मसीनिभ कृष्णमेह। क्षुतक्षार-प्रतिम क्षारमेह, क्षारतोयसदृशमित्यर्थ, तदुक्त—'गन्धवर्णरसस्पर्शै. क्षारेण

तत्र चतुर्विधवातमेहाना विवरणम्।—

हस्ति-मेहो वसा-मेहो मज्ज-मेहो मधुप्रभः।
चत्वारो वातजा मेहा इति मेहाश्च विंशतिः ॥६५॥

एकसोमरोगस्य विवरणम्।—

सोमरोगस्तथा चैकः—*

दशप्रमेहपिडकाना विवरणम्।—

"—प्रमेहपिड़का दश।
शराविका कच्छपिका जालिनी विनताऽलजी ॥६६॥

आरतोयवत्" (वा० नि० १० अ०), इति षट् पित्तजा। इदानीं वातजानाह, हस्तिमेह इत्यादि।—मत्तमातङ्गवद्गत्या प्रहृष्ट हस्तिमेह। वसाप्रकाश वसामिश्र वा वसामेह। मज्जाभ मज्जमिश्र वा मज्जमेह। मधु क्षौद्र, तस्य तुल्य तद्वर्ण वा मधुमेह, इति चत्वारो वातजा ज्ञेया। इति मेहाश्च विंशतिरिति—इति पूर्वोक्तप्रकारेण विंशतिर्मेहा साध्या याप्या असाध्या। ते चानेन प्रतिपादिता, यदुक्त—"साध्या कफोत्था दश पित्तजा षट् याप्यास्तुल्या पवनादसाध्य। समक्रियत्वादिषमक्रियत्वान्महात्ययत्वाच्च यथाक्रम ते॥" (च० चि० प्रमेह०)। * ननु मधुमेहोऽन्यत्र पृथक् एकविंशतिको गणित, तत् कथमत्र वातजेषु पठित? सत्यम्, चिकित्सार्थे तु पृथगन्यत्रास्य ग्रहण कृतम्, अत्यसाध्यत्वेन वातजेषु प्रमेहेष्वेवान्तर्भूतो दर्शित दोषदूष्यरसवर्णसाधर्म्यात्, यत,—"सर्व एव प्रमेहास्तु जालिनाप्रतिकारिण। मधुमेहत्वमायान्ति तदाऽसाध्या भवन्ति हि॥" (सु० नि० ६ अ०) इति ॥६२—६५॥

सोमरोग इति।—एक सोमरोग, स च मूत्रमार्गेण सवति, तथा हि—"आप सर्वशरीरस्था क्षुभ्यन्ति प्रस्रवन्ति च। मूत्रमार्गेण विसृजा सोमरोग इति स्मृत॥" अस्य चिकित्सामप्यतीव बलहानित्वेनोपलक्षितम्, तदुक्त—"शरीरधारणाच्चापि सोम इत्यभिधाऽद्भत। तस्मात् सोमक्षयाद्देहो निश्चेष्टश्च भवेत् सदा॥" इति।

---

* चरकसुश्रुतवाग्भटादिषु क्वेष्वपि तन्त्रेषु मधुमेह प्रमेहेषु एकविंशतित्वेन न गणित, वातिकमधुमेह विंशत्यन्तर्गत एव, अपरस्य प्रमेहोपेक्षालक्षित मधुमेह प्रमेहावस्थाविशेष एव, तेन च न सङ्ख्यातिरेक, अत, "अन्यत्र पृथक् एकविंशतिको गणित" इति टीकाकारोक्ति चिन्त्या।

मसूरिका सर्षपिका पुत्रिणी च विदारिका।
विद्रधिश्च दशैताः स्यु पिडका मेह-सम्भवाः ॥६७॥

मूत्रातीसारोऽस्य भेद इति मन्यन्ते कैश्चित् द्रवदोषसाधर्म्यात्, यत,—"मूत्रातीसारमतिमेथुनत प्रसूत रूक्षोदतापपरिवर्जितमल्पमल्पम। शङ्खाविहीनमपि भीमगदस्य तस्य भेद वदन्ति भिषजो मकलामयज्ञा ॥' इति। प्रमेहपिडका दशेति। —अप्रतिक्रियमाणात् प्रमेहात् पिडकाश्चात्पद्यन्ते। पिडका नानाकारा व्रणसज्ञा एव, तथा ह्यत—"सन्धिसमसु जायन्ते सानलेषु च धामसु" (वा० नि० १० अ०) "तावच्चैता न लक्ष्यन्ते यावद्वास्तुपरिग्रहः" (च० सू० कियन्त शिरसीय०) इति। वास्तु व्रणाधिष्ठानम्। कदाचिदन्येषा, यत,—"विना प्रमेहमप्येता जायन्ते दुष्टमेदस" (च० सू० कियन्त शिरसीय०) इत्यपि। तासा स्वरूप केषाञ्चिज्ज्ञापनार्थं लिख्यते। तत्र शराविका यथा—"अल्पोन्नता तु तद्वत् स्निग्धस्निग्धा शराविका" (मा० वि० प्रमेह०) इति। कच्छपिकामाह—"महती कूर्मसस्थाना श्वेया कच्छपिका बुधै" (सु० नि० ६ अ०) इति। जालिनीमाह—'जालिनी तीव्रदाहा तु मासशोणितसम्भवा' (सु० नि० ६ अ०) इति। तल्लक्षणेऽपि "परस्परमिसम्बद्धा पिडका चैकदेशजा। पित्तोत्कटा दाहवती मृदुरुक् जालिनी मता ॥" इति। विनतालक्षणमाह—"अवगाढरुजा क्लेदा पृष्ठे वायुदरेऽपि वा। महती पिडका नीला विनता नाम सा स्मृता ॥" (मा० वि० प्रमेह०) इति। अलजीमाह—"रक्ताऽसिता स्फाटचिता विज्ञेया त्वलजी भवेत्" (मा० वि० प्रमेह०) इति। मसूरिकामाह—"मसूराकृतिसस्थाना विज्ञेया तु मसूरिका" (सु० नि० ६ अ०) इति। सर्षपिकामाह—"गौरसर्षपसस्थाना तत्प्रमाणा च सर्षपी' (सु० नि० ६ अ०) इति। पुत्रिणीमाह—"महत्यल्पचिता श्वेया पिडका साऽपि पुत्रिणी" (सु० नि० ६ अ०) इति। विदारिकामाह—"विदारीकन्दवत् वृत्ता काठिना च विदारिका" (सु० नि० ६ अ०) तथा (वा० नि० १० अ०) इति। विद्रधिमाह—"विटपैर्लक्षणैर्युक्ता ज्ञेया विद्रधिका तु सा" (सु० नि० ६ अ०)। विद्रधिलक्षणपृच्छयनेन विद्रधे यथा अभेदो बोद्धव्य। पिडकानामरिष्टलक्षणमाह केचित्—"ये यन्मया स्मृता मेहास्तेषामेतास्तु तन्मया" (सु० नि० ६ अ०) इत्यादि। पिडका प्रायेणाधःकाये भवन्ति, दोषदूष्याणामधःप्रक्रमात् रसायनीनां दौर्बल्याच्च ॥६६।६७॥

एकमदोरोगस्य विवरणम्।—

मेदो-दोषस्तथा चैक —"

नवशोथानां विवरणम्।—

"—शोथरोगा नव स्मृताः।
दोषै पृथक् द्वयै सर्वैरभिघातात् विषादपि ॥६८॥

मेदोदोष इति।—मेदोऽङ्गगतितो दोषो मेदोदोष, यद्वा—मेद एव दोष, कारणे कार्योपचारात्। उक्तञ्च— अव्यायामदिवास्वप्न-श्लेष्माहारसेविन। मधुरो ऽन्नरस प्राप्य स्नेहान्मेदो विवर्द्धयत ॥" (वी० वि० मेदो०) इति। तत प्राचेल उदरस्थित भवति, यदुक्त—"मेदस्तु सर्वभूतानामुदरेऽवस्थास्थितम। अत एवोदरे वृद्धि प्रायो मेदस्विनो भवेत ॥" (वी० वि० मेदो०) इति। ननु मेद एव दोष कथम ? तदुच्यते—"मेदसाऽऽवृतमार्गत्वात पित्तस्यान्य न धातव। मेदस्तु चीयते तस्मादशक्त सर्वकर्मसु॥ क्षुद्रश्वासतृषामोह-स्वप्नक्लथनसादनै। युक्त क्षुत्स्वेदजैर्गन्धैरल्प प्राणोऽल्पमैथुन ॥" (वा० वि० मेदो०) इति। शोथरोगा इति।—शोथरोगा नव स्मृता इति—दोषभेदेन। शोथ एव रोग शोथरोग। अयमपि व्रणशोथादिव्र एव केवलत्वक्मांसमधत्वात यत,—"रक्तपित्तकफान् वायुर्दुष्टो दुष्टान् बहिर्गिरा। नीत्वा रक्तगतिस्तोदं कुर्यात्त्वङ्मांसमधयम ॥ उत्सेध सहज शोथ तमाहुर्निचयादज ॥" (वा० नि० १३ अ०) इति। अत एव शोथस्य त्वङ्मांसमेव मध्य। व्रणस्य त्वष्टौ वास्तूनि यदुक्त—'त्वङ्मांसशिरास्नायुसन्धिसन्धिमर्माण्यष्टौ व्रणवास्तून' (सु० सू० २२ अ०), अष्टसु व्रणवास्तुषु व्रणशोथस्य मध्यत्वात। नव स्मृता इति—शोथरोगस्य नव भेदा। दोष पृथगात—दोषवातादिभेदेन त्रयो भेदा। द्वयोरात—मिलितदोषद्वयेनापि त्रया भेदा। सर्वैरात—मिलितदोषत्रयाणामप्येक एको भेद सन्निपातेनेत्यर्थ। अभिघातादिति—अभिघात शस्त्रादिना छिन्नभिन्नक्षतप्रभृतिकलेन प्रसरणशीलोऽपि सन् प्रकृतशोथो भवति यदुक्तम—"अभिघातेन शस्त्रादिच्छिन्नभिन्नक्षतादिभि। क्षिप्तानिलादयोऽनिलसंसृष्टाश्चापि कुप्यते ॥ रसैर्युक्तैश्च सन्दग्धास्तुल्यै स्वादिसमन्वितान्। मृगाश्वा नादिनाभास्य प्रायश पित्तलक्षण ॥" (वा० नि० ३ अ०) इति। विषादिति—स्थावरजङ्गमात्मकाद्विषप्रभावात, यदुक्त—"विषञ्च सविषप्राण-पारसपयमूचणात। दष्टादन्तनखाघातादाविषप्राणिनामपि ॥ विषमूषकोपहत सलवहस्तसङ्गरात्। विषदग्धानिलस्पर्शात गरयोगावचूर्णनात्। दष्टश्वलोऽवलम्बी च शीघ्रा दाहरुजाकर. ॥" (वा० नि० १३ अ०) इति ॥६८॥

सप्तबुद्धीना विवरणम्।—

बुद्धयः सप्त गदिता वातात् पित्तात् कफेन च।
रक्तेन मेदसा मूत्रादन्त्रबुद्धिश्च सप्तमी॥ ६९॥

एकविधाऽष्टबुद्धे विवरणम्।—

अखण्डबुद्धिस्तथा चैका—"

एकगण्डमालाया विवरणम्।—

"—तथैका गण्डमालिका।

एकगण्डालज्या विवरणम्।—

गण्डान्त्रजो तु चैका स्यात्—" ॥७०॥

बुद्धय इति।—बुद्धिस्तु शोथोपलक्षितत्वात् शोथभेद एव, तथा हि—"क्षुद्रोऽनुर्दुगतवायुः शोथशूलकरश्चरन्। मुष्कौ वङ्क्षणतः प्राप्य फलकोषाभिवाहिनौ॥ प्रपीड्य वृषणौ वृद्धिं करोति फलकोषयोः। दोषास्त्वनेकोद्भवास्ते स बुद्धिः सप्तधा मतः॥" (वा० नि० ११ अ०) इति। सप्त सप्तप्रकारा भवन्ति, तद्यथा—वातपूर्णबुद्धिस्तत्रशीं वातबुद्धिः, पक्वोडुम्बरसङ्काशः पित्तबुद्धिः, कण्डूमान् कठिनोऽल्परुक् इत्यादिना श्लेष्मबुद्धिः। रक्तेनेत्यादि—दुष्टरक्तेन रक्तक्षयस्फोटावृतः पित्तबुद्धिलिङ्गश्च। मेदसेति—कफबुद्धिवत्तालफलोपमश्च। मूत्रादिति—मूत्रधारणशीलस्य पानीयपूर्णबुद्धिवद्बुद्धिः सम्यग्यो बृहच्च मूत्रजबुद्धिः। अन्त्रबुद्धिस्तु क्षुद्रान्त्रावयव यदा पवनो विगुणीकृत्य स्वस्थानात् अधो नयेत्, तदा वङ्क्षणसन्धौ यस्याम स्रवणभवेत् उपेक्षणाच्च कालान्तरेण आध्मानादियुता मुष्कबुद्धिरिति, यदुक्तम्—"अन्त्र विगुणमादाय अन्त्रोर्नयति वङ्क्षणम्। वङ्क्षणात् तद्गुणायुक्त फलकोष प्रपद्यते॥" (भोज०) इति। अत एवास्य चापरो भेदो ब्रह्म इति कथित॥६९॥

अखण्डबुद्धिस्तथा चैका इति।—एका अखण्डबुद्धिस्तथा एव भेद, यत उक्तम्—"उपेक्षमाणस्य च मुष्कबुद्धिमाध्मानरुक्स्तम्भवती स वायु" (वा० नि० ११ अ०)

* लक्षणमिदमन्त्रबुद्धे वाग्भटेन माधवेन च कथित न त्वखण्डबुद्धे। किञ्च, "अखण्डबुद्धिस्तथा चैका" इति पाठ एव चिन्त्य, बुद्धिशब्द अखण्डबुद्धवाचक एव सप्तविधबुद्ध्यतिरिक्ताखण्डबुद्धिरेका सुश्रुतवाग्भटमाधवादौना कदापि नोक्ता। मन्ये, या खलु बुद्धि कालप्रकर्षात वातजादिसप्तविधबुद्ध्यवस्थामतिक्रम्य अतीव प्रवृद्धा वर्त्तते सैवात्र अखण्डबुद्धित्वेन गृहीता इति। परन्तु 'अखण्डबुद्धिस्तथा चैका" इत्यत्र "गलगण्डस्तथा चैक" इति पाठकल्पन सर्वथैव मनोरमनिति।

नवग्रन्थीना विवरणम्।—

"—ग्रन्थयो नवधा मताः।
त्रिभिर्दोषैस्त्रयो रक्ताच्छिराभिर्मेदसो व्रणात्॥
अष्टा मांसेन नवम"—" ॥७१॥

इत्यादिना कुरण्डकशब्दवाच्यत्वेन, चिकित्सार्थं तु पृथगभिधानमात्रमस्य न दोष। तथैका गण्डमालिका इति।—गण्डमाला जातिश्च (?) एका स्यात्। गले गण्डकरूपा व्रणा एव गण्डमालादयो (?) ज्ञेया, मालातुल्यगण्डयोगात् गण्डमाला गलगण्डाश्चिप्रा, यदुक्तं—"कर्कन्धुकोलामलकप्रमाणैः कक्षासमन्यागलवङ्क्षणेषु। मेदःकफाभ्यां चिरमन्दपाकैः स्याद्गण्डमाला बहुभिश्च गण्डैः॥" (रो० वि० गलगण्ड०) इति। अष्टा एव मेदोऽपचीति वदन्ति केचित् तुल्ययन्त्रिसाधम्यात् (?), यत,—"ते ग्रन्थय केचिदवाप्यपाका स्रवन्ति नश्यन्ति भवन्ति चान्ये। कालानुबन्धं चिरमादधाति सैवापचीति प्रवदन्ति तज्ज्ञा॥" (रो० वि० गलगण्ड०) इति। नन्वत्र कण्ठस्थानप्रसिद्धत्वाद्गण्डमालाऽपची च वङ्क्षणे प्रतीता? सत्यम् दोषगतिविशेषाद्वङ्क्षणसम्भवेऽपि गण्डमाला भवतीति न दोष, यदाह भोज,—"वातपित्तकफा व्रणा मेदश्चापि समाश्रितम्। लङ्घयो कण्डरा प्राप्य मर्म्मास्थ्यसृङ्मांसदूषणान् बहून्॥ कुर्वन्ति ग्रथितास्तैस्तैः पुनः प्रकृपितोऽन्तिलः। तान् दोषानुर्ध्वगो वस्तु कक्षान्यागलाश्रितः॥ नानाप्रकारान् कुरुते ग्रन्थीन् सा त्वपची मता। अपची कण्ठमन्यासु कक्षावङ्क्षणसन्धिषु। गण्डमाला विजानीयादपचीतुल्यलक्षणाम्॥" इति। गण्डालजी तु चैका स्यादिति।—गण्डालजी चाव गलगण्डस्यैव नामान्तरं, यतो गण्डमालाया भिन्नो गलगण्ड एव नान्यत, अत एवाह माधव,—"वात कफश्चापि गले प्रदूष्य, मांसे च सश्रित्य तथैव मेद। कुर्वन्ति गण्ड कमश स्थिरैः समुचित त गलगण्डराज॥" (सु० नि० ११ अ०) इति। भोजेनाप्युक्त—"सङ्घातं ग्रीथमल्य वा हनुमन्यागलाश्रयम्। लम्बन्त मुक्तवद्दृष्ट गलगण्ड विनिर्दिशेत्॥" इति। यद्वा—गण्डालजीत्यत्रालजी † क्षुद्ररोगपाठता बोद्धव्या। एके गण्डालजीस्थाने गण्डापचीति पठन्ति, तन्मते तु एतौ गण्ड एका अपची चेति। अयमपि पाठो मनाङ्नरो न दोष॥७०॥

ग्रन्थयो नवधा मता इति।—ग्रन्थिषु ग्रीफसमुत्थानो व्रणभेद, लोके "वतौगुरी" इति शब्दवाच्यत्वेन प्रतीत, तद्यथा—"वातादयो मांसमसृक् प्रदुष्टा सन्दूष्य

† सुश्रुते क्षुद्ररोगे अलजी नास्ति, वाग्भटे एका अलजी या उच्यते सुश्रुते सा अन्त्रालजी, रोगविज्ञाने अन्त्रालजी इति नाम्ना पठ्यते, सा च अक्षिण्यपि ग्रन्थे

षड्बुर्दाना विवरणम् ।—

"—षड्विधं स्यात्तथाऽर्बुदम् ।
वातात् पित्तात् कफाद्रक्तात् मांसादपि च मेदसः ॥७२॥

त्रिविधश्लीपदाना विवरणम् ।—

श्लीपदञ्च त्रिधा प्रोक्तं वातात् पित्तात् कफादपि ॥७३॥

मेदश्च तथा शिराश्च । इत्तोन्नत विग्रथितञ्च शोथ कुर्वन्त्यतो ग्रन्थिरिति प्रदिष्ट ॥" (रो० वि० गलगण्ड०) इति। नवप्रकारमाह त्रिभिर्दोषैरिति ।—त्रयो मेदा, तेन व्यस्तेन वातेन, पित्तेन, कफेनेत्यर्थ । रक्तादुधिराच्चतुर्थ । शिराभिरिति—शिरा-ग्रन्थि पञ्चम । मेदसा इति—दुष्टमेदसा जनित षष्ठ । व्रणादिति—व्रणजानत सप्तम । भग्नेति—दोषदूषिताखिलनिमित्तोऽष्टम । मांसेनेति—मांसजनिता नवम इति। ननु लाघवेन पञ्चभेदा ग्रन्थयोऽभिहिता, वातादिदोषैश्च त्रय मेद-शिराभ्याञ्च द्वाविति तत कथमत्र नवभेदा दर्शिता ? उच्यते, यद्यपि लाक्षागुग्गुलव दूष्यभेदेनो-दाहृतौ, तथाऽपि ग्रन्थ्याश्रयस्थान विशेषान्मेद शिरावत् तत्सन्धिस्थान एवौक्तौ, यदुक्त भोजे—"मेदो ग्रन्थुर्बदा मांसे निश्चपेदथवा चर्मि । तत्र मेदोभवग्रन्थि श्चावो भवति पाण्डुर ॥ इत्यादिना। चिकित्सार्थं न पृथगभिधानम् अन्यत्रापि दृश्यते, यदुक्त—"ग्रन्थौ मांसोद्भवे योज्या क्षयमेव क्रियादथ । शिराग्रन्थि परित्यज्य शेष यत्नेन साधयेत ॥" इत्यादिभिरदोष ॥७१॥

षड्विधमिति ।—अर्बुदमपि व्रणभेदो व्रणाकारत्वात, यत —"गात्रप्रदेशे क्वचिदेव दोषा सम्मूर्च्छिता मांसमसृक् प्रदूष्य । उक्त स्थिर मन्दरुज महान्तमल्पमूल चिरवृद्धिपाकम् ॥ कुर्वन्ति मांसोच्छ्रयमथगाध तदर्बुद ग्राम्यविदो वदन्ति ॥" (रो० वि० गलगण्ड०) इति। षड्विधत्वञ्च सुगमम। मांसादपि चेति चकार-ग्रहणादत्र शिरार्बुदमपि ग्राह्यम, अभ्यर्बुदमपि केचित, तथा हि—"यज्जायतेऽन्यत खलु पूर्वजाते ज्ञेय तदभ्यर्बुदमर्बुदज्ञै । यद्वन्धनात युगपच्च मांसाद्या शिरार्बुद तच्च भवेदसाध्यम ॥" (सु० नि० ११ अ०) इति ॥७२॥

श्लीपदज्ञेति ।—चरणयो शिलावदुत्कृत्य श्लीपदशब्दवाच्य । तथेति ग्रहणात करकर्णादिष च भवतीति केचिदाहु , यदुक्त—"य सज्वरो वङ्क्षणजो भृशार्त्ति शोथो वृषा पादगत क्रमेण। तत श्लीपद स्यात करकर्णनेत्रागण्ठौष्ठनासास्वपि क्षुद्रगेषु अलि। चरके शोथाधिकारे ग्रन्थेरनन्तरमेका अलजी पठिता। किञ्च, गण्डालजी गलगण्ड इति नामान्तरमिति तु न मनोरमम्।

षड्विद्रधीनां विवरणम्।—

विद्रधिः षड्विधः ख्यातो वातपित्तकफैस्त्रयः।
रक्तात् क्षतात् त्रिदोषैश्च—" ॥७४॥

पञ्चदशव्रणानां विवरणम्।—

"—व्रणाः पञ्चदशोदिताः।
तेषां चतुर्ष्वा भेदाः स्युरागन्तुर्देहजस्तथा ॥७५॥

कैश्चिदाहुः॥" (रो० वि० श्लीपद०) इति। वातपित्तकफादित्यनेन व्यस्तसमस्तेन कृत्वा * चत्वारो भेदा, तेन वातेन पित्तेन श्लेष्मणा चेत्यभिप्रायः। एके तु त्रय एव भेदा श्लीपदस्येति वदन्ति, यत तत्र कफस्याव्यभिचारेण प्राधान्यम्, तदुक्तं—"श्लीपदेतानि जानीयात् श्लीपदानि कफोच्छ्रयात्। गुरुत्वञ्च महत्त्वञ्च यस्मात्तेषु विना कफात्॥" (सु० नि० १२ अ०) इति॥७३॥

विद्रधिरिति।—विद्रधिरपि व्रणभेद एव, यदुक्तं—"त्वग्मांसमांसमेदोसि प्रदूष्यास्थिसमाश्रिता। दोषा शोथं शनैर्घोरं जनयन्त्युच्छ्रितं भृशम्॥ महामूलं रुजावन्तं दुष्टं वाऽप्यथवाऽऽशयम्। स विद्रधिरिति ख्यातो विज्ञेयः षड्विधश्च सः॥" (सु० नि० ९ अ०) इति। चरकै तु विदाहप्रकर्षाद्विद्रधिरुक्तः, यदुक्तं—"स वै शीघ्रविदाहित्वात् विद्रधीत्यभिधीयते" (च० सू० कियन्त शिरसीय०) इति। स च बाह्याभ्यन्तरे भवति, अन्तरे तु गुल्मसादृश्यम्, यत,—"तुल्यदोषसमुत्थानात् विद्रधेर्गुल्मकस्य च" (सु० नि० ९ अ०) इति। ननु तुल्यत्वात् कथं विद्रधे पाक गुल्मस्य न पाक? उच्यते, "न निबन्धोऽस्ति गुल्मानां विद्रधि प्रति बन्धनम्। गुल्माकारा स्वयं दोषा विद्रधिर्मांसशोणितम्॥ विवरानुचरो ग्रन्थिरस्य बुद्बुदको यथा। एवमाकारो गुल्मस्तु तस्मात् पाकं न गच्छति॥" (सु० नि० ९ अ०) इति। तथाऽन्यत्रापि—"मांसशोणितबाहुल्यात् पाकं गच्छति विद्रधिः। मांसशोणितहीनत्वात् गुल्मः पाकं न गच्छति॥" (सु० नि० ९ अ०) इति। षड्विधोऽयं सुगम, तत्र तु क्षतादिति—काष्ठलगुडपाषाणादिप्रहारात्। त्रिदोषैरिति—मिलितदोषत्रयेण, सन्निपातेनेत्यर्थः॥७४॥

व्रणा इति।—व्रणस्तु शोथसमुत्थान कथित शोथोपलक्षितमित्यर्थः, अत एवाह कश्चित पूर्वरूपत्वेन यथा—"एकदेशोत्थितः शोथो व्रणानां पूर्वलक्षणम्' (रो० वि०

* सुश्रुतवाग्भटयो रोगविनिश्चये च त्रिविधमेव श्लीपदमुक्तं, न तु चतुर्विधम्। अनेन टीकाकारेणापि चत्वारो भेदा इत्युक्ता विवरणे पुनः त्रैविध्यमेव प्रदर्शितम् इति सुधीभिर्द्रष्टव्यम्।

शुद्धो दुष्टश्च विज्ञेयस्तत्सङ्ज्ञा कथ्यते पृथक् ।
वातव्रण पित्तजश्च कफजो रक्तजो व्रण ॥७६॥
वात-पित्तभवस्त्वन्यो वात-श्लेष्मभवस्तथा ।
तथा पित्त-कफाभ्याञ्च सन्निपातेन चाष्टम: ॥७७॥
नवमा वात-रक्तेन दशमो रक्त-पित्तत: ।
श्लेष्म-रक्तभवस्त्वन्यो वात-पित्तासृगुद्भव: ॥७८॥
वात-श्लेष्मासृगुत्पन्न पित्त-श्लेष्मासृसम्भव: ।
सन्निपातासृगुद्भूत इति पञ्चदश व्रणा ॥७९॥

व्रणशोथ०) इत्यादि। स च शोथो विलक्षण उक्तस्त पृथु यथित समो विषमो वा लक्ष्मासस्थाथो दोषसङ्घात शरीरैकदेशोत्थित इत्युच्यत। तेषा चतुर्धा भेद स्यादिति—तथा व्रणाना चतुर्धा भेद इति। अत्र चतु प्रकारभेदत्वेन सङ्ख्याद्वैविध्ये सामान्यो दर्शित, आगन्तुर्दहज शुद्धो दुष्टश्चेति। आगन्तुरात—सङ्घातबलप्रवृत्त, शस्त्रव्यालाद्दित इत्यर्थ। दहज इति—दोषबलप्रवृत्तशारीरसङ्घ, यदुक्त— द्विधा व्रण स विज्ञेय शारीरागन्तुभेदत। दोषैरात्मशरीरस्थ शस्त्राद्यभिहतस्य च ॥" (रो० वि० शारीरव्रण०) इति। शुद्ध इति—शुद्धव्रण, यदुक्त—"विशुद्धातत्वाभो ऽतिसृष्ट श्लक्ष्ण स्निग्धोऽल्पवेदन। सुव्यक्तवर्णो निरास्राव शुद्धो व्रण इति स्मृत ॥" (रो० वि० शारीरव्रण०) इति। दुष्ट इति—दुष्टो व्रण, यदुक्त—"पूति पूयाति-दुष्टासृक्स्राव्यसङ्गी चिरस्थिति। दुष्टव्रणोऽतिगन्धाद्य शुद्धलिङ्गविपर्ययै ॥" (रो० वि० शारीरव्रण०) इति। कचित्तु शुद्धदुष्टशब्दो साध्यासाध्यत्वेन व्याख्यानयन्ति, तन्न सवमतम। तत्सङ्ज्ञा कथ्यत पृथगिति—तद्व्रणस्य सङ्ज्ञा नामानि तम पृथक् भिन्नत्वेनाव कथ्यत, सा तु पञ्चदशप्रकारा वक्ष्यमाणा बोद्धव्या। यद्यपि षड्विधोऽन्यत्र व्रण प्रतिपादितस्तथाऽप्यत्र दोषाणा प्रभेदेन पञ्चदशप्रकारा दर्शित, तदुक्त सुश्रुते —"कदाचिदेकशो दोषा समस्ता शोणितसहिता वा अनेकधा प्रसर्पन्ति' (सु० सू० २१ अ०) इति, तेन पञ्चदशप्रकारा भवन्ति, यत आमाशय एव वातादिकै शोणितचतुर्थै शरीरमिद धार्यत इति द्वितीयदर्शनात; यदुक्त—"कालान्तरेणा-भ्यदित तु पित्त कृत्वा वर्षे वातकफौ प्रसह्य। पचत्यत शोणितमेव पाका मतो-ऽपरेषा विदुषा द्वितीय ॥" (सु० सू० १० अ०) इति। पञ्चदशसङ्ज्ञा सुबोधा इति ॥७५—७९॥

अष्टसप्तोव्रणाना विवरणम्।—

सद्यो-व्रणस्त्वष्टधा स्यात् * अवक्लृप्त-विलम्बितौ।
छिन्न-भिन्न-प्रचलित-घृष्ट-विद्ध-निपातिता ॥८०॥

सद्योव्रण इति।—शस्त्रादिपदारणनिमित आगन्तुकसञ्ज्ञ सं चानेकाकृतिरित्येवं भाषन्ते, यदुक्त—"नानाधारमुखैः शस्त्रैर्नानास्थानानिपातितैः। भवन्ति नानाकृतयो व्रणास्तान् निबोध मे॥" (रौ० वि० सद्योव्रण०) इति। तेषा भेदमाह, अवक्लृप्तमिति—अपकर्त्तनम्। विलम्बितौ लम्बनशीलौ मासावलम्बनेनेत्यभिप्राय। छिन्नमिति—तिर्यक् ऋजुर्वा छेदनमवयवादिषु, गात्रस्य पातनमिति भाव। भिन्नमिति—कोष्ठे बहुधा शस्त्रिकृतच्छेद्यविषाणादिभिर्भेदनम्, यदुक्त—"शस्त्रीकृतेषुखड्गाद्यविषाणैः राशयो हत। यत्र किञ्चित प्रस्रवेत तद्धि भिन्नलक्षणमुच्यते॥" (रौ० वि० सद्योव्रण०) इति। आमयोऽत्र व्याध तत कोष्ठशब्देनापदर्शितम, तदृथा—"व्याध्यामाशयपक्वाना मूत्रस्य रुधिरस्य च। दृष्टस्तु स्फुप्फुसस्थ कोष्ठ इत्यभिधीयते॥" (सु० चि० २ अ०) इति। अत एवाशयरहितऽत्यष्टौ व्यध एव वर्णनात्। प्रचलितमिति—प्रकर्षेण चलित मांसादिकमिति भाव। तल्लान्तर पिच्छितामिति नामान्तरम, यत,—"प्रहारं पीडनाच्चान्त यद्वृत्त पृथुता गतम। साध्य तत पिच्छित विद्यात्सक्थिरक्तपरिप्लुतम॥" (सु० चि० २ अ०) इति। † अथवा प्रचलितमित्यनेन यद्व्रण यद्व्रणस्य तथा सद्योव्रणस्य च चिकित्साविषय, तेन भग्नाधिकारे प्रोतपादितोऽपि तस्यैवाबाधकरो न दोष सञ्जरक्तपरिप्लुतत्वेन व्रणभावत्वात। घृष्टमिति—घर्षितम, तदृथा—"घर्षणादभिघाताद्वा यदङ्ग विगतत्वचम। उपास्राव्यान्वित तत्तु घृष्टमित्यभिधीयत॥" (रौ० वि० सद्योव्रण०) इति। विद्धमिव विद्धम, यथा—"सूच्याद्यैर्यन्त्राभिहत

---

* वाग्भटे अवक्लृप्त इत्यत्र अवक्षत्त तथा प्रचलित इत्यत्र विदलित इति नामद्वय सङ्गतार्थकम अवक्लृप्तप्रचलितनामस्वीकारे टीकाकारकृतव्याख्यानासङ्गतये। एवञ्च टीकायामपि अवक्लृप्तमित्यत्र अवक्षत्त तथा प्रचलितमित्यत्र विदलितमिति नामद्वय गृह्यते ततश्च अवक्षत्तविदलितयो तल्लान्तरीत्या चत पिच्छितञ्च इति नामान्तरमपि सङ्गच्छते।

† "अथवा" इत्यारभ्य "न दोष" इत्यन्त ग्रन्थ अर्थसङ्गतिविरहित दुष्ट। "सञ्जरक्तपरिप्लुतमित्यनेन व्रणभावात सञ्जरक्तागम दर्शयति, तेन यत् व्रण पिच्छितं तत् भग्नस्य सद्योव्रणस्य च चिकित्साविषयम्" इति मधुकोषविवृतिरत्र द्रष्टव्या।

द्विविधकोष्ठभेदस्य विवरणम्।—

कोष्ठभेदो द्विधा प्रोक्त छिन्नान्को निःसृतान्वक' ॥८१॥

अष्टास्थिभङ्गाना विवरणम्।—

अस्थिभङ्गोऽष्टधा प्रोक्तो भग्न पिष्ट-विदारितौ।

ग्रैदङ्ग त्वाशयादिना। छत्रच्छिद्रत निर्गत वा तद्विद्धमिति निर्दिशेत॥" (सु० चि० २ अ०) इति। निपातित इति—विशेषेण पातितोऽवयवात् या यत्र स तथा। * एके अवलिप्तविलम्बिना विवक्षितामति नाम्ना एकमेव भेद प्रतिपादयन्ति, तदृथा—"नातिच्छिन्न नातिभिन्नमुभयोर्लक्षणान्वितम्। विषम व्रणनद्ध यत् तत् त्वच त्वभिनिर्दिशत्॥" (सु० चि० २ अ०) इति। अवाक्तिविषयत्वादष्टविधो लिखितो न दोष ॥८०॥

कोष्ठभेदो द्विधा प्रोक्त इति।—एक छिन्नान्व अपरो निःसृतान्वक इति। अत्र कोष्ठशब्दनोदरमात्रमेव गृह्यत न तु पक्वाशयादिसज्ञ ॥८१॥

अस्थिभङ्ग इति।—अस्थिभङ्गपर्यायवाचको भग्न इत्यत्र कथित, न तु भग्नशब्दोऽष्टसङ्ख्यायामिह गणित, तेन तु पिष्टविदारितादयोऽष्टौ गणिता। अग्निवेशे तु भग्न द्विविध काण्डसन्धिभेदात्, यदुक्त—"भग्न समासात् द्विविध च्युताश्च। काण्डे च सन्धावपि तत्र सन्धौ। उत्पिष्टविश्लिष्टविवर्त्तितत्व तिर्य्यग्गत क्षिप्तनष्ट षट् च॥" (रो० वि० भग्न०)। अत्र तु † यद्विदारितोर्ईगौ द्वौ भेदावधिकौ लिखितौ तद्ग्रन्थान्तरसंवादात् न दोष, यत अथ क्षिप्तदूढक्षिप्तस्थाप्यभिधाने प्राप्तेऽनुक्तसंख्यौर्ईक्षिप्ताभिधान, तेनावार्ईग पृथक् दर्शित, यदुक्तम्—"अथ क्षिप्तोर्ईगावेतौ

* एके अवक्लृप्तविलम्बितयो रयोरेव चतमिति नाम्ना इत्यादि पाठकल्पन कथञ्चित् सङ्गच्छत। अत्रेद बोद्धव्य—सौश्रुतचतस्रणी यथा वाग्भटेन अवक्लृप्तप्रविलम्बित इति नामद्वयेन पठित, तथा छिन्नव्रणोऽपि छिन्नविपातित इति नामभ्या पठित, "गात्रस्य पातन तद्धि छिन्नमित्यभिधीयते" इति छिन्नलक्षणात्, एवञ्च षडविध सद्योव्रण इति सुश्रुतोक्ता अष्टविध सद्योव्रण इति वाग्भटवचनस्य ऐक्य सम्पद्यते। वाग्भटीक्त छिन्नचतयो प्रत्येक भेदस्य सामान्यविशेषभावेन समर्थनीय, सुश्रुतेन तु सामान्यत एकैक एव भेदो गृहीत इति।

† विदारितोर्ईगौ द्वौ अधिकौ इति यत् टीकाकारेणोक्त, तत्र हेतुम्, उभयोरेव सुश्रुतेन भिन्ननाम्ना गृहीतत्वात्। तेन हि विदारित काण्डभग्ने पाटितनाम्ना पठित। रोगविनिश्चयेऽपि "छिन्न द्विधा" इति काण्डभग्नोक्तस्य

विवर्त्तितश्च विश्लिष्टस्तिर्य्यक्क्षिप्तस्त्वधोगतः॥
ऊर्द्ध्वग सन्धिभग्नश्च—" ॥८२॥

तुल्यलक्षणमन्यत्रौ इत्यादि। विदारितो नाम भग्नस्यास्थिभङ्गेनान्यत्व प्रतिपादितत्वात् अत्रापि लिखित। * सुश्रुतेनाप्ययमेव सन्तान्तरेण कथित, यदुक्त—"तरुणास्थीनि भज्यन्त भज्यन्ते नलकानि च। कपालानि विभिद्यन्ते स्फुटन्ति कुचकानि च॥" (सु० नि० १५ अ०) इति। अत्र चकारग्रहणाद्दलयात्यपि स्फुटन्ति इत्याभप्राय, यतोऽस्थीनि पञ्चविधानि भवन्ति तरुणनलकबलयकपालकुचकभेदात्, अत एव स्फुटितमिति भग्न सुश्रुतेनोक्तम्। अथोक्तापेक्षविदारितादानामपि विवरणमाह—सन्धाङ्गनत शोथो वेदनादिकश्च विशेषत्र। विदारित इति—† इधा सन्ध्यस्थीरतिक्रान्तता वेदना च। विवर्त्तित इति—एकमन्ते पार्श्वागमनात विषमाङ्गता वेदना च। विश्लिष्ट इति—सन्धाक् सन्धिविश्लेष शिथिलतामात्र शोचकृताशोथो च। तिर्य्यक् क्षिप्त इति—एक सन्ध्यस्थि सान्धस्थान त्यक्त्वा तिर्य्यक् याति तथा तीव्रपीडा स्यु। अधोगत इति—वक्ष्यमाणोर्द्ध्वगलक्षण किञ्चिदधोगमनमिति विशेष। ऊर्द्ध्वग इति—विषमा कृतास्थीरातिक्रान्तत्वात् तेन एकास्थिविक्रियया उभयास्थिविक्रियया वा

टीकाया श्रीकण्ठदत्तेन "क्षिप्त द्विधेति एकमणावदीर्ण बहुविदीर्णमन्यत, एक विदीर्ण सलग्नम अपर विदीर्ण द्विधाभूतम्, अपरस्तु विपुलैकविदरणमित्याह। सुश्रुते एतत पाटितसज्ञम" इत्यनेनोक्तम। ऊर्द्ध्वग्र सुश्रुतमाधवाभ्याम् अतिक्षिप्तनाम्ना अभिहित। अत्र मधुकोषविद्वात,—"अधःक्षिप्तवत ऊर्द्ध्वक्षिप्तस्यापि अभिधान प्राप्ते अनुक्तिरतिक्षिप्तेऽवरोधात" इति।

विदारितस्य साधयतु "सुश्रुतेनाप्ययमेव" इत्यादिना यदुक्त तदपि न समीचीनम् यत तरुणादिभेदेन पञ्चविधानामस्थ्ना नमनादिरूप भग्नविशेष दर्शयितु सुश्रुतेन श्लोकोऽय निबद्ध। विदारितस्य साधनायम उक्तश्लोक प्रमाणयत नमनादिकस्यापि अस्थिभङ्गसङ्ख्याया गणनमुचितम। किञ्च विदारितस्य सन्तान्तरमपि उक्तश्लोके किमपि नास्ति। विदारितस्तु द्वादशविधास्थिभग्नान्तर्गत पाटित इति प्रागेव प्रदर्शितम इति।

† लक्षणमेतत सुश्रुतेन अतिक्षिप्तस्यैव उक्तम्। अपरञ्च टीकाकारेणानेन "विदारितो नाम भग्नस्य आस्थिभङ्गेन" इत्यादिना प्रागेव अस्थिभङ्गान्तर्गत एव विदारित इति प्रतिपादितम, अत पुन सन्धिभग्ने विदारित उक्त इति सुधीभिर्विचार्य्यम्।

चतुर्विधाग्निदग्धव्रणाना विवरणम्।—

"—वह्निदग्धश्चतुर्विधः।
प्लुष्टोऽतिदग्धो दुर्दग्धः सम्यग्दग्धः प्रकीर्त्तितः ॥८३॥

पञ्चनाडीव्रणाना विवरणम्।—

नाड्य पञ्च समाख्याता वात-पित्त-कफैस्त्रिधा।
त्रिदोषैरपि शल्येन—" ॥८४॥

द्वयोरप्यस्थ्नो परस्परातिक्रमण दूरगमन वेत्यर्थ। * सन्धिभग्न इति—द्वयो अस्थ्नो सन्धान सन्धि, सन्धेस्तु विश्लेष सन्धिभग्न कथित। नन्व कथ सन्धिमुक्त भग्नमुच्यते? अस्थ्ना हि भङ्गो युक्त, उच्यते—अस्थिविश्लेषोऽत्र भग्नोऽभिप्रेत यत अस्थिसख्या पृथग्भावत्वात तेन काण्डभग्न सान्धभग्नत्वाग्निवेशे पूर्व द्विधा प्रतिपादितम्, यदुक्त—'षडस्थिष्टादिभेदेन सन्धिविश्लेष उच्यते। काण्डभग्ना द्वादशभिर्भेदै कर्कटकादिभ ॥" इत्यादि। अत्र काण्डभग्नोऽस्थिभग्न, तस्य द्वादशभेदा सन्धिभग्नान्तर्भूता बोद्धव्या इति न दोष ॥८२॥

वह्निदग्ध इति।—अग्निदग्धश्चतुर्विधश्चतु प्रकार, ते के प्रकारा इत्याह, प्लुष्ट इत्यादि।—यो विवर्णमात्रमात्र प्लुष्यते स प्लुष्ट। यत्र मासावलम्बन गात्रविश्लेष शिरास्नायुसन्धिस्थिव्यापादन ज्वरदाहपिपासामूर्च्छाशोषद्रवा भवन्ति सोऽतिदग्ध। यत्रोत्तिष्ठन्ति स्फोटास्तीव्रदाहवेदनाशिरास्रोपशाम्यन्ति स दुर्दग्ध। सम्यक् दग्ध इति—अनवगाढ तावण सुसस्थित इति ॥८३॥

अथ नाडीसङ्ख्या नाड्य इति।—नाडीति—गम्भीरगति, पूयस्यातिदूरप्रवेशनात् गतिरित्यन, नाडाव यहइति सा नाडी इत्युच्यते, अन्त सुषिर नाल नाडी, तेन लोके "सरड़ा"शब्दवाच्यो व्रणविशेष, तथा हि—"शीघ्र न पक्वमिति पक्व-

* भग्नस्तु सामान्यतो द्विविध काण्डभग्न सन्धिभग्नश्च तत्र काण्डभग्न अस्थिभग्न, स च द्वादशविध, सन्धिभग्नश्च पिष्टादिरूप षड्विध, न तु सान्धभग्न षड्विधात्तर्गतभग्नविशेष सुश्रुतेनोक्त, एवञ्च सन्धिभग्न इत्यस्य अस्थिभङ्गभेदे गणन नोचितम्। अस्थिभङ्ग भग्न अष्टधा प्रोक्त, सन्धिभग्ननामा भग्नश्च पिष्टादिरूप, एवमन्वये कृते कथञ्चित् सङ्गति स्यात, परन्तु विस्तारितस्य सन्धिभग्नभेदे अन्तर्भावात् सप्तविधश्च सन्धिभग्नो भवति, अपरञ्च अस्थिभग्न द्वादशधा सुश्रुते, अत्र तु अष्टधा एतत् वैषम्यद्वयमायाति इति।

अष्टभगन्दराणां विवरणम्।—

"—तथाऽष्टौ स्युर्भगन्दराः।
शतपोनस्तु पवनादुष्ट्रग्रीवश्च पित्ततः ॥८५॥
परिस्रावी कफाज्ज्ञेयः ऋजुर्वात-कफोद्भवः।
परिक्षेपी मरुत्पित्तादर्शोजः कफ-पित्ततः॥
आगन्तुजातश्चोन्मार्गी शल्यावर्त्तस्त्रिदोषजः ॥८६॥

सुपचते यो यो वा व्रण प्रचुरपूयमसाधुवत्त। अभ्यन्तर प्रविशति प्रविदार्य तस्य स्थानानि पूर्ववद्विहितानि तत स पूय ॥ तस्मादिमावगमनाद्भगन्दरिरिष्यते तु नाडीव यद्वहति तेन मता तु नाडी॥" (सु० नि० १० अ०) इति। पञ्च समाख्यातात—पञ्चप्रकारा। वातपित्तकफैस्त्रिधा त्रिदोषैरपि शल्येनेति—वातेन पित्तेन कफेन चयो भेदा। त्रिदोषैरिति—मिलितदोषत्रयेण चतुर्थ। शल्येनेति—आगन्तुनिमित्त पञ्चमो भट इति। शल्यनिमित्तलक्षणञ्च यथा—"नष्ट कथञ्चिदनुमार्गमुदीरितेषु स्थानेषु शल्यमचिरेण गति करोति। सा फेनिल मथितसुरासदृग्विमिश्र स्राव करोति सहसा सरुजा च नित्यम्॥" (रो० वि० नाडीव्रण०) इति ॥ ८४ ॥

तथाऽष्टाविति।—गुदवस्तिभगदेशदारभ्यात भगन्दर, भगशब्दो गुदादुपलक्षणम्, भोजेऽप्युक्त—'भग परि सनन्तात्र गुद बस्ति तथैव च। भगवद्धारयेत यस्मात्तस्मात् ज्ञेयो भगन्दर॥" इति। अष्टाविति—अवाष्टसङ्ख्या स्यु, तास्तु शतपोनक-प्रभृतय। शतपानकतुल्यत्वात शतपोनक, स तु वातपाय, शतपोनश्चालनिका इति लोके, सहस्रधारा इत्यन्ये। उष्ट्रग्रीव इति—पिडकावस्थागतगलवक्त्रत्वेनोष्ट्रग्रीवा-कारत्व तेनोष्ट्रग्रीवसज्ञा, अयन्तु पित्तबहुल। परिस्रावयोगात परिस्रावी कण्डूमान् भवति स च कफप्राय। ऋजुर्वातकफोद्भव इति—वातकफलक्षणाभ्या युक्त ऋजु। परिक्षेपी मरुत्पित्तादिति—वातपित्तलक्षणाभ्या युक्त, परिक्षेपीति—गुद परि सनन्तात प्रसरणशील प्रायेण इति भाव। अर्शोजमाह, अर्शोज कफपित्तत इति—कफपित्तचिह्नाभ्या मिलित। अर्शोज इति—अर्शोभगन्दर इति, तत यथा—"कफपित्ते तु पूर्वोक्त दुर्नामाश्रित्य कुप्यत। अर्शोमूले तत शीघ्र कण्डूदाहादिमान् भवेत॥ स शीघ्र पक्वभिन्नोऽस्य क्लेदयन मूलमर्शस। सवत्यजस्र मतिभिरर्शोभगन्दर॥" (वा० उ० २८अ०) इति। आगन्तुजातश्चोन्मार्गीति—आगन्तुज प्रहारादिजनितो भगन्दर उन्मार्गिसज्ञो भवति, उन्मार्गेण क्रमिकृतमार्गेण

पञ्चोपदंशाना विवरणम्।

मेढ्रे पञ्चोपदंशाः स्युर्वात-पित्त-कफैस्त्रिधा।
सन्निपाताच्च रक्ताच्च—" ॥८७॥

पुरीषादिगमनात्। शङ्खावर्त्त इति—शङ्खावर्त्तो नाम भगन्दरस्त्रिदोषजनितो ज्ञेय शम्बूकावर्त्तवत् व्रणविशेष, पूर्णतया शम्बूकावर्त्तवत् आवर्त्तन वेदना दोषगति-विशेषाद्भवति, तथा च भोज,—"नदीना परिपूर्णाना शम्बूकावर्त्तका यथा। समुत्तिष्ठन्ति वेगेन तोयवेगसमीरिता॥" इति। ननु माधवेन भगन्दर पञ्चविध उक्त, तथा हि—"गुदस्य द्व्यङ्गुले चैव पार्श्वत पिडकाऽर्त्तिकृत्। भिन्ना भगन्दरो ज्ञेय स च पञ्चविधो मत॥" (रो० वि० भगन्दर०) इति, तत कथमत्राष्टविध? उच्यते, माधवनिदाने तु वय सर्गभेदा मतपानकादीना दोषलक्षणदर्शनात तेष्वेवान्तर्भाव्या, अत्र प्रतिपादितभिन्नलक्षणत्वात चिकित्सार्थं पृथक् दर्शितो न दोष, यथाऽर्शोभगन्दरे प्रतिपादितत्वात् (?)॥ ८५।८६॥

मेढ्रे पञ्चोपदंशा स्युरिति।—उपदंशसज्ञा रूढा बोद्धव्या व्रणविशेषत्वेन, मेढ्रे लिङ्गे पञ्चप्रकारो भवति, यदुक्तमन्यत्रापि—'इत्वाभिघाताद्रजदूषितापादधावना-दल्पसेवनाद्वा। योनिप्रदोषाच्च भवन्ति लिङ्गे पञ्चोपदंशा विविधाश्चरोक्ते॥" (रो० वि० उपदंश०) इति। पञ्चप्रकारा अत्र सुगमा। चकारात् लिङ्गे लिङ्ग-वत्तिरिति मेढ्रोऽत्र ज्ञातव्य, यदुक्तम्—"अङ्कुरोरव सङ्घातैरुपर्युपरिसस्थितै। क्रमेण जायते वत्तिलासचूडमिवोपमा॥ कोषस्याभ्यन्तरे सन्धौ सर्वसन्धिगताऽपि वा। लिङ्ग-वत्तिरिति ख्याता लिङ्गार्श इति चापरे॥" (रो० वि० उपदंश०)। अचार्योऽयायमपि वक्ष्यमाणशूकदोषेषु पठितो न दोष, एकस्थानगतसाधर्म्यात्। यद्यपि अभिघातजत्वं मेढ्रस्य उपदंश आगन्तु षष्ठ सम्भवो, तथाऽपि तस्य * दोषलिङ्गव्युत्क्रान्ततया दोषजेष्वन्तर्भाव, अत एवाह क्वचित—"वेगनिग्रहदोषार्तिखरस्पर्शविघट्टने। दोषा दुष्टा गता गुह्य त्रयोविंशतिरामयान्॥" (वा० उ० ३३अ०) इत्यादि। त्रयोविंशति-रित्यनेन पञ्चोपदंशा दश चाष्टौ च शूकजा इत्यर्थ। गुह्यशब्देनात्र स्त्रीणामुपदंश-सम्भव क्वचिदिति, यत —'रूजादाहार्त्तिबहुलास्तथाऽतीदसमन्विता। स्त्रीणा पुसाञ्च जायन्ते उपदंशा सुदारुणा॥" इति पाठ प्रायेण अनार्ष आहु॥८७॥

---

* "दोषलिङ्गयुक्ततया" इति मधुकोषपाठ, युक्त, व्युत्क्रान्तशब्दश्च अतिक्रान्त-विपरीतार्थकत्वात पाठोऽयमसङ्गत.।

चतुर्विंशतियूकदोषाणां विवरणम्।—

"—मेढ्रे यूकामयास्तथा।
चतुर्विंशतिराख्याता लिङ्गाश्चार्शो ग्रथित तथा ॥८८॥
निवृत्तमवमन्थश्च मृदित शतपोनक।
अष्ठीलिका सर्षपिका त्वक्पाकश्चावपाटिका ॥८९॥

मेढ्रे यूकामयास्तथेति।—तथेति—लिङ्गसमानस्थानत्वात् यूकामया यूकजा व्याधय कथिता। यूको जलयूक, स तु सविष जलजन्तु जलनलोडूतो जीवविशेष इत्यर्थ, तत्प्रधानो योग इति। यद्वा—लिङ्गहड्डौ वात्स्यायनादिशास्त्रोक्तौ योगौ यूक उच्यते, तन्मुख्यत्वात् लिङ्गहड्डौ अन्यऽपि योगा यूका कथ्यन्ते, तेषा यो विकारसमूह यूकजारणत्वात् यूकदोषजा व्याधय इत्यभिप्राय। चतुर्विंशतिराख्याता इति—तत्र लिङ्गाश्च इत्येको भेद उपदर्शित दर्शित। अष्टादशभेदा लाघवेन लिखिता, तद्यथा—"अक्षिनासाच्छकृत्सु हड्डि शोऽभिवाल्कृति मूढधी। व्याधयस्तस्य जायन्ते दश चाष्टौ च यूकजा ॥" (रो० वि० यूकदोष०) इति। अवशिष्टा पञ्चान्यत्र क्षुद्ररोगेषु पठिता। ते के? निवृत्तावपाटिका निरुद्धमणि-निरुद्धप्रकाश-परिवर्त्तिकाश्चेति, मेढ्रस्थानसम्भवत्वादत्रापि लिखिता न दोष। एव चतुर्विंशति यूकदोषा कथिता। एतषा विवरण केषाञ्चित ज्ञापनार्थं लिख्यते, यथा—अत्र लिङ्गार्शसो लक्षणमुपदर्शितमेव। ग्रथितमिति—"यूकैर्यत् पूरित शस्त्र ग्रथित नाम तत् कफात्" (रो० वि० यूकदोष०)। निवृत्तमिति—उपस्थचर्मपरिवर्त्तनादियुक्त निवृत्तम, यदुक्त—"विसर्पनादिदुष्टेन वायुना चर्म मेढ्रगम्। निवर्त्तते सकृद्दाह क्वचित पाकञ्च गच्छति ॥ पिच्छिल ग्रथित चर्म तत प्रलम्बमथो मणे। निवृत्तसज्ञं सकफ कण्डूगाढित्यवत्तु तत्॥" (वा० उ० ३३ अ०) इति। अवमन्थ इति—"दीर्घा वह्वाश्च पिडका दीर्यन्ते मध्यतस्तु या। सोऽवमन्थ कफासृग्भ्या वेदनारोमहर्षकृत्॥" (सु० नि० १४ अ०)। मृदितमिति—"मृदित पीडित यत्तु सरक्त वातकोपत" (सु० नि० १४ अ०)। शतपोनक इति—"छिद्रैरणुमुखैर्लिङ्ग चित यस्य समन्तत। वातश्लेष्मितजो व्याधि स ज्ञेय शतपोनक ॥" (रो० वि० यूकदोष०) इति। अष्ठीलिकेति—'काठिन्य विषमैर्मुग्रैर्वायुनाऽष्ठीलिका भवेत्' (रो० वि० यूकदोष०) इति। सर्षपिकेति—"गौरसर्षपसस्थाना यूकदुर्मुखहेतुका। पिडका * श्लेष्मवाताभ्या ज्ञेया सर्षपिका तु सा॥" (रो० वि० यूकदोष०)। त्वक्पाक

* सुश्रुतवाग्भटयो, "कफरक्ताभ्याम्" इति पाठ।

मांसपाक स्पर्शहानिर्निरुद्धमणिरुत्तमा।
मासार्बुद पुष्करिका सम्मूढपिडकाऽलजी ॥८०॥

इति—* "वातपित्तकृतो ज्ञेयस्त्वक्पाको ज्वरदाहवान्"(रो० वि० शुक्रदोष०)। अवपाटिकेति—"यस्यावपाद्यते चर्म ता विद्यादवपाटिकाम्। † सकण्डू कठिना वाऽपि श्लैष्मश्लेष्मसमुत्थिता ॥"(सु० नि० १३अ०)। मांसपाक इति—"शीर्य्यते यस्य मांसानि यस्य सर्वाश्च वेदना। विद्यात्तं मांसपाकन्तु सर्वदोषकृतं भिषक् ॥" (सु० नि० १४अ०)। स्पर्शहानिरिति—"स्पर्शहानि तु जलवेच्छोणितं शुक्रदूषितम्" (रो० वि० शुक्रदोष०)। निरुद्धमणिरिति—अल्पमूत्रच्छिद्रत्वेन निरुद्धमणीति, यदुक्तं—"वातेन दूषितं चर्म मणौ सक्तं कृणद्धि चेत्। स्रोतो मूत्रं ततोऽभ्येति मन्दधारमवेदनम् ॥ मणावर्बुदमाशरोधश्च स निरुद्धमणिर्गदः ॥"(वा० उ० ३३अ०) इति। उत्तमेति—'मुद्गमाषोपमा रक्ता रक्तपित्ताद्भवा च या। व्याधिरशोत्तमा नाम शुक्राजोर्ध्वनिमित्तज ॥" (रो० वि० शुक्रदोष०) इति। मासार्बुदमिति—"मासदोषेण जानीयादर्बुदं मांससम्भवम्" (सु० नि० १४अ०)। पुष्करिकेति—"पिडका पिडकाख्याता पित्तश्लेष्मितसम्भवा। पद्मकर्णिकसंस्थाना ज्ञेया पुष्करिकेति सा ॥" (रो० वि० शुक्रदोष०)। सम्मूढपिडकेति—"पाणिभ्यां मृद्यमाने सम्मूढपिडका भवेत्" (सु० नि० १४अ०)। अलजीति—"तुल्यजा त्वलजी विद्यात् यथाप्रोक्ता विचक्षण"(रो० वि० शुक्रदोष०)।

* सुश्रुतवाग्भटयो "पित्तरक्तकृत" इति पाठः।

† "सकण्डू कठिना—"इत्यादि ग्रन्थ सुश्रुतमाधवाभ्यां परिवर्त्तिकाया लक्षणत्वेन पठितत्वात् पाठोऽयं भ्रान्त, तथा च—"मर्दनात पीडनात वाऽपि तथैवाऽभिघातत। मेदुश्चर्म यदा वायुर्भजते सर्वतस्त्वचः ॥ तदा वातोपसृष्टन्तु चर्म प्रतिनिवर्त्तते। मणेरधस्तात कोषस्य ग्रन्थिरूपेण लम्बते ॥ सवेदन सदाहञ्च पाकञ्च व्रजति क्वचित्। मारुतागन्तुसम्भूता विद्यात्तां परिवर्त्तिकाम् ॥ सकण्डू कठिना चैव श्लैष्मश्लेष्मसमुत्थिता ॥" (सु० नि० १३अ०) इति। अवपाटिकाया लक्षणन्तु —"अल्पीयस्त्वा यदा हर्षात् बलात् गच्छेत् स्त्रियं नरः। हस्ताभिघातादथवा चर्मखण्डर्त्तिते बलात् ॥ मर्दनात पीडनात् वाऽपि शुक्रवेगविघातत। यस्यावपाद्यते चर्म ता विद्यादवपाटिकाम् ॥" (सु० नि० १३ अ०) इति द्रष्टव्यम्।

रक्तार्बुदं विद्रधिश्च कुम्भीका तिलकालकाः।
निरुद्धप्रकशश्च प्रोक्तास्तथैव परिवर्त्तिका ॥८१॥

अष्टादशकुष्ठाना विवरणम्।—

कुष्ठान्यष्टादशोक्तानि वातात् कापालिकं भवेत्।
पित्तेनौदुम्बरं प्रोक्तं कफान्मण्डलचर्चिके ॥

रक्तार्बुदमिति—"क्षणे स्फोटे च सरक्ताभि पिडकाभिर्निपीडितम्। यस्य वस्तिरुजस्तोद यत्र तच्छोणितार्बुदम्॥"(रो० वि० शुक्रदोष०) इति। विद्रधिरिति—"विद्रधि सान्नपातेन यथोक्तमभिनिर्दिशेत्" (सु० नि० १४अ०) इति। कुम्भिकेति—"कुम्भिका रक्तपित्तात्या ज्ञात्ववास्थानभाऽशुभा" (सु० नि० १४अ०)। तिलकालक इति—"कृष्णानि चिक्काण्यथवा शुक्लानि सविषाणि च। पाततानि पचन्त्याशु मेढ्रं निरव शेषत॥ कालानि भूत्वा मासान्ते शीर्य्यन्ते यस्य देहिन। सन्निपातसमुत्थास्तु तान् विद्यात्तिलकालकान्॥" (रो० वि० शुक्रदोष०)। निरुद्धप्रकश इति—"वातोपसृष्टे मेढ्रे वै चर्म सम्पद्यते मणिम्। मणिवर्त्मोपनद्धस्तु मूत्रस्रोता रुणद्धि च॥ निरुद्धप्रकशे तस्मिन् मन्दधारमवेदनम्। मूत्र प्रवर्त्तते तस्मान्मणिर्विदीर्य्यते न च॥ निरुद्धप्रकशं विद्यात् सरुजं वातसम्भवम्॥"(रो० वि० शुक्रदोष०)। परिवर्त्तिकेति—†"मणेरधस्तात् कोषस्य यन्थिरूपेण लक्ष्यते। परिवर्त्तिका तु ता विद्यात् सरुजा वातसम्भवाम्॥"इति॥८८—९१॥

कुष्ठानीत्यादि।—कुष्ठमिति रूढ महारोगविशेषत्वात्, तान्यष्टादशभेद-

* "क्षणे स्फोटे सरक्तेच" इत्यनेन सुश्रुते "सरागैरचिते स्फोटै" इत्यनेन च वाग्भटे रक्तशब्द स्फोटविशेषणत्वेन पठित न तु पिडकाया।

† सुश्रुते एव पाठ,—"मदनात पीडनाच्चापि तथैवाऽभिघातत। मेढ्रचर्म यदा वायुभजते सवतस्तर॥ तदा वातोपसृष्टत्वं चर्म प्रतिनिवर्त्तते। मणेरधस्तात् कोषस्य यन्थिरूपेण लक्ष्यते॥ सवेदन सदाहञ्च पाकञ्च व्रजति क्वचित्। सारुजा-गन्तुसम्भूता विद्यात्ता परिवर्त्तिकाम्॥" ("सरुजा वातसम्भूता ता विद्यात परिवर्त्तिकाम्" इति रोगविनिश्चये पाठ) दृश्यते। अस्मिन् शुक्रामयविवरणे आचार्येणानेन निरुद्ध-परिवर्त्तिकयो निरुद्धप्रकशयोश्च पृथक् पृथक् गणन कृत, किन्तु सुश्रुते या परिवर्त्तिका, वाग्भटे चैव निरुक्त, सुश्रुत य निरुद्धप्रकश, वाग्भटे स एव निरुद्धसज्ञिनाम्ना पठित। कथमाचार्येणानेन एवमभिन्नरूपयोर्द्वयो. पृथक् ग्रहण कृत तत् विचार्य्यमिति।

मरुत्पित्तास्रदृष्यजिह्व श्लेष्मवातादिपादिका।
तथा सिध्मैककुष्ठञ्च किटिमञ्चालस तथा ॥९३॥
कफपित्तात् पुनर्दद्रु. पामा विस्फोटक तथा।
महाकुष्ठं चर्मदलं पुण्डरीक शतारुकम् ॥
त्रिदोषे काकण ज्ञेय—" ॥९४॥

भिन्नानि, तथा हि—"वातादयस्त्वया दुष्टास्त्वग्रक्त मासमस्तु च। दूषयन्ति स कुष्ठाना सप्तको द्रव्यसङ्ग्रह ॥ अत कुष्ठान जायन्ते सप्त चैकादशैव च ॥" (च० चि० कुष्ठ०) इत्यादि। अष्टादशसङ्ख्या यथा—तत्र क्षुद्रारुष्ककपालाभ कापालिकम। उडुम्बरफलसदृशमौडुम्बरम। मज्जल श्वेतरक्तमृत्पिण्डमण्डल मण्डलमिति। कण्डूदाहादियुक्त विचर्चिकेति। ऋष्यो नीलसग, गवय रुरुरिति प्रसिद्ध, ताज्जिह्वाकारमृश्यजिह्वमिति। विपादिकेति—वेपादिक, तत्र पाणिपादस्फुटन तीव्रवेदना च। सिध्मेति—श्वेतलोहितामलाबुकुसुमोपम घृष्टाद्रजा मुञ्चतीति। किटिमेति—श्यावारुण खरस्पर्श कण्डूमच्चेति। अलसेति—कण्डूमद्भि सरागैर्गण्डैश्चित, स्फोटचितमित्यर्थ। दद्रु च " शुभमण्डला पिडका सकण्डूरिति। पामेति—स्रावयुक्ता पिडका कण्डूमत्य सदाहाश्चेति पामा कथ्यते। तनुत्वच † तीव्रदाहरुपेता पाणौ कचे स्फिचि च क्लेदकरा इति विस्फोटा। महाकुष्ठेति—शीघ्रमुत्तरोत्तरधात्ववगाहन -बहुदोषबलत्व क्रियाभृयस्त्वयोगान्महाकुष्ठानत्युच्यते। चर्मदलेति—‡ मत्स्यशकलोपम बहल श्लक्ष्णचर्मवदित्यर्थ।

---

* सुश्रुत दद्रु अतसीकुसुमवर्णा ताम्रा वा, वाग्भट अतसीकुसुमवर्णा, तथा चरके रागवती इतिमात्रमुक्तम्। मधुकाभे असिता असितेतरा च दद्रुरिति दृश्यते। केवल डल्हनेन सिता असिता च इति द्विविधा दद्रुरुक्ता। चरकादिषु दद्रा: शुभमण्डलत्व न निर्दिष्टम् इति।

† चरकवाग्भटमाधवे श्यावारुणत्व तनुत्वञ्च विस्फोटस्य लक्षणत्वेन निर्दिष्टम, तीव्रदाहोपेतादिलक्षणन्तु कक्षा एव, यदुक्त—"सैव स्फोटैस्तीव्रदाहैरुपेता ज्ञेया पाण्या कक्षरया स्फिचोश्च ॥" इति।

‡ लक्षणमेतत एककुष्ठस्य चर्मकुष्ठस्य च, न तु चर्मदलस्य, तथा च—"अस्रेदन महावास्तु यन्मत्स्यशकलोपमम्। तदेककुष्ठ, चर्माख्य बहल श्लक्ष्णचर्मवत ॥ रक्त सकण्डू सस्फोट सरुक् दलति चापि यत्। तच्चर्मदलमाख्यात सप्तमञ्चासृङ्मुच्यते ॥" (च० चि० कुष्ठ०) इति।

त्रिविधश्वित्राणां विवरणम्।—

"—तथाऽन्यत् श्वित्रसञ्ज्ञकम्।
तच्च वातेन पित्तेन श्लेष्मणा च त्रिधा भवेत् ॥९५॥

षष्टिक्षुद्ररोगाणां विवरणम्।—

क्षुद्ररोगाः षष्टिसङ्ख्यास्तेष्वादौ शर्करार्बुदम्।
इन्द्रवृद्धा पनसिका विद्रधिर्नाड्यालजौ तथा ॥९६॥

* पुण्डरीकमिति—श्वेतकमलपत्रोपमसध्य पर्य्यन्तरक्त सौम्येषमित्यर्थ। शतारुक-मिति—"रक्त श्याव सदाहार्त्ति शताह्व स्याद्दलत्रणम्" (च० चि० कुष्ठ०) इति। काकणमिति—काकणन्तिकासवर्णत्वेन मध्ये कृष्णमन्त रक्तम् † अपाक तीव्र-वेदनमिति ॥ ९२—९४ ॥

तथाऽन्यदित्यादि।—श्वित्रसञ्ज्ञकमिति—श्वेतकुष्ठम्, अजितवर्णमिति लोके, तच्च वातादिदोषत्रयभेदेन त्रिधा भवति, यदुक्त—"वाताद्रूक्षत्व पित्तात्ताम्र कमलप-त्रवत्। सदाह रोमविध्वसि कफाच्छ्वेत घन गुरु॥' (वा० नि० १४अ०) इति। तल्लान्तरे श्वित्रभेद किलास इति प्रसिद्ध, "कुष्ठैकसम्भव श्वित्र किलास वाऽरुण भवेत्। निाष्टप्तपरिस्रावि त्रिधातूष्मसमुद्भवम्॥' (रो० वि० कुष्ठ०) इति। अपरे तु किलासमेव धात्वन्तराश्रित सज्ञान्तर लभते इति वदन्ति, यत, —'अरुण तत्तु विज्ञेय मासधातुसमाश्रितम्। मेदआश्रित भवेच्छ्वेत दारुण रक्तसश्रयम्॥" (भालुकि०) इति। तत श्वित्र द्विविधमित्याचक्षते, व्रणज दोषजञ्च, यदुक्त भोजे—"श्वित्र तु द्विविध विद्याद्दोषज व्रणज तथा। तत्र मिथ्योपचाराद्धि व्रणस्थ व्रणज भृतम्॥ दोषज द्विविध प्रोक्तमात्मज परज तथा। परसत्कारसम्भूतात् यत्तत् परजमुच्यते॥ तदात्मज विजानीयात् यद्दृष्ट्वेष्वानलादिजम्॥' इति ॥९५॥

क्षुद्ररोगा इत्यादि।—क्षुद्रहेतुलक्षणचिकित्साना रोगाणा पारिशेष्यात् क्षुद्ररोगाः कथिता। ननु यदि क्षुद्रत्वमेषा हेतु-लक्षण-चिकित्साऽन्यत्वेन, तर्हि रोगाणामग्नि-रोहिणीप्रभृतीना विद्रोधजत्वेन हेत्वादिबाहुल्यात् कथ क्षुद्रत्वम्? नैव, बाहुल्यन तावत् कृच्छ्रिणो गच्छत्यौतिवत, किंवा अवान्तरभेदविरहित्व क्षुद्रत्व, येनात्र वक्ष्याम्या-नामजगल्लकादीना न दोषदूष्यादिकृतभूरिसङ्ख्याभेदेन व्रणज्वरादिवन्निर्देश, किन्तु प्रत्येक लोकसङ्ख्ययाऽभिधान तेषामिति। अन्यस्त्वाह—क्षुद्रशब्दोऽल्पे रौद्रे च वर्त्तते,

* पुण्डरीक रक्तपद्मामति मधुकोष।

† "सपाकम्" इति क्वचित् पाठ.।

वराहदंष्ट्रो वल्मीक कच्छपो तिलकालकः।
गर्दभो रक्तमा चैव यवप्रख्या विदारिका ॥९७॥

तेन यथायोग्यं सर्वत्र व्यवस्था द्रष्टव्या। रौद्रे क्षुद्रशब्दो यथा—"क्षुद्रा रुगा यत्र शान्तास्तेरन्वै सप्त रुगै" इति। केचित्तु क्षुद्राणां बालानां प्रायेण रोगा क्षुद्ररोगा इति व्याख्यानयन्ति, एवमपि अजगल्लिकाऽहिपूतनादीनामेव परिग्रहो न त्वन्येषाम्। षष्टिसङ्ख्या यथा—तत्र शर्करार्बुदादयो राजिकान्तास्त्रयस्त्रिंशत्, चत्वारो व्यङ्गा, अष्टौ विस्फोटा, चतुर्दशभेदा मसूरिका इति षाष्टसङ्ख्या क्षुद्ररोगा पूर्यन्ते। शर्करार्बुदमिति—अत्र इङ्गा, (१)—"दुर्गन्धि क्लिन्नमत्यर्थं नानावर्णं तत शिरा। स्रवन्ति सहसा रक्तं तत विद्याच्छर्करार्बुदम्॥" (रो० वि० क्षुद्र०) इति। अन्यत्र शर्करा भिन्नपठितत्वात् पृथग्गृहीता, यदुक्त—"प्राप्य मांसशिरास्नायू श्लेष्मा मेदस्यधानिलः। यस्मिं कुर्वन्त्यसौ भिन्नो मधुसर्पिर्वसानिभम्॥ स्रवत्यास्राव-मनिलं तत्र वृद्धिं गतं पुनः। मांसं विशोष्य यथिता शर्करा जनयेत् तत॥" (रो० वि० क्षुद्र०) इति, अत्र शर्करार्बुदञ्च शर्करावस्थैव इत्येक एवार्थः विकारः, तेन न सङ्ख्याऽतिरेकः। भोजेऽप्युक्त—"तमेव भिन्नं दुर्गन्धं घृतमेदोनिभं शिरा। स्रवन्ति स्रावमनिशं तदा स्याच्छर्कराऽर्बुदम्॥" इति। इन्द्रबस्तिः—मध्ये पुष्करवत् पिडकामि सनाभितेन्द्रबस्ती कथिता। पनसिकेति—कण्ठस्याभ्यन्तरे आलूकवदुपरुक् व्रणविशेषः। भोजे कर्णस्य समन्तत इति, तेन कर्णस्य बहिरपि भवतीत्याचक्षते, यदुक्त—"कफवातौ प्रकुपितौ मांसमाश्रित्य कर्णयोः। समन्ततः परिस्रव्या कुरुते पिडका स्थिराः॥ विषमा दाहरुग्युक्ता विद्यात् पनसिकान्तु ताम्॥" (भोज) इति। विद्रधेति—पित्तेनाधिकपाकादिहेतुमुखतया विद्रधेति सञ्ज्ञा, यदुक्त—"विद्रधस्या महादाहा पक्वोदुम्बरसन्निभाः। सुमहत्यो पित्तकृता विद्रधानामिका विदुः॥" इति। अन्यालजीति—अन्यालजो बहिर्वक्त्ररहिता अल्पमुखो स्थायुश्रिता च, यदुक्त—"कफानिलौ श्रितौ स्नायुं पिडका परिमण्डलाम्। दृष्टौ जनयतोऽवक्त्रामल्पपूयामकण्डराम्। श्यामोदुम्बरसङ्काशा विद्यादन्यालजौ तु ताम्॥" (भोज) इति। वराहदंष्ट्र इति—शूकरदंष्ट्राकारत्वेन वराहदंष्ट्रो व्रणविशेषः, स च विसर्पलिङ्ग इति केचित्, उक्त—"सदाहो रक्तपर्यन्तस्त्वक्पाको तीव्रवेदनः। कण्डूमान् ज्वरकारी च स ज्ञेयः शूकरदंष्ट्रकः॥" (रो० वि० क्षुद्र०) इति। वल्मीकेति—वल्मीको व्रणविशेषः, तेन वल्मीकवत् प्रचुरशिखरत्वमुच्छ्रितत्वं दूरावगाढमूलत्वञ्च प्रति-पद्यते, तथा हि—'योवासकचाकारपादर्दशे सन्धौ गले वा त्रिभिरेव दोषैः। यान्यः, स वल्मीकवदक्रियाणां जातः क्रमेणैव गतः प्रवृद्धिम्॥ सुखैरनेकैः सुषिरोदवह्निर्विसर्प-

कदरो मषकश्चैव नीलिका जालगर्दभः।
इरिवेल्लो जतुमणिर्गुदभ्रंशोऽग्निरोहिणी ॥८८॥

वत सर्पति चोन्नतायै। वल्मीकमाहुर्भिषजो विकार निष्पत्यनीक चिरज विशेषात ॥' (रो० वि० क्षुद्र०) इति। कच्छपीति—मध्ये उन्नततत्वेन पश्यत्ते निम्नतया च कच्छपिकाशङ्का, यदुक्त—"यस्य पञ्च वा षड् वा दाहरूपा कच्छपोन्नता। कफानिलाभ्यां पिडका श्लेया कच्छपिका बुधै ॥" इति। तिलकालक इति—नीलानि तिलसदृश्यानि तानि तिलकालकशब्दवाच्यानि कफस्य शोषणात्, यदुक्त—"कृष्णानि तिलनाभानि नीलानि समानि च। वातपित्तकफोद्रेकात्तान् विद्यात तिलकालकान् ॥" (सु० नि० १३ अ०) इति। तत्रान्तरे रक्तोद्रेकादपि भवति, यत,—"मारुत पित्तमादाय कफरक्तसमाश्रित। चिनोति तिलमात्राणि लक्ष्मि ते तिलकालका ॥" इति। गर्दभीति—वर्तुलाकारत्वेनोन्नतत्वेन च पिडकाविशेषो गर्दभीशब्दवाच्य, तथा हि—"मण्डल वृत्तमुत्सन्न सरक्त पिडकाचितम्। रजाकरी गर्दभिका ता विद्याद्वातपित्तजाम् ॥" (रो० वि० क्षुद्र०) इति। रक्तसा चेति—रक्तसा तु अन्यत्र कुष्ठभेदेषु दर्शिता, क्षुद्रत्वादत्रापि लिखिता न दोष, तदयथा—"कण्डूमत्वता या पिडका शरीरे सस्रावहीना रक्तसाच्यते सा" (सु० नि० ५ अ०)। यवप्रख्यति—यववन्मध्ये स्थूला अन्ते तनुका पिडका यवप्रख्येति कथिता, यदुक्त—"यवाकारा सुकठिना ग्रथिता मासससिता। पिडका श्लेष्मवाताभ्यां यवप्रख्येति सा मता ॥" (सु० नि० १३ अ०) इति। विदारिकेति—विदारिकन्दवद्वृत्ता वर्तुलाकारा या पिडका सा विदारिकाशब्दवाच्या, यदुक्त—"विदारिकन्दवद्वृत्ता कषायव्रण-सन्निभ। विदारिका भवेद्वृत्ता सर्वजा सर्वलक्षणा ॥" (रो० वि० क्षुद्र०) इति। कदर इति—कदरा बदरफलवद्वृत्तत्व पादयो पिडकाविशेष, तथा हि—"अर्कोन्मथिते पादे क्षत वा कण्टकादिभि। ग्रन्थि कोलवदुत्सन्नो जायत कदर हि तत् ॥" (वा० उ० ३१ अ०) इति। कदर इलेऽपि भवति भोजेन पठितत्वात, यत,—"इलयो पादयोश्चापि गम्भीरानुगत खरम्। मासकीलं जनयत कुपितौ कफमारुतौ ॥ सशल्यमिव त देश मन्यते तेन पीडित। अर्कराकदर केचिन्मन्यन्ते वातकण्टकम् ॥" (भोज) इति। मषक इति—माषवद्वृत्तत्व कृष्ण यद्भवति स मषकसज्ञ इति, यदुक्तम्—"श्वेदन स्त्रिरश्चैव यान्यान् गात्रे प्रदृश्यते। माषवत कृष्णमुत्सन्न वातान्मषक-मादिशेत ॥" (रो० वि० क्षुद्र०) इति। माषकमिति नामान्तरमस्य। भोजे त्वेति पाठात कोमल कथितम्, यत,—"वातेरिते त्वचि यदा दूषेण कफमेदसी।

सन्निरुद्धगुदः कोठः कुनखोऽनुशयौ तथा।
पद्मिनीकण्टकाख्यिप्ममलसो मुखदूषिका ॥९८॥

श्लक्ष्णं मृदु सवर्णं च कुरुतो मषक वदत ॥" (भोज) इति। नीलिकेति—अतिनीलत्वान्नीलिका, तेन कृष्णा नीला च कथिता, यदुक्त—"कृष्णमेवगुण गावे नीलिका तां विनिर्दिशेत" (भोज०) इति, अत एवान्यत्र पठितात न्यच्छाद्विन्ना, न्यच्छीत्र व्यङ्गभेदोऽवगन्तव्य, तेनेतेषा स्थानवर्णाकृतिविलक्षणत्वाद्युक्त एव भेद, तदयथा—"श्यावो व्यङ्गी मुखाश्रित" इत्यादि। "गावे कृष्णा तु नीलिका" इत्यादि। "रक्तपित्तान्वितो वायुस्त्वक्पर्दशाश्रितो यदा। जनयेन्मण्डल कृष्ण श्याव वा न्यच्छमादिशेत् ॥" इति भोजवचनेन च परस्परभेदो दर्शित। जालगर्दभ इति—य शोथो विसर्पवत सर्पति स जालगर्दभशब्दवाच्य, यत,—विसर्पवत सर्पात य शोथस्तुरपाकवान्। दाहज्वरकर पित्तात् स ज्ञेयो जालगर्दभ ॥" (रो० वि० क्षुद्र०) इति। दाहज्वरकारकत्वेन ज्वालागर्दभ इति नामान्तरम। भोजेऽपि विसर्प एवेति नामाख्य, यदुक्त—"पित्तोल्कटास्त्रयो दोषा जनयन्ति त्वगाश्रिता। श्याव रक्त तनु शोथमपाक बहुवेदनम् ॥ विसर्पिण सदाहज्व तृष्णाज्वरसमन्वितम्। विसर्पमाहुस्त व्याधिमपरे जालगर्दभम् ॥" (भोज०) इति। इरिवेल्लीति—शिरोभागगता वर्तुलाकारा या पिडका सा इरिवेल्लीति शब्दवाच्या, यदुक्त—"पिडकामुत्तमाङ्गस्था वृत्तामुपरुजाज्वराम्। सवात्मिका सवालङ्गा जालीयादिरवेल्लिकाम् ॥" (रो० वि० क्षुद्र०) इति। लतुनणिरिति—अरुज रक्त लक्ष्मीदयमण्डलञ्च सहजत्वेन लतुनणि प्राहु, तथा हि—"सममुत्सन्नमरुज मण्डल कफरक्तजम। सहज लक्ष्म चैकैषा लक्ष्यो लतुनणिस्तु स ॥" (रो० वि० क्षुद्र०) इति। गुदभ्रश इति—यत्र गुदस्य वहिर्निगमो भवति स गुदभ्रंशशब्दवाच्य, यदुक्त—'प्रवाहणातिसाराभ्या निर्गच्छति गुद वहि। कृच्छदुर्बलदेहस्य त गुदभ्रंशमादिशेत् ॥" (सु० नि० १३अ०) इति। अग्निरोहिणीति—कक्षभागेषु प्रदीप्ताङ्गारसन्निभा स्फोटा अग्निरोहिण्योशब्दवाच्या, तथाक्त—"पित्तरक्तोत्कटा दोषा प्रदीप्ताङ्गारसन्निभान्। कक्षभागेषु कुर्वन्ति तीव्र दाहरुजाज्वरान् ॥ मासाबदारणान् स्फोटान् ये हन्युरुपक्रमात्। पश्चाद्दशाहादर्वाग्वा सा ज्ञेया वाह्निरोहिणी ॥" इति। सन्निरुद्धगुद इति—शुष्कदोषोक्तानरुद्धमणि-तानरुद्धप्रकाशवदत्रापि चर्मसङ्कोचात सन्निरुद्धगुदोऽभिहित, यदुक्त—"वेगसन्धारणाद्वायुर्विकृतो गुदमश्रित। निरुणद्धि मल्ल स्रोत सूक्ष्मद्वार करोति च ॥ मार्गस्य सौक्ष्म्यात क्लेश पुरीष तस्य गच्छति। सन्निरुद्धगुद व्याधिमेन विद्यात् सुदारुणम् ॥" (सु०

कच्चा दुष्टकच्छूश्च गन्धः पाषाणगर्दभः।
राजिका च—" ॥१००॥

नि० १३अ०) इति। कोठ इति—वक्ष्यमाणोदर्दशीतपित्तयोर्भेद कोठ इति प्रसिद्ध, त्वग्दोषसामान्यात्। अव तु असम्यक् वमनयोगादिति निदानत्वेन क्षणिकोत्पाद-दिनाशत्वेनाल्पत्वाच्च लिखित, यदुक्त—'वरटीदष्टसङ्काश कण्डूमान् लोहितो-ऽस्मकपित्तात्। क्षणिकोत्पादविनाश कोठ इति निगद्यते तज्ज्ञै ॥" (भालुकि०) इति। कुनख इति—कुत्सित नख यस्य पुरुषस्येत्यभिप्राय। एतच्च वक्ष्यमाण-चिप्परोगान्तरमिति मन्यन्ते केचित, यत —"तटैवाल्पनखैर्दोषै कुनख पुरुषो भवेत्" इति तटैवेत्यनेन चिप्पमिति व्याख्यानयन्ति। अनुग्रथी तथेति—चरणस्योपरि सवर्णत्वेन पिडका भवति सोऽनुग्रथोग्रन्थवाच्च, तथा हि—"गम्भीरानल्पसरुजा सवर्णासुपरि स्थिताम्। पादस्थानुग्रथीं तान्तु विद्यादन्त प्रपाकिनीम् ॥" (रो० वि० क्षुद्र०) इति। पद्मिनीकण्टकप्रख्यो व्रणविशेष तेन पद्मिनीकण्टक कथित, यदुक्त—"कण्टकैराचित वृत्त नखल्ल पाण्डु कण्डूरम्। पद्मिनीकण्टकप्रख्यै तदाख्य कफवातजम् ॥" (रो० वि० क्षुद्र०) इति। चिप्पमिति—नखमासाविष्ठितो दोषो दाहपाकौ करोति तच्चिप्पमिति रोगविशेष कथित, यथा—"नखमासमधिष्ठाय पित्त वायुश्च दारुणम्। कुर्वाते दाहपाकौ च त व्याधि चिप्पमादिशेत् ॥" (रो० वि० क्षुद्र०) इति। तन्मान्तरे अङ्गुलीवेष्टमिति विख्यात अन्तर्नामाऽयं विकार, यदुक्त—"रागोऽन्तरङ्गुलीनखान्तरे स्यान्मासासदाधौ मृदुदाहपाक" (च० चि० त्रयोद०) इति। अलस इति—पादाङ्गुलिषु दुष्टकर्दमसम्पर्कत्वेन य क्लिन्नभाव सोऽलसशब्दवाच्य, यत,—'क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुजान्वितौ। दुष्टकर्दम-सम्पर्कादलस त विभावयेत् ॥" (सु० नि० १३अ०) इति। मुखदूषिकेति—यूनामेव मुखे पिडका सम्भवन्ति तेन मुखदूषिका कथिता मुखकान्तिहरणात, अस्य यौवनपिडकेति नामान्तरम्, यत,—"श्याम्यनीकण्टकप्रख्या कफमारुतरक्तजा। युवानपिडका यूना विज्ञेया मुखदूषिका ॥" (रो० वि० क्षुद्र०) इति। कच्चेति—नामत प्रसिद्धा सा तु पिडकाकारत्वेनोपलक्षिता, यत —"बाहुपार्श्वासककेषु क्षणस्फोटा सवेदनाम। पित्तप्रकोपसम्भूता कच्चामित्यभिनिर्दिशेत् ॥" (रो० वि० क्षुद्र०)। दुष्टकच्छूरिति—दुष्टयोर्मलदूषितत्वात या कण्डूर्भवति सा दुष्टकच्छू कथिता, यदुक्त—"स्रावोत्सादनहीनस्य मलो दुष्टमस्थित। प्रक्लिद्यते यदा स्वेदात् कण्डू जनयते तदा॥ तत कण्डूयनात क्षिप्रं स्फोट स्रावश्च जायते।

तत्र चतुर्विधव्यङ्गाना विवरणम्।—

"—तथा व्यङ्गश्चतुर्धा परिकीर्त्तितः।
वातात् पित्तात् कफाद्रक्तादित्युक्त व्यङ्गलक्षणम् ॥१०१॥

प्राङ्मुर्द्धषण्डकच्छू ता श्लेष्मरक्तप्रकोपजाम्॥" (सु० नि० १३अ०) इति। एषा च स्नानोत्सादनहीनताऽपनिदानविशेषात् प्रायो ह्यषण्डभाविन्याऽशिष्टचिकित्सोपयोगित्वाच्च कुष्ठात्कच्छूदीषाङ्गिन्या। गन्ध इति।—कच्चोक्तस्फोटसदृशा एकैव पिडका भवति सु गन्ध इति प्रसिद्ध, यदुक्तम्—"एकामेतादृशीं दृष्ट्वा पिडका स्फोटसन्निभाम्। त्वग्जाता पित्तकोपेन गन्धनाम्नी प्रचक्षते॥" इति। पाषाणगर्दभ इति—हनुसन्धिगतो य कठिनशोथ स पाषाणगर्दभशब्दवाच्य, तथा हि—"वातश्लेष्मसमुद्भूत शूयथुर्हनुसन्धिज। स्थिरो मन्दरुज स्निग्धो ज्ञेय पाषाणगर्दभ॥" (रो० वि० चद्र०) इति। राजिकेति—राजिकाकारपिडकाना सम्भवत्वेन राजिकाशब्दवाच्या, एषा * मसूरिकाभेदादन्यैरत्र प्रतिपादिता, तत्र कोद्रव इति नाम्ना प्रसिद्धा, यथा—"कफवातादिसम्भूत कोद्रवो नाम नामत। लोको वदति पक्वाव (?) स च पाक न गच्छति॥" इत्यादि॥ ९९—१००॥

तथेति।—व्यङ्ग इति—मुखे श्यावं मण्डलाकार यद्भवति तत व्यङ्गशब्दवाच्य, मुखच्छाया इति लोके प्रसिद्धम, यदुक्तं—"क्रोधायासप्रकुपितो वायु पित्तेन सयुत। मुखमागत्य सहसा मण्डल विसृजत्यत॥ नीरुज तनुक श्याव मुखे व्यङ्ग तमादिशेत्॥" (सु० नि० १३अ०) इति। अत्र सरक्तेन वातादिदोषेण चत् प्रकारो व्यङ्ग कथित। यद्यपि सपित्तेन वायुना व्यङ्गो निर्दिष्टस्तथाऽत्रैव कफरक्तावनुबन्धौ द्रष्टव्यौ, यत नीरुजत्व कफेन विना न सम्भवति, श्यावत्वञ्च † शुक्लानुविद्धरक्तावर्णं, तेन सरक्तदोषकारण, तेन सरक्तदोषोद्भवो व्यङ्ग इति तात्पर्य्यार्थ॥ १०१॥

राजिका ग्रीष्मपिडका इति ख्यात "घामाचि" इति लोके, तथा च वाग्भट,—"घर्मस्वेदपरीतऽङ्गे पिडका सरुजो घना। राजिकावणसस्थान प्रमाणा राजिकाह्वया॥" (वा० उ० ३१अ०) इति। राजिका मसूरिकाभेद इति तु कुत्रापि तन्त्रे न दृश्यते इति।

† "श्याव शुक्लानुविद्ध कृष्णो वर्ण" इति मधुकोष-तत्त्वचन्द्रिकादिकारा। "तेन सरक्तदोषकारणम्" इति पाठ न सङ्गतार्थक.।

तत्र अष्टविस्फोटाना विवरणम्।—

विस्फोटाः क्षुद्ररोगेषु तेऽष्टधा परिकीर्त्तिताः।
पृथक् दोषैस्त्रयो द्वन्द्वैस्त्रिविधः सन्निपातजः॥
अष्टमः सन्निपातेन—" ॥१०२॥

तत्र चतुर्दशमसूरिकाणा विवरणम्।—

"—क्षुद्ररुक्षु मसूरिका।
चतुर्दशप्रकारेण त्रिभिर्दोषैस्त्रिधा च सा॥१०३॥

विस्फोटा क्षुद्ररोगेष्वित्यादि।—क्षुद्ररोगगणनाया व्यङ्गविस्फोटा अपि लिखिता, पृथगन्यत्र चिकित्साश्रयत्वात, तद्यथा—"अग्निदग्धनिभा स्फोटा सज्वरा रक्तपित्तजा। क्वचित सर्वत्र वा देहे विस्फोटा इति ते श्रुता॥" (रो० वि० विस्फोट०) इति सकलविस्फोटेषु रक्तपित्तयोरव्यभिचारित्व सूचितम् यदुक्त भोजेन —'यदा रक्तञ्च पित्तञ्च वातेनानुगत त्वचि। अग्निदग्धनिभान् स्फोटान् कुरुत सर्वदेहगान्॥" इति। अत एव माधवेनोक्त यथा—"त्वचमाश्रित्य त रक्त-मासाम्बूनि प्रदूष्य च। घोरान् कुर्वन्ति विस्फोटान् सर्वान् ज्वरपुर सरान्॥" (रो० वि० विस्फोट०) इति, तेनात्र विस्फोटा अष्टधा कार्यता, अष्टप्रकार त्वचि सुबोधम॥ १०२॥

क्षुद्ररुक्षु मसूरिकेत्यादि।—क्षुद्ररोगाणा मसूराद्याकारत्वादत्रापि मसूरिका लिखिता, अन्यत्र चिकित्सानिमित्तेन प्रतिपादिता न दोष। मसूराकृति पिडका मसूरिका, लाके "शीतला" शब्दाच्या, यत,—"मसूरकुसुमाभाश्च तुल्या तत्फलकोपमा। गात्रेषु वदने वापि पित्तात्तेऽत्या मसूरिका॥" इति। पित्तात्तेऽत्येत्यत्र रक्तपित्ताधिक्य दर्शयति तेन सर्वदोषप्रकोपत्व ज्ञेयम, यदुक्त—"कटूष्णलवणक्षार-विरुद्धाऽध्यशनाऽजने। दष्टनिष्पावशाकाद्ये प्रदुष्टे पवनोदके॥ क्रूरग्रहेक्षणाद्यापि दोषा सम्मूर्छिता। जनयन्ति शरीरेऽस्मिन् दुष्टरक्तेन सङ्गता॥ मसूराकृतिसस्थाना पिडका क्षुमसूरिका॥" (रो० वि० मसू०) इति। * मसूरापलक्षितत्वाद्दोषदूष्याणा सम्यूच्छनाविशेषेण तासा वर्णाकारान्तराणि सम्भवन्ति, यदुक्त तन्त्रान्तरे—"पित्त श्लेष्मितसंसृष्ट यदा दूषयति त्वचम। तदा करोति पिडका सवर्णाद्वेषु देहिनाम्॥ मसूरमुद्गसाषाणा तुल्या कोलोपमा क्वचित। प्रवालसदृशा काश्चित काश्चिज्जम्बु-फलोपमा॥ लोहजालनिभा काश्चिदतसीफलसन्निभा। मसूरिकास्तु ता ज्ञेयाः

---

* मसूरस्य उपलक्षणत्वात् इति पाठकल्पन सङ्गतम्।

द्वन्द्वजा त्रिविधा प्रोक्ता सन्निपातेन सप्तमी।
अष्टमी त्वगता ज्ञेया नवमी रक्तजा मता ॥१०४॥
दशमी मांसजा ख्याता चतस्रोऽन्याश्च दुस्तराः।
मेदोऽस्थिमज्जशुक्रस्था क्षुद्ररोगा इतीरिताः ॥ १०५ ॥

नवविसर्पाणां विवरणम्।—

विसर्परोगो नवधा वातपित्तकफैस्त्रिधा।
त्रिधा स द्वन्द्वभेदेन सन्निपातेन सप्तमः ॥
अष्टमो वह्निदाहेन नवमश्चाभिघातजः ॥ १०६ ॥

पित्तरक्ताधिका बुधैः ॥" इति। तस्याश्चतुर्दशभेदानाह, चतुर्दशप्रकारेणेत्यादि।—तत्र दोषैः पृथक् त्रयो भेदाः, मिलितदोषद्वयेनापि त्रय, सन्निपातेनैक सप्तधातुगतत्वेन सप्त भेदा, एव चतुर्दश भवन्ति। अष्टमी त्वगतत्वेत्र त्वक्शब्देन रक्तोऽभिधीयते, धातुगतप्रस्तावात्, अत एवाह कश्चित्—"त्वग्रक्तमासमेदांसि" इत्यादि। शेषं सुगमम्। एव षष्टिसङ्ख्या क्षुद्ररोगा ईरिता कथिता ॥ १०३—१०५ ॥

विसर्पेति।—विसर्पणाद्विसर्प तेन सर्वतो विविध वा विसर्पणादिति भाव, यदुक्त चरके—"विविध सर्पति यता विसर्पस्तेन स स्मृत। परिसर्पोऽथवा नाम्ना सर्वत परिसर्पणात्॥" (च० चि० वीसर्प०) इति। नवधेति—नवप्रकार, तेन वातज, पित्तज, कफज, वातपित्तज, वातश्लेष्मज श्लेष्मपित्तज, सन्निपातज, अग्निदाहज चाघातज इति। ननु माधवेन सप्तविधो विसर्प उक्त, यथा—"लवणाम्लकटूष्णादि-सेवादोषकोपत। विसर्प सप्तधा ज्ञेय सर्वत परिसर्पणात्॥" (मा० नि० विसर्प०) इत्यादना, तत कथमत्र नवधा प्रोक्त? उच्यते—माधवेन तु दोषकारणत्वात् चतस्रो विसर्प पित्तजे दर्शित, तदृयथा—"वाह्यहेतो चतात क्रुद्ध सरक्त पित्तमीरयन्। वीसर्प मारुत कुर्यात कुलत्थसदृशैश्चितम्॥ स्फोटै शीघ्रज्वरकरा दाहाढ्य श्यावशोणितम्॥" (मा० नि० १३ अ०) इति। भोजेऽप्युक्त—"शस्त्रपट्टारैलैस्तैस्तु व्यालदन्तनखैरपि। क्षते वाऽप्यथवा भग्ने बहुदोषस्य देहिन॥ रक्त पित्तच कुपित व्रणमाशु प्रपद्यते। कुरुतस्से समेते तु व्रणशोथ सुदारुणम्॥ आचित तनुविस्फोटै कृष्णै पीतकसन्निभै। पित्तविसर्पवल्लिङ्ग तस्य शेष विनिर्दिशेत्॥" इति। तथा चरके त्वस्य अन्तर्जबाह्यर्ज-भेदेन प्रतिपादितत्वाच्च, तथा हि—"मर्मोपघातात् सम्मोहादयनाना विघट्टनात्। दृष्टातियोगात् वेगाना विषमाणा प्रवर्त्तनात्॥ विद्यात् विसर्पमन्तर्जमाशु चाग्निबल-

एकैकोदर्दशीतपित्तयो विवरणम्।—

तथैक: श्लेष्मपित्ताभ्यामुदर्द: परिकीर्त्तित:।
वातपित्तेन चैकस्तु शीतपित्तामय: स्मृत:॥ १०७॥

विविधास्रपित्तानां विवरणम्।—

अम्लपित्तं त्रिधा प्रोक्तं वातेन श्लेष्मणा तथा।
तृतीयं श्लेष्मवाताभ्यां—" ॥ १०८॥

चयात्। अतो विपर्य्ययात् वाह्यमन्त्यं विद्यात् खलक्षणे॥" (च० चि० विसर्प०) इति। अग्निदाहजोऽपि दोषप्रकोपलक्षणत्वादन्तर्गत एव, यत,—"अग्निना कोपितं रक्तं मृशं जन्तो प्रकुप्यति। ततस्तेनैव वेगेन पित्तमस्याप्युदीर्य्यते॥" (सु० सू० १२अ०) इत्यादिनाऽत्र पित्तविसर्पान्तर्गतोऽग्निदाहविसर्पो बोद्धव्य, अत्र तु गणनासङ्कलनेन पृथक् दर्शितावितिन दोष। तन्त्रान्तरे इन्द्रजविसर्पाणां नामान्तराणि प्रवदन्ति, तद्यथा—"वातपित्ताग्निशोफेषु कथितो यस्त्रिसञ्ज्ञक। कफवातात् पित्तकफात् कदमाख्यो भिषग्वरै॥" इति॥ १०६॥

तथेति।—तथेत्यनेन दोषवयजन्यत्वमुक्तमनयो, यदुक्त—"शीतमारुतसम्पर्शात् प्रदुष्टौ कफमारुतौ। पित्तेन सह सम्भूय वहिस्तर्विसर्पत॥" (रो० वि० शीतपित्त०) इत्यादिना, अत्र तु पित्तानुबन्धयो कफवातयोराधिक्यविशेषेण दर्शितो न दोष, यत,—"वाताधिक शीतपित्तमुदर्दस्तु कफाधिक" (रो० वि० शीतपित्त०) इत्यादि। उदर्द एव शीतपित्तामय प्रतिपादित, अवाचार्य्येण गणनामावेशेऽपि पृथक् लिखित, यदुक्त—"वरटोदष्टसस्थान शोथ सञ्जायते वहि। सकण्डूलोदवदुल: छर्दिज्वरविदाहवान्॥ उदर्दमिति त विद्याच्छीतपित्तमथापरे॥" (रो० वि० शीतपित्त०) इति॥ १०७॥

अम्लपित्तमिति।—विदाहाद्यम्लगुणैरित्त पित्तमम्लपित्तमित्युच्यते, यत विदाहाद्यम्लगुण पित्तमम्लपित्त, विदग्धनम्लतामुपेतीत्यादिना तिक्ताम्लवाल्लत्वाच्च, अत एवाम्लपित्त प्रधान वातकफावप्यवानुगतौ गौरवोद्गारकर्मादिना ज्ञेयौ, तथा हि—"अविपाकाल्लमीरल्लैश्च-तिक्ताम्लोद्गारगौरवै। हृत्कण्ठदाहारुचिभिश्चाम्लपित्त वदेद्भिषक्॥" (रो० वि० अम्ल०) इति। केचिदम्लपित्ते मिलिते कफपित्ते सामान्य कर्तृत्व स्थितमित्याहु, "करचरणदाहमौष्ण्य मुहुर्मोमुहुश्च ज्वरश्च कफपित्तम्। जनयति कण्डूनण्डनपिडकाग्रतनिचितगात्ररोगनिचयम्॥" (रो० वि० अम्ल०) इति

अष्टविधवातरक्तानां विवरणम्।—

"—वातरक्तं तथाऽष्टधा।
वाताधिक्येन पित्ताच्च कफाद्दोषत्रयेण च॥
रक्ताधिक्येन दोषाणां द्वन्द्वेन त्रिविधं स्मृतम्॥ १०९॥

अशीतिवातरोगाणां विवरणम्।—

अशीतिर्वातजा रोगाः कथ्यन्ते मुनिभाषिताः।

वैविध्यमस्य प्रसिद्धम्। एके "अस्रपित्तं द्विधा प्रोक्तमूर्ध्वाधोभेदतस्तथा" इति पठन्ति व्याख्यानयन्ति च, तत्र "प्रयात्यधो वा विविधप्रकारम्" इत्यादिना कृतार्थत्वात् "वात्स्य हरित्पीतकनीलकृष्णम्" इत्यादिवाक्येनोर्ध्वम् इति॥ १०८॥

वातरक्तमिति।—कुपितो वातः रक्तञ्च कुपितं वातरक्तमित्युच्यते, वातस्य प्राबल्यात् प्राधान्याच्च वातरक्तव्यपदेशः, न तु रक्तवातः, यतः, एकेनैव स्वहेतुद्वयेन वातेन विमानस्थः रक्तं दूषितम्, एवं रक्तं स्वहेतुद्वयं समानस्थं वातदूषितं न (?)। चरकेऽप्युक्तं—"वायुः प्रकुपितो दुष्टेन रक्तेनावरितः पथि। कुर्यात् सन्दूषयेत् रक्तं तज्ज्ञेयं वातशोणितम्॥" (च० चि० वातरक्त०) इति। करपादगं रोगं तं वातरक्तमाहुरेके, यतः,—"पादयोर्मूलमास्थाय कदाचिद्दुष्टयोरपि। आखोर्विषमिवाक्रम्य तद्देहमुपसर्पति॥" (च० चि० वातरक्त०) इति। तत्र वातरक्तं चरकेण द्विविधमुक्तम् उत्तानगम्भीरभेदात्, तदुक्तम्—"उत्तानमथ गम्भीरं द्विविधं वातशोणितम्। त्वङ्मांसाश्रयमुत्तानं गम्भीरं त्वन्तराश्रयम्॥" (च० चि० वातरक्त०) इति। अष्टधा अष्टप्रकारं, तद्यथा—वाताधिक्येनैको भेदः, अधिक्यमत्र रक्तदोषात्। पित्ताधिक्यात् द्वितीयः। कफादिति—कफाधिक्यात् तृतीयः। दोषत्रयेण चतुर्थः, सन्निपातेनेत्यर्थः। रक्ताधिक्येन पञ्चमः, एतच्चारभ्यरक्ताद्रक्तान्तरं बोद्धव्यं, यतो रक्तमपि रक्तान्तरदूषकम्, यदुक्तं दुष्टरक्तलक्षणे—"पित्तवद्रक्तेनातिदुष्टञ्च" (सु० सू० १४अ०) इति न्यायाच्चरितार्थः। दोषाणां द्वन्द्वेनेति—दोषाणां वातपित्तकफानां द्वन्द्वेन द्विदोषमिलितेन त्रयो भेदाः इत्यष्टधा पूर्यते॥ १०९॥

अशीतिर्वातजा रोगा इत्यादि।—वातेन जनिता वातजा रोगाः, यद्येवं तर्हि ज्वरादिषु व्यभिचारः, अन्यथा वात एव रोग इति चर्तार्हि स्वरूपमेव प्रसज्यते, तस्मात् वातरोगाः, किमिति प्रतिपादिताः? उच्यते, चरके द्विविधा रोगा उक्ताः, सामान्यजा नानात्मजाश्च, तत्र सामान्यजा वातादिभिः, समस्तैः व्यस्तैर्वा जन्यन्ते, यथा

आक्षेपको हनुस्तम्भ ऊरुस्तम्भः शिरोग्रहः ॥ ११० ॥
वाह्यायामोऽन्तरायामः पार्श्वशूलं कटिग्रहः।

ज्वरादय, नानात्मजा ये नियतैकदोषजनिता, यथा आक्षेपकादय, ये वातेनैव जन्यन्ते न खतन्त्रेण पित्तेन कफेन वा, तथा शोषचोषादय पित्तेनैव जन्यन्ते, न कफेन न वातेन वा, तथा तन्द्राहृल्लासादय कफेनैव जन्यन्ते न वातेन न पित्तेनेति। यथा वक्ष्यमाणवातविकारादीना खरूपमेवाव्यक्त पूर्वरूप न तु ज्वरादिवत विशिष्टमन्यत, तदुक्तम्—"अव्यक्त लक्षण तेषा पूर्वरूपमिति स्मृतम। आत्मरूपन्तु यत् व्यक्तमपायो लघुना पुन ॥" (च० चि० वातव्याधि०) इत्यादिना, एवमत्रापि न दोष। अधीतिसङ्ख्यापा विवरणमाह, आक्षेपक इत्यादि।—आक्षेपणाच्चालनादाक्षेप गात्रचालनम इत्यर्थ स च हस्यारुढत्वेन गात्र चालयतीत्यभिप्राय, यदुक्त —"यदा तु धमनी सर्वा कुपितोऽभ्येति नाकुत। तदाऽऽक्षिपत्यशु मुहुर्मुहुर्देह मुहुश्वर। मुहुर्मुहुस्तदाक्षेपादाक्षेपक इति स्मृत ॥" (सु० नि० १अ०) इति। हनुस्तम्भो हनुग्रह कथित, स द्विविध, विहतास्य सहतास्यश्च इति, यदुक्त —"कुपितो हनुमूलस्थ खसन्धिवाऽनिलो हनू। करोति विहतास्यत्वमथवा सहतास्यताम् ॥" (वा० नि० १५अ०) इत्यादि। ऊरुस्तम्भ इति—कुपितो वात ऊरुस्तम्भ करोतीत्यूरुस्तम्भ कथित, तथा हि—"तदा स्तभ्नाति तेनोरू स्तब्धौ शीतावचेतनौ। परकीयाविव गुरू स्यातामतिभृशव्यथौ ॥" (वा० नि० १५अ०) इति। सुश्रुतेन वातस्य प्राधान्यान्महावातव्याधौ पठितत्वेनापि सङ्ग्रह, अन्यत्र चिकित्साद्यर्थेन पृथक् लिखित। शिरोग्रह इति—शिर स्तब्धमिव भवतीति शिरोग्रह। माधवेन तु रक्ताश्रितवायुना शिरोग्रह प्रतिपादित, यदाह—* "रक्तमाश्रित्य पवन कृत्वान्मूर्धरा शिरा। रुजा सवेदना कृत्वा सोऽसाध्य स्याच्छिरोग्रह ॥" (वा० नि० १५अ०) इति। एके शिरोग्रहस्थाने † शिर कुण्डनमिति पठन्ति, तत्र कुण्डनमत्र प्रवेशो वक्तव्य वा, धातूनामनेकार्थत्वात्, तथा हि—"शिरोनासाक्षिजवृणा शीताया व्याप्ति कुण्डनम" इति वचनात्। शिरोग्रह इत्यपरे त्वाहु, स तु शिराणा पूरणमित्यर्थे वक्ष्यमाणत्वादत्रापि पुनरुक्तभयेन नाद्रियते स्वीकृत। वाह्यायामोऽन्तरायाम इति—आयामो धनुर्वदाक्षिप्तम्, यदुक्त

* लक्षणमेतत् माधवेन शिरोग्रहस्य लिखितं न तु शिरोग्रहस्य।

† "कुण्डनम्" इत्यत्र 'दुण्डनम्" इति चरकादिसम्मत पाठ।

दण्डापतानक खल्ली जिह्वास्तम्भस्तथाऽर्दितम् ॥११॥
पक्षाघातः क्रोष्टुशीर्षी मन्यास्तम्भश्च पङ्गुता।

—"बाह्यस्रायुप्रतानस्थो बाह्यायामं करोति च। अभ्यन्तरं धनुरिव यदा नमति मानवम्। तदाऽभ्यन्तरायामं कुरुते मारुतो बली॥" (सु० नि० १५०) इति। बाह्यायामे पृष्ठेन नतम् अभ्यन्तरायामे क्रोडेन नतमिति। पार्श्वशूलमिति—क्रोष्टाग्निवात पार्श्वशूलं करोतीति "हेत्वस्थानविशेषाच्च भवेद्रोगविशेषकृत" (च० चि० वातव्याधि०) इत्यादिवचनात्, तथा हि—"तत्र क्रोष्टाग्निते दुष्टे नियतो मूत्रवर्चसो। ग्रहणीदोषगुल्मार्श पार्श्वशूलञ्च मारुते॥" (च० चि० वातव्याधि०) इति। कटिग्रह इति—कटीस्तम्भत्वेन वेदनाविशेषे अवापि "हेत्वस्थानविशेषाच्च भवेद्रोगविशेषकृत" (च० चि० वातव्याधि०) इत्यादिना ज्ञेय। दण्डापतानक इति—यो दण्डवत् गात्र स्तम्भ्यते स च दण्डापतानक, यदुक्त चरके—'पाणिपादाशिर-पृष्ठग्रीवो स्तम्भाति मारुत। दण्डवत् स्तम्भगात्रस्य दण्डक तीव्रमुच्यते॥" (च० चि० वातव्याधि०) इति। स्तम्भनामान्यादृतस्तम्भोऽप्यस्यैव भेद इति केचित्। खल्लीति—पादजङ्घाप्रभृतिषु शूल परिवर्त्तनता च भवत सा खल्लीशब्दवाच्या, यत —"खल्ली तु पादजङ्घोरुकरमूलावमोटनी (च० चि० वातव्याधि०) इत्यादि। जिह्वास्तम्भ इति—यो वाग्वाहिनीशिरासम्थोऽन्नपानवाक्चेष्टनीग्रता करोति तत्र जिह्वास्तम्भ इति सज्ञा यदुक्त—"वाग्वाहिनीशिरासम्थो जिह्वा स्तम्भयते-ऽनिल। जिह्वास्तम्भ स तेनान्नपानवाक्चेष्टनीग्रता॥" (वा० नि० १५०) इति। अर्दित इति—मुखस्याऽर्धवक्रत्वेनोपलक्षितोऽर्दित इति प्रसिद्ध, तथा हि—"अर्दयत्यनिलो वक्त्रमर्दित जनयत्यत। वक्रीभवति वक्त्रार्द्ध ग्रीवा चाप्यपवर्त्तते॥" (सु० नि० १५०) इत्यादि। पक्षाघात इति—पक्षाघात एकाङ्गविकार, एकपक्षविघातमित्युक्तत्वात, यत,—'गृहीत्वार्द्ध तनोर्वायु शिरा स्नायुर्विशोष्य च। पक्षमन्यतर हन्ति सन्धिबन्धान् विमोचयन्॥ तत्क्षीणार्द्धकायस्य स्याद्वर्कर्मण्यो विचेतन। एकाङ्गरोग त केचिदन्ये पक्षवध विदु॥" (वा० नि० १५०) इति। क्रोष्टुशीर्ष इति—जङ्घाजङ्घो मन्थि स्थौल्येन ज्ञात्वा शृगालमस्तकवत् ग्रीवान्वितो भवति तेन क्रोष्टुशीर्ष इति सज्ञा, लोके "गेरुव" शब्दवाच्य, तदुक्त —"वातशोणितज ग्रीथो जानुमध्ये महारुज। ज्ञेय क्रोष्टुकशीर्षन्तु स्थूल क्रोष्टुकशीर्षवत्॥" (वा० नि० १५०) इति। वातशोणिताख्या जातो वात-

कलायखञ्जता तूणी प्रतितूणी च खञ्जता ॥ ११२ ॥
पादहर्षो गृध्रसी च विश्वाची चापबाहुक ।

शोणितज, * न पृथग्वातरक्तेन व्याधिना जनित इत्यभिप्राय । मन्थास्तम्भ इति—ग्रीवामुभयतो हे मन्ये मणी, तयो स्तब्धो निश्चलत्वम् यत,—'दिवास्वप्नात्समस्थानविद्वतोद्वानरीक्षणात्। मन्थास्तम्भ प्रकुरुते स एव श्लेष्मणाऽऽवृत ॥" (सु० नि० १अ०) इति। पङ्गुनेति—पङ्गुता खञ्जभेद तेन द्वयो सक्थ्नोर्बधात् पङ्गु एकसक्थ्नि बधात खञ्ज इति, बधश्चात्र गमनादिक्रियानाश, तदुक्तम्—"वायु. कफान्वित सक्थ्नु कण्डरामाविशत यदा। खञ्जतदा भवेज्जन्तु पङ्गु सक्थ्नोर्द्वयोर्बधात ॥" (सु० नि० १अ०) इति। कलायखञ्जतेति—य पादविक्षेप कुर्वन् पुरुष कम्पायमान खञ्जन्निव गच्छति स कलायखञ्ज इति शास्त्रे रूढिसज्ञा, यदुक्त —'प्रकामन् वेपते यस्तु खञ्जन्निव च गच्छति। कलायखञ्ज त विद्यान्मुक्तसन्धिप्रबन्धनम ॥' (सु० नि० १अ०) इति। तूणी प्रतितूणी चेति—स्त्रीपुसोगुह्यस्थाननधिकवेदनाविशेषेण भिन्दन्तीव तूणीशब्दवाच्या, सैव प्रतिलोमेन प्रधावनात् प्रतितूणी च कथिता, तथा हि—"अधो या वेदना याति वर्चोमूत्राशयोत्थिता। भिन्दन्तीव गुदोपस्थ सा तूणी नाम नामत ॥" (सु० नि० १अ०) इति। प्रतितूणी यथा—"गुदोपस्थोत्थिता या तु प्रतिलोम प्रधाविता। वेगे पक्वाशय याति प्रतितूणीति सोच्यते ॥" (सु० नि० १अ०) इति। खञ्जतेति—खञ्जता पङ्गुविशेषे पूर्व दर्शिता। पादहर्ष इति—यत्र रोगाच्छ्रायोऽतिसुप्तता झिण्झिण्यिवेदनाविशेष स पादहर्ष इति, यदुक्त—"हृष्यते चरणौ यस्य भवेतां चापि सुप्तकौ। पादहर्ष स विज्ञेय कफवातप्रकोपत ॥" (रो० वि० वातव्याधि०) इति। गृध्रसी चेति—गृध्रसीति प्रसिद्धा लोके राधिनाशब्दवाच्या इति केचित, तदुक्तम्—"श्लिक्पूर्वा कटिपृष्ठोरुजानुजङ्घापदं क्रमात। गृध्रसी स्तब्धरुक्तोदैर्गृह्णाति स्पन्दते मुहु ॥" (च० चि० वातव्याधि०) इति। गृध्रसीद्वयमाहुरेके एका केवलवातजनिता, अपरा वातकफलक्षणयुक्तेति, अत एव "वाताद्वातकफात तन्द्रा-गौरवारोचकान्विता" (च० चि० वातव्याधि०) इत्यादिवचनात। विश्वाची चापबाहुक इति—विश्वाची च बाहुगता गृध्रसीवत्, तथा हि—"तल प्रत्यङ्गुलीना या कण्डरा बाहुपृष्ठत। बाह्वो कर्मक्षयकरी विश्वाचीति निगद्यते ॥" (सु० नि० १अ०) इति। बाह्वो-

* "वातशोणितज ज्ञात वातरक्ताख्यावकारज चिकित्साभेदार्थं पृथक् पाठत इति गयदास.। वातशोणिताभ्या जात इति जेज्जड." इति सुश्रुतीष.।

अपतानो व्रणायामो वातकण्टोऽपतन्त्रक ॥ ११३ ॥

द्विवचन सामान्यापेक्षया कदाचित एकस्मिन्नपि बाहौ भवतीति। भुजस्यापकर्षत्वात् * अपबाहुक इति, † असशोषक इति वा आहु, तदुक्तम्—"असटैशस्थितो वायु शोषयित्वाऽसबन्धनम्। शिराश्चाकृष्य तत्रस्थो जनयत्यवबाहुकम्॥" (सु० नि० १अ०) इति। ‡ केवल वातजनितोऽसशोष कफवातजनितोऽवबाहुक इति सुश्रुतवचनाद्भिन्नत्वमनयो। अपतान इति—आक्षेपस्थावस्थाविशेषोऽपतानको भवति, "साऽपतानकसज्ञा य पातयत्यन्तरान्तरा" (सु० नि० १अ०) इत्यादिवचनात, य आक्षेपकोऽन्तरा अन्तरा पातयति सोऽपतानक इति तात्पर्यार्थ, सुश्रुते चिकित्सार्थे पृथक् उपात्तत्वात, चरके तु बहुरूपत्वाद्भिन्न एव, यत,—"दृष्टि सस्तभ्य सज्ञाच हत्वा कण्ठेन कूजति। हृदि मुक्ते नर स्वास्थ्य याति मोह व्रते पुन॥ वायुना दारुण प्राहुरेके तदपतानकम्॥" (च० सि० विमर्शीय०) इति। व्रणायामोऽपि आक्षेपकभेद आघातजत्वात, यत,—"कफपित्तान्वितो वायुर्बाह्यरेव च केवल। कुर्यादाक्षेपक लन्य चतुर्थमभिघातजम्॥" (सु० नि० १अ०) इति। चरकेण आक्षेपक एव दण्डापतानकोऽभ्यन्तरायामो बहिरायाम आगन्तुक इति चतुर्विध। तेनाभिघातेन व्रणकरत्वादव व्रणायाम कथित। वातकण्टक इति—विषमपादन्यासेन कुपितो वायुर्गुल्फे वेदना जनयति त वातकण्टकमाहु, तदुक्त—"रूक् पादे विषमन्यस्ते ग्रमाहा जायते यदा। वातेन गुल्फमाश्रित्य तमाहुर्वातकण्टकम॥" (सु० नि० १अ०) इति। अयमेवान्यत्र "खुड्डकावात" इत्युक्त। अपतन्त्रक इति—अपतन्त्रकोऽप्याक्षेपावस्था एव, स्वैरित्यादिना क्रुद्धो वायुस्थानादूर्ध्व गत्वाऽपतन्त्रक करोति इति सम्बन्ध, तथा च हृदयम्,—"क्रुद्ध. स्वै

---

* सुश्रुतादिषु अवबाहुक इति पाठ।

† असशोष अवबाहुकात् भिन्न इति सुश्रुतमाधवाभ्या पठित, मधुकोषकारेणापि तथैव व्याख्यात, तथा च—"असशोष केवलवातज उच्यते। असबन्धकारक श्लेष्मा असबन्धन। एतदनन्तरम् असशोष जनयेदिति शेष इति कार्त्तिक। शिराश्चेत्यादिना अवबाहुक। तत्रस्थ असस्थ। अयच्च वातकफज, अन्ये तु मिलिता अवबाहुकलक्षणमाहु, तन्न, यत सुश्रुतेनोक्तम्—असशोषावबाहुकयोर्बाहुमध्ये शिराव्यध इति।"

‡ सुश्रुते दृष्टार्थक कश्चित् ग्रन्थो न दृश्यते। असशोषे श्लेष्मशोषणात् श्लेष्मसम्बन्धो दृश्यते, न तु अवबाहुके। मधुकोषकारेण तु असशोष. केवलवातज: अवबाहुक वातकफज इति पठितम्।

अङ्गभेदोऽङ्गशोषश्च मिन्मिनत्वञ्च कल्लता।
प्रत्यष्ठीलाऽष्ठीलिका च वामनत्वञ्च कुब्जता ॥ ११४ ॥

कोपनैर्वायु स्थानादूर्ध्वं प्रपद्यते। पीडयन् हृदयं गत्वा शिरः शङ्खौ च पीडयन् ॥ घनर्वञ्चनयेद्वाचाख्यानिपेन्मोहयेत्तदा। स कृच्छ्रादुच्छ्वसेत्तापि स्तब्धाक्षोऽथ निमीलक ॥ कपोत इव कूजेच्च निःसञ्ज सोऽपतन्त्रक ॥" (च० चि० विमर्मी०) इति। अङ्गभेद इति—अङ्गभेदो वेदनाविशेषत्वेन दर्शित, यत,—"हेत्वृत्थानविशेषाच्च भवद्रोगावशेषकृत्" (च० चि० वातव्याधि०) इत्यादिवचनात, यथा कुक्षियुक्ते नानानुरूप कौलनिखातवत् वेदनाविशेषवत्त्वात्तथा तादृभेदादिभिरपि पीडाविशेष एव गम्यते, तदुक्त,—"स्थाननामानुरूपेण लिङ्गै शेषान् विनिर्दिशेत्" (च० चि० वातव्याधि०) इत्यादि। अङ्गशोष इति—अङ्गादीना बाहुमुखादीना शोष अङ्गशोष। मिन्मिनत्वम् इति—मिन्मिन सानुनासिकवचन। कल्लनेति—कल्लनाऽव्यक्तवचनत्वेन प्रतिपादिता, तत्र लुप्तपदव्यञ्जनाद्यभिधायिनी कल्लता शब्दवाच्या। वक्ष्यमाण मूकत्वमपि तद्विध एव। एतच्च जिह्वागतशब्दवाहिनीना धमनीना कार्यम्, तथा हि—'आहत्य वायु सकफो धमनी शब्दवाहिनी। नरान् करोत्यविज्ञेयान् मूकान्मन्मनगद्गदान्॥" (सु० नि० १अ०) इति। प्रत्यष्ठीलाष्ठीलिका चेति—नाभेरधस्ताद्दोषवर्त्तुलपाषाणवत यो रोग सोऽष्ठीलाशब्दवाच्य वाताष्ठीलेत्यत्र रूढि, तथा चोक्त—"नाभेरधस्तात् सञ्जात सञ्चारी यादृ वाऽचल। अष्ठीलावत् घनो ग्रन्थिरुदावर्त्तायत उन्नत ॥ वाताष्ठीला विजानीयाद्दिमार्गावरोधिनौ॥ एतामेव रुजायुक्ता वातविण्मूत्ररोधिनीम्। प्रत्यष्ठीलामिति वदेच्छठरे तिर्य्यगुत्थिताम्॥" (सु० नि० १अ०) इति। वामनत्वमिति—दुष्टभुक्तारब्धवाङ्मनोवर्त्त यथा युगलेकाङ्गुलीवद्वङ्गुल्यादिक भवति तथाऽयमपि वामनयोग। कुब्जनेति—* कुब्जत्वञ्च शिरागतवातविशिष्टत्वात केचिदायामान्तरगत (१) इत्याहु, पृष्ठादिगतत्वात, "कुब्यात शिरागत शूल शिराकुञ्चनपूरणम्" (सु० नि० १अ०)

---

* कुब्जत्वञ्च शिरागतवातविशेषत्वात केचित अन्तरायामबहिरायामान्तर्गतमित्याहुः क्रोडादिगतत्वात इति पाठकल्पन सङ्गतम्, "अन्तरायामबहिरायामाभ्या तन्मान्तरोक्त कुब्जत्वावरोध" इति मधुकोषदर्शनात्। चरके कुब्जना स्नायुगतवायुकार्य्यमित्युक्त, तथा च—"सर्वाङ्गैकाङ्गरोगाश्च कुर्य्यात् स्नायुगतोऽनिल। बाह्यायामान्तरायाम, खञ्जो कुब्जत्वमेव च॥" (च० चि० वातव्याधि०) इति।

अङ्गपीडाङ्गशूलश्च सङ्कोचस्तम्भरूक्षताः।
अङ्गभङ्गोऽङ्गविभ्रंशो विड्ग्रहो बद्धविट्कता ॥ ११५ ॥
मूकत्वमतिजृम्भा स्यादल्पुङ्कारोऽन्त्रकूजनम्।
वातप्रवृत्तिः स्फुरणं शिराणां पूरणं तथा ॥ ११६ ॥
कम्प काश्यं श्यावता च प्रलापः क्षिप्रमूत्रता।
निद्रानाशः स्वेदनाशो दुर्बलत्वं बलक्षयः ॥ ११७ ॥

"बाह्याभ्यन्तरनायाम खल्ली कुब्जत्वमेव च ॥" (च० चि० वातव्याधि०) इति। अङ्गपीडाद्यङ्गविभ्रंशान्तानामयभेदा हेतुस्थानविशेषत्वेन तदनुरूपा बोद्धव्या। अन्तरायाम खल्ली कुब्जत्वमेव मन्वन्ति (?)। अङ्गपीडाद्यङ्गविभ्रंशम् (?)। तस्य समभेदा स्थानविशेषत्वेन तदनुरूपा बोद्धव्या। तत्राङ्गसङ्कोच, तम्भोऽङ्गस्य रूक्षता। रूक्षतापीडाशूलादीनामपि परस्पर भेदाऽस्तीत्यवगन्तव्यम्। विड्ग्रहो बद्धविट्कता चेति—विड्ग्रह पुरीषस्यानिर्गम। बद्धविट्कता पुरीषस्य कर्कशता, पक्वाशय-कुपितवातगुणत्वात्, यत,—"ग्रहो विण्मूत्रवातानां शूलाध्मानाश्मशकरा" (च० चि० वातव्याधि०) इत्यादि। मूकत्वमिति—मूकत्वञ्च मिन्मिनत्वे दर्शितम्। अतिजृम्भता च वातदुष्टत्वात्, "जृम्भाऽत्यर्थं समीरणात्' (सु० उ० ३९ अ०) इत्यादिना। अल्पुङ्कारोऽपि वातविकारजनितत्वादेव लिखित, आमाशयस्थ कुपितो वातोऽल्पुङ्कार करोतीत्यर्थ, "रुक् पार्श्वोदरहृन्नाभेरल्पोङ्कारविसूचिका। * करोति कण्ठास्यशोष वातश्यामाशये स्थित ॥" इति। अन्त्रकूजनमिति—पक्वाशयगतवायुना भवति "पक्वाशयस्थोऽन्त्रकूजम्" (सु० नि० १अ०) इत्यादिवचनात्। वातप्रवृत्ति-रिति—गुदेन वातस्यातिनिर्गम। स्फुरणमिति—अङ्गस्फुरणम्, अङ्गस्यन्दनमित्यर्थ। शिराणा पूरणमिति—शिरागतो वायु शिराणा पूरण करोति, "कुप्यच्छिरागत शूल शिराकुञ्चनपूरणम्" (सु० नि० १अ०) इति वचनात्, पूरण शूलत्वम्, यदुक्त तन्त्रान्तरे—"सुप्तास्तब्धो सहत्या वा शिरा वात शिरागते" (च० चि० वात-व्याधि० इति। कम्प इति—सर्वाङ्गस्य शिरसश्च कम्पत्वेन वेपथुसज्ञ, यदुक्त—

* "करोति कण्ठास्यशोष वातश्यामाशये स्थित" इत्यत्र "कास: कण्ठास्यशोषश्च श्वासश्चामाशये स्थित," इति माधवनिदानधृत, चरकसम्मत: पाठ.।

अतिप्रवृत्ति. शुक्रस्य कार्श्यं नाशश्च रेतसः।
अनवस्थितचित्तत्व काठिन्य विरसास्यता ॥ ११८ ॥
* (कषायवक्त्रताऽऽध्मानं प्रत्याध्मानञ्च शीतता।
रोमहर्षश्च भीरुत्वं तोद. कण्डूरसाज्ञता ॥)
शब्दाज्ञता प्रसुप्तिश्च गन्धाज्ञत्व दृश' क्षय: ॥ ११९ ॥

"सर्वाङ्गस्य शिरसी वायुर्वेषणुसञ्ज्ञक" (रो० वि० वातव्याधि०) इति। शिरस इत्यवयवोपलक्षण, तेन हस्तपादयोरपि ग्रस्य स्यात्। कार्श्यमिति—क्षयता शरीरस्य वातप्रकृतिजत्वात्। एके कार्श्यस्थाने कार्ष्ण्यमिति पठन्ति, तत्र सर्वसम्मतम्। श्यावता चेति—शुक्रानुविद्धकृष्णवर्णत्व श्यावताशब्दत्वाच्च, पित्तानुबद्धवातविकृतत्वात्। क्षताप इति—अक्षतवद्वभाषण, यथोन्मादे, प्रबलवातकार्यत्वात्। क्षिप्रमूत्रतेति—क्षिप्रमूत्रता शीघ्रमूत्रता, यदुक्त—"मारुतेऽतिगुणे बस्तौ मूत्र सम्यक् प्रवर्त्तते। विकार' विविधास्तत्र प्रतिलोमे भवन्ति हि" ॥ (सु० नि० ३अ०) इति, विविधग्रहण क्षिप्रमूत्रताया ग्रहणार्थम् इति। निद्रानाश इति—निद्रानाशोऽप्यनिद्रता, अनिद्रत्वेनाप्यनिद्रा बोद्धव्या। स्वेदनाश इति—स्वेदस्याप्यनिर्गम, वायौ शोषकत्वात्। टबलत्व बलक्षयश्चेति—"रसादीना शुक्रान्तानां यत पर तेजस्तत खल्वोजस्तदेव बलमित्युच्यते" (सु० सू० १४अ०) तस्य बलस्याल्पत्व दुर्बलत्व, तस्यापि क्षयो बलक्षय इति, अत्र वात हेतुरिति प्रयोजकत्वात्। अतिप्रवृत्ति शुक्रस्य कार्श्यं नाशश्च रेतस इति—शुक्रस्य कार्श्यस्य क्षीणत्व स्वनानादित्यर्थ, नाशश्चेति स्वनानादित्यर्थ (१), अत्रापि शुक्रगतवातविकृतत्वात, यदुक्त—"क्षिप्रं मुञ्चति वक्राति शुक्र गर्भमथापि वा। विकृति जनयेच्चापि शुक्रस्य कुपितोऽनिल ॥" (च० चि० वातव्याधि०) इति। अनवस्थितचित्तत्वमिति—अत्रापि वातकारणत्व सिद्धम्। काठिन्यमिति—कठिनत्वम्, अङ्गादीनामिति भाव। विरसास्यता मुखवैरस्यम्। शब्दाज्ञता बधिरत्वम्। प्रसुप्तिश्च लक्ष्मिविषये अशक्तता। गन्धाज्ञत्वमिति—नासाविषयाज्ञता। दृश क्षय इति—दृष्टेनाश, अत्रापि श्रोत्रादिगतवात कारण बोद्धव्यम, यदुक्त—"श्रोत्रादीन्द्रियबध कुर्यात् क्रुद्ध समीरण "(च० चि० वातव्याधि०) इति, श्रोत्रत्वक्चक्षुर्घ्राणरसनेन्द्रियाणा बधो विनाश, तेन स्वविषयेष्वग्रहणशक्तिरित्यर्थ। एवमशीतिवातरोगा प्रतिपादिता ॥ ११०—११९ ॥

* श्राद्धशीऽयमिति कश्चित्।

चत्वारिंशत्पित्तरोगाणां विवरणम्।—

अथ पित्तभवा रोगाश्चत्वारिंशदिहोदिता'।
धूमोद्गारो विदाह' स्यादुष्णाङ्गत्वं मतिभ्रम'॥ १२०॥
कान्तिहानि कण्ठशोषो मुखशोषोऽल्पशुक्रता।
तिक्तास्यताऽम्लवक्त्रत्व स्वेदस्रावोऽङ्गपाकता॥ १२१॥

अथ पित्तभवा रोगा इति।—स्वहेतुदुष्टेन स्वतन्त्रेण पित्तेन जायता इत्यर्थ, यथा ज्वरचोक्तादय। चत्वारिंशदित्यस्य विवरणमाह—तत्र धूमोद्गारो धूमायन, "ध्मा दधो" इति शब्दवाच्य, मुखात् धूमोद्गरणमिव भवति, शिरायीवामुखतालुष्य धूमश्च उद्गिरण नि सरणम्। विदाहो विशेषादुष्णो दाह, अत्र विदाहशब्देन उष्णादि-दाह, तेषा ग्रहण कार्य्य पित्तजन्यत्वात्। उष्णादिदाहलक्षणञ्च—"दाह स्वाङ्गसन्ताप उष्म सस्वेदताऽरति। य क्वापि देहावयवे चोष स्यादग्निनेव स॥ पाणिपादासमूलेषु विदाहो विविधो मत। दाहस्तु मुखतालोष्ठे दवधूधूत्तरादिषु॥ कोष्ठदाहोऽन्तदाह स्याद्धृदाह उरो मत॥" इति। सर्वेऽपि पित्तधर्मजा, उक्तञ्च—"ऊष्मा पित्तादृते नास्ति ज्वरो नाम्लूषणा विना। तस्मात पित्तावरुद्धान त्यजेत् पित्ताधिकऽधिकम्॥" (वा० चि० १७अ०) इति, अत एव उष्णाङ्गत्व पित्तजमेव, अत सङ्ग्रह पित्तविकारेषु। पित्तविकारा पुन शोषचोषदाहदवधूविदाह-सदाहा त्वग्दाहोऽन्तर्दाह इत्युक्तम्। तथा मतिभ्रमोऽपि पित्तभव एव, न तु वातमदादिज बुद्धिनाश। ननु "पित्त पक्त्यूष्मदर्शने। क्षुत्तृड्रुचिप्रभामेधा-धीशौर्य्य तनूमार्दव॥" (वा० सू० ११अ०) इत्यादिना शरीरपाकरणादाधिक्यात् बुद्धेराधिक्य स्यादिति चेन्न, 'ऊष्मणो जन्मनी यस्य तत एव स सौदति। उपघातस्तु तेनैव तथा नेतस्य तेजस॥" इति न्यायात पित्ताधिक्यात् बुद्धिनाश इति स्थितम्। कान्तिहानि पित्तदग्धशरीरत्वात, न तु वातादिवत् काश्यादि। कण्ठशोषो मुख शोषश्च तथो शुष्कत्व तदूषण शुष्कद्रवत्वम्। अल्पशुक्रता पित्तादेव। तिक्तास्यता अम्लवक्त्रवमिति—तिक्तो निम्बादि तदवास्य, * तथा अम्लास्यता अम्लमुखता। ननु वाग्भटे—"कटुकाम्लो रसौ वर्ष पाण्डुरारुणवर्जित" (वा० सू० १२अ०) इत्युक्तम, इह तु तिक्त इति विरोध, नैव, वाग्भटोक्तस्य "कटु स्यात कटुतिक्तौ" इति वचनात तिक्त एवाय, "कषायतिक्तमधुर वातादिषु सुख क्रमात" (वा०

---

* तिक्तारसवदास्यमित्यर्थ।

क्लमो हरितवर्णत्वमदृप्ति पीतगात्रता।
रक्तस्रावोऽङ्गदरण लोहगन्धास्यता तथा॥ १२२॥
दौर्गन्ध्यं पीतमूत्रत्वमरतिः पीतविट्कता।
पीतावलोकन पीत-नेत्रता पीतदन्तता॥ १२३॥
शीतेच्छा पीतनखता तेजोद्वेषोऽल्पनिद्रता।
कोपश्च गात्रसादश्च भिन्नविट्कत्वमन्यता॥ १२४॥
उष्णोच्छ्वासत्वमुष्णत्वं मूत्रस्य च मलस्य च।
तमसो दर्शन पीत-मण्डलानाञ्च दर्शनम्॥
नि.सहत्वञ्च पित्तस्य चत्वारिंशद्गुज स्मृताः॥ १२५॥

लि० ५अ०) इति। स्वेदो घर्मस्य स्राव स्रुति। अङ्गपाकता अङ्गपाकत्वम्। क्लम इति—"थोऽनायास श्रमो देहे ग्रहङ्ग श्वासवर्जित। क्लम स इति विज्ञेय इन्द्रियाथप्रबाधक॥" (सु० शा० ४अ०) इति। हरितवर्णत्व हरितवर्णता, "दृष्ट्वा हरितहारिद्र" इति वचनात्। अदृप्ति दृप्तिर्न भवति। पीतगात्रता पीतशरीरत्वम्। रक्तस्राव रक्तस्य स्रवणम्। अङ्गस्य दरण विदरणम्। लोहगन्धास्यता लोह * कालायस तद्वन्मुखगन्धो भवति। दौर्गन्ध्यम अङ्गानाम्। पीतमूत्रत्व हरिद्राभमूत्रत्वम्। अरति सर्वत्राप्रीति। पीतविट्कता पीतपुरीषता। पीतावलोकन पीतादर्शन वस्तुषु, नेत्रादिषु च पीतता। पीतदन्तता दन्तेषु पीतत्वम्। शीतेच्छा शीतवस्तुनाऽभिलाष। पीतनखता पीतनखत्वम। तेजोद्वेष तैजसवस्तुद्वेष। अल्पनिद्रता अल्पनिद्रत्वम्। † कोपश्च पित्तस्यैव, रक्तकोपता रक्तजेष्वुक्तत्वात। गात्रसादो गात्रसादनम्। भिन्नविट्कत्व भिन्नपुरीषता। अन्यता नेत्रस्यैव। उष्णोच्छ्वासत्वमिति—उष्णश्वासत्वम्। उष्णत्व मूत्रस्य च मलस्य चेति—द्वयोरपि औष्ण्य पित्तभवत्वात्। तथा तमसो दर्शनम् अन्धकारदर्शनम्। तथा पीतमण्डलानाञ्च

* लोह रक्तमित्यर्थो युक्त, लोहि गन्धाभावात्, रक्तपित्त "लोहगन्धित्वं रक्तगन्धित्वम्" इत्यादर्शनाच्च।

† "कोपश्च पित्तस्यैव" इत्यत्र "कोप क्रोधाधिक्यम्" इत्यर्थो युक्त, क्रोधस्य पित्तकार्यत्वात्, तथा धूमोद्गारादीना सर्वेषामेव पित्तकोपजन्यत्वेन "कोप, पित्तस्यैव" इत्यस्य पुनरुल्लेखासङ्गतत्वाच्च।

विंशतिकफरोगाणां विवरणम्।—

कफस्य विंशतिः प्रोक्ता रोगास्तन्द्राऽतिनिद्रता।
गौरवं मुखमाधुर्यं मुखलेपः प्रसेकता॥ १२६॥
श्वेतावलोकनं श्वेतविट्कत्वं श्वेतमूत्रता।
श्वेताङ्गवर्णता शैत्यमुष्णेच्छा तिक्तकामिता॥ १२७॥
मलाधिक्यञ्च शुक्रस्य बाहुल्यं बहुमूत्रता।
आलस्यं मन्दबुद्धित्वं हृल्लासघर्घरवाक्यता॥
अचैतन्यञ्च गदिता विंशतिः श्लेष्मजा गदाः॥ १२८॥

दोषज पोतानि यानि सङ्कलानि तेषा दृष्टि। निसहत्वञ्च पित्तस्येति—निसहत्व * निसहता। इति चत्वारिंशत पित्तरुज पित्तजनिता रोगा इत्यर्थ॥ १२०—१२५॥

पित्तजानुक्त्वा कफजानाह कफस्येति।—कफस्य श्लेष्मण स्वदोषदुष्टस्य जनिता रोगा विंशति प्रोक्ता इत्यर्थ। तेषा विवरणमाह, अतिनिद्रतेति—निद्रालक्षणन्तु—† यदा तु मनसि ग्लानि कर्मात्मा च क्लमान्वित। आलस्य मन्दबुद्धित्व हृल्लासघर्घरवाक्यता॥ विषयेभ्यो निवर्त्तेत तस्य निद्रा विनिर्दिशेत॥" अति अत्यन्त निद्रा अतिनिद्रता। गौरवमिति—तल्लक्षणन्तु—"आर्द्रत्वमावनद्ध हि यो गात्रमभिनन्यते। तथा गुरुशिरोऽत्यर्थं गौरव तदिनिर्दिशेत॥" (सु० शा० ४अ०)। मुखमाधुर्य्य मधुरास्यता। मुखलेप कफेन लिप्तता। प्रसेकता लालास्रावता। श्वेतावलोकन श्वेतस्य वस्तुनो दर्शनम। तथा श्वेतविट्कत्व शुभपुरीषता। श्वेतमूत्रता शुभमूत्रता। श्वेताङ्गवर्णता श्वेतत्वमङ्गस्य। शैत्यम अङ्गशीतता। उष्णेच्छा उष्णवस्तुनोऽभिलाष। तिक्तकामिता तिक्तस्य कटुवस्तुन काङ्क्षा अभिलाष। मलाधिक्य मलस्याधिक्यता॥ शुक्रस्य बाहुल्यम् अनिशुक्रता। बहुमूत्रता मूत्रस्य बहुप्रवृत्ति। आलस्यमिति—तल्लक्षणन्तु—"समर्थस्याप्यनुत्साह कर्मस्वालस्यमुच्यते" (सु० शा० ४अ०) इति। मन्दबुद्धित्व बुद्धेर्मन्दता। हृल्लासोऽन्नानभिलाष। घर्घरवाक्यता घर्घरशब्दत्वम्।

---

* सहनशक्तेरभाव, धैर्य्याभाव इत्यर्थ।

† खलूणनिद न समीचीन "यदा" "तस्य" इति सर्वनामद्वयस्य सङ्गतिविरोधात् कर्मवृत्तक्रियापदयो दूरान्वयदोषाच्च, तथा चरके "यदा तु मनसि ग्लान्ते कर्मात्मान क्लमान्विता। विषयेभ्यो निवर्त्तते तदा स्वपिति मानव॥" इति पाठदर्शनाच्च।

दशरक्तरोगाणां विवरणम्।—

रक्तस्य च दश प्रोक्ता व्याधयस्तेषु गौरवम्।
रक्तमण्डलता रक्त नेत्रत्व रक्तमूत्रता॥ १२८॥
रक्तनिष्ठीवन रक्त-पिडकानाञ्च दर्शनम्।
औष्ण्यञ्च पूतिगन्धत्व पीडा पाकश्च जायते॥ १३०॥

चतुःसप्ततिमुखरोगाणां विवरणम्।—

चतुःसप्ततिसङ्ख्याका मुखरोगास्त्रयोदिताः॥ १३१॥

तत्र एकादशौष्ठरोगाणां विवरणम्।—

तेष्वोष्ठरोगा गणिता एकादशमिता बुधैः।
वातपित्तकफैस्त्रेधा त्रिदोषैरसृजा तथा॥ १३२॥

अचैतन्य चैतन्य ज्ञान तद्रहितत्व जडता, * कफरुद्धस्रोतसा रोधात्। इति श्लेष्मरोगा विंशतिर्व्याख्याता॥ १२६—१२८॥

अथ रक्तजानां रोगाणां विवरणमाह, रक्तस्येत्यादि।—रक्तस्य रुधिरस्य व्याधयः मुनिभिर्दश प्रोक्ता। तेषु व्याधिषु गौरव कफजमिव रक्तस्यानुरूपतया भवति। तथा रक्तमण्डलता आरक्तमण्डलोत्पत्ति। तथा रक्तनेत्रत्वम् आरक्तलोचनता। तथा रक्तमूत्रता रक्तमूत्रत्व, तस्य रक्तजन्यत्वात्। रक्तनिष्ठीवन रक्तमिश्रितनिष्ठीवन रक्तस्यैव वा निष्ठीवनम्। तथा रक्तपिडकानाञ्च दर्शन रक्तजा आरक्ता वा पिडका क्षुद्रस्फोटा तासा दर्शनम। औष्ण्यम् उष्णत्व रक्तस्यापि तैजसत्वात्। पूतिगन्धत्व दुर्गन्धता सा तु रक्तजैवाव ग्राह्या न त्वन्यजा। तद्वत पीडाऽपि। तथा पाकश्च सामादीना रक्तस्य वा। इति दश रक्तजा रोगा व्याख्याता॥ १२८।१३०॥

उद्देशक्रमेणैव मुखरोगाणा विवरणमाह, चतुःसप्ततीति।—मुखरोगा इति—मुखे भवा रोगा मुखरोगा। आयतनसमुदायस्य तदधिष्ठतत्वान्मुखत्वाव ग्रहणम्, यत —"मुखरोगा समाख्याता सप्तस्वायतनेषु च" इति। आयतनानि स्थानानि, यथा—दन्तौष्ठदन्तमूलजिह्वाकण्ठतालुसवगतानीति॥१३१॥

मुखरोगेषु प्रथमत ओष्ठरोगानाह, तेष्विति।—एकादशेत्यादि—वातपित्तकफै

---

* कफरुद्धमनोवहस्रोतोरोधात् कफरुद्धचैतन्यवहस्रोतोरोधात् वा इति पाठकरण सङ्गतम्।

क्षतं मासार्बुदञ्चैव खण्डोष्ठश्च जलार्बुदम्।
मेदोऽर्बुदञ्चार्बुदञ्च रोगा एकादश स्मृताः॥ १३२॥

तत्र दशदन्तरोगाणां विवरणम्।—

दन्तरोगा दशाख्याता दालनः क्रिमिदन्तकः।

क्षतजा यथा भेदा, तद्यथा—'कक्षशो परुषो रूक्षो सम्प्राप्तानिलवेदनो। दाल्यते परिपाट्येते ओष्ठौ मारुतकोपत॥ पीयत पिडकाभिश्च सरुजाभि समन्तत। सदाहपाकपिडकौ पीताभाता च पित्तत॥ सवर्णाभिस्तु चायत पिडकाभिरवेदनो। भवतस्तु कफादोष्ठौ पिच्छिलौ गौरवौ गुरू॥" (रो० वि० ओष्ठ०) इति। विदोषैरिति—निखिलदोषवचेण चतुर्थो भेद, यदुक्त—"सकृत् क्षणौ सकृत पीतौ सकृत् श्येनौ तथैव च। सन्निपातेन विज्ञेयावनेकपिडकाचितौ॥" (सु० नि० १६अ०) इति। अक्तजा रक्तेन पञ्चमो भेद, रक्तापसृष्टत्वात्, यत,—'खर्जूरफलवर्णाभ. पिडकाभिर्नपीडितो। रक्तापसृष्टो क्षाधर स्रवत शोणितप्रभौ॥" (सु० नि० १६अ०) इति। क्षतादिति—आभिघातजम्, तेन कथमूष्मा? यथा—'आष्ठौ पव्यवदीर्यते पाट्येन चाभिघातत' (रो० वि० ओष्ठ०) इति। ननु क्षतादेव दोषप्रकोप स्यात्, तेन दोषाभिगत एव क्षतजो भेद किमिति न पठित? यतो भोजनोक्तत्वात "क्षतावभिहतौ वाऽपि रक्तावाष्ठौ सवेदनौ। भवत सपरिस्रावौ कफरक्तप्रदूषितौ॥" इति। उच्यते, वातादिक केवल स्वकारणकुपित, अत्र तु अभिघातात क्षुभ्यते तेनाभिघातनिदानत्वात द्वयोर्भेद इत्यदोष। मासार्बुदमिति—अर्बुदाकारत्वान्मासपिण्डवदुद्गतावोष्ठौ भवत इति, यदुक्त—"गुरू स्थूलौ मासदृढौ मासपिण्डवदुद्गतौ। जन्तवश्चात्र मूर्च्छन्ति नरस्याभयता मुखात॥" (रो० वि० ओष्ठ०) इति। खण्डोष्ठ इति—"खण्डोष्ठ क्षतभेद स्यात्' इत्यादिना अत्र खण्डौष्ठकदेशत्वाद्विन्न कदाचिद्दोषजत्रणविकृतिभावाद्वा भिन्न, "तत्र खण्डोष्ठ इत्युक्तो वातेनोष्ठौ विधा क्षत" (वा० उ० २१अ०)। जलार्बुदमिति—जलबुद्बुदाकारं जलार्बुदम्, यदुक्त—"जलबुद्बुदवत वात-कफादोष्ठे जलार्बुदम्" (वा० उ० २१अ०) इति। अत्रार्बुदत्रयमर्बुदवत् ज्ञातव्यम्। तत्र मेदोऽर्बुदा यथा—"सर्पिपिण्डप्रतीकाशौ मेदसा कण्डुरौ गुरू। अच्छ स्फटिकसङ्काशमास्राव स्रवतो भृशम्॥ तयोर्व्रणो न सरोहेन्मृदुत्वच्च न गच्छति॥" (रो० वि० ओष्ठ०) इति॥१३१।१३३॥

अथ दन्तरोगानाह, दन्तरोगा दशेत्यादि।—तत्र दालन इति—दाल्यमानेष्विव रुजा भवति इति दालन., यदुक्त—"दीर्यमाणेष्विव रुजा यस्य दन्तेषु जायते॥

दन्तहर्षः करालश्च दन्तचालश्च शर्करा ॥
अधिदन्तः श्यावदन्तो दन्तभेदः कपालिका ॥ १३४ ॥

दालनो नाम स व्याधि सदागतिनिमित्तज ॥" (रो० वि० दन्त०) इति। क्षतिदन्तक इति—क्षतिकृतच्छिद्रत्वेन वेदनाविशेषा यत्र भवति स क्षतिदन्तक, यदुक्त—'क्षणाच्छिद्रयुत स्रावो ससरक्षा मक्षारुज। क्षतिनिमित्तरुजो वातात् विद्धेव क्षतिदन्तक ॥" (सु० नि० १६ अ०) इति। दन्तहर्ष इति—दन्तहर्ष स्वनामत प्रसिद्ध, तथा हि—"शीतरूक्षप्रवातास्त्र स्वप्नानासवद्या द्विजा। पित्त-मारुतकोपेन दन्तहर्ष स नामत ॥" (रो० वि० दन्त०) इति। कराल इति—करालो विषमदन्तक विसङ्कटदन्त इत्यर्थ, यदुक्त—"क्षणे क्षणे प्रकुरुते वायुर्दन्तसमाश्रित। करालान् विकटान् दन्तान् कराला न स विद्यति ॥" (रो० वि० दन्त०) इति। दन्तचाल इति—दन्तानां चालन। "माधवेन तु हनुसौषि इति पठित, तदयथा—"वातेन तैलेभावेषु हनुसन्धिर्विसङ्कट। हनुसौषि इति श्रेयो व्याधिरदितलक्षण ॥" (सु० नि० १६ अ०) इति। विसङ्कट इति—हनुसन्धिश्च किञ्चिच्चलित, अत एव सुश्रुते दन्तदेशसमीप्याद्दन्तपीडनाच्चाय पठित। शर्करेति—शर्करा बालुका तद्वदुत्तरोगो भवति यत,—"मज्जो दन्तगतो यस्तु कफमारुतशोणित। शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥" (रो० वि० दन्त०) इति। एके "दन्तानां गुणहारी च" इति पठन्ति। अधिदन्त इति—अधिदन्त अधिकदन्त, खलिवद्धन इति सञ्ज्ञान्तरम्, यदुक्त—"मारुतेनाधिको दन्तो जायते तीव्रवेदन। खलिवद्धनसञ्ज्ञोऽसौ जाते रुक्च प्रशाम्यति ॥" (रो० वि० दन्त०) इति। श्यावदन्त इति—नीलदन्त इति वा, यथोक्तम्—"अस्रक्षयेण पित्तेन दग्धो दन्तस्त्रुषत। श्यावता नीलता वाऽपि गत स श्यावदन्तक ॥" (सु० नि०

माधवनिदाने हनुमोचलक्षण न कुत्रापि दृश्यते दृश्यते च वातव्याधौ हनु-ग्रहलक्षणमिति। लक्षणमिद सुश्रुतस्य। उक्तञ्च मधुकोषकारेण—"अत्रावकाशे हनु-मोक्ष सुश्रुते दन्तदेशसमीप्यात दन्तपीडनादपि पठित, स इह सङ्ग्रहकारेण मुखदन्तगतत्वाभावात न पठित, पठितस्तु हनुग्रहसञ्ज्ञया वातव्याधौ भीजवचनात, यदुक्त—वाताभिघातात् जत्रूर्ध्वं हनुसन्धिर्विमुच्यते। निरुजश्चिबुक क्लेश्य भाषित तत्र गच्छति ॥ सम्यक् तमनिशं व्याधि हनुमोक्ष विनिर्दिशेत्॥" इति।

तत्र वर्णोद्दिशद्दन्तमूलरोगाणां विवरणम्।—

तथा त्रयोदशमिता दन्तमूलामया स्मृता।
श्लीतादोपक्रुशौ द्वौ तु दन्तविद्रधिपुप्पुटौ ॥ १२५ ॥
अधिमासो विदर्भश्च महाशुषिरशौषिरौ।

१६म०) इति। दन्तभेद इति—दन्तभेदो भञ्जनकसञ्ज्ञान्तर तीव्ररुजाकरत्वात, यत, —"वक्र वक्र भवेद्यस्मिन् दन्तभङ्गश्च तीव्ररुक्। कफवातकृतो व्याधि स भञ्जनक-सञ्ज्ञित ॥" (सु० नि० १६म०) इति। कपालिकेति—* मलसहितदन्तावयवेषु काठिन्यात कपालतुल्येषु दीर्य्यत्सु दन्तमूलेष्वेव शर्करैव कपालिका कथिता, तथा हि—"कपालाख्यव दीर्य्यत्सु दन्तानां सैव शर्करा। कपालिकेति विज्ञेया सदा दन्तविनाशनी ॥" (रो० वि० दन्त०) इति ॥१२४॥

तदेति।—मुखरोगाधिष्ठितत्वात दन्तमूलगतरोगास्त्रयोदशसङ्ख्यया प्रोक्ता। तत्र श्लीतादोपक्रुशाविति।—श्लीतादः इति—अभिघातादिनिमित्त विना दन्तमास श्लीर्णतादिभावेनोपलक्षित, तथा हि—"श्लीणित दन्तवेष्टेभ्यो यस्याकस्मात प्रवर्त्तते। दर्गन्धानि सक्रमीणि प्रक्लेदीनि मृदूनि च ॥ दन्तमासानि श्लीर्य्यन्ते पचन्ति च परस्परम। श्लीतादो नाम स व्याधि कफपाणितसम्भव ॥" (सु० नि० १६म०) इति। उपक्रुश इति—उपक्रुशा दाहपाकयुक्तावेष्ट, यथा—"वेष्टषु दाह पाकश्च तास्था दन्तांश्चलन्ति च। यस्मिन् सोपक्रुशा नाम पित्तरक्तकृतो गद ॥' (रो० वि० दन्तवेष्ट०) इति। दन्तविद्रधिरिति—"दन्तमासे मले सार्द्धवाह्यान्त श्वयथुर्गुरु। सदाहरुक् सवेङ्गिन पूयास्र दन्तविद्रधि ॥" (वा० उ० २१म०) इति। पुप्पुट इति—दन्तपुप्पुटमज्ञ, यत,—"दन्तयोस्त्रिषु वा यस्य श्वयथुर्जायते महान्। दन्तपुप्पटको नाम स व्याधि कफरक्तज ॥" (रो० वि० दन्त०) इति। अधिमास इति—"हानव्ये पश्चिमे दन्ते महान् श्लीथो महारुज। लोलास्रावी कफकृतो विज्ञेय, सोऽधिमासक ॥" (सु० नि० १६म०) इति। विदर्भ इति—विदर्भो-ऽभिघातज इत्युक्तत्वात् "घृष्टेषु दन्तमासेषु सरक्ता जायते महान्। भवान्त च चला दन्ता स विदर्भोऽभिघातज ॥" (सु० नि० १६म०) इति। महाशुषिर इति—महाश्लौषिर इति सञ्ज्ञान्तरम, यथा—"दन्तास्थनि वेष्टेभ्यस्तालु चाप्यवदीर्य्यते ॥

---

* "मलसहित" इत्यादि "दन्तमूलेष्वेव" इत्यन्तस्थले "दन्तमले एव काठिन्ये कपालप्राये दीर्य्यमाणे दन्तशर्करैव" इति पाठकल्पन सङ्गतम्।

तेष्वेव गतयः पञ्च वातात् पित्तात् कफादपि ॥
सन्निपाताद्गतिस्त्वन्या रक्तनाडी च पञ्चमी ॥ १३६ ॥

तत्र षट्जिह्वारोगाणां विवरणम्।—

तथा जिह्वामया षट् स्युर्वातपित्तकफैस्त्रिधा।
अलासश्च चतुर्थः स्यादधिजिह्वा च पञ्चमी ॥
षष्ठी चैवोपजिह्वा स्यात्—" ॥ १३७ ॥

यस्मिन् स सर्वजो व्याधिमहाश्लौषिरसञ्ज्ञक ॥' (रो० वि० दन्तवेष्ट०) इति। सर्वज इति—त्रिदोषजत्वेन सान्निपातिको ज्ञेय, यदुक्त भोजे—'सदाहो दन्तमूलेषु शोथ पित्तकफानिलात्। जात चपयति कफ चौषे तस्मिंस्तु शोणितम्॥ प्रबुद्धमनिश दन्तास्तास्त्रोष्णमपि दारयेत्। महाश्लौषिर इत्येष सन्नरोगान्निहन्त्यसृत्॥" इति। श्लौषिर इति प्रसिद्ध, यथा—"श्यावदन्तमूलेषु रुजावान् कफरक्तज। लालास्रावी न विज्ञेय: श्लौषिरो नाम नामत॥" (रो० वि० दन्तवेष्ट०) इति। तेषु त्रयादशविधेषु दन्तमूलगतेषु पञ्च गतय पञ्च नाड्यो दोषादिभेदेन ज्ञातव्या, यदुक्त—"दन्तमूलगता नाड्य पञ्च ज्ञेया यथेरिता" (सु० नि० १६अ०) इति। नाडीव्रणनिदानोक्तलक्षणै दन्तगतनाड्य ज्ञेया। अत्र वातपित्तकफसन्निपातानान्तु निमित्तता। आगन्तुरभिघातज; तेनापि रक्तस्य प्रादुर्भावादत्र रक्तनाडी गणिता इति न दोष ॥ १३५।१३६ ॥

तथा जिह्वामया षट् स्युरित्यादि।—तत्र वातात् शाकच्छदनप्रकाशा भवति, पित्तात पीता च भवति, कफात गुर्वी भवतीति, तथा हि—"जिह्वाऽनिलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा। पित्तेन पीता परिदह्यते च चिता सरक्तैरपि कण्टकैश्च॥ कफेन गुर्वी बहुला चिता च माचीकुचैर्ये श्लाक्ष्णिकण्टकाभ॥" (सु० नि० १६अ०) इति। अलास जिह्वागतशोथेनोपलक्षित इति, यदुक्त—"जिह्वातले य श्वयथु प्रगाढ सोऽलाससञ्ज्ञ कफरक्तमूर्त्ति। जिह्वा स तु स्तब्धयति प्रबुद्धो मूले च जिह्वा भृशमेति पाकम्॥" (सु० नि० १६अ०) इति। अधिजिह्वेति—जिह्वोपरि जातो य श्वयथुस्तेनाधिजिह्वा कथिता, यत,—"जिह्वायरूप श्वयथु कफात्तु जिह्वोपरिष्टादपि रक्तमिश्रात्। ज्ञेयोऽधिजिह्व खलु रोग एष विवर्जयेदागतपाकसेनम्॥" (रो० वि० कण्ठ०) इति। उपजिह्वा चेति—जिह्वाया अधस्ताद्यो जिह्वातलजातो य शोथस्तेनोपलक्षितोपजिह्वा चेति, यदुक्त—"जिह्वायरूप श्वयथुर्हि जिह्वामुन्नम्य जात कफरक्तमूल। लालाकर कण्डुयुत, सचोष, सा तूपजिह्वा पठिता भिषग्भ्य॥" (रो० वि० कण्ठ०) इति ॥ १३७ ॥

तत्राष्टतालुरोगाणां विवरणम्।—

"—तथाऽष्टौ तालुजा गदाः।
अर्बुदं तालुपिडका कच्छपो तालुसंहतिः॥
गलशुण्डी तालुशोषस्तालुपाकश्च पुप्पुटः॥ १३८॥

तत्राष्टादशगलरोगाणां विवरणम्।—

गलरोगास्तथाऽऽख्याता अष्टादशमिता बुधैः।

तथेति।—मुखरोगसङ्ख्याकरणत्वात् अष्टौ भेदा यथा अर्बुदमित्यादि। अर्बुदमिति—तालुर्बुदसंज्ञा, तथा च—"पद्माकार तालुमध्ये तु शोथं विद्यादरुणादर्बुदं प्रोक्तलिङ्गम॥" (सु० नि० १६ अ०) इति। प्रोक्तलिङ्गमित्यत्र पूर्वोक्तादरुणार्बुदादल्पलक्षणमित्यर्थः। भोजे तत्र श्लेष्मरक्तोद्भवमिति, तथा हि—"उपर्यधो भवेन्नद्यो यथा पद्मस्य कर्णिका। पार्श्वतश्चाङ्गरेर्दीर्घनासा चाप्यवमीदति॥ श्लेष्मरक्तसमुत्थान तत्तालुर्बुदसंज्ञितम॥" इति। तालुपिडकेति—तालुदेशे शोथकरत्वेन पिडका भवन्ति। तत्रान्तरे अर्बुद इति नामान्तरम्, तदुक्तं यथा—'शोथं स्रस्रां लोहितस्तालुदेशे रक्तार्बुदं ज्ञेयं सोऽर्बुदो वृग्ग्वराख्य॥" (सु० नि० १६ अ०) इति। कच्छपीति—कच्छपीव्रततिपिडका तालुनि भवति, सा कच्छपीशब्दवाच्या, तदुक्तं—"कूर्मोत्क्लेशोऽवेदनः शोथोऽन्नजन्मा रोगो ज्ञेयः कच्छपः श्लेष्मणा च' (रो० वि० तालु०) इति। तालुसंहतिरिति—तालुसंहतमांससङ्घातेन कथित, तथा हि—"दुष्टं मांसं नीरुजं तालुमध्ये कफात स्थूलं मांससङ्घातमाहुः॥" इति। गलशुण्डीति—वातपूरितचर्मपुटकतुल्यशोथो गलशुण्डीशब्दवाच्यः। गलशब्देन कण्ठशुण्डीति केचित, यदुक्तं—"श्लेष्मासृग्भ्यां तालुमूले प्रवृद्धो दीर्घः शोथो घातवस्तिप्रकाशः। तृष्णाकासश्वासकृच्छ्रान्नवदन्ति व्याधिं वैद्याः कण्ठशुण्डीति नाम्ना॥" (रो० वि० तालु०) इति। तालुशोष इति—तालुशोषनामा व्याधिः, तदुक्तं यथा—'शोषोऽत्यर्थं दीर्यते चापि तालु श्वासश्चीयत्तालुशोषोऽनिलाच्च" (रो० वि० तालु०) इति। "गलशुण्डी तालुशोषः" इत्यत्र "तालुशोषस्तु पित्तात्" इति केचित पठन्ति, पित्तस्यापि शोषकत्वात्। किन्तु अत्र भोजेऽपि वातादेव पठित, यथा—"तालुशोषी भवेद्वातात् व्याधिर्यं चतमयुतः" इति। तालुपाक इति—तालनि पित्तमेवात्यर्थं पाकं करोति, यदुक्तं—"पित्तं कुर्यात पाकमत्यर्थघोरं तालुस्थेन तालुपाकं वदन्ति" (सु० नि० १६ अ०) इति। पुप्पुट इति—तालुपुप्पुटः कथित, तालुशब्दोऽत्र लुप्तनिर्दिष्टो द्रष्टव्य, यदुक्तं—"नीरुक् स्थायी कोलमात्रः कफात् स्यान्मेदोयुक्तात् पुप्पुटस्तालुदेशे॥' (सु० नि० १६ अ०) इति॥ १३८॥

वातरोहिणिका पूर्वं द्वितीया पित्तरोहिणी ॥ १३९ ॥
कफरोहिणिका प्रोक्ता त्रिदोषैरपि रोहिणी।
मेदोरोहिणिका ह्यन्त्रो गलौघो गलविद्रधिः ॥ १४० ॥

गलरोगा इत्यादि।—गलोपलाक्षणत्वेन कण्ठरोगप्रतीतिः। तत्र पञ्चानां रोहिणीणां सामान्यलक्षणं कण्ठाद्य पलाड्वरा सम्भवन्तीत्यादिना दर्शितम, यथा—"गलेऽनिल पित्तकफौ च मूर्च्छितौ प्रदूष्य मांसञ्च तथैव शोणितम। प्रकुर्वतः कण्ठरुजः पलाड्वरान् निहन्त्यसून् व्याधिरयं हि रोहिणी॥" इति। यद्यपि सर्वा रोहिणी सन्निपातजा तथाऽप्युत्कषादिभेदेन वातजादिव्यपदेशः, व्यक्तलक्षणत्वाच्च, तदयथा—"जिह्वा ममत्वाङ्गरुजो ये मांसाङ्कुरा कण्ठनिरोधिन स्युः। ता रोहिणी वातकृता वदन्ति वातात्मकोपद्रवगाढजुष्टाम॥" (सु० नि० १६ अ०) इति। पित्तरोहिणीति—पित्तजाता रोहिणी श्रीथोत्थानत्वेन दर्शिता, यत,—'ज्वरोऽङ्गमा क्षिप्रविदाहपाका तीव्रज्वरा पित्तनिमित्तजा तु" (रो० वि० कण्ठ०) इति। कफरोहिणिकेति—कण्ठादिरोधकत्वाच्चिरपाका कफ-रोहिणीति, यदुक्त—"स्रोतोनिरोधित्वपि सन्दपाका गुर्वी स्थिरा सा कफसम्भवा च" (सु० नि० १६ अ०) इति। त्रिदोषैरपि रोहिणीति—मिलितदोषत्रयेण भवति सन्निपातजेत्यर्थः, उक्त हि—"गम्भीरपाकिन्यनिवार्यवीर्या त्रिदोषलिङ्गा त्रितयोत्थिता च" (रो० वि० कण्ठ०) इति। मेदोरोहिणिकेति—दुष्टमेदोजनित रोहिणीति। एके भेद स्थाने रक्ता रोहिणिकेति पठन्ति सर्वत्र प्रतिपादितत्वात, तथा हि—"स्फोटैश्चिता पित्तसमानलिङ्गा साऽऽशु प्रदिष्टा रुधिरात्मिका तु" (रो० वि० कण्ठ०) इति। इतररोहिण्यपेक्षयाऽस्या सुखसाध्यत्वमुक्तम। ह्यन्त्र इति—अन्त्र समुन्नत श्रीथकर य कण्ठे ह्यन्त्ररोग कथित, तथा हि—"समुन्नत ह्यन्त्रमन्त्र ह्यं तीव्रज्वर ह्यन्त्रमुदाहरन्ति। तत्रापि पित्तश्चतजप्रकोपाज्ज्ञेय सतोद पवनात्मकञ्च॥" (रो० वि० कण्ठ०) इति। गलौघ इति—कण्ठावरोधात गलौघसज्ञ, स च श्रीथोऽन्नजलावरोधी कथित, तथा हि—"श्रीथो महानन्नजलावरोधी तीव्रज्वरो वायुगतेर्निहन्ता। कफेन जातो रुधिरान्वितेन गले गलौघ परिकीर्त्तितोऽसौ" (सु० नि० १६ अ०) इति। (वायुगतेर्निहन्ता इति—अतिमहत्त्वादुदानवायोर्गति निरोधक इत्यर्थ)। गलविद्रधिरिति—विद्रधिवत गले श्रीथो गलविद्रधिशब्दवाच्च, यत,—'सर्वे गल व्याप्य समुत्थितो य श्रीथो रुजो यत्र च सन्ति सर्वा। स सर्वदोषी गलविद्रधिस्तु तस्यैव तुल्य, खलु सर्वजस्य॥" (सु० नि० १६ अ०)

खरघ्ना तुण्डिकेरी च शतघ्नी तालुकोऽर्बुदम् ।
गिलायुर्वलयश्चापि वातान्नघ्ड कफात्तथा ॥
मेदोगण्डस्तथैव स्यादित्यष्टादश कण्ठजाः ॥ १४१ ॥

इति। यद्यप्यय स्थानप्रभावेण सान्निपातज एव, तथाऽपि चिकित्साभेदाय नामान्तरेण पुनरत्र ग्रहण न दोष। खरघ्नेति—खरनाशकत्वेन खरघ्ना नाम गलरोग, कथित, यदुक्त—"यस्मात्समान श्वसिति प्रसक्त भिन्नस्वर शुष्कविमुक्तकण्ठ। कफोपदिग्धेष्वनिलायनेषु ज्ञेय स रोग श्वसनात खरघ्न ॥" (रो० वि० कण्ठ०) इति। (श्वसनादिति—वातात)। तुण्डिकेरीति—तुण्डिकेरी वनकार्पासीफल तत्तुल्यशोथतया तुण्डिकेरी कथिता। तल्लान्तरे कण्ठशालूकेति नाम्ना सा प्रतिपादिता, यत,—"कोलास्थिमात्र कफसम्भवो यो यस्मिंस्तु कण्टकशूकभूत। खर स्थिर शस्त्रनिपातसाध्यस्त कण्ठशालूकमिति ब्रुवन्ति ॥" (सु० नि० १६ अ०) इति। शतघ्नी चति—शतघ्नी पाषाणशिला तत्तुल्यो रोग शतघ्नीशब्दवाच्य, "अय कण्टकसञ्छन्ना शतघ्नी सहती शिरा" इत्यादिवचनात, तदाकारत्वात अत्रापि मासप्ररोहोपलक्षिता शतघ्नीति, यदुक्त—"वक्त्रिधना कण्ठनिरोधिनी या चिताऽतिमात्र पिशितप्ररोहै। नानारुजोक्ष्यायकरी विदोषात ज्ञेया शतघ्नीव शतघ्नमाख्या ॥" (सु० नि० १६ अ०) इति। † तालुक इति—तालुकोऽन्यत्र गलरोगे विदारिकेति नाम्ना पठित, वदनसम्बन्धवादत्र तालुकव्यपदेश, तदयथा—"सदाहतोद श्वयथु सरक्तमन्तर्गले पूतिविशीर्णमासम। पित्तेन विद्यात वदने विदारी पार्श्वे विशेषात स तृष्णया शेते ॥" (सु० नि० १६ अ०) इति। अर्बुदमिति—अर्बुदाकारपिडका गले भवति इत्यर्बुदरोग, अयमेव | मासतान इत्यत्रैव प्रतिपादित, यत —"प्रतानवान् य श्वयथु सुकष्टो गलोपरोध कुरुते क्रमेण। स मासतान कथितोऽवलम्बी प्राणप्रणुत् सर्वगलो विकार ॥" (सु० नि० १६ अ०) इति। एकेऽर्बुदमेवैकव्रन्थेति नाम्ना प्रतिपादयन्ति अपाक्यत्वशोथत्वात, यत —"व्रणोन्नतोऽन्त श्वयथ

सुश्रुत साधवाभ्या तुण्डिकेरी तालुगतसुखरोगाधिकारे कण्ठशालूकञ्च कण्ठगतसुखरोगाधिकारे पृथक् पृथक् लक्षणनिर्देशेन पाठितम्।

† तालुक इत्यत्र शालूक इति ग्रन्थान्तरोक्त पाठ समीचीनतया प्रतिभाति। शालूक विदारिकार्थालक्षणमपि सुश्रुताहिभि भिन्नतया पठितम्।

| वाग्भटे अर्बुद कफजमिति पठितम्, अत मासतानस्य विदोषज असाध्यश्च इति अर्बुद मासतानयोरभेदोक्ति, चिन्त्या।

तत्राष्टसर्वसरमुखरोगाणां विवरणम्।—

मुखान्तःसम्भवा रोगा अष्टौ ख्याता महर्षिभिः।
मुखपाको भवेद्वातात् पित्तात्तद्वत् कफादपि ॥ १४२ ॥
रक्ताच्च सन्निपाताच्च पूत्यास्योर्ङ्गुदावपि।
अर्बुदञ्चेति मुखजाश्चतुःसप्ततिरामयाः ॥ १४३ ॥

ह्यदाह सकण्डुरोऽपाक्यरुग्गुरुत्व। नात्रैकवन्द परिकीर्त्तितोऽसौ व्याधिर्बलाशश्चतत्र-प्रसूत ॥" (रो० वि० कण्ठ०) इति। गिलायुरिति—आमलकास्थिमात्रो यो गले यस्मि स गिलायुशब्दवाच्यो रोग, तथा हि—"ग्रन्थिर्गले त्वामलकास्थिमात्र स्थिरोऽल्परुक् स्यात् कफरक्तमूर्त्तिः। सलक्ष्यते सक्तमिवाशनञ्च स ग्रस्तमाध्मस्तु गिलायुसञ्ज्ञ ॥" (सु० नि० १६ अ०) इति। वलय इति—वलयो गलरोगविशेष, यथा—'बलाश्च पर्यायतमुन्नतञ्च शोथं करोत्यन्नगति निवार्य्य। त सर्वथैवाप्रतिवार्य्य-वीर्य्यं विवर्जनीय वलय वदन्ति ॥" (सु० नि० १६ अ०) इति। अथ गलरोगेषु त्रिधा गण्डानाह—एको वातगण्ड, कफात तथेति—कफगण्ड, तथैव मेदोगण्ड इति। गलस्थानत्वाद्व गलगण्डत्रयमुक्तम अन्यत्र गण्डमालाया गलगण्ड पठित, तच्च भिन्नचिकित्साविषयत्वात, शार्ङ्गधराचार्य्येण नामसङ्कीर्त्तनेव गृहीत, न तु गण्ड-मालागणनायाम इत्यदोष। एतेषा रूपन्तु तन्त्रान्तरात बोद्धव्यम इति ॥१३९—१४१॥

मुखान्तःसम्भवा रोगा इति।—यद्यपि मुखान्तर्भवरोगा दन्तजिह्वादिगता कथिता तथाऽपि मुखदन्तौष्ठादिसमस्थानाना युगपत व्यापकतया मुखपाकसज्ञो रोग प्रतीत, अत एव तन्त्रान्तरे सर्वसर इति सज्ञयाऽभिहित। सर्वमुखेषु सरतीति सर्वसर, यदुक्त—"स्फोटै सतोदैर्वदन समन्तात यस्याचित सर्वसर स वातात। रक्ते सदाहै तनुभि सपीतैर्यस्याचितचापि स पित्तकोपात ॥ अवेदने कण्डूयुते सवर्णै र्यस्याचित चापि स वै कफेन ॥' (रो० वि० सर्वसर०) केचिद्विदेशोक्त रक्तजसर्वसर लक्षण पठन्ति, यथा—"रक्तेन पित्तोदित एक एव कैश्चित प्रदिष्टो मुखपाकसज्ञ" (सु० नि० १६ अ०) इति। सन्निपाताच्चेति—मिलितदोषत्रयेण पञ्चमो मुख-पाकभेद, पाकत्वे विकृतिविषमसमवायारब्धत्वात स सन्निपातजा व्यपदेश यत,—"वातादृते नास्ति रुजा न पाक पित्तादृते नास्ति कफाच्च पूय।" (सु० नि० १६ अ०) "तस्मादि सर्वे परिपाककाले पच्यन्ति शोफास्त्रिभिरेव दोषै ॥' (रो० वि० त्रण०) इति। पूत्यास्य इति—दुर्गन्धास्य प्रसिद्ध। * ऊर्ङ्गद इति—मुखरोग-

---

* वाग्भटे ग्रन्थान्तरे च "ऊर्ङ्गद" इति पाठ स एव साधु,।

अष्टादशकर्णरोगाणां विवरणम्।—

कर्णरोगाः समाख्याता अष्टादशमिता बुधैः।
वातात् पित्तात् कफात् रक्तात् सन्निपाताच्च विद्रधिः॥१४४॥
शोथोऽर्बुदं पूतिकर्णः कर्णार्शः कर्णहल्लिका।

वेशेष, सर्ववाग्शोर्णसाम्यत्वेनाभ्यन्तरगुदाकारवत्, तेनोर्ध्वगुदाकारत्वेन सप्तमो भेदोऽत्र दर्शितो न दोषः, अन्यत्र पित्तजान्तर्गत एव। अर्बुदमिति—अर्बुदवत् खरोग, अर्बुदस्य सर्वगतत्वादत्रैवान्तर्भवतीति न दोषः, तदाकारपिडकात्वेनाष्टम प्रतिपादित। तन्त्रान्तरे कफजेऽन्तर्गत दर्शितम्। इति कथितप्रकारेण सुखज्ञा आमया रोगा चत् सप्तति कथिता इत्यर्थः, सप्तसु स्थानेष्विति शेषः॥ १४२।१४३॥

कर्णरोगा इति।—कर्णान्तरधिक्लत्वोत्पन्ना, तेन कर्णशष्कुल्यवाच्छिन्नमदृष्टोपगूढेति श्रोत्रमुच्यते। तत्र यद्यप्येकदेशगतो रोगस्तथाऽप्यवयवेऽपि समुदायोपचारात् कर्ण-व्यपदेशः। अष्टादशमिता बुधैरिति।—बुधैरिति—प्रवीणैः, यैन सर्वतन्त्रेभ्य सुविचार्य सङ्ग्रह कृत, अत एवात्र चरकोक्तकर्णरोगचतुष्टय दोषभेदेन तेष्वादौ कथितम्, तदयथा—"नादीऽतिरुक् कर्णमलस्य शोष स्रावस्तनुश्यावरुणश्च वातात्। शोथ सरागो दरण विदाह सपीतपूतिस्रवणश्च पित्तात्॥ वैशुत्यकण्डूस्थिरशोथशुक्ल स्निग्धस्रुति श्लेष्मभवेऽल्परुक् च। सर्वाणि रूपाणि च सन्निपातात् स्रावश्च तत्राधिक-दोषवर्ण॥" (च० चि० विसर्पचि०) इति। रक्तजस्य पित्तजेऽन्तर्भाव इति तन्त्रान्तरे, अत्र तु गणनाक्रमत्वात् पृथक् पठित। विद्रधिरिति—कर्णविद्रधि, स द्विविध, एकोऽभिघातज अपरो दोषजश्च, यदुक्त—"घताभिघातप्रभवस्तु विद्रधिर्भवेत् तथा दोषकृतोऽपर पुन। सरक्तपीतारुणमस्रमास्रवेत् प्रतोदधूमायनदाहचोषवान्॥" (सु० उ० २०अ०) इति। अत्र तु आगन्तुकेन दोषप्रकोपलाद्रक्त एव व्यपदेशः। शोथ इति—कर्णशोथ। कर्णशोथार्बुदार्शसा लक्षण पूर्वोक्तलक्षणेनानीयात, यदुक्त—'कर्णशोथार्बुदार्शांसि जानीयादुक्तलक्षणैः" (शो० वि० कर्ण०) इति। तत्र * कर्णशोथस्त्रिधा वातपित्तकफरक्तजत्वेन। एव कर्णार्शस्त्रिधा वातपित्तकफ सन्निपातभेदत। कर्णार्बुदं सप्तधा वातपित्तकफसामसमैदोरक्तसन्निपातभेदात्। शालाक्यतन्त्रोक्तेन सन्निपातजमधिकृत्य एव सप्तार्बुदम्, अत सुश्रुतोक्ता अष्टावप्यति-कर्णगतरोगास्तेनात्र लिखिता न दोषः। पूतिकर्ण इति—पूति पूय स्रवतीति

"कर्णशोथस्त्रिधा वातपित्तकफरक्तजत्वेन। एवमर्शस्त्रिधा वातपित्तकफरक्तजत्वेन, सन्नि-

बाधिर्य्यं तन्त्रिका कण्डू श्चष्कुली कृमिकर्णकः॥

पूतिकर्णक, यदुक्त—"पूय स्रवति य पूति स ज्ञेय पूतिकर्णक" (रो० वि० कर्ण०) इति। कर्णकृल्लिकेति—कर्णप्रविष्टपतङ्गादिकीटत्वात् कथित, तदृयथा—"पतङ्गा शतपद्यश्च कर्णस्रोत प्रविश्य हि। अरति व्याकुलत्वञ्च शश्च कुर्वन्ति वेदनाम्॥ कर्णौ निस्तुद्यते तस्य तथा फरफरायते। कीटे चरति रुक् तीव्रा निष्पिष्टे मन्दवेदना॥" (रो० वि० कर्ण०) इति। बाधिर्य्यमिति—बधिरता प्रसिद्धा, तदृयथा—"यदा शब्दवह स्रोतो वायुराहत्य तिष्ठति। शुद्ध श्लेष्मान्वितो वाऽपि बाधिर्य्य तेन जायते॥" (सु० नि० १अ०) इति। * तन्त्रिकेति—तन्त्रिकाजन्यशब्दवद्रोगस्तन्त्रिकारोग, अन्यत्र कर्णक्ष्वेड इति संज्ञयाऽभिहित, यदुक्त—"वायु पित्तादिभिर्युक्तो वेणुघोषोपम स्वनम्। करोति कर्णयो क्ष्वेड कर्णक्ष्वेड स उच्यते॥" (रो० वि० कर्ण०) इति। कण्डूरिति—कण्डूरन्यत्र † कर्णग्रन्थिशब्दाच्च, यत,—"मारुत कफसयुक्त कर्णकण्डू करोति च" (रो० वि० कर्ण०) "पित्तोष्मशोषित श्लेष्मा जायते कर्णगूथक" इति। यद्यपि कण्डू कर्णगूथस्य पथङ्निर्दिष्ट तथाऽप्यत्र श्लेष्मशोषकत्वादपि कण्डूादीना सम्भव इत्यदोष (१)।

सन्निपातजाश्चैवं सन्निपातागन्तुजशोथयोश्चासम्भूतिरावारप्रभावात्। अर्बुदञ्च सप्तविध वातपित्तकफरक्तमासमेदोशिरानिमित्तभेदात्। शिराजस्य वातजावरुद्धत्वाच्च पृथक् गणन आलाक्यसिद्धान्तसवादादिति कार्त्तिक। यथा सुश्रुत एव कर्णरोगानन्तर दोषैस्त्वाभस्थै पृथगेकस्य वाऽपि तथाऽशीसि तथैव शोथान्। आलाक्यसिद्धान्तसवेद्यं चापि सर्वात्मक सप्तममर्बुदन्तु॥ इति नासारोगेऽभिधास्यति, तथा इहापि युज्यते, तेन रक्तजस्य पित्तसमानलिङ्गत्वात् पित्तजेऽन्तर्भाव, तथा आगन्तुजस्यापि रक्तपित्तलिङ्गत्वात् पित्तज एवान्तर्भाव, तेन शोथ सन्निपातजोऽवागणनीय, एव सहज-रक्तजयो दोषज एवान्तर्भावात् सन्निपातजमपृथक् गणनीयम। अर्बुदञ्च सान्निपातज सप्तमामति, एवमेभि सहाष्टावशति, सुश्रुतोक्ता, कर्णरोगा भवन्ति' इति मधुकोषे श्रीकण्ठ।

तन्त्रिका वाग्भटे पालीगतरोगे उक्ता, तथा च—"क्रुद्धा दृढा च तन्त्रीवत् पाली वातेन तन्त्रिका" (वा० उ० २७ अ०)।

† कर्णग्रन्थ्यन्यान्तरे न दृश्यते सुश्रुते कर्णगूथक अस्ति, "पित्तोष्मशोषित" इत्यादिलक्षणन्तु कर्णगूथकस्य माधवेन पाठत तत्र च "पित्तोष्मशोषित श्लेष्मा कुरुते कर्णगूथकम्" इति पाठ। कर्णकण्डू कर्णगूथकात् भिन्नलक्षणा एवेति बोद्धव्यम्।

कर्णनाद प्रतीनाह इत्यष्टादश कर्णजा. ॥ १४५ ॥

श्वक्कीति— श्वक्कली चात्रोपलक्षणं तेन तक्षतविक्षतदोषत्वात् कर्णस्रावत्वेन सर्वत्र कर्णस्राव इति सञ्ज्ञयाऽभिहिता, तदुक्तं—"शिरोऽभिघातादथवा निमज्जतो जलं प्रपाकादथवाऽपि विद्रधेः। स्रवेद्धि पूयं श्रवणोऽनिलार्दितः स कर्णस्राव इति प्रकीर्त्तितः॥" (रो० वि० कर्ण०) इति। एके श्वक्कलीत्यनेन कर्णगूथमेव मन्यन्ते, तत पूर्वाचार्यैरपाठतत्वादस्माभिरपि न पठित। क्रमिकर्णक इति—कर्ण-क्रमिकद्वौ क्रमिकर्णशब्दवाच्यौ, यदुक्तं—"यदा तु मूच्छन्त्यथवाऽपि जन्तव स्रवन्त्यपत्यान्यथवाऽपि मक्षिका। तदाऽऽनलाच्छ्रवणो नरुच्यत भिषग्भिराद्यैः क्रमिकर्णको गदः॥" (रो० वि० कर्ण०) इति। क्रमिलक्षणत्वात्(१) अय विकारस्त्रिदोषजो ज्ञेय, तथा च—"श्लेष्मपित्तजलोन्मिश्रे कोथे शोणितमांसजे। जायन्ते जन्तवस्तत्र कृष्णाः सामा सितारुणाः॥ भक्षयन्तोव ते कर्णं कुर्वन्तो विविधा रुजः। क्रमिकर्णं विजानीयात् सन्निपातप्रकोपजम्॥" (निमि०) इति। कर्णनाद इति—यत्र विविधस्वनान् शृणोति स कर्णनाद इति गदविशेष कथित, यथा—"कर्णस्रोतसि स्थिते वाते शृणोति विविधान् स्वनान्। भेरीमृदङ्गशङ्खानां कर्णनादः स उच्यते॥" (रो० वि० कर्ण०) इति। न केवल भेर्यादिस्वनम्, अन्येषामपि, अन्यत्र प्रतिपादितत्वात्, यदुक्तं विदेहैः—"शिरोगतौ यदा वायु श्रोत्रयो प्रतिपद्यते। तदा तु विविधान् शब्दान् समीरयति कर्णयो॥ भृङ्गार-क्रौञ्चनादं वा मण्डूककाकयोस्तथा। तन्त्रीमृदङ्गशब्दं वा सामतूर्यस्वनं तथा॥ गीताध्ययनवद्याना निर्घोषं क्ष्वेडमेव वा। अपामिव पतन्तीना शकटस्येव गच्छत॥ श्वसतामिव सर्पाणा सदृशं श्रूयते स्वनं॥" इति। ननु कर्णनाद-कर्णक्ष्वेडयोर्घोषकृतरूपत्वात् को भेद? उच्यते,—कर्णनादे केवलानिलजे नाना-शब्दान् शृणोति, कर्णक्ष्वेडे तु वेणुशब्दमेवेति नियमात् पित्तादिसंसृष्टवातजन्य-त्वाच्चेत्यदोष। प्रतीनाह इति—यदा द्रवगूथो मुखघ्राणविवरेषु प्रतिपद्यते, तेन चार्द्रावभेदको भवति, स कर्णप्रतीनाहसञ्ज्ञको रोग कथित, तथा हि—"स

* "श्वक्कली चात्रोपलक्षणम्" इत्यादि यदुक्तं, तत्र वृद्धा, श्वक्कलीशब्देन श्वक्कली-गतत्वात् कर्णस्रावे लब्धे अन्येषामपि श्वक्कलीगतरोगाणा लाभसम्भवात्। मन्ये श्वक्कलीशब्देन वाग्भटोक्तविदारिका लभ्यते, तथा च—"सन्निपातात् विदारिका। सवर्णं सरुजं लब्ध्वा श्रवथुं स उपेक्षित॥ कटुतैलनिभं पक्वं स्रवेत् कृच्छ्रेण रोहति। सङ्कोचयति रूढा च सा ध्रुवं कर्णश्वक्कलीम्॥" (वा० उ० १७अ०) इति।

सप्तकर्णपाल्यीगतरोगाणां विवरणम्।—

कर्णपाल्यीसमुद्भूता रोगाः सप्त इहोदिताः।
उत्पात पालिशोषश्च विदारी तु खवर्द्धनः॥
परिपाटश्च लेही च पिप्पली चेति सप्तमी॥ १४६॥

कर्णगूथो द्रवता यदा गतो विलायितो घ्राणसुखं प्रपद्यते। तदा स कर्णप्रतिनाह-सञ्ज्ञको भवेद्विकार शिरसोऽर्द्धभेदकृत॥" (रो० वि० कर्ण०) इति। अयमेव वर्द्धनं दोषोल्कणादिभेदेन पठित, यदुक्त—"कफाद्वा मारुताद्वाऽपि सन्निपातेन वा पुन" इति॥ १४४। १४५॥

कर्णपाल्यीति।—कर्णावयवत्वात् कर्णपाल्या तदधिकृतरोगा। कर्णपाल्यीसमुद्भूता इति—कर्णव्यधस्थानोद्भूता इत्यर्थः। ते उत्पातप्रभृतयः, तद्यथा—"गुवाभरण-सयोगात्ताडनात घर्षणादपि। शोथः पाल्या भवेच्छ्यावो दाहपाकरुजान्वितः॥ रक्तो वा रक्तपित्ताभ्यामुत्पात स मतो बुधैः॥" (रो० वि० कर्ण०) इति। पालिशोषस्येति—कर्णपाल्यीशोषणात् शोष विकृतानिलत्वात्। * विदारीति—विदारीव विदारीरोग पाल्या भवति, स प्रसिद्ध एव। खवर्द्धनत्वात् तु खवर्द्धन इति, तथा हि—"सवर्द्धनाने तुर्विद्धे कण्डूदाहरुजान्वितः। शोथो भवति पाकश्च विदोषो तु खवर्द्धनः॥" (रो० वि० कर्ण०) इति। परिपाटस्येति—परिपाटवत् † परिपाटः, यदुक्त—"सौकुमार्याच्चिरोत्पृष्टे सहसातप्रवाहते। कर्णे शोथो भवेत् पाल्या सरुजः परिपाटवान्॥ क्षणात्क्षणाच्च भ्रश्यत्स वातात् परिपोटकः॥" (रो० वि० कर्ण०) इति। लेही चेति—मासलेहनाल्लेही रोगः, निर्मासकारीत्यभिप्रायः, अत एव तन्त्रान्तरे परिलेहीशब्दवाच्यः, यदुक्त—"कफासृक्क्लमयः क्लेदः सर्षपाभा विसर्पिणः। कुर्वन्ति पिडका पाल्या कण्डू-दाहरुजान्विताः॥ कफासृक्क्लमिसम्भूतः स विसर्पन्नितस्ततः। लिहन्त सशब्दुलीं पाली परिलेहीति स स्मृतः॥" (रो० वि० कर्ण० इति। पिप्पली चेति—पाल्या शोथः पिप्पलीशब्दवाच्यः। तन्त्रान्तरे ‡ अयमेवोन्मन्थरुक्, तद्यथा—"कर्णे

---

* विदारी वक्ष्यमाणा पिप्पली च वाग्भटे कर्णशोथगतरोगत्वेनोक्ते।

† परिपोट मनाक् लगवदारणम्।

‡ वाग्भटोक्तपिप्पल्या सह उन्मन्थकस्य किमपि सादृश्यं नास्ति, पिप्पली

पञ्चकर्णमूलगतरोगाणां विवरणम्।—

कर्णमूलामयाः पञ्च वातात् पित्तात् कफादपि।
सन्निपाताच्च रक्ताच्च—" ॥ १४७ ॥

अष्टादशनासारोगाणां विवरणम्।—

"—तथा नासाभवा गदाः।
अष्टादश समाख्याता प्रतिश्यायास्तु तेष्वपि ॥ १४८ ॥
वातात् पित्तात् कफाद्रक्तात् सन्निपातेन पञ्चधा।

ग्रलाइर्ड्यत पाल्या वायु प्रकुप्यति। कफ सङ्गृह्य कुरुते शोथ स्रावसवेदनम् ॥ उन्मन्थक सकण्डूको विकार कफवातज ॥" (रो० वि० कर्ण०) इति ॥१४६॥

कर्णमूलामयानाह, कर्णमूलामया पञ्चेत्यादि।—कर्णमूलरोग सन्निपातज्वरे उपद्रवरूपत्वेन दर्शित, स च पिडकाकृति, तद्यथा—"सन्निपातज्वरस्यान्ते कर्णमूले सुदारुण। शोथ सञ्जायते तेन कश्चिदेव विमुच्यते ॥" (च० चि० ज्वर०) इति। वातादीनामुत्कषादिभेदेन पञ्च भेदा ज्ञेया। कर्णमूलसम्बन्धादत्र कर्णरोगगणनाया पठितो न दोष ॥१४७॥

तथा नासाभवा गदा इत्यादि।—तथेति—इन्द्रियाधिष्ठितरोगगणनासम्बन्धात् नासाभवा रोगा अष्टादश समाख्याता। तेष्वादौ पञ्चधा प्रतिश्यायमाह, तदुक्त चरके—"श्लेष्मपूर्वे स्थित श्लेष्मा रुधिर पित्तमेव वा। मारुताभ्याहतशिरसो मारुत स्रावते प्रति ॥" (च० चि० राजयक्ष्म०) इति। पञ्चधेति—पञ्चप्रकार, स तु वातादिदोषभेदेन भवति। तेषा केषाञ्चित् ज्ञापनार्थं लक्षणान्याह, यदुक्तम्—"आनद्धा पिहिता नासा तनुस्रावप्रसेकिनी। गलतालुौष्ठशोषश्च निस्तोद शङ्खयोरपि ॥ क्षवप्रवृत्तिरत्यर्थं वक्त्रवैरस्यमेव च। भवेत् स्वरोपघातश्च प्रतिश्याये ऽनिलात्मके ॥" (सु० उ० २४ अ०) इति। पित्तजमाह—"उष्ण सपीतक स्रावो घ्राणात स्रवति पैत्तिके। क्षयोऽतिपाण्डु सन्तप्तो भवेत्तृष्णाभिपीडित ॥ सधूमनग्नि सदृशा वमतीव स मानव ॥" (सु० उ० २४ अ०) इति। कफजमाह—"घ्राणात कफक्लेद शीत कफ पाण्डु स्रवेद्घन। शुक्लावभास शुक्लाक्षो भवेद्गुरुशिरा नर ॥ कण्डूताक्ष्णोश्शिरसा कण्डूभिरभिपीडित ॥" (रो० वि० नासा०) इति।

स्रोतोगत रोग', लक्षणमपि तस्या अन्यविधम्, तथा च—"एको नीरुगनेको वा गर्भे नासाडुर. स्थिर.। पिप्पली पिप्पलीमान. ॥" (वा० उ० १७अ०) इति।

अपीनसः पूतिनासो नासार्शो भ्रमथुः क्षवः ॥ १४८ ॥

रक्तजमाह—"रक्तजे तु प्रतिश्यये रक्तस्राव प्रवर्त्तते। तस्माच्च भवेज्जन्तुरुपघात-प्रपीडित ॥ दुर्गन्धोच्छ्वासवदनो गन्धानपि न वेत्ति स ॥" (सु० उ० २४ अ०) इति। अत्र पित्तप्रतिश्यायलिङ्गान्यपि वीक्ष्याणि, तुल्यत्वात् पित्तरक्तयो, यदुक्तं—"पित्तप्रतिश्यायकृतैर्लिङ्गैश्चापि समन्वित" इति। सन्निपातजमाह—"भूत्वा भूत्वा प्रतिश्यायी यस्याकस्मान्निवर्त्तते। सम्यक्षी वाऽप्यपक्षी वा स सर्वप्रभव स्मृत ॥" (शो० वि० नासा०) इति। अत्र यद्यपि दोषत्रयलिङ्गानि नोक्तानि तथाऽपि सर्वप्रभवत्वात् ज्ञातव्यानि। असाध्यत्वाय दुष्टता गत सन्निति वदन्ति, तस्माद्दुष्टप्रतिश्यायलक्षण पृथक् लिखितम्, तद्यथा—'प्रक्लिद्यते पुनर्नासा पुनश्च परिशुष्यति। पुनरान्ध्यते वाऽपि पुनर्विस्रवते तथा ॥ निःश्वासो वाऽतिदुर्गन्धो नरो गन्धं न वेत्ति च। एव दुष्टप्रतिश्याय जानीयात् कृच्छ्रसाधनम ॥" (सु० उ० २४ अ०) इति। अयञ्च पञ्चप्रतिश्यायानामेवावस्थान्तरतया न पृथग् गणनीय, यत सर्वे प्रतिश्याया अप्रतिक्रियमाणा कालान्तरेण दुष्टता यान्तीति वचनात्, तथा हि —"सर्व एव प्रतिश्याया नरस्याप्रतिकारिण। दुष्टता यान्ति कालेन तदाऽसाध्या भवन्ति हि ॥' (शो० वि० नासा०) इति। अपीनस इति—अपीनसो नासा-रोगविशेष प्रतिश्यायसमानलिङ्ग इति केचित्, यदुक्तम्—"आनह्यते यस्य विमुच्यते च प्रक्लिद्यते ध्मायति च पि नासा। न वेत्ति यो गन्धरसाश्च जन्तुर्जुष्ट व्यवस्येत्तमपीनसेन ॥" (च० चि० विमर्शीय०) "तत्रानिलश्लेष्मभव विकार ध्मायति प्रक्लिद्यति च प्रसमानलिङ्गम्" (सु० उ० २२ अ०) इति। विदेहस्तु पित्तश्लेष्मज मन्यते तद्यथा—"सन्तृङ्मोचित श्लेष्मा यदा पित्तादिदह्यते। तदाऽसृक् पिच्छिल नासा बहुसिङ्घानक स्रवेत ॥ सकण्डूदाहपाकश्च तत्तु विद्यादपीनसम् ॥" इति। यत्र पूतिवायुवहति स पूतिनासस्तत्रा रोग कथित, तथा हि —"दोषैर्विदग्धैर्गलतालुमूले सम्मूर्च्छितो यस्य समीरणस्तु। निरति पूतिर्मुख नासिकाभ्या त पूतिनस्य प्रवदन्ति रोगम् ॥" (सु० उ० २२ अ०) इति। दोषै रिति—श्लेष्मकफरक्ते, रक्तस्यापि दोषतुल्यरूपत्वाद्दोषत्व बहुवचननिर्देशाच्च, तथा विदेहोऽप्युक्त—"कफपित्तसमुद्भूत्या सञ्चित मूर्द्धि देहिनाम। विदग्धमूष्मणा गाढ कृत्वा क्लेदाविशङ्कजाम् ॥ तत प्रस्यन्दते घ्राणात् सरक्त पूति पीतकम्। पूतिनस्यन्तु त विद्यात् घ्राणकण्डूज्वरप्रदम् ॥" इति। नासार्श इति—नासिकादि-जातानामर्शसाञ्चाधिनासत्व, सुश्रुतेन तु नासादुरत्वसाधर्म्यात् अस्रजचारार्शि-

नासानाह पूतिरक्तमर्बुद दुष्टपीनसम्।

साध्यत्वाच्च तेषाम् प्रयोग कृत, यदुक्त—"दोषास्त्वसाध्यमेदास्ति सन्दृश्य विविधाकृतीन्। नासाङ्कुरानपानादौ कुर्वन्त्यशास्ति तान् जगु॥" (वा० नि० ७ अ०) इति। अर्बुदशब्देन नासिकाश्रवणचक्षुर्भ्रूनाभिप्रभृतयो गृह्यन्ते। एषा लक्षणानि सुश्रुते पठितानि, अत एव सुश्रुतेन नासारोगा एकादशत् सङ्ग्रहीता, तद्यथा—"अर्बुद सप्तधा शोथाश्चत्वारोऽर्शश्चतुर्विधम। चतुर्विध रक्तपित्तमुक्त घ्राणेऽपि तद्विद॥" (रो० वि० नासा०) इत्यादि। एतेषा विवरण तत्रैव ज्ञातव्यम्। अभ्यथुरिति—यत्र सघनो विदग्ध कफ एव लिङ्ग तत अभ्यथनाम रोग कथित, तथा हि—"प्रभ्रश्यते नासिकया तु यस्य सान्द्रो विदग्धो लवण कफस्तु। प्राक् सङ्कितो मूर्द्धनि सूच्यतस्तम अभ्यथु रोगमुदाहरन्ति॥" (रो० वि० नासा०) इति। क्षव इति—क्षवथुश्छिक्का, स तु दोषागन्तुजभेदेन द्विविधो भवति, तद्यथा—'घ्राणाश्रिते मर्मणि सम्प्रदुष्टो यस्मानिलो नासिकया निरेति। कफानुयातो बहुश सशब्द त रोगमाहु क्षवथु विधिज्ञा॥" (सु० उ० २२ अ०) इति। आगन्तुजमाह—"तीक्ष्णोपयोगादभिजिघ्रतो वा भावान् कटूनर्कनिरीक्षणाद्वा। सूर्यादिभिर्वा तरुणास्थिमम ख्युद्घाटितेऽस्य क्षवथुर्निरेति॥" (सु० उ० २२ अ०) इति दोषजागन्तुज एवात्र गण्यते। नासानाह इति—आनह्यते इत्यानाह नासाप्रतीनाह इत्यर्थ, यदुक्तम्—"उच्छ्वासमार्गन्तु कफ सवातो रुन्ध्यात प्रतीनाहमुदाहरेत्तम्" (च० चि० त्रिमर्मीय०) इति। विदेहेऽप्युक्त, यथा—"कफावृतो यदा वायुर्यस्य घ्राणे च तिष्ठति। क्षणोतीव तदा घ्राण स प्रतीनाह उच्यते॥" इति। पूतिरक्तमिति—पूयरक्तमिति पाठान्तरम्। दोषागन्तुजभेदात प्रतिपादितम्, यदुक्त—"दोषैर्विदग्धैरथवाऽपि नलोल्लाटदेशेऽभिहतस्य तैस्तै। नासा स्रवेत् पूयमसृग्विमिश्र त पूयरक्त प्रवदन्ति रोगम॥" (सु० उ० २२ अ०) इति। अर्बुदमिति—नासार्बुद प्रसिद्धम्। सुश्रुते तु एकत्रिंशतसङ्ख्यापूरणाय सप्तधाऽर्बुदस्य सङ्ग्रह, तत्र वातपित्तकफरक्तमासमेदोभवत्वेन षड्विधमर्बुद शालाक्यप्रसिद्ध, त्रिदोषेण सन्निपातजमधिकमुक्तम्, एव सप्तविधमर्बुद नासारोगेषु सुश्रुतेनोक्तम्। अत्र तु नाममात्रेणैव कृतार्थत्वात्। दुष्टपीनसमिति—पीनस नासारोगे प्रसिद्ध, दुष्टत्वमत्र विकृतदोषारब्धत्वात, अत एव पक्वामभेदेन द्विविधमित्याचक्षते, तद्यथा—"शिरोगुरुत्वमरुचिर्नासास्रावस्तनु स्वर। घ्राण क्षीणत्वमाभीक्ष्ण्यमामपीनसलक्षणम्॥" (रो० वि० नासा०) इति। पक्वलक्षणमाह—"घ्राणक्लिन्नान्वित;

नासाशोषो घ्राणपाक. पूयस्रावश्च दीप्तकम् ॥ १५० ॥

दशशिरोरोगाणां विवरणम्।—

तथा दश शिरोरोगा वातेनार्द्धावभेदकः।

श्लेष्मा घन खेषु निमज्जात। स्वरवर्णविशुद्धिश्च परिपक्वस्य लक्षणम् ॥" (रो० वि० नासा०) इति। नासाशोष इति—नासाया शोषोऽव परिशोष, यदुक्त—"घ्राणाश्रिते स्रोतसि मारुतेन गाढं प्रतप्ते परिशोषिते च। क्लक्ष्णाक्ष्णुसिदूर्ध्वमधश्चलन्तुर्यस्मिन् स नासापरिशोष उक्त ॥" (रो० वि० नासा०)। अव प्रतप्ते इत्यनेन च रक्तपित्तेऽपि गम्यते विदाहात्तत्र, यत,—"वातपित्त यदा घ्राणे कफरक्ते विशोषयेत। तदा क्लक्ष्णाक्ष्णुसञ्चलन्तुर्नासा शुष्का विदीर्यत ॥ खवल्मीर्णेव चूर्णेन नासाशोषन्तु त विदु ॥" इति। घ्राणपाक इति—घ्राणपाको नासापाक, स च व्रणैकपलक्षित इत्यभिप्राय, यदुक्त—"घ्राणाश्रित पित्तमरुषि कुर्यात यस्मिन् विकारे बलवाश्च पाक। त नासिकापाकमिति व्यवस्येद्विद्रधीकोथावधवाऽपि यत्र ॥" (सु० उ० २२ अ०) इति। पूयस्राव इति—पूयस्रावो * नासास्राव, तदुयथा—"घ्राणात् घन पीतसितसतुर्वा दोष स्रवेत स्रावमुदाहरेत् तम्" (च० चि० विसर्पचि०) इति। विदग्धेऽपि—"स्रात शङ्खाटके श्लेष्मा चित. क्लेदित ऊष्मणा। विशेषात स्यन्दते रात्रौ नासास्रावन्तु त विदु ॥" इति। दीप्तकमिति—अत्र प्रज्वलितेव नासा भवति, तथा चोक्त—"घ्राणे भृश दाहसमन्विते तु विनि सरेज्जन्तु स्रवेद्वा वायु। नासा प्रदीप्तेव च यस्य जन्तोर्व्याधिन्तु त दीप्तमुदाहरन्ति ॥" (सु० उ० २२ अ०) इति। विदग्धेऽपि यथा—"धूमायते यदा नासा बलात क्ष्यति दह्यते। नि सरेत् तप्त उच्छ्वासो व्याधि त दीप्तमादिशेत् ॥" इति ॥ १४८—१५० ॥

तथा दश शिरोरोगा इत्यादि।—तथेति—ऊर्द्धजत्रुगतरोगप्रस्तावात् दश शिरोरोगा कथिता। शिरोरोगशब्देन शिरोगतमूलरूपा रुजोऽभिधीयन्ते, अत एव

---

* पूयस्रावो नासास्राव इत्यत्र तु चिन्त्य, नासास्रावे केवल श्लेष्मणो जलस्य वा स्राव भवति, न तु पूयस्य, तथा च शोकण्ठदत्त,—"दोष इति कफ"। सुश्रुतेऽपि—"अजस्रमच्छ सलिलप्रकाश यस्याविवर्ण स्रवतीह नासा। रात्रौ विशेषेण हि त विकार नासापरिस्रावमिति व्यवस्येत ॥" इति। एव वाग्भटेऽपि—"स्रावस्तु तत्सङ्ग, श्लेष्मसम्भव.। स्वच्छो जलोपमोऽजस्र विशेषान्निशि जायते ॥" इति।

शिरस्तापश्च वातेन पित्तात् पीडा तृतीयका ॥ १५१ ॥
चतुर्थी कफजा पीडा रक्तजा सन्निपातजा।

शिरोरोगा इत्युच्यन्ते। तेषां द्वात्रिंशद्भेदकमाह—अर्द्धावभेदकोऽर्द्धशिरीत्यर्थात्मक इत्यर्थ, तदृथा—"कैवल्य सकफो वाऽर्द्ध रटहीला शिरसोऽनिल। मन्याभ्रूशङ्खकर्णाक्षि ललाटार्द्धेऽतिवेदनाम् ॥ अस्त्रारणिनिभा कुप्यात तीव्रा सोऽर्द्धावभेदक। नयन वाऽथवा ग्रीवमतिवृद्धो विनाशयत ॥" (च० सि० विमर्शीय०) इति। ननु सुश्रुते त्रय त्रिदोषज पठित, यथा—* "यस्योत्तमाङ्गं रुजतेऽर्द्धमात्र सतोदभेद-सममोऽथमूर्ध्नि। पश्चाद्दशाहादथवाऽप्यकस्मात्तस्यार्द्धभेद त्रितयात व्यवस्येत् ॥" (सु० उ० २५ अ०) इति, तत कथ वातेनैव दर्शित ? उच्यते,—वातप्रकोपादत्र पित्तकफौ तस्यानुबन्धौ बोद्धव्यौ, यत,—"एक प्रकुपितो दोष सवानेव प्रकोपयेत" इत्यादि, विक्रतिविषमसमवायारब्धत्वान्निर्देश इत्यदोष, तथा श्रुत—"सर्व एव शिरोरोगा सन्निपातसमुत्थिता। औत्कट्याद्दोषलिङ्गैस्ते कीर्त्यन्तात्तद्विदा दश ॥" (आत्रेय० त०) इति। शिरस्तापमेति—अयञ्च वातेन भवति, शिरस्ताप शिरो-रुजा। तत्रान्तरे वातजोऽय शिरोरोग इत्यर्थ, यदुक्त—"यस्यानिमित्त शिरसो रुजश्च भवन्ति तीव्रा निशि चातिमात्रम्। बन्धोपतापैश्च भवेद्विशेष शिरोऽभिताप स समीरणेन ॥" (सु० उ० २५ अ०) इति। पित्तात पीडेति—शिर पीडा पित्तप्रकोपादपि भवति, अय तृतीयो भेद, तदृथा—"यस्योष्णसङ्कारचित यथैव भवेच्छिरो धूयति चाचिनासम्। शीतेन रात्रौ च भवेद्विशेष शिरोऽभि ताप स तु पित्तकोपात ॥" (रो० वि० शिरोरोग०) इति। चतुर्थी कफजा पीडेति—शिरसि कफजा पीडा भवति, स चतुर्थो भेद इत्यभिप्राय, तदृथा—"शिरो भवेत् यस्य कफोपदिग्ध गुरु प्रतिश्यायसमेतो हिमश्च। शूनाक्षिकूट वदनञ्च यस्य शिरोऽभिताप स कफप्रकोपात ॥" (रो० वि० शिरोरोग०) इति। रक्तजेति—अत्र रक्तजा पीडा कथिता, "रक्तात्मक पित्तसमानलिङ्ग स्यात्सहत्व शिरसो भवेच्च" (सु० उ० २५ अ०) इति। सान्निपातजेति—त्रिदोषजानता इत्यर्थ, तदृथा—"शिरोऽभितापे त्रितयप्रवृत्ते सवाणि लिङ्गानि समुद्भवान्ति" (सु० उ० २५ अ०)

---

* मुद्रितसुश्रुतेषु "यस्योत्तमाङ्गम्" इत्यादिप्रथमार्द्धस्थले "यस्योत्तमाङ्गार्द्धमतीव रुजो, सस्वेदतोदसमशूलजुष्टम्" इति पाठो दृश्यते।

सूर्य्यावर्त्ताच्छिरःपाकात् क्रिमिभिः शङ्खकेन च ॥१५२॥

इति। सूर्य्यावर्त्तादिति—सूर्य्यावर्त्तादित्यनेन पीडा कथिता, या च रुक् सूर्य्यप्रवृत्तौ भवति सूर्य्यापगमे विनिवर्त्तते, स सूर्य्यावर्त्तशब्दवाच्यो रोग, तथा हि—"सूर्य्योदय या प्रति मन्दमन्दमभिसृ० रुक् समुपैति गाढम। विवर्द्धते चाशुमता सहैव सूर्य्यापवृत्तौ विनिवर्त्तते च॥ सवात्मक कष्टतम विकारं सूर्य्यावर्त्त तमुदाहरन्ति॥" (रो० वि० शिरोरोग०) इति। * शिरःपाकादिति—शिरःपाकादिवासृग्वसादीना सङ्घर्षेण शिरसि पीडा भवतीत्यभिप्राय', अत एव सुश्रुते क्षयजो विकार इति पठित, यत.—† "असृग्वसाश्लेष्मसमीरणानां शिरोगतानामिह सङ्घर्षेण। क्षयप्रवृत्त शिरसोऽभिताप कष्टो भवेदुग्ररुजाऽतिसारम्॥ सस्वेदनच्छर्दनधूमनस्यैरसृग्विमोक्षैश्च विवर्द्धमेति॥" (रो० वि० शिरोरोग०) इति। अथ विदेहेऽपि पठ्यते—"भ्रमति तुद्यत शून्य शिरो विभ्रान्तनेत्रता। मूर्च्छा गात्रावसादश्च शिरोरोगे क्षयात्मके॥" इति। क्रिमिभिरिति—शिरसि क्रिमिजा पीडा भवति इति, यदुक्त—"निस्तुद्यते यस्य शिरोऽतिमात्र सम्भ्रम्यमाण स्फुरतीव चान्त। घ्राणाच्च गच्छेत् ‡ रुधिर सपूय शिरोऽभिताप क्रिमिभि स घोर॥" (सु० उ० २५ अ०) इति। तथैवाह चरक,—"क्रिमीणां दशनेन च" (च० सू० कियन्त शिरसीय०) इति। शङ्खकेनेति—शङ्खदेशेषु दुष्टा दोषा शोथत्वेन रुजा कुर्वन्तीत्यनेन शङ्खकरोगो वाच्य, तदयथा—"रक्तपित्तानिला दुष्टा शङ्खदेशे विमूर्च्छिता। तीव्ररुग्दाहरागं वा शोथ कुर्वन्ति दारुणम्॥ स शिरो विषवद्रोगो निरुणद्धि शु गल तथा। त्रिरात्राज्जीवित हन्ति शङ्खको नात्र सशय॥ व्यहाज्जीवति भैषज्य प्रत्याख्याय समाचरेत्॥" (रो० वि० शिरोरोग०) इति। एव ¶ सुश्रुतोक्ता दश शिरोरोगा प्रतिपादिता। माधवकरेण तु ग्रसङ्गेऽनन्तवातोऽधिक पठित तन्नान्तरदर्शनात, तदयथा—"दोषास्तु

---

* "शिरःपाकात्" इत्यत्र "शिरःकण्डात्" इति पाठान्तर चरकवाग्भटसवादि।

† मुद्रितसुश्रुतग्रन्थेषु "असृग्वसाश्लेष्मसमीरणानाम्" इत्यत्र "वसावलासक्षत-सम्भवानाम्" इति पाठवैषम्य दृश्यते।

‡ "रुधिर सपूयम्" इत्यत्र सुश्रुते "सलिल सरक्त" तथा रुग्विनिश्चये "सलिलं सपूयम्" इति पाठान्तरम।

¶ मुद्रितसुश्रुते एकादश शिरोरोगा, अनन्तवातश्च इत्युक्तिर्दृश्यते।

नवकपालरोगाणां विवरणम्।—

तथा कपालरोगाः स्युर्नव तेषूपशीर्षकम्।
अरुंषिका विद्रधिश्च दारुणं पिडकार्बुदम्॥
इन्द्रलुप्तश्च खलतिः पलितश्चेति ते नव॥ १५२॥

दुष्टास्रय एव मन्या सन्धीञ्च घाटासु रुजा सुतीव्राम्। कुर्वन्ति योऽचिभ्रुवि शङ्खदेशे स्थितिं करीत्यासु विशेषतश्च॥ गण्डस्य पार्श्वे तु करोति कम्प हनुग्रह लोचनजाश्च रोगान्। अनन्तवात तमुदाहरन्ति दोषत्रयोत्थं शिरसो विकारम्॥" (सु० उ० २५ अ०) इति। सर्वत्र सर्वजीषु प्रतिपादितत्वात् अचापि न गणित॥ १५१।१५२॥

तथा कपालरोगा स्युर्नव तेषूपशीर्षकमित्यादि।—शीर्षकसमीपे शीर्षकवत य, शीर्ष स उपशीर्षकशब्दवाच्य, नीरुक्शीफत्वादुपशीर्षक, यदुक्त—"कपाले पवने दुष्टे गर्भस्थस्यापि जायते। सवर्णो नीरुज शीफस्त विद्यादुपशीर्षकम्॥" (वा० उ० २३अ०) इति। अरुंषिकेति—अरुंषीति व्रणानि कथितानि, तान्यपि शिरसि भवन्ति, तद्यथा—"अरुंषि बहुवक्त्राणि बहुक्लेदीनि मूर्द्धनि। कफात्सक्तक्रमिकोपेन नृणा विद्यादरुंषिकाम्॥" (सु० नि० १३अ०) इति। विद्रधिरिति—विद्रधि प्रसिद्ध, स तु मूर्द्धन्यपि भवति बहिर्गतमर्माश्रितत्वात्। अस्य लक्षण विद्रधिनिदाने ज्ञातव्यम्। दारुणमिति—दारुण केशभूमौ भवति, लोकेऽपि 'फ्यास' शब्दवाच्यो रोगविशेष, तदुक्त—"दारुणा कण्डुरा रूक्षा केशभूमि प्रजायत। कफवात-प्रकोपेण विद्याद्दारुणकन्तु तम्॥" (सु० नि० १३अ०) इति। यद्यपि कफवात-प्रकोपेणेत्युक्त तथाऽपि अत्र पित्तरक्तानुबन्धा द्रष्टव्य, यदुक्त विदेहै—"यदत्र पटलाभास सरजस्क शिरस्यपि। पारुष्य जायते जन्तोस्तत्र रूप विशेषत॥ तोदै सनिन्द्र वातात् सकण्डू गौरव कफात्। सपिपास सदाहार्त्तिराग पित्तात्तत्र तथा॥" इति। पिडकेति—शिरसि या पिडका भवन्ति ता पिड़का रोगा कथिता, अयमेव क्षुद्ररोगेषु इरिवेल्लिकाशब्दवाच्य, तथा हि—"पिडकासुत्तमाङ्गस्था इत्तासुग्रक्तजाज्वराम। सर्वात्मिका सर्वलिङ्गा ज्ञातीयादिरिवेल्लिकाम्॥" (रो० वि० क्षुद्र०) इति। अत्र तु शिर स्थितत्वात लिखिता न दोष। अर्बुदमिति—अर्बुद-वदर्बुद व्रणविशेष, "गात्रप्रदेशे क्वचिदेव" (सु० नि० ११अ०) इत्यनयमाच्छिरस्यपि भवति। तल्लक्षण तत्रैव द्रष्टव्यम। इन्द्रलुप्तमिति—इन्द्रलुप्तो "वादिपुरा" शब्द-वाच्यो रोगविशेष, अस्यैव पर्य्यायकथन खालित्य रूक् चेति, तथा चोक्त—"रोम-कूपानुगं पित्त वातेन सह मूर्च्छितम्। प्रच्यावयति रोमाणि तत श्लेष्मा सशोणित॥

चतुर्नवतिनेत्ररोगाणां विवरणम्।—

तथा नेत्रभवाः ख्याताश्चतुर्नवतिरामयाः।

कृष्णद्वि रोमकूपास्तु ततोऽन्येषामसम्भव। तदिन्द्रलुप्त खालित्य * रुज्येति च विभाव्यते॥" (सु० नि० १३ अ०) इति। अत्र तु इन्द्रलुप्तखालित्ययो पृथग्गृहण कार्त्तिकाचार्य्यवचनात्, तत्मते तु इन्द्रलुप्त श्मश्रुणि भवति, खालित्य शिरस्येव, अत एव विट्टेश्वरवचनादिन्द्रलुप्त स्त्रीणा न भवति, यदुक्तम्—"अत्यन्तसुकुमाराङ्ग्यो रजो दुष्ट स्रवन्ति च। अव्यायामरता यस्मात † नेन्द्रलुप्त तत स्त्रिया॥" इति। एवमिन्द्रलुप्त खलतिश्च पृथगत्र निरूपितम्। पलितमिति—केशाना शुक्लभावेन पलितमित्युच्यत, तदुक्तम्—"क्रोधशोकश्रमकृत शरीरोष्मा शिरोगत। पित्तञ्च केशान् पचति पलित तेन जायते॥" (सु० नि० १३अ०) इति। तत पलित द्विविध भवति अकालजनित कालजनितञ्च, अन्यत्रोक्तत्वात्, यत क्रोधादि कृतेन शरीरोष्मणा शिरोगतेन वैकृत, पित्तेन पुन प्राकृत पलितमिति, अन्यथा पित्तोष्मणोरभेदात् पुनरुक्तिदोष स्यात, एतेन वैकृतमकालज वय कृतन्तु पित्तेनेत्यर्थ। केचिदेतच्चाकालजलक्षण मन्यन्ते। अन्ये विभिरेव दोषै स्यादिति कथयन्ति, तत्र शोकश्रमाभ्या जनितत्वात्त शरीरोष्मणो विच्छेपाच्छिरोगतत्व, तेनानिलोऽपि लभ्यते, पित्तञ्च साक्षादुपात्त, चकारेण श्लेष्मापि केशशुक्लताकरो गृह्यते, एतेन दोषत्रयसहित शरीरोष्मा पलितहेतुरिति वाक्यार्थ, यदुक्त चरके—"तेजोऽनिलाद्यै सह केशभूमि दग्ध्वा तु कुर्य्यात खलित नरस्य। किञ्चित्तु दग्ध्वा पलितानि कुर्य्यादुरित्रभल्लञ्च शिरोरुहाणाम्॥" (च० चि० विसर्पचि०) इति॥ १५३॥

तथेति।—तथेत्यनेनेन्द्रियसाधर्म्यात नासाश्रवणादीनामनन्तर नेत्ररोगगणनारम्भ इत्यभिप्राय। सा चतुर्नवतिसङ्ख्याकैरामयै प्रतिपादिता, तद्यथा—"नव रोगा नेत्रसन्धौ चत्वारिंशति वर्त्मजा। कृष्णभागगता पञ्च शुक्लभागे त्रयोदश॥ षट् काचे षट् च तिमिरे अष्टौ दृष्टिगता मता। लिङ्गनाशस्तथा सप्त चत्वारश्चाधिमन्थजा। अभिष्यन्दाश्च चत्वारस्तथाऽष्टौ सर्वजा स्मृता॥" इत्याचार्य्येण सङ्गृहीता। सुश्रुते तु स्थानविशेषादेव षट्त्रिंशति कथिता, यत,—"नव सन्ध्यायसंस्थेषु वर्त्मजा

---

* रोगविनिश्चये 'रुज्या" वाग्भटे च "रुज्या" इति पाठ।

† "तस्मान्न खलिति, स्त्रिया," इति मधुकोषे पाठ।

तत्र चतुर्विंशतिनेत्ररोगाणां विवरणम्।—

तेषु वर्त्मगदा. प्रोक्ताश्चतुर्विंशतिसञ्ज्ञका ॥ १५४ ॥

श्लेष्मविशात । शुक्लभागे दशैकश्च चत्वार. कृष्णभागजा ॥ सर्वाश्रया सप्तदश द्वाभ्जा द्वादशैव तु। * द्वौ च वाह्याश्रयावन्यावनिमित्तानामत्तमौ ॥ षट्सप्ततिर्नेत्ररोगा सङ्ख्येय प्रकीर्त्तिता ॥" (सु० उ० १५०) इति। दोषभेदेनापि षट्सप्ततिरेव, यदाह सुश्रुत —† "तैस्त्रिभिस्त्रिशदुत्क्लिष्टे कफेनाभ्यधिकास्त्रय । रक्तजा षोडश ज्ञेया सर्वजा पञ्चविंशति ॥ वाह्यौ पुनर्द्वौ च तथा रोगा षट्सप्तति स्मृता ॥" इति। अत्र शार्ङ्गधराचार्येण यत्सप्तनवतिसङ्ख्याग्रहण कृत ‡ तन्नेत्ररोगान्तर्गतनेत्ररोग-निदानतया (?) प्रतिपादितत्वात। यथा सर्वनेत्रामयाना हेतुभूतोऽभिष्यन्द इति, तदुक्त—"वातात पित्तात कफाद्रक्तादभिष्यन्दस्त्रिधा । प्रायेण जायते घोर सर्वनेत्रामयाकर ॥" (रो० वि० नेत्रसर्वगत०) इति। सुश्रुतेऽपि यथा—"प्रायेण सर्वे नयनामयास्ते भवन्त्यभिष्यन्दनिमित्तमूला" (सु० उ० ६५०) इति। अधिसन्ध्याख्याभिष्यन्दजन्यत्वम, यदुक्त—'इङ्गैरेतैरभिष्यन्दैर्नराणामक्रियावताम। तावन्त्यधिमन्था स्युर्नयने तीव्रवेदना ॥"(सु० उ० ६५०) इति। तथैव दृष्टिगत-रोगाणामपि तिमिरकाचलिङ्गनाशाश्च हेतुभूता परम्परया व्यवस्थिता, तद्यथा —"तिमिर रागता याति राग काचत्वमेति च। काचात सञ्जायते नीली तदाऽन्धो जायते नर ॥" इत्यादिना। तेनात्र निदानभूताना रोगाणामपि सङ्ग्रह कृत इत्यदोष । एतेषा लक्षणानि वक्ष्यमाणेषु नेत्ररोगेषु दर्शयिष्याम। अथ चतुर्नवतिनेत्ररोगाणा विवरणमाह, तेषु वर्त्मगदा इत्यादि।—तेषु पूर्वोक्त-चतुर्नवतिसङ्ख्याकगदेषु वर्त्मगदा ¶ पक्ष्ममूलगतरोगा, ते चतुर्विंशतिभेदा

* मुद्रितसुश्रुतेषु—"द्वौ च—" इत्यादिपाठस्थले "वाह्यजौ द्वौ सनाख्यातौ रोगौ घरमदारुणौ। भूय एतान् प्रवक्ष्यामि सङ्ख्यारूपचिकित्सित ॥" इति पाठो दृश्यते।

† मुद्रितसुश्रुतेषु—"वाताद्दश तथा पित्तात कफाच्चैव त्रयोदश। रक्तात् षोडश विज्ञेया सर्वजा पञ्चविंशति ॥ तथा वाह्यौ पुनर्द्वौ च रोगा षट्सप्तति. स्मृता ॥" इति पाठ ।

‡ तन्नेत्ररोगान्तर्गतानां नेत्ररोगान्तराणा निदानार्थकराणामपि पृथक् पृथक् ग्रहणादिति पाठे कथञ्चिदयसङ्गति जायते।

¶ पक्ष्ममूल वर्त्म इति तु न सम्यक्। "नयनगोलकावरक निमेषोन्मेषाश्रय पटलद्वय वर्त्म उच्यते" इति यौक्तिक ।

कृच्छ्रोन्मीलः पक्ष्मघातः कफोत्क्लिष्टश्च लोहितः।
अरुङ्निमेषः कथितो रक्तोत्क्लिष्टः कुकूणकः॥ १५५॥

कृच्छ्रोन्मीलप्रभृतयः। तद्यथा कृच्छ्रोन्मील इति—यत्र कृच्छ्रेण महता कष्टेन उन्मीलनमुद्घाटनं भवति, अत एव तत्स्थानेषु कुत्सनं नामेति कथयन्ति, यथा—"वातादा वर्त्मसङ्कोचं जनयन्ति मला यदा। तदा दृष्टं न शक्नोति कुत्सनं नाम तद्विदुः॥" (रो० वि० नेत्रवर्त्म०) इति। यत्र पक्ष्मणां घातनं भवति स पक्ष्मघात इति कथितः। तेनात्रापि पक्ष्मघातः प्रसङ्गः, यदुक्तं—"वर्त्मपक्ष्माश्रयगतं पित्तं रोमाणि घातयेत्। कण्डूदाहरुजं कुर्वन्ने पक्ष्मघातं तमादिशेत्॥" (रो० वि० नेत्रवर्त्म०) इति। कफोत्क्लिष्ट इति—कफस्योत्क्लिष्टत्वेन प्रक्लिन्नवर्त्मत्वमुपलक्ष्यते, तेन प्रक्लिन्नवर्त्मेति नाम्ना प्रसिद्धम्, तद्यथा—"अरुजं बाह्यतः शुक्लं वर्त्म यस्य नरस्य हि। प्रक्लिन्नवर्त्म तत्तं विद्यात् क्लिन्नमत्यध्यमन्ततः॥" (रो० वि० नेत्रवर्त्म०) इति। एतदेव चक्षुष्येण पित्तास्रयं पठितम्, यथा—"श्लक्ष्णं प्रक्लिन्नते वर्त्म कण्डूसन्मन्थवेदनम्। विद्यात् प्रक्लिन्नवर्त्मेति तत्र पित्तं सन्निपातजम्॥" इति। लोहित इति—लोहिताकाराङ्कुरत्वेन यथाऽर्शस्यथाऽयमपि, अत एवात्र * शुष्कार्शं कथितम्, तद्यथा—'दीर्घोऽङ्कुर खरस्पर्शो दारुणोऽन्यान्परीक्ष्य च। व्याधिरेषोऽनिविष्यातः शुष्कार्शो नाम नामतः॥" (रो० वि० नेत्रवर्त्म०) इति। निमेष इति—निमेषसंज्ञया प्रसिद्धः, यतः—"निमेषिणी शिरा वायुः प्रविष्टो वर्त्मसंश्रयः। चालयत्यक्षिवर्त्मानि निमेष इति तं विदुः॥" (रो० वि० नेत्रवर्त्म०) इति। अयमपि विदेहे असाध्यः कथितः, यदुक्तं—"निमेषिणी शिरा वायुः प्रावृण्य व्यवतिष्ठते। अत्यर्थं चालयेद्वर्त्म निमेषः स न सिध्यति॥" रक्तोत्क्लिष्ट इति—रक्तेनोत्क्लिष्टत्वात्, रक्तार्शोऽत्रापि प्रोक्तपादितम्, यथा—"न स्थितो वर्त्ममध्ये तु लोहितो मृदुरङ्कुरः। तद्रक्तजं शोणितार्शस्तन्निभं प्रवर्धते॥" (रो० वि० नेत्रवर्त्म०) इति। एतदसाध्यत्वेन विटङ्केऽपि दर्शितम्, यथा—"वायुः शोणितमादाय शिराणां प्रमुखे स्थितः। जनयत्यङ्कुरं ताम्रं वर्त्मनश्छिन्नरोहणम्॥ तच्छोणितार्शोऽसाध्यं स्याद्रक्तसाध्यमथोरुजम्॥" इति। कुकूणकोऽन्यत्र बालरोगे पठितः, बालानामतीव श्लक्ष्णत्वात्,

* लोहिताकाराङ्कुरत्वेन शोणितार्श सदृशमेव भवितुं युक्तं, न तु शुष्कार्शः, यतः,—"यः स्थितो वर्त्ममध्ये तु लोहितो मृदुरङ्कुरः। तद्रक्तजं शोणितार्शस्तन्निभं प्रवर्धते॥" इत्युक्तत्वात्।

पक्ष्मार्शः पक्ष्मरोधश्च पित्तोत्क्लिष्टश्च पोथकी।
श्लिष्टवर्त्मा च बहलः पक्ष्मोत्सङ्गस्तथाऽर्बुदम् ॥ १५६ ॥

अधिगतभागेनाव गणितो न दोष , तदृयथा—"कृकूणक चीरदोषाच्छिशूनामचि-वर्त्मनि। जायते तेन तन्नेव कण्डूरञ्च स्रवेन्मुहु ॥ शिशु कुर्य्यान्ललाटाचि कूटनासाव-घर्षणम्। श्लथो नार्कप्रभा द्रष्टु न वर्त्मोन्मीलनक्षम ॥" (रो० वि० बाल०) इति। पक्ष्मार्श इति—यत्र ककटीबीजसदृशा पिडका वत्मनोऽन्तर्बाह्ये भवन्ति तत् पक्ष्मार्श कथितम्, तथा हि—"एवारुबीजप्रतिमा पिडका मन्दवेदना। श्लक्ष्णा खराश्च वर्त्मस्थास्तदर्शोवर्त्म कीर्त्यते ॥" (रो० वि० नेत्रवर्त्म०) इति। सन्निपातजमिदम्, तथा च विटेड,—"नीरुजा कठिना वर्त्म पक्ष्मान्तर्बाह्यतोऽपि वा। पिडका सन्निपातेन तदर्शोवर्त्म कीर्त्यते ॥" इति। पक्ष्मरोध इति—पक्ष्मरोधो वर्त्मबन्ध कथित.. यत्र शोथयोगाच्च यथावन्नयनं पिदधाति वर्त्म एष सन्निपातज , तथा हि—"कण्डूमताऽल्पतोदेन वर्त्मशोथेन यो नर। न सम्छादयेदक्षि भवेदन्ध स वर्त्मन ॥" (सु० उ० ३ अ०) इति। पित्तोत्क्लिष्ट इति—उत्क्लिष्ट पित्त यत्र स * पक्ष्मप्रकोप इति नाम्ना प्रसिद्ध , यदुक्त—"प्रचालितानि वातेन पक्ष्माण्यक्षि विशन्ति हि। घृष्यन्त्यक्षि मुहुस्तानि स्वस्थ जनयन्ति च ॥ असिते च सिते भागे मूलकोषात पतन्ति हि। पक्ष्मकोप स विज्ञेयो व्याधि परमदारुण ॥" (रो० वि० नेत्रवर्त्म०) इति। अयमपि सन्निपातजो याप्य एव। पोथकीति—यत्र सर्षपसदृशा पिडका भवन्ति स पोथकीशब्दवाच्य , यथा—"स्रावित्र कण्डुरा गुर्व्यो रक्तसर्षपसन्निभा। रुजावत्यश्च पिडका पोथक्य इति कीर्त्तिता ॥" (रो० वि० नेत्रवर्त्म०) इति। श्लिष्टवर्त्मेति—वर्त्मन श्लिष्टत्वेन, † अक्लिन्नवर्त्म

* वाग्भटोक्तपित्तोत्क्लिष्टलक्षणेन सह पक्ष्मप्रकोपस्य किमपि सादृश्य नास्ति, तथा च—"सदाहक्लेदनिस्तोद रक्ताभं स्पर्शनाक्षमम्। पित्तेन जायते वर्त्म पित्तोत्क्लिष्टमुशन्ति तत ॥" (वा० उ० ८ अ०)। एवञ्च अनयोरैक्य कदाऽपि न युज्यते इति। पक्ष्मकोपो वातज पित्तोत्क्लिष्टश्च पित्तजन्यमेव इत्यपि द्रष्टव्यम।

† अक्लिन्नवर्त्मना सह वाग्भटोक्तश्लिष्टवर्त्मन वर्त्मश्लेष विना नान्यत सादृश्य परिदृश्यते, तदृयथा—"श्लिष्टाख्यवर्त्मनी श्लिष्टे कण्डूश्यथुरागिणी" (वा० उ० ८ अ०) इति। "एतत् (अक्लिन्नवर्त्म) वाग्भटे पिल्लाख्य सम्बध्यते" इति मधुकोष।

कुम्भीका सिकतावर्त्म लगणोऽञ्जननामिका।

इति नामान्तर, पक्षणा सलग्नत्वात्, तथा हि—"यस्य धौतान्यधौतानि सन्नश्यन्ते पुन पुन। वर्त्मान्यपरिपक्वानि विद्याद्क्लिन्नवर्त्म तत॥" (रो० वि० नेत्रवर्त्म०) इति। एके श्लिष्टस्थाने क्लिष्टवर्त्मेति पठन्ति, तत्र क्लिष्टत्व वेदनाऽल्पयोगादवगन्तव्यम्, यत,—"बहुलवेदन तासु यद्वर्त्म समसेव च। अकस्माच्च भवेद्रक्त क्लिष्टवर्त्मेति तद्विदु॥" (सु० उ० २ अ०) इति। बहुल इति—यत्र त्वग्वर्णसदृश्य पिडका भवन्ति तत बहुलवर्त्मेति सज्ञया कथितम्, तथा हि—"वर्त्मोपचीयते यस्य पिडकाभि समन्तत। सवर्णाभि स्थिराभिश्च विद्यात बहुलवर्त्म तत॥" (रो० वि० नेत्रवर्त्म०) इति। पक्ष्मोत्सङ्ग इति—वर्त्मन एवाभ्यन्तरे * उपरि सोत्सेधा पिडका जायते तेनोत्सङ्गपिडका अत्रैव कथिता, यथा—"अभ्यन्तरमुखी तासा वाह्यतो वर्त्मनश्च या। सोत्सङ्गोत्सङ्गपिडका सर्वजा शूलकण्डरा॥" (रो० वि० नेत्रवर्त्म०) इति। इयमपि विदेहगदाधराभ्या वर्त्मनि एव जाता दर्शिता, यदाहतु,—"वर्त्मोत्सङ्गेऽधरे जन्तो सन्निपातात प्रजायते। अभ्यन्तरमुखी शूला वाह्यतश्चापि दृश्यते॥ पिडका पिडकाभिश्च चिताऽन्याभि समन्तत। उत्सङ्गपिडका नाम कठिना मन्दवेदना॥ सा प्रभिन्ना स्रवेत स्राव कुक्कुटाण्डरसोपमम॥" इति। अर्बुदमिति—वर्त्मार्बुद तच्च ग्रन्थिरूपेण स्थितम्, तद्यथा—"वर्त्मान्तरस्थ विषम ग्रन्थिभूतमवेदनम। आचक्षीतार्बुदमिति सरक्तमविलम्बितम॥" (रो० वि० नेत्रवर्त्म०) इति। कुम्भीकेति—कुम्भाण्डुलता, तद्वीजतुल्या कुम्भीका वाच्या। अन्ये—कुम्भीका कच्छदेशोद्भवा दाडिमाकारफला, तद्वीजतुल्यपिडका भिद्यमाना सती स्वयमेव पूर्णोदरा भवति, यदुक्त—"वर्त्मान्ते पिडका घ्राता भिद्यन्ते च स्रवन्ति च। कुम्भीकावीजसदृशा कुम्भीका सन्निपातजा॥" (रो० वि० नेत्रवर्त्म०) इति। सिकतावर्त्मेति—सिकता शर्करा, तत्सदृशाभि पिडकाभिश्चित यद्वर्त्म भवति तत् सिकतावर्त्मेति कथितम्, तद्यथा—"पिडकाभि सुसूक्ष्माभिर्घनाभिरभिसवृता। पिडका या खरा स्थूला सा ज्ञेया वर्त्मशर्करा॥" (सु० उ० २अ०) इति। लगण इति

---

* सुश्रुते अधोवर्त्मनि पिडका जायते इत्युक्त, तथा च—"पिडकाऽभ्यन्तरमुखा वाह्याधोवर्त्मसश्रया। विज्ञेयोत्सङ्गिनी नाम तद्रूपपिडकान्विता॥" (सु० उ० २ अ०) इति। मधुकोषकारेणापि—"ऊर्ध्वाधोवर्त्मदेशमध्ये अधोवर्त्मनि या" इति व्याख्यातम्।

कर्दमः श्यावव्मा च विसवर्त्मा तथाऽलजी ॥
उत्क्लिष्टवर्त्मेति गदाः प्रोक्ता वर्त्मसमुद्भवाः ॥ १५७ ॥

—यत्र वर्त्ममूले कोलप्रमाणो ग्रन्थि स लगण इति रोगविशेष कथित, तथा च—"अपाकी कठिन स्थूलो ग्रन्थिर्वर्त्मभवोऽज्ञ। सकण्डू पाच्छल कोल-प्रमाणो लगणस्तु स ॥" (सु० उ० ३ अ०) इति। अञ्जननासिकेति—वर्त्मजा कोमला या पिडका सा-ऽञ्जननासिकेति प्रसिद्धा, यदुक्त—"दाहतोदवती ताम्रा पिडका वर्त्मसम्भवा। सैवी मन्दरुजा सूक्ष्मा ज्ञेया साऽञ्जननासिका ॥" (सु० उ० ३ अ०) इति। कर्दम इति—प्रागुक्तक्लिष्टलक्षणमेव यदा पित्तमिलित सत् श्लेष्मरुधिर विदहेत तदा क्लिन्नत्वमापन्नं वर्त्म वर्त्मकर्दम इति कथितम्, तथा हि—"क्लिष्ट पुन पित्तयुत श्लेष्मरुधिर विदहेद्यदा। तत क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दम ॥" (सु० उ० ३ अ०) इति। श्यावव्मेति—श्यावत्वमत्र वाताधिक्यत्वेन बोद्धव्यम्, अत एव वेदनान्वितमित्युक्तम्, तथा हि—"यत् वर्त्म वाह्यतोऽन्तश्च श्याव शूनं सवेदनम्। तदाहु श्यावव्मेति वर्त्मरोगविशारदा. ॥" (रा० वि० नेत्रवर्त्म०) इति। अग्निदग्धमिव श्यावत्वमित्येके, तथा च निमि,—"दुष्टश्लेष्मा मरुत पित्त वर्त्मनोश्चीयत यदा। अग्निदग्धमिव श्याव श्यावव्मेति तद्विदु ॥" इति। विसवर्त्मेति—विस मृणालं, तच्छिद्राकारच्छिद्रान्वित श्लेष्मा वर्त्ममूले भवति तत् विसवर्त्मेति नाम कथितम्, तदुक्त—"ग्रथी दोषा वहि श्लेष्म कुर्युस्छिद्राणि वर्त्मनो। प्रस्रवन्त्यन्तरुदक विसवद्विसवत्म तत् ॥" (रो० वि० नेत्रवर्त्म०) इति। अलजीति—यद्यप्यलजी वक्ष्यमाणसन्धिगतरोगेषु दर्शिता तथाऽप्यत्र प्रसङ्गात् प्रसिद्धि गतत्वात् * पक्ष्मसन्धावपि भवतीत्यदोष, यदुक्त—"वर्त्मशुक्लाकार-पिडका सूक्ष्मा ताम्रा च वर्त्मनि। सरुजा श्लेष्मरुधिरोत्क्लिष्टा दारुणा त्वलजी स्मृता ॥" इति। उत्क्लिष्टवर्त्मेति—उत्क्लिष्टो वातरक्तेन व्याप्त यद्वर्त्म, अत एव तन्त्रा-न्तरे † वातहतवर्त्म कथितम्, यथा—"विमुक्तसन्धि निश्चेष्ट वर्त्म यस्य निमील्यते।

---

* वाग्भटे वर्त्मगतरोगविज्ञानीयेऽध्याये कनीनिकोपरि वर्त्मनो वाह्यत एकविधा अलजी उक्ता, अपरा सन्धिगतरोगविज्ञानीये कनीनिकान्त क्षयशुक्लसन्धौ, न तु पक्ष्मसन्धौ कुत्रापि, तथा च—'कनीनिके बहिर्वर्त्म कठिनो ग्रन्थिरुन्नत। ताम्र, पक्वोऽस्रपूयास्रदलज्याभायते मुहु ॥" (वा० उ० ८अ०)। "कनीनिकान्तरलजी श्लेष्मो रक्तोद्दादृवान्" (वा० उ० १० अ०) इति।

† वाग्भटोक्तोत्क्लिष्टवर्त्मना सह सौश्रुतवातहतवर्त्मन. किमपि साहश्यं

तत्र नवनेत्रसन्धिगतरोगाणां विवरणम्।—

नेत्रसन्धिसमुद्भूता नव रोगाः प्रकीर्त्तिताः।
जलस्राव कफस्रावो रक्तस्रावश्च पर्वणी ॥ १५८ ॥

एतद्वातहृत वर्त्म जानीयादक्षिचिन्तक ॥" (रो० वि० नेत्रवर्त्म०) इति। एव वर्त्मरोगाश्चतुर्विंशति प्रोक्ता ॥ १५४—१५७ ॥

इदानीं नेत्ररोगेष्वेव सन्धिगतान् नव भेदान् आह, नेत्रेति।—पूर्वोक्तेषु चतुर्नवतिनेत्ररोगेषु नव रोगा ये सन्धिगतास्तेषां विवरण लिख्यते, यथा, जलस्राव इति—जलस्रावोऽत्र पित्तादौद्रव्य, जलाभस्रावदर्शनात्, तद्यथा—"हरिद्राभ नीलमुष्ण जलाभ पित्तस्राव सस्रवेत सन्धिमध्यात्" (रो० वि० नेत्रसन्धि०) इति। यत सन्धान्तरेऽपि चत्वार एव स्रावा उक्ता, यदुक्त—"गत्वा सन्धीनशुमार्गेण दोषा कुर्युं स्रावान् लक्षणे स्वैरुपेतान्। त हि स्राव नेत्रनाडीमथैके तस्मा लिङ्ग कीर्त्तयिष्ये चतुर्द्धा ॥" (रो० वि० नेत्रसन्धि०) इति, तेनात्र जलस्राव इति कथित। पूयस्रावश्च सन्निपातज स्राव कथित। ननु वातज स्राव कुतो नोक्त? सत्यम्, केवलवातेन स्रावाभावात्, यतो विदेहेऽपि चत्वार एव प्रतिपादिता, तद्यथा—"सन्निपातात् कफात् रक्तात् पित्तात् स्रावोऽक्षिसन्धिषु" इति। कफस्राव इति—कफेन स्रावो घनो भवति नीरुजश्च, यदुक्त—"श्वेत सान्द्र पिच्छिल य. स्रवेत्तु श्लेष्मस्रावो नीरुज स प्रदिष्ट" (सु० उ० २ अ०) इति। रक्तस्राव इति—"रक्तस्राव शोणितोत्थ" इति ग्रहणात् अत्र सरक्तपूय स्रवति, यत,—"रक्तस्राव. शोणितोत्था विकार स्रवेद्दुष्ट तत्र रक्त * सपूयम्" इति। पर्वणीति—शुक्लकृष्णसन्धावेव पर्वणी भवति, यदुक्त—"तासा तन्वौ दाहशूलोपपन्ना ज्ञेया रक्तात् पर्वणी वृत्तशोफा। ज्ञाता सन्धौ कृष्णशुक्लेऽलजी स्यात तस्मिन्नेव ख्यापिता पूर्वलिङ्गै ॥" (सु० उ० २ अ०) इति। वक्ष्यमाणाऽलजी चापि

नोक्ति, तथा च—"यत् वर्त्मोत्क्लिष्टमुत्क्लिष्टमकस्मात् स्रानतामियात्। रक्तादोषत्रयात्क्लेशात् वदन्त्युत्क्लिष्टवर्त्म तत ॥" (वा० उ० ८अ०) इति।

* सुश्रुतेन वाग्भटेन वा पूयस्रावो नोक्त, तथा च—"रक्तस्राव शोणितोत्थ सरक्त क्षीण नाल्प सस्रवेन्नातिसान्द्रम्" (सु० उ० २अ०) इति। "रक्तात् रक्तस्रवे ताम्र बहुण चाशु सस्रवेत्" (वा० उ० १० अ०)। माधवेनापि—"रक्तस्राव. शोणितोत्थो विकार स्रवेद्दुष्ट तत्र रक्त प्रभूतम्" इति पठितम्।

पूयस्रावः क्रिमिग्रन्थिरुपनाहस्तथाऽलजी।
पूयालस इति प्रोक्ता रोगा नयनसन्धिजाः॥ १५९॥

तत्रिभ्रेव कृष्णशुक्लसन्धौ पूर्वलिङ्गैस्तान्वी तन्वीप्रभृतिभि ख्यापिता कथिता। भेदस्थानयो,—तन्वी पर्वणीका, स्थूला अलजीति वदति, तथा च विदेहे,—"शुक्लकृष्णान्तसन्धौ तु चीयन्तेऽसृक्कफानिला। पर्वणी पिडका तैस्तु जायते लबुरोपमा॥ तासा सदाहचीषोष्णपीतकास्रुसमाकुला। कफपित्ते तु सम्मूर्च्छा सहरक्तेन मारुत॥ शुक्लकृष्णान्तसन्धौ तु जनयेद्ग्रीवनाकृतिम्। पिडकामलजीं तान्तु विद्धि तोदास्रुसङ्कुलाम॥" इति। पूयस्राव इति—यत्र सन्निपातेन पाकवान् ग्रोथ सम्भवेत स पूयस्राव कथित, तथा हि—"पाक सन्धौ सम्भवेत यस्तु पूय पूयस्रावी नैकरूप प्रदिष्ट" (सु० उ० २ अ०) इति। क्रमिग्रन्थिरिति—नानारूपा क्रमयो ग्रन्थि वर्त्मपक्ष्मसन्धावेव कुर्वन्ति, तेन क्रमिग्रन्थिरिति प्रतीत, यत,—"क्रमिग्रन्थिर्वर्त्मन पक्ष्मणश्च कण्डू कुर्य्यु क्रमय सन्धिजाता। नानारूपा वर्त्मशुक्लान्तसन्धौ चरन्त्यन्तर्लोचन दूषयन्त॥" (रो० वि० नेत्रसन्धि०) इति। विदेहे तु पूयादिदर्शनात् सन्निपातजोऽय विकार, तदुक्त—*"ततस्ते पूयसंसृष्टा पतन्ति क्रमयस्तथा। लक्षणैर्विविधैर्युक्ता सन्निपातसमुत्थिता॥ क्रमिग्रन्थि तु त विद्याद्दोषिना नेत्रदूषणम्॥" इति। उपनाह इति—तथा च—"ग्रन्थिर्नाम्नो दृष्टिसन्धावपाकी कण्डूपायो नीरुजस्तूपनाह" (सु० उ० २ अ०) इति। विदेहे तु वातश्लेष्मजन्यत्वेऽपि श्लेष्मोद्रेकात श्लेष्मोपनाह इति व्यपदेश, यदुक्त—"वायु श्लेष्माणमादाय दृष्टिसन्धौ व्यवस्थित। करुणं कठिन ग्रन्थि जनयेदल्पवेदनम्॥ श्लेष्मोपनाह त विद्यात् स्रावान् वर्त्म्यामय परम्॥" इति। अलजीति—पर्वणिकाऽधिकरणे दर्शिता, सा तत्रैव ज्ञातव्येति। पूयालस इति—"पक्व ग्रोथ सन्धिजात सतोद पूयस्रावी सोऽय पूयालसाख्य" इति। सन्धिरत्र नासामनु नेत्रान्त कनीनसन्धिरित्युच्यते, तथा च निमि,—"ग्रोथक्लेदसमाविष्ट तोदभेदसमाकुलम्। पूयालसन्तु तं विद्यात सन्धौ कानीनिके नृणाम्॥" इति। इति नयनसन्धिगतरोगा उक्ता॥ १५८।१५९॥

* "ततस्ते" इत्यस्य प्राक् "वर्त्मशुक्लस्य सन्धौ तु ग्रन्थि पित्तकफात्मक। क्रमणा पच्यते गाढ तत्र मूर्च्छन्ति जन्तव॥ सुसूक्ष्मजातचरणा वर्त्मपक्ष्मसमाश्रया॥" इति श्लोकावयवो मधुकोषे दृश्यते।

तत्र त्रयोदशनेत्रशुक्लगतरोगाणां विवरणम्।—

तथा शुक्लगता रोगा बुधैः प्रोक्तास्त्रयोदश।
शिरोत्पातः शिराहर्षः शिराजालञ्च शुक्तिकाः॥ १६०॥
शुक्लार्मं चाधिमासार्मं प्रस्तार्यर्मं च पिष्टकाः।
शिरायाश्चिप्पिटश्चैव कफग्रथितकोऽर्जुनः॥

इदानीं शुक्लभागगतरोगान् बुधैः प्रोक्तानाह, तथा शुक्लगता इत्यादि।—चतुर्नवति-नेत्ररोगसङ्ग्राविवरणविषयात् शुक्लगतरोगा अत्र त्रयोदश कथिता। शिरोत्पातशिराहर्षौ द्वावत्र रोगौ कथितौ तावेव माधवसङ्ग्रहे तु सर्वाक्षिरोगान्तर्गतौ पठितौ, तस्मात् तत्रैकादश शुक्लजा इत्यर्थः। अत्राचार्येण तु शुक्लभागे शिरागतदोषविकृतभावादुक्ताविति दोषः, यत शिराणामुत्पात उपद्रवः, स च दोषविशेषात् भवति इत्यभिप्रायः। शिरोत्पातवत् शिराहर्षोऽपि, यदुक्तम्—"अवेदना वाऽपि सवेदना वा यस्याक्षिराज्यो हि भवन्ति ताम्राः। मुहुर्विरज्यन्ति च या न ताहक् व्याधिं शिरोत्पात इति प्रदिष्टः॥" (सु० उ० ६अ०) इति। शिराहर्षः प्रसिद्ध एव, यत,—"नीहाच्छिरोत्पात उपेक्षितस्तु लायेत रोगस्तु शिराप्रहर्षः। ताम्राभमस्य स्रवति प्रगाढं तथा न श्लक्ष्णोल्पमिवोचितञ्च॥" (सु० उ० ६अ०) इति। शिराजाल इति—यत्रानुलोमविलोमस्थितानां शिराणां निचयविरचितत्वेन जालप्रेक्षावलक्षितिर्दृश्यते स शिराजाल कथित, तथा हि—"जालाभ कठिनशिरो महान् सरक्त सन्तान स्रुत इह जालसञ्ज्ञितस्तु" (सु० उ० ४अ०) इति। शुक्तिक इति—यत्र जलशुक्तिनिभा बिन्दवो भवन्ति तेन शुक्तिक इति नेत्ररोगविशेषः, तथा हि—"श्यावा सु पिञ्जितनिभाश्च बिन्दवो ये शुक्त्याभा सितनियता स शुक्तिसञ्ज्ञः" (रो० वि० नेत्रशुक्ल०) इति। शुक्लार्मेति—सम्यक् श्वेतभावत्वात् शुक्लार्मेति, तदृश्यथा—"सम्पेत यदु शुक्लार्मं शुक्ले तदर्हते चिरात" (रो० वि० नेत्रशुक्ल०) इति। अधिमासार्मेति—यत्र यक्ष्मन्निभमर्म भवति, यत,—"पृथु बृहधिमासार्मं बहलञ्च यक्ष्मन्निभम्" (रो० वि० नेत्रशुक्ल०) इति। प्रस्तार्यर्मेति—प्रस्तारि प्रस्तरणशील यत्तार्मं भवति, यदुक्त—"प्रस्तार्यर्मं तनु क्षीणं श्याव रक्तनिभं सिते" (रो० वि० नेत्रशुक्ल०) इति। पिष्टक इति—पिष्टवत् पिष्टकलेन धूल्यादिव्याप्तादर्शतल्यमित्यर्थः, तदृश्यथा—"श्लेष्मसारुतकोपेन * यच्छुक्ले मासमुन्नतम। पिष्टवत् पिष्टकं विद्धि मलाक्तादर्शसन्निभम॥" इति। शिरायाश्चिप्पिटमिति—शुक्लभागस्थिता पिडका यदा शिराहता

* "शुक्ले पिष्ट समुन्नतम्" इति पाठः माधवसङ्ग्रहे।

स्नायुर्मं शोणितार्मं स्यादिति शुक्लगता गदाः ॥ १६१ ॥

तत पञ्चनेत्रकृष्णगतरोगाणां विवरणम्।—

तथा कृष्णसमुद्भूताः पञ्च रोगाः प्रकीर्त्तिताः।

भवन्ति तदा शिराचिप्पिट कथितम्, एतदेवान्यत्र शिराजा पिडका इति प्रतिपादितम्, यत,—"शुक्लस्था सितपिडका शिराहता याता विद्यादसितसमीपजा शिराजा" (सु० उ० ४ अ०) इति। एवे "शिरायाश्चिप्पिटश्चैव" इत्यत्र स्थाने "शिराया पिडकाश्चैवम्" इति पठन्ति, तत्रापि स एवार्थ। कफग्रथितक इति —यत्र नयनसिते वारिबिन्दुसदृशमलगुच्छूनता भवति, यदुक्त—"काच्याभोऽस्रदुरथ वारिबिन्दुकल्पो विज्ञेयो नयनसिते बलासस्रज्ञ" (रो० वि० नेत्रशुक्ल०) इति। बलासस्रज्ञ इत्यत्र पटलदेशग्रहात्तत्वाद्बलासग्रथितम् इत्यभिधानम्, तथा च विदेह,—*"मारुतोत्पीडित श्लेष्मा शुक्लभागे व्यवस्थित। जलबिन्दुरिवोच्छूनोऽस्रदुश्लेष्म समुद्भवेत॥ बलासग्रथितं नाम नीरुजं वृत्तमण्डलम॥" इति। अर्जुन इति—यत्र शुक्लभागे रक्तबिन्दुरिवोच्छूनो मृदुर्बिन्दुरेको भवति सोऽर्जुनसज्ञ, तदृयथा —"एको य प्रथमरुधिरोपनत्र बिन्दु शुक्लस्थो भवति तमर्जुन वदन्ति" (सु० उ० ४अ०) इति। स्नायुर्मेति—इदच प्रत्याख्यानीव भवति, यत,—"स्थिर प्रस्तारि नासाद्य शुष्क स्नायुम पञ्चमम्" (रो० वि० नेत्रशुक्ल०) इति। विदेहेऽप्येवमेव, यथा—"प्रस्तारिणोऽर्मण स्राव निरुणद्धि यदाऽनिल। विना स्रावं विशुष्क तत् स्नायुर्मेति प्रकीर्त्तितम्॥" इति। † अधिमास इति—मासस्योपचयादधिमाससज्ञ। तन्मान्तरे त्वयमेव रक्तजत्वात् रक्तार्मेति सज्ञयाऽभिहित, एकपटलस्थानगतत्वान्मासरक्तार्थो, तथा हि—"पद्माभ मृदु रक्तार्म यन्मास चोपचीयते सिते" (रो० वि० नेत्रशुक्ल०) इति। इति पूर्वोक्तप्रकारेण शुक्लगतरोगास्त्रयोदशसङ्ख्या उक्ता इत्यर्थ ॥ १६०।१६१ ॥

तदेति।—नेत्ररोगगणनाप्रस्तावे कृष्णभागगतरोगा पञ्चसङ्ख्यका अधुना

---

* "मारुतोत्पीडित श्लेष्मा शुक्लभागे व्यवस्थित। जलबिन्दुरिवोच्छूनो स्रदु. कफसम्भव॥ बलासग्रथित नाम त शीघ्र वृत्तमादिशेत्॥" इति मधुकोषधृतविदेहपाठ।

† "अधिमास" इत्यत्र मूलोक्त "शोणितार्मं" इति पाठ सङ्गत: तन्मान्तरदर्शनात् अधिमासार्मण प्राक्पठितत्वाच्च।

गुडशुक्लं शिराशुक्लं क्षतशुक्लं तथाऽजका ॥
शिरासङ्घस्य सर्वेऽपि प्रोक्ता व्रणगता गदाः ॥ १६२ ॥

प्रतिपाद्यन्ते, तत्रादौ गुडशुक्लमिति—शुक्लमत्र पुष्पशब्दाच्च, "फुल्ली" इति लोके। गुडत्वमत्र साध्यतमत्वादव्रणत्वाच्च, अतस्तस्मान्तरेऽव्रणशुक्लमित्युच्यते, तद्यथा—"स्नन्दात्मक व्रणगतं सचोषं शङ्खेन्दुकुन्दप्रतिमावभासम। वैद्यायसाभ्रप्रतनुप्रकाशमथाव्रणं साध्यतमं वदन्ति ॥" (रो० वि० नेत्रव्रण०) इति। एतदेव व्रणसाध्यम अमाध्यञ्च भवति, तद्यथा—"गम्भीरजातं बहलञ्च शुक्लं चिरोत्थितञ्चापि वदन्ति व्रणज्ञम। विच्छिन्नमध्यं पिशितावृतं वा यत्तं शिरासूक्ष्मसदृष्टिकञ्च। द्विवर्णतं लोहितमन्ततश्च चिरोत्थितञ्चापि विवर्जनीयम ॥" (सु० उ० ५ अ०) इति। अन्याद्दशमध्यसाध्यं प्रसङ्गतो लिख्यते, यथा—"उष्णाश्रुपातः पिडका च कृष्णे यस्मिन् भवेन्मुद्गनिभञ्च शुक्लम। तदप्यसाध्यं प्रवदन्ति केचिदन्यत्र तैस्तिरिपक्वतुल्यम ॥" (सु० उ० ५ अ०) इति। शिराशुक्लन्तु साधवेनासाध्यशुक्लावस्थाया पठितं, यतस्तत्र चत्वार एव कृष्णगतरोगाः सङ्गृहीताः, अनेन चिकित्सोपयोगित्वात् पृथग्गणितं न दोषः। क्षतशुक्लमिति—क्षतं प्रहारः, तत्रैव शुक्लं यत्र दृश्यते येन सूच्यग्रेणेव छिन्नाभं भवतीत्यभिप्रायः, तस्मात् तस्मान्तरे व्रणशुक्लमिति संज्ञा, तथा हि—"निमग्नरूपञ्च भवेद्धि कृष्णे सूच्येव विद्धं प्रतिभाति यद्वै। स्रावं स्रवेद्दूषणमतीव यत्र तत व्रणं शुक्लमुदाहरन्ति ॥" (रो० वि० नेत्रव्रण०) इति। विदेहेऽप्युक्तं—"रक्तराजीनिभं कृष्णे छिन्नाभं यत्र लक्ष्यते। सूच्यग्रेणेव तच्छुक्लं व्रणाश्रुस्रावि व्रणम ॥" इति। असाध्यावस्थावशेनापि एतादृशलक्षणान्वितं साध्यमेव, यदुक्तं—"दृष्टिं समीपे न भवेत्तु यत्र न चावगाढं न च मर्मसंस्थं। अवेदनं वा न च युग्मशुक्लं तत सिद्धिमायाति कदाचिदेव ॥" (रो० वि० नेत्रव्रण०) इति। अजकेति—अजापुरीषसदृशं यद्भवति, तथा हि—"अजापुरीषप्रतिमो रुजावान् सलोहितो लोहितपिच्छिलास्रः। विगृह्य कृष्णं प्रचयोऽभ्युपैति तत्राजकाजातमिति व्यवस्येत ॥" (रो० वि० नेत्रव्रण०) इति। अत्र तृतीयत्वगतत्वान्नेदं प्रचयी बोद्धव्यं, यदुक्तं विदेहे—"कृष्णेऽच्छ्यैर्यद्वैवेच्छुक्लं छागलौविट्समप्रभम। सान्द्रपिच्छिलरक्तास्रं विलग्नमजकेति सा ॥" इति। शिरासङ्घेति—नेत्रगतशिराणां सङ्घोऽप्रवृत्तिर्यत्र * तेनाविपाकात्ययो भवति, तस्मादन्यवाविपाकात्यय इति नाम्ना प्रसिद्धं,

* अविपाकात्ययेन सह वाग्भटीयशिरासङ्घस्य सादृश्यं किमपि न दृश्यते तथा च—"दाहघर्षवत्यं शिराहता। कृष्णासन्ना शिरासङ्गा पिटिका सर्षपोपमाः ॥"

तत्र सप्तविंशतिनेत्रदृष्टिगतरोगाणां विवरणम्।—

काचस्तु षड्विध ज्ञेय वातात् पित्तात् कफादपि।
सन्निपाताच्च रक्ताच्च षष्ठ सनर्मसम्भवम् ॥ १६२ ॥
तिमिराणि षडेव स्युर्वातपित्तकफैस्त्रिधा।

तथा हि—"श्वेत समाक्रामति सर्वतो हि दोषेण यस्यासितमण्डलन्तु। तमक्षि-पाकात्ययमक्षिरोग सर्वात्मक वर्जयितव्यमाहु ॥" (रो० वि० नेत्रकृष्ण०) इति। अक्षिपाकात्यय पुरतो वक्ष्यमाणसर्वगतरोगे गणित, तस्मात शिरासङ्गोऽव असाध्यकृष्णगतरोगविषये द्रष्टव्य इति सभीचीन पक्ष। एव पक्ष कृष्णगता रोगाः प्रोक्ता ॥ १६२ ॥

अथ षड्विध काचमाह, काचान्वेति।—काचस्तु लिङ्गनाशस्य भेद एवेत्येके, यत,—"स एव लिङ्गनाशस्तु नीलिका-काचसज्ञित" (सु० उ० ७ अ०) इति। नेत्राणा पटलभेदादपि तृतीयपटलगत काचमित्युच्यते, यत,—"तृतीये पटले काच चतुर्थे नीलिकाह्वयम्" इत्यादि। एके तिमिरादीना निदानपरम्परयाऽवस्था दर्शिता, तथा हि—'तिमिर रागता याति राग काचत्वमेव च। काचात् सञ्जायत नीलो तदाऽन्धो जायते नर ॥" इति। अत एवाह माधव —* "साध्यमप्यक्षिराग स्यात तिमिर हि क्रियावत। याप्य सम्याप्य राग स्याद्दर्ज्य पटलता गतम्॥" इति। पटलाना कथन दृष्टिगतरोगे दर्शयिष्याम। षड्विधत्वमस्य दोषविशेषाद्भवति यदाह विदेह,—"यथास्व रज्यते दृष्टिर्दोषैस्त्वक्पटलास्थते। चतुर्थपटलप्राप्तैर्मण्डल रज्यते तु ते ॥" इति। एकजातीयतया क्वचित् पटलगताना रोगाणा तिमिरकाचनीलिकासज्ञिताना दोषभेदा षट्सङ्ख्या एव बोद्धव्या. तेषा स्वरूप वक्ष्यमाणतिमिरे दर्शयिष्याम। रागोऽपि तन्त्रान्तरे षड्विध प्रतिपादित दोषविशेषभेदात्, प्रसङ्गतोऽपि तानाह, तथा हि—'रागाऽक्ष्णो मारुतज, प्रादुष्टा स्त्रायो च नीलश्च तथैव पित्तात। कफात सित श्लेष्मजत, सरक्त सन्नक्त-दोषप्रभवो विचित्र ॥" (रो० वि० नेत्रदृष्टि०) इति। अत्रापि तिमिरसम्बन्धि परिस्त्रायि षष्ठ ज्ञातव्यम्। तिमिराणीति।—तिमिरन्तु दृष्टिनाशस्य मूलमिति

(वा० उ० १० अ०), किञ्च शिरासङ्गो वाग्भटेन नेत्रशुक्लगते पठित, सौश्रुतः; अक्षिपाकात्ययस्तु कृष्णमण्डलगत इत्यपि सुधीभिर्द्रष्टव्यम्।

* श्लोकोऽय माधवसङ्ग्रहे कुत्रापि न दृश्यते।

संसर्गेण च रक्तेन षष्ठं स्यात् सन्निपातत. ॥ १६४ ॥

प्रसिद्धम, यदुक्त—"मूल दृष्टिविनाशस्य तिमिर समुदाहृतम्। ऋषिभिस्त्वरितं तस्मात् तस्य कुर्य्याच्चिकित्सितम ॥" इत्यादि। तस्मात्तदेव तिमिर पटलेषु दोषवर्णभेदेन रागकाचनीलिकादिसज्ञ भवति, तत् पूर्वं दर्शितमेव। तदेतच्च नानारूप भवति नानाकृतिरूपदर्शनात्, "एकदेशे तु यो दोषो दृष्ट्वा तिष्ठति पीडित। यत्स्थान स भवति तादृश्य तेन पश्यति ॥" इति। एकद्वित्रिचतुष्पटलगतलिङ्गानि साधवसङ्ग्रहे ज्ञातव्यानि, ग्रन्थगौरवभयान्नात्र लिखितानि। षड्विधस्तु रूपभेदो लिख्यते, यथा—"तत्र वातेन रूपाणि भ्रमन्तीव च पश्यति। आविलान्यरुणाभानि व्याविद्धानीव मानव ॥" (सु० उ० ७ अ०) इति। पित्तेन रूपमाह—"पित्तेनादित्यखद्योतग्रहचापतडिद्युवान्। नृत्यतश्चैव गिखिन सर्वं नीलञ्च पश्यति ॥" (रो० वि० नेत्रदृष्टि०) इति। कफेन रूपमाह—"कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च। पश्यदसूक्ष्माण्यल्पं व्यभ्रमेवाभ्रसम्प्लवम् ॥ सालसलावतानीव परिजाद्यानि मानव ॥" (रो० वि० नेत्रदृष्टि०) इति। कोऽपदन्यथा कफलक्षणानि पठितानि, यदुक्त—"गौरचामरगौराणि श्वेताभ्रप्रतिमानपि। यत्र पश्येदसूक्ष्माणि लक्षाण्येवाभ्रसम्प्लवम्" इति। सर्गरूपमाह, संसर्गोऽत्र पित्तरक्तयो कथित, तेन तल्लाभे परिस्राविसज्ञ तिमिर सर्गशब्देनाह, तथा चोक्त—"पित्त कुर्य्यात् परिस्रावि मूर्च्छित रक्ततेजसा। पीता दिशस्तु खद्योतान् भास्करञ्चापि पश्यति ॥ विकीर्य्यमाणान् खद्योतैश्चाक्षेत्रोभिरेव च ॥" (रो० वि० नेत्रदृष्टि०) इति। परिस्राविलिमिरे लक्षणान्तरमप्याह—*"अरुण मण्डल दृष्ट्वा स्थूलकाचारुणप्रभम्। परिस्राविनि रोगे स्यात् स्रावि नालञ्च मण्डलम् ॥" (रो० वि० नेत्रदृष्टि०) इति। मिलितरक्तापित्तास्थाभिप्रेत्येक, यदुक्त—'विदधाति परिस्राविं पित्त रक्तेन सङ्गतम्। तत पीता दिश पश्येदुद्यन्तमिव भास्करम् ॥" इत्यादि। रक्तेन रूपमाह—"पश्येद्रक्तानि रक्तेन विविधानि तमांसि च। हरितान्यथ कृष्णानि पीतान्यपि च मानव ॥" इति। सान्निपातेन

* अरुणमित्यादि लक्षण वातिकस्य रागस्य न तु परिस्राविन, तथा च मधुकोष, —"उद्दिष्टलक्षणेन वातिकपैत्तिकरागस्यैव विशिष्टलक्षणमाह, अरुण मण्डलमित्यादि। परिस्रावीत्यादिना परिस्रावियो विशिष्टलक्षणम्। अत्र गदाधरस्तु 'रक्तज मण्डलं दृष्ट्वा स्थूलकाचानलप्रभम्' इति पठित्वा एतदपि परिस्रावियलक्षणमाह—" इत्यादि।

लिङ्गनाश. सप्तधा स्यात् वातात् पित्तात् कफेन च।
त्रिदोषैरुपसर्गेण ससर्गेणागुजा तथा ॥ १६५ ॥

रूपमाह—'सन्निपातेन चिराणि विप्लुतानीव पश्यति। बहुधा च द्विधा वाऽपि सर्वाण्येव समन्तत ॥ हीनाधिकाङ्गान्यथवा ज्योतींष्यपि च मानव' ॥"(सु० उ० ७ अ०) इति। लिङ्गयते ज्ञायतेऽनेनेति लिङ्गशब्देन दृष्टिरुच्यते, तस्य नाशो लिङ्गनाश, यदुक्त—*"रूपाणां लिङ्गनाशाल्लिङ्ग तन्नाशो लिङ्गनाशक" इत्यादि। नाशस्तु तिमिरेणैव दृष्टे सर्वतोऽवरोधात् प्रतिपादित, तथा हि—"तिमिराख्य स वै दोषस्तृतीयं पटलं गत। कृत्स्नां हि सर्वतो दृष्टि लिङ्गनाशमत परम् ॥ अस्मिन्नपि तमोभूते नातिरूढे महागदे। चन्द्रादित्यौ सनक्षत्रावम्बरीक्षे च विद्युत। निर्मलानि च तेजांसि भास्वराणि च पश्यति ॥" (सु० उ० ७अ०) इति। वातादिदोषभेदाः षट् ये तिमिरे दर्शितास्ते एवात्रापि ज्ञातव्या इत्येके, एकपटलगतदोषसाधर्म्यात्। अन्ये तु वक्ष्यमाणमण्डलगतलक्षणान्न मन्यन्ते, तान्यस्यैवाग्रे लिखितानि। सप्तमो भेदस्तु ससर्ग कथयत, स तु बाह्यगताभ्यां निमित्तानिमित्तागन्तुकभेदाभ्यां द्विधा भवति, तदयथा—"बाह्यो पुनर्द्विविध सम्प्रदिष्टो निमित्ततश्चाप्यनिमित्ततश्च" (सु० उ० ७ अ०) इत्यादि। तत्र निमित्ततो द्विधा, एक शिरोऽभितापात् भवति, अपरो लगुडादीनामभिघातनिमित्त, यत,—"निमित्ततस्तत्र शिराऽभितापात् स्रोतस्त्वभिष्यन्दनिदर्शनैश्च" (सु० उ० ७अ०) इत्यादिवचनात् शिरोऽभि सर्वतन्त्रोक्तो यत्र स शिराऽभिताप, स तु विषकुसुमादिगन्धवाहिपवनस्पर्शनाद, तेन नस्तःक्रोधघातान्नेत्रगतरक्तप्रकोप दृष्टिग्रहेरपि व्याघात। अभिघातनिमित्तजमाह—"विदीर्यते सीदति क्षीयते वा नृणामभीघातहता च दृष्टि" (सु० उ० ७अ०) इति। निमित्तजो यथा—"सुरर्षिमन्यर्वमहीरजाणां सन्दर्शनेनापि च भास्करस्य। इत्येत दृष्टिर्मनुजस्य यस्य स लिङ्गनाशस्त्वनिमित्तसज्ञ ॥ तथाचि विस्पष्टमिवावभाति वैदूर्यवर्णा विमला च दृष्टि ॥' (सु० उ० ७अ०) इति। ननु विमलत्वनेन दोषजनिततिमिररागकाचादिरहिता दृष्टिर्भवति, तत् कथ भौतिकेन्द्रियमदूषयत्त एव शक्तिमुपघ्नान्ति, यदुक्त चरके—"दैवादयो भौतिकेन्द्रियमदूषयत्त एव शक्तिमुपघ्नन्ति, यदुक्त चरके—"दैवादयोऽष्टौ हि महानुभावा न दूषयत्त पुरुषस्य देहम्। विश्लेष्यदृश्यान्तरसा यथैव छायातपौ दर्पणसूर्यकान्तौ ॥" (च० वि० उन्माद०) इति। लिङ्गनाशोऽपि कालादिना

---

* रूपाणां ज्ञानजननात् रूपाणां ग्रहणादिति वा पाठ सङ्गत, लिङ्गनाशात् लिङ्गम् इत्यस्य निरर्थकत्वात्।

अष्टधा दृष्टिरोगाः स्युस्तेषु पित्तविदग्धकम्।
अम्लपित्तविदग्धञ्च तथैवोष्णविदग्धकम् ॥ १६६ ॥

वातादिदोषस्येव चयात् कदाचिद्दर्शन भवतीत्याहुरेके, यत,—"दोषचयात् कदाचित् स्यात् क्षय तव च दर्शनम्" (सु० उ० ७अ०) इति। अन्ये कर्मसञ्चारित (१)-वातादिदोषचयादित्याहु। तेषामेव मण्डलगतराग केषाञ्चित् ज्ञापनार्थं लिख्यते; यथा—"कृष्ण मण्डल वाताच्चल पक्ष्म तथा। पित्तात् मण्डलमानील काक्षाभ पीतमेव च॥ श्लेष्मणा बहल स्निग्ध शुक्लकृष्णेन्द्रपाण्डरम। चलत्यप्यचलाग्रस्थ शुक्लो बिन्दुरिवाक्ष्णि॥ सङ्कुचत्यातपेऽत्यर्थं छायाया प्रसरत्यपि। क्षयमाने च नयने मण्डलं नश्यति॥" (सु० उ० ७अ०) इति। रक्तजमाह—"प्रवालपद्मपत्राभं मण्डल शोणितात्मकम्। दृष्टिरागी भवेच्चिरो लिङ्गनाशे विदोषजे॥" (सु० उ० ७अ०) इत्यादि। वैद्यविषयनिमित्त कथ्यते, "वैद्य एष कफात्मक" इत्यादिवचनात्। अष्टधेति—दृष्टिमण्डलगता रोगा कथिता। दृष्टिप्रमाणन्तु सुश्रुतेनोक्तम्, तद्यथा—"मसूरदलमात्रान्तु पञ्चभूतप्रसादजाम्" (सु० उ० ७अ०) इति। मसूराङ्ग-दलमात्रामित्यभिप्राय, निमित्याह—"पञ्चभूतात्मिका दृष्टिर्मसूराङ्गदलोन्मिति" इति। तस्या चत्वारि पटलानि सन्ति, रसरक्षामय वाह्य द्वितीय मासमेदोमय तृतीय मेद समयं चतुर्थं कालकाख्यसञ्ज्ञितम इति, तदुक्त सुश्रुते—"तेजोजलाधिक वाह्य तेष्वन्यत पित्तिताधिकम्। मेदस्तृतीय पटलमाधिक त्वस्थि चापरम॥" (सु० उ० ७अ०) इत्यादि। तेष्वादौ पित्तविदग्धमाह—दुष्टेन पित्तेन विदग्धदृष्टिभवति, यदुक्त—"पित्तेन दुष्टेन सदा तु दृष्टि पीता भवेत् यस्य नरस्य किञ्चित्। पीतानि रूपाणि च मन्यते य स मानव पित्तविदग्धदृष्टि॥" इति। अम्लपित्तविदग्धमिति—अम्लपित्ते वमनविषयत्वात् दृष्टेरभिघात, वमनन्तु कफ विना न सम्भवति तस्मात् कफस्यान्तरोक्ता श्लेष्मविदग्धदृष्टिरियम तदुक्त—"तथा नर श्लेष्मविदग्धदृष्टिस्त्वेव शुक्लानि च मन्यते स" (सु० उ० ७अ०) इति। यद्यपि दाहशक्तिकत्वात् श्लेष्मणि कफाम्लसञ्ज्ञेति

---

* वाग्भटोक्तेनानेन अम्लपित्तविदग्धेन सह श्लेष्मविदग्धदृष्टे लक्षणसाम्य किमपि नास्ति, तच्च सरक्तपित्तदोषजन्य चिकित्साऽपि तस्य न वमनमाश्या, तथा च—"भ्रम-मक्ष्णोरनाहर्षे सादैर्या दृष्टिराचिता। सक्लेदकण्डूकलुषा विदग्धाम्लेन सा मृता॥" (वा० उ० १२अ०)। "धूमकाल्यास्लपित्तोष्णविदाहि क्षीर्णमपिषा। स्निग्ध विरेचयेत् क्षीणे; क्षीणैर्दिग्धाम्ल सृष्टत;॥" (वा० उ० १३अ०) इति।

नकुलान्ध्य धूमरान्ध्य रात्र्यान्ध्यं क्रमवृष्टिकः।
गम्भीरदृष्टिरित्येते रोगा दृष्टिगता मता॥ १६७॥

व्याख्यानयन्ति (१)। उष्मविदग्धकमिति—" उष्म घर्मादिक, तेन विदग्धदृष्टिर्भवति, अत एव तल्लान्तरे दिवान्ध्य कथित, "प्राप्ते तृतीय पटलेतु दोषे दिवा न पश्येन्निशि वीक्षते च। रात्रौ स शीतानुगृहीतदृष्टि पित्तात्यभावादपि तानि पश्येत॥" (सु० उ० ७अ०) इति। नकुलान्ध्यमिति—नकुलस्य दृष्टि यथा प्रतिभासते वर्णेन तथा अस्येत्यर्थ, तथा हि—"विद्योतते यस्य नरस्य दृष्टिर्दोषाभिपन्ना नकुलस्य यद्वत। चित्राणि रूपाणि दिवा स पश्येत स वै विकारी नकुलान्ध्यसज्ञ॥" (सु० उ० ७अ०) इति। दिवा स पश्येदित्युक्तत्वात् रात्रौ न पश्यतीत्यवगन्तव्यम्। धूमरान्ध्यो धूमदर्शी कथित, यता धूमाकुलान् सर्वभावान् पश्यति, यदुक्त—"शोक ज्वरायासशिरोऽभितापैरभ्याहता यस्य नरस्य दृष्टि। धूमास्तथा पश्यति सर्वभावान् स धूमदर्शीति नर प्रदिष्ट॥" (रो० वि० नेत्रदृष्टि०) इति। दिवा धूमान् पश्यति, न तु रात्रौ, पित्तस्य क्षीणत्वात् इति व्याख्यानयन्ति। † रात्र्यान्ध्यमिति—रात्र्यान्ध्य प्रसिद्धम्, तद्यथा—"विषु स्थितोऽन्य पटलेषु दोषो नक्तान्ध्यमापादयति प्रसह्य। दिवा स सूर्यानुगृहीतदृष्टि पश्येत्तु रूपाणि कफात्यभावात॥" (सु० उ० ७अ०) इति। क्रमवृष्टिक इति—क्रमरूपदर्शनात् क्रमवृष्टिक, यत,—"यो क्रमजाड्यो दिवसेषु कृच्छ्रात् क्रमाणि रूपाणि च तेन पश्येत" (रो० वि० नेत्रदृष्टि०) इति। अत्र पोतो रागो दृष्टिमध्यगत, यदुक्त—"दृष्टिमध्यस्थिते दोषे मक्षिकाश्वच पश्यति। रात्रौ पित्तात्यभावत्वात तानि रूपाणि पश्यति॥" इति। गम्भीरदृष्टिरिति—यद्दृष्टिरभ्यन्तरत सङ्कुच्य विरूपा भवति, तद्यथा—"दृष्टिर्विरूपा श्वसनोपसृष्टा सङ्कुचनेऽभ्यन्तरतश्च याति। रूजावगाढा च तमस्विरोग गम्भीरिकेति प्रवदन्ति तज्ज्ञा॥" (सु० उ० ७अ०) इति। एते दृष्टिगता रोगा दर्शिता॥ १६२—१६७॥

* उष्मविदग्धस्य लक्षण वाग्भटे यथा दृश्यते, तेन उष्मविदग्धदृष्टिनिमान्ध्य एव भवति, न तु दिवान्ध्य, तथा च—"उष्मणाक्षस्य सहसा शीतवारिनिमज्जनात। विदोष रक्तसम्पृक्तो वाष्पमाहँ ततोऽक्षिणी॥ दाहोषे मलिन शुक्लनक्तान्ध्यमखिलदर्शनम्। रात्रान्ध्यञ्च जानीत विदग्धोष्णेन सा क्षुता॥" (वा० उ० १२अ०) इति। दिवान्ध्य पित्त विदग्धदृष्टेरेव अवस्थान्तरमात्रम्, एतस्य प्रमाणादिक विस्तारभयादत्र न प्रदर्शित, नेत्रदृष्टिगतरोगाधिकारे पित्तविदग्धदृष्ट्याख्याने मधुकोषो द्रष्टव्य।

† अस्यैव रात्र्यान्ध्यस्य अवस्थाविशेष, श्लेष्मविदग्धदृष्टिरिति मधुकोषनिबन्धसङ्गृहीतो।

तत्र षोडशनेत्रसर्वगतरोगाणां विवरणम्।—

अभिष्यन्दाश्च चत्वारो रक्ताद्दोषैस्त्रिभिस्त्रिधा।
चत्वारश्चाधिमन्थाः स्युर्वातपित्तकफात्मकाः॥ १६८॥

अभिष्यन्दाश्चेति।—सर्वनयनरोगहेतुत्वात सर्वनयनगतोऽभिष्यन्द इति, यत सुश्रुते सर्वनेत्रगता सप्तदश गदिता, तद्यथा—चत्वारोऽभिष्यन्दाश्चत्वारोऽधिमन्था नेत्रपाकादयो नव इति। अत्र चिकित्साविशेषदोषविशेषभेदाच्च पृथक् लिखितो न दोष। ससरक्तपाकान्वितोऽभिष्यन्दरोग, स चतुःप्रकारो भवति दोषभेदेन, तेषु वाताभिष्यन्दमाह, वाताभिव्याप्ते नेत्रे दुष्टलक्षणानि लक्षणानि भवन्ति, तद्यथा—"निस्तोदनस्तब्धनयनरोमहर्षसङ्कर्षपारुष्यशिरोऽभितापा। विशुष्कभाव शिशिरासुता च वाताभिपन्ने नयने भवन्ति॥" (सु० उ० ६अ०) इति। पित्तजमाह, तद्यथा—"दाहप्रपाकौ शिशिराभिनन्दा धूमायनं वाष्पसमुच्छ्रयश्च। उष्णासुता पीतकनेवता च पित्ताभिपन्ने नयने भवन्ति॥" (सु० उ० ६अ०) इति। कफजमाह,—"उष्णाभिनन्दा गुरुताऽक्षिजीथ कण्डूपदेहावतिशीतता च। स्रावी मुहु पिच्छिल एव चापि कफाभिपन्ने नयने भवन्ति॥" (रो० वि० नेत्रसर्व०) इति। रक्ताभिष्यन्दमाह—"ताम्रासुता लोहितनेवता च राज्य समन्तादतिलोहितायः। पित्तस्य लिङ्गानि च यानि तानि रक्ताभिपन्ने नयने भवन्ति॥" (सु० उ० ६ अ०) इति। अप्रतिक्रियमाणत्वात् दुष्टैरभिष्यन्दैरेव चत्वारोऽधिमन्था जायन्ते, तथा हि—"दुष्टैरेतैरभिष्यन्दैर्नराणामक्रियावताम्। तावत्स्वधिमन्था स्युर्नयने तीव्रवेदना॥" (सु० उ० ६ अ०) इति। शिरसोऽर्द्धवेदनाजनकत्वाच्चाभिष्यन्दतो भिन्न सङ्गृहीत, यदुक्तम्—"उत्पाट्यत इवात्यर्थ नेत्र निर्मथ्यते तथा। शिरसोऽर्द्धञ्च तं विद्यादधिमन्थं सलक्षणै॥" (सु० उ० ६ अ०) इति। न केवल तीव्र वेदनादिकारित्वात भिन्न एव, अपि तु दृष्टिनाशकत्वादिति, तथा चोक्त—'दृष्ट्वादृष्टि श्लैष्मिक सप्तरात्रादधिमन्थो रक्तज पञ्चरात्रात्। षड्रात्राद्वा वातिको वै निहन्या-न्मिथ्याचारात् पैत्तिक सप्त एव॥" (रो० वि० नेत्रसर्व०) इति। कालावधिरेव व्याधि-स्वभावाल्लङ्घनप्रलेपनादिविधानार्थमञ्जनादिनिषेधार्थञ्च। तन्त्रान्तरेऽपि सामनिरामनेत्र-रोगविषयत्वाडेयोपादेयत्व प्रतिपादितम्, तद्यथा—'स्वेद प्रलेपक्लिन्नाक्ष धूमो दिन-चतुष्टयम्। लङ्घनञ्चाधिरोगाणामामाना पाचनानि षट्॥ अञ्जन सर्पिष पान कषाय गुरुभोजनम्। नेत्ररोगेषु सामेषु स्नानञ्च परिवर्जयेत॥" इति। सामनिरामलक्षणं प्रसङ्गतो लिख्यते, यथा—"उदीर्णवेदन नेत्र रागशोथसमन्वितम्। घर्षनिस्तोदगुरुताश्रु-

सर्वाक्षिरोगाश्चाष्टौ स्युस्तेषु वातविपर्य्ययः।
अल्पशोफोऽन्यतोवातस्तथा पाकात्यय स्मृतः॥ १६८॥

युक्तमामान्वित विदु॥"(रो० वि० नेत्रसर्व०) इति। निरामलक्षणमाह—"मन्दवेदनता कण्डू सरुग्राश्रुप्रशान्तता। प्रशस्तवर्णता चाक्ष्णो सम्यक् दोषमादिशेत्॥" (रो० वि० नेत्रसर्व०) इति। वातपित्तकफरक्तलक्षणान्यत्राभिष्यन्दोक्तानि च बोद्धव्यानि। सर्वाक्षिव्यापकत्वात सर्वाक्षिग्रहण, न चैकदोषसम्भवत्वात। अक्षिप्रमाणन्तु सुश्रुतेनोक्तम्, यथा—"विद्याद्दाङ्गलबाहुल्य खाङ्गुष्ठोदरसम्मितम्। द्व्यङ्गल सर्वत सार्द्ध भिषङ्नयनबुद्बुदम्॥ मुक्त्त गोलकाकार सर्वभूतगुणोद्भवम्॥" (सु० उ० १ अ०) इत्यादि। अष्टाविति—अष्टभेदा। तेष्वादौ वातविपर्य्ययमाह पर्य्यायेण क्रमेण कदाचिच्चक्षुषो कदाचिच्छोचनयोर्वायुस्त्रीव्रुजा यत्र करोति स वातविपर्य्यय, यदुक्त—* "वार वारञ्च पर्य्यात भ्रुवौ नेत्रे च मारुत। रुजञ्च विविधाकारां ज्ञेयो वातविपर्य्यय॥" (रो० वि० नेत्रसर्व०) इति। अल्पशोफ इति—अल्पशोफो नेत्रपाकभेद, स च शोथरहित इत्यर्थ, यतो नेत्रपाको द्विधा भवति एक शोथज अपरस्त्वशोथज इति, तथा चोक्त—"कण्डूपरीहाश्रुयुत पक्वोडुम्बरसन्निभ। सरुग्री पच्यते यस्तु नेत्रपाक स शोथज॥ शोथहीनानि लिङ्गानि नेत्रपाके त्वशोथजे॥" (सु० उ० ६अ०) इति। अन्यतोवात इति—यथा—"यस्यावटुकर्णशिरोहनुस्थो मन्यागतो वाऽप्यनिलोऽन्यतो वा। कुर्य्याद्रुज वै भ्रुवि लोचने च तमन्यतोवातमुदाहरन्ति॥" (सु० उ० ६ अ०) इति। अन्यतो वेत्यनेनोक्तप्रदेशादितरत्र पृष्ठे, अन्यत्र वातस्य कारणस्यावस्थानम्, अन्यत्र लोचने भ्रुवि च रुजा करोतीति अन्यतोवात। विदेहैरप्युक्त—"मन्यानामन्तरे वायुरुत्थित पृष्ठतोऽपि वा। करोति भेदं निस्तोद शङ्खे चाक्ष्णोर्भ्रुवोस्तथा॥ तमाहुरन्यतोवात रोग दृष्टिविदो जना॥" इति। पाकात्यय इति—यद्यपि † सुश्रुतेऽक्षिपाकात्यय

* वाग्भटे वातविपर्य्ययो दृश्यते, परन्तु सुश्रुतादुक्त-वातपर्य्यायेण सह तस्य सर्वथा लक्षणसाम्य नास्ति, तथा च—"तदन्नेत्र भवैज्जिह्मभून वातविपर्य्ययै" (वा उ०१५ अ०) वाग्भटोक्तेनानेन लक्षणेन सह "वार वारञ्च—" इत्यादि लक्षणस्य भूनेत्रयो रुजाव्यतिरिक्त साम्य नास्ति। वाग्भटोक्तस्य तदत इत्यस्य अन्यतोवात इव इत्यर्थ। सुश्रुते वातपर्य्याय इति नाम। "ज्ञेयो वातविपर्य्यय" इत्यत्र "स ज्ञेयो वातपर्य्यय" इति माधवधृतपाठ।

† अयमक्षिपाकात्ययो वाग्भटेनापि सर्वाक्षिरोगविज्ञाने पठित, मन्ये, सुश्रुतोक्त-क्षणमण्डलगताक्षिपाकात्यय अयञ्च सर्वगताक्षिपाकात्यय नैकविध, उभयोर्लक्षण-वैषम्यात्, तथा च—"पाकोऽन्यैर्लक्षणैस्तथा। अक्षिपाकात्यये शोफ. सरुग्र. कलुषा-

तथा शुष्काक्षिपाकश्च शोफोऽध्युषित एव च।
हताधिमन्थ इत्येते रोगाः सर्वाक्षिसम्भवाः ॥ १७० ॥

क्लेष्मभागगतरोगे पठितलक्षणाऽत्र सवासितमण्डलव्यापकत्वेन तीव्ररुजाकरत्वेन च शार्ङ्गधरेण सवाक्षिगतरोगे पठितो न दोष, तद्यथा—'सक्काद्यत श्वेतनिभेन सर्वदोषेण यत्सासितमण्डलन्तु। तमक्षिपाकात्यमक्षिकोप-समुत्थित तीव्ररुज वदन्ति॥" (सु० उ० ५अ०) इति। शुष्काक्षिपाक इति—शुष्केणाक्षिपाकेनोपहतमक्षि यत्र भवति, तथा हि—"यत कूणित दारुणरूक्षवर्त्म सन्दह्यते चाक्षिदर्शन यत। सुदारुण यत प्रतिबोधने च शुष्काक्षिपाकोपहत तदक्षि॥" (रो० वि० नेत्रसर्व०) इति। अथ रोग सरक्तवातजन्य यदाह कराल,—"कूणित खरवत्माक्षि क्लेष्मोन्मीलाविलेक्षणम्। सदाह सास्रगो वाताच्छुष्काक्षिपाकान्वित वदत॥" इति। शोफ इति—शोफश्चात्र पाकभेद, सशोथजनेत्रपाक इत्यर्थ, यत सुश्रुतेऽपि द्वावधोऽक्षि पाक, तद्यथा—"अन्तास्तु चत्वार इहोपदिष्टास्तावन्त एवेह तथाऽधिमन्था। शोफान्वितोऽशोफयुतश्च पाकावित्येवमेते दश सम्प्रदिष्टा॥" (सु० उ० ६ अ०) इत्यादि। अस्य लक्षण कथिताल्पशोथे दर्शितम्। अध्युषित इति—अक्लेदोजनोत्पत्तिकत्वादक्ष्याध्युषित इति प्रसिद्धम्, यदुक्त—"श्लाव लोहितपर्यन्त सर्वक्षाक्षि प्रपच्यते। सदाहशोथ सास्रावनक्ष्माध्युषितमक्षत॥" (रो० वि० नेत्रसर्व०) इति। हताधिमन्थ इति—सकलनयनशोथकत्वाद्धताधिमन्थ, यत,—"उपेक्षणादक्षि यदाधिमन्था वातात्मक सादयति प्रसह्य। रुजाभिरुग्राभिरसाध्य एष हताधिमन्थ खलु नाम रोग॥" (रो० वि० नेत्रसर्व०) इति। अथ रोगो दृष्टिनिर्गमलक्षणो विहित इति कोचत, तद्यथा—"अन्तर्गत शिराणान्तु यदा तिष्ठति मारुत। स तदा नयन प्राप्य शीघ्र दृष्टि निरस्यति॥ तस्या निरस्यमानाया निमथ्नन्निव मारुत। नयन निर्वर्तयत्याशु शूलतोदाधिमन्थकै॥" इत्यय दृष्टिनिर्गमलक्षण। नैव, सकलाक्षिशोथो मन्थ इत्युक्तत्वात् सर्वोक्तशोथे सर्वसम्मतत्वात् प्रतीत, यदुक्तमन्यत्रापि—"अथवा शोथवेदक्षि क्षोभतेऽतीवलादयम्। तत पद्ममिव सुष्क मवसीदति लोचनम॥ हताधिमन्थ त विद्यादसाध्य वातकोपत॥" इति। एव चतुर्नवतिनेत्ररोगा एकादशस्थानविशेषेण व्याख्याता॥ १६८—१७०॥

श्रुता॥ कफोपहितसंसर्गात् सित प्रक्लेदरागवत्। दाहो दर्शनसरोधो वेदनाश्चानवस्थिता॥" (वा० उ० १५अ०) इति। टीकाकारेणानेन यत समाधानमुक्त तन्न श्लेष्म लक्षणवैषम्यस्य स्फुटत्वादिति।

पञ्चविधक्लैब्यानां विवरणम्।—

पुंस्त्वदोषास्तु पञ्चैव प्रोक्तास्तत्रेर्ष्यक स्मृतः।
आसेक्यश्चैव कुम्भीक सुगन्धी षण्ढसञ्ज्ञितः॥१७१॥

पुंस्त्वेति।—पुंस्त्वदोषो नपुंसकशब्दवाच्य, स च पञ्चप्रकारो भवति। तत्रेर्ष्यकमाह—अन्यव्यवाय दृष्ट्वा व्यवायि प्रवर्त्तते य स ईर्ष्यक, यदुक्त—"दृष्ट्वा व्यवायमन्येषा व्यवायि य प्रवर्त्तते। ईर्ष्यक स तु विज्ञेय—॥" (सु० शा० २अ०) इति। दृग्योनिरपीष्यकापरपर्य्याय। अत्रापि तन्त्रान्तरे पठितो हेतुर्यथा—"ईर्ष्याभिभूता वपि मन्दहर्षावीर्य्यातरेव वदन्ति हेतुम्" (च० शा० अतुल्यगोत्रीय०) इति। आसेक्य इति—य स्वभार्य्याया योन्यादिक स्पृष्ट्वा सङ्कल्पपूर्वक प्रवर्त्तते स आसेक्य। सुश्रुते तु, शुक्र प्राप्य ध्वजाद्यै लभते य स आसेक्य कथित, तदुक्त—"पिच्छिलस्त्वल्पौष्यत्वादासेक्य पुरुषो भवेत। स शुक्र प्राप्य लभते ध्वजोच्छ्रायमसशयम्॥" (सु० शा० २अ०) इति। अत एवासेक्यनामाऽय षण्ढो सुखयोन्यपरपर्य्याय कथित। कुम्भीक इति—य पुरुष स्वकीयपायौ अन्यपुरुषपाश्चात व्यवाय कारयित्वा पश्चात् स्त्रीषु विषये पुमानि प्रवर्त्तत स कुम्भीक, सुश्रुत—"स्वे गुदेऽन्यङ्गव्यवाय य स्त्रीषु पुमान प्रवर्त्तत। कुम्भीक स तु विज्ञेय—॥" (सु० शा० २अ०) इति। गुदयोनिरय कुम्भीकापरपर्य्यायनाम्ना कथित। अस्योत्पत्तिहेतुश्च तन्त्रान्तरे वर्णित, यथा—"मातुर्व्यवायप्रतिषेध वक्री स्याद्वीजदौर्ब्बल्यतया पितुश्च" (च० शा० अतुल्यगोत्रीय०) इत्यादि। गर्दभास्तु कुम्भीकोत्पत्तिहेतौ काश्यपोक्त श्लोकमाह, यथा—"अरजस्का यदा नारी श्लेष्मरेता व्रजेद्यदा। अन्यसक्ता भवेत् प्रीतिर्जायते कुम्भिकस्तदा॥" इति। सुगन्धीत—यो योन्यादिगन्धमाघ्राय ध्वजबल लभते स सुगन्धीति नाम षण्ढ कथित, यदुक्त—"य पूतियोनौ जायेत स सौगन्धिकसज्ञित। स योनिशेफसोर्गन्धमाघ्राय लभते बलम्॥" (सु० शा० २अ०) इति। अय सौगन्धिकोऽपि नासायोन्यपरपर्य्याय। षण्ढसञ्ज्ञित इति—य पुमान् स्त्र्याकृति स्त्रीचेष्टितश्च स्त्रीवदधोभूत स्वमेढ्रपोर्ह्वप्रदेशे अपरपुरुषात वीर्य्यच्युति कारयति स षण्ढ, उत्पत्तिविषयत्वात (१), यदुक्त—"यो भार्य्यायास्तनौ मोहादङ्गनेव प्रवर्त्तते। तत स्त्रीचेष्टिताकारी जायते षण्ढसज्ञित॥" (सु० शा० २अ०) इति। अय षण्ढस्त्वरेता कथित, ईर्ष्यकादयस्त्वरेत स इत्युक्तत्वात्, तथा हि—"आसेक्यश्च सुगन्धी च कुम्भीकश्चेर्ष्यकस्तथा। सरेतसस्त्वमी ज्ञेया अयुक्त षण्ढसज्ञित॥" (सु० शा० २अ०) इति॥ १७१॥

अष्टविधशुक्रदोषाणां विवरणम्।—

शुक्रदोषास्तथाऽष्टौ स्युर्वातात् पित्तात् कफेन च।
कुणपत्वास्रपित्ताभ्यां पूयाभं श्लेष्मपित्ततः॥ १७२॥
क्षौणञ्च वातपित्ताभ्यां ग्रन्थिलं श्लेष्मवाततः।
मलाभं सन्निपातेन शुक्रदोषा इतीरिताः॥ १७३॥

अष्टविधार्त्तवदोषाणां विवरणम्।—

अथ स्त्रीरोगनामानि प्रोच्यन्ते पूर्वशास्त्रतः।

शुक्रदोषा इति।—दोषैर्दुष्टं शुक्रं शुक्रदोष इत्युच्यते, तद्युक्ता पुरुषा गर्भोत्पादने न क्षमा इति * प्रयोजनं सुश्रुतवचनात्, यत,—"वातपित्तश्लेष्मकुणपग्रन्थिपूतिपूयक्षौणमूत्रपुरीषरेतसः प्रजोत्पादने न समर्था भवन्ति" (सु० शा० २अ०) इति। तत्र शुक्रं यदरुणकृष्णवर्णं भवति तीदनभेदनविशेषान्वितञ्च भवति तत वातदुष्टम्। पित्तदुष्टन्तु पीतनीलादिवर्णान्वितम् औषचोषवेदनाविशेषयुक्तञ्च। श्लेष्मदुष्टञ्च श्वेतवर्णं कण्डूादिवेदनान्वितञ्च। कुणपत्वास्रपित्ताभ्यामिति—कुणप शव, तस्येव गन्धो यस्य शुक्रस्य भवति, सोऽपि रक्तेन पित्तेन भवति, अस्रञ्च भवति, चकारात् शोणितवर्णं पित्तवेदनञ्च। सुश्रुते त्वयं रक्तज, यत,—"कुणपगन्धमस्रञ्च रक्तेन" (सु० शा० २अ०) इति। अत्र रक्तेनेति व्यपदेशो घृततैलदधिवत्, यतो रक्तस्यापि दोषा एव दूषयितारः, तेनात्रास्रपित्ताभ्यामिति ग्रहणं न दोषः। पूयाभं श्लेष्मपित्तत इति—पित्तश्लेष्मभ्यां यत दूषितं तत् पूयसदृशं शुक्रं भवति, वर्णवेदनाभ्यां मिलितश्लेष्मपित्तयोरेव बोद्धव्या। क्षौणञ्च वातपित्ताभ्यामिति—कारणे स्खलनाटल्यीभूतम्, लक्षणञ्च यथा—"दौर्बल्यं मुखशोषश्च पाण्डुत्वं सदनं भ्रमः। क्लैव्यं शुक्राविसर्गश्च क्षौणशुक्रस्य लक्षणम्॥" (च० सू० कियन्तः शिरसीय०) इति। ग्रन्थिलं श्लेष्मवाततः इति—ग्रन्थिसदृशं ग्रन्थिलं, तत श्लेष्मवातजनितं भवति। अत्रापि द्विदोषवर्णवेदना बोद्धव्या। मलाभं सन्निपातेनेति—मलं मूत्रपुरीषं, तदाभं तद्वर्णि च यत् शुक्रं भवति तत सन्निपातदूषितम्, सुश्रुतेऽपि—'मूत्रपुरीषगन्धि सान्निपातेन" (सु० शा० २अ०) इति। इति पूर्वोक्तप्रकारेण शुक्रदोषा इरिताः कथिताः॥ १७२।१७३॥

अथ स्त्रीरोगेत्यादि।—स्त्रीषु भवा रोगा स्त्रीरोगाः, न तेषां पुरुषेषु सम्भवत्वात्।

---

* "प्रयोजनम्' इति पाठे अर्थासङ्गतिः, "श्रेयम्" इति पाठकरणे सङ्गतार्थकम्।

अष्टौ चार्त्तवदोषाः स्युर्वातपित्तकफैस्त्रिधा ॥
पूयाभं कुणपं ग्रन्थिं क्षीणं मलसमं तथा ॥ १७४ ॥

चतुर्विधरक्तप्रदराणां विवरणम् ।—

तथा च रक्तप्रदरं चतुर्विधमुदाहृतम् ।
वातपित्तकफैस्त्रेधा चतुर्थं सन्निपातजः ॥ १७५ ॥

विंशतियोनिव्यापदां विवरणम् ।—

विंशतिर्योनिरोगाः स्युर्वातात् पित्तात् कफादपि ।

पूर्वमाह्यत इति मुनिवचनात् । तेषामादावार्त्तवदोषानाह, अष्टौ चार्त्तवदोषा· स्युरित्यादि ।—दोषैर्दुष्टमार्त्तवञ्च वीर्य्यवद्भवतीति प्रयोजनमुक्तवान् , यदुक्तं सुश्रुते— "आर्त्तवमपि विभिर्दोषैः शोणितचतुर्थैः पृथग्द्वन्द्वैः समस्तैश्चोपसृष्टमबीजं भवति" (सु० शा० २ अ०) इति । एतेषां दोषवर्णवेदनादिभिर्विज्ञानोपाय उक्तोऽष्टशुक्रदोषे ज्ञातव्यः ॥ १७४ ॥

तथा च रक्तप्रदरमित्यादि ।—तथेत्यनेनार्त्तवमेव कारणमसृग्दरस्येति भावः सूचित , यदुक्तं—'तद्दोषातिप्रसङ्गेन प्रवृत्तमनृतावपि । असृग्दरं विजानीयादतीऽन्यद्रक्तलक्षणात् ॥" (सु० शा० २ अ०) इति । सामान्यलक्षणमपि यथा—"असृग्दरी भवेत् सर्वं साङ्गमर्दं सवेदनं" (सु० शा० २ अ०) इति । आर्त्तवातिप्रवृत्तित्वेनासृग्दरं, तस्यार्त्तस्यातिस्रुतस्य लक्षणानि यथा—"तस्यातिवृत्तौ दौर्बल्यं भ्रमो मूर्च्छा मनःक्षुधा । दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः ॥" (सु० शा० २अ०) इति । तस्य सङ्ख्यामाह प्रकारा भवन्ति, वातपित्तकफैरित्यादि ।—तत्र वातिकमाह —"रूक्षारुणं फेनिलमल्पमल्पं वातार्त्तं वातात् पिञ्जितोदकाभम्" (रो० वि० असृग्दर०) इति । पित्तजमाह—"सपीतनीलासितरक्तमुष्णं पित्तार्त्तियुक्तं भृशवेगि पित्तात्" (रो० वि० असृग्दर०) इति । कफजमाह—"आमं सपिच्छाप्रतिमं सपाण्डु पुलाकतोयप्रतिमं कफात्तु" (रो० वि० असृग्दर०) इति । त्रिदोषजमाह —"सर्वैर्द्रसर्पिर्हरितालवर्णं मज्जप्रकाशं कुणपं त्रिदोषात्" (रो० वि० असृग्दर०) इत्यादि ॥ १७५ ॥

विंशतिरिति ।—योनौ भवा रोगा योनिरोगा उक्ता, ते दुष्टार्त्तवबीज्यदोषादिना जनिता , तथा हि—"विंशतिर्व्यापदो योनेर्निर्दिष्टा रोगसङ्ग्रहे । मिथ्याचारैश्च ताः स्त्रीणां प्रदुष्टेनार्त्तवेन च ॥ जायन्ते बीजदोषाच्च दैवाच्च शृणु

सन्निपाताच्च रक्ताच्च लोहितक्षयतस्तथा ॥ १७६ ॥

ता पृथक्॥' (च० चि० योनिव्यापत०) इति। तत्र विशेषलक्षणाभावाद्वातलामाह वातलाया पृथगभिधानं वातलाया विशेषेण वातवेदनाप्राबल्यार्थं, यत तन्त्रान्तरे उदावर्तावमन्थाविप्लुतापविप्लुतासु वातानुबन्धित्वम्, यदुक्त—"चतसृष्वपि चाद्यासु भवत्यनिलवेदना" (सु० उ० ३८ अ०) इति। एव पित्तानुबन्धिन्या रक्तक्षया वामिनी प्रस्रंसिनी पुत्रघ्नी चेति चतस्र पित्तजया सह पञ्च पैत्तिक्य, यदुक्त—"चतसृष्वपि चाद्यासु पित्तलिङ्गोक्षयो भवेत्" (सु० उ० ३८अ०) इति। एव श्लेष्मानुबन्धिन्योऽत्यानन्दा कर्णिनी अचरणातिचरणाश्चतस्र श्लेष्मलया सह पञ्च विज्ञेया, यत,—"चतसृष्वपि चाद्यासु श्लेष्मलिङ्गोक्षयो भवेत्" (सु० उ० ३८ अ०) इति। एव सन्निपातजा पञ्च विज्ञेया, षष्ठी अष्ठीला विद्रधि सूचीवक्त्रा इति चतस्र सन्निपातजया सह पञ्च, यत, —"चतसृष्वपि चाद्यासु सर्वलिङ्गोक्षयो भवेत्। पञ्चासाध्या भवन्तीह योनिव्य सदोषजा॥" (सु० उ० ३८ अ०) इति। एव सुश्रुतोक्तत्वाच्चे दोषानुबन्धित्व दर्शितम्। अत्र व्यक्तगणनासङ्कीर्तनेन पृथक्स्वरूपमधुना विधीयते, तद्यथा—वातादिति—वातला योनिर्भवति; तथा हि—"वातला कर्कशा रूक्षा शूलनिस्तोदपीडिता" (रो० वि० योनिव्यापत०) इति। पित्तादिति—पित्तला योनि, यथा—"अत्यर्थं पित्तला योनिर्दाहपाकज्वरान्विता" (रो० वि० योनिव्यापत०) इत्युपलक्षय, तेन नीलपीतासितार्त्तवा च भवतीत्यवगन्तव्यम्, तथा च तन्त्रान्तरे—"व्यापन्नवर्णकटुरूक्षचारार्त्ते पित्तजा भवेत्। दाहपाकज्वरीपार्त्ता नीलपीतासितार्त्तवा॥" (च० चि० योनिव्यापत०) इति। कफादिति—श्लेष्मला योनि, तदुक्तं —"श्लेष्मला पिच्छिला योनि कण्डूयक्ताऽतिशीतला" (सु० उ० ३८ अ०) इति। अतिशीतलेत्युपलक्षय, तेन सवेदनादिकमपि बोद्धव्यम्, यदुक्त तन्त्रान्तरे— "कफोऽभिष्यन्दिभिर्हेतुर्यो योनि चेत् दूषयेत स्त्रिया। स कुर्यात् पिच्छिला शीतां कण्डूयक्ता * सवेदनाम्॥" (च० चि० योनिव्यापत०) इति। सन्निपातादिति— मिलितदोषत्रयदूषिता योनिर्भवति, तथा हि—"सर्वलिङ्गसमुत्थान यच्च सा सन्निपातजा" इति। रक्ताच्चेति—रक्तदूषिता। यद्यपि रक्तपित्तानुबन्धिनी युगपत् पठिता, तथाप्यच रक्तस्यातिस्रवणाद्रक्तजेति व्यपदेश, तस्मादिह रक्तजा

* "सवेदनाम्" इत्यत्र "अवेदनाम्" इति पाठ, चरकवाग्भटसम्मत.।

शुष्का च वामिनी चैव षण्ढिताऽन्तर्मुखी तथा।

* स्रसिनी कथितेत्यभिप्राय, तद्यथा—"प्रस्रसिनी स्रवते तु क्षोभिता दुष्टजायिनी" (रा० वि० योनिव्यापत्०) इति। लोहितक्षयतो लोहितक्षया कथिता; तथा हि—"सदाह क्षोपत रक्त यस्या सा लोहितक्षया" (रो० वि० योनिव्यापत्०) इति। शुष्का चेति—शुष्का नष्टार्त्तवा कथिता, शुष्क बन्ध्यमार्त्तव यस्या भवति सा; अत एव तन्त्रान्तरे बन्ध्यायोनि, "बन्ध्या नष्टार्त्तवा ज्ञेया" इत्यादिवचनात्। वामिनी चेति—या रजसा युत सवात बीजमुद्गिरेत सा वामिनी, यथा—"सवातमुद्गिरेत बीज वामिनी रजसाऽन्वितम" (सु० उ० ३८ अ०) इति। षण्ढितेति—अरजस्का भवति; तथा हि—"अनार्त्तवाऽल्परजा षण्ढी खरस्पर्शा च मैथने" (सु० उ० ३८ अ०) इति। अन्तर्मुखीति—बृहन्मेढ्नपुरुषेण गृहीतायास्तरुण्यास्खण्डली भवेत, सा अन्तर्मुखी, अण्डवन्निसृता योनिरित्येके, सा † अण्डलीशब्दवाच्या, यत,—"अतिकायगृहीतायाः

---

* रक्तजा स्रसिनीति टीकाकारोक्ति चिन्त्या प्रस्रसिन्या स्रवणेन सह सर्वथा सादृश्याभावात, यत प्रस्रसिनी पित्तजा, तत्र रक्तस्रावस्य उल्लेखोऽपि न दृश्यते; मन्ये, चरकवाग्भटोक्तरक्तयोनिरेव अनेन सङ्गृहीता रक्तजनितयोनिव्यापदर्थे प्रयुक्ता, सुश्रुते रक्तजन्यापद उल्लेखाभावात्। तथा च—"रक्तपित्तकरैर्नार्या रक्त पित्तेन दूषितम। अति प्रवर्त्तते योन्या लभ्ये बीजेऽपि साऽसृजा (साऽप्रजा)॥" (च० चि० योनिव्यापत्०) "रक्तयोन्याख्यासृगतिसृते" (वा० उ० ३३ अ०) इति। किञ्च चरकवाग्भटोक्तरक्तयोनिरेव रक्तजा इति स्वीकृते "रक्तपित्तानुबन्धिनी" इति टीकाकारोक्तिरपि सङ्गच्छते। अपरञ्च विंशतिव्यापत्सु रक्तजा शुष्का उपद्रुता प्राक्चरणा अन्तर्मुखी इति पक्ष सुश्रुते न सन्ति, चरकवाग्भटयोरपि अण्डली बन्ध्या प्रस्रसिनी विप्लुता अत्यानन्दाख्या पक्षत्व न दृश्यन्ते, किञ्च चरके या अतिचरणा वाग्भटे सैव विप्लुता सौश्रुतविप्लुतालक्षणेन चरकवाग्भटयो किमपि साम्य नास्ति, सौश्रुताऽत्यानन्दया सह चरकवाग्भटोक्ताचरणाविप्लुतयो लक्षणसाम्य दृश्यते, एवञ्च मन्ये ग्रन्थकृता शार्ङ्गधरण चरकवाग्भटयो कतिचित् कतिचित् सुश्रुतोक्ता योनिव्यापत स्वसङ्ग्रहे सन्निवेशिता, लक्षणसाम्य कुत्रचिदस्ति कुत्रचित् वा नास्ति, रोगानल्यात् सर्वमेव प्रमाण स्मृतिद्वैधवर्तिति। टीकाकारेणानेन पुष्पाया सह बन्ध्याया, उपप्लुतया उदावर्त्तायाश्च यदैक्य प्रदर्शित, तत्र महोदर लक्षणवैषम्यात् इति सुधीभिरलम तत्र तत्त्वे सूच्यमिति। उदावर्त्तोपप्लुतयोः पृथक् पृथक् ग्रहण पृथक् पृथक् लक्षणञ्च चरकवाग्भटयो परिदृश्यते इति।

† अण्डमुखी अण्डली इत्यक्षिचरकविरुद्धा, तथा च—"स्यवायमातत्प्रायो

सूचीमुखी विप्लुता च जातघ्ना च परिप्लुता ॥ १७७ ॥
उपप्लुता प्राक्चरणा महायोनिश्च कर्णिनी।
अत्यानन्दाऽतिचरणा योनिरोगा इतीरिताः ॥ १७८ ॥

चतुर्विधकन्दरोगाणां विवरणम्।—

चतुर्विधं योनिकन्दं वातपित्तकफैस्त्रिधा।

म्बरुग्णास्त्रवेद्वा भवेत्" (रो० वि० योनिव्यापत्०) इति। सूचीमुखीति—आतुरस्य सूचीवत् सङ्कीर्णमुखा—'सूचीवक्त्राऽतिसङ्कटा" (सु० उ० ३८ अ०) इत्यादिवचनात्। विप्लुता चेति—'विप्लुता नित्यवेदनाम्" (सु० उ० ३८ अ०) इत्यादिना वातजनिततोदादिवेदनायुक्तेत्यर्थः। जातघ्नी चेति—तथा हि—'स्थितं स्थितं इन्ति गर्भं पुत्रघ्नी रक्तसङ्क्षयात्" (सु० उ० ३८ अ०) इति। यद्यपि सर्वापत्यविनाशिनी तथाऽप्यत्र पुत्रस्य प्राधान्यात् पुत्रघ्नीति व्यपदेशः। परिप्लुतेति सज्ञा, यदुक्तं—"परिप्लुतायां भवति ग्राम्यधर्मे रुजा भृशम्" (सु० उ० ३८ अ०) इति। उपप्लुतेति—वायोरुद्वृत्तत्वात्। तल्लाञ्छनैरुदावर्त्तेति सज्ञा, यदुक्तं—"सा फेनिलमुदावर्त्ता रजः कृच्छ्रेण मुञ्चति" (सु० उ० ३८ अ०) इति। * महायोनिरिति—अतिविवृतमुखत्वान्महायोनिः कथिता, यत,—"विवृताऽति महायोनिः" (सु० उ० ३८ अ०) इत्यादि। कर्णिनीति—मासकन्दाकारो यस्याः कर्णिनी कथिता, यत,—"कर्णिन्या कर्णिका योनौ श्लेष्माऽसृग्भ्यां प्रजायते"(सु० उ० ३८ अ०) इति। अत्यानन्देति—"अत्यानन्दा न सन्तोषं ग्राम्यधर्मेण गच्छति" सु० उ० ३८ अ०) इति। अतिचरणेति—"बहुशश्चातिचरणा तयोर्बीजं न गृह्णन्ति" (रो० वि० योनिव्यापत्०) इति। तयोरतिचरणाऽतिचरणया। एव योनिदोषा ईरिताः कथिताः ॥ १७६—१७८॥

चतुर्विधमिति।—योनिश्रयित्वाद्विश्रयितमयोनिभेदात् योनिकन्दोऽपीत्येक पृथक्(?) दोषभेदेन नानासङ्ख्यत्वात् पृथगत्र पाठतः। योनौ लकुचाकार कन्दमुत्पद्यते तत्

प्रजनव्याख्यया पीडितः। वायुर्मिथ्याश्रिताङ्गाया योनिस्रोतसि संश्रितः ॥ वक्रयत्यानन यान्या सास्रिमासानिलार्त्तिभिः। भृशार्त्तिर्मैथुनासक्ता योनिरन्तर्मुखी मता ॥" (च० चि० योनिव्यापत्०) इति।

* टीकाकृता प्राक्चरणा नोक्ता, तल्लक्षण यथा—"मैथुनादतिबालायाः पृष्ठभङ्गोरुवङ्क्षणम्। रुजयन् दूषयेत् योनि वायुः प्राक्चरणा हि सा ॥" (च० चि० योनिव्यापत्०) इति। सुश्रुते प्राक्चरणाया उल्लेखो नास्ति।

चतुर्थः सन्निपातेन—" ॥१७९॥

अष्टविधगर्भरोगाणां विवरणम्।—

"—तथाऽष्टौ गर्भजा गदाः।
उपविष्टकगर्भः स्यात् तथा नागोदरः स्मृतः ॥१८०॥
मक्कलो मूढगर्भश्च विष्वक्षो गूढगर्भकः।

योनिकन्दनिति। लकुचचाव * नारङ्गफलम्, तद्यथा—"पूयशोणितसङ्काशं लकुचाकृतिसन्निभम्। जनयति यदा योनौ नाम्ना कन्दः स योनिजः॥" (रो० वि० कन्द०) इति। अस्य वातादिविकृतिलक्षणमाह, वातज यथा—"कृष्णं विवर्णं स्फुटितं वातिकं तद्विनिर्दिशेत्" (रो० वि० कन्द०) इति। पैत्तिकमाह—"दाडिमगर्भसदृशं विद्यात् पित्तात्मकन्तु तम्" (रो० वि० कन्द०) इति। श्लैष्मिकमाह—"नीलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम्" (रो० वि० कन्द०) इति। नीलपुष्पवर्णता च कफजेऽपि रोगप्रभावात्। अन्ये चैनं पित्तलिङ्गमन्यद्वदन्तीति। सान्निपातिकं यथा—"सर्वलिङ्गसमायुक्तं सन्निपातात्मकं वदेत्" (रो० वि० कन्द०) इति ॥१७९॥

तत्रेति।—"शुक्रशोणितं गर्भाशयस्थमात्मप्रकृतिविकारसम्मूर्च्छितं गर्भ इत्युच्यते" (सु० शा० ५ अ०) तत्सम्भवा विकारा गर्भजा गदा वाच्याः, तेऽष्टप्रकारा भवन्ति। उपविष्टकगर्भ इत्यादि।—रक्तपरिस्रुतिनिमित्तोपविष्टकसञ्ज्ञया गर्भविकृतिः कथिता। तदुक्तं चरके—यस्या पुनरुष्णतीक्ष्णोपयोगाद्गर्भिण्या सहति जातसारे गर्भे पुष्पदर्शनं स्यात्, अन्यो वा योनिस्रावः, तस्या गर्भो वृद्धिं न प्राप्नोति, निःसुतत्वात्, स कालमवतिष्ठतेऽतिमात्रं, सम्बन्धनञ्च भवति तमुपविष्टक इत्याचक्षते केचित्"(च० शा० जातिसूत्रीय०) इति। नागोदर इति—नागवन्त्र इव स्थितिर्यस्य गर्भस्य भवतीत्येके। सुश्रुते तन्नागोदरलक्षणं यथा—"शुक्रशोणितं वायुनाऽभिप्रपन्नमवकाशान्त्रजीवमातृकोदरं, तत् कदाचित् यदृच्छयोपशान्ते नैगमेषोपहृतमिति भाषन्ते। तमेव कदाचित् प्रविलीयमानं नागोदरमित्याहुः" (सु० शा० १० अ०)। मक्कल इति—मक्कलो † रक्तजमूलविशेषः, स द्विविधो भवति, एको गर्भावस्थायाम्, अपर

---

* लकुच नारङ्गफलम् इति तु न सम्यक्, लकुच पनसफलम्, "लकुचो लिकुचो कृष्ण" इत्यमरवचनात्।

† "मक्कलो रक्तजातजमूलविशेषः" इति मधुकोषः।

सूतिकावस्थायाम् इति, तद्यथा—मानसागन्तुभिरुपतापैः प्रपीडितो यो गर्भं कुक्षौ वेदना जनयति स गर्भसङ्कल्प, यत्र प्रकुपितो वायु सूतायाः रुधिरमत्यन्तं सरुग्यं हृच्छिरोबस्तिशूलं करोति स प्रसूतिसङ्कल्प इति। तत्रान्तरे* योनिसवरणोऽयं रोगविशेषः कथ्यते, यदुक्तं—"वातलान्यन्नपानानि व्यायामं प्रजागरम्। अत्यर्थं सेवमानायाः गर्भिण्याः योनिमार्गगः॥ मातरिश्वा प्रकुपितो योनिद्वारस्य सङ्क्षतिम्। कुरुते रुद्धमार्गत्वात् पुनरत्यगतोऽनलः॥ निरुध्य द्वाभ्यद्वारं पीडयन् गर्भसंस्थितिम्। निरुद्धवर्चोमूत्रोऽसौ गर्भस्यार्थं विपद्यते॥ † रुजा सरुग्यं हृदयं नाशयत्याशु गर्भिणीम्। योनिसवरणं विद्यात् व्याधिमेनं सुदारुणम्॥ अत्यल्पप्रतिमं घोरं नारभेत चिकित्सितम्॥" इति। मूढगर्भेति—मूढो व्यासक्तगतिः पवनो मूढगर्भं करोति, योनिजठरादिषु शूलं करोतीत्यभिप्रायः, तथा हि—"मूढः करोति पवनः खलु मूढगर्भं शूलं च योनिजठरादिषु मर्मसङ्गम्" (रो० वि० मूढगर्भ०) इत्यादि। विगुणानिलयोगादट्टस्या(?)सङ्ख्यत्वनाहुरेके, तस्मादत्र एक एव पठितः, तद्यथा—"मुष्णात्यनिलेन विगुणेन ततः स गर्भं सङ्घातमतोऽस्य बहुधा समुपैति योनिम्" (रो० वि० मूढगर्भ०) इत्यादिः। केचिन्मते तत्र व्यवहारयोग्या अष्टौ प्रकारा कथिताः, तद्यथा—"द्वारं निरुध्य शिरसा जठरेण कश्चित् कश्चिच्छरीरपरिवर्त्ततकुक्षिदेशः। एकेन कश्चिदपरस्तु भुजद्वयेन तिर्यग्गतो भवति कश्चिदधोमुखोऽन्यः॥ पार्श्वापवृत्तगतिरेव तथैव कश्चिदित्यष्टधा गतिरियं त्वपरा चतुर्धा॥" (रो० वि० मूढगर्भ०) इति। सङ्कीलकादिभेदेन चतुःप्रकारान् पुनराहुरेके, तद्यथा—"सङ्कीलकः प्रतिखुरः परिघोऽथ वोजसेषूंबाहुचरणे शिरसा च योनिम्। सङ्घौ च यो भवति कीलकवत् स कीलो हस्ते खुरे प्रतिखुरः स हि कायसङ्घौ॥ मच्छेद्वजद्वयशिरा स च वोजकाख्यो योनौ स्थितः स परिघः परिघेण तुल्यः॥" (रो० वि० मूढगर्भ०) इति। तत्रान्तरेऽपि कीलकादीनां लक्षणं यथा—"ऊर्ध्वबाहुशिराः पादैः कुर्यात्

* सङ्कल्प-योनिसवरणयोरनैक्यं सुश्रुतेन माधवेन च प्रतिपादितं पृथगुल्लेखात्, तथा च—"विपरीतेन्द्रियार्थाचेष्टकयोनिश्चसवरणसङ्कल्पकासक्षमनिपीडितान्" (सु० शा० ८ अ०) इति। "योनिसवरणं सङ्गः कुक्षौ सङ्कल्प एव च" (रो० वि० मूढगर्भ०) इति।

† "रुजा सरुग्यं हृदयम्" इत्यत्र "वङ्क्षा सरुग्वङ्क्षहृदयाम्" इति "वङ्क्षा सरुग्वङ्क्षहृदयाम्" इति च क्वचित् पाठः।

जरायुदोषो गर्भस्य पातश्चाष्टमकः स्मृतः ॥१८१॥

योनिमुखन्तु यत्। प्रतिकीलोपमस्थित्या स कील इति संज्ञितः ॥ अथवात्पार्श्वतो वाऽपि तथैवाकुञ्चितोऽपि वा। यो निःसृत्य मुखं योनेर्ज्ञेयः प्रतिखुरस्तु सः ॥ योनिद्वारात्तु निर्गच्छेत यस्यैकः सक्थिशीर्षभुजः। तमाहुर्वीजजं नाम मूढगर्भ-चिकित्सकाः ॥ योनिमाहत्य यत्तिष्ठेत परिघो गोपुरं यथा। तथाऽन्तर्गर्भमाघात्तं विद्यात् परिघसञ्ज्ञितम् ॥" (भोज०) इति। विष्कम्भ इति—विष्कम्भ इव विष्कम्भः, मार्गावरोधात् तिष्ठति इत्यभिप्रायः। स तु वातोपसृतगर्भस्य शीर्षणाभ्यां कुक्षिं न पूरयति, मन्दः स्पन्दते च, अत एव वृद्धकाश्यपेन * शुष्कलक्षणं विहितम्, यथा—"गर्भनाड्याख्यवृद्धनादल्पत्वाद्वा बलस्य च। चिरेणाप्यायते गर्भस्तथैवाकालभोजनात् ॥ अकुक्षिपूरणो गर्भः शुष्कश्च मन्द एव च ॥" इति। गूढगर्भ इति—नौनगर्भः कथितः, तथा च सुश्रुतः,—"वातोपद्रवगूढौतत्वात् स्रोतसा ह्रीयते गर्भः, सोऽतिकालमवतिष्ठमानो व्यापद्यते" (सु० शा० १० अ०) इति। जरायुदोष इति—विकृतजरायुणा छादनं जरायुदोषः, जरायुर्गर्भस्यावेष्टनरूपश्चर्मविशेषः, "जरायुणा सुखं च्छन्नः" (सु० शा० २ अ०) इत्यादिदर्शनात्। अथोङ्गर्भग्रन्थ्याश्रितो यो बालस्तस्योपरि † वेष्टितोल्बविकारत्वाज्जरायुदोषः इत्यभिप्रायः। गर्भग्रन्थ्या

* विष्कम्भाख्यो मूढगर्भः, वृद्धकाश्यपोक्तः शुष्काख्य इति टीकाकारोक्तिश्चिन्त्या, वाग्भटे शुष्कविष्कम्भयोः पृथक् पृथक् लक्षणदर्शनात् शुष्कस्य सह विष्कम्भस्य साहश्या-भावाच्च। विष्कम्भशब्दः अर्गलापरपर्यायः, अर्गलवत् यः मार्गं रुणद्धि, स मूढगर्भः विष्कम्भाख्यः। वाग्भटोक्तोऽयं सौश्रुताष्टविधमूढगर्भेषु "कश्चिदाभुग्नमध्यो हस्तपाद-शिरोभिः, कश्चिदेकेन सक्थ्ना योनिमुखमभिप्रतिपद्यते अपरेण पायुम्" एताभ्यां तुल्यलक्षणः इति मन्ये। विष्कम्भलक्षणं यथा वाग्भटे—"हस्तपादशिरोभिर्यो योनिं भुग्नः प्रपद्यते। पादेन योनिमेकेन भुग्नोऽन्येन गुदं स्पृशन् ॥ विष्कम्भो नाम सौ मूढो शस्त्रदारणमर्हति ॥" (वा० शा० २ अ०) शुष्कस्तु वाग्भटे नागोदरनाम्ना उपयुक्त-नाम्ना वा अभिहितः गर्भव्यापद्विशेषः, न तु मूढगर्भः, तथा च—"शोकोपवास-रूक्षान्नैरथवा योन्यतिस्रवात्। वाते क्रुद्धे क्रमं शुष्येत् गर्भो नागोदरन्तु तत् ॥ उदरं वृद्धमत्यर्थं ह्रीयते स्फुरणं चिरात् ॥" (वा० शा० २ अ०)। अत्र अरुणदत्तः,—'तं तथाभूतं गर्भं नागोदरसञ्ज्ञकं केषाञ्चिन्मते चोपयुक्तसञ्ज्ञं विद्यात्' इति।

† वेष्टनोल्बविकारो जरायुदोषः इति पाठकल्पने सङ्गताश्चकमिति मन्ये।

पञ्चस्तनरोगाणां विवरणम्।—

पञ्चैव स्तनरोगाः स्युर्वातात् पित्तात् कफादपि।
सन्निपातात् क्षताच्चैव—" ॥१८२॥

पञ्चस्तन्यरोगाणां विवरणम्।—

"—तथा स्तन्योद्भवा गदाः।

च प्रसङ्गतो यथा—"ग्रन्थनाभ्याकृतिर्योनिस्त्र्यावर्ता सा प्रकीर्त्तिता। तस्यास्तृतीये त्र्यावर्ते गर्भशय्या प्रतिष्ठिता॥ यथा रोहितमत्स्यस्य मुखं भवति रूपतः। तत्संस्थाना तथारूपा गर्भशय्या विदुर्बुधाः॥" (सु० शा० ५ अ०) इति। पात इति—गर्भस्य यानोऽष्टमो भेदः, स द्विविधः, एकः स्रावरूपः, अपरः पातरूपः, तथा हि—"या चतुर्थात्ततो मासात् प्रस्रवेत् गर्भविद्रवः। ततः स्थिरशरीरस्य पातः षष्ठनषष्ठयोः॥" (सु० नि० ८ अ०) इति। अनतिघनावयवत्वेन विशेषेण द्रवरूपतया गर्भविद्रव उच्यते, यदुक्तं भोजे—"या तृतीयात्ततो मासात् गर्भः स्रवति शोणितम्। ऊर्द्ध स्रावभूतस्तु गर्भः पतति योषितः॥" इति। विगुणपवने तु सप्तमादिमासेष्वपि पात इति कैश्चित्, यत,—"गर्भोऽभिघातविषमाशनपीडनाद्यैः पक्वः फलं पतति वातविनेव" (रो० वि० मूढगर्भ०) इति॥१८०।१८१॥

पञ्चैवेति।—स्तनयोर्भवा रोगाः स्तनरोगाः ते च शोथादिरूपा इत्यर्थः, यदुक्तं—"सचीरो बाऽप्यचीरो वा दोषः प्राप्यं स्तनौ स्त्रियाः। प्रदूष्य मांसरुधिरं स्तनरोगाय कल्पते॥" (रो० वि० स्तन०) इति। अत एव तेषां वातपित्तकफसन्निपातागन्तुजानां लक्षणानि रक्तजन्यविद्रधिं विना बाह्यविद्रधिवत् ज्ञातव्यानि, तथा चोक्तं—"पञ्चानामपि तेषां हि रक्तजं विद्रधिं विना। लक्षणानि समानानि बाह्यविद्रधिलक्षणैः॥" (रो० वि० स्तन०) इति॥१८२॥

तथा स्तन्योद्भवा गदा इति।—तथेत्यनेन यथा स्तनरोगा दोषभेदेन पञ्चसङ्ख्यका उक्ता तथैव दोषभेदेन क्षीरभेदा इति तात्पर्यार्थः। स्तन्यं क्षीरम्, तत्स्वरूपञ्च सुश्रुतेनोक्तं—"रसप्रसादो मधुरः पक्वाहारनिमित्तजः। कृत्स्नदेहात् स्तनौ प्राप्तः स्तन्यमित्यभिधीयते॥" (सु० शा० १० अ०) इति। वातादीनां भेदा यथोचित दोषनामार्थं लिख्यन्ते, यथा—"कषाय सलिलप्रायं स्तन्यं मारुतकोपतः। कटुम्ललवणं पीतं राजीमत् पित्तसंयुतम्॥ कफदुष्टं घनं तोयैः निमज्जति सुपिच्छिलम्। त्रिलिङ्गं द्वन्द्वजं विद्यात् त्रिलिङ्गं सान्निपातिकम्॥" (रो० वि० स्तन्य०) इति। एव दोषदूषितात् स्तन्यात् गदा रोगा उत्पद्यन्ते, यदुक्तं—"गुरुभिर्विविधैरन्नैर्दुष्टैर्दोषै

बालरोगेषु कथिताः—" ॥ १८३ ॥

विविधस्त्रीदोषाणां विवरणम्।—

"—स्त्रीदोषाश्च त्रय स्मृताः।
अदत्तपुरुषोत्पन्न सपत्नीविहितस्तथा ॥
दैवाज्जातस्तृतीयस्तु—" ॥१८४॥

सूतिकारोगाणां विवरणम्।—

"—तथा ये सूतिकागदाः।
ज्वरादयश्चिकित्स्यास्ते यथादोषं यथाबलम् ॥ १८५ ॥

द्वाविंशतिबालरोगाणां विवरणम्।—

द्वाविंशतिर्बालरोगास्तेषु क्षीरान्नसाक्षयः।

प्रदूषितम्। क्षीर धात्र्या कुमारस्य नानारोगाय कल्पते ॥" (रो० वि० कल्प०) इति। अत एव ते रोगा क्षीरान्नसादयो बालरोगेषु प्रदर्शिता ॥ १८३ ॥

स्त्रीदोषाश्च त्रय स्मृता इत्यादि।—स्त्रीणां दुःखजनका स्त्रीदोषा, "तद्दुःखसंयोगा व्याधय" (सु० सू० १ अ०) इत्युपदर्शनात्। ते त्रय। अदत्तपुरुष इति—निजाहाराद्यर्जनेऽप्यसमर्थे, तेनोत्पन्नं दुःखमिति भाव। सपत्नीविहित इति—स्त्रीणा सपत्नीभावोऽतीवदुःखकरो विहित विधिभूतत्वात्, 'पृथक्शय्या च नारीणामलक्तक उच्यते" इति वचनात्। दैवाज्जात इति—दुःखकर इति शेष। दैव भागधेय तज्जात भाग्यविपर्ययेण वैधव्यादिजनित तत्त्वमिप्राय ॥ १८४ ॥

तथा ये सूतिकागदा इत्यादि।—प्रसूतिविषये भवा ये रोगास्ते सूतिकागदा कथिता, तद्यथा—"ज्वरातिसारशोथाश्च शूलानाहबलक्षया। तन्द्राऽरुचिप्रसेकाद्या कफवातानयोद्भवा ॥ कृच्छ्रसाध्या हि ते रोगा क्षीणमांसबलाश्रिता। ते सर्वे सूतिकानाम्ना रोगास्ते चाप्युपद्रवा ॥" (रो० वि० सूतिका०) इति। एते सूतिकारोगत्वेन लक्ष्यन्ते इत्यर्थ, उपद्रवत्वात्। सूतिकाया विशेषलक्षणञ्च सुश्रुतेनोक्त यथा—* "अङ्गमर्दो ज्वर कास पिपासा गुरुगात्रता। शोथ. शूलातिसारौ च सूतिकारोगलक्षणम् ॥" इति। एव स्त्रीरोगा प्रदर्शिता ॥१८५॥

अथ बालरोगानाह, द्वाविंशतिरिति।—बालके भवा रोगा बालरोगा; आ षोडशात् बाल। स विविध, क्षीरप क्षीरान्नाद अन्नाद इति, एतेषु भवा

* मुद्रितसुश्रुतेषु श्लोकोऽय न दृश्यते। दृश्यते च रुग्विनिश्चये, तत्र च —"कास." इत्यत्र "कम्प." इति पाठ।

वातात् पित्तात् कफाच्चैव दन्तोद्भेदश्चतुर्थकः ॥ १८६ ॥
दन्तघातो दन्तशब्दोऽकालदन्तोऽहिपूतनम्।

रोगा बालरोगशब्दवाच्या, यत षोडशवर्षपर्यन्त बालचिकित्सा दृश्यते। तेष्विति —द्वाविंशतिसङ्ख्यकेषु। अथ चौरालसा इति—* दोषदूषितस्तन्यजनिता रोगविशेषा, अत एव वातात् पित्तात् कफादिति यङ्क्तम्, तद्यथा—"वातदुष्ट शिशु स्तन्यं पिबन् वातगदातुर। चामस्वर क्षमाङ्ग स्यात् वङ्क्तविण्मूत्रमारुत ॥" (रो० वि० बाल०) इति। पित्तदुष्टमाह— खिन्ना भिन्नमलो बाल, कामलापित्तरोगवान्। तृष्णालुरुष्णवाङ्, पित्तदुष्ट पय, पिबन् ॥' (रो० वि० बाल०) इति। कफदुष्टलक्षणमाह—'कफदुष्टं पिबन् क्षीर लालालु श्लेष्मरोगवान्। निद्रान्वितो जड गुरु वक्त्राक्ष्णोश्छर्दन शिशु ॥" (रो० वि० बाल०) इति। एव अय चौरालसा कथिता। दन्तोद्भेद इति—दन्तानामुद्भेद उत्पत्ति, स च सर्वेषा रोगाणा कारणम्, तद्यथा—"दन्तोद्भेदश्च रोगाणा सर्वेषामपि कारणम्। विशेषाज्ज्वरविड्भेद-कासच्छर्दिशिरोरुजाम् ॥" (वा० उ० २५०) इति। अन्यत्रापुक्त—"पृष्ठभङ्गे विडालाना बाहुल्याच्च शिखोद्गम। दन्तोद्भेदे च बालाना न हि किञ्चिन्न दूयत ॥" (वा० उ० २५०) इति। दन्तघात इति—दन्तपात कथित, स त्रिधा भवति, एक समधीत्य अपर आघातजनित, तावपि बालदुःखकरावितिप्रयोजनम्। दन्तशब्द इति—दन्तघर्षश्च विशेषण स्वप्नावस्थाया भवति, † कफजन्यदन्तहर्षनिमित्तत्वात्, बाल्येऽतीव कफामया भवन्ति, तेन बालरोगे दन्तशब्द कथित। अकाल-

* वाग्भटे त्रिदोषदुष्टस्तन्यपानेनैव चौरालसोत्पत्तिरिति दृश्यते, तथा च—"स्तन्ये त्रिदोषमलिने दुर्गन्धाम जलोपमम्। विवद्धमच्छ विच्छिन्न फेनिलञ्चोपवेश्यते ॥ अजीर्णान्यधावर्णं मूर्त पीत घन सितम्। ज्वरारोचकछर्दिं गुल्मोद्गारविजृम्भका। ॥ अङ्गभङ्गोऽङ्गविक्षेप कूजन वेपथुभ्रम। घ्राणाक्षिमुखपाकाद्या जायन्तेऽन्येऽपि तं गदम् ॥ चौरालसकमित्याहुरत्यर्थञ्चातिदारुणम् ॥" (वा० उ० २५०)।

† सुश्रुते वातजन्यत्वेन रोगविनिश्चये च वातपित्तजन्यत्वेन दन्तहर्ष कथित, न तु कफजन्यत्वेन, केचित्तु दन्तशब्द वातकोपेन भवति इति वदन्ति, तथा हि—"दन्तादिनो वातिकस्य चालयत्यनिल, शिरा। दन्तानग्रया, प्रसुप्तस्य दन्ते, शब्द करोत्यत, ॥" इति।

मुखपाको मुखस्रावो गुदपाकोपशीर्षकौ ॥ १८७ ॥
पार्श्वारुणस्तालुकण्टो विच्छिन्नं पारिगर्भिक.।

इन्त इति—अबालदन्त्यानेनानिष्टत्वाद्बालानां दुःखकर इत्यर्थः। अहिपूतनमिति—अहिपूतनमन्यत्र क्षुद्ररोगेषु पठितम्, अत्र बालसम्भवत्वात् बालरोगे लिखितम्, तदुक्तं यथा—"अकन्यूवसमायुक्तेऽधोतेऽपाने शिरोभवेत्। खिन्ने वाऽस्थाप्यमाने वा कण्डूरक्तकफोद्भवा॥ कण्डूयनात्ततश्चिप्रं स्फोटः स्रावश्च जायते। एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम्॥" (सु० नि० १३अ०) इति। भोजे पुनरिदं दुष्टस्तन्यपानादपि पठितम्, यदुक्तं—"दुष्टस्तन्यस्य पानेन मलस्यालालनेन च। कण्डूदाहरुजावह्नि, पिडकैश्च समन्विता॥ सम्भवति यथादोषं दारुणा ह्यहिपूतना॥" इति। मुखपाक इति—मुखस्य पाकी मुखपाकः, स तु दोषावशेषाद्भवति, बालकेऽप्यतीव प्रसिद्धत्वात्। मुखस्राव इति—प्रसिद्धः, लालास्राव इत्यर्थः। गुदपाक इति—सोऽपि विकृतदोषस्वभावाद्भवतीति, बालकेऽतीव प्रतीतिः, गुदपाक इति प्रसिद्धः। उपशीर्षकमाह—कपालरोगे व्रणविशेष उपशीर्षकशब्दवाच्यः, अथवा * पद्मनामानं विसर्पमाहुरेके, यदुक्तं—"विसर्पस्तु शिरो प्राण-नाशनो वह्निशीर्षजः। पद्मवर्णो महापद्मनामा दोषत्रयोद्भव॥" (रो० वि० बाल०) इति। पार्श्वारुणो † महापद्मभेदः, तत्र लोहितपद्मवर्णः, पद्मवर्णता मुखतालुनि बहिर्देशेषु च इति वदन्ति केचित्। तालुकण्ट इति—कण्टकाकारत्वेन तालुकण्टकम्, तदुक्तं यथा—"तालुमासे कफः क्रुद्धः कुरुते तालुकण्टकम्। तेन तालुप्रदेशस्य निम्नता मूर्द्धि जायते॥" (वा० उ० २अ०) इति। विच्छिन्नमिति—विच्छिन्नमन्यत्र गतम्, ‡ तालुपातमिति नाम्ना प्रतीतम्। तथा हि—"तालुपातं खनेऽभ्यक्ते भक्ताद्भवम। दृढचिकण्ठास्यरुजा शोषादुर्बृंहता वमिः॥" (वा० उ० २ अ०) इति। पारिगर्भिक इति—तथा हि—"मातुः कुमारी गर्भिण्या स्तन्यं प्रायः पिबन्नपि।

* वाग्भटे उपशीर्षकरोगः शिरोरोगे पठितः, स तु महापद्माख्यबालविसर्पात् पृथगेव, तथा च—"कपाले पवने दुष्टे गर्भस्थस्यापि जायते। सवर्णो नीरुजः शोफस्तं विद्यादुपशीर्षकम्॥" (वा० उ० २३अ०) इति।

† पार्श्वारुणो महापद्मभेद इत्यस्य किमपि साधकप्रमाणं नास्ति।

‡ तालुपात इत्यादि ग्रन्थः अरुणदत्तेन मधुकोषकारेण च तालुकण्टकस्यैव लक्षणत्वेन उक्त इति दृश्यते, तालुपाताख्यस्तालुरोगः पृथक् नास्ति, अतश्च विच्छिन्नमन्यत्र गतमित्यादि यदुक्तं तच्चिन्त्यम्।

दौर्बल्यं गात्रशैथिल्यं श्यामत्वं कुकूणकः॥
रोदनञ्चाजगल्लीति द्वाविंशतिः स्मृताः॥ १८८॥

द्वादशबालग्रहाणां विवरणम्।—

तथा बालग्रहाः ख्याता द्वादशैव मुनीश्वरैः।

कासाग्निसादवमथु-तन्द्राकाश्यारुचिघ्नैः॥ युज्यते कोष्ठशुद्ध्या च तमाहुः पारिसर्पकम्॥* (रो० वि० बाल०) इति। अस्यैव नामान्तरं परिसर्प इति। दौर्बल्यमिति—दुर्बलत्वं, बालकस्य सततं बलहानिरित्यर्थः, क्षीणौजा इत्यपरे। गात्रशैथिल्य इति—गात्रशैथिल्यं बालस्य दोषप्रभावात् भवति। श्यामत्वं प्रमिमीते, बालो स्वप्नावस्थाया श्यामगतो बालोऽतीव्रपूर्वक (?) स्मरयति दोषप्रभावात्। कुकूणक इति—बालस्य नेत्रवर्त्मगतः कुकूणकाख्यो रोगः, तद्यथा—"कुकूणकः क्षीरदोषात् शिशूनामक्षिवर्त्मनि। जायते तेन तद्रोगे क्षतूरुश्च सवेदनुः॥ शिशुः क्षुण्णाक्षिललाटाक्षि-कूटनासावधर्षणम्। शक्तो नार्कप्रभा द्रष्टुं न वर्त्मोन्मीलनक्षमम्॥" (रो० वि० बाल०) इति। अयमेव कोथुरिति लोके। रोदनमिति—रोदनन्तु क्षुधा शिशुव्याधीनां सूचकं भवति, यत,—"शिशोस्तीव्रासतीव्राच्च रोदनाल्लक्षयेद्बुधः। क्षीताक्षद्वाणि सन्दीप्य पश्येत् यत्नान्मुहुर्मुहुः॥" इति, तीव्रा क्षुधाच्च बहुरोदनात्, अतीव्रामल्परोदनाल्लक्षयेत् बालानामेव दुष्टस्तन्यपानादिनेति। अजगल्लीति—प्रायेण बालानामन्येषामपि अजगल्लिका भवति, तद्यथा—"स्निग्धा सवर्णा ग्रथिता नीरुजा मुष्टसन्निभा। कफवातौल्विना ज्ञेया बालानामजगल्लिका॥" (सु० नि० १३अ०) इति। इति द्वाविंशति स्मृता इति—इति कथितप्रकारेण बालरोगा द्वाविंशतिः प्रोक्ता॥ १८६—१८८॥

तद्देति।—बालं गृह्णन्ति इति बालग्रहाः, ते तु प्रायेण शौचस्नानादिना स्कन्दग्रहादयो बालेष्वाविशन्ति। तत्परिज्ञानार्थं सामान्यलक्षणं विशेषलक्षणञ्च व्याचष्टे, तत्र सामान्यलक्षणं यथा—"क्षणादुद्विजते बालः क्षणात् वमति रोदिति। नखैर्दन्तैर्दारयति धात्रीमात्मानमेव च॥ ऊर्ध्वं निरीक्षते दन्तान् खादति कूजति क्षणात्। भ्रुवौ क्षिपति दन्तौष्ठं फेनं वमति चासकृत्॥ जागर्त्ति निशि नागर्त्ति शनाद्यो भिन्नविट्स्वरः। मासशोणितगन्धिश्च न चाश्नाति यथा पुरा॥ सामान्यं ग्रहजुष्टानां लक्षणं समुदाहृतम्॥" (रो० वि० बाल०) इति। एते ग्रहाः पूजाहितोर्बालान् हिंसन्ति, यदुक्तं चरके—"धात्रीमातोरात्मनश्चापचाराच्छौच-

---

* श्रीकोऽयं मुद्रितचरकेषु न दृश्यते, दृश्यते च सुश्रुते किञ्चित्परिवर्त्तित-

स्कन्दग्रहो विशाखः स्यात् श्वग्रहश्च पितृग्रहः ॥ १८९ ॥
नैगमेयग्रहस्तद्वच्छकुनि शीतपूतना।

भ्रष्टान् मङ्गलाचारहीनान्। क्रुष्टान् क्वस्तान् तर्जनास्ताडितांश्च पूजार्हेतोर्हिंस्रैरेतैः कुमारान्॥" इति। विशेषलक्षणमपि प्रतिपादितं तत्रैव, तद्विवरणमाह स्कन्दग्रह इति।—स्कन्दग्रहेण गृहीतो बालो यथा भवति तल्लक्षणमाह—"पंकनेत्रस्य गात्रस्य स्रावं स्यन्दनकम्पनम्। ऊर्ध्वदृष्ट्या निरीक्षेत वक्त्राक्षी रक्तगन्धिकं॥ दन्तान् खादति विस्रस्तं स्तन्यं नैवाभिनन्दति। स्कन्दग्रहगृहीतानां बालानामार्त्तरोदनम्॥" (रो० वि० बाल०) इति। * विशाख इति। श्वग्रह इति—श्वग्रहस्तु † स्कन्दापस्मारं इत्युक्तौ, तदृथा—"नष्टसञ्ज्ञो वमेत फेनं सञ्ज्ञावानतिरोदिति। पूयश्लेष्मितगन्धित्वं स्कन्दापस्मारलक्षणम्॥" (रो० वि० बाल०) इति। ‡ पितृग्रह। ¶ नैगमेय ग्रह इति—तदृथा—"कृष्टिस्यन्दनकण्ठास्य-श्लेष्मगन्धिविगन्धिता। ऊर्ध्वं पश्येद्गृहीतं तं नैगमेयं ग्रहं वदेत्॥" (रो० वि० बालरोग०) इति। शकुनिरिति—शकुनिनामग्रहगृहीतो बालोऽपीड्यो भवति, यथा—"सस्त्रावी भयचकितो विहङ्गगन्धि सास्रावव्रणपरिपीडितः समन्तात्। स्फोटैश्च प्रचिततनुः सदाहपाकैर्विज्ञेयो भवति

पाठेन, तदृथा—"धात्रीनाम्नो प्राक्प्रदिष्टोपचारात् शौचभ्रष्टान् मङ्गलाचारहीनान्। क्वस्तान् क्रुष्टान् तर्जितान् क्रन्दितान् वा पूजार्हेतोर्हिंस्रैरेतैः कुमारान्॥" (सु० उ० २७ अ०) इति। अयमेव सङ्कत पाठ टीकोक्तपाठस्यार्थासङ्गतेरिति।

* स्कन्दापस्मार एवं विशाखाख्यया अरुणदत्तेन कीर्त्तितः, यथा—"सम्प्रति विशाखस्य स्कन्दापस्मारापरसञ्ज्ञस्य लक्षणमाह" (वा० उ० ३अ०) इति।

† वाग्भटेन विशाख एव स्कन्दापस्मार इत्युक्तः, न तु श्वग्रह इति। श्वग्रहलक्षणं यथा तत्रैव—"कफो क्षुवितरोमत्वं खेदश्चक्षुर्निमीलनम्। बहिरायमनं जिह्वा दशोऽन्तः कण्ठकूजनम्॥ वमनं विट्सगन्धत्वं क्षीणस्य श्वानवच्छकृत्॥" (वा० उ० ३अ०) इति।

‡ "पितृग्रहलक्षणं यथा—"रोमहर्षो मुहुस्त्रासः सहसा रोदनं ज्वरः। कासातिसारवमथुरुन्मादश्चटुगन्धता॥ अङ्गेष्वाक्षेपविक्षेपः शोषस्तन्यविवर्णता। मुष्टिबन्धः क्षुतिश्चाक्ष्णोर्बालस्य स्यं पितृग्रहे॥" (वा० उ० ३अ०) इति।

¶ वाग्भटे नैगमेयग्रह मेषग्रहाख्यया कीर्त्तितः। सुश्रुतेन नैगमेय एव पितृग्रह इति नामान्तरेण पठितः इति।

मुखमण्डितिका तद्वत् पूतना चान्धपूतना ॥
रेवती चैव सङ्घाता तथा स्याच्छुष्करेवती ॥ १८० ॥

द्विचत्वारिंशत्पादरोगाणां निर्देश :—

तथा चरणभेदास्तु वातरक्तादिकाश्च ये।
द्विचत्वारिंशदुक्तास्ते रोगेष्वेव मुनीश्वरैः ॥ १८१ ॥

द्विषष्टिदोषभेदानां निर्देश :—

द्विषष्टिर्दोषभेदाः स्युः सन्निपातादिकाश्च ये।

शिशु चत शकुन्या ॥" (सु० उ० २७अ०) इति। विहङ्गगन्धिरित्यत्र विस्रगन्धिरित्यपरे। स्थिरण्याचेऽप्युक्त—"स्रावदाहपाकार्त्तैश्चित स्फोटैर्भयान्वित। स्वस्ताङ्गी विस्रगन्धि स्याच्छकुन्या पीडित शिशु ॥" इति। शीतपूतनेति—"वेपते कासते क्षीणो नेत्ररोगी विगन्धिता। कृच्छ्रतीसारयुक्तश्च शीतपूतनया शिशु ॥" (रो० वि० बाल०) इति। मुखमण्डितिकेति—"प्रसन्नवणवदन शिराभिरभिसततं। मुख-गन्धिस्तु वक्त्राग्नौ मुखमण्डितिकाग्रही ॥" (रो० वि० बाल०) इति। पूतनेति—"अतीसारी ज्वरार्त्तश्च तिर्यक्प्रेक्षणरोदनम्। नष्टनिद्रस्तथोद्विग्नो ग्रस्त पूतनया शिशु ॥" (रो० वि० बाल०) इति। अन्धपूतनेति—"छर्दि कासो ज्वरस्तृष्णा वसागन्धोऽतिरोदनम्। स्तब्धदृष्टिरतिसारश्च अन्धपूतनया शिशो ॥" (रो० वि० बाल०) इति। रेवतीति—"व्रणे स्फोटैश्चित गात्र पङ्गन्ध सवेदसक्। भिन्नवर्चा ज्वरी दाही रेवतीग्रहलक्षणम् ॥" (रो० वि० बाल०) इति।

शुष्करेवतीति ॥ १८०।१८० ॥

तथेति।—चरणभेदा पादरोगा कथिता, ते वातरक्तप्रमुखा रोगेष्वेव बोद्धव्या। वातरक्तादिका इत्यवादिग्रहणेन पादसुप्ति-पादलक्ष पादहर्ष पादस्फुटन-प्रभृतय। रोगेष्विति—श्लीपदादिषु ॥ १८१ ॥

द्विषष्टिर्दोषभेदा स्युरिति।—दोषा वातादय, तेषा भेदा उत्कषादि-

---

* शुष्करेवत्या लक्षण यथा—"जायते शुष्करेवत्या क्रमात् सर्वाङ्गसङ्क्षय। कोशशातोऽन्नविद्वेष खरदैन्य विवर्णता ॥ रोदन गद्गगत्वित्व दीर्घकालानुवर्त्तनम् ॥" (वा० उ० ३५०) इति।

तेऽपि रोगेषु गणिताः पृथक्प्रोक्ता न ते क्वचित् ॥ १८२ ॥

विकल्पनादातेनेत्युच्यते (१) * तत्र वातादीनां दोषाणां क्षीणभेदा पञ्चविंशतिः, तावन्त एव वृद्धानां दोषाणां भेदाः, एवं क्षीणवृद्धानां दर्शिताः। एकैकवृद्धिसमता-चये कृत्वा षड्भेदाः, एकवृद्धिद्वन्द्वचयेन त्रयो भेदाः, द्विवृद्धेकचयेन त्रयो भेदाः, एवं त्रिषष्टिर्दोषभेदाः कथिताः। केचित्तु दोषाणां साम्यमपि एकविधभेद इत्यनेन

* 'पृथक् त्रीन् त्रिधि संसर्गान्त्रिधा तत्र तु तान् नव। त्रीनेव समया वृद्ध्या षडेकक्षात्यतिशयने ॥ त्रयोदश समसंख्येषु षट् द्व्येकातिशयेन तु। एक तुल्याधिके षट् च तारतम्यविकल्पनात् ॥ पञ्चविंशतिमित्येवं वृद्धे क्षीणेऽथ तावत। एकैकवृद्धि समता चये षट् ते पुनश्च षट् ॥ एकत्रयद्वन्द्ववृद्ध्या सर्वेषर्ययथाऽपि ते। भेदा त्रिषष्टि-र्निर्दिष्टास्त्रिषष्ट ख्याख्यकारणम् ॥" (वा० सू० १२ अ०) इति। तथा च—वातो वृद्ध पित्त वृद्ध श्लेष्मा वृद्ध एवं पृथक् त्रयो दोषा। वातपित्ताधिक संसर्ग, वातकफाधिक. संसर्ग, पित्तकफाधिक संसर्ग, एवं सम त्रिदोषवृद्ध्या त्रय। वातो वृद्ध पित्त वृद्धतर, पित्त वृद्ध वातो वृद्धतर, कफो वृद्ध पित्त वृद्धतर, पित्त वृद्ध कफो वृद्धतर, कफो वृद्ध वातो वृद्धतर, वातो वृद्ध कफो वृद्धतर, एवमेकातिशयत्रिदोषवृद्ध्या षट् संसर्गभेदा, इति नव संसर्गभेदा। कफो वृद्ध वातपित्तमधिक वृद्धम्, पित्त वृद्ध वातकफावतिवृद्धौ, वातो वृद्ध पित्तकफावतिवृद्धौ, पित्तकफौ वृद्धौ वातोऽतिवृद्ध, वातकफौ वृद्धौ पित्तमतिवृद्धम्, वातपित्ते वृद्धे कफोऽतिवृद्ध इति द्व्येकातिवृद्धौ षट् सन्निपातभेदा। वातो वृद्ध पित्त वृद्धतर कफो वृद्धतम, वातो वृद्ध कफो वृद्धतर पित्त वृद्धतमम्, पित्त वृद्ध कफो वृद्धतर वातो वृद्धतम, पित्त वृद्ध वातो वृद्धतर कफो वृद्धतम, कफो वृद्ध वातो वृद्धतर पित्त वृद्धतमम्, कफो वृद्ध पित्त वृद्धतर वातो वृद्धतम, एवं तारतम्यविकल्पनात् षट् सन्निपातभेदा, एकस्य समवृद्धवात-पित्तकफा, एवं त्रयोदशसन्निपातभेदा, ततश्च वृद्धेदोषे पञ्चविंशतिभेदा ज्ञेया। वात क्षीण पित्त क्षीण कफ क्षीण इति क्षीणे पृथक्त्रय। क्षीणवातपित्ते, क्षीणपित्तकफौ, क्षीणवातकफौ एवं समक्षीणदोषक्षीणत्वेन त्रय। वात क्षीण पित्त क्षीणतर पित्त क्षीण वात क्षीणतर, वात क्षीण कफ क्षीणतर, कफ. क्षीण वात क्षीणतर, कफ क्षीण पित्त क्षीणतर, पित्त क्षीण कफ. क्षीणतर, एवमेकातिशयत्रिदोषक्षीणत्वेन षट् इति नव संसर्गभेदा। वात क्षीण पित्तकफौ अतिक्षीणौ, पित्त क्षीण वातकफौ अतिक्षीणौ, कफ क्षीण वातपित्ते अतिक्षीणे, वातपित्ते क्षीणे कफोऽतिक्षीण., पित्तकफौ क्षीणौ वातोऽतिक्षीण., वातकफौ क्षीणौ

पञ्चदशपञ्चकर्मजरोगाणां निर्देशः।—

हीनमिथ्यातियोगैस्तु भेदैः पञ्चदशोदिताः।

त्रिषष्टिर्दोषभेदा भवन्ति इति वदन्ति इति। * तत्र सन्निपातभेदेन ज्ञातव्यम्, तदुक्तं —"द्वयुल्बणैकोल्बणैः षट् त्रयुल्बैर्नमध्याधिकैश्च षट्। समैश्चैको विकाराख्यो सन्निपाता-स्त्रयोदश॥" (च० सू० क्रियन्त शिरसीय०) इति। तन्त्रान्तरेऽपि यथा—"त्रिधाष्टधा वदन्त्येते भूयिष्ठमिति निश्चय। त्रय एव पृथक् दोषा त्रिधा नव समाधिके॥ त्रयोदशाधिकैकाह-समसंख्योल्बणैस्त्रिभिः। पञ्चाशदेवन्तु सह भवन्ति त्रयमागते॥ चीणसंख्याधिकचीणचीणहेतुस्त्रयाऽपरे। द्वादशैव समाख्यातास्त्रयो दोषा त्रिषष्टिधा॥" (सु० उ० ६६ अ०)। तेऽपीति—ते त्रिषष्टिर्दोषभेदा रोगेषु गणिता, अत क्वचित् कुत्रापि ते न पृथक् प्रोक्ता, न ह्येतेषां त्रिषष्टिभेदानां सर्वं रोगान्तर्गतत्वात् पृथगुपादानमिति भाव॥ १९२॥

पित्तमतिचीणम्, एव श्लेष्मातिचीणे षट्सन्निपातभेदा। कफ चीण पित्तं क्षीणतर वात चीणतम, वात चीण कफ चीणतर पित्त चीणतमम्, पित्त चीण कफ चीणतर वात चीणतम, कफ चीण वात चीणतर पित्त चीणतमम्; वात चीण पित्त चीणतर कफ चीणतम, पित्त चीण वात चीणतर कफ चीणतम एव तारतम्यविकल्पनात् षटसन्निपातभेदा, एकस्य समचीणवातपित्त-कफा इति त्रयोदशसन्निपातभेदा, ततश्च चीणदोषे पञ्चविंशतिभेदा ज्ञेया। वातो वृद्ध पित्त सम कफ चीण, पित्त वृद्ध वात सम कफ चीण। कफो वृद्ध, पित्त सम वात चीण, कफो वृद्ध वात सम पित्त चीणम् वातो वृद्ध कफ सम; पित्त चीणम, पित्त वृद्ध कफ सम वात चीण इत्येकैकवृद्धिसमतात्रये षट्। वात चीण पित्तकफौ वृद्धौ, पित्त चीण वातकफौ वृद्धौ, कफ चीण वातपित्ते वृद्धे, इत्येकत्रयद्वन्द्ववृद्धा त्रयो भेदा। वातपित्ते चीणे श्लेष्मा वृद्ध, वातकफौ चीणौ पित्त वृद्धम, पित्तकफौ चीणौ वातो वृद्ध इति द्वन्द्वत्रयैकवृद्धा त्रयो भेदा एव त्रिषष्टिधा दोषभेदा ज्ञातव्या इति।

* तत्र सन्निपातभेदेन ज्ञातव्यमिति टीकाकारोक्तिं सङ्कुचते, त्रिषष्टितमस्य स्वाख्यकारणात् सन्निपाते स नान्तर्भवितुमर्हति। "समैश्चैको" इत्यनेन सन्निपात-भेद यत दोषसाम्यमुक्त तत् समवृद्धत्रिदोषजन्य समचीणत्रिदोषजन्य वा अवगन्तव्यम्, तथा च—"त्रिषष्ट स्वाख्यकारणम्" (वा० सू० १२अ०) इति।

पञ्चकर्मभवा रोगा रोगेष्वेव प्रकीर्त्तिताः ॥ १९३ ॥

अष्टादशक्लेदादिजव्यापदां निर्देशः ।—

क्लेदस्वेदौ तथा धूमो गण्डूषोऽञ्जनतर्पणे ।
पीडा अष्टादशैतज्ज्ञास्ताश्च रोगेषु लक्षिताः ॥ १९४ ॥

चतुर्विंशशीतादुपद्रवाणां निर्देशः ।—

शीतोपद्रव एकः स्यादेकश्चोष्णोद्भवो मतः ।
शल्योपद्रव एकश्च चारात्त्रैकः स्मृतस्तथा ॥ १९५ ॥

हीनेति ।—पञ्चकर्मभवा रोगा इति—वमन-विरेचन-निरूहानुवासन-नस्यानीति पञ्चकर्माणि, तज्जाता रोगा रोगेष्वेव ज्ञातव्या । रोगता च तेषां हीनमिथ्यातियोगत्वाद्भवति । एतेन किमुक्तम् ? यदा वमनादिकं हीनमिथ्यातियोगेन कृतं तदा रोगः स्यात्, तदुक्तं—"हीनमिथ्यातियोगेन यदा भवति देहिनाम् । पञ्चकर्म तदा नृणां रोगोत्पत्त्यै च केवलम् ॥" इति । अत एव प्रत्येकं विभेदेन पञ्चदशभेदाः पूर्य्यन्ते ॥ १९३ ॥

क्लेद इति ।—क्लेदादीनामपि अष्टादशपीडाभेदा कथिताः । अत्रापि हीनमिथ्यातियोगैरिति सम्बन्धः, तेनात्राष्टादशभेदाः पूर्य्यन्ते । पीडाश्च दोषरूपाः । क्लेदोऽत्र क्लेदनम् । स्वेदः प्रसिद्धः । धूमो धूमपानम् । गण्डूषः कवलपर्य्यायः । अञ्जनं नेत्राञ्जनम् । तर्पणं धातुतृप्तिजनकं नेत्रान्तर्पणं वा । एते तु यदा हीनमिथ्यातियोगादिभिः प्रयुक्तास्तदा रोगाय भवन्तीत्यर्थः ॥ १९४ ॥

शीतोपद्रव इति ।—अतिशीतेन जनित उपद्रवः, अतिशीतः कालः, अतिशीतो देशः, अतिशीता क्रिया चेति । एक उष्णोद्भव इति—अत्युष्णेन जनित उपद्रव इत्यर्थः । अत्रापि उष्णकालः, उष्णो देशः, उष्णा क्रिया चेति । एक शल्योपद्रव इति—सर्वशरीरावाधकरं शल्यं, तच्च द्विविधं, शारीरमागन्तुकञ्चेति, तदुक्तं—"शारीरागन्तुकञ्चैव द्विविधं शल्यमुच्यते" इति । तत्र शारीरं दशनखादि धातवोऽश्मनखादि दोषाश्च दृष्टाः । आगन्तुकमपि शारीरशल्यव्यतिरेकेण यावन्तो भावा दुःखमुत्पादयन्ति । अधिकारो हि लोहवैणवलक्षणशल्यास्थिनयेषु । एक चारात्रेति—उपद्रव, तथेति वचनात् । एतेन किमुक्तम् ? स चारो यदा अन्यैः प्रयुक्तस्तदा रोगाय भवतीति तात्पर्य्यार्थः, तदुक्तं—"विषाग्निशस्त्राशनिसत्यकल्पः चारो भवत्यन्यतमप्रयुक्तः । स चीयतां सम्यगतप्रयुक्तो रोगान् निहन्यादचिरेण घोरान् ॥" (सु० सू० १८अ०) इति ॥ १९५ ॥

विविधविषाणां विवरणम्।—

स्थावरं जङ्गमञ्चैव कृत्रिमञ्च त्रिधा विषम्।
तेषाञ्च कालकूटाद्यैर्नवधा स्थावरं विषम्॥ १८६॥
जङ्गमं बहुधा प्रोक्तं तत्र लूता भुजङ्गमाः।
वृश्चिका मूषिका कीटाः प्रत्येकं ते चतुर्विधाः॥ १८७॥

विषभेदानाह, स्थावरमिति।—स्थावरजङ्गमकृत्रिमभेदेन त्रिविधविषाणि इति पिण्डार्थः। तत्र स्थावरविषं यन्नवधा कालकूटप्रभृतिभि स्वीकृतं तद्विज्ञानमाह, यदुक्तं—"कालकूटो वत्सनाभः शृङ्गिकश्च प्रदीपनः। हालाहलो ब्रह्मपुत्रो हारिद्र शक्रकस्तथा॥ सौराष्ट्रिक इति प्रोक्ता विषभेदा अमी नव॥" इति। नवधेति अवातिप्रसिद्धत्वात् सङ्ग्रह, केषाञ्चिन्मते अष्टादशभेदा भवन्ति, तेषु दश जातय-स्त्याज्या अष्टौ याह्या इति, तथा हि—"शक्रक मुस्तक शृङ्गी वालुक सर्षपाह्वयम्। वत्सनाभ काश्यपञ्च श्वेतशृङ्गी तथाऽष्टमम्॥ इत्यष्टौ योजयेत योगे कालकूटादि वर्जयेत्॥" इति। तद्यथा—"कालकूट मेषशृङ्गी हालाहलञ्च दर्दुरम्। कर्कट शक्रं ब्रह्मि हारिद्र रक्तशृङ्गिकम॥ कैशर दशमञ्चेति वर्जनीय विषञ्चरै॥" इति। वर्जनीयत्वमेषामत्यन्तदुष्टिकरत्वात। निर्विषेऽपि शार्ङ्गधरेणाव सङ्गृहीत प्रसिद्धत्वात। जङ्गम बहुधा प्रोक्तमित्यादि—जङ्गम सर्पादिसम्भव भवेदिति सम्बन्ध। तत्र लूता "मकडी" शब्दवाच्य, कीटविशेषा वा। भुजङ्गमा सर्पाश्चे पानेकविधा। वृश्चिकमूषिकौ प्रसिद्धौ। कीटा अपि नानाविधा नानाऽऽकृतयश्च। तेषा स्वरूप न लिखितमत्र विस्तरभयात्। प्रत्येक ते चतुर्विधा इति—ते लूतादय, चतुर्विधा इति जरायुजाण्डजस्वेदजोद्भिज्जा प्रत्येक, * यत चतुर्णा निपतितानाम् ऊष्माण विना कस्यचित् सिद्धिर्नास्ति इति न्यायेन सर्वे भुव शरीरस्य च स्वेदाज्जाता। अन्येऽपि—† "यथा पक्षिषु बलाका जरायुजा अण्डजासु, सर्पजातिषु अहिपताका जरायुजा',

---

* यत्योऽयं डल्हनेन "स्वेदजजरायुजाण्डजोद्भिज्जसञ्ज्ञ" इति सौश्रुतपाठे स्वेदजस्य प्रथमनिर्देशहेतुं प्रदर्शयितु लिखितोऽस्ति "चतुर्णा निपतितानाम ऊष्माण विना कस्यचित् सिद्धिर्नास्ति इति सस्वेदजस्य प्राक् निर्देश" इति, अतो नायमत्र सङ्गच्छते। किञ्च "इति न्यायेन—" इत्यादि यत्योऽपि नात्र सङ्गच्छते, सस्वेदज इत्यस्य व्याख्याया "भुव, शरीरस्य च सस्वेदादूष्मणो जाता;" इति डल्हनेन व्याख्यातम्।

† अस्मापि अत्रोल्लेखो जरायुज इव प्रतिभाति, यत, "जरायुजाण्डजस्वेद-

दंष्ट्राविषं नखविषं बालशृङ्गास्थिभिस्तथा।
मूत्रात् पुरीषाच्छुक्राच्च दृष्टेर्निश्वासतस्तथा॥ १६८॥
लालायाः स्पर्शतस्तद्वत्तथा शृङ्गाविषं मतम्।
कृत्रिमं द्विविधं प्रोक्तं गरदूषीविभेदतः॥ १६९॥

स्वेदजेष्वपि काश्चित पिपीलिका अण्डजा उद्भिज्जाश्च" इत्यनेन योनिसङ्करीत्पत्तित्वा-चतुर्विधत्वम। यद्वा—वातपित्तकफसन्निपातात्मानस्ते *सङ्गविषाश्चतुर्विधा भवन्तीत्येके। तदपि न सर्वमत, किन्तु सर्वजातय एव भवन्तीत्यन्ये. तदुक्त—"वातपित्तकफात्मानो भोगिमण्डलिराजिला" (री० वि० विष०) इत्यादि। सुश्रुते तु द्विदोषकरमेव चतुर्थम्, तथा हि—"कोपयत्यनिल जन्तो फणिन सर्व एव तु। पित्त मण्डलिन-श्चापि कफञ्चानेकराजय॥ अपत्यमसवर्णाभ्यां द्विदोषकरलक्षणम्॥" (सु० क० ४ अ०) इति। दंष्ट्राविषमित्यादि—एतेषा मध्ये केचित दंष्ट्राविषा, केचिन्नखविषा, केचित् बालशृङ्गास्थिविषा इत्यादयो ज्ञातव्या, तथा हि—"भौमसर्पाणा दंष्ट्रा-विषम्। मार्जारमकरव्याघ्रादयो दंष्ट्रानखविषा। विषदष्टास्थिमज्जास्थिप्रभृतयो-ऽस्थिविषा.। पिच्छिटकौण्डिन्यादयो मूत्रपुरीषविषा। मूषिका शुक्रविषा। दिव्या. सर्पा दृष्टिनि श्वासविषा। वृश्चिकवरट्युच्चिटिङ्गादयो † लालाविषा। लूता लालाऽऽस्यविषमूत्रशुक्रमुखसन्दशविषा इति। तथा शृङ्गाविषं मतमिति—तथैवोक्त-प्रकारेणैव शृङ्गाविषमपि उपद्रवकर भवति। कृत्रिमं द्विविध प्रोक्तमित्यादि—कृत्रिमं विष गरदूषिभेदात द्विप्रकारं कथितम्, गर गरली (?) तस्य "दिनाः" शब्दवाच्यम्। तन्त्रान्तरे यथा—"सौभाग्यार्थं स्त्रिय स्वेद-रजोनालाङ्गजान् मलान्। शत्रु-प्रयुक्ताश्च गरान् प्रवच्मन्यन्नमिश्रितान्॥" (च० चि० विष०) इत्यादि। दूषी-

---

ओद्भिज्ज" इति सौश्रुतपाठव्याख्याया डल्हनेन प्रागुक्तस्य स्वेदजजरायुजेत्यादिक्रमस्य परित्यागे हेतुनिर्देशार्थम् उक्त, यथा—"जरायुजादिषु पूर्वोक्तसंस्वेदजादिक्रमत्यागो योनिसङ्कर बोधयति, तेन पक्षिषु बलाका" इत्यादि। "योनिसङ्करीत्पत्तित्वात् चतुर्विधत्वम्" इत्यस्य अर्थोऽपि न सुबोध।

* "सङ्गविषा" इत्यत्र "सर्पविषा" "सर्वजातय" इत्यत्र च "सर्पजातय" इति पाठ सङ्गत इति मन्ये।

† लालाशब्दोऽत्र आलवाचक, सुश्रुते आलविषा. क्वचित्र आरविषाः इति पाठात्। तथा वरटी शुक्रतुण्डविषा इति च सुश्रुते।

सप्त धातुविषं ज्ञेय तथा सप्तोपधातुजम्।
तथैवोपविषेभ्यश्च जात सप्तविध मतम्॥ २००॥
दुष्टनीरविषञ्चैक तथैक दिग्धज विषम्।
कपिकच्छुभवा कण्डूर्दुष्टनीरभवा तथा॥
तथा शूरणकण्डूश्च शोथो भल्लातजस्तथा॥ २०१॥

विषमपि देशकालादिदूषणात कथितम्, तदयथा—"दूषित दशकालान्न-दिवास्वप्नै रभोक्षश्च। यस्मात् सन्दूषयेद्वातून्तस्माद्दूषीविष स्मृतम्॥" (सु० क० २ अ०) इति। एके द्विविधमित्यस्य स्थाने विविधमिति पठन्ति, व्याख्यानयन्ति च—विविध नानाप्रकारम्। एके द्विविध कृत्रिममन्यथा व्याख्यानयन्ति, तदयथा—"एक सविषद्रव्यसयोगकृत कृत्रिमसज्ञ विषम्, अपर निर्विषद्रव्यसयोगकृत गरसज्ञम्, यदाह काश्यप,—सयोगजश्च द्विविध तृतीय विषमुच्यते। गर स्यादविष तत्र सविष कृत्रिम मतम्॥" इति। अत एव चरक * रसायने—"दष्टाविषे मूलविषे सगरे कृत्रिमे विषे" (च० चि० उदर०) इति। धातवोऽत्र सुवर्णरजतादय, त यदा अशुद्धा भक्षितास्तदा विषतुल्या इति तात्पर्यार्थ, यद्म विषादजनकत्वाद्विषम्, तथा सप्तोप-धातुज, विषमिति शेष, उपधातवो हरितालाद्या। तथैवोपविषेभ्यो जात सप्तविध, विषमिति शेष, उपविषमत्रार्कसेहुण्डप्रभृतिकम्, यदुक्तम्—"अर्कसेहुण्डधुस्तूर-लाङ्गलीकरवीरक। गुञ्जाहिफेन इत्यता सप्तोपविषजातय॥" (रसेन्द्रसार १ अ०) इति। दुष्टनीराणि व्यापन्नपानीयानि, तज्जनित विष, विषादजनकत्वात, तत्तु बाह्याभ्यन्तर भवति, बाह्य स्नानादिना, आभ्यन्तरन्तु पानादेव, तदयथा—"न पिबेत् पङ्कशैवाल-दृणपर्णाविलाहृतम्। सूर्येन्दुपवनाद्दुष्टमभिघ्रष्ट घन गुरु॥ फेनिलं जन्तुसङ्घैश्च दग्धाद्यैतिशैत्यत। अनार्त्तवच्च यद्दिव्यमार्त्तव प्रथमच्च यत॥ लूतादितन्तु-वस्रुत्र-विषम श्लेष्मदूषितम्॥" (वा० सू० ४ अ०) इति। तथैक दिग्धज विषमिति —विषलिप्त शस्त्रादिक दिग्ध कथित, तज्जनित विषम्, तेन विषलिप्तशस्त्रहतो जन्तुर्दिग्धाहत कथित। कपिकच्छुभवा कण्डूरिति—कपिकच्छु वानरी तस्या फल तज्जनिता कण्डू खर्जू, इयमपि कण्डूर्द्रव्यसयोगजाऽल्पदोषा, न तु कृच्छ्रोक्ता। दुष्टनीर-भवा तथेति—दुष्टनीराणि पूर्वाख्यातानि, तज्जनिता कण्डूरपि दु खकरा भवती-त्यभिप्राय। तथा शूरणकण्डूश्चेति—शूरण कन्दविशेष प्रसिद्ध एव, तेनापि सञ्जाता

* श्लोकोऽय चरके रसायनाधिकारे न दृश्यते।

विषोपमविविधमदरोगाणां विवरणम्।—

मदश्चतुर्विधश्चान्यः पूगभङ्गाच्चकोद्रवैः।
चतुर्विधोऽन्यो द्रव्याणां फलत्वङ्मूलपत्रजः॥ २०२॥
इति प्रसिद्धा गणिता ये किलोपद्रवा भुवि।
असङ्ख्याश्चापरे धातु-मूलजीवादिसम्भवाः॥ २०३॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधरेण विरचितायां शार्ङ्गधरसंहितायां निदानस्थाने रोगगणनाध्यायः॥ ७॥

कण्डूरिति। तथा भल्लातज शोथ, इति—भल्लातो भल्लातकफलानि, तस्मादिति शोथो दुःखकरो भवति, स च दोषशोथाद्भिन्न एव॥ १९६—२०१॥

मद इति।—अन्यो मदश्चतुःप्रकारो ज्ञेय, स च पूगभङ्गाच्चकोद्रवैः कृत्वेत्यर्थः। अत्रापि आसवारिष्टाद्भिन्न एव। पूगोऽल्पमदकरः। भङ्गा प्रसिद्धा। अत्र विभीतक-फलमज्जा मदकरत्वात्, तदुक्तं—"तन्मज्जा मदकारकः" इत्यादिवचनात्। कोद्रवाणि मदकराणि प्राग्व्याख्यानि। अन्योऽपि मदो द्रव्याणां फलत्वङ्मूलपत्रज सामान्यो विहितः, फल खाखसफलनिर्व्यूहः, ततफल जातीफलादि मदजनक गृह्यते। लक्षद इत्यादि आकल्लकेरिमेदादिकानाम्, इरिमेदो विट्खदिर; स एव फलमदोऽपि गणितः। आकल्लकोऽपि वक्ष्यमाणमूलमदसङ्ग्रहीतः। मूलमद इति क्षुद्रवदर्भ्या-दीनां मूलं मदकरत्वात्। पत्रमद इति जातिपत्रिकाभङ्गाप्रभृतीनामिति। इति-शब्दः परिसमाप्तौ। किल निश्चयेन, ये उपद्रवा रोगरूपा भुवि पृथिव्यां, प्रसिद्धा सन्ति, तेऽत्र गणिता, शार्ङ्गधरेणेति शेषः। अपरे येऽप्रसिद्धाः, असङ्ख्याश्च सन्ति, तेऽप्यनुमानतो ज्ञातव्या इत्यर्थः, ते के? धातुमूलजीवादिसम्भवा इति—धातव पार्थिवाः, ते सुवर्णरजतमणिमुक्तामन शिलाहरितालमृत्पाषाणादयः। मूल-शब्देन स्थावरा गृह्यन्ते, तेऽपि चतुर्विधाः, वनस्पतयो वृक्षा वीरुध ओषधय इति। ननु लोकस्य द्वैविध्यत्वेन पार्थिवा अपि स्थावरशब्देन वाच्याः, तत कथमत्र पृथगुपा-दानम्? उच्यते—येषु आहारौषधयोगित्व फलमूलादयवयवेषु प्रधानतया, तत्रैव चतुर्विधे वनस्पत्यादिगणे स्थावरशब्दो वर्त्तते न तु पार्थिवेष्वपि, तेषामाहारेषु प्रायेणानुपयोगात्। जीवादिसम्भवा इति—जीवशब्देन जङ्गमा गृह्यन्ते, तेऽपि चतुर्विधा

शार्ङ्गधरसंहितायाम् ।

अथ मध्यखण्डः ।

चिकित्सितस्थानम् ।

प्रथमोऽध्यायः ।

स्वरसादिकल्पना ।

पञ्चकषाया ।—

अथातः स्वरसः कल्क क्वाथश्च हिमफाण्टकौ ।
ज्ञेयाः कषायाः पञ्चैते लघव स्युर्यथोत्तरम् ॥ १ ॥

भवन्ति, ते जरायुजाण्डजस्वेदजोद्भिज्जा इत्यर्थः । आदिग्रहणात् प्रवातनिवातातपच्छायाऽभ्रास्रातम'शीतोष्णवर्षाप्रभृतय । एते त्रयस्त्रिविधिसेवनात् दुःखकरा इत्यभिप्राय ॥ २०२।२०३ ॥

विविधमुनिनिबन्धा ये महत्सु प्रसिद्धा सुमतिदुरवबोधास्ते मया नैव दृष्टा ।
तदपि गुरुसकाशात् यच्छ्रुत तत्र लेखि ह्यढमलभिषजाऽस्था भावमिश्रात्मजेन ॥

इति चौवास्तव्यान्वयप्रकाशवैद्यश्रीभावमिश्रात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां पूर्वखण्डे रोगगणनाऽध्याय सप्तम ॥ ७ ॥

इति शार्ङ्गधरसंहितायां पूर्वखण्डः समाप्तः ।

अथ मध्यखण्ड प्रारभ्यते, तत्रादौ कषायसञ्ज्ञकल्पम् (१) आह, अथात इति ।—अथशब्दो मङ्गलार्थ । अत इति—प्रथमखण्डानन्तरम् । एते पञ्चकषाया ज्ञेया, ते यथोत्तरं लघव' स्युरिति—यो यस्मादुत्तरो यथोत्तरम, ते के ? स्वरसकल्कक्वाथहिमफाण्टसज्ञा' । स्वरस इति—सद्यो रस । कल्को इत्यादि पेषित । क्वाथः क्वथित कषाय । हिम इति—शीतकषाय । फाण्ट इति—जलप्लावितं चूर्णम् ॥१॥

स्वरसलक्षणम्।—

आहतात्तत्क्षणाकृष्टाद्द्रव्यात् क्षुण्णात् समुद्भवः।
वस्त्रनिष्पीडितो यः स रसः स्वरस उच्यते ॥ २ ॥

स्वरसानुकल्प।—

कुडवं चूर्णितं द्रव्यं क्षिप्तञ्च द्विगुणे जले।
अहोरात्रं स्थितं तस्माद्भवेद्वा रस उत्तमः ॥ ३ ॥

स्वरसानुकल्प।—

आदाय शुष्कद्रव्यं वा स्वरसानामसम्भवे।
जलेऽष्टगुणिते साध्य पादशिष्टञ्च गृह्यते ॥ ४ ॥

स्वरसव्यापत्सु मात्रा।—

स्वरसस्य गुरुत्वाच्च पलमर्द्धं प्रयोजयेत्।
निर्गोषितञ्चाग्निसिद्धं पलमात्रं रसं पिबेत् ॥ ५ ॥

अथ तेषु पूर्वं स्वरसकल्पनामाह, तल्लक्षणं यथा आहतादिति।—ईदृशात् द्रव्यात् समुद्भवो रस स्वरस इत्युच्यते। कीदृशात्? तमाह—आहतात् क्षतात् शस्त्रकालीकृतात्। तत्क्षणाकृष्टादिति—सद्य उत्पाटितात्। क्षुण्णादिति—उदूखलादिषु मुषलादिभि कुट्टितात्। वस्त्रनिष्पीडित इति—पटेन परिस्रुत, रस इति शेष। द्रव्यादिति—सामान्यग्रहणेनात्र लघुमूलफलादीना ग्रहणम् ॥ २ ॥

लक्षणान्तरमाह, कुडवमित्यादि।—चेति—पक्षान्तरेणापि स्वरस कथित, स यथा—कुडवप्रमाण चूर्णीभूतद्रव्य द्विगुणजले क्षिप्तमहोरात्र स्थित भवति, तस्मात् यो रसो जात उत्पन्न सोऽपि स्वरस उत्तमो ज्ञेय। कुडवग्रहणमत्र सकलमानद्योतनार्थम्। अहोरात्रग्रहणेनैव हिमकषायाद्विन्नो ज्ञातव्य ॥ ३ ॥

मतान्तरमपि तदयथा, आदायेत्यादि।—स्वरसानामसम्भवे अविद्यमाने शुष्कद्रव्य क्षुण्ण यथापरिमाणमादाय गृहीत्वा अष्टगुणितपानीये साध्य क्वाथ्यमित्यर्थ, तस्मात् यत पादावशेष भवति तस्यापि स्वरससज्ञा। यथापरिमाणादिना क्वाथाद्विन्नमेतत् ॥ ४ ॥

इदानीमनुक्तेषु पानार्थं परिमाणपूर्वक प्रयोगमाह, स्वरसस्येति।—स्वरसस्य आद्यस्य अर्द्धं पल प्रयोजयेत्, पानार्थमित्यर्थ। निर्गोषितमग्निसिद्धञ्च स्वरसं पलमात्र पिबेदित्यर्थ, तयो किञ्चिल्लघुत्वात् ॥ ५ ॥

रसे मध्वादीना प्रक्षेपमात्रा।—

मधु क्षेता गुडं चारान् जीरक लवणं तथा।
घृतं तैलञ्च चूर्णादीन् कोलमात्रान् रसे क्षिपेत् ॥६॥
स यथा—

प्रमेहे रसत्रयम्।—

अमृताया रसः क्षौद्र-युक्तः सर्वप्रमेहजित्।
हरिद्राचूर्णयुक्तो वा रसो धात्र्या समाक्षिकः ॥ ७ ॥

तत्र प्रक्षेपमाह, मध्वित्यादि।—मध्वादिकं कोलमात्रं यथा स्यात्तथा क्षिपेत्। कोल पलस्य चाष्टांशम्। मध्विति सामान्यग्रहणेन तज्जातयोऽष्टौ गृह्यन्ते, तदुक्तं यथा—"पौत्तिकं भ्रामरं क्षौद्रं माक्षिकं छात्रमेव च। आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥" (सु० सू० ४५ अ०) इति। एवमग्रेऽपीक्षौ सर्वत्र। क्षेता सितशर्करा। गुड प्रसिद्ध, तदुपलक्षितत्वेनान्ये इक्षुविकारा यथादोषापेक्षया गृह्यन्ते। चारानिति—बहुवचनत्वेन सर्वे चारा, अनुक्ते यवचारमेव सर्वत्र। जीरक प्रसिद्ध, सामान्यग्रहणेन पीतकृष्णादिकम्, अविशेषे श्वेतजीरकमेव। लवणमपि सामान्येन पञ्चलवणानि गृह्यन्ते, तदयथा—"सिन्धुसौवर्चलोपेतं विडं सामुद्रजोद्भिदम्' इति। अनुक्ते सैन्धवमेव ग्राह्यं सर्वत्र। घृत तैलं पक्वापक्वं नानाविधम्। तत्रानुक्ते तु गव्यं घृत तिलतैलञ्च प्रधानमिति, तथा हि—'घृतेषु गोघृत श्रेष्ठं तैलेषु तिलजं तथा" इति। चूर्णादीनिति—व्योषचूर्णादीन्। आदिग्रहणेन चीरमूत्रारिष्टक्षारादयो रोगापेक्षया गृह्यन्ते, यथा—गुटिकावलेहादयोऽप्यादिशब्देन ग्राह्या ॥ ६ ॥

अथ व्याधिप्रत्यनीकार्थं बहून् रसान् दर्शयन्नाह, स यथेति।—स यथा इत्यादिवाक्येन प्रयोगान् प्रकटयति ग्रन्थकार, अथवा—गुणयुक्तिज्ञापनार्थं शिष्यवचनमिदम्। एवं सर्वत्र "स यथा" इति ज्ञातव्यम्। रसत्रयाह, अमृतायाः इति।—अमृता गुडूची तस्या रस सद्योरस। क्षौद्रयुक्त इति—मधुप्रक्षिप्त। सर्वप्रमेहेति—विंशतिमेहा। प्रथमेगान्तरमाह, हरिद्रेति।—धात्र्या रस सद्यस्क क्वथितो वा हरिद्राचूर्णयुक्तो मधुयुक्तश्च। वा-ग्रहणेनायमपि सर्वप्रमेहजिद्भवतीति तात्पर्यार्थं। * वा-ग्रहणेन हरिद्राया कल्कमपि देयम्;

---

* वा शब्दोऽयं पूर्वयोगापेक्षया, न तु हरिद्राया. कल्कयोधनपर.। कल्कस्तु चूर्ण-

रक्तपित्तादौ खरस ।—

वासकस्वरस पेयो मधुना रक्तपित्तजित् ।
ज्वरकासक्षयहर कामलाश्लेष्मपित्तहा ॥ ८ ॥

कामलाया खरसा ।—

त्रिफलाया रसः क्षौद्र-युक्तो दार्वीरसोऽथवा ।
निम्बस्य वा गुडूच्या वा पीतो जयति कामलाम् ॥ ९ ॥

विषमज्वरेषु खरसद्वयम् ।—

पीतो मरिचचूर्णेन तुलसीपत्रजो रसः ।
द्रोणपुष्पीरसो वाऽपि निहन्ति विषमज्वरान् ॥ १० ॥

रक्तातीसारे खरस ।—

जम्ब्वाम्रामलकीनाञ्च पल्लवोत्थो रसो जयेत् ।

तथा च तन्त्रान्तरे—"निम्बाकल्कयुतो धात्री-रसो वा माक्षिकान्वित । मधुना त्रिफलाचूर्ण प्रमेहाणां विनाशनम् ॥" इति ॥ ७ ॥

वासक इत्यादि ।—वासक, आटरूषक, तस्य पचाङ्गानि इति व्यवहारात् । मधुनेति प्रक्षेप । अयञ्चौषधी रक्तपित्ते विशेषेण योज्य । शेष सुगम ॥ ८ ॥

त्रिफलाया इति ।—त्रिफलादीना चतुर्णा खरसा कामला घ्नन्तीति । तत्र त्रिफलादाव्यौ, क्वथितरस, निम्बगुडूच्योस्तु सद्योरस एव । मधुप्रक्षेप एषु चतुर्षु योगेषु ज्ञेय । त्रिफला विख्याता, सा च हरीतक्यादिका । यद्यपि त्रिफलाशब्देन द्राक्षाकाश्मर्यपरूषकाण्युच्यन्ते, तदुक्त—"पथ्याविभीतधात्रीभिस्त्रिफला सहतौ मृता । द्राक्षा काश्मर्यपरूषकफलैर्भवेत् ॥" इति, तथाऽपि सर्वत्र गुण प्राधान्यादवयवीक्तौ हरीतक्यादीन्येव त्रिफलाशब्देन गृह्यन्ते । दार्वी दारुहरिद्रा, तस्याल्कं यास्या, त्वगभावे काष्ठमेवेति सर्वत्र ॥ ९ ॥

विषमज्वरहरयोगमाह, पीत इति ।—द्रोणपुष्पी "गुमा" इति लोके । मरिच-चूर्णमप्यत्र प्रक्षेप्य, तच्च तीक्ष्णत्वान्माषकद्वयमिति व्यवहार । विषमज्वरानिति—ऐकाहिकादीन् ॥ १० ॥

जम्ब्वाम्रेति ।—जम्ब्वादीना पल्लवोत्थो रसो मध्वादिवृक्षोऽतीसार जयेत् ।

शब्दस्य उपलक्षणत्वात् तन्त्रान्तरदर्शनाच्च भावान्त्येव, चूर्णस्यापि कल्कभेदत्वात् इति ।

मध्वाज्यक्षीरसंयुक्तो रक्तातीसारमुल्बणम् ॥ ११ ॥

अतीसारे स्वरसः।—

स्थूलवब्बूलिकापल्ल-रसः पानात् व्यपोहति।
सर्वातिसारान् श्लोनाक-कुटजत्वग्रसोऽथवा ॥ १२ ॥

हृद्ग्रहासादौ स्वरसः।—

आर्द्रकस्वरसः क्षौद्र-युक्तो ह्रषणवातनुत्।
श्वासकासारुचीर्हन्ति प्रतिश्यायं व्यपोहति ॥ १३ ॥

पार्श्वशूलादौ स्वरसः।—

बीजपूररसः पानान्मधुक्षारयुतो जयेत्।

पल्लवत्वेन कोमलपत्राणीत्यर्थः। आज्यं घृतम्। क्षीरं दुग्धम्। एके * "मध्वाज्यक्षीरसंयुक्तम्" इति पठन्ति, व्याख्युक्तत्वात्, तथा हि—"आज्यं शोषज्वरश्वास-रक्तपित्तातिसारजित्" इति। उल्बणमिति—प्रवृद्धं, चिरकालस्थितमित्यन्ये ॥ ११ ॥

स्थूलवब्बूलिकेति।—स्थूलवब्बूलिका आरण्यीलता, तस्या अतिरूक्षत्वादर्द्रकं पर्वतीया इति वदन्ति, सा चोर्द्धशाखाभिरुपलक्षिता प्रसिद्धैव। ["स्थूलवच्छूलिकापत्र-रसपानात्" इति पाठान्तरम्। स्थूलवत् स्थूलवत् शूलिका आनूपलाऽपि इति व्याख्यार्थः, शूलिकेति 'कूलिका" कथिता, उक्तञ्च नाममालायां—"बब्बूल सरल शूली सेलकण्टोऽधिकण्टक" इति। शूलिकाऽल्पविटपा बब्बूरीति लोके]। अथौषधान्तरमाह, श्लोनाकेत्यादि।—श्लोनाककुटजयोस्त्वग्रसौ रक्तसत्कार्यकर इति। श्लोनाकत्वग्रस्य कुटजत्वग्रसो वेति योगद्वयमिति केचित्। अत्रापि मधुप्रक्षेपः, पूर्ववदनुसर्त्तव्यः। सर्वातिसारानिति—सप्तप्रकारानित्यर्थः ॥ १२ ॥

आर्द्रकेति।—आर्द्रकं स्वनाम्ना प्रसिद्धं, तद्रसः क्षौद्रप्रक्षिप्तो ह्रषणवातनुद्भवति। ह्रषणवातोऽण्डवातः, कुरण्ड इति केचित्। प्रतिश्यायं प्रतिश्यावरूपम् (?) ॥ १३ ॥

बीजपूरेति।—बीजपूररसो बीजपूरफलस्वरसः, कीदृशः ? मधुक्षारयुतः, मधु क्षौद्रं, क्षारोऽत्र यवक्षारः। अयं पानात् पार्श्वादिशूलान् जयेत्, नरस्येति शेषः।

---

* अयमेव पाठः साधुः, चक्रसङ्ग्रहे—"जम्ब्वाम्रामलकौनान्तु पल्लवानथ कुट्टयेत्। सङ्कृत्य स्वरसं तेषामजाक्षीरेण पाययेत्॥ तं पिबेत् मधुसंयुक्तं रक्तातीसारनाशनम्॥" इति पाठदर्शनात्।

पार्श्वहृद्बस्तिशूलानि कोष्ठवायुञ्च दारुणम् ॥ १४ ॥

पित्तशूलप्लीहादौ स्वरसौ।—

शतावर्य्याश्च मधुना पित्तशूलहरो रसः।
निशाचूर्णयुतः कन्या-रसः प्लीहापचीहरः ॥ १५ ॥

अपच्यादौ स्वरसः।—

अलम्बुषायाः स्वरसः पीतो हिपलमात्रया।
अपचीगण्डमालानां कामलायाश्च नाशनः ॥ १६ ॥

सूर्य्यावर्त्तादौ स्वरसः।—

स च मुण्ड्याः रसः कोष्णो मरिचैरवधूलितः।
जयेत् सप्तदिनाभ्यासात् सूर्य्यावर्त्तार्द्धभेदकौ ॥ १७ ॥

शूलशब्दः पार्श्वादिभिः सम्बध्यते, तेन पार्श्वशूलं हृच्छूलं बस्तिशूलञ्चेति। बस्तिर्मूत्राधारः। कोष्ठवायुः पक्वाशयगतम्। दारुणं पीडाकरम्। बीजपूर इति सामान्यवृक्षेण तन्मूलक्वथितरूपः स्वरसमित्याहुरेके ॥ १४ ॥

शतावर्य्याश्चेति।—शतावरी प्रसिद्धा, तस्याः स्वरसः। अयं प्रातरेव योज्यः। मधुनेति—मधुमिश्रितः। कन्यारसः कौमारीस्वरसः, "वारि" इति लोके। निशाचूर्णयुत इति—हरिद्राचूर्णप्रक्षिप्तः। प्लीहोपलक्षितलक्षणविशेषः, प्लीहव्याधिरिति लोके। अपचीग्रन्थिभेदः ॥ १५ ॥

अलम्बुषाया इति।—अलम्बुषा मुण्डितिका, तस्याः स्वरसः सद्यः कथितः। हिपलमात्रं कर्षचतुष्टयमितिलघुत्वात्, प्रबलरोगार्थत्वाद्वा। अपचीगण्डमालादर्शोऽपि प्रबलाः एव ॥ १६ ॥

स इति।—*मुण्ड्याः रस इति—मुण्ड्यः केदारमुण्ड्यः, भूमदन्त इति प्रसिद्धः, तस्याः रसः, स च कोष्णः ईषदुष्णः, अत एवात्र क्वथितरसो ज्ञेयः। मरिचस्य तीक्ष्णत्वात् स्वल्पः देयम्। सप्तदिनमेकैकस्मिन् महिना क्रियते। सूर्य्यावर्त्तार्द्धभेदकौ शिरोरोगे प्रसिद्धौ ॥ १७ ॥

---

* "स च मुण्ड्याः रसः" इत्यत्र "अथ मुण्ड्याः रसः" इति गूढार्थदीपिकाधृतपाठः। अर्कस्य रसः उत्कृष्यः रसः कर्त्तव्यः इति तत्र व्याख्या।

उन्मादे स्वरसा।—

ब्राह्मीकुष्माण्डषड्ग्रन्था-ग्रङ्गिनीस्वरसा. पृथक्।
मधुकुष्ठयुता. पीता: सर्वोन्मादापहारिण; ॥ १८ ॥

कोद्रवमदे स्वरस।—

कुष्माण्डकस्य स्वरसो गुड़ेन सह योजित:।
दुष्टकोद्रवसञ्जात-मदं पानात् व्यपोहति ॥ १९ ॥

छिन्नव्रणे स्वरस।—

खड्गादिच्छिन्नगात्रस्य तत्कालं पूरितो व्रण;।
गाङ्गेरुकीमूलरसैर्जायते गतवेदन. ॥ २० ॥

पुटपाकद्रवरसविधि।—

पुटपाकस्य कल्कस्य स्वरसो ग्रह्यते यत'।

ब्राह्मीति।—ब्राह्मीत्यादियोगचतुष्टय सर्वोन्मादहर भवति। ब्राह्मी स्वनाम-ख्याता। कुष्माण्ड कुष्माण्डस्वरस, अभावे क्वथित कुष्माण्डफलम। * षड्ग्रन्था ग्रठी, तदभावे वचा ग्राह्या। *ग्रङ्गिनी नाकुली प्रसिद्धा। एतेषा स्वीरस अभावे क्वथितो वा। † मधुकुष्ठयुत इति प्रत्येक रससम्बन्ध। मधु क्षौद्रम्। कुष्ठ प्रसिद्ध, तच्चूर्णमित्यर्थ। सर्वोन्मादा इति—दीर्णोक्ता भूतोक्ताश्च ॥ १८ ॥

कुष्माण्डकस्येति।—दुष्टकोद्रवसञ्जात दुष्ट मदकर, कोद्रवमन्नविशेष। गुडा-भावे शर्करादयोऽपि योज्या गुडोपलक्षितत्वात ॥ १९ ॥

खड्गादीति।—गाङ्गेरुकी नागबला, तस्या मूलस्वरसेन पत्ररसेन वा पूरित: यथायोग्यपरिमाणेन पूरित, सद्योव्रणो गतवेदनो भवति। तत्कालमिति—छिन्नमात्र तद्दिने वा। स्वरसोऽत्र क्षीरम, न तु क्वाथादिरूप। खड्गादिच्छिन्नगात्रस्येति आदिग्रहणात शक्तिकुन्तादिभिश्छिन्नगात्रस्येत्यर्थ ॥ २० ॥

इदानी पुटपाकस्वरूपस्य रसस्य कर्तव्यताविधिमाह, पुटपाकस्येति।—यतो हेतो पूर्व कल्करूपस्य पश्चात् पुटपाकस्य द्रव्यस्य रसो ग्रह्यते अतस्तस्य

---

* षड्ग्रन्था ग्रब्देन वचैव सर्वत्र ग्रह्यते, न तु ग्रठी इति।

† "मधु कुष्ठ कोलमात्र यथाबलं वा" इति गु० दी०।

अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया ॥ २१ ॥
पुटपाकस्य मात्रेयं लेपस्याङ्गारवर्णता।
लेपश्च द्व्यङ्गुल स्थूलं कुर्याद्द्व्यङ्गुष्ठमात्रकम् ॥
काश्मरीवटजम्ब्वादि-पत्रैर्वेष्टनमुत्तमम् ॥ २२ ॥

पुटपाकस्वरसस्य तत्र प्रक्षेपश्च मात्रा।—

पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत्।
कल्कचूर्णद्रवाद्यास्तु देया स्वरसवत् बुधैः ॥ २३ ॥

स यथा—

कुटजपुटपाकः।—

तत्कालाकृष्टकुटज-त्वक् तण्डुलवारिणा।
पिष्ट्वा चतुष्पलमिता जम्बूपल्लववेष्टिताम् ॥ २४ ॥

युक्तिः कर्त्तव्यविधिरत्रास्मिन् ग्रन्थे मयाऽऽचार्येण उच्यते, अधुनेति शेषः। तदयुक्तिर्यथा, पुटपाकस्य मात्रेति—पुटपाकार्हौ द्रव्यगोलकौ यावत् स्थितौ यावत् लेपः अङ्गारसदृशो भवति, † इयं मात्रा लेपस्येत्यर्थः। लेपोऽपि मृदादिना द्व्यङ्गुलोन्मितः काश्मर्य्यादीनां पत्रैर्वेष्टनञ्च। लेपः गोधूमचूर्णादिना तदङ्गुष्ठमात्रः प्रथमं कार्य्यः, अग्रे वक्ष्यमाणत्वात्, पश्चात् मृदादीनां प्रक्षेपः इत्यर्थः। उत्तममिति—सूचादिवेष्टनेन न्यूनाधिकरहितं वेष्टनमित्यर्थः। काश्मर्य्यादयः प्रसिद्धाः। आदिग्रहणात् विशालतरुचाः पत्रैर्वा वेष्टनं न निषिद्धम् ॥ २१।२२ ॥

अस्यैव पानार्थं मानमाह, पलमात्र इति।—रसः पुटपाकोद्भवः, स पलमात्रः पक्वोन्मितः ग्राह्यः। मधु कर्षप्रमाणं क्षिपेत्। अस्यैव कल्काद्याः पूर्वस्वरसवत् देयाः, प्रक्षेपार्थमिति भावः। द्रवोऽत्र घृतक्षीरतैलादिः, आदिशब्देन पूर्वोक्तानां प्रान्यवन्निष्टानि तान्यत्र ज्ञातव्यानि ॥ २३ ॥

स यथेति वचनात् पुटपाकस्वरसोऽत्र यथा रोगेषु विहितस्तथैव दर्शयन्नाह, तदिति।—कुटजो गिरिमल्लिका, तस्य त्वक् ग्राह्या। तण्डुलवारिणेति—तण्डुलभावनेन।

---

* "पुटपाकस्य मात्रेयम्—" इत्यादिस्थाने "पुटपाकस्य पाकोऽयं लेपस्याङ्गारवर्णता (बहिरारक्तवर्णता)। लेपश्च द्व्यङ्गुलं स्थूलं कुर्याद्द्व्यङ्गुलमात्रकम् ॥" इति तन्त्रान्तरीयपाठो युक्तः।

† इयं मात्रा पाकस्य इत्येव पाठो युक्तः।

सूत्रेण बद्ध्वा गोधूम-पिष्टेन परिवेष्टिताम्।
लिप्त्वा च घनपङ्केन गोमयैर्वह्निना दहेत् ॥ २५ ॥
अङ्गारवर्णाञ्च मृदं दृष्ट्वा वह्निः समुद्धरेत्।
ततो रसं गृहीत्वा च शीतं क्षौद्रयुतं पिबेत् ॥
जयेत् सर्वाननौषधान् दुस्तरान् सुचिरोत्थितान् ॥ २६ ॥

तण्डुलोदकविधि।—

कथितं तण्डुलपलं जलेऽष्टगुणिते क्षिपेत्।
भावयित्वा जलं ग्राह्यं देयं सर्वत्र कर्मसु ॥ २७ ॥

अरलुपुटपाक।—

अरलुत्वक्कृतश्चैव पुटपाकोऽग्निदीपनः।
मधुमोचरसाभ्याञ्च युक्तः सर्वातिसारजित् ॥ २८ ॥

तिन्तिडिपुटपाक।—

न्यग्रोधादेश्च कल्केन पूरयेद्धीरतिन्तिडे।

गोधूमपिष्टेन लेपेन सूत्रेणवत्, सूत्रेणवन्तु द्व्यङ्गुलप्रमितम्। शीतमिति मधुविशेषात्, यत,—'उष्णैर्वृक्षयते क्षौद्रम्" इति। शेषं सुगमम् ॥ २५—२६ ॥

अथाव प्रसङ्गतस्तण्डुलजलस्य विधिमाह, कथितं तण्डुलपलमिति।—कथितस्वस्य तत्र मुषलादिनिरूढस्य कुट्टितमित्यर्थः। अष्टगुणिते जले पलाष्टकपानीये भावयित्वा प्रचाल्य जलं ग्राह्यं तत्तण्डुलजलमिति। एतच्चानुक्तेऽपि सर्वत्र योज्यमित्यर्थः ॥ २७ ॥

अरलुपुटपाकमाह, अरलुरिति।—अरलुः वृक्षविशेषः प्रसिद्ध एव तदभावे श्योनाकः, तस्य त्वक्कृतः पुटपाकरसः केवलः अग्निकरो भवति। चकारात् अत्रापि पूर्ववत् पुटपाकयुक्तिर्ज्ञातव्या। यदा अयमेव रसो मधुमोचरसाभ्यां युक्तस्तदा सर्वातिसारान्जयति। मोचरसः शाल्मलीनिर्यासः ॥ २८ ॥

अथ तिन्तिडिपुटपाकमाह, न्यग्रोधादेरिति।—अस्य विधिस्तु पूर्ववज्ज्ञातव्यः। न्यग्रोधादेरिति—न्यग्रोधादिगणस्य कल्केनेत्यर्थः, तद्यथा—"न्यग्रोधोऽम्बरालस्य

---

१) अरलुरिति श्योनाकस्यैव नामान्तरं, न तु अरलुभाषे श्योनाके कैश्चित् औक्षाकारैर्विक्षिप्तः, न वा निघण्टुकारैर्दृष्टः।

निरन्नमुदरं सम्यक् पुटपाकेन तत् पचेत् ॥
तल्लक्ष्यं रस क्षौद्र युक्तः सर्वातिसारनुत् ॥ २८ ॥

दाडिमीपुटपाक ।—

पुटपाकेन विपचेत् सुपक्वं दाडिमीफलम् ।
तद्रसो मधुसयुक्त सर्वातीसारनाशनः ॥ ३० ॥

बीजपूरादिपुटपाक ।

बीजपूराम्रजम्बूना पल्लवानि जटा पृथक् ।
विपचेत् पुटपाकेन क्षौद्रयुक्तश्च तद्रस ॥
छर्दि निवारयेत् घोरा सर्वदोषसमुद्भवाम् ॥ ३१ ॥

प्रथमधूककपीतनककुभाम्रकाशाम्रवीरकपत्रजम्बूहयपियालमधुकरोहिणीवञ्जुलकदम्ब-बदरोतिन्दुकीशल्लकोलाम्रसावरलोध्रभल्लातकपलाशा नन्दीवृक्षश्च" (सु० सू० ३८ अ०) इति न्यग्रोधादिगण सुश्रुतात। एतेषा व्यस्तसमस्ताना यथालाभ परिभाषोक्ता त्वगादयो ग्राह्या इति वृद्धाना व्यवहार । एके न्यग्रोधादिगृहणेन पल्लवल्कलानि मन्यन्ते, तदयथा—"न्यग्रोधोडुम्बराश्वत्थ-प्लक्षवेतसवल्कलै । पल्लवल्कम्" इत्यादि। गौरवित्तिरेरिति यङ्लोपेगृहण तद्विशिष्टगुणज्ञापनार्थम्, "तित्तिरि सवदोष्णा ग्राही वर्णप्रसादन । हिक्काश्वासानिलहरो विशेषाद्गौरवित्तिरि ॥" (सु० सू० ४६ अ०) इति वचनात। निरन्नमित्यत्र अन्नग्रहणेन यत्किञ्चिदादिकमपि गृह्यते, तैरपि रहितमित्यर्थ ॥ २९ ॥

इदानी दाडिमीपुटपाकमाह, पुटपाकेनेति।—सुपक्वग्रहणम् अम्लत्यक्ष्टयर्थम्, यत अम्लत्वे तल्लाघ्यकर न भवति, तथा हि—"दाडिम दीपन ग्राहि द्विधा स्वाद्वम्लभेदत । तयो स्वादु विदोषघ्नमम्ल वातवलासहृत ॥" इति। तद्रस पुटपाकरस । मधुसयुक्त इति—मधुप्रक्षेपयुक्त ॥ ३० ॥

अथ जटापल्लवपुटपाकमाह, बीजेति।—बीजपूरादीना मिलिता गुणविशेषेण योगद्वयम, एक पल्लवकृतम् अपर जटाकृतञ्च, परस्पराभावविशेषात (१)। पृथगिति ग्रहणेन योगत्रयमेतत्। एतेन किमुक्तम् ? बीजपूरादीना व्यस्ताना पल्लव-पुटपाक जटापुटपाको वा कर्त्तव्य इति तात्पर्यार्थ । घोरामिति—अनिवार्याम्। सर्वदोषसमुद्भवामिति—त्रिदोषजनिताम् ॥ ३१ ॥

वासापुटपाक ।—

पिष्टाना वृषपत्राणा पुटपाकरसो हिम' ।
मधुयुक्तो जयेद्रक्त-पित्तकासज्वरक्षतान् ॥ ३२ ॥

कण्टकारीपञ्चाङ्गपुटपाक ।—

पचेत् क्षुद्रा सपञ्चाङ्गा पुटपाकेन तद्रस' ।
पिप्पलीचूर्णसयुक्त' कासश्वासकफापह' ॥ ३३ ॥

विभीतकपुटपाक ।—

विभीतकफलं किञ्चित् घृतेनाभ्यज्य लेपयेत् ।
गोधूमपिष्टेनाङ्गारैर्विपचेत् पुटपाकवत् ॥ ३४ ॥
तत: पक्व समुद्धृत्य त्वच तस्य मुखे क्षिपेत् ।
कासश्वासप्रतिश्याय-स्वरभङ्गान् जयेत्तत: ॥ ३५ ॥

शुण्ठीपुटपाक ।—

चूर्ण किञ्चित् घृताभ्यक्त शुण्ठ्या एरण्डजैर्दलै: ।
वेष्टितं पुटपाकेन विपचेन्मन्दवह्निना ॥ ३६ ॥
तत उद्धृत्य तच्चूर्ण ग्राह्य प्रात. सितान्वितम् ।

वासापुटपाकमाह, पिष्टानामिति।—पिष्टाना कल्कीभूतानाम्। वृष आटरूषक। हिम इति—शीतल, न तु हिमसज्ञ कषाय। चतसृणां चतम् ॥ ३२ ॥

अथ कण्टकारीपुटपाकमाह, पचेदिति।—क्षुद्रा लघुकण्टकारिका, कीदृशी? ाामाह, सपञ्चाङ्गानिति—मूलत्वक्पत्रपुष्पफलसहितामित्यर्थ। पिप्पली चाह वल्यमाना टेया तीक्ष्णत्वात ॥ ३३ ॥

विभीतकपुटपाकमाह, विभीतकेति।—विभीतकी "बहेरे" इति लोके, तानि फलानि गृहीत्वा किञ्चिद्घृतेनाभ्यज्य पूर्ववत पुटपाकविधानेन विपचेत्। अङ्गारग्रहण घूनव्यवच्छेदार्थम्। अथ योगो विशेषेण सायसुपयोज्य। प्रतिश्यायो नासास्राव.। प्रकृतिभूतस्य स्वरस्यान्यथाभाव स्वरभङ्ग इत्युच्यते ॥ ३४ ॥ ३५ ॥

अधुना शुण्ठीपुटपाकमाह, चूर्णमिति।—शुण्ठी प्रसिद्धा, तस्याश्चूर्ण वस्त्रगालितं, तच्च घृताभ्यक्त कृत्वा एरण्डपत्रैश्च वेष्टयित्वा पुटपाकयुक्त्या विपचेत्। सितान्वित-

तेन यान्ति शमं पीडा आमातीसारसम्भवा ॥ ३७ ॥

द्वितीयशुण्ठीपुटपाक ।—

शुण्ठीकल्कं विनिक्षिप्य रसैरेरण्डमूलजैः ।
विपचेत् पुटपाकेन तद्रसं क्षौद्रसंयुतः ॥
आमवातसमुद्भूता पीडा जयति दुस्तराम् ॥ ३८ ॥

शूरणपुटपाकः ।—

शौरणं कन्दमादाय पुटपाकेन पाचयेत् ।
सतैललवणस्तस्य रसश्चार्शोविकारनुत् ॥ ३९ ॥

मृगशृङ्गपुटपाक ।—

शरावसम्पुटे दग्धं शृङ्गं हरिणजं पिबेत् ।
गव्यन सर्पिषा युक्तं हृच्छूलं नाशयेद्ध्रुवम् ॥ ४० ॥

इति श्रीदामोदरसूनुश्रीशार्ङ्गधराचार्यविरचितायां शार्ङ्गधरसंहितायां मध्यखण्डे
चिकित्सितस्थाने स्वरसादिकल्पनानाम प्रथमोऽध्याय ॥ १ ॥

मिति—सितासव चूर्णसमतुलिता। प्रातर्ग्रहणमधोभागगतरोगनिहत्यर्थम। मन्दवह्नि-ग्रहण विद्रवत्वात दग्धस्यवच्छेदार्थम। भक्त्य-मानमध्यव चूर्णवत ॥ ३६ ॥ ३७ ॥

अपरमाह, शुण्ठीकल्कमिति।—भाविनि भूतवदुपचार, सा शुण्ठी एरण्ड-मूलरसेन सह दूषत पेषिता सती कल्कमित्युच्यते। रसीऽव सद्यस्क क्वथितो वा। क्षौद्रसंयुतो मधुप्रक्षेपयुक्त। दुस्तरामित्यनिवार्याम् ॥ ३८ ॥

अथ शूरणपुटपाकमाह, शौरणमिति।—शूरणस्येद कन्दमित्यर्थे, तत पुटपाक-युक्त्या विपाच्य सतैललवणान्वितस्तद्रसोऽर्शोविकारनुद्भवति। सतैललवण इति—सामान्यग्रहणेन तिलतैल सैन्धवललवणच ग्राह्यम। एतयोमान प्रक्षेपे पूर्ववत् ॥ ३९॥

इदानी मृगशृङ्गपुटपाकमाह, शरावेति।—हरिणाज्जात हरिणज, शृङ्गमिति—विषाण, तच्च खण्डित कृत्वा ग्राह्यम। दग्धमिति—पुटपाकयुक्त्या, अत एव सदा-ऽवस्थित शरावसम्पुटं कार्यम्। गव्यगृहणमन्यघृतस्यव्यच्छेदार्थं तस्यातिश्रेष्ठत्वात। भक्षणमव फाण्टवज्ज्ञेयम (१)। ध्रुवमिति—सद्य प्रत्ययकारको योगोऽयम् ॥४०॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधर-दीपिकायां मध्यखण्डे चिकित्सितस्थाने स्वरसादिकल्पनाध्याय. प्रथम. ॥१॥

द्वितीयोऽध्यायः ।

क्वाथकल्पना ।—

क्वाथविधि ।—

पानीय षोडशगुण क्षुण्णे द्रव्यपले क्षिपेत् ।
मृत्पात्रे क्वाथयेत् ग्राह्यमष्टमांशावशेषितम् ॥
तज्जलं पाययेद्दोषान् कोष्णं मृदग्निसाधितम् ॥ १ ॥

इदानीं क्वाथकल्पना व्याख्यास्यामः, पूर्वं तावत् तत्स्वरूपमाह, पानीयमिति ।—क्षुण्णे कुट्टिते द्रव्यपले क्वाथ्यद्रव्यपले पानीय जलं षोडशगुणं द्रव्यभागापेक्षया, तेन षोडशपलमित्यर्थः । अष्टमांशावशेषितमिति—द्विपलावशेषमित्यर्थः । तज्जलमिति—क्वाथितजलम् । कोष्णमिति—ईषदुष्णम्, उष्णत्वमस्य क्वथितत्वादेव, न तु प्रतप्तोत् पुनरुष्णमिति दोषकरत्वात्, तथा चोक्तं—"तैलं घृतञ्च पानीय क्वाथं व्यञ्जनादिकम् । प्रतप्तोत् पुनरुष्णं तत् सर्वं विषवदुच्यते ॥" इति । मृदग्निसाधितमिति—सम्यक् बौर्योत्कृष्टत्वात् मन्दपावकपाचितमिति भावः, दग्धघनपिच्छिलादिभयादित्येके वदन्ति । धीमानिति ग्रहणेन द्रव्याणां मृदुमध्यकठिनत्वादिकमवेक्ष्य तदनुमानं जलं देयमिति, तथा हि—"चतुर्गुणं मृदौ द्रव्ये कठिनेऽष्टगुणं जलम् । अत्यन्तकठिने देयं बुधैः षोडशिकं जलम ॥" इति । एतच्च स्नेहपाकविषये प्रायेण प्रचरति । ननु मृदादिक्वाथ्यद्रव्यमष्टगुणिते जले साध्यते इति व्यवहारो दृश्यते, तत् कथमत्र षोडशगुणम ? उच्यते—क्वाथ्यगणौ मृदुमध्यकठिनद्रव्यैर्मिश्रित्वा पच्यते, तस्मात् मध्य-मानमनुसरन्ति वृद्धवैद्याः, न दोषः, उक्तञ्च यतः,—'मृदादिक्वाथ्यसङ्घाते मानानुक्तौ चिकित्सकाः । मध्यमोभयभागित्वादिच्छन्त्यष्टगुणं जलम ॥" इति । द्रव्यमानमपि दोषापेक्षया, न तु नियतपलमानमित्येके भाषन्ते, कुतः ? धीमानिति ग्रहणात्, तथा हि—"उत्तमस्य पलं मात्रा विभिश्चात्रैव मध्यमे । अधमस्य पलार्द्धेन स्नेहक्वाथोषधेषु च ॥" इति । * एतच्च विषाधिकारे चोक्तं न तु सर्वत्र । अन्यत्रे चतुर्थांशावशेषितं क्वाथं वदन्ति, तथा चोक्तं—"क्वाथ्यद्रव्यपले वारि द्विरष्टगुणमिष्यते । चतुर्भागावशेषन्तु पेयं पलचतुष्टयम ॥" एतदपि विषा-

---

* परिभाषेयं शौचक्रपाणिना ज्वराधिकारे सर्वरोगेष्वेव अविशेषेण लिखिता न तु विषाधिकारे इति ।

क्वाथस्य पर्य्याय ।—

श्रृतः क्वाथः कषायश्च निर्य्यूहः स निगद्यते ॥ २ ॥

क्वाथसेवने कालो मात्रा च ।—

आहाररसपाके च मज्जाते द्विपलोन्मितम् ।
हृद्यवैद्योपदेशेन पिबेत् क्वाथं सुपाचितम् ॥ ३ ॥

क्वाथे प्रक्षेप्याणां माननिर्देश ।—

क्वाथे क्षिपेत् सितामक्षैश्चतुर्याष्टमषोडशैः ।

धिकारे न तु सर्वत्र । यद्वा—क्वाथस्तु पाचनादिकभेदेन सप्तविध , तद्यथा—"पाचनो दीपनीयश्च शोधन शमनस्तथा । तर्पण क्लेदन शोषो क्वाथ सप्तविधो मत ॥" (हा० ३ स्था० १ अ०) तस्मात् पाचनशोधनार्थं * चतुर्थांश , "पाचन शोधनीयश्च पादशेष प्रशस्यते" इत्यादि वचनात्, अवशिष्टार्थंच द्विपलमिति न विरोध । यद्वा—दोषादीना बलाबलविचारादुभयत्रापि न कश्चिद्दोष , यत —"दीप्तानल महाकाय पाययेत्क्वथित जलम् । अन्ये त्वर्द्धं परित्यज्य प्रकृतिन्तु चिकित्सका ॥" इति ॥ १ ॥

इदानी क्वाथस्य पर्य्यायनामान्याह, श्रृत इत्यादि ।—श्रृत, क्वाथ, कषाय, निर्य्यूह इति चत्वार ॥२॥

अथाचार्य्यो द्विपलमिति स्वोक्तयोक्तमन्यपरदृष्टान्तेन दर्शयति, तमाह, आहारेति । —हृद्यवैद्योपदेशेनेति यद्यपेन द्विपलमेव इति पारम्पर्य्यो व्यवहार, अत एव तन्मतमालोच्य शार्ङ्गधरेणाव लिखित , यत ,—"क्वाथस्यागमनिरूक्तस्वरूपभागावशेषितम् । पारम्पर्य्योपदेशेन हृद्यवैद्या पलद्वयम् ॥" इति । सुपाचितमिति —गन्धवर्णरसान्वितम् , तदुक्त—"द्रव्यस्य गन्धवर्णौ च तुल्य कार्य्यकर विदु । तद्विशुद्ध शुद्धाय कषायममृतोपमम् ॥" इति । आहाररसपाके इति पदमन्यव्याधिप्रकोपव्यवच्छेदायम , यत ,—"औषधशेषे भुक्त पीतश्च तथौषध सशेषेऽन्ने । न करोति गदोपशम प्रकोपयत्यन्यरोगाश्च ॥" इति ॥३॥

इदानी प्रक्षेपनिमित्त द्रव्याणा परिमाणमाह, क्वाथे इति ।—सिता शर्करा, सा च † क्वथितजलस्य चतुर्थाष्टमषोडशैरंशै प्रक्षेप्या ज्ञेया, अत्रानुक्तमो वोढव्य ।

---

* "पाचनोऽर्द्धावशेष स्यात् शोधनो द्वादशाशक" इति हारीतमतम् ।

† क्वथितजलस्य इत्यादि टीकाकारोक्ति न समीचीना, "प्रक्षेप पादिक क्वाथात्" इति शास्त्रात् क्वाथस्यैव पादादिरूप. प्रक्षेप सर्वत्र वैद्यै आद्रियते, न तु क्वाथस्य, प्रक्षेपभूयस्त्वादिति ।

वातपित्तकफार्तेषु विपरीतं मधु स्मृतम् ॥ ४ ॥
जीरकं गुग्गुलु क्षारं लवणञ्च शिलाजतु ।
हिङ्गु त्रिकटुकञ्चैव क्वाथे शाणोन्मितं क्षिपेत् ॥ ५ ॥
क्षीरं घृतं गुडं तैलं मूत्रं चान्यद्रवं तथा ।
कल्कं चूर्णादिकं क्वाथे निक्षिपेत् कर्षसम्मितम् ॥ ६ ॥

अनाहतमुखपात्रे क्वाथकरणे दोषनिर्देशं ।—

(* अपिधानमुखे पात्रे जलं दुर्जरतां व्रजेत् ।
तस्मादावरणं त्यक्त्वा क्वाथादीनां विनिश्चयः ॥)

स यथा—

सर्वज्वरे गुडूच्यादि ।—

गुडूचीधान्यकारिष्टरक्तचन्दनपद्मकैः ।
गुडूच्यादिगणक्वाथः सर्वज्वरहरः स्मृतः ॥
दीपनो दाहहृल्लास-तृष्णाच्छर्दिरुचोर्जयेत् ॥ ७ ॥

मधु च विपरीतमिति—शकरापरिमाणात्, ततेन किमुक्तम्? वातार्तेषु सिता चतुर्थांशा क्षौद्रजलादि यथा, पित्तार्तेऽष्टमांशा कफार्तेषु षोडशांशा इति। मधु विपरीतं यथा—वातार्तेषु षोडशांशं, पित्तार्तेऽष्टमांशं कफार्तेषु चतुर्थांशमिति भावः। अपराखाह, जीरकमित्यादि।—जीरकादित्रिकटुकान्तं द्रव्यं टङ्कप्रमितं क्षिपेदिति क्वाथे, तत्र क्षारं यवक्षारादि। लवणं सैन्धवादि। त्रिकटुकं शुण्ठीमरिचपिप्पलीसङ्गकम्। द्रवप्रक्षेपमाह, क्षीरमित्यादि।—क्षीरादीनि कर्षमितानि। तत्र गुडोपलक्षितत्वेन सितावशिष्टा सर्वेऽपि विकारा गृह्यन्ते। अन्यद्रवमिति—तोयमद्यासवारिष्टयूषादिकम्। चूर्णादिकम् इत्यादिग्रहणात् गुटिकाऽवलेहादयो बोद्धव्याः। कर्षं पलचतुर्थांशमिति ॥ ४—६ ॥

इदानीं ज्वरादिरोगनाशार्थं बहुविधान् क्वाथान् दर्शयन्नाह, स यथेति।—पूर्वं व्याख्यातम्। गुडूच्यादिगणः क्वाथरूपः सर्वज्वरहरो भवति दीपनश्च दाहादींश्च जयति। तत्रारिष्टौ निम्बः। पद्मकः पद्मकाष्ठं, यत्र पद्मसंज्ञं तत्र पद्मकेऽग्रहणम्। दीपनमग्नेः। हृल्लास इति—असक्तात् ष्ठीवनम्। ननु गुडूच्यादिको गणः प्रायेण

---

* श्लोकोऽयं प्रक्षिप्त इति केचित्।

वातज्वरे गुडूच्यादि ।—

गुडूचीपिप्पलीमूल-नागरैः पाचनं स्मृतम् ।
दद्याद्वातज्वरे पूर्ण-लिङ्गे सप्तमवासरे ॥ ८ ॥

वातज्वरे शालपर्ण्यादि ।—

शालपर्णी बला रास्ना गुडूची सारिवा तथा ।
आसां क्वाथं पिबेत् कोष्णं तान्त्रवातज्वरच्छिदम् ॥ ९ ॥

पित्तप्रायोपशमनमिष्टं भवति, तत कथमत्रादौ सर्वज्वरहर प्रोक्त ? उच्यते,—सर्वज्वरे पित्ताविरोधिनी क्रिया कार्य्येति सिध्यति , तदुक्त वाग्भटे—"ऋते पित्तादृते नास्ति ज्वरो नास्त्यूष्मणा विना । तस्मात् पित्तविरुद्धानि त्यजेत पित्ताधिकेऽधिकम् ॥" (वा० सू० १ अ०) इति न दोष ॥ ७ ॥

गुडूचीत्त ।—गुडूच्यादिभिस्त्रिभिर्द्रव्यै श्रृत क्वाथित वातज्वरे पाचनमिति। कथम्भूते ? पूर्णलिङ्ग सप्तमवासर वेपथुविषमवेगादिभिरुपलक्षिते इत्यर्थ., अत एव सप्तमवासर दर्शयति , यत ,—"वातिक सप्तरात्रेण" इत्यादिवाक्य दृश्यते हि। सप्तमदिनग्रहण ज्वरस्य तारुण्यनिषेधार्थं, यत सप्ताहादर्वाक् ज्वरस्य तरुणता कथ्यते , तथा हि—"आ सप्तरात्र तरुण ज्वरमाहुर्मनीषिण." (पुष्कलावत०) 'न कषाय प्रशस्यन्ति नराणा तरुणज्वरे। कषायेणाकुलीभूता दोषा जेतु सुदुस्तरा ॥" (हा० ३य स्था० १ अ०) इति। ननु सप्तरात्र ज्वरस्य तरुणत्व तच भषजनिषेध, तदुपरि वातकी ज्वर पाक गच्छति, तत कथ पाचनादिकमुक्तम्, एतत् सर्वं व्यथम् ? उच्यते—कषायद्रव्यश्रुतपाचनकषाया निषिद्ध , न तु खरसादि , तथा चुक्त—"न तु कल्पनमुद्दिश्य कषाय' प्रतिषिध्यते। य कषायकषाय स्यात स वर्ज्य-स्तरुणे ज्वरे ॥" (च० चि० ज्वर०) इति। यद्वा—आमादयालक्ष्योऽवस्था दोषाणा, तत्र द्विविधा हि सामता, एका रसस्य, अपरा दोषस्य, दोषसामता तरुणतारूपा, रससामता मुखवैरस्यादिलक्षणा, सा अष्टाहात् परतोऽप्यनुवर्त्तते, तरुणतारूपा सामताऽष्टाहादपैति, एतत प्रयोजनं तरुणतारूपदोषसामतायामौषधं नोपयुज्यते, रससामतायान्तु पाचन दीयते , अत एवाह चरक ,—"ज्वरार्त षडहेऽतीत लघून्न-प्रतिमोक्षितम्। पाचन शमनीयं वा कषायं पाययेत्तु तम् ॥" (च० चि० ज्वर०) इति। एव कफज्वरेऽपि बोद्धव्यम् ॥८॥

अपराख्याह, शालपर्णीति।—शालपर्ण्यादीना क्वाथ, श्रीहादीन् (?) हन्तीति। शालपर्णी प्रसिद्धा। सारिवा अनन्तमूलम्, "आफोड़" इति लोके।

वातज्वरे काश्मर्यादि ।—

काश्मरीसारिवाद्राक्षा-त्रायमाणाऽमृताभवः ।
कषाय. सगुड पीतो वातज्वरविनाशन ॥ १० ॥

पित्तज्वरे कट्फलादि ।—

कट्फलेन्द्रयवाम्बष्ठा-तिक्तामुस्तैः शृत जलम् ।
पाचन दशमेऽङ्गि स्यात्तीव्रे पित्तज्वरे नृणाम् ॥ ११ ॥

पित्तज्वरे पर्पटादि ।—

पर्पटो वासकस्तिक्ता कैरातो धन्वयासकः ।
प्रियङ्गुश्च कृत क्वाथ एषा शर्करया युत ॥
पिपासादाहपित्तास्र-शूत पित्तज्वरं जयेत् ॥ १२ ॥

एकै राक्षाख्याने द्राक्षा इति पठन्ति। ज्वरोऽत्र वातिक , ग्रन्थान्तरेऽपि तदृश्यथा—"गुडूची सारिवा द्राक्षा बला चाश्वमती तथा। एषोऽपि परम सिद्धो वातज्वर विनाशन ॥" इति ॥ ९ ॥

अन्यदपि आह, काश्मरीत्यादि।—काश्मरी गाम्भारी। त्रायमाणा स्वनाम ख्याता। अमृता गुडूची। कषायोऽत्र क्वथित । सगुड इति—गुडप्रक्षिप्त ॥१०॥

अथ पित्तज्वरे पाचनमाह, कट्फलेत्यादि।—कट्फलादिपाचन पित्तज्वरे प्रशस्तमेव। कट्फल प्रसिद्धम्। इन्द्रयव कुटजबीजम्। अम्बष्ठा पाठा। तिक्ता कटुरोहिणी। दशमेऽङ्गि इति—विचारणात पूर्वं लिखिता (१) तीव्रदाहादियुक्ते। एके शर्कराप्रक्षेपोऽत्र मन्यन्ते, यत,—* "शर्करामधुरो हन्ति कषाय पैत्तिक ज्वरम्" (सु० उ० ३९ अ०) इति। तत्र सर्वसम्मतम् ॥११॥

पर्पट इति।—पर्पटादिक्वाथ पित्तज्वर हन्तीति। पर्पट स्वनामप्रसिद्ध। वासक आटरूषक। तिक्ता कटुरोहिणी। कैरातो भूनिम्ब । धन्वयासो दुरालभा। प्रियङ्गुर्लताविशेष, तस्या फलानि, न तु वृक्षप्रियङ्गु , तथा चोक्त—"फलिनी

---

* श्लोकार्द्धोऽयं सुश्रुते श्रीपर्ण्यादिक्वाथे पठित, न तु कट्फलादौ। तथा च —"श्रीपर्णीचन्दनोशीर-पद्मकसधूलक। शर्करामधुरो हन्ति कषाय. पैत्तिक ज्वरम् ॥" इति।

पित्तज्वरे द्राक्षादि ।—

द्राक्षा हरीतकी मुस्त कटुकी क्षतमालकः।
पर्पटश्च कृतः क्वाथ एषा पित्तज्वरापहः॥
तृष्मूर्च्छादाहपित्तासृक्-शमनो भेदन. स्मृतः॥ १३॥

पित्तज्वरे पर्पटकादि ।

(* एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः।
किं पुनर्यदि युज्येत चन्दनोशीरवालकैः॥)

कफज्वरे बीजपूरमूलादि ।—

बीजपूरशिफापथ्या-नागरग्रन्थिकैः घृतम्।
सक्षार पाचन श्लेष्म-ज्वरे द्वादशवासरे॥ १४॥

कफज्वरे भूनिम्बादि ।—

भूनिम्बनिम्बपिप्पल्य. शठी शुण्ठी शतावरी।
गुडूची बृहती चेति क्वाथो हन्यात् कफज्वरम्॥ १५॥

फलप्रियङ्गुर्लता गोवल्ली तथा। श्यामा" इत्यादि, "बृहत्प्रियङ्गुरत्या सा ज्ञेया वमनकल्पिका" इति। एषा द्रव्याणाम्। प्रकराऽत्र प्रक्षेपे॥१२॥

द्राक्षेति।—द्राक्षादिक्वाथ पित्तज्वरहर। कृतमालको राजवृक्ष। तृष्णादयोऽत्र पित्तज्वरस्यैवोपद्रवा ज्ञेया। भेदन इति—स्वभावगुणेन पक्वदोषस्याध पातनम्, तथा हि—'सौम्यात् कषाय स्रोतांसि विस्रवति स्वभावत। पक्व दोष स्रवयति विस्रावैस्य शम नयेत॥" इति॥ १३॥

अथ कफज्वरे बीजपूरादिपाचन, बीजपूरेति।—श्लेष्मज्वरे प्रशस्तम्। बीजपूरो मातुलुङ्ग, तस्य शिफा जटा। पथ्या हरीतकी। नागर शुण्ठी। ग्रन्थिक पिप्पली-मूलम। घृत क्वथितम्। सक्षारमिति—यवक्षारप्रक्षिप्तम्। द्वादशवासरं इति पूर्ववत॥ १४॥

भूनिम्बेति।—भूनिम्बादिक्वाथोऽपि कफज्वर हन्यादिति। भूनिम्ब कैरात।

---

* श्लोकोऽय प्रक्षिप्त इति कश्चित। "चन्दनोशीरवालकैः" इत्यत्र "चन्दनोदीच्य-लागरैः" इति चक्रपाणिपाठ।

कफज्वरे पटोलादि ।—

पटोलत्रिफलातिक्ता-शठीवासाऽमृताभवः।
क्वाथो मधुयुतः पीतो हन्यात् कफकृतं ज्वरम् ॥ १६ ॥

वातपित्तज्वरे पञ्चभद्रम् ।—

पर्पटाब्दामृताविश्व-कैरातैः साधितं जलम्।
पञ्चभद्रमिदं ज्ञेयं वातपित्तज्वरापहम् ॥ १७ ॥

वातकफज्वरे लघुचुद्रादि ।—

चुद्राशुण्ठीगुडूचीना कषायः पौष्करस्य च।
कफवाताधिके पेयो ज्वरे वाऽपि द्विदोषजे ॥
कासश्वासारुचिकरे पार्श्वशूलविनाशनः ॥ १८ ॥

निम्ब प्रसिद्ध । पिप्पली ख्याता । शठी कर्चूरभेद । बृहती बृहत्कण्टकारिका । केचित् 'शठी शुण्ठी च पौष्करम्" इति पठन्ति । अयमपि पाठः साधुः ॥ १५ ॥

पटोलेति ।—पटोलादिक्वाथो मधुसहितः कफजनितज्वरं हन्यादिति । पटोलमूलं * पटोलपत्राङ्गं, केवलं पटोलनालं वा, यतः,—"नाल तस्य कफापहम्" इति वचनात् । त्रिफला हरीतक्यादिकम् । तिक्ता कटुरोहिणी । अमृता गुडूची ॥ १६ ॥

इदानीं वातपित्तज्वरे योगमाह पर्पटेत्यादि ।—पञ्चभद्रकसञ्ज्ञकं क्वथितं जलं वातपित्तज्वरापहं भवति। भद्रो मुस्तम्। विश्वं शुण्ठी । अत्रापि सप्तमज्वरनिदानज्वरे वासादीनां मानं तन्मात्तरेऽवगन्तव्यम्, तद्यथा—"वातपित्तज्वरे दैत्यौषधं पञ्चमेऽहनि। पित्तश्लेष्मज्वरे चापि औषधं सप्तमेऽहनि॥ अत ऊर्ध्वं सप्ताहात् वातश्लेष्मज्वरे पिबेत् ॥" इति ॥ १७ ॥

चुद्रेति ।—लघुचुद्रादिक्वाथः कफवातजनितज्वरे पेयः द्विदोषजे वा। तत्र पौष्करं मूलं, तदभावे कुष्ठं ग्राह्यमिति सर्वत्र। कासाद्यपद्रवा सन्निपातज्वरस्यापि ज्ञातव्या। तन्मात्तरे पञ्चतिक्तकसञ्ज्ञकमिदं, तत्र पञ्चमं भूनिम्बम्, तद्यथा—"चुद्राऽमृताभ्यां सह नागरेण सपुष्करैश्चैव किराततिक्तम्। पिबेत्

* "पटोलादेरुक्तवत्त्वात्" इति परिभाषाबलात् पटोलशब्देन सामान्येनोक्तौ पटोलपत्रमेव गृह्यते वैद्यैः। गृढार्थदीपिकाकारेणापि अयमेवार्थः स्वीकृतः।

वातकफज्वरे आरग्वधादि ।—

आरग्वधकणामूल-मुस्तातिक्ताऽभयाकृतः ।
क्वाथः शमयति क्षिप्रं ज्वरं वातकफोद्भवम् ॥
आमशूलप्रशमनो भेदी दीपनपाचनः ॥ १९ ॥

पित्तकफज्वरे अमृताष्टकम् ।—

अमृतारिष्टकटका-मुस्तेन्द्रयवनागरैः ।
पटोलचन्दनाभ्याञ्च पिप्पलीचूर्णयुक् घृतम् ॥ २० ॥
अमृताष्टकमेतच्च पित्तश्लेष्मज्वरापहम् ।
छर्द्यरोचकहृल्लास-दाहतृष्णाविनाशनम् ॥ २१ ॥

पित्तकफज्वरे पटोलादि ।—

(* पटोलं चन्दनं मूर्वा-तिक्तापाठाऽमृतागणः ।
पित्तश्लेष्मज्वरच्छर्दि-दाहकण्डूविषापहः ॥)

सर्वज्वरे कण्टकार्य्यादि ।—

कण्टकारीद्वयं शुण्ठी धान्यकं सुरदारु च ।

कषाय क्षिप्र पचतिक्त ज्वर निहन्त्यष्टविध समयम् ॥" इति। अत्रापि कैरातो धीज्यस्निदीपहरत्वात् ॥ १८ ॥

आरग्वधेति।—आरग्वधादिक्वाथ क्षिप्र शीघ्र कफवातोद्भव ज्वरं शमयति। आरग्वध कृतमालक, स च चरके फलवर्गे पठित, सुश्रुते तु पत्रवर्गे, अतोऽन्तपरिमार्जने फल बहि परिमार्जने कुष्ठादौ पत्रमिति। कणामूल पिप्पलीमूलम। तिक्ता कटुरोहिणी। अभया हरीतकी। आमशूलप्रशमन इति—आमेनापरिपक्वरसेन जनित शूलस्य प्रशमन इत्यर्थ। अय शूल ज्वरस्यैवोपद्रव इत्येके वदन्ति। भेदीति—पक्वमल भित्त्वा योऽध पातयति स भेदी। अत एव सकलवैद्यास्तृड्वर्णावच्छिन्नानेनैव पक्वदोषस्य निर्हरण कुर्वन्ति, तस्मादारोग्यपञ्चक इति सज्ञा लोके ॥ १९ ॥

अथ पित्तश्लेष्मज्वरे अमृतेति।—अमृताष्टकसञ्ज्ञोऽय क्वाथ पिप्पलीचूर्णप्रयुक्त पित्तश्लेष्मज्वरघ्नो भवति। अमृता गुडूची। अरिष्टो निम्ब। चन्दनमत्र रक्तचन्दनम। पिप्पलीचूर्णमत्र निक्षिपेत्, तन्नाषकद्वयव्यवहार, कुत ? तीक्ष्णत्वात्। छर्द्यादयोऽप्युपद्रवा अस्यैव ज्ञातव्या ॥ २० । २१ ॥

---

* प्रक्षिप्तोऽयमिति कैश्चित्।

एभिः शृत पाचनं स्यात् सर्वज्वरविनाशनम् ॥ २२ ॥

वातश्लेष्मज्वरे दशमूलम् ।—

शालपर्णीपृश्निपर्णी-बृहतीद्वयगोक्षुरैः ।
विल्वाग्निमन्थश्योनाक-काश्मरीपाटलायुतैः ॥२३॥
दशमूलमिति ख्यातं क्वथितं तज्जलं पिबेत् ।
पिप्पलीचूर्णसंयुक्तं वातश्लेष्मज्वरापहम् ॥ २४ ॥
सन्निपातज्वरहरं सूतिकादोषनाशनम् ।
श्लेष्मश्लैत्यभ्रमश्लेष्ट-कासश्वासविकारनुत् ॥
हृत्कण्ठग्रहपार्श्वार्त्ति-तन्द्रामस्तकशूलहृत् ॥ २५ ॥

सन्निपातज्वरे अभयादि ।—

अभयामुस्तधान्याक-रक्तचन्दनपद्मकैः ।

अथ सर्वज्वरेषु पाचनमिदमाह कण्टकारीति ।—कण्टकारीक्वाथसङ्गतं पाचनम् इदं सर्वज्वरहरं भवति । कण्टकारीद्वयमिति—लघुकण्टकारिका बृहत् कण्टकारिका च । सुरदारु देवदारु । सर्वज्वरामत्वष्टविधसङ्गम् । एतत् गोविन्दवङ्ग-सेनादिभि. सर्वज्वरेषु पठित, तत्र नागरादिपाचनसञ्ज्ञा ॥ २२ ॥

इदानी सन्निपातज्वरे योगचतुष्टयमाह, शालपर्णीति ।—एतच्च दशमूलसञ्ज्ञकं क्वथितजलं पिप्पलीचूर्णं यथादोषापेक्षया प्रक्षिप्त सन्निपातज्वरादिकं हन्तीति । शालपर्णी पृश्निपर्णी च प्रसिद्धा, लोके कवाराद्वयमिति सञ्ज्ञा । बृहतीद्वयमिति—कण्टकारीद्वयम् । अग्निमन्थोऽरणि । श्योनाको वृक्षविशेष खनामख्यात. । काश्मरी गाम्भारी । एतेषा मूल ग्राह्य, कुत ? तत्सङ्गकलात । सूतिका-दोषोऽपि त्रिदोषज एव । * श्लेष्मश्लैत्यादयोऽपि सन्निपातोपद्रवा, तत्र श्लेष्मा श्लेष्मश्लेष्म । श्लैत्यमङ्गानाम् । केचित् श्वासश्लैत्यमिति पठन्ति, तत्र श्वास तथा श्लैत्यञ्चाङ्गानामित्यर्थ ॥२३—२५॥

अभयेति ।—अभयादिक्वाथ पिप्पलीचूर्णयुक्तस्त्रिदोषज्वरघ्नो भवति । अभया

---

* 'श्लेष्मश्लैत्य' इत्यत्र "श्वासश्लैत्य" इति भू० दी० । श्वासश्लैत्य इत्यपाठ श्लैत्यम ।

वासकेन्द्रयवोशीर-गुडूचीक्वतमालकैः ॥ २६ ॥
पाठानागरतिक्ताभिः पिप्पलीचूर्णयुक् घृतम्।
पिबेच्त्रिदोषज्वरजित् पिपासाकासदाहनुत् ॥ २७ ॥
प्रलापश्वासतन्द्राघ्न दीपनं पाचन परम्।
विष्मूत्रानिलविष्टम्भ-वमिशोषारुचि जयेत् ॥ २८ ॥

सन्निपातज्वरे पिप्पल्यादि ।—

(*पिप्पलीपिप्पलीमूल-चव्यचित्रकनागरैः।
वचासातिविषाऽजाजी-पाठावत्सकरेणुकैः ॥
किराततिक्तक मूर्वा सर्षपा मरिचानि च।
कटुकं पुष्करं भार्गी विडङ्ग कर्कटाह्वयम् ॥
अर्कमूलं बृहत्सिंही श्रेयसी सदुरालभा।
दीप्यकं चाजमोदा च शुकनासादिहिङ्गुभिः ॥
एतानि समभागानि गणोऽष्टविंशको मतः।
कषायमुपभुञ्जीत वातश्लेष्मज्वरापहम् ॥
हन्ति वात तथा शीत छेदज प्रबल कफम्।
प्रलाप चातिनिद्राञ्च रोमहर्षारुचौ तथा ॥
महावातेऽपतन्त्रे च सर्वगात्रे च शून्यताम्।
अय सर्वज्वरान् हन्ति सन्निपातास्त्रयोदश ॥)

हरीतकी। वासक भाटरूषक। उशीर तृणभेद प्रसिद्ध। कृतमालक आरग्वध-फलम्। पिपासादयोऽप्यस्यैवोपद्रवा। प्रलापोऽसम्बद्धभाषणम्। विष्मो वाता-दीनामप्रवृत्ति, † "गुडगुडा" शब्द इत्यपरे। एतच्च ग्रन्थान्तरे गुडूच्यादिमन्त्रम् ॥ २६—२८ ॥

---

* प्रक्षिप्तोऽयमिति केचित्।

† भाटीपो गुडगुडाभ्यनि. इति विजयरक्षितादयः। विष्टम्भस्तु मलवाता-प्रवृत्तिः।

सन्निपातज्वरे पञ्चादशाङ्ग ।—

कैरातकट्कीमुस्ता-धान्येन्द्रयवनामरैः ।
दशमूलमहादारु-गजपिप्पलिकायुतैः ॥ २८ ॥
क्वाथः कषायः पार्श्वार्त्ति-सन्निपातज्वरं जयेत् ।
कासश्वासवमौहिक्का तन्द्राहृद्ग्रहनाशनः ॥ ३० ॥

वातश्लेष्मज्वरे कट्फलादि ।—

कट्फलाम्बुदभार्गीभिर्धान्यरोहिषपर्पटैः ।
वचाहरीतकीशृङ्गी-देवदारुमहौषधैः ॥
हिक्का कासज्वरं हन्ति श्वासश्लेष्मगलग्रहान् ॥ ३१ ॥

जीर्णज्वरे गुडूचीक्वाथ ।—

क्वाथो जीर्णज्वरं हन्ति गुडूच्याः पिप्पलीयुतः ॥ ३२ ॥

पित्तज्वरे पर्पटादिः ।—

तथा पर्पटजः क्वाथः पित्तज्वरहरः परः ।

कैरातेत्यादि ।—मूर्निम्बादिक्वथित' कषाय सोपद्रव सन्निपातज्वरं जयेत् हन्तीति । कैरातो भूनिम्ब एव । दशमूल प्रसिद्धं, तदव पृथक् समनाव, यतो ग्रन्थान्तरे पञ्चादशाङ्गसङ्गकोऽय मत । महादारु देवदारु । गजपिप्पलिका चविकाफल प्रसिद्धम् । पार्श्वार्त्तिरपि विदोषजा स्यात् । हृद्ग्रहोऽप्येवम् ॥२८।३०॥

कट्फलेति ।—कट्फलस्तृणविशेष । अम्बुदो मुस्तम् । रोहिष गन्धतृणम् । शृङ्गी कर्कटाख्या । महौषध शुण्ठी । ज्वरमत्र विदोषजनित, तेन कार्यमूलमपि गृह्यते बहुवचनग्रहणात् । अथ तन्त्रान्तरे कासश्वासरोगे पठित, तच्च मधुहिङ्गुयुत इति पठन्ति । शार्ङ्गधरेण सन्निपातज्वरार्थं मध्वादित्यागेनात्र लिखित, यतो मध्वत्र विरुद्धम, तथा हि—"सर्वेषु सन्निपातेषु न क्षौद्रमवचारयेत् । क्षौतोपचारि क्षौद्रं स्यात् क्षौतचात्र विरुध्यते ॥" इति । चक्रेणाप्युक्त—"विरोध्युष्णे मधु त्यक्त्वा कार्य्येषाऽऽद्रैकजे रसे" इति ॥३१॥

अथ जीर्णज्वरे योगद्वयमाह, क्वाथ इति ।—केवल गुडूच्या क्वाथ' पिप्पलीचूर्णप्रक्षिप्त जीर्णं ज्वरं हरतीति । केचित् पिप्पलीयुत इत्यस्य स्थाने मधुसयुत इति पठन्ति । अयमपि प्रक्षेप, साधु । तथा पर्पटोऽत्र, क्वाथ, पित्तज्वरहरो

किं पुनर्यदि युज्येत चन्दनोदीच्यनागरैः ॥ ३३ ॥

जीर्णज्वरे निदिग्धिकादि ।—

निदिग्धिकाऽमृताशुण्ठी-कषायं पाययेद्भिषक् ।
पिप्पलीचूर्णसंयुक्त श्वासकासादितापहम् ॥
पीनसारुचिवैस्वर्य्य-शूलाजीर्णज्वरच्छिदम् ॥ ३४ ॥

सूतिकाज्वरे देवदार्वादि ।—

(*देवदारु वचा कुष्ठं पिप्पली विश्वभेषजम् ।
कट्फल मुस्तभूनिम्ब तिक्तधान्या हरीतकी ॥
गजकृष्णा च दुःस्पर्शा गोचुरुर्धन्वयासकम् ।
बृहत्यतिविषा छिन्ना कर्कट कृष्णजीरकम् ॥
क्वाथमष्टावशेषन्तु प्रसूतां पाययेत् स्त्रियम् ।
शूलकासज्वरश्वास-मूर्च्छाकम्पशिरोऽर्त्तिजित् ॥)

शीतज्वरे हृहत् क्षुद्रादि ।—

क्षुद्राधान्यकशुण्ठीभिर्गुडूचीमुस्तपद्मकैः ।
रक्तचन्दनभूनिम्ब-पटोलहृषपौष्करैः ॥ ३५ ॥

भवति, तथेति ग्रहणात् मध्यादिसयुतोऽयमपि बोद्धव्य । † पित्तज्वरकथनेनैवैतत् प्रायोऽजीर्णज्वर एव (?) कथित ॥ ३२।३३ ॥

अपरमप्याह, निदिग्धिकेति ।—निदिग्धिकादिकषाय श्वासादिकान् हन्तीति । निदिग्धिका लघुकण्टकारिका । अमृता गुडूची । अदित रोगविशेष, स च वातरोगे पठित. । वैस्वर्य्यं विकृतस्वरत्वम् । अयमपि प्रायश सायमुपयोज्य, तथा हि —"हन्त्यूर्ध्वगामय प्राय साय तेनोपयुज्यते" इति ॥ ३४ ॥

क्षुद्रेति ।—हृहत क्षुद्रादिसज्ञकोऽय क्वाथ शीतज्वर हन्तीति । क्षुद्रा लघुकण्टकारी । भूनिम्ब कैरात । हृषी वासक । पौष्कर पुष्करमूलम् । इन्द्रयव,

---

* प्रक्षिप्तोऽयमिति केचित् ।

† योगोऽय चक्रपाणिना पित्तज्वरे एव लिखित, न तु अजीर्णज्वरे । गूढार्थ; दीपिकाकारस्तु "ज्वरोऽत्र जीर्ण एव" इत्याह ।

कटुकेन्द्रयवारिष्ट-भार्गीपर्पटकैः समैः।
क्वाथं प्रातर्निषेवेत सर्वशीतज्वरच्छिदम् ॥ ३६ ॥

विषमज्वरे मुस्तादि'।—

मुस्तचुद्राऽमृताशुण्ठी-धात्रीक्वाथः समार्त्विकः।
पिप्पलीचूर्णसंयुक्तो विषमज्वरनाशनः ॥ ३७ ॥

विषमज्वरे पटोलादि।—

पटोलेन्द्रयवादारु-त्रिफलामुस्तगोस्तनैः।
मधुकामृतवासाना क्वाथं क्षौद्रयुतं पिबेत् ॥ ३८ ॥
सन्तते सतते चैव द्वितीयकतृतीयके।
ऐकाह्निके वा विषमे दाहपूर्वे नवज्वरे ॥३९॥

ऐकाह्निके पटोलादि'।—

पटोलत्रिफलानिम्ब-द्राक्षाशम्याकवासकैः।
क्वाथः सितामधुयुतो जयेदैकाह्निकं ज्वरम् ॥ ४० ॥

तृतीयके गुडूच्यादि।—

गुडूचीधान्यमुस्ताभिश्चन्दनोशीरनागरैः।
कृतं क्वाथं पिबेत् क्षौद्र-सितायुक्तं ज्वरातुरः ॥

कुटजबीजम्। अरिष्टो निम्ब। भार्गी ब्राह्मण्यष्टिका। तल्लान्तरेऽयमपि वातज्वरे पठित, यतो वातश्लेष्माणौ शीतोत्पादकौ, यत,—"त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे" इत्यादि वचन तस्मात तत्र शीतज्वरे लिखित ॥३५।३६॥

इदानीं विषमज्वरनाशनार्थं योगपञ्चकमाह, मुस्तेति।—मुस्तादिभि कृत. क्वाथ विषमज्वरे प्रशस्त। अत्र धात्री आमलकी। मधुपिप्पल्यो प्रक्षेप पूर्ववदया। विषमज्वरा ऐकाह्निकादय ॥ ३७—३९ ॥

पटोलेति।—पटोलादि एष क्वाथ ऐकाह्निक ज्वर हन्तीति। अत्र त्रिफला ख्याता, सा च प्रत्येक समभागा। शम्याक कृतमालक.। सितामधुयुत इति सम्यक् माधुर्य्यार्थं प्रक्षेपद्वयमुक्त दोषनाशनार्थं च ॥ ४० ॥

गुडूचीति।—गुडूच्यादि तृतीयज्वर हन्तीति। चन्दनमत्र रक्तम्। उशीर तृणभेद. रक्तपत्र दर्भवत्। केचिदुशीरस्थाने उदीच्यमिति पठन्ति, तत्रोदीच्यो बालक:

तृतीयज्वरनाशाय तृष्णादाहनिवारणम् ॥ ४१ ॥

चातुर्थके देवदार्वादि ।—

देवदारुशिवावासा-शालपर्णीमहौषधैः ।
धात्रीयुतं सृतं शीतं दद्यान्मधुसितायुतम् ॥
चातुर्थकज्वरे श्वासे कासे मन्दानले तथा ॥ ४२ ॥

ज्वरातीसारे हृद्दुड्वादि ।—

गुडूचीधान्यकोशीर-मुण्डीबालकपर्पटैः ।
बिल्वप्रतिविषापाठा-रक्तचन्दनवत्सकैः ॥ ४३ ॥
किरातमुस्तेन्द्रयवैः क्वथितं शिशिरं पिबेत् ।
सचौद्रं रक्तपित्तघ्नं ज्वरातीसारनाशनम् ॥ ४४ ॥

ज्वरातीसारे नागरादि ।—

नागरं कुटजो मुस्तममृताऽतिविषा तथा ।
एभिः कृतं पिबेत् क्वाथं ज्वरातीसारनाशनम् ॥४५॥

सुशीतलत्वात्, यत,—"पित्तप्रायस्तृतीयक" इत्युक्तम्, अतो व्यजनादिना हितं शीतगुणम् ॥ ४१ ॥

देवदार्विति।—देवदार्वादिक्वाथोऽस्य चातुर्थकज्वरे प्रशस्तः। शिवा हरीतकी। वासा आटरूषकः। महौषधं शुण्ठी। धात्री आमलकी। सृतमिति—क्वथितम्। शीतं हिमस्पर्शं, मधुप्रक्षेपजनितत्वात्, तथा हि—"उष्णैर्विरूक्ष्यते सर्वं विषान्वयतया मधु। उष्णार्तमुष्णैरुष्णे वा तन्निहन्ति यथा विषम्॥" (सु० सू० ४५ अ०) इति ॥४२॥

अथ ज्वरातीसारे योगद्वयमाह, गुडूचीति।—गुडूच्यादिकोऽस्य गणः। अत्र वत्सकः कुटजत्वक्, कुटजत्वगभावे शक्यश्चैव द्विगुणो ग्राह्यः, लघुत्वात् पाचनत्वाच्च। किरातो भूनिम्बः। शिशिरं शीतस्पर्शम्। एष हृद्दुड्वादिसङ्गकत्वान्तरेऽवबोद्धव्यः ॥ ४३।४४ ॥

नागरमिति।—नागरादिक्वाथो ज्वरातीसारनाशनो भवति। कुटजोऽत्र कुटज-

---

* कुटजशब्देन अविशेषोक्तौ सर्वत्र कुटजत्वगेव गृह्यते, न तु कुटजबीजम्, अत्र तु, तन्त्रान्तरे वत्सक-कलिङ्गादिपर्योगदर्शनात् कुटजबीजमेव ग्राह्यमिति पाठ कारणमुचितम्।

आमशूले धान्यपञ्चकम्।—

धान्यबालकविल्वाब्द-नागरैः साधितं जलम्।
आमशूलहरं ग्राहि दीपनं पाचनं परम् ॥ ४६ ॥

आमवाते धान्यनागरक्वाथ।—

धान्यनागरजः क्वाथः पाचनो दीपनस्तथा।
एरण्डमूलयुक्तश्च जयेदामानिलव्यथाम् ॥ ४७ ॥

सामरक्तातिसारे वत्सकादि।—

वत्सकातिविषाविल्व-मुस्तबालकजः श्रृतः।
अतीसार जयेत् साम चिरजं रक्तशूलजित् ॥ ४८ ॥

फलम्, एवमविशेषोक्तौ सर्वत्रातीसारे। केचित "भूनिम्बातिविषाऽमृता" इति पठन्ति, तच्च भूनिम्ब किरात, उक्तञ्च तत्रान्तरे—"नागरातिविषामुस्ता-भूनिम्बाहृतवत्सकै। सर्वज्वरहर क्वाथ सर्वातीसारनाशन ॥" इति ॥ ४५ ॥

अथ आमशूले धान्येति।—इद धान्यपञ्चकसज्ञक क्वथितरूपम् आमशूलहर भवति। विल्वमत्र विल्वशलाट, सङ्ग्राहित्वात्, एव सर्वत्र स्वमनयोगे। अब्दो मुस्तकम्। केचिदिति पठन्ति—"पित्ते धान्यचतुष्कन्तु गुरुष्टोत्यागदन्ति हि"। एतदभिप्राय न सर्वत्र, यत —"गुरुष्टो मधरपाकित्वान्न च पित्तप्रकोपिणी" इति वचनम ॥४६॥

अथ आमवाते धान्येति।—एतदपि पाचनम आमवातपीडा जयेत्। एतदन्यत्राप्यामवाते आमे वा विबन्धेऽपि पाचनसज्ञ मानान्यम्, तथा च्युक्त—"धान्यनागर-बातारि-मूल क्वथितशीतलम्। आमशूलविबन्धघ्न श्रृत दीपनपाचनम्॥" इति॥४७॥

अथातीसारे योगचतुष्टयमाह, वत्सकेत्यादि।—वत्सकादिक्वाथ अतिसार जयेत् इति। वत्सक * कुटजफलम्। सामसतीसार चिरजं चिरकालानुबन्धि। शेषं सुगमम् ॥ ४८ ॥

---

* अत्र श्रीशिवदास',—"वत्सकादौ वत्सक कुटज, तस्य त्वक् इति चन्द्र-कलाटीकाकार: वैद्यप्रसारकस्य। अन्ये तु—'विल्वशक्रयवाम्बोद-बालकातिविषा-कृत'। कषायो इत्यतीसारं साम पित्तसमुद्भवम्॥' इति सुश्रुतसवादात फल-मेवेत्याहु, किन्तु प्रायो व्यवहारत्वचा। फलेनापि ज्वरे रक्तप्रावल्ये च, यदुक्त—'कुटज, कफवातासृक्कलम्बदोषोऽर्शोऽतिसारजित्। तद्वीज रक्तपित्तातीसारज्वर-हरं स्मृतम्'॥" इति।

सामरक्तातिसारे कुटजाष्टकम्।—

कुटजातिविषापाठा-धातकीलोध्रमुस्तकैः।
क्लीबेरदाडिमयुतैः कृत क्वाथः समाक्षिकः॥ ४९॥
पेयो मोचरसेनैव कुटजाष्टकसंज्ञकः।
अतीसारान् जयेद्घोर-रक्तशूलामदुस्तरान्॥ ५०॥

अतिसारे क्लीबेरादि।—

क्लीबेरधातकीलोध्र-पाठालज्जालुवल्लकैः।
धान्यकातिविषामुस्ता-गुडूचीबिल्वनागरैः॥ ५१॥
कृतः कषायः शमयेदतीसारं चिरोत्थितम्।
अरोचकामशूलाम्ल-ज्वरघ्नः पाचनः स्मृतः॥ ५२॥

बालातीसारे धातक्यादि।—

धातकीबिल्वरोध्राणि बालकं गजपिप्पली।
एभिः कृतं घृतं शीतं शिशुभ्यः क्षौद्रसंयुतम्॥
प्रदद्यादवलेह वा सर्वातीसारशान्तये॥ ५३॥

कुटजेति।—कुटजाष्टकीऽर्थं क्वाथ अतीसारान् जयेत। अतीसारानिति बहुवचनलेन सन्निपातानित्यर्थं। कुटज इन्द्रयव। धातकी धातकीकुसुमानि, व्यवहारात्। क्लीबेरं बालकम्। दाडिम * दाडिमफलम्। मोचरस शाल्मलीनिर्यास, स चात्र प्रक्षेपे। मध्येपि प्रक्षेप। अष्टग्रहण यथालाभनिवेशार्थम्॥ ४९।५०॥

क्लीबेरेति।—क्लीबेरादिकीऽर्थं क्वथित कषायश्चिरोत्थितमतीसार जयेत। क्लीबेर बालकम्। लज्जालु खनामख्यात। वल्लक कुटज। अत्र पाठा गुडूची चेति द्रव्यद्वयमधिक लिखितमन्यनिबन्धात्, न दोषो ज्वरनाशनार्थम्। शेष सुबोधम्॥५१।५२॥

धातकीति।—धातक्यादिभि घृत क्वथितं, शीत सशर्करं। अत्र धातक्या कुसुमानि। गजपिप्पली प्रसिद्धा। क्षौद्रसंयुतमिति—मधुप्रक्षिप्तम्। अवलेह वेति—एतेषां चूर्णं कृत्वा मधुना लाह्य बालकेभ्योऽवलेह वा दद्यात्॥ ५३॥

---

* "दाडिमफलवल्कलम्" इति शिवदासव्याख्या।

ग्रहण्या शालपर्ण्यादि ।—

शालपर्णीबलाबिल्व धान्यशुण्ठीकृतः सृतः ।
आध्मानशूलसहितां वातजां ग्रहणीं जयेत् ॥ ५४ ॥

ग्रहण्या गुडूच्यादि ।—

गुडूचीतिविषाशुण्ठी-मुस्तै क्वाथः कृतो जयेत् ।
आमानुषक्तां ग्रहणीं ग्राही पाचनदीपनः ॥ ५५ ॥

अतीसारे यवादि ।—

यवधान्यपटोलानां क्वाथः सचौद्रशर्करः ।
योज्यः कुर्यातिसारेषु बिल्वाम्राक्षिभवस्तथा ॥ ५६ ॥

क्रिमिरोगे त्रिफलादि ।—

त्रिफला देवदारुश्च मुस्ता मूषककर्णिका ।
शिग्रुरेतैः कृतः क्वाथः पिप्पलीचूर्णसंयुतः ॥
विडङ्गचूर्णयुक्तश्च क्रमिघ्नः क्रिमिरोगहा ॥ ५७ ॥

इदानीं ग्रहणीशान्तये योगद्वयमाह, शालपर्णीत्यादि ।—सृत क्वथित. । शालपर्णी प्रसिद्धा । बला च प्रसिद्धा, "सानस" इति लोके । आध्मान उदरापूर । शूलोऽवानजनितपीडा, "कुरकुरी" इति लोके ॥ ५४ ॥

गुडूचीति ।—चातुर्भद्रसञ्ज्ञकोऽयं क्वाथ. । अत्र गुडूच्यादयो विख्याता एव ॥५५॥

यवेति ।—कुर्यातिसारे योगद्वयमपि, तद्यथा—इन्द्रयवादीनां क्वाथ. सचौद्रशर्करः एको योग । बिल्वाम्राक्षिभव क्वाथो द्वितीय । अथापि सचौद्रशर्कर इति सम्बन्धनीयत्वेति ग्रहणात् ।* यवोऽत्र कुटजबीजम् । चौद्रशर्कराप्रक्षेप साधु. । छदिरतीसारस्योपद्रव. । † बिल्वमत्र बिल्वमूलम्, यत,—"बिल्वमूल मरुच्छ्लेष्म-च्छर्दिघ्न न च पित्तकृत्" इति, तदभावे फलमिति सर्वत्र । आम्राक्षि आम्रफलमज्जा ॥ ५६ ॥

अथ क्रिमिरोगे त्रिफलेति ।—त्रिफला हरीतक्यादि । मूषककर्णिका इति—वातिभेदा (१)। शिग्रु शोभाञ्जनक । पिप्पलीचूर्णप्रक्षेपे । क्रिमिघ्नो बाह्याभ्यन्तरक्रिमिनाशन । क्रिमिरोग. क्रिमिजनितत्वङ्मांसकुष्ठादि ॥ ५७ ॥

---

* यवोऽत्र इन्द्रयववाची इति तु शिवदासेन न व्याख्यातम् ।

† बिल्वशब्देन बिल्वमूलमित्यपि शिवदासेन नोक्त, किञ्च बिल्वमूलस्य छर्दिहरत्वेऽपि अत्यम्लकत्वात् अतिसारहरयोगे तत्प्रयोगो न मनोरम: ।

क्रिमिरोगे फलत्रिकादि'।—

फलत्रिकामृतातिक्ता-निम्बकैरातवासकैः।
जयेन्मधुयुतः क्वाथः कामलां पाण्डुतां तथा ॥ ५८ ॥

पाण्डुरोगे पुनर्नवादि'।—

पुनर्नवाऽभयानिम्ब-* दार्वीतिक्तपटोलकैः।
गुडूचीनागरयुतैः क्वाथो गोमूत्रसयुतः॥
पाण्डुकासोदरश्वास-शूलसर्वाङ्गशोथहा ॥ ५९ ॥

रक्तपित्ते वासादि।—

वासाद्राक्षाऽभयाक्वाथः पीतः सक्षौद्रशर्करः।
निहन्ति रक्तपित्तार्त्ति-श्वासकासान् सुदारुणान् ॥ ६० ॥

रक्तपित्तादौ वासाक्वाथ।—

रक्तपित्तं क्षय कासं श्लेष्मपित्तज्वरं तथा।
केवलो वासकक्वाथः पीतः क्षौद्रेण नाशयेत् ॥ ६१ ॥

अथ कामलाया फलेति।—तिक्ता कटुरोहिणी। कैराती भूनिम्ब। पाण्डुतामिति—पाण्डुरोगम ॥ ५८ ॥

सर्वाङ्गशोथे पुनर्नवेति।—पुनर्नवा वर्षाभू, "साठ" इति लोके। दार्वी दारुहरिद्रा। तिक्तशब्देन कटुकी ग्राह्या, न तु तिक्त पटोल, समासान्तत्वात् तिक्ताया क्रखत्वम्। गोमूत्रेणैव प्लुत क्वाथ इति मन्यन्ते केचित्, तन्न युक्तम्, मूत्रन्तु प्रक्षेपे साधु व्यवहारात ॥ ५९ ॥

अथ रक्तपित्ते वासेति।—वासा आटरूषक। अभया हरीतकी। रक्तपित्तार्त्ति रक्तपित्तव्यथा। श्वासं कासञ्च सुदारुण तु साध्यम् ॥ ६० ॥

रक्तपित्तमिति।—अपरञ्च—वासकक्वाथ केवल इति—वासकोऽत्र पञ्चाङ्गो ग्राह्य। क्षौद्रमत्र प्रक्षेपे। नाशयेदिति रक्तपित्तादिकान् ॥ ६१ ॥

---

* चक्रसङ्गृहे दारु इति पाठ, न तु दार्वी। दारु देवदारु इति च शिवदासव्याख्या। चक्रादौ तिक्ता इति पाठ, न तु तिक्त, किञ्च "समासान्तत्वात् तिक्ताया क्रखत्वम्" इति टीकाकारोक्तिरपि न समीचीना, समासान्तत्वाभावात्। गूढार्थदीपिकाकारेण तिक्ता इत्येव पाठ, स्वीकृत। चक्रोक्तेऽस्मिन् योगे गोमूत्रप्रक्षेपो नास्ति।

कासे वासादि ।—

वासाक्षुद्राऽमृताक्काथः क्षौद्रेण ज्वरकासहा ।
कासघ्नः पिप्पलीचूर्ण-युक्तः क्षुद्राऽमृतस्तथा ॥ ६२ ॥

कासे क्षुद्रादि ।—

क्षुद्राकुलत्थवासाभिर्नागरेण च साधितः ।
क्काथः पौष्करचूर्णाढ्यः श्वासकासौ निवारयेत् ॥ ६३ ॥

हिक्काया रेणुकादि ।—

रेणुकापिप्पलीक्काथो हिङ्गुकल्केन संयुतः ।
पानादेव हि पञ्चापि हिक्का नाशयति क्षणात् ॥ ६४ ॥

कृच्छ्रा योगत्रयम् ।—

विल्वत्वचो गुडूच्या वा क्काथः क्षौद्रेण संयुतः ।
जयेत्त्रिदोषजां कृच्छ्रां पर्पटः पित्तजां तथा ॥ ६५ ॥

कासे योगत्रयमाह वासाक्षुद्रेति ।—क्षुद्रा लघुकण्टकारिका । अमृता गुडूची । क्षौद्रेणेति—क्षौद्रप्रक्षेप । ज्वरकासहेति—ज्वरोपद्रवयुक्तकासहा । कासघ्न इति—द्वितीयस्य क्काथ केवल पञ्चाङ्गकण्टकारिकाया कृत पिप्पलीचूर्णप्रक्षिप्तस्य । तथेति ग्रहणादत्रापि * मधुप्रक्षेपमाह ॥ ६२ ॥

श्वासकासेऽपरमाह, क्षुद्रेति ।—कुलत्थोऽत्रविशेष प्रसिद्ध एव । नागरं शुण्ठी । पौष्करचूर्णाढ्य इति—पुष्करमूलचूर्णप्रक्षेप, पुष्करमूलाभावे कुष्ठ ग्राह्यमिति व्यवहार ॥ ६३ ॥

अथ हिक्काया रेणुकेति ।—रेणुका कौन्तीति पर्य्यायनाम्ना प्रसिद्धा । निर्गुण्डीबीजानि रेणुकाशब्दवाच्यानि इत्येके । व्यवहारादव हिङ्गु भर्जित, "भर्जित हेयं हिङ्गु नोल्लेदङ्गइवेत्" इति वचनम् । कल्कस्थाने चूर्णमिति पठन्ति केचित् । पञ्चेति—अन्नजादयो विख्याता । क्षणादिति ग्रहणेनास्य दृष्टफलत्व दर्शितम् ॥ ६४ ॥

अथ कृच्छ्रा विल्वत्वच इति ।—एतत् योगत्रय क्षौद्रयुक्त कृच्छ्रं जयेदिति । किं तत् त्रयम् ? विल्वत्वच क्काथ एको योग, गुडूच्या क्काथो द्वितीय, पर्पटोऽवस्तृतीय इति । विल्वत्वच विल्वमूलवल्कलस्य, कृच्छ्रहरत्वात् , तथा हि—"विल्वमूल मरुच्छ्लेष्मच्छर्दिघ्न न च पित्तकृत्" इति । ननु गुडूची सुश्रुते आरग्वधे कफपित्तहरत्वेनोक्ता, तत्

---

* कृच्छ्रकृते योगेऽस्मिन् मधुप्रक्षेपो नास्ति ।

गृध्रस्या दशमूलक्वाथ निर्गुण्डीक्वाथस्य।—

हिङ्गुपुष्करचूर्णाढ्यो दशमूलशृतो जयेत्।
गृध्रसीं केवल क्वाथ शेफालीपत्रजस्तथा ॥ ६६ ॥

आमवाते रास्नापञ्चकम्।—

रास्नाऽऽशृतामहादारु-नागरैरण्डजे शृतम्।
समधातुगते वाते सामे सर्वाङ्गजे पिबेत् ॥ ६७ ॥

आमवाते रास्नादशकम्।—

रास्ना गोक्षुरकैरण्ड-देवदारु पुनर्नवा।
गुडूच्यारग्वधस्यैव क्वाथमेषा विपाचयेत् ॥ ६८ ॥
शुण्ठीचूर्णेन सयुक्त पिबेज्जङ्घाकटीग्रहे।
पार्श्वपृष्ठोरुपीडायामामवाते सुदुस्तरे ॥ ६९ ॥

क्वाथ तस्या क्वाथा वातजाया अत्रत्वेन प्रदर्शित ? उच्यत—अत्र मधुसयोगादेवेन तद्वातशक्तिविशेषात, किंवा शाकवगे तत्पत्रमुक्त, लता तु वातमपि शमयति इति न दोष। अत्र तु गुडूच्या क्वाथ सुशीतला ग्रेय, उक्तञ्च—"क्षिप्तरुहाया क्वाथ सुशीतल य पिबेन्मधुना। छर्दि स वातपित्तश्लेष्मसमुत्था निवारयति ॥" इति। तथोत्त गृहणात् पञ्चकाथेऽपि मधुप्रक्षेप ॥ ६५ ॥

अथ गृध्रस्या योगद्वयमाह, हिङ्गुपौष्करेति।—दशमूल विख्यातम्, तदृयथा—"शालपर्णी पृश्निपर्णी द्वयती कण्टकारिका। तथा गोक्षुरकश्चैव पञ्चमूल लघु स्मृतम ॥ बिल्वाग्निमन्थ श्योनाक काश्मरी पाटला तथा। इद महत् पञ्चमूल दशमूलमुभे स्मृतम ॥ इति। शेफाली निर्गुण्डी, तस्या पत्राणि। तथेति गृहणादन्यापि हिङ्गुपुष्करमूलचूर्णप्रक्षेपो विज्ञेय ॥ ६६ ॥

अथ वातविकारेषु योगानाह, रास्नेति।—इद रास्नापञ्चकसज्ञक शृत क्वाथ पिबेत आतुर इति शेष। रास्ना सुरभि। महादारु देवदारु। एरण्डम् एरण्डमूलम्। समधातव रसाद्या शुक्लान्ता। आमवातोक्तलादेव विरेकार्थं कुतैल प्रक्षिपन्ति केचिच्चिकित्सका, तदुक्तम्—"आमवातगजेन्द्रस्य शरीरवनचारिण। एक एवाग्रणीर्जेता क्षीरवृक्षेहकेशरी ॥" इति ॥ ६७ ॥

रास्नेति।—रास्नासप्तकसज्ञकोऽय क्वाथ। रास्ना सुरभीति लोके। एरण्ड एरण्डवृक्ष। आरग्वध शतमालक। शुण्ठीचूर्णमत्र प्रक्षेपे। जङ्घाग्रहे कटीग्रहे वा, पार्श्व

वातव्याधौ महारास्नादि.।—

रास्ना द्विगुणभागा स्यादेकभागास्ततः परे।
धन्वयासबलैरण्ड-देवदारुशटीवचाः ॥ ७० ॥
वासको नागरं पथ्या चव्यं मुस्ता पुनर्नवा।
गुडूची बृहदारश्च शतपुष्पा च गोक्षुरः ॥ ७१ ॥
अश्वगन्धा प्रतिविषा क्षतमालः शतावरी।
क्षुण्णा सहचरश्चैव धान्यकं बृहतीद्वयम् ॥ ७२ ॥
एभिः क्षतं पिबेत् क्वाथं शुण्ठीचूर्णेन संयुतम्।
क्षुण्णाचूर्णेन वा योग-राजगुग्गुलुनाऽथवा ॥ ७३ ॥
अजमोदादिना वाऽपि तैलैरण्डजेन वा।
सर्वाङ्गकम्पे कुब्जत्वे पक्षाघातेऽवबाहुके ॥ ७४ ॥
गृध्र्यामामवाते च श्लीपदे चापतानके।
अन्त्रवृद्धौ तथाऽऽध्माने जङ्घाजानुगतेऽर्दिते ॥ ७५ ॥
शुक्रामये मेढ्ररोगे वन्ध्यायोन्यामयेषु च।
महारास्नादिराख्यातो ब्रह्मणा गर्भकारणम् ॥ ७६ ॥

स्नायुगतशूले एरण्डसप्तकम्।—

एरण्डो बीजपूरश्च गोक्षुरो बृहतीद्वयम्।
अश्मभेदस्तथा बिल्व एतन्मूलैः क्षतः सृतः ॥ ७७ ॥

पीडा पृष्ठपीडा जत्रुपीडेत्यर्थः। सुदुस्तरे इति कष्टसाध्ये। अत्रापि केचिदेरण्डतैल-प्रक्षेपमाहुः ॥ ६८-६९ ॥

रास्ना द्विगुणभागेति।—द्विगुणभागा रास्नाऽत्र पठन्ति, एतदपि मनोहरं न दोषः। अपरे धन्वयासादयः एकभागाः प्रत्येकम्। धन्वयासः दुरालभा। शटी कर्चूरभेदः। बृहदारः निःसृताभेदः। क्षतमालः राजवृक्षफलम्। क्षुण्णा पिप्पली। सहचरः कुरण्टकः। बृहतीद्वयमिति—लघुकण्टकारिका बृहत्कण्टकारिका चेति। प्रक्षेपश्चात्र यथादोषं यथाव्याधि च योजनीयः। योगराजगुग्गुलादयोऽग्रे वक्ष्यमाणा ज्ञेयाः। अथवेति गृहीतात् प्रक्षेपार्थं चालनुपादिचूर्णम् आभाद्य वा ग्रन्थान्तरादवगन्तव्यम्। शेषं सुगमम् ॥ ७०—७६ ॥

एरण्डसप्तक सप्तसंख्याङ्क, एरण्ड इति।—एरण्डादीनां मूलैर्जटाभिः कृतः क्वाथः

एरण्डतैलहिङ्ग्वाढ्य' सयवक्षारसैन्धवः।
स्तनस्कन्धकटीमेढ्र-हृदयोत्था व्यथा जयेत् ॥ ७८ ॥

वातशूले नागरादि इन्द्रयवक्वाथश्च।—

नागरैरण्डज' क्वाथ' क्वाथ इन्द्रयवस्य च।
हिङ्गसौवर्चलोपेतो वातशूलनिवारण' ॥ ७९ ॥

पित्तशूले त्रिफलादि।—

त्रिफलाऽऽरग्वधक्वाथ शर्कराक्षौद्रसंयुतः।
रक्तपित्तहरो दाह-पित्तशूलनिवारणः ॥ ८० ॥

कफशूले एरण्डमूलक्वाथ।—

एरण्डमूलं द्विपलं जलेऽष्टगुणिते पचेत्।
तत्क्वाथो यावशूकाढ्य. पार्श्वहृत्कफशूलहा ॥ ८१ ॥

उक्तप्रक्षेपयुक्ता स्तनस्कन्धादिगतपीडा जयेदिति। अवाश्मभेद पाषाणभेद। हिङ्ग अत्र भर्जितम्। समुदायप्रक्षेपे द्रव्याणा मानमिद वदन्त्येके, तद्यथा—"चारसैन्धवचूर्णाना माषैकैक प्रयोजयेत। माषार्द्धं हिङ्गचूर्णञ्च तैल माषचतुष्टयम ॥" इत्यादि ॥७७।७८॥

अथ शूले वातादिनिमित्तजे योगत्रयमाह नागरेत्यादि।—एतत योगत्रय वातशूले प्रशस्तम्। नागर शुण्ठी। एरण्डम् एरण्डमूलम्। इन्द्रयव कुटजबीजम। केचित् द्रव्यत्रयेणापि योगमेक वदन्ति, तथा हि—"हिङ्गपुष्करमूलाभ्या हिङ्गुसौवर्चलेन वा। * विश्वैरण्डयवक्वाथ पीत शूलनिवारण ॥" इति ॥ ७९ ॥

१ त्रिफलेति।—अथ क्वाथ पित्तशूले विहित। त्रिफला प्रसिद्धा। आरग्वध कृतमालक। केचिदत्र रक्तपित्तोपशमनार्थं त्रिफलाशब्देन द्राक्षादिक क्षिपन्ति, तथा च्यवनः—"द्राक्षाक्षमर्थखर्जूर फलानीति फलत्रिकम। इय पीक्षा द्वितीया च त्रिफला चरकादिभि'। फलत्रिकाणा योगोऽय चरकाद्युक्तपेक्षिके ॥" इति ॥ ८० ॥

एरण्डेति।—अथ क्वाथ कफशूले प्रशस्त। द्विपलमिति कफस्य दुर्जयत्वात। जलेऽष्टगुणिते इति—द्रव्यभागापेक्षिते। यावशूकाढ्य इति—यवक्षारचूर्णप्रक्षेप। पार्श्वशूल, हृच्छूल कफशूलक्षेति, कफशूल कफजनितशूलम ॥ ८१ ॥

* "विश्वैरण्डयवक्वाथ" इत्यत्रोक्तयवशब्दस्य इन्द्रयवेति व्याख्या शिवदासादिभि. कैरपि न कृता, अत. नागरैरण्डज. इत्यादियुक्तयोगेन सह अस्य ऐक्यबोधिका व्याख्या लिखिता।

हृद्रोगादौ दशमूलक्वाथ ।—

दशमूलक्वत क्वाथ सयवक्षारसैन्धवः ।
हृद्रोगगुल्मशूलानि कासं श्वासञ्च नाशयेत् ॥ ८२ ॥

मूत्रकृच्छ्रे हरीतक्यादि ।

हरीतकीदुरालभा कृतमालकगोक्षुरैः ।
पाषाणभेदसहितै क्वाथो मार्त्तिकसंयुतः ॥
विबन्धे मूत्रकृच्छ्रे च सदाहे सरुजे हितः ॥ ८३ ॥

अश्मर्य्यां वीरतरादि ।—

* वीरतरो हृच्चवन्दा काशः सहचरत्रयम् ।
कुशद्वयं नलो गुन्द्रा बकपुष्पोऽग्निमन्थकः ॥ ८४ ॥
मूर्वा पाषाणभेदश्च श्योनाको गोक्षुरस्तथा ।
अपामार्गश्च कमलं ब्राह्मी चेति गणो वरः ॥८५॥
वीरतरादिरित्युक्तः शर्कराऽश्मरिकृच्छ्रहा ।
मूत्राघात वायुरोगान्नाशयेन्निखिलानपि ॥८६॥

दशमूलेति ।—दशमूल प्रसिद्धम् । यवक्षारसैन्धवचूर्णप्रक्षिप्तोऽय क्वाथो हृद्रोगादीन् हन्तीति ॥ ८२ ॥

हरीतकीति ।—मूत्रकृच्छ्रे हरीतक्यादिसङ्गकोऽयम् । अत्र दुरालभा यवासकः । पाषाणभेद प्रतीत, "वज्रतो" इति लोके । मार्त्तिकसंयुत इति—मधुप्रक्षेप । विबन्धे अप्रवर्त्तने । केचित पाषाणभेदसहितैरित्यत्र "पाषाणभेदादृष्टिभि" इति पठन्ति, तत्र वृष्टिरेला । अयमपि साधु ॥ ८३ ॥

वीरतर इति ।—अथाश्मरीरोगे वीरतरादिसङ्गकोऽय गण वर श्रेष्ठ उक्त कथित, मुनाभिरिति शेष । वीरतर उशीर इति लोके शरो वा । हृच्चवन्दा हृच्चादनी । काश प्रसिद्ध । सहचरत्रयमिति—कुरण्टकत्रय, तत्र पीतरक्तनील-कुसुमभेदेन बोद्धव्यम् , तथा चुक्त—"पीतो रक्तोऽथ नीलश्च कुसुमैस्त्रिविधोयते ।

* "वीरतर" इत्यत्र 'वीरतरु' इति पाठेऽपि स एवार्थ केचित्तु वीरतरुर्नल्लतर इति नाना प्रसिद्ध लाङ्गलदेशे नर्मदातटे चर्मखतीनदीसमीपे च । तल्लक्षण यथा—"वेल्लतरो जगति वीरतरु प्रसिद्ध श्वेतासितारुणविलोहितपीतपुष्प । स्वाज्जातितुल्यकुसुम शमिसूक्ष्मपत्र, स्यात कण्टकी विजलदेशज एष, हृद्य ॥" इति ।

अश्मर्याम् एलादि।—

एलामधुकगोकण्ट-रेणुकैरण्डवासकाः।
क्वाथ्याऽश्मभेदसहिताः क्वाथ एषा सुसाधितः॥
शिलाजतुयुत पेय' शर्कराऽश्मरिक्वच्छ्रहा॥८७॥

मूत्रकृच्छ्रे गोक्षुरमूलक्वाथ।—

समूलगोक्षुरक्वाथ' सितामाक्षिकसंयुतः।
नाशयेन्मूत्रकृच्छ्राणि तथा चोष्णममीरणम्॥८८॥

प्रमेहे वरादिवल्मकादिश्च।—

वरादार्व्यब्दटारूणा क्वाथ चौद्रेण मेहहा।
वल्मकत्रिफला दार्वी मुस्तको वीजकस्तथा॥८९॥

पीत कुरण्टका ज्ञेयो रक्त कुरवक स्मृत॥ नीलस्याच्चगज प्रोक्तो नामत परिकीर्त्तित॥" इति। कृष्णश्यामिति—दभङ्गय, हरितरक्तपत्रभेदेन। नल नलसर। गुन्द्रा पटेरकभेद। वकपुष्पो वसुक, सामसभेदो वा। अग्निमन्थोऽरणि। मूर्वा चोरस्नायु। पाषाणभेद "बजेती" इति प्रसिद्ध। कमलनच रक्तम्। ब्राह्मी खनामख्याता। ग्रैष सुबोधम्॥ ८४—८६॥

अपरनाम्याह, एलामधुकेति।—एलादिकोऽय योग। अत्र मधुक मधुयष्टी। गोकण्टको गोक्षुरक। रेणुका प्रसिद्धा। अश्मभेद पाषाणभेद। सुसाधित इति—सम्यक् क्वथित। शिलाजतु प्रक्षेपे साधु, तत्तु माषचतुष्टय व्यवहारात्। क्वच्छ्रहेति—मूत्रकृच्छ्ररोगघ्न इत्यर्थ॥८७॥

समूलगोक्षुरेति।—अय पञ्चाङ्गगोक्षुरक्वाथोऽपि सितामधुप्रक्षेप द्वितीय. मूत्रकृच्छ्रनाशनो ज्ञेय। उष्णमीरणमिति—मूत्राघातभेद॥ ८८॥

वरेति।—एतद्योगदय प्रमेहेषु सम्मतम्। कि तदयम? एको वरादि, अपरो वल्मकादिरिति। वरा अत्र त्रिफला। दार्वी दारुहरिद्रा। अब्दो मुस्तकम्। दारु

"सहचरद्वयम्" इत्यत्र "सहचरौ" इति चक्रदत्तपाठ, "सहचरौ त्रिकण्टोऽयम्" इति शिवदासव्याख्या। सुश्रुतेऽपि सहचरद्वयमिति पाठ। किञ्च अत्रोक्तेषु मूर्वाऽपामार्ग कमल ब्राह्मी इत्येतेषु स्थानेषु सुश्रुते चक्रदत्ते च मोरटा नन्दिरुरुण्टकेन्दीवर-कपोतवल्का इत्येते पाठभेदा दृश्यन्ते।

* "गुडूची" इति शिवदासव्याख्या।

प्रमेहे फलत्रिकादि ।—

फलत्रिकाब्ददार्वीणा विशालायाः घृतं पिबेत् ।
निशाकल्कयुतं सर्वं प्रमेहविनिवृत्तये ॥ ९० ॥

प्रदरे दार्व्यादि ।—

दार्वी रसाञ्जन मुस्तं भल्लातः श्रीफलं वृषः ।
कैरातश्च पिबेदेषां क्वाथं शीत समाक्षिकम् ॥
जयेत् सशूलं प्रदर पीतश्वेतासिताऽरुणम् ॥९१॥

व्रणरोगे न्यग्रोधादि ।—

न्यग्रोधप्लक्षकोशाम्र-वेतसा बदरी तुणिः ।
मधुयष्टी पियालश्च रोध्रद्वयमुडुम्बरः ॥९२॥
पिप्पलश्च मधूकश्च तथा पारिभद्रपिप्पलः ।
शल्लकी तिन्दुकी जम्बू-द्वयमाम्रातरुः शिवा ॥९३॥

टेवदारु। एतेषां क्वाथो मधुप्रक्षेप । द्वितीय,—वत्सक कुटज । बीजकोऽग्नी इक्षविशेष । तथेति ग्रहणादयमपि मधुप्रक्षेपो व्यवस्थियते ॥ ८९ ॥

अपरस्य फलत्रिकादिप्रयोग, फलत्रिकेति ।—अब्दो मुस्ता। दार्वी दारुहरिद्रा। विशाला इन्द्रवारुणी। निशा हरिद्रा, तस्या कल्क प्रक्षेपे। अत्र मध्यपि प्रक्षिपन्त्येके व्याधिविहितत्वात् ॥ ९० ॥

अथ प्रदरे दार्वीति।—दार्व्यादिकोऽय गण । अस्य क्वाथ शीत सशर्करं, अत एव समाक्षिक मधुप्रक्षेपम्। दार्वी दारुनिशा। रसाञ्जन प्रतीत, तच्च दार्वीक्वाथ-समुद्भवमिति वदन्ति। भल्लातो भल्लातकफल, तदसङ्गे रक्तचन्दनमिति। श्रीफल विल्वम। वृष भाटरूषक। कैरातो भूनिम्ब। सशूलमिति—सशूलमुपद्रव प्रदरस्यैव। असित कृष्णम् ॥९१॥

अथ व्रणरोगे न्यग्रोधेति।—न्यग्रोधादिकषायोऽय व्रणरोगेषु प्रशस्त ग्राही च भवति। न्यग्रोधो वटवृक्ष । प्लक्ष पाकरीत लोके। कोशाम्र जन्तुवृक्ष, तत्फलमस्त्र ग्राही भवति। वेतसो वञ्जुल, जलवेतस इति प्रतीत । तुणि "लोटि" पादपो वस्त्ररञ्जनार्थक पीतवर्ण । पियालश्चिरोञ्जी। रोध्रद्वयमिति—लोध्र सावर-लोध्रश्चेति। मधुकी वृक्षविशेष.। पारिभद्रपिप्पल. पिप्पलभेद प्रसिद्ध.। शल्लकी

कदम्बककुभौ चैव भल्लातकफलानि च।
न्यग्रोधादिगणक्काथ यथालाभञ्च कारयेत् ॥९४॥
अय क्काथो महाग्राही व्रण्यो भग्नञ्च साधयेत्।
योनिदोषहरो दाह-मेदोमेहविषापहः ॥९५॥

स्थौल्ये विल्वादिपञ्चमूलम्।—

विल्वोऽग्निमन्थ' श्योनाक' काश्मरी पाटला तथा।
क्काथ एषा जयेन्मेदो-दोष चौद्रेण संयुतः ॥९६॥

स्थौल्ये त्रिफलाक्काथ उष्णाम्बुयोगश्च।—

चौद्रेण त्रिफलाक्काथ' पीतो मेदोहर स्मृतः।
शीतीभूत तथोष्णाम्बु मेदोहृत् चौद्रसंयुतम् ॥९७॥

उदरे चव्यादि।—

चव्यचित्रकविश्वाना माधितो देवदारुणा।
क्काथस्त्रिवृच्चूर्णयुतो गोमूत्रेणोदरान् जयेत् ॥९८॥

करिप्रिया। जम्बूद्वयमिति—क्षुद्रजम्बूराजजम्बूभेदेन। शिवा हरीतकी। कदम्बो वृक्षविशेष, न तु भूमिकदम्ब। ककुभ अर्जुन, मृगस्थमूली विटपविशेष, अथवा "कौह" शब्दवाच्यवृक्षविशेष। यथालाभमिति—व्यस्त वा योज्य क्काथ्यम् ॥९२—९५॥

विल्व इति।—एष महापञ्चमूलाख्य कषायो मेदोहरो प्रशस्त। तत्राग्नि-मन्थोऽरणि। श्योनाक, वृक्षविशेष। काश्मरी गाम्भारी। एषामिति—महापञ्च-मूलाना, महातरुसघत्वात् महच्छब्दोपबृंहितमिदम्। चौद्रेण सयुत इति—मधुप्रक्षेप ॥९६॥

चौद्रेणेति।—अपरोऽपि त्रिफलाक्काथो मधुप्रक्षेप दोषहरो भवति, त्रिफलाऽत्र हरीतक्यादिकम। शीतीभूत तथेति योगान्तरमाह—उष्णाम्बु शीतलीभूत कृत्वा तत्र मधुप्रक्षेप मेदोहृद्भवति। उष्णाम्बु अष्टमाशावशेषितजल, तच्च द्विपलमित, मधु चतुर्थाशमिति व्यवहारात, न तु शास्त्रम, यत —"मधुसर्पिषो मध्वम्बुनो मानतस्तुल्ये नाम्नोक्ते" (सु० सू० २० अ०) इति। अय मातरव योज्य ॥९७॥

अथोदरे चव्येति।—चव्य खनामख्यातम्। चित्रा शुण्ठी। त्रिवृत् त्रिभण्डी, "निशोथ" इति ख्याते, अत्राप्युण प्रक्षेपे साधु। गोमूत्रस्याम्बुन प्रक्षेप। उदरानिति —सर्वोदरान् ॥९८॥

श्लीपदादौ पुनर्नवादि ।—

पुनर्नवाऽमृतादारु-पथ्यानागरसाधितः।
गोमूत्रगुग्गुलुयुतः क्वाथः श्लीपदरापहः ॥९९॥

यकृदादौ पथ्यादि ।—

पथ्यारोहितकक्वाथं यवक्षारकणायुतम्।
पिबेत् प्रातर्यकृत्प्लीह-गुल्मोदरनिवृत्तये ॥ १००॥

शोथे पुनर्नवादि ।—

पुनर्नवा दारुनिशा निशा शुण्ठी हरीतकी।
गुडूची चित्रको भार्गी देवदारु च तैः श्रृतः॥
पाणिपादोदरमुख-प्राप्तं शोफं निवारयेत् ॥१०१॥

वृद्धिरोगे विफलाक्वाथ ।—

फलत्रिकोद्भवं क्वाथं गोमूत्रेणैव पाययेत्।
वातश्लेष्मकृतं हन्ति शोथं वृषणसम्भवम् ॥१०२॥

अण्डवृद्धौ राज्ञादि ।—

राज्ञाऽमृताबलायष्टी-गोकण्टैरण्डजः श्रृतः।
एरण्डतैलसयुक्तो वृद्धिमन्त्रभवां जयेत् ॥ १०३ ॥

पुनर्नवेति ।—पुनर्नवा वर्षाभू । अमृता गुडूची। दारु देवदारु। पथ्या हरीतकी। नागरं शुण्ठी। अत्यल्पोपयोगत्वात् प्रकृतेऽर्थे गुग्गुलुमाषचतुष्टयं गोमूत्रमत्रप्रमाणं, विरेके तु प्राचुर्यमुभयोः ॥ ९९ ॥

अथ श्लीपदे पथ्येति ।—पथ्या हरीतकी। रोहितकः विटपिविशेषः, "कहेरी" इति लोके। यवक्षारः पिप्पलीचूर्णं यथादोषापेक्षया व्यवहरन्ति ॥ १०० ॥

अथ शोथे पुनर्नवेति ।—पुनर्नवादिश्रृतं क्वाथितं । अत्र दारुनिशा दारुहरिद्रा। शेषं सुगमम् ॥१०१ ॥

अथ वृषणशोथे फलत्रिकेति ।—गोमूत्रेणैव क्वाथितं विफलोद्भवं कषायमिति। अथ वातकफकृते वृषणशोफे। तत्रान्तरे वातोद्भवे वृषणशोथे कथितं, तत्र विफलाक्वाथो गोमूत्रप्रक्षेपं प्रातरेव योज्यः ॥ १०२ ॥

अथाण्डवृद्धौ राज्ञेति ।—राज्ञादिकोऽयं श्रृतः क्वाथितः। राज्ञा तुरभी। बला "खिरहटी" इति लोके। यष्टी मधुयष्टी। गोकण्टको गोक्षुरकः। केचित्

गण्डमालाया काञ्चनार-वरुणक्वाथौ।—

काञ्चनारत्वचः क्वाथः शुण्ठीचूर्णेन नाशयेत्।
गण्डमाला तथा क्वाथः चौद्रेण वरुणत्वचः ॥१०४॥

श्लीपदे शाखोटवल्कलक्वाथ।—

शाखोटवल्कलक्वाथं गोमूत्रेण युतं पिबेत्।
श्लीपदानां विनाशाय मेदोदोषनिवृत्तये ॥१०५॥

अन्तर्विद्रधौ पुनर्नवादि शिग्रुक्वाथश्च।—

पुनर्नवावरुणयोः क्वाथोऽन्तर्विद्रधीन् जयेत्।
तथा शिग्रुभव क्वाथो हिङ्गसैन्धवसंयुतः ॥१०६॥

अन्तर्विद्रधौ वरुणादि।—

वरुणादिगणक्वाथमपक्वे मध्यविद्रधौ।
जषकादिरजोयुक्तं पिबेच्छमनहेतवे ॥१०७॥

स यथा—

वरुणादिगण।—

वरुणो बकपुष्पश्च विल्वापामार्गचित्रकाः।

"गोकण्टेरण्डज अत" इत्यत्र "पटोल रेवत कुरु" इति पठन्ति तच्च बहुषु पुस्तकेषु न दृश्यते ॥ १०३ ॥

अथ गण्डमालाया काञ्चनारत्वच इति।—एतद्योगद्वय गण्डमालाया प्रशस्तम्। काञ्चनारो वृक्षविशेष स्वनामप्रसिद्ध, तस्य त्वक्क्वाथ। शुण्ठीचूर्णमत्र प्रक्षेपी। वरुणोऽपि वृक्षभेदो विख्यातः। मधु प्रक्षेपे। तथेति—गण्डमालाहरो योगोऽयम ॥ १०४ ॥

अथ श्लीपदरोगे शाखोटेति।—शाखोट प्रसिद्ध, "सिहोरो" इति लोके। गोमूत्र प्रक्षेपे। एतच्च कफश्लीपदे प्रायशो योज्यम् ॥१०५॥

अथ विद्रधौ पुनर्नवेति।—पुनर्नवा अत्र श्वेतपर्णीम्, तस्या मूलम्। वरुणस्य त्वक्। अथ योगोऽन्तर्विद्रधौ अपक्वे योज्य। अपरयोगमाह, तथेत्यादि।—शिग्रु शोभाञ्जन। हिङ्गुसैन्धवसंयुत इति—व्यवहारात् प्रक्षेपे हिङ्गु रक्तकाचतुष्टय, सैन्धव माषैक प्रत्यङ्गापथीगत्वात् ॥ १०६ ॥

वरुणादिगणेति।—वरुणादिगण अत्रैवार्थे वक्ष्यमाणोऽस्ति। जषक खारमृत्तिका, वाराणसीसमीपे बहुदादेशे बाहुल्येन भवति, अन्ये तद्गुणद्रव्यमाहुरिति

अग्निमन्थद्वयं शिग्रु-द्वयञ्च बृहतीद्वयम् ॥ १०८ ॥
सैरेयकत्रयं मूर्वा मेशृङ्ग्यौ किरातकं।
अजशृङ्ग्यौ च विम्बी च करञ्जश्च शतावरी ॥ १०९ ॥ *
वरुणादिगणक्वाथः कफमेदोहरः स्मृतः।
हन्ति गुल्मं शिरःशूलं तथाऽभ्यन्तरविद्रधीन् ॥११०॥

भगन्दरे खदिरादि।—

खदिरत्रिफलाक्वाथो महिषीघृतसंयुतः।
विडङ्गचूर्णयुक्तश्च भगन्दरविनाशनः ॥ १११ ॥

ङ्गन। स यथेति ग्रहणात् वरुणादिकयोगनाह, वरुण इत्यादि।—एवं वरुणादिक्वाथो विद्रधौ प्रशस्तः। स च ऊषकादिगणरजसा प्रक्षिप्त पूर्वं कथित एव। वरुणः प्रसिद्धः। वकपुष्पः "काकडुं" इति लोके। अपामार्गः शिग्रुरी प्रतीतः। अग्निमन्थद्वयमिति—तकारो, तस्य भेदोऽरणिः। शिग्रुद्वयमिति—शिग्रुः मधुशिग्रुः च हरितरक्तभेदेन। बृहतीद्वयमिति—कण्टकारीद्वयं, तेन लघुकण्टकारिका बृहती च। सैरेयकत्रयमिति—सहचरत्रयं, तच्च पीतरक्तनीलपुष्पभेदेन भिन्नं विख्यातमेव। मूर्वा चोरलायुः। मेषशृङ्ग्यौ वल्लीसज्ञा प्रसिद्धा, मेढाशृङ्गीति लोके। किरातकः भूनिम्बः। अजशृङ्ग्यौ ककटाख्या। विम्बीति—"विरौति" इति लोके, सा च पीलुपर्णी कथिता। करञ्जौ बृहत्करञ्जौ इक्षविशेषः। ऊषकादिगणो यथा—"ऊषकसैन्धवशिलाजतुकाशीसहयगुग्गुलुहिङ्गूनि तृत्यकञ्च" (सु० सू० ३८ अ०) इति गणोऽयं यन्मात्रात् बोद्धव्यं, एतत् व्यक्तं वा प्रक्षेपे प्रशस्तम्। अथ क्वाथो मेदः कफजे विद्रधौ विहितः, वरुणादिगणस्य कफमेदोविनाशकत्वात् ॥ १०७—११० ॥

अथ भगन्दरे खदिरेति।—खदिरादिक्वाथो महिषीघृतप्रक्षिप्तः विडङ्गचूर्णावकीर्णश्च भगन्दरे विहितः। खदिरः कण्टकीद्वयञ्च प्रतीतं, तस्य सारो ग्राह्यः। महिषीघृतमिति व्याधिविहितत्वात् ॥ १११ ॥

---

* अपामार्ग-सैरेयकत्रय-मूर्वा किरातक करञ्ज इत्येतेषां स्थाने सुश्रुते चक्रदत्ते च आर्षभल सैरेयकद्वय-मोरटा वज्रिर-दर्भ-करञ्जद्वय इति पाठवैषम्यं दृश्यते।

उपदंश पटोलादि ।—

पटोलत्रिफलारिष्ट-किरातखदिरासनैः ।
क्वाथः पीतो जयेत् सर्वानुपदंशान् सगुग्गुलुः ॥११२॥

वातरक्ते अमृतादि ।—

अमृतैरण्डवासाना क्वाथ एरण्डतैलयुक् ।
पीतः सर्वाङ्गसञ्चारि वातरक्तं जयेद्ध्रुवम् ॥११३॥

वातरक्ते पटोलादि ।—

पटोलं त्रिफला तिक्ता गुडूची च शतावरी ।
एतत्क्वाथो जयेत् पीतो वातासृं दाहसंयुतम् ॥११४॥

श्वित्रे धात्र्यादि ।—

क्वाथोऽवल्गुजचूर्णाढ्यो धात्रीखदिरसारयोः ।
जयेत् सुशीलितो नित्यं श्वित्रं पथ्याशिना नृणाम् ॥११५॥

अथोपदंशे पटोलेति ।—अत्रारिष्टो निम्ब । अत्रनो द्रव्यविशेष पीतसार. । गुग्गुलुरत्र प्रक्षेपे साधनतुष्टय व्यवहारात् । सर्वानिति—पञ्चप्रकारान् ॥ ११२ ॥

अथ वातरक्ते योगद्वयमाह, अमृतत्यादि ।—एष अमृतादिक्वाथ एरण्डतैल-प्रक्षिप्त । अमृता गुडूची। वासा आटरूषक. । सर्वाङ्गसञ्चारीति—सर्वशरीरप्रसिद्धम् । ध्रुवमिति ग्रहणेन दुष्टफलोऽय योग । "अमृतारग्वधवृषै क्वाथ" इति केचित् पठन्ति, अयमपि साधु अन्यतो दर्शनात्, तथा हि—"वासागुडूचीचतुरङ्गुला-नामरण्डतैलेन पिबेत् कषायम्। क्रमेण सर्वाङ्गगमप्यशेष जयेदसृग्वातभव विकारम् ॥' इति ॥११३॥

पटोलमिति ।—अथ पटोलादिक्वाथो वातरक्ते साधु । तिक्ता कटुरोहिणी । शेष सुगमम् । अयं योग पित्तप्राये प्रायश प्रचरति ॥ ११४ ॥

अथ श्वित्रे क्वाथोऽवल्गुजेति ।—असौ क्वाथो नित्य प्रतिदिनम् । सुशीलित सतता-भ्यस्त । पथ्याशिना श्वित्रविहितपथ्याशिनाम् । अवल्गुजो वाकुचीति शब्दवाच्यद्रव्य-विशेष, तस्य चूर्ण प्रक्षेपे । धात्री आमलकीफलानि ॥ ११५ ॥

वातरक्ते लघ्वमञ्जिष्ठादि ।—

मञ्जिष्ठा त्रिफला तिक्ता वचा दारुनिशाऽमृता।
निम्बश्चैषां कृतः क्वाथो वातरक्तविनाशनः॥
पामाकक्षालिकाकुष्ठ-रक्तमण्डलजिन्मतः॥११६॥

कुष्ठादौ बृहन्मञ्जिष्ठादि ।—

मञ्जिष्ठासुरतरुत्वट्-गुडूचीकुष्ठनागरैः।
भार्गीक्षुद्रावचानिम्ब-निशाद्वयफलत्रिकैः॥११७॥
पटोलकटुकौमूर्वा-विडङ्गाग्निचित्रकैः।
शतावरीत्रायमाणा-कृष्णेन्द्रयवकैः॥११८॥
भृङ्गराजमहादारु-पाठाखदिरचन्दनैः।
विहङ्गकृष्णकैरात-वाकुचीकुटजैरपि॥११९॥
शाखोटकमहानिम्ब करञ्जातिविषाजलैः।
इन्द्रवारुणिकाऽनन्ता सारिवाद्वयपर्पटैः समैः॥१२०॥
एभिः कृतं पिबेत् क्वाथं क्षौद्रगुग्गुलुसंयुतम्।
अष्टादशसु कुष्ठेषु वातरक्तार्दितेषु तथा॥१२१॥

अथ कुष्ठादौ क्वचनबृहदाह, मञ्जिष्ठेति।—अथ लघुमञ्जिष्ठादिको योगः। तत्र दारुनिशा दारुहरिद्रा। अमृता गुडूची। एके दारु निशेति द्रव्यद्वयं व्याख्यानयन्ति, तेन दारु देवदारु, निशा हरिद्रा, एतदपि व्यवहरन्ति। पामादयोऽपि कुष्ठस्यैव भेदाः॥११६॥

अपरमप्याह मञ्जिष्ठेति।—बृहन्मञ्जिष्ठादिमञ्जकोऽयं क्वाथः प्रसिद्धः। अत्र कुटजो वृक्षविशेषः, तस्य त्वक्। निशाद्वयं हरिद्राद्वयम्। मूर्वा चौरलताः। अमृता वल्लीविशेषः। त्रायमाणा स्वनामप्रसिद्धा। कृष्णा पिप्पली। वासकः आटरूषकः। भृङ्गराजः केशरञ्जनः, "वसना" इति प्रसिद्धः। महादारु देवदारु। चन्दनं रक्तचन्दनम्। विहङ्गः नीलता। कैरातो भूनिम्बः। शाखोटको वृक्षविशेषः प्रसिद्धः। महानिम्बो निम्बाकः, "बक्का" इति लोके प्रसिद्धः। करञ्जो वृहत्करञ्जः। जन्तुः बालकम्। अनन्ता यवासकः। सारिवा आम्नाता, सा द्विविधा श्वेतकृष्णभेदेन, श्वेता लक्ष्म्यादुत्पन्ना व्रतत्तिः, कृष्णा कलहंसवत्पन्ना सुगन्धा। शेषं सुबोधम्।

उपदंशे श्लीपदे च प्रसुप्तौ पक्षघातके।
मेदोदोषे नेत्ररोगे मञ्जिष्ठादि. प्रशस्यते ॥१२२॥

शिरोरोगादौ पथ्यादि।—

पथ्याऽक्षधात्रीभूनिम्बैर्निशानिम्बामृतायुतैः।
कृत क्वाथ षडङ्गोऽय सगुड शीर्षशूलहृत् ॥१२३॥
भ्रूशङ्खकर्णशूलानि तथाऽर्द्धशिरसो रुजम्।
सूर्य्यावर्त्तं शङ्खकञ्च दन्तपानञ्च तद्रुजम्॥
नक्तान्ध्य पटल शुक्लं चक्षुःपोडा व्यपोहति ॥ १२४॥

नेत्ररोगे वासादि।—

वासाविश्वाऽमृतादार्वी-रक्तचन्दनचित्रकैः।
भूनिम्बनिम्बकटुका-पटोलत्रिफलाऽम्बुदैः॥ १२५॥
यवकालिङ्गकुटजैः क्वाथः सर्वाक्षिरोगहा।
वैक्लव्यं पीनसं श्वास नाशयेदुरसः क्षतम्॥ १२६॥

पक्षिमञ्जिष्ठादिद्रव्यै सप्तै समनानै कृत साधितं क्वाथमित्यर्थ। कणागुग्गुलुसयुत मिति—कणाचूर्ण गुग्गुलुश्च प्रक्षेपे साधु ॥ ११७—१२२॥

अथ शिरोरोगे पथ्यादिक योगमाह पथ्येति।—पथ्या हरीतकी। अक्षो विभीतक:। धात्री आमलकी। भूनिम्ब कैरात। निशा हरिद्रा। निम्ब प्रतीत। अमृता गुडूची। अय षडङ्गश्च षट् अङ्गानि यस्य स तथा। अत्र त्रिफला एकमङ्ग षडङ्गमङ्ग गुडमिति। गुडोऽत्र प्रक्षेपे साधु। अयमपि साधमुपयोज्य, प्रायेण ऊर्द्धजत्रुगतरोगहरत्वात्। शीर्षशूल शिरोव्यथा। भ्रूशङ्ख शङ्खशूल कर्णशूलमिति. तद्रुजमिति—दन्तशूलम्। शुक्लमिति—नेत्रपुष्पम् ॥ १२३।१२४ ॥

अथानन्तरमक्षिरोगे वासेति।—एक एव वासादिको गणो अक्षिरोगे प्रशस्त। वासा आटरूषक। विश्व शुण्ठी। अमृता गुडूची। दार्वी दारुहरिद्रा। कटुका तिक्त-रोहिणी, * समासान्तत्वात् कटुकाया ह्रस्वत्वञ्च। पटोल कुलक, तस्य पत्राणि।

* मूले कटुका इति पाठो विद्यते, तेन च छन्दोभङ्ग न जात., अत एव समासान्तत्वादित्यायुक्तिर्न समीचीनतया प्रतिभाति, किञ्च कटुका इत्यत्र समासान्तो ऽपि न जात इति सुधीभिर्द्रष्टव्यम्।

नेत्ररोगे अमृतादि ।—

अमृतात्रिफलाक्वाथ पिप्पलीचूर्णसंयुतः।
सच्चौद्रः शीतलो नित्य सर्वनेत्रव्यथा जयेत् ॥ १२७ ॥

व्रणादौ पञ्चवल्कलम् ।—

* अश्वत्थोडुम्बरप्लक्ष-वटवेतसजं श्रृतम्।
व्रणशोथोपदंशाना नाशनं क्षालनं स्मृतम् ॥१२८॥

प्रमथ्यालक्षणम् ।—

प्रमथ्या प्रोच्यते द्रव्य-पलात् कल्कीकृताच्छृता।
तोयेऽष्टगुणिते तस्या पानमाहुः पलद्वयम् ॥ १२९ ॥

अम्बष्ठी सुखम्। यवोऽत्रविशेष निजनामविख्यात, स च निसुषी ग्राह्य । कालिङ्गम इन्द्रयव । कुटजो वत्सकत्वक्। अय प्रातरेव योज्य कषायत्वात, तथा च्यक्त—'वासा धन निम्बपटोलपत्र तिक्ताऽमृताचन्दनवत्सकत्वक्। कलिङ्गदार्वी दहनश्च शुण्ठी मुनिम्बधात्रीवभयाविभीतम ॥ श्यामा यवक्वाथमथाष्टभाग पिबेदिम पूर्वदिने कषायम। तैमिर्यकण्डू पटलार्बुदञ्च शुक्ल तथा सव्रणमव्रणञ्च ॥ निहन्ति दाह सरुज सराग सवान् निहन्त्यक्षिगताश्च रोगान् ॥" इति। अत्र वैश्वर्ये विकृतस्वरत्वम्। यवोऽत्र नेत्ररोगविहितत्वात कथित, तथा च्यक्त—"त्रिफला घृत मधु यवा पादाभ्यङ्ग' अतावरी मुद्गा । चक्षुष्य सङ्क्षेपाद्गमे कथितो भिषग्भिरयम" ॥ १२५।१२६ ॥

अपरमपि नेत्ररोगे प्रयोगमाह, अमृतादि।—अमृतादिक्वाथोऽय सकलनेत्रामये प्रशस्त । अमृता गुडूची। त्रिफला हरीतक्यादिकम्। पिप्पलीचूर्ण प्रक्षेपे। सच्चौद्रमिति—मध्वाप प्रक्षेपे साद्र, अत एव शीतलो हिमस्पर्श, मध्वविरोधात्। नित्यमिति—सार्वकालीनमिदम् ॥ १२७ ॥

अथ व्रणेष्वपि क्षालनार्थं कषायमाह, अश्वत्थेति।—अश्वत्थादीना पञ्चानामव वल्कलो ग्राह्य । अय षडङ्गपानीयेन साध्य । क्षालन प्रक्षालन व्रणस्य। इति क्वाथसमूहाऽभिहित ॥ १२८ ॥

इदानी लेहेदान् प्रमथ्यादीनाह, तस्या पूर्व परिभाषा कथयति, प्रमथ्येति।—द्रव्यपलादिति—कल्कार्थ द्रव्यस्य पलप्रमाणम्। कल्कीकृतादिति—दृषदि पेषितात्,

---

* गूढार्थदीपिकाया पञ्चवल्कलक्वाथानन्तर "सुखरोगे जातीपत्रादिक्वाथ सुगम" इति पाठो दृश्यते, तेनैवमनुमीयते यत् एतदनन्तर जातीपत्रादिक्वाथस्य उक्तिरासीत्,

सा यथा—

रक्तातीसारे मुस्तादिप्रमथ्या।—

मुस्तकेन्द्रयवैः सिद्धा प्रमथ्या हिपलोन्मिता।
सुशीता मधुसयुक्ता रक्तातीसारनाशिनी ॥ १३० ॥

यवागूसाधनविधि।—

साध्यं चतुष्पलं द्रव्यं चतुःषष्टिपलेऽम्बुनि।
तत्क्वाथेनार्द्रशिष्टेन यवागूं साधयेद्घनाम् ॥ १३१ ॥

सा यथा—

पेषणमत्र जलेनानुक्तत्वात्। अष्टगुणिते तोये द्रव्यभागापेक्षयाऽष्टगुणपानीये। शृता क्वथिता। पलद्वयमित्यनेन चतुर्थाशावशेषित याह्यम् ॥ १२९ ॥

अथ या प्रमथ्या सा कौटजीति विवक्षया सा यथेति यदृच्छया तामेव प्रकटयन्नाह, मुस्तकेति।—इन्द्रयव कुटजबीजम्। सिद्धेत्यनेन पूर्वं कल्किता पश्चात क्वथितेत्यर्थः। हिपलोन्मितेति पाननिमित्तम्। सुशीता हिमस्पर्शा, अत एव मधुप्रक्षिप्ता, प्रक्षेपद्रव्याणामपि परिमाणं पूर्ववत ज्ञातव्यम ॥ १३० ॥

इदानीं यवागूपरिभाषामाह, साध्यमिति।—इह द्रव्यक्वाथे तण्डुलादिभि परिपाचिता यवागूशब्दवाच्या। चतुःषष्टिपलेऽम्बुनीति—द्रव्यभागात षोडशगुण पानीयं देयमित्यर्थः। घनामित्यनेन शाल्यादिना साधयेत् यावत् द्रवरहिता स्यात, अत एव तण्डुलादीना परिमाणमनुमानतो निरूपणीय, न तु अन्नप्रकल्पोक्तायां मानम (१) यथा—"पञ्चकोलेन संसिद्धा यवागूर्दीपनी तथा। बलामूलकषायेण साधिता ग्राहिणी मता॥" इति। अत्रापि मान दोषाद्यपेक्षया अनुमानतो निरूपणीयम॥ अत्र चतुःपलग्रहण यत तत सामान्य विशेषतो न्यूनमपि दृश्यते, तथा च तन्त्रान्तरे —"इन्द्रवैद्या पल द्रव्य ग्राहयन्त्याढकेऽम्भसि। भेषजस्यातिबाहुल्यात् कदाचिदरुचिर्भवेत॥" इति ॥ १३१ ॥

स च पाठ कैषाञ्चित् प्रमादान विलुप्त इति। अध्ययनार्थिना बोधार्थं स प्रदर्श्यते,—"जातीपत्रान्वितद्राक्षा यासदार्वीफलत्रिके। क्वाथ. कौटजयुत. शीतो गण्डूषो मुखपाकनुत्॥" इति।

यवखानान्नादियवागू ।—

आम्राम्रातकजम्बूत्वक्कषाये विपचेत् बुधः ।
यवागूं शालिभिर्युक्तां तां भुक्त्वा ग्रहणीं जयेत् ॥ १३२ ॥

यूषसाधनविधि ।—

* कल्कद्रव्यपलं शुण्ठी पिप्पली चार्द्रकार्षिकी ।
वारिप्रस्थेन विपचेत् स द्रवो यूष उच्यते ॥ १३३ ॥

स यथा—

त्रिदोषज्वरे सप्तमुष्टिकयूष ।—

कुलत्थयवकोलैश्च मुद्गैर्मूलकशुण्ठकैः ।
शुण्ठीधान्याकयुक्तैश्च यूषः श्लेष्मानिलापहः ॥ १३४ ॥

अथ सा यवेत्यनेन तस्या स्वरूपमाह, आम्रेति ।—आम्रो वृक्षविशेषो विख्यातः । † आम्रातकस्त्वडेद, राजाम्र इति केचित् । जम्बु प्रसिद्ध एव, एषां त्वक् क्वाथो ग्राह्या । कषाय इति ग्रहणेन स्वरसादयोऽपि पञ्चकषायास्तैरपि कर्त्तव्या न दोषो व्यवहारात्, यत, पञ्चकोलबलादीना कल्करसेनैव साधिता बल्ली यवाग्वो दृश्यन्ते । बाहुल्यञ्च द्रव्यगुणावल्यामुक्तम्, यथा—"यैर्यैरौषधगणैर्यवागू साधु साधिता । तांस्तानेवौषधगुणान् पुष्णाति विधियोजिता ॥" इति । वृध इति ग्रहणेनान्नादिपरिमाणेन रन्धनविधौ दक्ष इत्यर्थः ॥ १३२ ॥

सम्प्रति यूषमाह, अथ द्रव्यकृतयूषोऽपि विख्यात एव, कौदृश ? इत्यपि-भाषामप्यादावाह कल्कद्रव्यपलमिति ।—कल्काई द्रव्य तच्च धान्यमूलकशुण्ठकादिकं, तथा शुण्ठी पिप्पली चार्द्रकार्षिकी प्रत्येक तौल्यात्। केचित्तु शुण्ठी-पिप्पलीचूर्णं पश्चात् प्रक्षेपे विपक्ति। वारिप्रस्थेनेति—द्रवैर्गुणात् द्वात्रिंशत्पल-मितेन जलेन। स द्रवो द्रवप्राय । अत्राप्यत्रपरिमाणादिक यन्नोक्त तदनुमानतो ग्राह्यम, यद्वा—जलानुसारतो रन्धनविधिदक्षसकाशात् इष्टपरिपाकपरिपाट्या कुर्यादित्यर्थः ॥ १३३ ॥

स यथेत्यनेन वक्ष्यमाणसप्तमुष्टिकयूषविधि दर्शयन्नाह, कुलत्थेति ।—अथ

---

* पारिभाषिकं चक्रपाणिना कल्कसाध्ययवागूविषये पठितं ।

† आम्रातको गुडपुष्प, "आमड़ा" इति लोके ।

सप्तमुष्टिक इत्येष सन्निपातज्वरान् जयेत्।
आमवातहरः कण्ठ-हृद्वक्त्राणां विशोधनः॥ १३५॥

पानीयसाधनविधिः।—

चुक्रं द्रव्यपलं साध्यं चतुःषष्टिपले जले।
अर्द्धशिष्टञ्च तद्देयं पाने भक्तादिसविधौ॥ १३६॥

तत् यथा—

सप्तमुष्टिकसञ्ज्ञको यूष प्रविड एव। कुलत्थोऽन्नविशेषः। कोलं बदरफलम्। मूलक-शुण्ठकैरिति—लघुमूलकशुण्ठे शुण्ठनत्र * नालयन्थि, मूलकपोतिकेति केचित् गुणप्राबल्यात् तथा हि—"कटुतिक्तरसा हृद्या रोचनी वह्निदीपनी। सर्वदोषहरा लघ्वी कण्ठ्या मूलकपोतिका॥" इति। धन्याक कुस्तुम्बुरु। सप्तमुष्टिक इत्यनेन कुलत्थादीनां मुष्टिसप्तक यावत् तत्तान्तरदर्शनात्, यथा—"एकैक मुष्टिमाहृत्य" इत्यादि, मुष्टिरत्तर्नखमुष्टि, न तु मुष्टि पलम्, अत्रैव पक्ष वैश्विदाद्रियते। † चक्रस्तु प्रत्येकमेषां पल यावत्, सर्वसम्मतत्वात्। ननु सकलमेव द्रव्यमुचितमात्रया-ऽन्वित यत् क्वाथविधानेन यूष क्रियते तदत्रासम्प्रदाये न मनोहर, किन्तु व्यवहारात् कर्त्तव्यविधौ यवकुलत्थमुद्गा अन्यद्रव्यापेक्षया बहु देया शुण्ठ्यादयस्तु पश्चात् कटकार्थं तावद्देय यावता कटुत्वं स्यात्, एवमन्यत्रार्थे बदरादीना दान, क्वाथौ धान्यकमूलकशुण्ठ्यो पृथक् पलपरिमितयोश्च दानमिति कर्त्तव्यविधि साधु। कण्ठहृद्वक्त्राणां विशोधन इति—कण्ठविशोधन हृद्विशोधन वक्त्रविशोधनञ्च। विशोधन कफस्येत्यर्थ॥ १३४।१३५॥

इदानी पानादिकल्पनामाह चुक्रमिति।—इद पानादिकल्पनाया परिभाषा। चुक्र कुट्टितम्। द्रव्य व्याधिविहितम्। साध्य क्वथितम्। तदिति—द्रव्यम्, अर्द्धावशेषितं जलमित्यर्थ। पाने इति—पानरूपे, यथा वक्ष्यमाण षडङ्गादिपानीयम्। भक्तादिसविधाविति—शूकरसयवान्वादिरूपे॥ १३६॥

---

* शुण्ठ नालयन्थिरिति व्याख्यान न टीकाकृद्भिराहृतम्, मूलकशुण्ठक शुष्क-मूलकमिति ह्रस्वा। मूलकपोतिका बालमूलक, न तु मूलकशुण्ठकमिति।

† "चक्र पूनर्यवादीनामाहारद्रव्यत्वात् प्रत्येक पलमानत्वेऽपि न दोष, इत्याह" इति तत्त्वचन्द्रिका।

पिपासाज्वरे षडङ्गपानीयम्।—

उशीरपर्पटोदीच्य-मुस्तनागरचन्दनैः।
जलं शृतं हिमं पेयं पिपासाज्वरनाशनम्॥ १३७॥

उशीदकविधि।—

अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा।
अथवा क्वथनेनैव सिद्धमुशीदकं वदेत्॥ १३८॥

तत् यथेति वाक्येन पानादिकार्थं प्रक्रिया प्रकटयति ग्रन्थकार, उशीरेति।—अर्थं षडङ्गसङ्गक। उशीदीच्य बालकम्। नागर शुण्ठी। चन्दन रक्तम्। जल पानीयम्। शृत क्वथितम्। हिम शीतस्पर्शम्। पेयमिति वारवारम, यत,—"मुहुर्मुहुश्च तट्कार्द-हिक्कास्वासगरेषु च" (शार्ङ्ग० पूर्व० २ अ०) इति वचनात्। एषा योगो ज्वरादितो यक्त तथा हि—"षडङ्गाटे शृत तोय देयमादौ ज्वरस्य वै"॥ १३७॥

अथोशीदकविधि दर्शयन्नाह, अष्टमेनेति।—यत केवलमेव पानीयमष्टमाशादिकल्पनया सिद्ध भवति तदुशीदकमिति सज्ञ वदेदिति। अशशेषेणाष्टमादिभिः प्रत्येकमभिसम्बध्यते, तेन अष्टमाशेन चतुर्थाशेनार्द्धाशेनेत्यर्थ, अशमव क्वथनावशिष्टम्। अथवेत्यनेन पक्षान्तरमाह, क्वथनेनैवेत्यादि।—क्वथनमिति—अत्र विपादशेषमित्यर्थ। एतत क्रियाचतुष्टय टीकापेक्षया अभिहितम्, तथा हि—"तत पादहीनं पित्तघ्न तच्छ्लेष्मनिलापहम। अर्द्ध चतुष्कण्टइर शेष यादि विदोषजित्॥" इति। ननु यद्येव, तर्हि सुश्रुतेन कथमेतद्विपरीतमुक्तम्,— "तत पादहीन वातघ्नमर्द्धहीनन्तु पित्तजित। कफघ्न पादशेषच्च पानीय दीपन स्मृतम्॥" इति? सत्यम्, आद्य पक्षो व्यवहारी स च ज्वरादौना दोषप्रकोपे प्रशस्त, द्वितीयस्तु षड्तुषु दोषापेक्षयाऽभिहित, सुश्रुते उक्तञ्च—†"शारदश्चार्द्धपादोन पादहीनन्तु हैमनम्। शिशिरे च वसन्ते च ग्रैष्मे पादावशेषितम्॥ विपरीतन्तु दृष्ट्वा वार्षिकञ्चाष्टभागिकम्॥" इति यद्विरोधपरिहार कृत, तत साधुभिर्विचारणीय, अत्र विस्तरभयान्न लिखित। ‡ सिद्धमिति यत् यद्दण लघूक्तिक्वथननिमित्तम्, यत,—"यत् क्वाथ्यमान निर्वेग

---

* मुद्रितसुश्रुतसहितासु नाय श्लोको दृश्यते।

† मुद्रितसुश्रुतसहितासु नाय सार्द्धश्लोको दृश्यते।

‡ सिद्धमिति यत् यद्दण कृत तत् क्वथननिमित्त लघुपाकित्वबोधकम् इति पाठकल्पनं सङ्गताथकम्।

रात्रौ उष्णोदकपानस्य गुणा ।—

श्लेष्मघ्नं वातमेदोघ्नं बस्तिशोधनदीपनम्।
कासश्वासज्वरहरं पीतमुष्णोदकं निशि ॥ १३९ ॥

क्षीरसाधनाविधि ।—

क्षीरमष्टगुणं द्रव्यात् क्षीरान्नोरं चतुर्गुणम्।
क्षीरावशेषं तत् पीतं शूलमामोद्भवं जयेत् ॥ १४० ॥

निष्फेन निर्मलं तथा। घृतशीतं विदोषघ्नं वाप्यात्यर्थावशीतलम्॥" इति, अन्यथा दोषकरं स्यात्, तथा हि—"धारापातेन विष्टब्धि दुर्जरं पवनाहतम्। घृतशीतं पुनस्तप्तं सर्वं दोषकरं स्मृतम्॥" इति। उष्णोदकं यदेदिति—ईषदुष्णम् उष्णोदकं कथितम् ॥ १३८ ॥

अथोष्णोदकस्य निशि पीतस्य गुणमाह, श्लेष्मघ्नमिति।—एतदुष्णोदकं यदा निशि पीतं तदा श्लेष्मादिकान् हन्तीति। वातमेदोघ्नमिति—वातघ्नं मेदोघ्नञ्च। श्लेष्मवात-मेदोघ्नमिति वा पाठान्तरम्। बस्तिशोधनं मूत्राशयशुद्धिकरम्। दीपनमग्नेः। पीत-मुष्णोदकमिति—ईषदुष्णं पीतम्। निशीति—निशामुखे शयनकाले वा, न तु सकलनिशाया मुहुर्मुहु पानं, तत्र निषेधपरत्वात्, तथा हि—"यथा दिवा तथा रात्रौ यदि तोयं पिबेन्नरः। भवेत् तत्र रसाधिक्यं तच्छेषाद्दोषकोपनम्॥" इति सत्यम्, एष खल्वे प्रसङ्ग इति वर्त्तते व्यवहारात्, आतुरे न क्वचित् प्रतिषेधः, तथा ह्युक्तं—"पानीयं प्राणिनां प्राणा विश्वमेव च तन्मयम्। अतोऽत्यन्तनिषेधेन न क्वचित् वारि वार्यते॥" इति ॥ १३९ ॥

इदानीं क्षीरपाकविधिमाह, क्षीरमिति।—क्षीरमत्र गव्यम्, अन्यानुक्तत्वात्। द्रव्यमिति—गुडूचीवितुन्नकादिकमन्यतो दर्शनात्, तथा हि—"गुडूचीवितुन्नकैरण्ड घृत शूलहरं पयः" इति। कर्त्तव्यताऽस्य द्रव्याणां भागैक यथादोषापेक्षया परिमितं, क्षीरस्य भागाष्टकं पानीयं द्वात्रिंशद्भागयुतम्, एतत् सकलं क्वाथ्य क्षीरावशेषं वस्त्रेण सञ्चाल्य पिबेत्। पानमानञ्चास्य क्वाथवत् बोद्धव्यं, दोषानुसारतो वा। आमोद्भव शूलमिति—आमशूलं, न तु आमवातजनितपीडा, तत्र क्षीरस्य निषिद्ध-त्वात्, तदुक्तं—"दधिमत्स्यगुडक्षीर पीतकौमाषपिष्टकम्। वर्जयेदामवातार्त्तो मासमानूपज तथा॥" इति। आम अपरिपक्वोऽन्नरस, तथा हि—"जठरानल-दौर्बल्यादविपक्वस्तु यो रस। स आमसञ्ज्ञको देहे सर्वदोषप्रकोपण॥" इति। केचित्त्वामशूल परिणामज शूलमामनन्ति, एतदपि सङ्गतम्। द्रव्यादिति सामान्य-

जीर्णज्वरे पञ्चमूलीक्षीरम्।—

* (सर्वज्वराणा जीर्णाना क्षीर भैषज्यमुत्तमम्।
श्वासात् कासाच्छिरःशूलात् पार्श्वशूलात सपीनसात्॥
मुच्यते ज्वरित. पीत्वा पञ्चमूलीश्रृतं पयः॥

जीर्णज्वरे त्रिकण्टकादिक्षीरम्।—

त्रिकण्टकबलाव्याघ्री-गुडनागरसाधितम्।
वर्चोमूत्रविबन्धघ्न कफज्वरहरं पयः॥)

यवागूकृशरयो साधनविधि।—

अथान्नप्रक्रियाऽत्रैव प्रोच्यते नातिविस्तरात्।
यवागू षड्गुणजले सिद्धा स्यात् कृशरा घना॥

गृहणेनान्येषामपि क्षीरयोगाना विधानमेव बोद्धव्यम, यथा—†"बस्तिशुद्धिकरावाप चतुर्गुणजल पय। आ-वारिनाशात क्वथित शुकोदावत्तनाशनम्॥" इति। एतदपि प्रसङ्गतो व्याचष्टे—अत्र बस्तिशुद्धिकराणि त्रणपञ्चमूलीवीरतरादीनि। आवाप इह ‡ क्षीरशोधनार्थं कल्क, तथा च्युक्त—"कुश काश शरो दर्भ इक्षुश्चेति त्रणोऽयम्। पित्तकृच्छ्रहर पञ्च मूल बस्तिविशोधनम्॥ एतत्सिद्ध पय पीत मेढ्रग हन्ति शोणितम्॥" इति॥ १४०॥

सम्प्रति यवागूप्रभृतिकान्नप्रक्रियामाह, अथान्नेति।—अथेति—अनन्तरम्। अन्न-प्रक्रियेति—यवागूविलेपीपेयादिरूपा। अत्रास्मिन् तन्त्रे। नातिविस्तरात् सङ्क्षप-मात्रात यतो विस्तरकथन सर्वेषामप्यालस्यकर भवति। तेषु पूर्वं यवागूविधिमाह, यवागूरित्यादि।—षड्गुणे जले पानीये या सिद्धा सा यवागूशब्दवाच्या, षड्गुण-मित्यन्नपरिमाणात। ¶ एषा तण्डुलैरेव साध्या व्यवहारात, तथा साध्या यथा

---

* प्रक्षिप्ताविमौ इति कोचित।

† बस्तिशुद्धिकरावाप चतुर्गुणजल पय। आ वारिनाशात क्वथित पीतवन्त प्रकामत॥ रमणीयं प्रियं नार्थ्य शुकोदावर्त्तिन नरम॥" इति सुश्रुते पाठ।

‡ "आवाप क्षीरसाधनार्थं कल्क" इति शिवदास।

¶ "एषा तण्डुलैरेव" इति एवशब्दप्रयोगोऽत्र न समीचीनतया प्रतिभाति, लाजैरपि बहुस्थाने यवागूप्रस्तुतविधिदर्शनात, यथा—"लाजपेया सुखनरा"

तण्डुलैर्मुद्गमाषैश्च तिलैर्वा साधिता हिता ॥ १४१ ॥

विरलद्रवा भवति, यत,—"यवागूर्विरलद्रवा" इति वचनात। अस्या भेद क्रमशरीति नाम्ना कथिता मा घना द्रवरहिता इत्यर्थः। इयमपि तण्डुलादिभि साधिता भवति। अत्र मुद्गमाषैश्चेति चकारात व्यस्त ग्राह्य तेन मुद्गसाधिता माषसाधिता वा। तिलान्यतोभयत्र योज्यानि। तन्मात्तरेऽपि तिलतण्डुलमाषकृता यवागूरेव क्रमरा कथ्यते। केचिदनुक्तत्वात तिलमाषतण्डुलानामत्र साम्य मन्यन्ते, तन्न मनोहरम्, किन्तु व्यवहारात तण्डुलाना भागद्वय,माषस्य भागैकम्, अर्द्धभागिक तिलानामिति सकलश्री षड्गुणजलमित्यर्थः। यवागूरिति सामान्येन, अस्या बहवो भेदा सन्ति, तद्यथा—दुग्धतण्डुलयवागू, घृततण्डुलयवागू, मासतण्डुलयवागू, फलकन्दतण्डुलयवागूरित्येताः सर्वा यवाग्वो द्रव्यानुसारतो गुणकर्म साधनीयाश्च भवन्ति ॥ १४१ ॥

इत्यादि। किञ्च तन्मात्तरे केवलखाजैरेव प्रस्तुतविधिदर्शनाच्च, तथा च भरद्वाज,—"मण्डादयो खाजोपादाना वेद्या, न तु तण्डुलोपादाना, तथा च मुनि',—"घृत पिप्पलीशुण्ठीभ्या युक्तो खाजाम्बुदाडिमै। मण्ड सन्दीपयत्यग्नि वातञ्चाप्यनुलोमयेत ॥" इति। तदुक्तं—"द्रव्यस्यार्द्धपल दत्त्वा तोयस्य प्रस्थमावपेत। अर्द्धशेष गृहीत्वा तत कर्षौ द्वौ दाडिमस्य च ॥ युक्त विश्वाद्वसैन्धव-धान्यकै श्चाणमात्रकै। द्विकर्षमात्रैर्लाजैश्च भूय सङ्घुक्षितञ्च तत ॥ पिप्पलीशोरकाभ्याञ्च श्राणैकैनावचूर्णितम्। पेयास्वेष विधि कल्प्यो दाडिमादिकृतास्वपि ॥" इति। तथा —"लाजाम्बुसैन्धवकणा धान्यनागरदाडिमै। युक्ता विमृदित पूती मण्ड सस्कृत उच्यते ॥" इत्यादि। किञ्च 'तथा साध्या" इत्यादुक्तिरपि न हृद्या, यत तत्त्व-चन्द्रिकाया—"द्रवसिक्थसमन्विता यवागूरिति यवाग्वा सामान्यलक्षणम्" इति। "पेया सिक्थसमन्विता यवागू" "यवागू षड्गुणाम्भसि" इति च। अत्र तत्त्वचन्द्रिका —"तत्र यवागूशब्देन पेया विवक्षिता। पेया इति सज्ञाबलात बहुद्रवत्वमल्प-सिक्थत्वञ्च ज्ञेयम्, तेन सिक्थसमन्विता यवागू पेया इति पेयालक्षणे बहुद्रवत्वमल्प-सिक्थत्वञ्च लक्षणतया वोद्व्यम्" इति। अन्यच्च सुश्रुते—"विलेपो बहुसिक्था स्यात् यवागूर्विरलद्रवा" इति पाठ, बहुसिक्था विरलद्रवा यवागूर्विलेपो इति तस्मात्। चक्रदत्तेऽपि—"यवागूर्बहुसिक्था स्यात् विलेपी विरलद्रवा" इति। एवञ्च चतुर्गुण-जलसाधिताया विलेप्या एव विरलद्रवा इत्यादि व्याख्या सङ्गच्छते, न तु षड्गुणजल-साधिताया पेयाऽपराख्याया यवाग्वा इति दिक्।

यवागूगुणा।—

यवागूर्ग्राहिणी बल्या तर्पणी वातनाशिनी ॥ १४२ ॥

विलेप्या साधनविधि गुणाश्च।—

विलेपो घनसिक्थ स्यात् सिद्धा नीरे चतुर्गुणे।
तर्पणी बृंहणी हृद्या मधुरा पित्तनाशिनी ॥ १४३ ॥

पेयायूषयो साधनविधि।—

द्रवाधिका स्वल्पसिक्था चतुर्दशगुणे जले।
सिद्धा पेया बुधैर्ज्ञेया यूष किञ्चित् घनस्ततः ॥ १४४ ॥

इदानी तस्या गुणमाह, यवागूरित्यादि।—ग्राहिणी सङ्ग्राहिका अतीसारादीनाम्। बल्या बलकारिणी, ओजोवर्द्धिकरीत्यर्थ। तर्पणी धातूना तृप्तिजननी। वातनाशिनी चेति स्वभावात् ॥ १४२ ॥

अथ विलेपीविवरण दर्शयन्नाह, विलेपीति।—या चतुर्गुणे नीरे पानीये सिद्धा निष्पन्ना सा विलेपीशब्दवाच्या, स्वरूपेण घनसिक्था भवति चतुर्गुणनीरत्वात्। चतुर्गुणमिति अत्र अन्नपरिमाणात्। इयमत्र केवलं तण्डुले सिद्धेति रूढि, असौ "गुलइयो" इति लोके कथिता। गुणमस्या दर्शयन्नाह, तर्पणीत्यादि।—तर्पणी तृप्तिजनिका। हृद्या इति—आह्लादकारिणी। मधुरा मिष्टरसा, अत एव पित्तनाशिनी विहिता ॥ १४३ ॥

इदानी पेययूषावप्याह, द्रवाधिकेति।—या चतुर्दशगुणे जले सिद्धा भवति सा पेया ज्ञेया, स्वरूपेण च सा द्रवाधिका स्वल्पसिक्था। केचित स भक्तमण्ड इति वदन्ति, मण्डस्तु सिक्थरहित इति प्रसिद्ध, तथा हि—"यवागू षड्गुणे तोये ससिद्धा विरलद्रवा। चतुर्गुणाम्बुससिद्धा विलेपी घनसिक्थका॥ पेया सिक्थान्विता तोये चतुर्दशगुणे कृता। मण्डश्चतुर्दशगुणे सिद्धस्तोये त्वसिक्थक॥" इति। यूषमाह—तत इति—तस्मात् पेयाद्रव्यात् य किञ्चित् घन सान्द्रो भवति स यूष इत्युच्यते। एष यूष केवलमूर्द्धे कृत इति वदन्ति इति केचित, यतो मुद्गरस इति लोके। अत्रापि चतुर्दशगुण जल देयम् अन्नपरिमाणात्। यूष इति सामान्येन, अस्य बहवो भेदा सन्ति, ते चाष्टादशगुणे जले साध्या इति तन्त्रान्तरीयमतम्, तथा हि—"स्याद्विलः साधितो यूषस्त्वष्टादशगुणे जले" इति ॥ १४४ ॥

पेयायूषयो गुणा।—

पेया लघुतरा ज्ञेया ग्राहिणी धातुपुष्टिदा।
यूषो बल्यस्तत. कण्ठ्यो लघुपाकः कफापहः॥ १४५॥

भक्तस्य साधनविधि गुणश्च।—

जले चतुर्दशगुणे तण्डुलाना चतुष्पलम्।
विपचेत् स्रावयेन्मण्ड स भक्तो मधुरो लघुः॥ १४६॥

गुणमनयोर्वक्तुमाह, पेया लघुतरेत्यादि।—लघुतरा अत्यर्थं लघुपाका। ग्राहिणी ग्राहिका अतिसारादीनाम। ननु द्रवमन्नमतीसारे निषिद्धम्, यदुक्त—"वज्रयेद्दधि शूली कुष्ठी नास्य चयो स्त्रियम्। द्रवमन्नमतीसारो सर्वञ्च तरुणज्वरी॥" तत् कथ पेया अतीसारे विहिता? उच्यते, अविहितद्रवान्ननिषेधार्थं वाक्यमिद पेयायवाग्वादि विहितमेव, तथा चोक्त सुश्रुते—*"कार्य्य चानशनस्यान्ते प्रद्रव लघुभोजनम्" इति। अत्र प्रद्रव प्रकृष्टद्रव, लघु यवाग्वादि। तथैव निषिद्धाचरण भोजनाप्युक्त—"त्रयोदरस्यापनपातिताना (?) प्रमेहिणा क्षुद्यतीसारिणाच। द्रव न दद्याद्दधवा ऽपि कोष्ण खल्प हित भषजसम्प्रयुक्तम्॥" इति। यूषोऽपि बल्यो बलकर। कण्ठ्य कण्ठहित। पाके लघु कफापहश्च, अत एवात्र मुद्गयूष कृताकृतश्च कथित, तथा हि—"कफघ्नो दीपनो हृद्य शुद्धाना प्राणिनामपि। उक्त पथ्यतमञ्चापि मुद्गयूष कृताकृत॥" इति॥ १४५॥

इदानी भक्तविधिमाह, जले इति।—तण्डुलाना चतुष्पल कुडवमित यावत्, चतुर्दशगुणे पानीये विपाच्य तद्रव पानीयोऽवशिष्ट (?) स भक्त इति प्रसिद्ध। गुणोऽपि रसे मधुर, पाके लघुरिति। एतद्दशजलपरिमाण परिस्रुताथम्। ननु तन्मान्तरे भक्त पञ्चगुणे साध्यमिति, तथा हि—"शृत पञ्चगुणे भक्त विलेपीति चतुर्गुणे" इति, तत् कथ चतुर्दशगुणमत्र जलम्? उच्यते—भक्त द्विविध सुधौतप्रस्रुतम् अधौतास्रुतञ्च, यत सुधौतप्रस्रुत, तच्च चतुर्दशगुणे जले साध्यम्, अधौतास्रुतञ्च पञ्चगुणे इति भाव, तथा चोक्त—"सुधौतप्रस्रुत चोष्ण विशद गुणवन्मतम्। अधौतमस्रुत शीत गुरु ह्रस्य कफप्रदम्॥" इति॥ १४६॥

---

* मुद्रितसुश्रुतसहितासु पाठोऽय नोपलभ्यते।

मण्डस्य साधनविधि गुणश्च।—

नीरे चतुर्दशगुणे सिद्धो मण्डस्त्वसिक्थकः।
शुण्ठीसैन्धवसयुक्तः पाचनो दीपनः स्मृतः॥ १४७॥

अष्टगुणमण्डस्य साधनाविधि गुणश्च।—

धान्यत्रिकटुमिन्थ्यत्थ-मुद्गतण्डुलयोजित।
भृष्टश्च हिङ्गुतैलाभ्यां स मण्डोऽष्टगुणः स्मृतः॥ १४८॥
दीपनः प्राणदो बस्ति-शोधनो रक्तवर्द्धनः।
ज्वरजित् सर्वदोषघ्नो मण्डोऽष्टगुण उच्यते॥ १४९॥

अधुना शुद्धमण्डमाह नीरे इति।—चतुर्दशगुणे नीरे तण्डुलपरिमाणात् सिद्धो निष्पन्नः, असिक्थक इति—सिक्थो भक्तावयव तेन रहित इत्यर्थः य ईदृशः मण्डसंज्ञया प्रसिद्धः। एष यदा शुण्ठीसैन्धवचूर्णेन प्रक्षिप्यते तदा पाचन आमादीनां, दीपनो जठराग्नेः स्मृत कथित इत्यर्थः। अयमसृष्टतण्डुलैर्जनित अत एव शुद्ध-मण्डोऽभिहित, यतो मण्डस्तत्रान्तरे विविधो दर्शित, तद्यथा—"मण्डस्तु त्रिविधो ज्ञेय एकद्वित्रिपरिस्रुत। लाजैर्भृष्टैरभृष्टश्च तण्डुलै परिसस्कृत॥ चतुस्त्रिगुणो भक्तात् पूर्वं पूर्वो लघुर्हित॥" इति॥ १४७॥

अथाष्टगुणमण्डमाह, धान्येति।—धान्यादिभिर्द्रव्यै सस्कृतो हिङ्गुतैलाभ्या सह भृष्टो भर्जित स मण्डोऽष्टगुणसज्ञ कथित। अत्र तण्डुलमुद्गयोर्दानमन्नप्रकरणा दवगन्तव्यम्, तथा च तत्रान्तरे—"सुतण्डुलाना प्रसृतिद्वयञ्च तदर्द्धमुद्गा कटुकत्रयञ्च। कुलत्थकोलित्थयवाढकैरपि समस्तै क्रियते च मण्ड॥" इत्यादि। अत्र यत् शार्ङ्गधरेण तैलग्रहण कृत तत् भजनार्थं तण्डुलमुद्गयो। अन्यत्रोक्तम्—"तण्डुलैरर्द्ध-मुद्गार्द्धै किञ्चिद्भृष्टै सुपाचित। हिङ्गुसिन्धूत्थचनिका तक्रचिकटसस्कृत॥ ज्ञेयः सोऽष्टगुणो मण्डो ज्वरदोषत्रयापह॥" इत्यादि। कैश्चित कर्त्तव्यविधौ चात्र कटुकत्रयचूर्ण पश्चात् प्रक्षेपे मनाक् देयमिति वदन्ति। "स मण्ड" इति स्थाने "स भक्त" इत्यपरे पठन्ति, तन्मत तु ईषत सिक्थयुत इत्यर्थः। सङ्गतोऽयं पाठ। अष्टगुण इति यत् प्रोक्त तानाह, दीपन इत्यादि।—दीपनमग्नेः। प्राणदो बलकरः। बस्तिशोधनो बस्तिशुद्धिकरः, बस्तिर्मूत्राधार, अत एव मूत्रला विख्यात। रक्तवर्द्धन इति—शोणितवर्द्धिकरः। ज्वरजित सर्वज्वरहर प्रभावात्। सर्वदोषघ्न इति—वातपित्तकफाना प्रत्येक हन्ता, न तु सन्निपातज्वरहर अष्टसङ्ख्यात्, तथा च

वाल्यमण्डस्य साधनविधि गुणश्च।—

सुकण्डितैस्तथा भृष्टैर्वाल्यमण्डो यवैर्भवेत्।
कफपित्तहरः कण्ठ्यो रक्तपित्तप्रसादनः॥१५०॥

लाजमण्डस्य साधनविधि गुणश्च।—

लाजैर्वा तण्डुलैर्भृष्टैर्लाजमण्डः प्रकीर्त्तितः।
श्लेष्मपित्तहरो ग्राही पिपासाज्वरजिन्मतः॥ १५१॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधरेण विरचितायां
शार्ङ्गधरसंहितायां चिकित्साख्याने काथ
कल्पना नाम द्वितीयोऽध्यायः॥२॥

तन्त्रान्तरे—"तृड्दोषघ्नो बस्तिविशोधनश्च प्राणप्रदो रक्तविवर्द्धनश्च। ज्वरापहारी कफपित्तहन्ता वायुं जयेदष्टगुणो हि मण्ड॥" १४८-१४९॥

इदानीं वाल्यमण्डमाह, सुकण्डितैरिति।—अथ वाल्यमण्डो दलितयवगोधूमादि-कृतो व्यक्त एव तथापि किञ्चिद्व्याचष्टे, सुकण्डितैरिति—मूषलादिभिरूदूखले सङ्घट्टितैः, तुषवर्जितैरित्यर्थः। तथा भृष्टैरिति—भर्जितैः, तथेति यत्नेन यथा न दग्धैरित्यर्थः। ईषद्भृष्टैः यवैः, यवोऽत्रविशेषः, बहुवचनत्वेन गोधूमादयो ग्राह्याः। स च कफपित्तहरः कफहरः पित्तहरश्च, त्र्योगहरो वा। कण्ठ्य इति—कण्ठरोगेभ्यो हितः। रक्तपित्तप्रसादन इति—प्रकर्षेण सादयति इति प्रसादनः कुपितासृपित्त-नाशिकरः इत्यर्थः, न तु रक्तपित्तपङ्किकरः, तथा हि—"वाल्यमण्डो लघुर्ग्राही शूलानाहासृपित्तजित्" इति। केचिदिति व्याख्यानयन्ति—प्रकुपितं रक्तपित्तं निर्मलं करोति स्वप्रकृतिस्थितं करोतीत्यर्थः। अपरे "रक्तपित्तनिसूदनः" इति पठन्ति, तत् व्यक्तम्॥ १५०॥

अथ लाजमण्डमाह, लाजैरिति।—भृष्टशालिभवा लाजा इत्युच्यन्ते, तैः, कृत्वा यः साधितः स लाजमण्डः कथितः। साधनमत्र पूर्ववत् ज्ञातव्यम्। अथवा भृष्टैस्तण्डुलैश्च कृतो यः सोऽपि लाजमण्डसञ्ज्ञितः। अस्य गुणमाह, श्लेष्मपित्तहर इत्यादि।—श्लेष्महरः पित्तहरश्च। ग्राही सङ्ग्राहकः। पिपासाज्वरजिन्मत इति—पिपासा पातुमिच्छा, ज्वर इति सामान्यग्रहणेनाष्टधा। अत्र लाजादीनां परिमाणं

तृतीयोऽध्यायः ।

क्वाथकल्पना ।—

क्वाथस्य साधनविधि मात्राविधिञ्च ।—

चुल्ले द्रव्यपले सम्यक् जलमुष्णं विनिक्षिपेत् ।
मृत्पात्रे कुड़वोन्मान ततस्तु स्रावयेत् पटात् ॥ १ ॥
तस्य चूर्णद्रव, क्वाथस्तन्मान द्विपलोन्मितम् ।
सितामधुगुड़ादीश्च क्वाथवत्तत्र निक्षिपेत् ॥ २ ॥
स यथा—

पूर्वमण्डवज्ज्ञातव्यम् । ननु यद्येव तर्हि किमसौ पृथक् दर्शित, ? उच्यते—खाजमण्ड-सन्नादिज्ञापनार्थं पृथगुक्त, न दोष ॥ १५१ ॥

इति श्रीबालव्याव्यप्रकाशवैद्य श्रीभावसिंहात्मजेनाढमल्लेन विरचितायां
शार्ङ्गधरदीपिकायां मध्यखण्डे चिकित्सितस्थाने
क्वाथकल्पना नाम द्वितीयोऽध्याय ॥२॥

यदानी क्वाथकल्पना दर्शयितुमाह, चुल्ले द्रव्येति ।—अनेन क्वाथपरिभाषा अभिहिता । चुल्ले द्रव्यपले इति—सम्यक् चुल्ले अत्यन्तकुढिते, चूर्णसदृशे इत्यर्थ, तप्तमिति—अर्द्धविशोषित, क्वथितमात्रमिति केचित्, विनिक्षिपेत् विशेषेण क्षिपेदिति ग्रन्थेन द्रव्यस्य परिमाणादिक सूचितम्, एतेनोक्तपरिमित द्रव्य जले निर्मथ्य विस्राव्यमित्यर्थ । तस्य द्रवरूपक्वाथस्य पर्यायवाचकशब्दमाह द्रवं क्वाथ । तन्मानमिति—दानार्थम् । अथ तत्रैवार्थे द्रव्यान्तराह, सितेत्यादि ।—अत्र आदिशब्दात् क्षीरघृततैलमूत्रवसामज्जारद्विविकटुकप्रभृतयो गृह्यन्ते, एतेषा प्रक्षेपमात्र क्वाथवत्तुल्यातव्यम् ॥ १५२ ॥

वातपित्तज्वरे मधूकपुष्पादि ।—

* मधूकपुष्प मधुकं चन्दन सपरूषकम् ।
मृणाल कमल लोध्रं गाम्भारी नागकेशरम् ॥ ३ ॥
त्रिफला-सारिवा-द्राक्षा-लाजान् कोष्णजले क्षिपेत् ।
सितामधुयुतः पेयः फाण्टो वाऽसौ हिमोऽथवा ॥४॥
वातपित्तज्वर दाह तृष्णामूर्च्छाऽरतिभ्रमान् ।
रक्तपित्त मदं हन्यान्नात्र कार्य्या विचारणा ॥ ५ ॥

स यथेत्यनेन तद्दर्शयति ग्रन्थकार । इदानी विवरणमस्माभिरपि लिख्यते, मधूकपुष्पमिति ।—अथ मधूकपुष्पादि फाण्टश्च हिमश्चसौ वा कल्पनाद्वयभेदात । अत्र मधूकौ द्रुमविशेष, तस्य पुष्पाणि । मधुक मधुयष्टी । चन्दनमत्र रक्तम् । पटूषकमिति—फलविशेष "फल्सा" इति लोके । † मृणाल कमलनाल, "भसीड" इति लोके । कमल पुष्पविशेष, विख्यात, तदभावे पद्मबीजमिति सर्वत्र । गाम्भारीति—गाम्भारीफलम । त्रिफला इति—हरीतक्यादिकम । ‡ सारिवा आस्फोता, "आस्फोई" इति शब्दवाच्या । लाजानिति—भृष्टधान्यीश्वान, एतत सर्वं समभागेन पलैक ग्राह्यम, समताऽवानुक्तत्वात । कोष्ण इति—ईषदुष्ण । सिता मधु प्रत्येक प्रशस्तम । हिमोऽपि पूर्वतो यदपेक्षमाणोऽस्तीति । अरतिरसौख्यम । भ्रमश्चक्रारूढस्येव । मदं दुष्टपूगधुस्तूरकोद्रवादिजनितम । अत्र विचारणा न कार्य्येति यत् यद्दृष्ट तत् "आचन्यो हि मणिमन्त्रौषधीना प्रभाव," इति वाक्यानुरोधात, तथा चोक्त—"नौषधीर्हेतुभिर्विद्वान् परीक्षेत कथञ्चन । सहस्रेणापि हेतूना नाम्बष्ठाहिर्विरेचयेत ॥" (सु० सू० ४०अ०) इति । अत एव द्रव्यवैद्यव्यवहारेणानुसर्त्तव्य इति जनश्रुतिरित्यलम । केचित प्रत्येकद्वितीयार्द्धद्रव्यग्रहणेन व्यस्तयोगानपि प्रशस्यन्ति, एतदपि मनोहर न दोष, 'नात्र कार्य्या विचारणा' इति वचनात् ॥ ३—५ ॥

* चक्रीकेनानेन योगेन सह अस्य किञ्चित वैषम्य दृश्यते, तत्र नीलोत्पलं सारिवाद्वय पद्मकेशर तथा तण्डुलोदकेन सह हिमकषाय कर्त्तव्य इति पाठ । अत्र कमल नागकेशर सारिवा तथा उष्णजलेन सह फाण्टो हिमो वा कर्त्तव्य इति ।

† मृणालशब्देन उशीरम् इति व्याचष्टे शिवदास ।

‡ सारिवा अनन्तमूल श्यामालता वा इति सर्वत्र दृश्यते । गूढार्थदीपिकाकारेणापि अनन्तमूलमित्येव व्याख्यातम् ।

पित्तज्वरे आम्रादि ।—

आम्रजम्बूकिसलयैर्वटशुङ्गप्ररोहकैः ।
उशीरेण कृतः फाण्टः सक्षौद्रो ज्वरनाशनः ॥
पिपासाच्छर्दतीसारान् मूर्च्छां जयति दुस्तराम् ॥ ६ ॥

दाहतृष्णादौ मधूकपुष्पादि ।—

मधूकपुष्पगाम्भारी-चन्दनोशीरधान्यकैः ।
द्राक्षया च कृतः फाण्टः शीतः शर्करया युतः ॥
तृष्णापित्तहरः प्रोक्तो दाहमूर्च्छाभ्रमान् जयेत् ॥ ७ ॥

फाण्टभेदमन्थस्य साधनविधिं सामान्यं च ।—

मन्थोऽपि फाण्टभेदः स्यात्तेन चाचैव कथ्यते ।
जले चतुःपले शीते क्षुण्णं द्रव्यपलं क्षिपेत् ॥
मृत्पात्रे मन्थयेत् सम्यक् तस्माच्च द्विपलं पिबेत् ॥ ८ ॥

अथाम्रादिफाण्टमाह, आम्रजम्बूकिसलयैरिति ।—आम्रकिसलयैर्जम्बूकिसलयैश्च, किसलयं कोमलपत्रम्। वटशुङ्गप्ररोहकैरिति—वटस्य * शुङ्गान् कोमलपल्लवान्, प्ररोहका वटावरोहाः, 'वरोहा इति लोके। उशीरस्तृणभेद सुगन्धाङ्ग प्रसिद्ध । कर्त्तव्यताऽस्य पूर्ववत्। क्षौद्रमत्र प्रक्षेपे। दुस्तरामिति—अनिवार्याम् ॥ ६ ॥

इदानीं लघुमधूकपुष्पादिफाण्टं दर्शयन्नाह, मधूकपुष्पेति ।—मधूकपुष्पं विख्यातं, "महुया" शब्दवाच्यम। गाम्भारी काश्मरी तस्या फलानि। चन्दनमत्र रक्तचन्दनम। उशीरं प्रसिद्धम्। धान्यक कुस्तुम्बरी। द्राक्षा फलोत्तमा। शीत इति स्पर्शात्, यद्वा—शीतो हिमकषायोऽत्र कर्त्तव्यः, पूर्ववाक्यानुरोधात्। शर्करा अत्र प्रक्षेपे। तृष्णाहरं पित्तहरत्वं, पित्तं प्रकुपितम् ॥ ७ ॥

इदानीं मन्थविधिमाह, मन्थ इति ।—यतोऽत्र मन्थ फाण्टस्य भेदो दर्शितस्तद्भेदिभिः, तेन कारणेनात्र कल्पनया कथ्यते, आचार्येणेति शेषः । शीते जले इति यद्ग्रहणेनैव फाण्टाद्विशेषोऽत्र कथितः । "जले चतुःपले" इत्यादिकोऽयं श्लोकः प्रक्षेपक इति वदन्ति केचित, यतो बहुषु पुस्तकेषु न दृश्यते। जलमानन्तु द्रव्यानुमानतो बोद्धव्यं, यथा वक्ष्यमाणे शक्तुमन्थके ॥ ८ ॥

---

* शुङ्गम् अविकसितपत्रमुकुलम् इति शिवदासः ।

स यथा—

मद्यार्थे खर्जूरादि'।—

खर्जूरदाडिमोद्राक्षा-तिन्तिडीकाम्लिकाऽऽमलैः।
सपरूषैः कृतो मद्यः सर्वमद्यविकारनुत् ॥ ९ ॥

कूर्या मसूरप्रयोग।—

क्षौद्रयुक्ता मसूराणां भक्तवो दाडिमाम्भसा।
मथिता वारयन्त्याशु कृच्छ्रं दोषत्रयोद्भवम् ॥ १० ॥

तृष्णादौ यवप्रयोग'।—

प्लाविते: शीतनीरेण सघृतैर्यवशक्तुभिः।
नातिसान्द्रद्रवैर्मन्थस्तृष्णादाहास्रपित्तहा ॥ ११ ॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां
शार्ङ्गधरसंहितायां मध्यखण्डे चिकित्सितस्थाने
फाण्टादिकल्पना नाम तृतीयोऽध्यायः ॥३॥

स यथेति मद्यसूचकं वाक्यमिदम्, अतस्तं दर्शयन्नाह, खर्जूरेति।—अत्र खर्जूरादीनां फलानि ग्राह्याणि। खर्जूरी वृक्षः खर्जूरिका, तस्य फलानि, 'छतनी' इति लोके। दाडिमी दाडिमीफलम्। तिन्तिडीक विटपिविशेषः, तस्य फलानि अम्लानि भवन्ति। अम्लिका चिञ्चा, तस्या फलानि प्रसिद्धानि। आमलमामलकफलम्। परूषक "फल्गु"शब्दवाच्य वृक्षविटपः, तस्यापि फलैः, कृत इति—एषां परिपक्वफलैः संस्कारित इत्यर्थः। सर्वं मद्यं दृष्टपूगक्षौद्रवारिष्टादिकं तज्जनितं विकारं मदात्ययादिकं, तं नाशयतीत्यर्थः। एके चात्र शर्करां प्रक्षिपन्ति पानकवत्॥ ९॥

इदानीं मसूरादिमन्थविवरणमाह, क्षौद्रयुक्ता इति।—क्षौद्रयुक्ता मधुप्लाविता। मसूरोऽन्नविशेषः, स च भर्जित शक्तुनिमित्तत्वात्। दाडिमाम्भसा परिपक्वदाडिमफलतोयेन मथिता निर्मथिता। दोषत्रयोद्भवमिति—व्यस्ता समस्ता वा॥१०॥

अथ यवशक्तुमाह, प्लाविते रिति।—यवशक्तुभिः कृत्वा कृतो यो मन्थः स तृष्णादाहास्रपित्तहा भवति। कीदृशैः? शीतनीरेण शीतलपानीयेन प्लाविते आलोडिते। एके—"प्लाविते शीतनीरेण" इत्यस्य स्थाने "प्लाविते शर्करातोयैः" इति पठन्ति व्याख्यानयन्ति च। पुनः कीदृशैः? सघृते उक्त(?)परिमाणघृतयुक्तैः। कथम्भूतैः?

चतुर्थोऽध्यायः ।

हिमकल्पना ।—

शीतस्य साधनविधिं भावाविधिञ्च ।—

क्षुण्णं द्रव्यपलं सम्यक् षड्भिर्नीरपलैः प्लुतम् ।
निशोषितं हिमः स स्यात्तथा शीतकषायकः ॥
तस्मान फाण्टवज्ज्ञेयं सर्वत्रैवैष निश्चयः ॥ १ ॥

नातिसान्द्रद्रवै नातिश्लक्ष्णैन सान्द्रद्रवाक्षैरिति, सान्द्र कठिन, द्रव तोयसदृशम्, तथा च तन्त्रान्तरे—"शक्तव सर्पिषाऽभक्ता शीतवारिपरिप्लुता । नातिद्रवा नातिसान्द्रा मन्थ इत्यभिधीयते ॥" इति । एके "नातिसान्द्रैर्द्रवैर्मन्थ" इति पठन्ति, तन्मते तु सान्द्रत्व निषिद्ध द्रवत्व प्रशस्तमिति, तथा च मतान्तरे वाक्यद्वयमाह,—"गुर्वी पिण्डी खराऽत्यर्थं लघ्वी सैव विपर्ययात" । "न शक्तून्वितान् न द्विः शक्तून्वान्न केवलान्" इति । द्रवेऽपि साफल्यमनुग्राहकेण दर्शयितुमाह, तत्र यथा—"पीता सन्तर्पणा हृद्या सद्यो बलविवर्द्धना । वातातपाध्वव्यायाम-कर्षिताना श्रमापहा ॥ मधुरा लघव शीता शक्तवो रक्तपित्तहा ॥" इति । अयमपि शर्करादिसयुक्त कर्त्तव्यो व्यवहारात्, उक्तञ्च—"शर्करेक्षुमधुद्राक्षा-युक्त पित्त-विकारनुत । द्राक्षामधुसमायुक्त कफरोगहर घृत ॥ वर्गवर्गोपहितो मलदोषानुलोमन ॥" इति ॥ ११ ॥

इति श्रीवाचस्पत्यन्वयप्रकाशवैद्य-श्रीभावसिंहात्मजेनाढमल्लेन विरचितायां
शार्ङ्गधरदीपिकायां मध्यखण्डे चिकित्सितस्थाने
फाण्टकल्पना नाम तृतीयोऽध्याय ॥ ३ ॥

अथ हिमकल्पना निदर्शयन्नाह, क्षुण्णमिति ।—अथ हिमकषायोऽनया परिभाषया प्रथितो भवति, कथम् ? यथा—क्षुण्ण सम्यक् कुट्टितम् । षड्भिर्नीरपलै इति—द्रव्य-परिमाणात् । निशोषितमिति—सकलनिशायामध्युषित, तेन प्रात सस्राव्य द्रव ग्राह्यमित्यर्थः । एतस्य पर्य्यायनाम्ना शीतकषाय कथित । तस्मान फाण्टवत् ज्ञेयमिति

स यथा—

रक्तपित्ते आम्रादि।—

आम्र-जम्बू च ककुभ चूर्णीकृत्य जले क्षिपेत्।
हिमं तस्य पिबेत् प्रातः मक्षौद्र रक्तपित्तजित् ॥ २ ॥

तृष्णादौ मरिचादि।—

मरिचं मधुयष्टी च काकोड्म्बरपल्लवाः।
नीलोत्पल हिमस्तज्ज्स्तृष्णाच्छर्दिनिवारणः ॥ ३ ॥

वातपित्तज्वरे नीलोत्पलादि।—

नीलोत्पल बला द्राक्षा मधूक मधुकं तथा।
उशीरं पद्मकश्चैव काश्मरी च परूषकम् ॥ ४ ॥
एष शीतकषायश्च वातपित्तज्वरान् जयेत्।
सप्रलापभ्रमच्छर्दि-मोहतृष्णानिवारणः ॥ ५ ॥

—तस्य परिमाण पानार्थं फाण्टवत ज्ञातव्यम। मानग्रहणेनापि प्रक्षेपादयोऽपि फाण्टवत ज्ञातव्या। एष निश्चय सर्वत्रैव मान्यत ॥ १ ॥

स यथेति वाक्येन हिमकषाययोगान् दर्शयति, आम्रेति।—तत यथा—अयम् आम्रादिकसङ्ग्रको हिमो मधुप्रक्षिप्तो रक्तपित्तजिद्भवति। अत्र ककुभोऽर्जुन, स च वृक्षविशेष। आम्रादीना त्वक्चूर्णमिति व्यवहारात् ॥ २ ॥

अथ मरिचादिसङ्ग्रको हिम कथ्यते, मरिचमिति।—अत्र काकोड्म्बरिका "कटुम्बरी" शब्दवाच्या, "कट्वरी" शब्दवाच्या च, तस्य पत्रा.। नीलोत्पल नीलकमल, तदभावे पद्मबीजमिति व्यवहारात। तज्ज इति—मरिचादिद्रव्यैर्जात। एके मरिचचूर्णं मनाक् प्रक्षेपेऽप्याहु तीक्ष्णत्वात् ॥ ३ ॥

अथ नीलोत्पलादिज हिममाह, नीलोत्पलमिति।—नीलोत्पलमत्र विख्यात, तच्चेन्दीवरसङ्ग्रम्। बला प्रसिद्धा। मधूक गुडपुष्प, लोके "महुआ" शब्दवाच्यम्। मधक यष्टीमधु। उशीर तृणभेद सुगन्धमूलम। पद्मक काष्ठविशेष। काश्मरी गाम्भारी, तस्या फलानि। परूषक प्रसिद्धम्। शीतकषायो हिम-कषाय कथित। प्रलापोऽसम्बद्धभाषणम्। भ्रमश्चक्रारूढस्येवार्थसंवित्ति। मोहो मूर्च्छाभेद ॥ ४।५ ॥

जीर्णज्वरे गुडूचीप्रयोग ।—

अमृताया हिमं पेयो जीर्णज्वरहरः स्मृतः ॥ ६ ॥

कासादौ वासाप्रयोग ।—

वासायाश्च हिमं कास-रक्तपित्तज्वरान् जयेत् ॥७॥

अन्तर्दाहादौ धन्याकप्रयोग ।—

प्रातः सशर्करं पेयो हिमो धन्याकसम्भवः ।

अन्तर्दाहं तथा तृष्णां जयेत् स्रोतोविशोधनः ॥ ८ ॥

रक्तपित्तादौ धन्याकादि ।—

धन्याकधात्रीवासानां द्राक्षापर्पटयोर्हिमः ।

रक्तपित्तज्वरं दाहं तृष्णां शोषञ्च नाशयेत् ॥ ९ ॥

इति श्रीदानोमदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां

शार्ङ्गधरसंहितायां मध्यखण्डे चिकित्सितस्थाने

हिमकल्पना नाम चतुर्थोऽध्यायः ॥४॥

इदानीमष्टाटरूषकसङ्गकौ हिमावाह, अमृताया इति।—अमृता गुडूची, तस्या यल्लो ग्राह्या। अवापरे मधु प्रक्षिपन्ति तन्नान्तरे दर्शनात्, तथा हि—अमृताया. कषायन्तु शीतं सम्यक् प्रलङ्घयम्। मधुपादयुतं पीतं जीर्णज्वरहरं परम्॥" इति। अपरञ्च—वासा भाटरूषक, स चात्र पञ्चाङ्गा व्यवहारात् ॥ ६।७ ॥

प्रातरिति।—एष धन्याकहिमोऽन्तर्दाहादौ प्रशस्त। धन्याक कुस्तुम्बरु। स्रोतोविशोधन इति—मूत्रमार्गस्य शुद्धिकर, मूत्रकृच्छ्रादिहर इत्यर्थ ॥ ८ ॥

धन्याकेति।—अथ धन्याकादिसङ्गको हिमो रक्तपित्तादिकान् हन्तीति। अत्र धात्री आमलकीफलम्। वासा भाटरूषकस्या मूल ग्राह्यम्। पर्पट खनामख्यात। एतत् सकल समं तुलित सङ्कृत्य हिमकषाय कर्त्तव्य। अवापि शर्कराप्रक्षेपमाह पूर्वयोगानुसारात्। शोष सुखशोष, क्षयभेद वा। एके योगद्वयमाहु ॥ ९ ॥

इति श्रीबालव्याख्यप्रकाशवैद्य-श्रीभावसिंहात्मजेनाढमल्लेन विरचितायां

शार्ङ्गधरदीपिकायां मध्यखण्डे चिकित्सितस्थाने

हिमकल्पना नाम चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः ।

कल्ककल्पना ।—

कल्कस्य साधनविधि पर्य्यायौ मात्रा च ।—

द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत् ।
प्रक्षेपाऽऽवापकल्कास्ते तन्मान कर्षसम्मितम् ॥ १ ॥

कल्के प्रक्षेप्याणां मात्रा ।—

कल्के मधु घृतं तैलं देयं द्विगुणमात्रया ।
सिता गुड समं दद्याद्भवा देयाश्चतुर्गुणाः ॥ २ ॥

स यथा—

अथेदानीं कल्ककल्पना व्याख्यास्यामः, द्रव्यमित्यादि ।—इयमनेन प्रकारेण कल्कपरिभाषा कथ्यते । द्रव्यं व्याधिविदितम् । आर्द्रं सद्य उद्धृतम् । पक्षान्तर-कल्पविधौ शुष्कमपि द्रव्यं जलेन पिष्टं कल्कसंज्ञकं भवति । ते प्रक्षेपावापकल्का इति पर्य्यायवाचकशब्दैः कथिता । तन्मान कल्कपरिमाणं * कर्षमितं सार्द्धटङ्कद्वयम्, एतच्च भक्षणे मानमनुक्तानाम् ॥ १ ॥

अथात्र प्रक्षेपद्रव्याण्याह, कल्के मधु घृतमित्यादि ।—कल्के पूर्वोक्ते मधुघृततैलं द्विगुणमात्रया देयम्, द्विगुणता कल्कादिरर्थं । सिता गुडश्च समं, समानमपि कल्कात् । द्रवा इति—अवशिष्टजलक्षीरादयश्चतुर्गुणा देया कल्कादपीत्यर्थः । कल्कं प्रक्षेपसंज्ञं प्रोक्तं, तस्मात् द्रवेषु प्रक्षेपका योज्य इति तात्पर्यार्थः । यथा अत्र वक्ष्य-माणा पिप्पलीवर्द्धमानादयो दृश्यन्ते, अत एव कर्षपरिमाणं सामान्यं, विशेषतस्तु दोषाद्यनुरूपतः प्रमाणानि बोद्धव्यानि ॥ २ ॥

---

* "कर्षमितं सार्द्धटङ्कद्वयम्" इति यदुक्तं तत्र प्रामादिकम्, टङ्कशब्दो द्रोणपर्य्यायः, टङ्कद्वयेन कालो भवति, सार्द्धटङ्कद्वयेन साष्टद्वयधिकं तोलकं, कर्षस्तु तोलकद्वयमिति सुधीभिर्विचार्य्यम् ।

पाण्डुरोगादौ पिप्पलीवर्द्धमानप्रयोग ।—

त्रिवृद्वा पञ्चवृद्वा वा सप्तवृद्व्याऽथवा कणाः।
पिबेत् पिष्टा दशदिन तास्तथैवापकर्षयेत् ॥ ३ ॥
एव * विंशदिनैः सिद्ध पिप्पलीवर्द्धमानकम्।
अनेन पाण्डुवातास्र-कामश्वासारुचिज्वराः ॥
उदरार्शःक्षयश्लेष्म-वाता नश्यन्त्यरोगहाः ॥ ४ ॥

व्रणादौ निम्बपत्रप्रयोग ।—

लेपान्निम्बदलैः कल्को व्रणशोधनरोपणः।
भक्षणाच्छर्दिकुष्ठानि पित्तश्लेष्मक्रमौन् जयेत् ॥ ५ ॥

स यथेति वाक्येन तद्विधि दर्शयति ग्रन्थकार, त्रिवृद्व्याख्यादिना ।—अथ पिप्पलीवर्द्धमानप्रयोगो विधीयते। वृद्धिस्तु तावत् यावद्दशदिनमिति। तास्तथैवापकर्षयेदिति —ता पिप्पल्य, तथैवेति—वृद्धियुक्त्या अपकर्षयेत् ह्रासयेत् यावद्दशदिनमिति। एव विंशतिदिने कृत्वा पिप्पलीवर्द्धमानप्रयोग सिद्धो भवति। एतेन किमुक्त भवति? त्रिभिस्त्रिभि परिवृद्धि कृत्वा यावद्दशदिनानि, वृद्धिस्तु प्रतिदिनमेव, ततस्तिस्रस्तिस्रोऽपकर्षयेत यावत तिस्र पिप्पल्य एव तिष्ठन्ति। एव पञ्चवृद्धिरपकर्षश्च तथा सप्तवृद्धिरपकर्षश्च। अथवेति ग्रहणेन दशपिप्पलीना वृद्धिरपकर्षश्च बोद्धव्य, अन्यतो दर्शनात, तदृयथा—"त्रिभिरथ परिवृद्ध पञ्चभि सप्तभिर्वा दशभिरथ त्रिवृद्ध पिप्पलीवर्द्धमानम्। इति पिबति पुमान् यस्तस्य न श्वासकास ज्वरजठरगदार्शोवातरक्तक्षया. ष्णु ॥" इति। पिष्टा इत्यत्रापि क्षीरपिष्टा इति मन्यन्ते केचित् ॥ ३।४ ॥

लेपादिति।—निम्बपत्राण्यपि शिलापिष्टानि कृत्वा व्रणेषु लेप कार्य्य, पेषणसमय जलेन। लेपपरिमाणन्तु आर्द्रमर्द्धपलमौन्मेधम्, व्यवहारतस्तु व्रणानुकारि

* पिप्पलीवर्द्धमानस्य प्रयोग ऊनविंशतिभिर्दिनै सिध्यति इति चक्रपाणिशिवदासादीना मत, यत दशदिन वर्द्धयित्वा एकादशदिनमारभ्य ह्रासकरणे ऊनविंशतिदिनान्येव भवन्ति। शार्ङ्गधरस्य "त्रिंशद्दिनै" इति पाठात एकादशदिवसेऽपि दशमदिवसौषमावा स्थिरीकृत्य द्वादशदिवसमारभ्य ह्रासो मन्तव्य। किञ्च यत्र पिप्पलीवर्द्धमाने सहस्रपिप्पलीप्रयोग. चरकादौ दृश्यते, तत्र दशवृद्धिप्रयोग एव ऊनविंशतिदिने. समाप्तो भवति, त्रि-पञ्च-षडादिवृद्धिप्रयोगास्तु तदधिकदिनेनापीति बोद्धव्यम्।

गृध्रस्या महानिम्बप्रयोग ।—

महानिम्बजटाकल्को गृध्रसीनाशनः स्मृतः ॥ ६ ॥

वातव्याधौ रसोनप्रयोग ।—

शुद्धः कल्को रसोनस्य तिलतैलेन मिश्रितः।
वातरोगान् जयेत्तीव्रान् विषमज्वरनाशनः ॥ ७ ॥

वातव्याधौ रसोनविधि ।—

पक्वकन्दरसोनस्य गुलिका निस्तुषीकृता'।
पाटयित्वा च मध्यस्थं दूरीकुर्य्यात्तदङ्कुरम् ॥ ८ ॥
तदुग्रगन्धनाशाय रात्रौ तक्रे विनिक्षिपेत्।
अपनीय च तन्मध्याच्छिलायां पेषयेत्ततः ॥ ९ ॥
तन्मध्ये पञ्चमाग्रेण चूर्णमेषां विनिक्षिपेत्।
सौवर्चलं यमानीञ्च भर्जितं हिङ्गु सैन्धवम् ॥ १० ॥

कुर्य्यात्, नात्र नियतप्रमाणम्। कार्य्यान्तरमाह, भक्षणादिति।—निम्बप्रवरकल्क-भक्षणादपि कुष्ठादयो विनश्यन्तीति प्रभावात ॥ ५ ॥

अपरमपि योगमाह, महानिम्बेति।—महानिम्ब कार्मुक, "वकाइनि" इति लोके, तस्य जटा मूलम्। गृध्रसी वातरोगे पठिता, "रास्ननो" इति लोके प्रसिद्धा ॥ ६ ॥

अन्यदाह, शुद्ध इति।—रसोन, खनामख्यात। शुद्ध इति—त्वगादि-रहित। तिलतैलेन मिश्रित इति—रसोनकल्कात् द्विगुणितेन तिलतैलेन सम्पाद्य भक्षयेदित्यर्थ.। वातरोगान् गृध्रस्यर्दितपक्षाघातप्रभृतीन्। तीव्रानिति—दुस्तरान्। विषमज्वरा सततकादय ॥ ७ ॥

इदानी द्वितीयरसोनकल्क दर्शयितुमाह, पक्वेति।—वृहत्प्रकोडस्य रसोन-कल्को यद्यपि सुगमत्वादपि केषाञ्चित सुबोधार्थं किञ्चित् आचष्टे, पक्वकन्दरसोनस्ये-त्यादि।—पक्व कालान्तरेण परिणतम्। गुलिका कन्दस्यावयवावयविका, "पोथी" इति शब्दवाच्या.। निस्तुषीकृता इति—नखै सञ्छोलिता, पश्चात् पाटयित्वा द्विधा विदार्य। तदङ्कुरमिति—रसोनगुलिकामध्यस्थहारितवर्णाङ्कुरम्। तन्मध्या दिति—तन्मध्यात्, अपनीय खनादायेत्यर्थ.। अत्र रसोनकल्के पक्वद्रव्याणा त्रयं पञ्चमाग्रेण कृत्वा क्षिपेत्, पञ्चमाग्रमिति—रसोनकल्कात्, तेन रसोनकल्क

कटुत्रिकं जीरकञ्च समभागानि चूर्णयेत्।
एकीकृत्य ततः सर्वं कल्कं कर्षप्रमाणतः॥ ११॥
खादेदग्निबलापेक्षी ऋतुदोषाद्यपेक्षया।
अनुपान ततः कुर्यादेरण्डस्नुतमन्वहम्॥ १२॥
सर्वाङ्गैकाङ्गज वानमर्दितञ्चापतन्त्रकम्।
अपस्मारमथोन्मादमूरुस्तम्भञ्च गृध्रसीम्॥
उरःपृष्ठकटीपार्श्व-कुक्षिपीडा क्रिमीन् जयेत्॥ १३॥

रसोनप्रयोगे अपथ्यानि।—

अजीर्णमातप रोषमतिनीर पयो गुडम्।
रसोनमश्नन् पुरुषस्त्यजेदेतन्निरन्तरम्॥ १४॥

भागचतुष्टय, द्रव्यचूर्ण भागैकमिति। भर्जित छिन्न अवोत्क्लेदव्यवच्छेदाय, तथा हि—'योगेषु भर्जित छिन्नं दग्धं नोत्क्लेदकृद्भवेत्' इति। एव सर्वत्र। कटुत्रिक शुण्ठीमरिचपिप्पल्य। कल्क कर्षप्रमाणत इति—रसोनद्रव्यचूर्णमिश्रित कल्क, न तु केवल कर्षप्रमाणम्, अत एव खादेदग्निबलापेक्षीति वचनेनाव मानाभाव सूचित। एरण्डमूलक्वथितमवानुपानम्, उक्तपरिमाण प्रत्यहमव कृयात्। एकाङ्गज-मिति—पक्षघात। अपतन्त्रक वातरोगे पठितलक्षणम्। पीडाशब्द उर प्रभृतिभि प्रत्येकमभिसम्बध्यते, तेन उरःपीडा पृष्ठपीडा पार्श्वपीडा कटिपीडा कुक्षिपीडा इत्यर्थ। ननु सर्वाङ्गग्रहणेनैव सर्वे वातविकारा प्राप्ता, तत् कथ पृथक् ग्रहणम्? उच्यते—सर्वाङ्गेण सर्वशरीरप्रकुपितो वातोऽभिहित, एकाङ्गेन अवयवाश्रित, तस्मात् सर्वाङ्गप्रकुपितम् एकदेशप्रकुपितञ्चानिल नाशयेदिति न दोष॥ ८—१३॥

अस्य अभ्यासादेव त्याज्यमाह, अजीर्णमित्यादि।—निरन्तर सर्वकालम्। अजीर्णमन्नादिजनितम्। आतपञ्च घर्मसेवाम्। रोष क्रोधम्। अतिनीरमल्पजलपानम्। * पय क्षीरम्। गुड प्रसिद्धम्। एके गुडोपलक्षितत्वात् सर्वेक्षुविकारास्त्याज्या इति वदन्ति॥ १४॥

---

* "पयो महिषीपय, तस्य वातकर्तृत्वात्, न गोपय तस्य पथ्यवर्गे लिखितत्वात्" इति गूढार्थदीपिकापाठ न हृद्यतया प्रतिभाति, गौरवमाधुर्यादिगुणसम्पन्नस्य महिषीपयस श्लेष्मकर्तृत्वात्।

रसोनप्रयोगे पथ्यानि।—

मद्यं मांस तथाम्लञ्च रसं सेवेत नित्यशः॥ १५॥

ऊरुस्तम्भे पिप्पल्यादि।—

पिप्पली पिप्पलीमूल भल्लातकफलानि च।
एतत्कल्कञ्च मद्यौद ऊरुस्तम्भनिवारणं॥ १६॥

परिणामशूले अपराजितायोग।—

विष्णुक्रान्ताजटाकल्कं सिताक्षौद्रयुतैर्युतं।
परिणामभवं शूलं नाशयेत् सप्तभिर्दिनैः॥ १७॥

परिणामशूलादौ गुडादि।—

गुडौतिलगुडे कल्कौ दुग्धेन सह योजयेत्।
परिणामभवं शूलमामवातञ्च नाशयेत॥ १८॥

सेयमाह, मद्यमित्यादि।—मद्यं सुराऽसवप्रभृतिकम्। मांसं लाङ्गलिकं गुणं प्राधान्यात्। अम्लमम्लरसं, तच्च मातुलुङ्गादिकम्। रसं मांसजनितं प्रसहमित्यन्ये (?)। नित्यञ्च प्रतिदिनम॥ १५॥

इदानीमूरुस्तम्भे कल्पस्वरूप योगमाह पिप्पलीति।—एतेषां कल्कं इति एत कल्कं। पिप्पलीपिप्पलीमूले विख्याते। भल्लातकफलान्यत्र * निरस्थीनि योज्यानि। कुत्राप्येषा पिप्पल्यादीनां क्वाथोऽपि प्रचरति, तथा हि—"पिप्पलीपिप्पलीमूल भल्लातकयुतं पिबेत्। कल्कौ वा समधृतेयं ऊरुस्तम्भविनाशनं॥" इति॥ १६॥

परिणामशूलेऽपराजिताकल्कमाह विष्णुक्रान्तेति।—विष्णुक्रान्ता अपराजिता प्रतीता, शतावरी वा। सिताद्यौऽप्यत्र पूर्वपरिमाणेन प्रतिज्ञा। सप्तदिनैरिति योगस्यास्य दृष्टफलत्व दर्शयति। परिणामशूलं पक्वाशयशूलं तच्च शूलरोगे व्यष्टमेव॥१७॥

अपरमपि परिणामशूलार्थं प्रयोगमाह, गुडौतीति।—अत्रास्य कल्पस्य विधौ गुडौतिलाभ्यां कल्कं कार्य्य। गुडमत्र द्वौ सन्तुलितं चतुर्गुणेन क्षीरेण सह

भल्लातकानामस्थ्योन्मेव सर्वत्र प्रयुज्यन्ते। शिवदासेनात्र किमपि न लिखितम्, अतो मतमस्य चिन्त्यम्।

† अत्र शिवदासव्याख्या—"नागरादिकल्कमृत्कारिकावत् यवागूवत् वा क्षीरेण साधयित्वा भक्षयेत्। गुडौचूर्णं कर्षं १, पुरातनगुड कर्षं १, तिलचूर्णं पल १, अन्यदुग्ध शराव २" इति।

रक्तार्शसु अपामार्गप्रयोग ।—

अपामार्गस्य बीजानां कल्कस्तण्डुलवारिणा।
पीतो रक्तार्शसां सार्शं कुरुते नात्र संशयः॥ १९॥

रक्तातीसारे बदर्यादि ।—

बदरीमूलकल्केन तिलकल्कश्च योजितः।
मधुचारयुतं कुर्य्याद्रक्तातीसारनाशनः॥ २०॥

रक्तपित्तादौ लाजाप्रयोग ।—

कुष्माण्डकरसोपेता लाजा कर्षद्वयं पिबेत्।
रक्तक्षयसुरोघात क्षयरोगञ्च नाशयेत्॥ २१॥

लाजपिवा भक्षयेदिति भावः। चकारादन्यदपि संग्राह्यमन्यत्र दृष्टफलम्। उक्तं च तत्रैव—"नागरतिलगुडकल्कं मयसा सलाजं च प्रमाणतश्चात्। उष्णं प्रतिदिनमथ तत्क्षणपेति संग्रहाचार्येण॥" इति॥ १८॥

अथ रक्तार्शसां प्रयोगं दर्शयन्नाह, अपामार्गस्येति।—अपामार्गः प्रसिद्धः। तण्डुलवारि तण्डुलक्षालनजलं, तच्च पृटपाके दग्धितम्, अनेन चतुर्गुणनापामार्गस्य बीजानां कल्कं पेयं, न तु तेन मानेन पिबेत् पेयपर्याप्तं तु परिमितं जलम्, एतदेव योज्यम्। नास्ति संशय इति—दृष्टफलत्वेनास्य प्रभावातिशयो वर्णितः॥ १९॥

इदानीं रक्तातीसारे बदरीमूलकल्कमाह, बदरीमूलकल्केन तिलकल्केति।—अत्रकल्पद्वयग्रहणेन सम मेलयित्वा कल्कः कार्य इत्यक्षदीयसम्प्रदायः, तेन द्वयोः साम्यन कर्षैक पलपर्याप्तं जलमवानुक्तत्वात् मधुचारौ चीक्तपरिमाणेन प्रक्षेपे योज्यौ। केचिन्मधु क्षीरयुत इति पठन्ति, तत्र—क्षीरं क्वागोद्वय व्याधिविहितत्वात्। अयमेव पक्षो व्यवहारकर्त्तृभिरुपयुक्तः। गुणोनाप्युक्तम्—"याज्ञ शोषज्वरश्वास-रक्तपित्तातीसारजित्" इति॥ २०॥

अथ रक्तपित्ते कुष्माण्डप्रयोगमाह कुष्माण्डकेति।—कुष्माण्डकः प्रसिद्धः, तस्य स्वरसेनैव * कर्षमात्रा लाजा पिष्ट्वा तेनैव चतुर्गुणेन सह पिबेत्। चतुर्गुणताऽत्र जलमानम्, एष विधिः पानादिति वाक्ये दर्शितः। लाजाऽत्रोक्तकाल्य जननी। सर्वत्रापि मधुप्रक्षेपं कुर्वन्ति वैद्याः, कुतः? पूर्वयोगानुक्तेः॥ २१॥

---

* सूत्रे 'कर्षद्वयम्' इति पाठः, टीकायान्तु कर्षमात्रेति। कर्षद्वयस्य चतुर्गुण्य पलद्वयमानं भवति, कर्षस्य तु पलमानम् इति सुधीभिर्दृष्टव्यम्।

रक्तप्रदरे तण्डुलीयप्रयोग ।—

तण्डुलीयजटाकल्कः मक्षौद्र सरसाञ्जनः ।
तण्डुलोदकसम्योगो रक्तप्रदरनाशनः ॥ २२ ॥

अतीसारादौ अङ्कोठप्रयोग ।—

अङ्कोठमूलकल्कश्च मक्षौद्रस्तण्डुलाम्बुना ।
अतीसारहर प्रोक्तस्तथा विषहरः स्मृतः ॥ २३ ॥

विषे बन्याकर्कोटिकादिप्रयोगत्रयम् ।—

बन्याकर्कोटिकामूलं पाटलाया जटाऽथवा ।
घृतेन विल्वमूल वा द्विविध नाशयेद्विषम् ॥ २४ ॥

सन्निपाते अभयादि ।—

अभयासैन्धवकणा-शुण्ठीकल्कस्त्रिदोषहा ॥ २५ ॥

अग्निमान्द्यादौ पथ्यादि ।—

पथ्यासैन्धवशुण्ठीभि कल्को दीपनपाचनः ॥ २६ ॥

रक्तप्रदरेऽप्याह, तण्डुलीयेति ।—तण्डुलीय शाकविशेष "चौराई" इति शब्दवाच्य तस्य जटा मूलम् । कल्पव्यताऽस्य—तण्डुलीयजटा रसाञ्जनञ्च साम्येन कर्षपरिमित याह्य, तदन् जलेन सम्पिष्य मक्षयन्नश्चतुर्गुणेन तण्डुलजलेन सह पातव्य । तण्डुलजल पूर्वं व्याख्यातम् । रसाञ्जन खनामख्यात, तच्च दार्वीक्वाथसमुद्भवमिति प्रसिद्धम् । रक्तप्रदर स्त्रीरोगे पठित ॥ २२ ॥

अथ विषहरणार्थं योगवरानाह, अङ्कोठमूलेति ।—अङ्कोठा वृक्षविशेषस्तस्य मूलम् । क्षौद्रमत्र प्रक्षेपे साधु । तण्डुलाम्बुनेति चतुर्गुणेन, चतुर्गुणता च कल्कत्वात् । विषोऽत्र स्थावर । विषनिमित्तन्तु जलेनैव पेय इति सम्प्रदाय ॥२३॥

अपराण्याह, बन्येति ।—एतत योगत्रय घृतेन सह पेय, तच्च द्विविध विष नाशयति इति, द्विविध स्थावरजङ्गमात्मकम् । केचित् बन्याकर्कोटकीमूलकल्केन नस्यमाहु , तथा हि—"बन्याकर्कोटकीमूल छागीमूत्रेण भावितम् । नस्य कारयेत्कल्कसम्मिश्र विषोपहतचेतस ॥" इति । एव विल्वमूलमञ्जनार्थम् इति वदन्त्यके ॥२४॥

अथैकेन श्लोकेन योगद्वयमाह, अभयेति ।—अभयादीना चतुर्णा समभागमिलितानां मिलित्वा कर्षेण कल्कस्त्रिदोषजिद्भवति । अभया हरीतकी । कणा पिप्पली । अपर ,

क्रिमिरोगे विह्वदादि।—

विह्वत् पलाशबीजानि पारसीकयमानिका।
काम्पिल्लक विडङ्गञ्च गुडश्च समभागिकम्॥
तक्रेण कल्कमेतेषां पिबेत् क्रिमिगणापहम्॥ २७॥

रक्तार्शसु तिलप्रयोग-नागकेशरप्रयोगौ।—

नवनीततिलै कल्को जेता रक्तार्शसां स्मृतः।
नवनीतसितानाग-केशरैश्चापि तद्विध॥ २८॥

ग्रहण्यां गुल्मादि हृद्रोगप्रयोगश्च।—

पीतो मसूरयूषेण कल्क शुण्ठीशलाटुजः।

—पथ्यादिभि द्रव्यै कल्को दीपनपाचनो भवति। अत्रापि समता द्रव्याणा, भक्षणमानन्तु पूर्ववत। दीपननाम्ने। पाचनसामादीनाम॥ २५।२६॥

क्रिमिरोगे कल्कमाह, विह्वदिति।—विह्वदादीना समुदाना द्रव्याणा सामान्येन मिलितानां कर्षप्रमाणेन कल्क कृत्वा चतुर्गुणेन तक्रेण सह आलोड्य पिबेत् एतच्च क्रिमिसमूहानुद्धरतीति। विह्वत् निःसृता। पलाशबीजानि प्रसिद्धानि। पारसीकयमानिकेति—पारस्यदेशभवा पारसी खुरासानिशब्दवाच्या। काम्पिल्लको रेचनक, कबीला" शब्देन विख्यात। अत्र योग कोष्ठगतक्रिमिनाशनार्थमुक्त। एके विह्वदादीना गुड साम्य इति वदन्ति, तेन गुडस्यैको भाग शेषद्रव्याणा भागैकमित्यर्थ सत्यम। तन्मते तु गुड प्रथमतो भक्षयित्वा पश्चात् विह्वदादीना कल्क तक्रेण सह पिबेदिति। तथा च तन्त्रान्तरे प्रयोगान्तरमपि दृश्यते, तदयथा—"पारसीकयमानी पीता पर्य्युषितवारिणा प्रातः। गुडपूर्वा क्रिमिजातं कोष्ठगतं पातयत्याशु॥" ॥२७॥

अथ रक्तार्शसामपि योगद्वयमाह, नवनीतेति।—अत्रोक्तपरिमाणेन तिलकल्को द्विगुणितेन नवनीतेन सम्भाव्य भक्ष्य, असौ रक्तार्शसा जेता कथित इत्यर्थ। रक्तार्शसामिति बहुवचनलेनान्येषामप्यर्शसा ग्रहण। अपरोऽपि—नवनीतसितानागकेशरैश्च युक्त्या कल्कक्रमविधोऽत्र भवति। सिता शर्करा। तद्विध इति—रक्तार्शसा इत्यर्थ। नवनीतत्यागेनापि योगोऽत्र प्रचरति, तेन सिता नागकेशरस्य साम्येन साधारणक भक्ष्य प्रत्यह प्रयोगात॥ २८॥

अथ ग्रहण्या योगद्वय दर्शयन्नाह, पीत इति।—शुण्ठीशलाटुज कल्क उक्तपरि-

जयेत् सङ्ग्रहणीं तद्वत्तक्रेण ह्रहतीभवः ॥ २९ ॥

इति श्रीदामोदरसूनना श्रीशार्ङ्गधराचार्य्येण विरचितायां शार्ङ्गधर-संहितायां मध्यखण्डे चिकित्सितस्थाने कल्ककल्पना नाम पञ्चमोऽध्याय ॥ ५ ॥

षष्ठोऽध्यायः।

चूर्णकल्पना।—

चूर्णलक्षणं तस्य पर्य्यायौ मात्रा च।—

अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम्।
तत् स्याच्चूर्णं रजः चोदस्तन्मात्रा कर्षसम्मिता ॥ १ ॥

चूर्णं गुडादीनां द्रवाणाञ्च मात्रानिर्देशः।—

चूर्णं गुडसमो देयः शर्करा द्विगुणा भवेत्।

माषेण कृतश्चतुर्गुणेन मधुरद्रव्येण सह पिबेत्। अनुपानं बिल्वफलम्। मधुरद्रव्यैः पिप्पल्यादिक्वाथकल्पनाया कथित एव। अपरोऽपि—ह्रहतीभवो ह्रहत्कण्टकारिकामूलकल्कः। अत्रापि चतुर्गुणं तक्रं कल्कावशेषितव्यम्। तद्वदिति—यष्ट्याहीनामकरं ॥ २९ ॥

इति श्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यखण्डे चिकित्सितस्थाने कल्ककल्पनाऽध्याय पञ्चम ॥ ५ ॥

इदानीं चूर्णकल्पना व्याख्यास्यामः। प्रथमतस्तत्स्वरूपमाह, अत्यन्तेति।—अत्यन्तशुष्कमिति—सूर्य्यांशुभिः शोषितद्रव्यम्। यद्द्रव्यमिति—पुष्पफलपत्रत्वङ्मूल-निर्य्यासादिसञ्चयम्। सुपिष्टमिति—अतिशयेन चूर्णितं, श्लक्ष्णायामिति शेषः। वस्त्रगालितं वस्त्रपूतम्। तत्तु चूर्णं रज चोद इति पर्य्यायनामभ्यां सञ्ज्ञितम्। तन्मात्रेति—मात्रया माषं * कर्षसम्मिता ज्ञेया इत्यनुक्तप्रयोगेषु ॥ १ ॥

* "कर्षसम्मिता वक्तव्येति, अल्पत्वे एकटत्वात् वर्द्धयितव्या" इति गु० दी०।

चूर्णेषु भर्जितं हिङ्गु देयं नोत्क्लेदकृज्जवेत् ॥ २ ॥
लिहेच्चूर्णं द्रवैः सर्वैरित्यादौर्द्विगुणोन्मितैः।
पिबेच्चतुर्गुणैरेव चूर्णमालोडितं द्रवैः ॥ ३ ॥

दोषभेदेन अनुपानाना मात्रानिर्देश ।—

चूर्णावलेहगुटिका-कल्कानामनुपानकम्।
वातपित्तकफार्तेऽक्षे त्रिद्व्येकपलमाहरेत् ॥ ४ ॥

अनुपानस्य गुण ।—

यथा तैलं जले क्षिप्तं क्षणेनैव प्रसर्पति।
अनुपानबलाद्देहे तथा सर्पति भेषजम् ॥ ५ ॥

इदानीमविशेषोक्तेषु अक्षरागुडयोगानपूर्वक प्रक्षेपविधिमाह, चूर्णं इति।—गुडस्याप्य चूर्णोक्तात्। अक्षराऽपि द्विगुणिता चूर्णपरिमाणादित्यर्थः। चूर्णेष्विति बहुवचनलिङ्गेन गुटिकाल्लेहादिष्वपि भर्जितं हिङ्गु बोद्धव्यम्। सर्वैरित्यतो घृताद्यैरिति यत् पुनर्ग्रहणं कृतं तत तोयक्षीरमद्यमूत्रादीना व्यवच्छेदार्थं, यत एते सह चूर्णस्य पानमुक्तमेतत्स्थाने, लेहस्तु मधुघृततैलादीना प्रशस्त। पिबेदित्यादौ चतुर्गुणतः चूर्णभागात्। द्रवैरिति—तोयक्षीरमद्यमूत्रादिभि ॥ २।३ ॥

अथ चूर्णादीनामनुपानमात्रा दर्शयन्नाह, चूर्णावलेहेति।—अनुपानकमिति—अनु पश्चात् पानम्, औषधभक्षणोपरि यत पीत तदनुपानकमित्यर्थः। "वातपित्तकफार्तेऽक्षे त्रिद्व्येकपलमाहरेत" इत्यनुक्रमो ज्ञेय। आर्तो रोग, तेन वातार्तेऽक्षे त्रिपल, पित्तार्तेऽक्षे द्विपल, कफार्तेऽक्षे पलैकमिति तात्पर्यार्थः। अनुक्तेष्वनुपानेषु जलानुपानं प्रशस्तम्, तथा हि—"सर्वेषामनुपानाना माहेन्द्रं तोयमुत्तमम्" (सु० सू० ४६ अ०) इति। सुश्रुतेऽपि—"सर्वानुपानेषु वरं वदन्ति सैव यदभ्र गुचिभाजनस्थम्। लोकस्य जन्मप्रभृति प्रशस्त तोयात्मका सर्वरसाश्च इष्टा ॥" (सु० सू० ४६ अ०) इति ॥४॥

अथानुपानस्य प्रयोजन निर्देष्टुमाह, यथेति।—भेषज भिषजा संस्कृत द्रव्य तथा अङ्गे सर्पति, कुत ? अनुपानबलात् अनुपानशक्तित। दृष्टान्तमाह, यथा तैलमित्यादि।—सुगमम् ॥ ५ ॥

---

* "सर्वैरित्यत." इत्यत्र "सर्वै. द्रवैरित्युक्ताऽपि" इति पाठकल्पनमुचितम्।

भावनार्थं द्रवपरिमाणनिर्देश ।—

द्रवेण यावता सम्यक् चूर्णं सर्वं प्लुतं भवेत्।
भावनाया. प्रमाणन्तु चूर्णं प्रोक्त भिषग्वरैः ॥ ६ ॥

स यथा—

सर्वविधज्वरे आमलक्यादि।—

आमल चित्रक पथ्या पिप्पली सैन्धवस्तथा।
चूर्णितोऽयं गणो ज्ञेय' सर्वज्वरविनाशन ॥ ७ ॥
(भेदो रुचिकर श्लेष्म-जेता दीपनपाचन: ॥)

कासज्वरादौ पिप्पलीप्रयोग ।—

मधुना पिप्पलीचूर्णं लिहेत् कासज्वरापहम्।
हिक्काश्वासहर कण्ठ्यं श्लोहघ्न बालकोचितम् ॥ ८ ॥

अथ चूर्णाथ भावनापरिमाणमाह, द्रवेणेति।—सामान्येन सर्वं तोयादिकम, अन्यदपि यद्द्रवीकृत तदपि ग्राह्य न दोष। प्लुतमिति—म्लावितं, यथा मन्थखरसखरूपत्वादिति। भिषग्वरैरित्यनेन युक्त्या कर्त्तव्य इति भाव' ॥ ६ ॥

स यथेत्यनेन चूर्णानि दर्शयति ग्रन्थकार, आमलमिति।—आमलादिकोऽय गण सर्वज्वरविनाशनो भवति। आमलमिति—आमलफलम। पथ्या हरीतकी। एतत सकल साम्यमनुक्तत्वात। सर्वज्वरमिति—अष्टविध व्यवहारतस्तु विषमज्वरेषु प्रायश प्रचरति। भेदो रुचिकर इत्यादिपठदय कैचित पठन्ति ॥ ७ ॥

मधुमेति।—अर्थ मधुपिप्पलीयोग कासज्वरादीन् हन्ति, विशेषेण बालानामुचित। बालकेति सामान्येन त्रैविध्य सूचयति, तद्यथा—आ-षोडशात् बाल स त्रिविध, क्षीरप, क्षीरान्नाद, अन्नाद इति ॥ ८ ॥

श्लोकार्द्धोऽय प्रक्षिप्त इति दीपिकाकार ।

मेहादौ त्रिफलाप्रयोग।—

एका हरीतकी योज्या द्वौ च योज्यौ विभीतकौ।
चत्वार्यामलकान्येवं त्रिफलैषा प्रकीर्त्तिता ॥ ९ ॥
त्रिफला मेहगोथघ्नी नाशयेद्विषमज्वरान्।
दीपनी श्लेष्मपित्तघ्नी कुष्ठघ्नी रसायनी ॥
सर्पिर्मधुभ्यां संयुक्ता सैव नेत्रामयान् जयेत् ॥ १० ॥

अग्निमान्द्यादौ त्रिकटुप्रयोग।—

पिप्पली मरिचं शुण्ठी त्रिभिस्त्र्यूषणमुच्यते।

अथ त्रिफलाचूर्णमाह, एकेति।—उक्तपरिमाणेन मेहादिकान् हन्तीति। यदा सैव त्रिफला सर्पिर्मधुभ्यामवलेढिता तदा नेत्रामयान् जयेदिति। अवलेहस्तु सायमुपयोज्य, तथा ह्युक्तम्—"ऊर्जबलरोगघ्नी सायं खादवलेहिका' इति। कोद्दशमुक्तपरिमाणम्? तमाह, एका हरीतकीत्यादि।—एतत् गणनापरिमाणं त्रिफलाया कथितं, न तु तुलनाया विषमसमं यत गुडकसङ्ख्यानमेव समत्वमस्या, कुत? द्विकार्षिकी हरीतकीति वाक्यानुरोधात, तथा हि—"नवादिगुणयुक्तत्वे तथैकत्र द्विकर्षता। हरीतक्या फले यत्र इयं तत्र श्रेष्ठमुच्यते ॥" इति। नवादिगुणोऽपि प्रमङ्गो निरूप्यते, यथा—'नवा स्निग्धा घना हृद्या गुर्वी त्रिदोषा तथाऽम्लिका। निमज्जेत् या प्रक्षिप्तवारि गुणोत्तमा सा प्रकीर्त्तिता ॥" इति। विभीतकमपि कषायत्वप्राधान्यात् कथिन्नसिति प्रविदि, उक्तं निघण्टौ—"विभीतकः कर्षफलो वासल्लोऽक्ष कलिद्रुमः" इति तेन हे विभीतकफले कथिते। आमलकमपि कोलमात्रं वर्तते, कोलस्त्वेकर्षस्य पर्य्यायनामेति, तेन चत्वार्यामलकानि भवन्ति, एतेन त्रिफलायास्तुलनासाम्यमपि दर्शितं, गणनायाश्च विषमत्वमिति, न तु तस्या भागेषु विषमता, यतो दृश्यते हि द्रङ्वैद्यानां व्यवहारोऽयमेव। यद्यपि त्रिफला द्विदोषाऽपि, तथाऽपि सर्वत्रैवाविशेषोक्तौ त्रिफलाशब्देन हरीतक्यादिकमेव गृह्यते, यदुक्तं—"ट्राचाकाश्मर्य्यखर्जूर-फलानीति फलत्रिका। इयं प्रोक्ता च हितोषा त्रिफला चरकादिभिः ॥" इति ॥ ९।१० ॥

---

* "शार्ङ्गधरेण उक्तभागद्वया लिखिता त्रिफला केवलं चूर्णकाथविषया अनुपानगुणावषया च, अन्यथा नवायसचूर्णादौ विरोधः स्यात्, यतः केवलायफलाकाथे चूर्णे च भागद्वयं दृश्यते" इत्यादि गू० दी०।

दीपन श्लेष्ममेदोघ्नं कुष्ठपीनसनाशनम् ॥
जयेदरोचकं मामं मेहगुल्मगलामयान् ॥ ११ ॥

अरुच्यादौ पञ्चकोलम् ।—

पिप्पलीचव्यविश्वाह्वा पिप्पलीमूलचित्रकैः ।
पञ्चकोलमिति ख्यातं रुच्यं दीपनपाचनम् ॥
आनाहप्लीहगुल्मघ्नं शूलश्लेष्मोदरापहम् ॥ १२ ॥

विजातकचातुर्जातके ।—

त्रिगन्धमेलात्वक्पत्रैश्चतुर्जातं सकेशरैः ।
त्रिगन्धं सचतुर्जातं रूक्षोष्णं लघु पित्तकृत् ॥
वर्ण्यं रुचिकरं तीक्ष्णं विषश्लेष्मामयान् जयेत् ॥ १३ ॥

अथ वृषणचूर्णमाह, पिप्पलीति ।—इदमपि विकटकृपथ्यायनाम्ना कथितम। वयसा साम्यमित्यनुक्तवात । सामेति—अरोचक दोष वा । मेहगुल्मगलामयानिति—मेहामयान गुल्मामयान गलामयान् ॥ ११ ॥

पञ्चकोलमप्याह पिप्पलीति ।—अत्र चव्य गजपिप्पलीमूलम । विश्वाह्वा शुण्ठी । पिप्पलीमूल पिप्पलीजटा । चित्रक वह्निनाम्ख्यात । अत्रापि पञ्चाना समत्वम । रुच्य रुचिकरम् । दीपनमग्नेः । पाचनमामादीनाम । आनाह उदरापूर । (ऊषकादिगण ,—"ऊषक सैन्धव हिङ्ग्वाग्नीशङ्खगुग्गुलु । शिलाजतु तुल्यकञ्च ऊषकादिरुदाहृत ॥ ऊषकादि कफ हन्ति गण्डो मेदोविशोषण । अश्मरीशर्करामूत्रमूलघ्न कफगुल्मनुत ॥" इति । अत्रापि पाठ क्वचित) ॥ १२ ॥

इदानी त्रिगन्ध-चातुर्जातकचूर्णमाह, त्रिगन्धमिति ।—एलात्वक्पत्रै कृत्वा त्रिगन्ध कथितम । चातुर्जातन्तु सकेशरैरेलात्वक्पत्रैरेव प्रोक्तम । * एला सूक्ष्मैला । त्वक् गुडत्वक् । पत्र पत्रकम । केशर नागकेशरम । रूक्षोष्णमिति वीर्यत लघपाकित्वात । वर्ण्य कान्तिकरम् । तीक्ष्णं मरिचादिवत ॥ १३ ॥

---

* एलया सवत्रैव स्थूलैला गृह्यते वैद्यै । त्रिजातचातुर्जातयो स्थूलैलैव, न तु सूक्ष्मैला ।

जीवनीयगण ।—

काकोली क्षीरकाकोली जीवकर्षभकौ तथा।
मेदा चान्या महामेदा जीवन्ती मधुकं तथा ॥ १४ ॥
मुद्गपर्णी माषपर्णी जीवनीयौ गणस्त्वयम्।
जीवनीयगण स्वादुर्गर्भस्थान्कुरुते ॥ १५ ॥
स्तन्यकृत् बृंहणो हृद्य स्निग्ध शीतस्तृषापहः।
रक्तपित्तं क्षय शीर्ष ज्वरदाहानिलान् जयेत् ॥ १६ ॥

अष्टवर्ग ।—

द्वे मेदे द्वे च काकोल्यौ जीवकर्षभकौ तथा।

जीवनीयगणमाह, काकोलीत्यादि।—अत्र जीवनीयगणे काकोली क्षीरकाकोली च स्वनामत प्रसिद्धा। किञ्चिदवयवीनानार्थं लक्षणमप्याह तदयथा—काकोली मधुरा वर्णत शुक्ला च क्षीरकाकोली अत्यन्तक्षीरयुक्ता। एतद्वय विटपविशेषेण (१) दक्षिणोत्तरेऽतीव प्रसिद्धम्। जीवकर्षभकाविति—जीवकस्य ऋषभकस्य तौ, जीवको मधुररस क्षुद्रविटप कूर्चशीर्षक। ऋषभकोऽपि क्षुद्रश्च सहस्रच्छिद्रो विषाणीति। एतद्वयमपि दक्षिणदेशे प्रचरति। मेदा चान्या महामेदा इति—मेदा स्वल्पपर्णी मेदोगन्धा अल्पत्वचमत्तक, स च काष्ठविशेषो नखच्छेद्यो देशान्तरादवगन्तव्य। महामेदाऽप्यच्छिद्रात्वचा काष्ठविशेष, स च दक्षिणोत्तरपथे पर्वतेषु प्रसिद्ध, तत्र त्रैवमणिरिति प्रसिद्ध। जीवन्ती शाकविशेष, सा चोत्तरापथे पर्वतेषु हृन्दाहृत्वशाखाऽस्ति तत्रैवोत्पद्यते। मधुक मधुयष्टीति * जलजातवल्लीविशेष, मधुरा भक्षणतश्च अमौ विख्याता सर्वत्रैव। मुद्गपर्णी माषपर्णी चेति द्वयमपि निजनाम्ना प्रसिद्ध, मुद्गवत् पर्ण यस्या सा मुद्गपर्णी एव माषपर्णीति। मुद्गपर्णीति—क्षुद्रावनसञ्ज्ञा मार्जारमोदिनीति। माषपर्णी च क्षुद्रनाला द्वयमप्युच्चकाकारा पर्वतीद्भवा मधुरा च। एभिरय जीवनीयगणसञ्ज्ञ स्वादुर्मधुररस। गर्भसन्धानकृदिति—बन्ध्यागर्भकर प्रभावात्। स्तन्यकृदिति—क्षीरकारकर। बृंहणो धातुवृद्धिकर। हृद्य शुक्रवर्द्धिकर ॥ १४—१६॥

अथाष्टवर्गमाह, द्वे मेदे इति।—अमौ गुणै कृत्वा जीवनीयगणसाम्य,

---

* यद्यपि स्थलज जलजभेदेन मधुकद्वय दृश्यते, तथापि जीवनीयगणोक्त-मधुकशब्देन वैद्या स्थलजमेव गृह्णन्ति, न तु जलजम्।

ऋद्धिवृद्धी च ते: सर्वैरष्टवर्ग उदाहृत: ॥
अष्टवर्गो बुधै: प्रोक्तो जीवनीयसमो गुणै: ॥ १७ ॥

पञ्चलवणम्।—

सिन्धु सौवर्चलञ्चैव विडं सामुद्रक गडम्।
एकद्वित्रिचतु:पञ्च-लवणानि क्रमाद्विदु: ॥ १८ ॥
तेषु मुख्यं सैन्धव स्यादनुक्ते तत् प्रयोजयेत्।
सैन्धवाद्य रोमकान्त ज्ञेय लवणपञ्चकम् ॥ १९ ॥
मधुरं सृष्टविण्मूत्रं स्निग्ध सूक्ष्म बलापहम्।
वीर्योष्ण दीपन तीक्ष्णं कफपित्तविवर्धनम् ॥ २० ॥

स चाष्टभिर्द्रव्यैर्मिलित, तद्यथा—"द्वे मेदे द्वे च काकोल्यौ जीवकर्षभकौ तथा। द्वौ च ऋद्धिवृद्धी च द्वे—'। अत्र ऋद्धिवृद्धी तु नाम्ना प्रसिद्धे। तयोश्चकमिति यत्र गद्दे ऋद्धिवृद्धी स्त तत्र वसुवृद्धिभवतीति प्रसिद्धि। अथच मुश्रुतगणसङ्गृहे जीवनीयाष्टकसङ्ग। चरकयोगे तत् पूर्वोक्त जीवनीयदशकमिति ॥ १७ ॥

लवणपञ्चकमाह, सिन्धिवति।—अथ लवणपञ्चकसङ्गको गण। सिन्धु सैन्धव, तच्च सिन्धुदेशमित्यर्थ। सौवर्चल प्रसिद्ध, तदेव निर्गन्ध कालल्लवणमित्युच्यते। विड क्षारिम, तच्च प्रसारणीकल्कभक्तालवणसयोगादग्निदाहन निर्वृत्त विडमिति ख्यातम्। सामुद्रकमिति—दक्षिणसमुद्रसमीपे भव सामुद्रक, तच्च गडलवणाकार विमलतर ज्ञेयम्। गड तच्च रोमक, तच्च शाकक्षारोद्भवोत्पन्नम्। एकद्वित्रिचतु-पञ्चेति लवणक्रमो व्यक्तसमलवणार्थं सूचित, यथा "द्वौ चारौ लवणत्रयम्" इत्यादिवचनात्। विमलत्व सैन्धवसौवर्चलावडमित्यत्र। एवमन्यदपि बोध्यम्। तेषु मुख्य सैन्धव स्यादित्यनेनानुक्त यत्रयु मुख्य लवण, तत्र सैन्धव योज्यमिति भाव। ननु "सैन्धवाद्य रोमकान्त ज्ञेय लवणपञ्चकम्" पुन किमर्थ कृतम्? उच्यते आदौ सैन्धवस्य अन्ते रोमकस्य च ग्रहण तन्मान्तरेऽपि नियत मध्ये क्वचिद्विपरीत मिति, तथा च सुश्रुते, / "सैन्धवसामुद्रविडसौवर्चलरोमकाणि पञ्च मुख्यानि" इति मतद्वयाभिप्रायेण पुनर्ग्रहण न दोष। पूर्वमतन्तु चरके प्रतीतम। मधुर प्रि-पाकात। सुश्रुते तु यथापूर्वं स्वादूनि स्वादवत्र गुण,, यत रसेषु गुणभक्ता इति

* मुद्रितसुश्रुतसंहितासु—"सैन्धवसामुद्रविडसौवर्चलरोमकौद्भवमृत्तीनि लव णानि यथोत्तरमुष्णानि—" इत्यादि पाठो दृश्यते।

चारद्वयम्।—

स्वर्जिका यावशूकश्च चारयुग्ममुदाहृतम्।
ज्ञेयौ वह्निसमौ चारौ स्वर्जिकायावशूकजौ॥ २१॥
अन्ये चाराश्च गुल्मार्शो-ग्रहणारुर्क्छिद सराः।
पाचना क्रामपुस्त्वघ्ना शर्कराश्मरिनाशना॥ २२॥

सवाक्षद्वयं सुदर्शनचूर्णम्।—

त्रिफला रजनीयुग्मं कण्टकारीयुग शटी।
त्रिकटु ग्रन्थिक मूर्वा गुडूची धन्वयासक॥ २३॥
कट्फा पर्पटो मुस्तं त्रायमाणा च बालकम्।
निम्ब पुष्करमूलञ्च मधुयष्टी च वत्सकम्॥ २४॥
यमानीन्द्रयवो भार्गी शिग्रुबीज सुराष्ट्रकम्।
वचा त्वक् पद्मकोशीर चन्दनातिविषावला॥ २५॥
शालपर्णी पृश्निपर्णी विडङ्गं तगरं तथा।

कैचित्। अपर तु लवणेषु मधुरत्वमणुरसस्य कफमाननन्ति। सृष्टविण्मूत्रमिति—सस्कम्। मूत्रमिति—रानकूपादिप्रवेशकत्वात्। तोक्ष्ण सारचादिवत॥ १८—२०॥

अथ चारयुग्म दर्शयन्नाह, स्वर्जिकेति।—तत्र स्वर्जिका प्रसिद्धा, "साजी" शब्दवाच्या। यावशूको यवक्षार। वह्निसमौ उष्णवीर्यत्वात्। यावशूकश्चेति चकारात् टङ्गणक्षारमपि चारवितयग्रहणयोग्यम्, यथा "चारवीपि रसेन्द्रशुद्ध-मस्तम्" इत्यादि वचनात्। अन्ये चाराश्चेति।—अन्येति—मुष्ककपाटलाऽपामार्ग मोजिह्विकाकदलीसुधाप्रभृतय। गुल्माशोंग्रहणीरुक्छिद इति—अत्र रुक्शब्दो गुल्मादिभि प्रत्येकमभिसम्बध्यते, तेन गुल्मरुक् अर्शोरुक् ग्रहणीरुगिति। सरा सस्का। क्रामिघ्ना पुस्त्वघ्नाश्च, पुस्त्व वीर्यम्॥ २१।२२॥

इदानी सुदर्शनचूर्णं निदर्शयन्नाह, त्रिफलेति।—रजनीयुग्ममिति—हरिद्राद्वयम्। कण्टकारीयुगमिति—लघुकण्टकारी बृहत्कण्टकारी च। शटी कर्चूरभेद। ग्रन्थिक पिप्पलीमूलम्। मूर्वा चोरलाय। त्रायमाणा खनामख्याता। वत्सक कुटज। शिग्रुबीज आभाञ्जन, श्वेतमरिचमिति प्रसिद्धम्। सुराष्ट्रक मृत्तिकाविशेष, "फट्किरी" इति लोके। कैचित् सुराष्ट्रकमित्यस्य स्थाने अष्टकमिति पठन्ति, तत्र—अष्टको

चित्रकौ देवदारु च चव्यं पञ्च पटोलजम् ॥ २६ ॥
जीवकर्षभकौ चैव लवङ्गं वंशलोचना।
पुण्डरीकञ्च काकोली पत्रकं जातिपत्रकम् ॥ २७ ॥
तालीशपत्रञ्च तथा समभागानि चूर्णयेत्।
सर्वचूर्णस्य चार्द्धांश कैरात निक्षिपेत् सुधीः ॥ २८ ॥
एतत् सुदर्शन नाम चूर्णं दोषत्रयापहम्।
ज्वरांश्च निखिलान् हन्यान्नात्र कार्य्या विचारणा ॥२९॥
पृथग्द्वन्द्वागन्तुजांश्च धातुस्थान् विषमज्वरान्।
सन्निपातोद्भवांश्चापि मानसानपि नाशयेत् ॥ ३० ॥
शीतज्वरैकाह्निकादीन् मोहं तन्द्रा भ्रमं क्लमाम्।
श्वासं कासञ्च पाण्डुञ्च हृद्रोगं हन्ति कामलाम् ॥ ३१॥
त्रिकपृष्ठकटीजानु पार्श्वशूलनिवारणम्।
शीताम्बुना पिबेद्धीमान् सर्वज्वरनिवृत्तये ॥ ३२ ॥

मोचरः। त्वक् वराङ्गकम इति लोके। चन्दनं श्वेतम्। पद्मकं काष्ठविशेषः। शालपर्णी पृश्निपर्णी कवरद्वयशब्दवाच्यम्। तगरं स्वनामख्यातम्। पटोलपत्रम्। जीवकर्षभकौ निजनाम्ना प्रसिद्धौ। पुण्डरीकं कमलम्। तालीशपत्रं प्रसिद्धम्। शेषं सुबोधम्। एतत् सकलं ज्ञात्वा गृहीत्वा चूर्णं कर्त्तव्यम्। कैरातो भूनिम्बः, तच्च समस्तचूर्णस्य द्वौ भागौ कैरातचूर्णस्य चैको भाग इति। केचित् सर्वचूर्णस्य चार्द्धांशमित्यनेन सर्वचूर्णस्यैको भाग भूनिम्बस्य भागैक इति व्याख्यानयन्ति। अपरे तु अर्द्धांशमित्यनेनार्द्धस्य अंशश्चतुर्थांशः, तेन समभिति व्याख्यानयन्ति च। अंशश्चतुर्थांश इति प्रसिद्धः एतेनाष्टमांशः कैरातमित्यर्थः। एतद्व्याख्यानद्वयमसङ्गतं कुतः? सर्वजनासम्मतत्वात्। दोषत्रयापहमिति—प्रकुपितदोषत्रयं, व्यक्तं समस्तं वा। निखिलानिति—अष्टधा। ननु पृथग्द्वन्द्वागन्तुजांश्चेति यत् पुनर्ग्रहणं कृतं, तत् व्यर्थं, निखिलानित्यनेनैव लभ्यन्ते? उच्यते—पौनरुक्त्यन्तु ज्वराणां यत् तदस्य ज्वरनाशनत्वे विशिष्टत्वं दर्शितम्, अत एव नात्र काऽपि विचारणेति यद्ग्रहणं कृतम्, यद्वा—सर्वज्वरेष्वस्य प्रायशः प्रचरति नान्येषु, तेन पुनर्ज्वरग्रहणं कृतं न दोषः। ऐकाह्निकादीनिति—आदिशब्दात् तृतीयकचातुर्थकादयः। शूलशब्दस्त्रिकादिकप्रत्येकमभिसम्बध्यते, तत्र

सुदर्शनं यथा चक्रं दानवानां विनाशनम्।
तद्वज्ज्वराणां सर्वेषामिदं चूर्णं प्रणाशनम्॥ २३॥

कासादौ त्रिफलादि।—

कासश्वासज्वरहरो त्रिफला पिप्पलीयुता।
चूर्णिता मधुना लीढा मेदिनी चाग्निबोधिनी॥ २४॥

कासादौ कटफलादि।—

कट्फलं मुस्तकं तिक्ता शटी शृङ्गी च पौष्करम्।
चूर्णमेषाञ्च मधुना शृङ्गबेररसेन वा॥ २५॥
लेह्यं ज्वरहरं कण्ठ्यं कासश्वासारुचीर्जयेत्।
वायुशूलं तथा कुक्षिं क्षयञ्चैव व्यपोहति॥ २६॥

कासादौ द्वितीयकटफलादि।—

कट्फलं पौष्करं शृङ्गी मुस्ता त्रिकटुकं शटी।
समस्तान्येकशो वाऽपि सूक्ष्मचूर्णानि कारयेत्॥

त्रिके वातस्थानम्। यथा सुदर्शनं विष्णुचक्रं दानववनाशनं भवति, तथा सर्वज्वराणां निहन्तृत्वेऽपि नाशनं, तस्मात् सुदर्शनम् इति उक्तम्॥ २२—२३॥

अथापराणि चूर्णान्याह कासेति।—अत्र त्रिफला समतुलिता ग्राह्या। पिप्पली तुल्येति—पिप्पली एकटङ्कभागापेक्षया। मधु अचावलेहयोग्यम्। चूर्णमानन्तु दोषबलापेक्षया। ३८॥

कट्फलादीति।—अत्र कट्फलादिसप्तकचूर्णगणः। तत्र तिक्ता कटरोहिणी। शृङ्गी कर्कटाख्या। पौष्करं पुष्करमूलं, तदभावे कुष्ठं ग्राह्यम्। शृङ्गबेररसेनेति—आर्द्रकरसेन चतुर्गुणेन सह पानमुक्तौ व्यवहारात्। न तु लक्षणम्। लेहनस्य मधुना द्विगुणेनेत्यर्थः। वायुशूलमिति—वातजनितशूलम्। एके "वायुशूलम्" इति पठन्ति, तत्र—गुदगतवातपीडामित्यर्थः। ननु वातादेव सकलशूलोपपत्तिरिति, अत "न वातेन विना शूलम्" इत्यादिवचनं, तत् कथमनेन पृथक् वातशूलग्रहणम्? उच्यते—वायुशूलं वातप्राधान्यशूलं, न पित्तकफादिप्राधान्यं, यस्मात् "शूलान्यष्टौ बुधा जगुः" (शा० पू० ७अ०) इति॥ ३५।३६॥

* ग्राह्यमेषम्।

आर्द्रकस्वरसक्षौद्रैर्लिह्यात् कफविनाशनम्।
शूलानिलारुचिच्छर्दि-कासश्वासक्षयापहम्॥)

कासादौ तृतीयकटफलादि।—

*(कटफलं पौष्करं कृष्णा शृङ्गी च मधुना सह।
श्वासकासज्वरहरः श्रेष्ठो लेहः कफान्तकृत्॥)

बालस्य कासादौ शृङ्गादि।—

शृङ्गीं प्रतिविषां कृष्णां चूर्णितां मधुना लिहेत्।
शिशोः कासज्वरच्छर्दि श्वान्त्ये वा केवलां विषाम्॥३७॥

बालस्य कासे यवक्षारादि।—

†(यवक्षारविषाशृङ्गी मागधीपौष्करोद्भवम्।
चूर्णं क्षौद्रयुतं लीढं पञ्चकासान् जयेच्छिशोः॥)

आमातीसारे शुण्ठ्यादि।—

शुण्ठीप्रतिविषाच्छिन्न मुस्ताकुटजचित्रकैः।
चूर्णमुष्णाम्बुना पीतमामातीसारनाशनम्॥ ३८॥

शृङ्गीमिति।—एतत् शृङ्गादिचूर्णं बालरोगेऽतीव प्रशस्तम्। शृङ्गी कर्कट ख्या। प्रतिविषा शुक्लकन्दा। कृष्णा पिप्पली। केवलेन योगान्तरमाह, केवलां विषामिति।—एकामतिविषां मधुना सहावलिह्य बालो ज्वरेभ्यो विमुक्त स्यादित्यर्थः। तथा च तन्त्रान्तरे—"शृङ्गी‡ सकृष्णाऽतिविषा विचूर्ण्य लेह विदध्यान्मधुना शिशूनाम्। कासज्वरच्छर्दिभिरर्दितानां समाधिकाञ्चातिविषामथैकाम्॥" इति। बालानामतीसारेऽपि मुस्तान्वितोऽयं योग प्रचरति। § चतुर्भुजीति तत्र चौद्रयुतमिति ग्रन्थान्तरात्। तथा हि—"धनकृष्णाऽकृष्णाशृङ्गी चूर्णं चौद्रेण संयुतम्। शिशोर्ज्वरातिसारघ्न कास श्वास वमि जयेत्॥" इति॥ ३७॥

अतीसारे शुण्ठ्यादिचूर्णमाह, शुण्ठीति।—छिन्न अत्र भर्जित देयम्। कुटज-

---

* प्रक्षिप्तोऽयम्।

† प्रक्षिप्तोऽयम्। चक्रदत्ते यवक्षारस्थाने धन्वयासयोगेनाय योगो दृश्यते, तथा च—"पौष्करातिविषाशृङ्गी-मागधीधन्वयासकैः" इत्यादि।

‡ "सकृष्णा" इत्यत्र "समुस्ता" इति पाठ चक्रसङ्ग्रहे।

§ योगोऽय चक्रसङ्ग्रहे "बालचातुर्भद्रिका" इति नाम्ना पठित।

आमातीसारे हरीतक्यादि।—

हरीतकी प्रतिविषा सिन्धु सौवर्चलं वचा।
हिङ्गु चेति कृतं चूर्णं पिबेदुष्णेन वारिणा॥
आमातीसारशमनं ग्राहि चाग्निप्रबोधनम्॥ ३९॥

अतीसारे स्वल्पगङ्गाधरचूर्णम्।—

मुस्तमिन्द्रयव बिल्वं लोध्रं मोचरसं तथा।
धातकीं चूर्णयेत्तक्र-गुडाभ्यां पाययेत् सुधीः॥४०॥
सर्वातीसारशमनं निरुणद्धि प्रवाहिकाम्।
लघुगङ्गाधरं नाम चूर्णं सद्ग्राहकं परम्॥ ४१॥

अतीसारे बृहद्गङ्गाधरचूर्णम्।—

मुस्तारलुकशुण्ठीभिर्धातकीलोध्रबालकैः।

मवेन्द्रयवं, पाचनत्वात्। उष्णाम्बुनेति—चतुर्गुणितोष्णपानीयेन सङ्गालोड्य त्रिदोषेण तु (१) फाण्टवद्विद्राव्य पिबेत्, चूर्णकल्पनाया कथितत्वात्॥ ३८॥

अपरमाह, हरीतकीति।—सिन्धु सैन्धवम्। हिङ्गु अत्र भर्जितं देयम्। पानमानन्तु पूर्ववत्। अत्र योगो गृहस्थानपि प्रशस्त। एके हरीतकीत्यागेनापि योगमन कुर्वन्ति, तदुक्तमत्रैव परिभाषाध्याये—"व्याधेरयुक्ते यद्दृष्ट्य वर्णोक्तमपि तत् त्यजेत्" (आ० पू० १ अ०) इत्यादिवचनात्॥ ३९॥

इदानी गङ्गाधरसज्ञक चूर्णद्वयमाह, मुस्तमित्यादि।—एतल्लघुगङ्गाधर नाम चूर्णं सद्ग्राहक पर विख्यातम्। अत्र बिल्व बिल्वपेशिका। मोचरस शाल्मलीनिर्यासः। धातकी धातकीकुसुमानि। अत्र तक्रोपलक्षितत्वात् मथितमपि ग्राह्यम्, अन्यतो दर्शनाद्वा "मथितगुडसम्मयुक्तम्" इति। ननु मथिततक्रयो को भेद? उच्यते, * "सजल गोरस घोल मस्तु तच्चार्द्धवारिकम्। तक्र विभागभिन्नन्तु केवल मथित घृतम्॥" इति। कल्पना चास्य—मुस्तादिचूर्णं कार्षिक मथिततुर्यांशेन गुडकर्षेण च सह विमर्दित पीतम्। पक्वातीसारे योगोऽयम्॥ ४०।४१॥

---

* भावप्रकाशे—"समर निर्जल घोल मथितस्वसमरोदकम्। तक्र पादजल प्रोक्तमुदश्चित्स्वर्द्धवारिकम्॥" इति, तथा सुश्रुते "सत्यनादिपृथग्भूतस्नेहसर्दीदकन्तु यत्। नातिसान्द्रद्रव तक्र स्वाद्वम्ल तुवर रसे। यत्तु सस्नेहमजल मथित घोल-मुच्यते॥" इति पाठ.।

विल्वमोचरसाभ्याञ्च पाठेन्द्रयववत्सकैः ॥४२॥
आम्रबीजं प्रतिविषा लज्जालुरिति चूर्णितम् ।
क्षौद्रतण्डुलपानीये. पीतैर्याति प्रवाहिका ॥ ४३ ॥
सर्वातिसारग्रहणी प्रशमं याति वेगत. ।
हृद्गङ्गाधरं चूर्णं सरिद्वेगस्य रोधकम् ॥४४॥

अतीसारे अजमोदादिचूर्णम् ।—

अजमोदा मोचरसं मसृङ्गबेरं मधातकीकुसुमम् ।
गोदधिमथितयुक्तं गङ्गामपि वाहिनी रुन्ध्यात् ॥४५॥

ग्रहण्या मरिचादिचूर्णम् ।—

तक्रेण य. पिबेन्नित्य चूर्णं मरिचसम्भवम् ।
चित्रसौवर्चलोपेतं ग्रहणी तस्य नश्यति ॥
उदरप्लीहमन्दाग्नि-गुल्मार्शोनाशनं भवेत् ॥४६॥

ग्रहण्या कपित्थाष्टकचूर्णम् ।—

अष्टौ भागा. कपित्थस्य षड्भागा शर्करा मता ।
दाडिम तिन्तिडीकञ्च श्रीफल धातकी तथा ॥ ४७ ॥
अजमोदा पिप्पली च प्रत्येक स्यात्त्रिभागिका: ।
मरिच जीरक धान्य ग्रन्थिक बालक तथा ॥ ४८ ॥

अथदपि, मुस्तेति ।—अवारलुकी ह्यचविशेष स्वनामप्रसिद्ध । वत्सक कुटजस्त्वक् । आम्रबीजानाम—आम्रफलास्थिमज्जा । लज्जालुरिख्याता । अवापि रूपकेण तेन क्षौद्रस्य विंशस्य चतुर्गुणेन तण्डुलजलेन पेयम् । सरिद्वेगस्य रोधकम् ।—नदीप्रवाहवेरोधकत्वेनोत्कृष्टप्रभावयुक्तम्, अत एव गङ्गाधरसंज्ञा ॥ ४२—४५ ॥

अथ ग्रहण्या प्रयोगानाह तक्रेणेति ।—इदं मरिचाद्य नाम चूर्णं ४६ तमं प्रशस्तम् । मारीचचित्रकसौवर्चल समचूर्णं साद्धभागद्वय चतुर्गुणेन तक्रेण सह पिबत् । नित्यानत्यनेन सेव्यमिद सङ्ग्रहणीगोपयुक्तत्वात् ॥ ४६ ॥

इदानीं कपित्थाष्टक नाम चूर्णं दर्शयन्नाह, अष्टावित्यादि ।—दाडिमस्य बालानि "अनारदाना" शब्दवाच्यम । तिन्तिडीक स्वनामप्रसिद्धम । अस्यफलस्य मज्जा ।

---

* चक्रपाणिस्तु, 'अजमोदा' स्थाने 'तिन्दुकम्' इति पठति ।

सौवर्चलं यमानी च चातुर्जातं सचित्रकम्।
नागरञ्चैकभागाः स्युः प्रत्येकं सूक्ष्मचूर्णितम् ॥ ४८ ॥
कपित्थाष्टकसञ्ज्ञं स्याच्चूर्णमेतल्लघामयान्।
अतीसार क्षय गुल्म ग्रहणीञ्च व्यपोहति ॥ ५० ॥

अथ चातौ दाडिमाष्टकम्।—

दाडिमो द्विपला ग्राह्या खण्डात् दशपलानि च।
त्रिगन्धस्य पलञ्चैक त्रिकटु स्यात् पलत्रयम् ॥ ५१ ॥
एतदेकीकृत सर्वं चूर्णं स्यात् दाडिमाष्टकम्।
रुचिक्लद्दीपन कण्ठ्य ग्राहि कामज्वरापहम् ॥५२॥

श्रीफलं विल्वम्। अथापि तिन्तिडीकस्थाने वृक्षाम्लमिति, यत्रिकस्थाने च तिन्तिडीकमिति केचित्। चातुर्जातमिति—त्वक्पत्रैल सकेशरामित्यर्थ। कपित्थ-त्रिष्वापि कपित्थफलमष्टभागिकमेकद्रव्यभागापेक्षया, द्रव्यन्तु एकभागसञ्ज्ञितम् (१)। शर्करा षड्भागा, दाडिमादीनि पिप्पलीपर्यन्तानि प्रत्येक त्रिभागिक, मरिचादि-नागरान्त भागैक प्रत्येकमिति भाव। एतत् किमुक्तम्? कपित्थ कषाष्टक, सिता षट्कर्षप्रमिता, दाडिमादिषट्द्रव्यमष्टादशकर्षमित, मरिचादित्रयोदशद्रव्य त्रयो-दशकर्षमित्यर्थ। अस्य षाडवसञ्ज्ञा तत्कारैः कृत? "लवणाम्लसिताधुक्त चूर्णं स्यात् षाडव मतम्" इत्यादिवचनात्। कापित्थाष्टकसञ्ज्ञाञ्च रूढि ॥ ४७—५० ॥

दाडिमेति।—अथ लघुत्वमेतेन दाडिमाष्टकसञ्ज्ञकी योगोऽतीसारादीना प्रशस्त। खण्डाद्दशपलानीति—साम्यालितचूर्णात् पलद्वयकृता द्विगुणा शर्करा क्षेया-ऽतीक्ष्णत्वात्। त्रिगन्धस्य पलमेक मिलितस्येत्यर्थ। दूषणस्यापि पलत्रय प्रत्येक पलमित्यर्थ। 'खण्डाद्दशपलानि च" इत्यत्र स्थाने 'खण्डाद्दष्टपलानि च" इति केचित् पठन्ति, तन्मत चूर्णस्य खण्डाभवि व्याधिविहितत्वात्, अथ पक्ष प्रचरति। साम्यार्थं त्रिगन्धस्य प्रत्येक पल ग्राह्यम्। * दाडिमाष्टकमिति—अष्टस द्रव्यसव दाडिम, तेन दाडिमाष्टक प्रोक्तम ॥ ५१।५२ ॥

---

* दाडिमादीनि अष्टौ द्रव्याणि अत्र विद्यन्ते, तेनवास्य दाडिमाष्टकसञ्ज्ञा, गूढार्थदीपिकाकारोऽपि इत्थमेव व्याख्या इच्छति, यथा—"दाडिमादीनि अष्टौ द्रव्याणि यत्र तत् दाडिमाष्टकम्" इति।

अतीसारादौ लघुदाडिमाष्टकम्।—

दाडिमस्य पलान्यष्टौ शर्कराया पलाष्टकम्।
पिप्पली पिप्पलीमूल यमानी मरिचं तथा ॥ ५३ ॥
धान्यक जीरक शुण्ठी प्रत्येक पलसम्मितम्।
कर्षमात्रा तुगाक्षीरी त्वक्पत्रैलाश्च केशरम् ॥५४॥
प्रत्येक कोलमात्रा. स्युस्तच्चूर्णं दाडिमाष्टकम्।
अतीसार क्षय गुल्म ग्रहणीञ्च गलग्रहम् ॥
मन्दाग्नि पीनस कास चूर्णमेतद्व्यपोहति ॥ ५५ ॥

वातग्रहण्या पिप्पल्यादिचूर्णम्।—

* (पिप्पली लघुतो व्याघ्री यवक्षारकलिङ्गकाः।
चित्रकं सारिवा पाठा शटी लवणपञ्चकम् ॥
तच्चूर्णं पाययेद्धीमा सुरयोष्णाम्बुनाऽपि वा।
मारुतग्रहणीदोष-शमन परम हितम् ॥)

अरोचकादौ लवङ्गादिचूर्णम्।—

लवङ्ग शुद्धकर्पूरमेलात्वङ्नागकेशरम्।
जातीफलमजाजीञ्च नागर कृष्णजीरकम् ॥५६॥

द्वितीय दाडिमाष्टकमाह, दाडिमस्येति।—एतद्दाडिमाष्टकस्य चूर्णमतीसारादीन् हन्ति। अथ तुगाक्षीरी वाशी, तदभावे तक्षीर याह्यम्, तक्षीरं कर्षैरत्र प्रकार, सा कर्षप्रमाणा। त्वक् वराङ्गम्। पत्र पत्रकम्। एला † सूक्ष्मैला। केशर नागकेशरम्, एतच्चतुष्टय ‡ कोलमात्रम्, कोल कर्षार्द्ध, तेन सम्मिलित टङ्काष्टकमित्यर्थ। शेष सुगमम्। गलग्रह गलरोगम्। अस्याष्टकस्य पलाष्टकेन योज्या, न तु द्रव्यसङ्ख्यया ॥५३—५५॥

अथ लवङ्गाद्य चूर्णं दशयन्नाह, लवङ्गमिति।—शुद्धकर्पूरमिति—शुद्धञ्च तत्

* प्रक्षिप्तोऽयम्।

† एला स्थूलैला इत्यत्र सर्वत्र प्रचरति न तु सूक्ष्मैला।

‡ "चातुर्जातं द्विकाधिकम्" इति चक्रपाठव्याख्यायां "द्विकाधिकमिति प्रत्येकं निर्देशस्य द्रव्यप्राधान्यात्" इति शिवदासः। तत्रार्थ दाडिमाष्टक इति ज्ञेयम्।

कृष्णागुरुस्तुगाक्षीरी मासौ नीलोत्पलं कणा।
चन्दनं तगरं बालं कक्कोलश्चेति चूर्णयेत् ॥५७॥
समभागानि सर्वाणि सर्वेभ्योऽर्द्धा सिता भवेत्।
लवङ्गाद्यमिदं चूर्णं राजार्हं वह्निदीपनम् ॥५८॥
* रोपणं तर्पणं हृद्यं त्रिदोषघ्नं बलप्रदम्।
हृद्रोगं कण्ठरोगञ्च कासं हिक्काञ्च पीनसम् ॥ ५९ ॥

कर्पूरश्चेति पक्वकर्पूरनिषेधः अतिलघुत्वात् तथा हि—"पक्वन्तु द्विविधं प्रोक्तं, सदलं निर्दलन्तथा। दृढस्य पीतवर्णस्य विशेषाल्लघुता गतं ॥" इति। केचित्तु गुडशब्देन नात्यत्कृष्टं गृह्णन्ति, तच्च दृग्वास इति साधुतमं, तथा चोक्तम्—"दृग्वासो हिमसङ्काशं पीताभयं इति त्रिधा। अपक्वे कथ्यते भेदः कर्पूरे तु भिषग्वरैः ॥" स्वरूपेणापि—"दृग्वासो सुभ्र श्वेतं हिमसङ्काशन्तु पाण्डुरं। श्वेतं पीताभयस्य—" इति। सर्वे गुणेनापि 'रसवीर्याविपाकतः। प्रभावेणापि ते प्रोक्ता पूर्वं पूर्वं गुणाधिकाः ॥" प्रकृष्टत्वेनापि—"तत्रापि श्रीनं च चुद्र स्फटिकाभं स उत्तमं" इति। कृष्णगौरकमिति पाश्चात्य खुरासानीति लोके। कृष्णागुरु अगुरिति प्रसिद्धम्। तुगाक्षीरी वाप्यौ। मासौ जटाख्यौ। नीलोत्पलोत्पलचितत्वात् पद्मबीजं यावत्यम् (?)। कणा पिप्पली। चन्दनं श्वेतम्। तगरं खनामख्यातम्। बालं वालकम्। कक्कोलफलद्वयं निजनामप्रसिद्धं, तच्च द्विविधं मरिचकक्कोलं गौरकक्कोलञ्चेति। एतत् सकलद्रव्यं समभागं चूर्णयितव्यं, सर्वेभ्यः सिताऽर्द्धा भवेत्, † तत् सकलचूर्णस्य भागकं, सिताया भागैकं चूर्णसमानां सितेत्यर्थः। एकं सिताऽर्द्धा भवेदित्यनेन कथितसकलचूर्णस्य द्वौ भागौ सिताया एको भाग इति व्याख्यानयन्ति, एतदसङ्गतं व्यवहारात्। राजार्हमिति—प्रभुयोग्यम्, अतिगुणत्वात् बहुलगुणकरत्वाच्च। रोपणं शरीरस्थिरकरं व्रणरोपणञ्च। तर्पणं धातूनां तोषणकरम्। हृद्यं शुक्रहृद्विकारि। बलम्

* रोपणम्" इत्यत्र 'रोचनम्' इति पाठो युक्तः, लवङ्गादिचूर्णं व्रणरोपणशक्त्यभावात्, तत्सान्निध्यात् "मुरोचनम्" इति पाठदर्शनाच्च।

† यद्यपि सर्वशब्दः समाहारवाची, तथाऽपि वैद्यक "सर्वेभ्योऽर्द्धा" इत्यादि प्रयोगस्थले समाहारबोधकत्वनार्द्धशब्दः कैश्चित् टीकाकारैर्न व्याख्यातः। "सर्वतुल्या" "सर्वसमा" इत्यादि प्रयोगे च तादृशी व्याख्या दृश्यते। यथादृष्टे "सितार्द्धभाग" तथा गुडूच्यर्जुनादीनि सप्तानि इति च पाठो दृश्यते।

यच्छ्वास तमकं श्वासमतीसारमुरःक्षतम् ।
प्रमेहारुचिगुल्मादीन् ग्रहणीमपि नाशयेत् ॥ ६० ॥

ग्रहण्या जातीफलादिचूर्णम् ।—

जातीफललवङ्गैला-पत्रत्वङ्नागकेशरैः ।
कर्पूरचन्दनतिलैस्त्वक्क्षीरीतगरामलैः ॥ ६१ ॥
तालीशपिप्पलीपथ्या-स्थूलजीरकचित्रकैः ।
शुण्ठीविडङ्गमरिचै. ममभागविचूर्णितैः ॥ ६२ ॥
यावन्त्येतानि सर्वाणि कुर्य्यात् भङ्गाच्च तावतीम् ।
सर्वचूर्णसमा देया शर्करा च भिषग्वरै. ॥ ६३ ॥
कर्षमात्रं ततः खादेन्मधुना प्लावित सुधी. ।
अस्य प्रभावात् ग्रहणी-कामश्वासारुचिक्षया: ॥
वातश्लेष्मप्रतिश्याया: प्रशमं यान्ति वेगत: ॥६४॥

जीरकत्प्रदर्शनार्थं । तमक श्वासभेद । उरःक्षत क्षयरोगे पठितम् । अस्यार्थे कर्पूराद्य नाम चूर्णं कोचित पठन्ति, तच्च बहुपुस्तकेषु न दृश्यते, चेपकोऽयम इति मत्वास्माभिर्न लिखित । कर्पूरात् परिलिखित,—"सकर्पूरच कक्कोल जातीफलदल समम् । लवङ्गनागमरिच क्षणाशुण्ठीविवाङ्गतम् ॥ चूर्णं सितासम ग्राह्य रोचन चन्द्रकासनत् । वेल्वयस्थानगुणाश्च कण्ठास्यमयभयापहम् ॥ प्रयुक्तमन्नपानेषु भिषजा रोगिणां हितम् ॥" इति कर्पूराद्य चूर्णम् । अथ लघु-लवङ्गादिचूर्ण तन्त्रान्तरे—"लवङ्गजातीफलपिप्पलीना भागान् प्रकल्प्याच्चसमान्समीक्ष्याम् । पलार्द्धमेक मरिचस्य दद्यात् पलानि चत्वारि महौषधस्य ॥ सितासम चूर्णमिद प्रयुक्त रोगानिमानाशु बलान्निहन्ति । कासज्वरारोचकगुल्मसेद श्वासाग्नि मान्द्यग्रहणीविकारान् ॥" इति । लघुलवङ्गादिचूर्णम् ॥ ५६—६० ॥

इदानी जातीफलाद्य नाम चूर्णं दर्शयन्नाह, जातीफलेति।—अत्र चन्दनं श्वेत, चूर्णत्वात् । तिलैरिति—क्ष्वेडितिलानि निस्तुषाणि ग्राह्याणि । त्वक्क्षीरी वाशी । तगर प्रसिद्धम् । आमलसामलकफलम । पथ्या हरीतकी । स्थूलजीरक कृष्ण जीरक., एतत सकल समभाग गृहीत्वा चूर्णितम । अस्य भागसमेक भङ्गाया भागेक

~~सकलसमशर्करचूर्णनाम्ना~~ पठितोऽय योग. कासे ।

अथ चूर्णादौ महाषाडवम्।—

मरिचं नागपुष्पाणि तालीशं लवणानि च।
प्रत्येकमेकभागाः स्युः पिप्पलीमूलचित्रकैः॥ ६५॥
त्वक् कणा तिन्तिडीकञ्च जीरकञ्च द्विभागिकम्।
धान्याम्लवेतसौ विश्वं भद्रैला बदराणि च॥६६॥
अजमोदा जलधरः प्रत्येकं स्यस्त्रिभागिकाः।
सर्वौषधिचतुर्थांशं दाडिमस्य फलं भवेत्॥ ६७॥
द्रव्येभ्यो निखिलेभ्यश्च सिता देयाऽर्द्धमात्रया।
महाषाडवसञ्ज्ञः स्याच्चूर्णमेतत् सुरोचनम्॥६८॥
अग्निदीप्तिकरं हृद्यं कासातीसारनाशनम्।
हृद्रोगकण्ठजठर-मुखरोगप्रणाशनम्॥ ६९॥

मिति, तेन सकलचूर्णसमाना भङ्गा देया इति। भङ्गाऽत्र भर्जिता देया, व्यवहारात्। सर्वचूर्णसमा देया शर्करा चेति—तेन इयौ साम्या शर्करेत्यर्थः। एतत् सिद्धं यथोचितमात्रं मधुना प्राश्य भक्ष्यं, नाव कर्षमात्रं नियतं, यतः,—"मात्राया मात्यवच्छानम्" इत्यादिवचनात्॥ ६१—६४॥

अथ महाषाडवसञ्ज्ञकं चूर्णमाह, मरिचमिति।—नागपुष्पाणीति—नागकेशरम्। लवणानीति बहुवचनत्वेन पञ्चलवणं ग्राह्यं, तच्च—"सिन्धु सौवर्चलञ्चैव विड सामुद्रक गडम" इति। अत्रास्मन्मते आद्ये लवणानीत्यनेन सैन्धवमेव ग्राह्यं नान्यत्, स्वभावात्मुक्तत्वेन बहुवचनायोगात्। त्वक् तज्जशब्दवाच्यम्। अत्र मरिचादिलवणान्त प्रत्येक टङ्कम्। पिप्पलीमूलादिजीरकान्त प्रत्येक टङ्कद्वितयम्। अम्लवेतस स्वनामप्रसिद्धम्। विश्व शुण्ठी। भद्रैला बृहदेला। बदराणि बदरफलानि। अजमोदाऽत्र यमानी एव सर्वत्रान्त परिमार्जने, वह्नि परिमार्जने तु अजमोदा अजमोदैव, तथा हि—"अन्त सम्मार्जने प्रायः खाजमोदा यमानिका। वह्नि सम्मार्जने योज्या खजमोदैव निश्चितम्॥" इति। यवानमोदायमान्यौ तु, तत्र यमान्येव द्विगुणा अन्त परिमार्जने। जलधरो मुस्तम्। धान्यादिजलधरान्त प्रत्येक टङ्कत्रयमिति। एतत्सकलचूर्णस्य चतुर्थांशं दाडिमफल, तेन नागाधिकदशटङ्कमितमित्यर्थः। दाडिमफलमत्राम्ल, यद्भावे "अनारदाना"

विसूचिका तथाऽऽध्मानमर्शोगुल्मक्रमीनपि।
कृमिं पञ्चविधा श्वास चूर्णमेतद्व्यपोहति ॥ ७० ॥

उदरादौ नारायणचूर्णम्।—

चित्रकं त्रिफला व्योषं जोरकं हुवुषा वचा।
यमानी पिप्पलीमूल शतपुष्पाऽजगन्धिका ॥ ७१ ॥
अजमोटा शटी धान्य विडङ्ग स्थूलजोरकम्।
हैमाह्वा पौष्कर मूल चारो लवणपञ्चकम् ॥ ७२ ॥

शब्दवाच्य, षाडवत्वात्। समस्तद्रव्येभ्य सिता शर्करा षडभागिका देया * तेन सकलचूर्णसाम्यमित्यर्थ, सकलचूर्णसाम्य कियत्प्रमाणम ? † टङ्काधिककुडवमानमिति भाव महाषाडवमिति "लवणाम्लसितायुक्त षाडव परिकीर्त्तित" इति पाठान्तरम् इति। ननु "चूर्णे गुड समो देय शर्करा द्विगुणा भवेत" (शार्ङ्ग० मध्य० ६अ०) इति नियमेन कथमत्र चूर्णसमतुलिता सिता ? उच्यते—अयमपि योगोऽग्निमान्द्ये प्रधानतम, अग्निसादो हि प्रायेण श्लेष्माधिक्यात, श्लेष्मणि च मधुरो बहुतरो न युक्त इत्यदोष। यद्वा—द्विगुणमानमनुकेषु उक्तेषु तु "यदुक्त तत्तदेव च" इति ॥ ६५—७० ॥

इदानी नारायणचूर्ण प्रकटयन्नाह चित्रकमिति।—त्रिफला हरीतक्यादिकम्। व्योष त्रिकटुकम्। हुवुषेति स्वनामत प्रसिद्धा, केचित्तु 'हुव' शब्दवाच्य

अत्रापि अर्द्धशब्दस्य समाप्त्यर्थकत्व न वैद्यमनोरमम्, एतत्तु प्रागेव प्रदर्शितम्।

सकलचूर्णसाम्य टङ्काधिककुडवमानमिति पाठ मुद्राक्षरप्रमादविजृम्भित टीकाकारप्रमादविजृम्भितो वा इति मन्ये, यत क्वरिचादिजलधरान्ते द्रव्ये टङ्कपरिमिते मिलित्वा एकचत्वारिंशत टङ्का भवन्ति, चतुर्थांशेन सपादशतटङ्केन डाडिमफलीन स्वटं मिलित्वा पुन सपादैकपञ्चाशट्टङ्का जायन्ते एवञ्च तत्समानाया शर्करायाः, नानमपि सपादैकपञ्चाशट्टङ्का एव। टङ्कस्तु माषापरपर्याय, स च तोलकार्द्ध, ततश्च सपादैकपञ्चाशट्टङ्के माषकाधिक सार्द्धपञ्चाक्षप्रमितौलक जायते, टङ्काधिक कुडवेन तु सार्द्धद्वात्रिंशत्तोलक भवति। वस्तुतस्तु सर्वद्रव्येभ्य अर्द्धमात्राया, शर्करायाः सार्द्धषण्माषकाधिक द्वादशतोलक मान भवतीति सुधीभिर्द्रष्टव्यम्।

कुष्ठश्चेति समाख्याने विशाला व्याह्विभागिका।
त्रिह्वह्विभागा विज्ञेया दन्त्या भागत्रयं भवेत् ॥ ७३ ॥
चतुर्भागा सातला स्यात् सर्वाण्येकत्र चूर्णयेत्।
पाचनस्नेहनाद्यैश्च स्निग्धकोष्ठस्य रोगिणः ॥ ७४ ॥
दद्याच्चूर्णं विरेकाय सर्वरोगप्रणाशनम्।
हृद्रोगे पाण्डुरोगे च कासे श्वासे भगन्दरे ॥ ७५ ॥
मन्दाग्नौ च ज्वरे कुष्ठे ग्रहण्याञ्च गलग्रहे।
दद्यादृयुक्तानुपानेन तथाऽऽध्माने सुरादिभिः ॥ ७६ ॥
गुल्मे बदरनीरेण विड्भेदे दधिमस्तुना।
उष्णाम्बुभिरजीर्णे च हृच्छूले: परिकर्त्तिषु ॥ ७७ ॥

दन्ति। अजगन्धिका चेत्यन्ये, वनयमानी वा, वनतुलसीति केचित्; अजमोदाऽत्र अल्प परिमाणत्वात् यमानी, तेन यमान्या भागद्वयम्। चारावितिं—द्वौ चारौ, तेन यवक्षारद्वयेति। लवणपञ्चक प्रसिद्धम्। एतत् सर्वं समाश्रमिति। विशालेन्द्रवारुणी, सा द्विभागिका एकद्रव्यभागापेक्षया। त्रिह्वह्विभागा त्रयाणि दन्ती च प्रसिद्धा, तस्या भागत्रय द्रव्यैकभागादाय बोद्धव्यम्। सातला चर्मकषा, लोके सेहुण्डभेद इति, त्रिसटेनापि यवतिक्तकशब्देन लिखित सा च द्रव्यैकभागापेक्षया चतुर्भागा। पाचनस्नेहनाद्यैरिति—पाचन दोषाणा पाचन व्याधिविहित, स्नेहन स्नेहपानादिकम्, आदिशब्दात् स्नेहादिकञ्च, एतेन कृतपूर्वं पाचनाद्यै कृत्वा स्निग्धकोष्ठस्य रोगिण एतच्चूर्ण विरेकाय दद्यादित्यर्थ तथा हि—"वातोदरं बलवत पूर्वं स्नेहैरुपाचरेत्। स्निग्धाय स्वेदिताङ्गाय दद्यात् स्नेहविरेचनम्॥" (च० चि० उदर०) इति। नन्विह "विवर्जयेत् स्नेहपानमजीर्णे चोदरी ज्वरी" (सु० चि० ३१अ०) इति वचनात् स्नेहो निषिद्ध, "नेने स्नेहा नोदरी नातिसारी" इत्यनेन स्नेहस्यापि निषेध कृत', तत् कथ स्नेहस्नेदोपदेश? उच्यते—अतत्र्यो स्नेहस्नेदयोर्निषेधो बोद्धव्य, न तु औषधाङ्गभूतयोर्ग्रहो, अन्यथा दीपद्वरणस्य टङ्कत्वात्। दद्यात् युक्तानुपानेनेति—युक्तानुपानमेव कथ्यते, तद्यथा—आध्माने सुरादिभिरिति, आदिग्रहणादासवारिष्टसीधुमाध्वीकादिभि। गुल्मे बदरनीरेणेति—बदरक्वाथेनेत्यर्थ। विड्भेदे दधिमस्तुनेति—दधि च मस्तु च, यद्वा—दध्नो मस्तु नानाजातिक, यत' मस्तु

उष्ट्रीदुग्धेनोदरेषु तथा तक्रेण वा गवाम्।
प्रसन्नया वातरोगे दाडिमाम्बुभिरर्शसि ॥ ७८ ॥
द्विविधे च विषे दद्यात् घृतेन विषनाशनम्।
चूर्णं नारायण नाम दुष्टरोगगणापहम् ॥ ७९ ॥

सप्तविध भवेत्, तद्यथा—"स्वादुम्लमत्यम्लकमन्दजात तथा * घृतचीरभव सरम्। असारमेव दधि सप्तधाऽमिन् वर्गे स्मृता मस्तुगुणास्तथैव ॥" (सु० सू० ४५अ०) इति। प्रसङ्गतोऽस्यार्थ प्रकटयन्नाह, स्वादुम्लमित्यादि।—स्वादु दधि, अम्ल दधि, अत्यम्ल दधि, सरजातम् अत्यम्ल दधि (?) मन्दजात दधि एभ्यो जातमित्यर्थ, तथा घृतचीरभवमिति—विनष्टदुग्धजातम्। † सर इति—दग्ध उपरि घनो भाग स्नेहबहुल सर इति प्रसिद्ध। असार साररहितम्, उद्धृतस्नेहस्य दध्नो विनिर्मितमित्यर्थ, इति सप्तविध मस्तु दर्शितम्। अन्ये कूर्चिका दधितक्र-भेदेन मस्तु द्विविधमिति पठन्ति। उष्णाम्बुभि सह पेयमिति व्यवहार, उष्णाम्बुभिरिति बहुवचनत्वेनाष्टसाग्रावशेषादिक ग्राह्य, तच्च यथादोषानुरूपमिति योज्यम्। हृच्चाक्षेत्रि—अस्य क्रोधनेत्यर्थ। परिकर्त्तिकेति—गुदे प्रति कर्त्तनमिव वेदनाद्वद्विरिति परिकर्त्तिका कथ्यते। उष्ट्रीदुग्धेन गवा तक्रेण वा उदरेषु इति—सर्वोदरेष्वित्यर्थ। प्रसन्नया वातरोगे इति—प्रसन्ना सुरामण्ड एवेह, तथा चोक्त—"प्रसन्ना स्यात् सुरामण्ड तस्मात् कादम्बरी घना। जगल-स्तदध प्रोक्तो जगलान्मेदको घन ॥ वक्षसो हृतसार स्यात सुराबीजन्तु किण्वकम ॥" इति। गुणेनापि प्रसन्नामाह—"गुल्मार्शस्कुष्ठयोनिरोचकवातनुत्" इति। "प्रसन्नया वातरोगे" इत्यत्र "राज्ञया वातरोगेषु" इति वा पाठ, तत्र राज्ञाक्षीरेण सहेत्यर्थ। दाडिमाम्बुभिरर्शसीति—दाडिमफलस्वरसै क्वथितफलैरमैर्वा। द्विविधे च विषे इति—स्थावरजङ्गमात्मके। विषान्वितायामुक्त नारायणसज्ञ यद्वा—विष्णुवीर्य्यतुल्यत्वात नारायणसज्ञ, यथा विष्णुतेजसा दैत्यगणा पलायन्ते तथैवास्य प्रभावेण दुष्टा रोगगणा नश्यन्तीति तात्पर्य्यार्थ ॥ ७१—७९ ॥

* सुश्रुते "घृतचीरभवम्" इति पाठ।

† सरजात मस्तु इति तु न सङ्गच्छते, यत दधिनि क्षत जल मस्तु, सरात् जलन निर्गच्छतीति। दग्धस्य सरजातदध्नो मस्तु इति तु भवितुमर्हति।

अजीर्णादौ हवुषादि चूर्णम्।—

हवुषा त्रिफला चैव तायमाणा च पिप्पली।
हैमचोरी त्रिवृच्चैव मातुला कटुका वचा॥ ८०॥
नीलिनी सैन्धवं कृष्णं लवणञ्चेति चूर्णयेत्।
कपोतकेन जूषेण दाडिमद्विगुणारसे॥ ८१॥
तथा मासरसेनापि यथायोग्यं विदेन्नरः।
भक्षणं प्रोक्ष्य गुल्मेषु प्लीहार्शोविषमाग्निषु॥
हलीमकामलापाण्डु कुष्ठाध्मानोदरेष्वपि॥ ८२॥

शूलादौ पञ्चसम चूर्णम्।—

शुण्ठी हरीतकी क्षारा त्रिवृत् क्षीरबला तथा।
समभागानि सर्वाणि सूक्ष्मचूर्णानि कारयेत्॥ ८३॥
ह्येतं पञ्चसम चूर्णमेतच्छूलहरं परम्।
आध्मानजठरार्शोघ्नमामवातहरं स्मृतम्॥ ८४॥

आध्मानादौ वाराहचूर्णम्।—

कर्षमात्रा भवेत् कृष्णा त्रिवृता स्यात् पलोन्मिता।
खण्डात् पलञ्च विज्ञेयं चूर्णमेकत्र कारयेत्॥ ८५॥

अथ हवुषादि चूर्ण दर्शयन्नाह, हवुषेति।—हवुषा खनामख्याता, सा च क्षुपविशेषः। तायमाणा लोकत प्रसिद्धा। हैमचोरी स्वर्णचोरी, कट्वङ्गभेद इत्यर्थः, चोक्ष इति लोके। वृहन्निघण्टे। मातुला सेहुण्डभेदः। कृष्णवर्ण सौवर्चलं, सौवर्चलसमलवणत्वात् वा इत्यन्ये, यदुक्तं—"न कालवणे गन्ध सौवर्चलसमो गुणे" (च० सू० अन्नपान०) इति। सूपेयेति—सौपूर्वेण प्रेषणात्। दाडिमविगुणारसेरिति—क्षिपेत्। मासरस पलेङ्गशब्दवाच्यः। यथायोग्यमिति आत्मनः। विषमाग्नियुक्तेति—विषमतीक्ष्णमन्दादिदोषाः। हलीमं हलीमकम्॥ ८०—८२॥

आध्मानादौ पञ्चसमचूर्णं दर्शयन्नाह, शुण्ठीति।—अथ क्षारा पिप्पली। वृहन्निघण्टे अथ सुबोधम्॥ ८३।८४॥

कर्षोन्मितं लिहेदेतत् क्षौद्रेणाक्षाननाशनम्।
गाढविट्कोदरकफान् पित्तं हन्ति च नाशयेत् ॥८६॥

यकृच्छूलादौ लवणवितयाद्य चूर्णम्।—

लवणवितय क्षारौ शतपुष्पाद्वयं वचा।
अजमोदाऽजगन्धा च हपुषा जीरकद्वयम् ॥ ८७ ॥
मरिचं पिप्पलीमूलं पिप्पली गजपिप्पली।
हिङ्गु च हिङ्गुपत्री च शटी पाठोपकुञ्चिका ॥ ८८ ॥
शुण्ठी चित्रकचव्यानि विडङ्गाम्लवेतसम्।
दाडिमं तिन्तिडीकं च त्रिवृद्दन्ती शतावरी ॥ ८९ ॥
इन्द्रवारुणिका भार्गी देवदारु यमानिका।
कुस्तुम्बुरुणि पौष्करं बदराणि च ॥ ९० ॥
शिवा चेति समांशानि चूर्णमेकत्र कारयेत्।
भावयेदार्द्रकरसैर्बीजपूररसैस्तथा ॥ ९१ ॥

इदानीं नाराचक नाम चूर्णं विवर्णयन्नाह, कर्षमात्रमिति।—कर्षोन्मितमिति लक्षणार्थम्। क्षौद्रेण यावता अवलेह्यं स्यात तावन्मात्रम्। एतच्च प्रातरेव भक्ष्यं विरेकार्थत्वात्, तथा चाह—'खण्डपल त्रिवृतासमकट्फलाकर्षचूर्णित श्लक्ष्णम्। प्राग्भोजने च मधुना विडालपदकं लिहेत् प्राज्ञ॥" इति। गाढविट्कमातवह-पुरीषमिति ॥ ८५ ८६ ॥

अथ विलवणाद्य चूर्णं दशयन्नाह, लवणवितयमिति।—अथ विलवणाद्यो योगयुर्णसज्ञक। अत्र विलवणप्रधानत्वमौद्भिलाद्यवडमत्रम्। क्षारावितिं—द्वौ क्षारौ, तेन स्वर्जिकाक्षारौ यवक्षारश्च। शतपुष्पाद्वयमिति—लघुस्थूलभेदेन, एका "सौंफ" इति प्रसिद्धा, अपरा "मौवा" शब्दवाच्या। अजगन्धा वर्बरिका। हपुषा जिजनामख्याता। जीरकद्वयमिति—पीतकृष्णभेदेन प्रतीतम्। हिङ्गुपत्री विटप विशेष, तस्या अपि हिङ्गुगन्धसदृशानि सन्ति सा त्रिविधा, एका चारुणपत्रिका ज्ञेया, अपरा वेणुपत्रिका हिङ्गुलफला। उपकुञ्चिका जीरकभेद, "कारीजी" शब्दवाच्य। कुस्तुम्बुरु धान्यकम्। तुम्बरु स्वनामख्यातम्। पौष्करं कुष्ठम्। बदराणि बदरफलानि। शिवा हरीतकी। शेषं सुबोधम्। एतत्

तत् पिबेत् सर्पिषा जीर्णे मद्येनोष्णोदकेन वा।
कोलाम्लमा वा तक्रेण दुग्धेनोष्ट्रेण मस्तुना ॥ ९२ ॥
पक्वत्र्यष्ठकटीशूलं गुदकुक्षिहृदामयम्।
अर्शोविष्टम्भमन्दाग्नि गुल्मप्लीहोदराणि च ॥ ९३ ॥
हिक्काश्मानखासकासान् जयेदेतन्न संशयः।
एतैरेवौषधैः सम्यक् घृतं वा साधयेत् सुधीः ॥ ९४ ॥

शूलादौ तुम्बुर्वादि चूर्णम्।—

तुम्बुरूणि त्रिलवणं यमानौ पुष्करान्वयम्।
यवक्षाराभयाहिङ्गु विडङ्गानि समानि च ॥ ९५ ॥
त्रिवृत्त्रिभागा विज्ञेया सूक्ष्मचूर्णानि कारयेत्।
पिबेदुष्णेन तोयेन यवक्वाथेन वा पिबेत् ॥
जयेत् सर्वाणि शूलानि गुल्माध्मानोदराणि च ॥ ९६ ॥

सकल समभागेन सूक्ष्मचूर्णीकृत चार्द्रकरसैर्बीजपूररसैश्च प्रत्येक भावयेत्, त्रिभिरिति बहुवचनत्वेन सप्त वारान् भावयेदिति भाव तथा चोक्त—"बीजपूराद्रकरसैना-सक्तद्भावितम्" इति। घृतसाधने तु चतुर्गुणो रसो देय स्नेहपरिमाणात्, चतुर्गुणता च प्रत्येकम्। तत पिबेत् सर्पिषा जीर्णे इति—अन्ने जीर्णे सति पिबेदित्यर्थ, अन्यथा विदग्धत्वभयात्, तथा हि—"औषधमग्नेषि भुक्त पीत तथौषध सम्यगेऽन्ने। न कुरुते गदोपशम प्रकोपयत्यन्यरोगाश्च॥' इति। कोलाम्लसा बदरक्वाथेन। "वा"ग्रहणात् कुलत्थयूषेण चारनिर्मोतनेन दाडिमरसेन दीपाचेया पिबेदिति तात्पर्यार्थ। पक्वत्र्यष्ठकटीशूलमिति—पक्वच्छूल पृष्ठशूल कटिशूलञ्चेति। गुदकुक्षि हृदामयमिति—आमयो गुदादिभि सह प्रत्येकमभिसम्बध्यते। एतैरेवौषधै घृतमपि साधयेत सुधीरिति—स्नेहयुक्त्या विपचेदित्यर्थ ॥ ९७—९४ ॥

अथ तुम्बुर्वादि चूर्ण दर्शयन्नाह, तुम्बुरूणीति —अस्य तुम्बुर्वादिको योग अष्टविधशूलेषु प्रशस्त। तत्र तुम्बुरूणि फलान्तर्गत बीज। त्रिलवण सैन्धव सौवर्चल विडम्। पुष्करान्वय पुष्करमूल तदभावे कुष्ठम। अभया हरीतकी। हिङ्गु भर्जितम्। एतत सकल समभागम। त्रिवृत त्रिभागेति एकद्रव्य-भागापेक्षया। यवक्वाथेनेति—यवोऽत्रविल्वम ॥ ९५।९६ ॥

ग्रहण्या चित्रकादि।—

चित्रकं नागरं हिङ्गु पिप्पली पिप्पलीजटा।
चव्याजमोदा मारिचं प्रत्येकं कर्षसम्मितम् ॥ ९७ ॥
खर्जिका च यवक्षारः सिन्धु सौवर्चलं विडम्।
सामुद्रक रोमकञ्च कोलमात्राणि कारयेत् ॥ ९८ ॥
एकीकृत्याखिलं चूर्णं भावयेन्मातुलुङ्गजै।
रसैर्दाडिमजैर्वाऽपि शोषयेदातपेन च ॥ ९९ ॥
एतच्चूर्णं जयेद्गुल्मं ग्रहणीमामजा रुजम्।
अग्निञ्च कुरुते दीप्तं रुचिकृत् कफनाशनम् ॥ १०० ॥

अग्निमान्द्ये वडवानलचूर्णम्।—

सैन्धव पिप्पलीमूल पिप्पली चव्यचित्रकम्।

चित्रकाद्य चूर्णमाह चित्रकमिति।—अत्र नागर शुण्ठी। पिप्पलीजटा पिप्पलीमूलम्। चित्रकादि मारीचान्त द्रव्य कर्षप्रमाण प्रत्येक खर्जिकादि रोमकान्त कोलमात्र प्रत्येकमित्यर्थ। कोल कर्षाष्टमभाग। रोमक गुञ्जात्रयम्। एतत् सर्व चूर्णीकृत्य * मातुलुङ्गदाडिमफलोद्भवै रसै पृथक् भावयेत् मातुलुङ्गो बीजपूरक। वा ग्रहणादचूर्ण मातुलुङ्गदाडिमरसेनाद्राव्य गुटिका कार्या यस्मात्तत्रदर्शनात्, तथा हि—"चित्रक पिप्पलीमूल द्वौ क्षारौ † लवणत्रयम्। शोष चिङ्गजमोदाख्य चूर्णयेत्तत्समैकत्र चूर्णयेत्॥ गुटिका मातुलुङ्गस्य दाडिमस्य रसेन वा। क्षता विपाचयेत्ताम्रे दीपयेत्ताप्रे चानलम॥" (च० चि० ग्रहणी०) इति ॥९७—१००॥

अथ वडवानलचूर्णमाह, सैन्धवमिति।—चव्यमिति—विटपविशेषो निज-

---

* मातुलुङ्गदाडिमफलोद्भवै रसै" इत्यादि यदुक्त तत्र सशयोऽत्र यत वा शब्दोऽत्र विकल्पार्थक, न तु समुच्चयार्थक, तेन मातुलुङ्गरसेन अथवा दाडिमरसेन मर्दयेत इत्येवास्माभि। टीकाया "वा-ग्रहणात्—" इत्यादि यदुक्त, तदपि भ्रमादिक, वा ग्रहणात् एतत चूर्णं मातुलुङ्गरसेन दाडिमरसेन वा आद्राव्य इत्येव युक्त पाठ, यस्मान्तरीयश्लोकोऽपि तादृशार्थक एव।

† लवणत्रयम्' इत्यत्र चरक चक्रदत्ते च "लवणानि च" इति पाठ., स च सर्वविद्वत्सम्मत.।

शुण्ठी हरीतकी चेति क्रमवृद्धानि चूर्णयेत् ॥
बडवानलनामैतच्चूर्णं स्यादग्निदीपनम् ॥ १०१ ॥

आमवातादौ अजमोदादिचूर्णम्।—

अजमोदा विडङ्गानि सैन्धवं देवदारु च।
चित्रकं पिप्पलीमूलं शतपुष्पा च पिप्पली ॥१०२॥
मरिचञ्चेति कर्षांशं प्रत्येकं कारयेत् बुधः।
कर्षास्तु पञ्च पथ्याया दश स्युर्वृद्धदारकात् ॥१०३॥
नागराच्च दशैव स्युः सर्वाण्येकत्र चूर्णयेत्।
पिबेत् कोष्णजलेनैव चूर्णं श्लेष्मघ्नाशनम् ॥ १०४ ॥
आमवातरुजं हन्ति सन्धिपीडाञ्च गृध्रसीम्।
कटिपृष्ठगुदस्थाञ्च जङ्घयोश्च रुजां जयेत् ॥ १०५॥
तूनीप्रतूनीविश्वाची-कफवातामयान् जयेत्।
समेन वा गुडेनास्य वटकान् कारयेद्भिषक् ॥ १०६ ॥

श्वासादौ शुण्ठ्यादिचूर्णम्।—

(शुण्ठीं सौवर्चलं हिङ्गु दाडिमञ्चाम्लवेतसम्।
चूर्णमुष्णाम्बुना पेयं श्वासहृद्रोगशान्तये ॥)

नामप्रतीतं यस्य फलं गजपिप्पली इति। क्रमवृद्ध्या वृद्धिं कृत्वा योज्यं; वृद्धिस्तु आदेरभ्यावृत्तेः, तद्यथा—सैन्धवमेकभागं, पिप्पलीमूलं द्विभागिकं, पिप्पली त्रिभागा चैव भागचतुष्टयं, चित्रकं पञ्चभागं, शुण्ठी षड्भागा, हरीतकी सप्तभागेति क्रमवृद्धिः। अत्यन्तायिकरत्वात् बडवानलसञ्ज्ञम् ॥ १०१ ॥

अथ अजमोदाद्यं चूर्णमपि दशयन्नाह, अजमोदेति।—अत्रअजमोदादिमरिचान्तं नवद्रव्यं प्रत्येकं कर्षमात्रम्। पथ्या हरीतकी तस्यास्त्वक् पञ्चकर्षमिता। वृद्धदारकं दशकर्षम्। नागरं शुण्ठी चैव दशकर्षान्विता। एतत् सकलं चूर्णं कृत्वा उचितमात्रया कोष्णजलेन पानं वोढव्यम्। यद्वा अथवा पक्षान्तरमपि, इदमेव चूर्णं गुडमिश्रितं गुडसमानं कृत्वा भक्षयेत् गुडमाद्यमत्र चूर्णत्वात्। अत्रापि कोष्णजलानुपानं वोढव्यम्। कटिपृष्ठगुदस्थाञ्चेति अत्र रुजामित्यन्वयः। जङ्घयोरुभयोः अत्रापि रुजाम्। तूनी प्रतूनी वातरोगे पठिता विश्वाची च ॥ १०२—१०६ ॥

गुल्मादौ हिङ्वादिचूर्णम्।—

हिङ्गु पाठाऽभया धान्य दाडिम चित्रकं शटी।
अजमोदा त्रिकटुकं हवुषा चाम्लवेतसम् ॥ १०७ ॥
अजगन्धा तिन्तिडीक जीरकं पौष्कर वचा।
चव्य क्षारद्वय * पञ्चलवणानि विचूर्णयेत् ॥ १०८ ॥
प्राक् भोजनस्य मध्ये वा चूर्णमेतत् प्रयोजयेत्।
पिबेद्वा जीर्णमद्येन तक्रेणोष्णोदकेन वा ॥ १०९ ॥
गुल्मे वातकफोद्भूते हृद्ग्रहेऽष्ठीलिकासु च।
हृदस्तिपार्श्वशूलेषु शूले च गुदयोनिजे ॥ ११० ॥
मूत्रकृच्छ्रे तथाऽऽनाहे पाण्डुरोगेऽरुचौ तथा।
हिक्काया यक्ष्मति श्वौक्ष्ये श्वासे कासे गलग्रहे ॥
ग्रहण्यर्शोविकारेषु चूर्णमेतत् प्रशस्यते ॥ १११ ॥
भावित मातुलुङ्गस्य बहुश स्वरसेन वा।
कुर्याच्च गुटिका बह्वीर्वातश्लेष्मामयापहा ॥ ११२ ॥

अधुना हिङ्वाद्य चूर्णमाह, हिङ्विति।—अत्र हिङ्गु भर्जित ग्राह्यम्। पाठा प्रसिद्धा, तस्या मूलम्। अभया हरीतकी। दाडिम दाडिमफलबीजानि। हवुषा लम्बुवृष्टिपर्यायो विख्यात। † अजगन्धा बबरिका। तिन्तिडीकमम्लफल प्रसिद्धम्। पुष्कर पुष्करमूलम्। क्षारद्वयमिति—यवक्षार स्वार्जिकाक्षार पञ्चलवणानि सैन्धवप्रभृतिकानि। ‡ प्राग्भोजनस्येति—प्रात काले, मध्ये वा भोजननियम। जीर्णमद्येनेति—जीर्णं पुरातन गुणाधिक्यात, तथा हि—"नव नवमभिष्यन्दि गुरु दोषकर परम। जीर्णञ्च सर्वदोषघ्न लघु वातकफापहम॥" इति। कल्पनान्तरमाह—अथवा एतच्चूर्ण मातुलुङ्गस्य रसेन वा बहुशो भावयित्वा गुटिका कार्या, ताश्च वातश्लेष्मामयापहा भवन्ति। बहुश इति—सप्तवारान्। बह्वीरिति—द्विशाणप्रमिता ॥ १०७—११२ ॥

* "पञ्चलवणानि" इत्यत्र चरकवाग्भटचक्रदत्तेषु लवणे द्वे च" इति पाठ।

† "अजगन्धा चित्रयमानी" इति शिवदास।

‡ "भोजनस्य प्राक् परिणामे भोजनाव्यवहितपूर्वकाले वा" इति शिवदास।

अरोचकादौ यमानीषाडव ।—

यमानी दाडिमं शुण्ठी तिन्तिडीकाम्लवेतसौ ।
वदराम्लश्च कुर्वीत चतुर्भागमितानि च ॥ ११३ ॥
* सार्द्धद्विभागं मरिचं पिप्पली दशभागिका ।
त्वक्सौवर्चलधान्याक जीरकं द्विद्विभागकम् ॥ ११४ ॥
चतुःषष्टिमितैर्भागैः शर्करामत्र योजयेत् ।
चूर्णितं सर्वमेकत्र यमानीषाडवाभिधम् ॥ ११५ ॥
चूर्णं जयेत पाण्डुरोगं हृद्रोगं ग्रहणीं ज्वरम् ।
कृच्छ्रशोषातिसाराश्च प्लीहानाहविबन्धनाम् ॥
अरुचिं शूलमन्दाग्निमर्शोजिह्वागलामयान् ॥ ११६ ॥

कासादौ तालीशादिचूर्णम् ।—

तालीशं मरिचं शुण्ठी पिप्पली वंशरोचनम् ।
एकद्वित्रिचतुःपञ्च-कर्षभागान् प्रकल्पयेत् ॥ ११७ ॥

अथ यमानीषाडवसंज्ञक चूर्णमाह, यमानीति।—यमानी प्रसिद्धा। दाडिमं दाडिमफलबीजानि। तिन्तिडीक प्रसिद्धम्। वदराम्लमिति—वदर प्रसिद्धम्, अम्ल द्रव्याम्ल इत्यर्थः, स च फलाम्ल, अथवा—वदराम्लमम्लवदर षाडवत्वात्। चतुर्भागमितानीति प्रत्येकम्। सार्द्धद्विभागं मरिचमिति—तेन दशभागमित्यर्थः। त्वगादिजीरकान्त प्रत्येक द्विभागम्। "त्वक् सौवर्चलधान्याकम्" इत्यस्य स्थाने 'त्वग्मिन्नमम्ल धान्यत्वक्' इति पठान्तरम्, तत्रापि अम्ल सौवर्चलम्, षाडवाभिधमिति प्रसिद्धे, यत.—"लवणाम्लाम्लतायुक्त षाडव परिकीर्त्तितं" इति। शोषो मुखशोष अग्निभेदो वा। आनाह उदरापूर। विबन्धो बालादीनामप्रवृत्ति। जिह्वागलामयानिति—जिह्वामयान्, गलामयानित्यर्थः ॥ ११३—११६ ॥

तालीशादिकमाह, तालीशमिति।—तालीश खनामख्यातम्। वंशरोचन वंशत्वचौ। एतत् द्रव्यपञ्चकमादृत्यात कर्षैकैकेन वर्द्धित ग्राह्य, तेन तालीश कर्षैक, मरिच कर्षद्वय, शुण्ठी कर्षत्रय, पिप्पली चतुःकर्षा, आधौ पञ्चकर्षा

---

* पिप्पलीना शतत्रैक हे शते मरिचस्य च" इति चक्रपाठ। "पिप्पलीना शतमिति आकृतिमानात् एव मारचस्यापि शतद्वयम्" इति शिवदास।

एलात्वचोस्तु कर्षार्द्धं प्रत्येकं भागमाचरेत्।
द्वात्रिंशत्कर्षतुलिता प्रदेया शर्करा बुधैः ॥ ११८ ॥
तालीशाद्यमिटं चूर्णं रोचनं पाचनं स्मृतम्।
कासश्वासज्वरच्छर्द-कृच्छ्रतीसारनाशनम् ॥ ११९ ॥
शीघ्राग्निकरं प्लीहा-गुल्मशीपाण्डुरोगजित्।
पक्वा वा शर्करा चूर्णं क्षिपेत् स्याद्गुटिका ततः ॥ १२० ॥

अथादौ सितोपलादिचूर्णम्।—

सितोपला षोडश स्याद्दृष्टी स्याद्दंशरोचना।
पिप्पली स्याच्चतुष्कर्षा स्यादेला च द्विकार्षिकी ॥ १२१ ॥

मतेति। एलात्वचोस्तु कर्षार्द्धमिति—एला * चुटैला, त्वक् वराङ्ग कर्षार्द्धमिति—अर्धद्वयमित्यर्थः। प्रत्येकमिति—पृथगित्यर्थः। शर्करायाश्च द्वात्रिंशत्कर्षतुलिता देया, एतेन सकलचूर्णात् द्विगुणा शर्करा भवति तीक्ष्णत्वात् (?)। वैद्यैः गुडेन पक्वान्तरमाह,—मत्र जलेन शर्करा पक्वा सत्र चूर्णं प्रक्षिप्य गुटिका कार्या लघुतरत्वात्, तथा हि—"कल्पयेद्गुडिकाश्चैतच्चूर्णं पक्वा सितोपलाम्। गुडिका त्वग्नियोगा-च्चूर्णाल्लघुतरा स्मृता॥" (च० चि० राजयक्ष्मा०) इति। एतदपि नाम्नो लक्षणं प्रचरति, तथा च तन्त्रान्तरे—"तालीशं मरिचं गुण्ठी पिप्पल्येकाष्टकोन्मिता। त्वगेलाद्वाशकं तत्स्यात् शर्करा कुडवं भवेत्॥" (हा०) इत्यादि। अन्यत्रापि—"तालीशमरिचनागरकृष्णा कर्षोन्मिता क्रमात्। त्वगेलं चार्द्धांशं कुडवसिता गुटिकां विपाच्य कृता॥" (जतूकर्ण०) इति केचिदत्रान्तरे। पित्ते दंशरोचना देयेति, तथा चक्र—"पित्तयुक्ते भवेच्छ्रेष्ठ दंशरोचनयाऽन्वितम्" इति ग्रन्थान्तरदर्शनात्। तदुक्तम्—'दंशीपिप्पलिगुण्ठीना † तालीशेषणयोस्तथा। भागवृद्धि क्रमादत्र त्वगेले चापि नाटके॥ कृष्णा त्वष्टगुणा यावत् प्रदेया सितशर्करा॥" इत्यादि॥ ११७—१२०॥

अथ सितोपलादिचूर्णमाह सितोपलेति।—सितोपला शर्करायाश्च षोडशेति

एलाशब्देन क्षुद्रैलामेव व्यवहरन्ति वैद्या सर्वत्र।

"तालीशीषणयो" इति पाठो न युक्तः, तालीशमरिचयो क्रमात् द्वैक्यभागप्रसङ्गात्। "कृष्णातालीशयोस्तथा" इति पाठकल्पन सङ्गतम्। "कृष्णा त्वष्टगुणा" इत्यत्र "कृष्णातोऽष्टगुणा" इति पाठकरण सङ्गतम इति।

एक' कर्षस्त्रयः कार्य्यस्त्रिगुणेन सवेपिकम्'।
सितोपलादिकं चूर्णं मधुसर्पिर्युतं लिहेत ॥ १२२ ॥
श्वासकासक्षयहरं हस्तपादाङ्गदाहजित्।
मन्दाग्निं सुप्तजिह्वत्वं पार्श्वशूलमरोचकम् ॥
ज्वरमूर्द्धगतं रक्तं पित्तमाशु व्यपोहति ॥ १२३ ॥

गुणादौ भास्करलवणम्।—

सामुद्रलवणं कार्य्यमष्टकर्षमितं बुधैः।
पञ्च सौवर्चलात् ग्राह्यं विडं सैन्धवधान्यकात् ॥ १२४ ॥
पिप्पली पिप्पलीमूलं कृष्णजीरकयवकम्।
नागकेशरतालीशमल्लवेतसकं तथा ॥ १२५ ॥
द्विकर्षमात्राण्येतानि प्रत्येकं कारयेत् बुधः।
मरिचं जीरकं विश्वमेकैक कर्षमात्रकम् ॥ १२६ ॥
दाडिमस्याच्चतुष्कर्षं त्वम्लेवाष्टकार्षिके।
एतच्चूर्णीकृतं सर्वं लवणं भास्कराभिधम् ॥ १२७ ॥

—षोडशकर्षमितं। वशरोचना अष्टौ स्यादिति—अष्टकर्षमिता, अग्निमकर्षयुक्तात्। अन्यत्र द्विगुणितत्वान्नानिर्देशोऽयम् तथा चोक्त—"सितोपला तुगाक्षीरी पिप्पली बहुला त्वच। अन्यादृङ् द्विगुणं लिह्यान्मधुसर्पिषा।" (च० चि० राजयक्ष्मा०) इति। बहुला * त्वक्षीरा। मधु सर्पिश्चात्र लिह्यात् परिणतम। हस्तपादाङ्गदाहजिदिति—तेन हस्तदाह पाददाह अङ्गदाहजित। सुप्तजिह्वत्वमिति—जिह्वारोगे पाठ्यम् ॥ १२१—१२३ ॥

इदानी लवणभास्कर नाम चूर्णं प्रकटयन्नाह सामुद्रलवणमिति।—दक्षिणसमुद्रसमीप भव सामुद्र लवण तच्च समष्टशब्दवाच्यम् अष्टकर्षं पलद्वयम्। पञ्च सौवर्चलं गृह्णीयादित्यर्थः। विड्लवणाद्यन्तेषां द्विगुणकर्षप्रमाणं प्रत्येकम्। विडलवणं क्षारम्, तच्च प्रसारणीकल्कभावनासंस्कारयोगादग्निदीपनं निर्हरणमलेकं। सिन्धव सैन्धवम। कृष्णजीरक पाश्चात्य, तच्च खरासानशब्दवाच्यम्। मरिचादिविश्वान्त द्रव्यत्रय कर्षं प्रत्येकमित्यर्थः। जीरक

* अद्यापि स्थूलैलैव गृह्यते, न तु क्षुद्रा।

प्राणप्रमाणं देयन्तु मस्तुतक्रसुरासवैः।
वातश्लेष्मभवे गुल्मे प्लीहानमुदरं चयम् ॥ १२८ ॥
अर्शांसि ग्रहणीं कुष्ठं विबन्धञ्च भगन्दरम्।
शोफं शूलं ज्वरं कासं वातमेदञ्च दुर्जयम् ॥ १२९ ॥
मन्दाग्निं नाशयेदेतद्दीपनं पाचनं परम्।
सर्वलोकहितार्थाय भास्करेणोदितं पुरा ॥ १३० ॥

क्षुधाम एलादिचूर्णम्।—

एलाप्रियङ्गुमुस्तानि कोलमज्जा च पिप्पली।
श्वेतचन्दनं तथा लाजा लवङ्गं नागकेशरम् ॥ १३१ ॥
एतच्चूर्णीकृतं सर्वं सिताक्षौद्रयुतं लिहेत्।
वातपित्तकफोद्भूतां छर्दिं हन्त्यतिवेगतः ॥ १३२ ॥

अत्र गुडम्। बिल्वं गुरुः। दाडिमं स्वाद्वम्लं कफमिति—दाडिमफलबीजानि स्वाद्वम्लानि, तत्र मनोरदानाग्निद्वाच्च, चतुर्थं कर्षं फलपरिमितम्। लवणे चार्द्धं कार्षिके द्वे—मिलित्वा कर्षमात्रमित्यर्थः। भक्षणे च प्राणप्रमाणं टङ्कमात्रं देयं दीप्ताग्नित्वात्। तत् पुनः (?) इति यत्कर्षणाधिकमात्रमिति पलमात्रं दोषादीनां बलातिशयत्वात्। मस्तुतक्रसुरासवैरिति—रसे दध्नोऽधिकोपादेशः, "दाडिमं यदम्लं तत्स्यात् परिकीर्त्तितम्"। तक्रमिति त्रिभागाधिकम्। सुरासवौ प्रसिद्धौ, सुरा चाधिकत्वात् पिष्टकिण्वकल्केन किञ्चित् कलुषा। * आसवा क्रियन्ते यैस्ते आसवाः। भास्करेण भास्कराचार्येण उदितं कथितं पुरा पूर्वपौरुषेयग्रन्थानामादित्यत्वात्, न तु ऋषिप्रणीतेषु इति केचित् ॥ १२८—१३० ॥

एलादिचूर्णमाह, एलाप्रियङ्गुमुस्तानीति।—एला सूक्ष्मैला। प्रियङ्गुर्लतावशेषं, तथा फलानि। कोलमज्जा बदरफलास्थिमध्यगतद्रव्यविशेषः। श्वेतचन्दनं श्वेतचन्दनम्। लाजा भृष्टधान्यानीव। एतत् सकलं समभागं गृहीत्वा चतुर्गुणं चूर्णं कृत्वेति, भक्षणमानमस्य दीप्ताग्निबलाप्रेक्षया कार्यम्। सिताक्षौद्रयुतमिति—सिता शर्करा, सा चाल्पचूर्णसमा ग्राह्या, मधुमानञ्च यावद्बलेहत्वं स्यात् तावद्देयमित्यर्थः। अतिवेगत इति वचनेनात्र विशिष्टस्य दाहस्य तम् ॥ १३१।१३२।

---

* "आसुतत्वादासव," इति चरकः। आसुतत्वात् सद्यःकादासव इति चक्रः। "आसूयते इति आसवः," इति च। "आसु क्रियते" इति व्याख्या तु न समीचीना।

ऊर्ध्ववातादौ व्याघ्र्यादि चूर्णम्।—

(व्याघ्रीजीरकधात्रीणां चूर्णं मधुयुतं लिहेत्।
ऊर्ध्ववातमहाश्वास-तमकैर्मुच्यते क्षणात्॥)

कुष्ठादौ पञ्चनिम्बादि चूर्णम्।—

मूलं पत्रं फलं पुष्पं त्वचं निम्बात् समाहरेत्।
सूक्ष्मचूर्णमिदं कुर्य्यात् पलपञ्चदशोन्मितम्॥ १३३॥
लोहभस्महरीतक्यौ चक्रमर्दकचित्रकौ।
भल्लातक विडङ्गानि शर्करायुतमलक निशा॥ १३४॥
पिप्पली मरिचं शुण्ठी वाकुची कृतमालकः।
गोक्षुरश्च पलोन्मानमेकैक कारयेद्बुधः॥ १३५॥
सर्वमीषत्कृतं चूर्णं भृङ्गराजेन भावयेत्।
अष्टभागावशिष्टेन खदिरासनवारिणा॥ १३६॥
भावयित्वा च सशोष्य कर्षमात्रं ततः पिबेत्।
खदिरासनतोयेन सर्पिषा पयसाऽथवा॥ १३७॥

अधुना पञ्चनिम्बचूर्णं दर्शयन्नाह, मूलमिति।—मूलमित्यादिना निम्बस्यैव पञ्चाङ्गं कथितं मूलं जटा, पत्रं पलाश, फलमम्बबीज, पुष्पं कुसुम, त्वक् छल्ली। समाहरेदिति—सम्यक् प्रकारेण आहरेदिति यदुक्तं तत् कालविशेषं सूचयति, तथा हि—"पुष्पकाले च पुष्पाणि फलकाले फलानि च। सचूर्णं पिचुमर्दस्य त्वक्पत्राणि दलानि च॥ इति। एके मूलस्थाने सारमिति पठन्ति व्याख्यानयन्ति च, तत्र सार मध्यभागस्थित काष्ठविशेषम् उक्तमन्यत्रापि—"कार्ये त्वग्दल सारबीजकुसुमेनिम्बस्य तुल्यांशके" इत्यादि। पलपञ्चदशोन्मितमिति—सकलपञ्चाङ्ग पञ्चदशपलपरिमित ग्राह्यमित्यर्थ तेन प्रत्येक त्रिपलमित भवति। लोहभस्मेति—एतल्लोहचूर्णम्। चक्रमर्दक प्रसिद्धादवोलानि, कालमेघनामकौषधम् निशा हरिद्रा। कृतमालको राजवृक्ष। एतल्लोहभस्मादि सर्वमेकैक पलमान ग्राह्य, तेन निम्बचूर्णसम भवति, एतत् सकल चूर्णभूत द्रव्य भृङ्गराजरसेन भावित कृत्वा पश्चादष्टभागावशिष्टेन खदिरक्वाथेन ग्राह्य तुल्यमात्रमक्वाथेन चेति, अस्मन् पक्षान्तरे द्रवविशेष, पश्चात् सशोष्य

मासेन सर्वकुष्ठानि विनिहन्ति रसायनम् ।
पञ्चनिम्बमिदं चूर्णं सर्वरोगप्रणाशनम् ॥ १३८ ॥

वाजीकरणे शतावर्यादिचूर्णम् ।—

शतावरी गोक्षुरस्य वाजस्य कपिकच्छुजम् ।
गाङ्गेरुकी चातिबला बीजमिक्षुरकोद्भवम् ॥ १३९ ॥
चूर्णितं सर्वमेकत्र गोदुग्धेन पिबेन्निशि ।
न क्षयं याति नारीभिर्नरश्चूर्णप्रभावत ॥ १४० ॥

कषपरिमित इत्यनुमाषानुपानेन सह पिबेदित्यर्थः । अनुपानाद्यर्थं—खादिरासन-लोचनेति—खदिरकाष्ठक्वथितेन असनकाष्ठक्वथितेन वत्सथ , मथवा लोपश्च षष्ठ्या च अत्र तृतीयापक्षे बोद्धव्या । रसायनमिति—जरारोगिणं शक्तवन रसायनं कथितम् । पञ्चनिम्बमिति—निम्बसम्बन्धिपुष्पादिपञ्चकमेव निम्बपञ्चकं कथितम् , तथा हि—"निम्बपत्रं तथा पुष्पं त्वङ्मूलफलमुच्यते । पञ्चनिम्बाभिधं ख्यातं नामतः शास्त्रकोविदैः ॥" इति । सर्वरोगप्रणाशनमिति—सर्वरोगा भगन्दरप्रमुखा , तथा चोक्तं—"भगन्दरशीपदवातरक्तजातान्यनाडीव्रणगौरवाणि । सर्वान् प्रमेहान् प्रदरांश्च सर्वान् दंष्ट्राविषं मूलविषं निहन्ति ॥ स्थूलोदरं निष्कफगोदरं स्यात् सुश्लिष्टसन्धिर्मुनिपोषणात् । समीपयोगादपि यं दशन्ति सर्पादयो यान्ति विनाशमाशु ॥ जीवेच्छरदां व्याधिजराविमुक्तः शुभं रतं सन्दधमानकान्तिः ॥" इति ॥ १३३—१३८ ॥

इदानीं वाजीकरणचूर्णद्वयमाह, शतावरीत्यादि ।—कपिकच्छुजं बीजमिति—वानरीबीजम् । गाङ्गेरुकीति—नागबला "गुडसकरी" इति प्रसिद्धा । अतिबला प्रसिद्धा । बीजमिक्षुरकोद्भवमिति—इक्षुरं कोकिलाक्षं "तालमखाना" इति ख्यातं , एतत् सर्वं चूर्णीकृतमुन्मानतश्चतुर्गुणेन गोदुग्धेन सह पिबेत् । निशि रात्रौ । वाजीकरणमिति—वाजीवात्यर्थवैद्यनसामर्थ्यात् वाजीकरणं, किंवा वैद्यन शुक्रं तद्योगात्तिं वाजी, अथवा वाजी स्त्रियं यत्र पुरुषस्तद्वाजी-करणम् , तदुक्तं—'यत्र नारीषु सामर्थ्यं वाजीव लभते नरः । यत्र वाऽत्यधिकं शुक्रं वाजीकरणमेव तत् ॥ इति । तत्तु रसविद्य—प्रवक्ष्यते जरारोगचिकित्सायां , तत्रैव तन्त्रान्तरं—'शुक्रवृद्धिकरं किञ्चित् किञ्चित् शुक्रप्रवर्तकम् । व्याधिव्रजविमुक्तं

वाजीकरणे अश्वगन्धाद्यचूर्णम्।—

अश्वगन्धा दशपला तन्मात्रो वृद्धदारकः।
चूर्णीकृत्योभयं विद्वान् घृतभाण्डे निधापयेत्॥ १४१॥
कर्षैकं पयसा पीत्वा नारीभिर्नैव तप्यति।
अगत्वा प्रमदा भूयात् वलीपलितवर्जितः॥ १४२॥

वाजीकरणे मुसल्यादिचूर्णम्।—

(मुसलीकन्दचूर्णन्तु गुडूचीसत्त्वसंयुतम्।
वानरीगोक्षुराभ्याञ्च शाल्मलीशकराऽऽमलैः॥
आलोड्य घृतदुग्धेन पाययेत् कामवर्द्धनम्॥)

पाण्डुरोगादौ नवायसचूर्णम्।—

चित्रकास्त्रिफला मुस्तं विडङ्गं कृष्णमानि च।
समभागानि कार्य्याणि नव भागा घृतायसः॥ १४३॥
एतदेकीकृतं चूर्णं मधुसर्पिर्युतं लिहेत्।
गोमूत्रमथवा तक्रमनुपानं प्रशस्यते॥ १४४॥
पाण्डुरोगं जयत्यग्र्यं कृच्छ्रोगञ्च भगन्दरम्।
शोथकुष्ठोदरार्शांसि मन्दाग्निमरुचिं क्रमोन्॥ १४५॥

किञ्चित् त्रिविधं द्रव्यमुच्यते॥' इति। द्रव्यन्तु वाजीकरणसङ्ग्रहम्, तथा च यवतिक्तयवाद्यं क्षुतिकरं, चीरादि हृद्धिकरं, माषो वातक प्रवर्त्तकश्च॥ १३९।१४०।

द्वितीयवाजीकरणचूर्णमाह, अश्वगन्धेति।—सुबोधम्। क्षीरानुपानं मतमिति॥ १४१।१४२॥

अथ नवायस चूर्णमाह, चित्रक इति।—चित्रकत्रिफलामुस्ताविडङ्गकृष्णाश्चूर्णयेत्। त्रिफला हरीतक्यादिः। कृष्णा कटुकम्। एतावच्चित्रकादिकृष्णान्तं नवदृढ़ं लोहकं समभागं नव भागा घृतायस इति—घृतायसो घृतलोहस्य लोहकस्यभागापेक्षया नव भागा ज्ञेयाः, तेनैकत्र मिलितानां त्रिफलाकादीनां चूर्णेन समभागघृतलोहकं। मधुसर्पिषी चात्र द्विपरिमाणके ज्ञेये। १४३—१४५॥

अन्यत्र आकारकरभादिचूर्णम् ।—

आकारकरभशुण्ठीकक्कोलं कुङ्कुमं कणा ।
जातीफलं लवङ्गञ्च चन्दनञ्चेति कार्षिकान् ॥ १४६ ॥
चूर्णानि मानतः कुर्य्यादहिफेन पलोन्मितम् ।
सर्वमेकीकृतं चूर्णं माषैकं मधुना लिहेत् ॥ १४७ ॥
शुक्रस्तम्भकरं चूर्णं प्रमामानन्दकारकम् ।
नारीणां प्रीतिजननं सेवेत निशि कामुकः ॥ १४८ ॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्य्येण विरचितायां
शार्ङ्गधरसंहितायां मध्यखण्डे चिकित्सितस्थाने
चूर्णकल्पना नाम षष्ठोऽध्यायः ॥ ६ ॥

अथाकारकरभादिचूर्णं द्रव्यतोऽाह, आकारकरभ इति ।—"अकरकरहा" इति लोके प्रसिद्ध । कक्कोलं विख्यातम् । कणा पिप्पली । चन्दनं श्वेतम् । एतानि सर्वं कर्षान्मितं प्रत्येकमिति । अहिफेन पलोन्मितमिति—अहिफेनं आफूइत्याख्यं, अफीम" इति लोके, पलोन्मितं पलप्रमाणं, तेन पूर्वचूर्णभागद्वयम् * अहिफेनस्य भागैकमित्यर्थः शर्करारहितत्वात् । कुत्रचित् सितासहितमपि प्रथमं तत्र अहिफेनं पूर्वद्रव्यचूर्णसाम्यम्, तदुक्तं—"जातीफलार्कक्षारहाटलवङ्गशुण्ठीकङ्कोल-कुङ्कुमकणाहरिचन्दनानि । एतैः समानमहिफेनसमेन तुल्या सिता निधाय मधुना वटकं विदध्यात् ॥ माषद्वयोन्मितमम् निशि भक्षयित्वा मिष्टं पयस्तदनु माषद्वयमात्रं पीत्वा । कुर्वन्ति कामुकजनानतु बिन्दुपातं चत्वारि तानि चकितानि कलावतीनाम् ॥" इति ॥ १४६—१४८ ॥

इति श्रीवात्स्यायनवंशप्रकाशवैद्य-श्रीभावसिंहात्मजेन ढल्लेन विरचितायां शार्ङ्गधर-
दीपिकायां मध्यखण्डे चिकित्सितस्थाने चूर्णकल्पनानाम षष्ठोऽध्यायः ॥ ६ ॥

* अहिफेनशोधन गूढार्थदीपिकायां यथा—"तस्य शोधनम् आर्द्रकद्रवेण सहस्रखण्ड-पत्रद्रवेण वा निम्बद्रवेण वा निम्बुकद्रवेण भावनाभिः, सप्तभिर्वा शोधयित्वा शोधयित्वा देयम्" इति ।

सप्तमोऽध्यायः ।

वटकादिकल्पना ।—

वटकपर्य्याया —

वटकाश्चाथ कथ्यन्ते तन्नाम गुटिका वटी ।
मोदको वटिका पिण्डी गुडो वर्त्तिस्त्वथोच्यते ॥ १ ॥

वटकादीना प्रस्तुतविधि ।—

लेहवत् साध्यते वह्नौ गुडो वा शर्करा तथा ।
गुग्गलुर्वा क्षिपेत् तत्र चूर्णं तन्निर्मिता वटी ॥ २ ॥
कुर्य्यादवह्निमिश्रेण क्वचित् गुग्गुलुना वटीम ।
द्रवेण मधुना वाऽपि गुटिकां कारयेत् बुधः ॥ ३ ॥

वटकादिषु शर्करादीना मात्रा ।—

मिता चतुर्गुणा देया वटीषु द्विगुणो गुडः ।
चूर्णाच्चूर्णसमः कार्य्यो गुग्गलुर्मधु तत्समम ॥
द्रवश्च द्विगुण देय मोदकेषु भिषग्वरैः ॥ ४ ॥

इदानीं गुटिका कथ्यन्ते वटकाश्चेति ।—अथेति—चूर्णकल्पनानन्तर वटका गुटिकादिसज्ञा, अत एव तन्नाम गुटिकावटीप्रभृतयो ज्ञातव्या । तन्नामेति—तस्य वटकस्य नाम पर्य्यायवाक्य गुटिकादिकमित्यर्थ ॥ १ ॥

अथ तस्य कल्पविधिमाह लेहवत साध्यत इति ।—यथा अवलेहार्थे गुडादिक साध्यत तथैवात्र गुड शर्करा, गुग्गलुवाऽपि पक्त्वा, पाके सति चूर्ण प्रक्षिप्य वटकादीन् कुर्य्यादिति भाव । पक्षान्तरमाह, क्वचिदिति—न सर्वत्र, अवह्निमिश्रेण कुत्रचिन गुग्गुलुना वटका कार्या । गुडादिकेनापि क्वचिदिति सचारादा (?), अथवा द्रवेण नीरचौरादिना मधुना चौद्रेणापि सस्कृत्य गुटिका कारयेत बुध पण्डित, अवापि वह्नि विनेति मन्तव्य ॥ २।३ ॥

इदानीमनुक्तेषु गुडशर्करादीना मानमाह, मितेति।—मिता शर्करा चतुर्गुणा देया चूर्णादित्यर्थ । गुडोऽत्र द्विगुण अवापि चूर्णभागादिति भाव । गुग्गलुश्च चूर्णसम चूर्णभागसमान इत्यर्थ । मधु तत्समामिति—मधु क्षौद्र, तत्सम चूर्णसमम् । द्रव क्षीरतोयादिक द्विगुण चूर्णभागादित्यर्थ । चूर्णमत्र सकलद्रव्याणाम । भिषग्वरैरिति ग्रहणेन स्वबुद्धया वा यथायोग्यमवचारयेदिति सम्प्रदायिका ॥ ४ ॥

वटकादीना मात्रा।—

कषप्रमाणं तन्मानं बलं दृष्ट्वा प्रयुज्यते ॥ ५ ॥

स यथा—

अथ ग्रन्थेषु श्रीवाहुशाली गुड ।—

इन्द्रवारुणिका मुस्त मुण्ठी दन्ती हरीतकी।
त्रिवृच्छटी विडङ्गानि गोक्षुरश्चित्रकस्तथा ॥ ६ ॥
तेजोह्वा च द्विकर्षाणि पृथक् द्रव्याणि कारयेत् ।
शूरणस्य पलान्यष्टौ - वृक्षादारचतुष्पलम् ॥ ७ ॥
चतुष्पलं स्यात् भल्लात क्वाथयेत् सर्वमेकतः।
जलद्रोणे चतुर्थांश गृह्णीयात् क्वाथमुत्तमम् ॥ ८ ॥

अथ भक्षणमानमनुक्तानां दर्शयन्नाह, कषप्रमाणमिति।—कर्षप्रमाणं कर्षमात्रम्। तन्मानमिति—तत् तेषां वटकादीनां मानं परिमाणम्। बलमिति—दृढबलं दोषबलं व्याधिबलञ्च। बलग्रहणेन कषमानमेव सामान्यं सूचितम्, अत उक्तं दृष्ट्वा विचार्य्येत्यर्थ , विचारणाऽत्र बलवृद्धानामेव मन्तव्यानान्तु कषमात्रेव ॥ ५ ॥

स यथेति वचनं गुटिकासमुद्दर्शनपाठनाशमार्थितमाचार्य्येण। तत्रादौ श्रीवाहुशाली नाम गुडस्य दर्शयन्नाह इन्द्रवारुणिकेति।—अथ वाहुशालगुडोऽनाख्यायी ग्रन्थ । तत्रेन्द्रवारुणिका त्रिभटी, तस्या मूलम्। दन्ती त्रिदन्तिवृक्षस्य तस्या अपि मूलम्। हरीतक्यातिमूलमेव। भटी कण्टकारिभेद। तेजोह्वाऽत्र चव्य, यत्र तेजोह्वा चविका च, तत्र तेजोह्वा ज्योतिष्मती, एव सर्वत्र। एतत् सर्वं प्रत्येक द्विकर्षपरिमितं भवति। शूरणस्य पलान्यष्टाविति—शूरण कन्दविशेष प्रसिद्ध, तस्याष्टौ पलानि भवन्ति। वृक्षादार चतुष्पलमिति—निर्यातभेदं तस्य चतुष्पलानि। भल्लातमिति—भल्लातकफलानि तानि चतुष्पलमितानि भवन्ति। एतत सकलमौषधजाते सङ्कृत्य चतुर्थांश गृह्णीयात्। जलद्रोणमिति—चतुरष्टकपरिमितं जलं, तत्र षट्पञ्चाशोत्तरशतद्वयपलानि जलपरिमाणं भवति। उत्तममिति—वक्ष्यमाणादिकं, तन्नातिमृदु क्वाथयेदित्यर्थ। चतुर्थांशमिति—अष्टकनाम।

* चक्रसङ्ग्रहे वृक्षादारचतुष्पलमित्यत्र वृक्षादार बलाया दन्ती इत्यत्र कन्दे, श्रीषध्याने नागकेशर तथा भल्लातकस्थाने मरिच इति पाठान्तराणि, तत्र मधुन उल्लेखो नास्ति।

क्वाथद्रव्यात् त्रिगुणित गुडं क्षिप्त्वा पुनः पचेत्।
सम्यक् पक्वञ्च तं ज्ञात्वा चूर्णमेतत् प्रदापयेत् ॥८॥
चित्रकत्रिवृतादन्ती-तेजोह्वा पलिका पृथक्।
पृथक् त्रिपलिका कार्य्या व्योषैलाऽऽमलकत्वचः ॥१०॥
निक्षिपेत् मधु शीते च तस्मिन् प्रस्थप्रमाणतः।
एवं सिद्धो भवेच्छ्रीमान् वाट्यालगुडाभिधः ॥ ११ ॥
जयेदशांसि सर्वाणि गुल्मं वातोदरं तथा।
आढ्यवातं प्रतिश्याय महान्तं क्षयपीनसम् ॥
श्लीपदं पाण्डुरोग प्रमेहञ्च रसायनम् ॥ १२ ॥

काम मरिचादिचूर्णम्।—

मरिच कर्षमात्र स्यात् पिप्पली कर्षसम्मिता।
अर्द्धकर्षो यवक्षार कर्षयुग्मञ्च दाडिमम् ॥ १३ ॥
एतच्चूर्णीकृत युञ्ज्यादष्टकर्षगुडेन हि।
माषप्रमाणा गुटिका कृत्वा वक्त्रेण धारयेत् ॥
अस्या प्रभावात् सर्वेऽपि कासा यान्त्येव सङ्क्षयम् ॥१४॥

क्वाथद्रव्यात् त्रिगुणित गुडमिति—गुडमत्र लौहे ग्राह्यम्, क्वाथद्रव्यादिति—इन्द्रयवत्रिफलादित्रिजीतान्तात् त्रिगुणित त्रिभागम् अतत गुड पादशेषक्वाथे क्षिप्त्वा पुन पचेत यावत सान्द्रो भवति। अत्र चूर्णमाह, चित्रकेत्यादि—चित्रकोऽग्निकश्चात्र। त्रिवृच्छ्वेतम्। दन्ती प्रसिद्धा। तेजोह्वा चवी। एतत द्रव्यचतुष्टय पलप्रमाणम्। अन्यदप्याह, व्योषेत्यादि—व्योष त्रिकटकम्। त्वक् गुडत्वक्। इदमपि द्रव्यषट्क त्रिपलप्रमाण प्रत्येकम्। श्रीवाट्यालो गुड एव सिद्धो भवति, वाट्याल आचार्यावशेषत्वेन निर्मितो गुड वटकसज्ञ इत्यर्थ। आढ्यवात ऊरुस्तम्भेद। महान्त बलमित्यर्थ। रसायन इति प्रभावात्, तत् यथा—"यज्वराव्याधिविध्वसि मेधज तत्रसायनम्" इति ॥ ६—१२ ॥

इदानीं मरिचादिगुटिका दर्शयन्नाह मारयमिति।—अत्र दाडिमं दाडिमफलबीजानि कर्षयुग्म मतिं—कर्षद्वयम्। वक्त्रेण धारयेदिति—अत्र वक्त्रधारणात्

* "पिप्पल्या कर्षार्द्धम्" तथा "दाडिमस्य पलम्" इति चक्रदत्तभट्टौ।

श्वासकासे गुडादिवटिका।—

गुडशुण्ठीशिवामुस्तैर्गुटिका धारयेन्मुखे।
श्वासकासेषु सर्वेषु विभीत वाऽपि केवलम् ॥१५॥

तृष्णायाम् आमलक्यादिगुटिका।—

आमल कमल कुष्ठ लाजाश्च वटरोहक।
एतच्चूर्णस्य मधुना गुटिका धारयेन्मुखे॥
तृष्णा प्रवृद्धा हन्त्येषा मुखशोषञ्च दारुणम् ॥ १६ ॥

अजीर्णादौ सञ्जीवनीवटी।—

विडङ्ग नागर कृष्णा पथ्याऽऽमलविभीतकम्।
वचा गुडूची भल्लात सहिषञ्चात्र योजयेत् ॥ १७ ॥
एतानि समभागानि गोमूत्रेणैव पेषयेत्।
गुञ्जाभा गुटिका कार्य्या दद्यादार्द्रकजे रसे: ॥ १८ ॥
एकामजीर्णगुल्मेषु हे विसूच्या प्रदापयेत्।

इदमौषधं धूनरुगभिप्रायेणाहुरेके। चक्रेण तु खलवृद्धे एतत चूर्ण वक्ष्यमाण गुड इत्यादि-चूर्णञ्च, चक्रेण धारयेदिति प्रस्तावे लिखितम्। वैद्यप्रसारकेऽपि गुटिकास्वरूप-मत्रणमस्योक्तम्, एतदभिप्रायेणात्र लिखितम्। अन्या सदृशादकाया वटिकाया: प्रभावादात्यन्यशक्ते। सर्वे कासा इति—पञ्चप्रकारा ॥ १३।१४ ॥

गुडशुण्ठीति।—स्पष्टम् ॥ १५ ॥

अथामलक्यादिगुटिकामाह, आमलमिति।—आमलमामलकफलम्। कमल-मुत्पल, तदभावे कमलबीजानि ग्राह्याणि। लाजा, भृष्टव्रीहय:। वटरोहक इति—वटवृक्षप्ररोह, स च वटरोहऽभ्यवाच्य:। मध्वत्र गुटिकाकरण मान परि-भाषोक्तम्। धारयेन्मुखे इति—एतेन यथा यथा गुटिका द्रवति, तथा तथा ग्रीवनीया, पुनरिमा सहसैवाभ्यवहरेदिति दृष्टपरिचय। प्रवृद्धामिति—कैरपि योगैरनवार्य्याम्। मुखशोषञ्च दारुणमिति—दारुण दु खकरम्, असाध्यमित्यर्थ ॥१६॥

अथ सञ्जीवनीगुटिका दर्शयन्नाह, विडङ्गमिति।—अत्र नागर शुण्ठी। कृष्णा पिप्पली। पथ्या हरीतकी। आमलमामलकफलम्। भल्लात भल्लातकफलम्। सहिषमिति—गुड विषम्। एतेषां समानभागा वाह्या। गोमूत्रेण गुटिकार्थ-परिमितम्। गुञ्जाभा गुञ्जापरिमाणा वटी कार्य्या। आर्द्रकरसोऽनुपानम्।

तिक्तस्य सर्पदष्टे तु चतस्र सान्निपातिके ॥
वटी सञ्जीवनी नाम्ना सञ्जीवयति मानवम् ॥ १९ ॥

पीनसादौ व्योषादिगुटिका।—

व्योषाम्लवेतसं चव्यं तालीशं चित्रकं तथा।
जीरकं तिन्तिडीकञ्च प्रत्येकं कर्षभागिकम् ॥ २० ॥
त्रिसुगन्धं त्रिशाणं स्याद्गुडं स्यात् कर्षविंशतिः।
व्योषादिगुटिका सेयं पीनसश्वासकासजित् ॥
रुचिस्वरकरी ख्याता प्रतिश्यायप्रणाशिनी ॥ २१ ॥

आमादौ गुडगुण्ड्यादियोगचतुष्टयम्।—

आमेषु सगुडा गुण्ठीमजीर्णे गुडपिप्पलीम्।
कृच्छ्रे जीरगुडं दद्यादशःसु सगुडाभयाम् ॥ २२ ॥

अजीर्णगुल्मयोरेकैका वटी देया, विसूच्या हे वक्ष्यौ, सर्पदष्टे तिक्ता गुटिका, सन्निपाते चतस्र इति। नाम्ना कृता सञ्जीवनी कथिता, यतोऽस्या प्रभावान्मानवो यदा मुमूर्षुस्तदा जीवतीति। विचारणाऽत्र न कार्या, अविचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव" इति वचनात् ॥ १७—१९ ॥

इदानीं व्योषादिगुटिकामाह, व्योषमित्यादि।—व्योषमत्र त्रिकटुकम्। अम्लवेतसं प्रसिद्धम्। चव्यं चावशब्दवाच्यम्। तालीशं स्वनामख्यातम्। तिन्तिडीकमिति—अम्लफलद्रव्यम्। त्रिसुगन्धं त्रिशाणमिति—उक्ता त्वक् पत्रक, तच्च मिलितं त्रिक, न तु प्रत्येकम्। व्योषादितिन्तिडीकान्तं द्रव्यञ्च प्रत्येकं कर्षमात्रमित्यर्थः। गुडं स्यात् कर्षविंशतिरिति—गुडोऽत्र पुराणो ग्राह्यः, कर्षविंशतिरिति—पञ्चपलान्, तेन सकलद्रव्याद् द्विगुणितो गुड इत्यर्थः, तथा हि—'व्योषाच्चतुष्कतालीशतिन्तिडीकाम्लवेतसम्। सर्वव्याजाजीतुल्याग्निमेलात्वक्पत्रपादकम् ॥ व्योषादिकमिदं चूर्णं पुराणगुडसंयुतम् ॥" इति ॥ २०।२१ ॥

अथ गुडचतुष्टयगुटिका व्याचष्टे, आमेष्वित्यादि—गुडचतुष्टयगुटिका इति कोऽर्थः? गुडेन सह चत्वारो योगा कथिता इत्यर्थः। तद्यथा—आमेषु सगुडा गुण्ठीमित्येको योगः, आमेषु आमदोषेषु सगुडामिति—अत्र * गुडःगुण्ड्यम्, एवं योगचतुष्टयेऽपि

* गुडोऽत्र तुल्य इति गूढार्थदीपिका, चूर्णत्वात् युक्तमेतत्।

अर्शसु वृद्धदारकादिमोदक ।—

वृद्धदारकभल्लात-शुण्ठीचूर्णेन योजितः ।
मोदकः सगुडो हन्यात् षड्विधार्शः कृता रुजाम् ॥ २३ ॥

अर्शसु शूरणपिण्डी ।—

शुष्कशूरणचूर्णस्य भागान् द्वात्रिंशदाहरेत् ।
भागान् षोडश चित्रस्य शुण्ठ्या भागचतुष्टयम् ॥ २४ ॥
द्वौ भागौ मरिचस्यापि सर्वाण्येकत्र चूर्णयेत् ।
गुडेन पिण्डिकां कृत्वादर्शसां नाशनीं पराम् ॥ २५ ॥

अर्शसु शूरणवटक ।—

शूरणो वृद्धदारस्य भागौ षोडशभिः पृथक् ।
मुशलीचित्रकौ ज्ञेयावष्टभागमितौ पृथक् ॥ २६ ॥

षोडश्यम् । अजीर्णे गुडपिप्पलीमिति द्वितीय अजीर्णे विष्टब्धादिके । क्रुद्धे पीत गुड इत्यादिति तृतीयो योग क्रुद्धे सन्निक्रुद्धे । अर्शसु च सगुडाभयामिति चतुर्थो योग इति ॥ २२ ॥

इदानीं वृद्धदारकमोदकमाह वृद्धदारकेति ।—वृद्धदारको विख्यात, तदभावे निर्शोता यात्रा यतोऽस्या मेदो वृद्धदारक इति । एतेषा द्रव्यत्रयाणा चूर्णे समभाग-माहु । सगुड इति—अत्र मोदकत्वेन गुडो द्विगुणितो ज्ञेय कैश्चित् नाद्रियते, यतस्तत चतु समभागेन सम एव गुडो दृश्यते सान्येनापि किञ्चित् द्रव दत्त्वा गोलौ मोदकौ कार्य्यौ । रुजामिति—पीडाम् ॥ २३ ॥

अथ शूरणपिण्डीमाह शुष्कशूरणेति —शूरण कन्दविशेष एमिः तस्य शुष्कं कृत्वा चूर्णं कार्य्यं द्वात्रिंशद्भागा पञ्चद्रव्यभागा (१) शूरणस्येत्यर्थ चित्रकस्य चित्रक-मूलस्य त्वत्र षोडशभागा शुण्ठ्याश्चत्वारो भागा मरिचस्य द्वौ भागौ गुडेन पिण्डिकां कृत्वादेति—सकलद्रव्यद्विगुणितेनेत्यर्थ । अर्शसामिति बहुवचनत्वेन षड्विधत्व-मित्यर्थ । परामत्यनेन त्रिदोषजत्वमस्या दर्शितम् ॥ २४।२५ ॥

अथ शूरणवटकानाह, शूरण इति —शूरण शुष्कशूरणचूर्णं तस्य षोडशकर्ष प्रमाणम् । वृद्धदारकोऽप्येवम् । मुशली तालमूली मूशरीशब्दवाच्या, सा अष्टकर्ष-

शिवा विभीतको धात्री विडङ्गं नागरं कणा।
भल्लात पिप्पलीमूल तालीशञ्च पृथक् पृथक् ॥ २७ ॥
चतुर्भागप्रमाणानि त्वगेला मरिचं तथा।
पृथक् द्विभागमात्राणि ततस्तेनैव चूर्णयेत् ॥ २८ ॥
द्विगुणेन गुडेनाथ वटकान् कारयेद्बुधः।
प्रबलाग्निकरा एते तथार्शोनाशना परा ॥ २९ ॥
ग्रहणीं वातकफजा श्वास कासं क्षयामयम्।
प्लीहान श्लीपदं शोथ प्रमेहञ्च भगन्दरम् ॥
निहन्युः पलितं हृद्या: (१) तथा मेध्या रसायना ॥३०॥

कामलादौ मण्डूरवटक ।—

त्रिफला त्रूषण चव्य पिप्पलीमूलचित्रकौ।
दारु माक्षिकधातुश्च दार्वी मुस्त विडङ्गकम् ॥ ३१ ॥
प्रत्येकं कर्षमात्राणि सर्वद्विगुणित तथा।
मण्डूरं चूर्णयेच्छुद्ध गोमूत्रेऽष्टगुणे क्षिपेत् ॥ ३२ ॥

लिति भवति। चित्रकजटाचूर्णमप्यवमेव। शिवादितालीशान्त नवद्रव्य प्रत्येक चतु कर्षमितम्, तव शिवा हरीतकी। धात्री आमलकी। कणा पिप्पली। भल्लात भल्लातकफलानि। तालीश प्रसिद्धम। त्वगेलामरिचमपि द्विकर्षमाव प्रत्येकम। तेनैव चूर्णेदित्यनेन चूर्णोक्तविधिना चूर्णयेदित्यर्थ। द्विगुणेन गुडेनेति—मकरध्वजचूर्णटव्यात गुडो द्विगुणितो ग्राह्य। ग्रहणीं वातकफजामिति—वातजा कफजा वातकफजा वा। क्षयामय क्षयरोगम्। पलित वार्द्धकम। हृद्या एके हृद्येति स्थाने ‘ह्रद्यात पठन्ति व्याख्यानयन्ति च। मेध्या इति—बुद्धिप्रदा। रसायना इति—जराव्याधिविध्वसका ॥ २९—३० ॥

इदानी मण्डूरवटकानाह, त्रिफलेति।—त्रिफला हरीतक्यादिकम्। त्रूषणं त्रिकटकम्। दारु दवदारु। माक्षिकधातु स्वर्णमाक्षिकम्। दार्वी दारुहरिद्रा। एके ‘दारुमाक्षिकधातुस्थक् दार्व्या मुस्त विडङ्गकम्’ इति पठन्ति, तव दारुहरिद्राया-

---

* हृद्या इति पाठ एव युक्तियुक्त तन्त्रान्तरदर्शनात् हृद्या इति पाठस्य निरर्थकत्वाच्च।

पक्वा च वटकान् कृत्वा दद्यात्तक्रानुपानत ।
कामलापाण्डुमेहार्श -शोथकुष्ठकफामयान् ॥
ऊरुस्तम्भमजार्णञ्च प्लीहानं नाशयेदपि ॥ ३२ ॥

विषमज्वरादौ पिप्पलीमोदक ।—

(क्षौद्राद्विगुणित सर्पिर्घृतार्द्विगुणपिप्पली ।
सिता द्विगुणिता तस्या क्षार देय चतुर्गुणम् ॥
चातुर्जात क्षौद्रतुल्य पक्वा कुर्याच्च मोदकान् ।
धातुस्थाश्च ज्वरान् सर्वान् श्वास कासञ्च पाण्डुताम् ॥
धातुक्षय वह्निमान्द्य पिप्पलीमोदको जयेत् ॥)

ज्वरेण याह्या श्रेष्ठत्वात्, काष्ठ त्वगभावे गृह्यत, न तु त्वक्शब्देन गुडत्वक् याह्या, यतस्तन्नान्तरं चतुर्दशद्रव्य मिलितम्। सर्वाद्विगुणित मण्डूरमिति—समानमिलितात शकलद्रव्यचूर्णात मण्डूरचूर्ण द्विगुण देयमित्यर्थ, मण्डूर लौहकिट्ट लौहमलमित्यर्थ। यद्वा—पुराणमण्डूरमिति विख्यात गुणाधिक्यात, तथा हि—"शतीद्भूतस्य किट्ट मध्यद्वाशीतिवार्षिकम। अधस षोडशवर्षीय तत्र लौह विशेषतम॥" इति। क्वचित लौहकिट्टात पृथक् पाठेन द्रव्य मण्डूरमिति वदन्ति। गुडमिति मण्डूर मित्यर्थ, "मण्डूर चूर्णत गुडम" इति वचनात्। अत्र चूर्णमञ्जनसदृश चूर्णीभूतम् एतादृशमेव श्रेष्ठ भवति। गुडमिति—भावनेन सप्तधा गोमूत्रे निर्वापणादना शुद्धि, अत एवोक्त तन्नान्तर—"निवाप्य बहुशो मूत्रे मण्डूर याह्यमिष्यते" इति। कर्त्तव्य तस्य—मण्डूरचूर्णमेव पृथक् गोमूत्रे पक्तव्यम, आसन्नपाके च तस्मिन् त्रिफलादि-चूर्णप्रक्षेप, यत चूर्णाना पाको नास्तीति, अवार्वाचीने क्वचित श्लोक —"प्रायेण न पाकयुक्तानां भरिचूर्णस्य तेन हि। आसन्नपाके प्रक्षेप खल्वस्य पाकमागत॥" पाकलक्षणमपि प्रसङ्गतो लिख्यते यथा—'रसो गन्ध गुण पाके वर्त्ति स्याङ्गाढमर्दनात्" इति। अष्टगुण गोमूत्रे इति—मूत्रन्तु मण्डूरादष्टगुण भवति, तथा हि—'याह्य त्वष्टगुण मूत्र गुडमण्डूरचूर्णत" इति। एके मण्डूर चूर्णत्रय सर्वे गोमूत्रेऽष्टगुण क्षिपेत' इति पठन्ति, तत्र शकलद्रव्यादष्टगुण गोमूत्र याह्यम्, एतदकृतम् अत्र पाठो बहुपुस्तकेषु न दृष्ट। कफामयानिति—कफरोगान्। ३१—३२॥

प्रमेहादौ चन्द्रप्रभागुग्गुलुः।—

चन्द्रप्रभा वचा मुस्त भूनिम्बामृतदारुकम।
हरिद्राऽतिविषा दार्वी पिप्पलीमूलचित्रकौ ॥ २४ ॥
धान्यकं त्रिफला चव्यं विडङ्गं गजपिप्पली।
व्योषं माक्षिकधातुश्च द्वौ क्षारौ लवणत्रयम् ॥ २५ ॥
एतानि शाणमात्राणि प्रत्येकं कारयेत् बुधः।
त्रिवृद्दन्ती पत्रकञ्च त्वगेला वंशरोचना ॥ २६ ॥
प्रत्येकं कर्षमात्राणि कुर्य्यादेतानि बुद्धिमान्।
द्विकर्षं हतलौहस्य चूर्णस्य सितया भजेत् ॥ २७ ॥
शिलाजत्वष्टकर्षं स्यात् † अष्टौ कर्षाश्च गुग्गुलोः।
एभिरेकत्र सङ्मृष्टैः कर्त्तव्या गुटिका शुभा ॥ २८ ॥
चन्द्रप्रभादि विख्याता सर्वरोगप्रणाशिनी।
प्रमेहान् विंशतिं कृच्छ्रं मूत्राघातं तथाऽश्मरीम् ॥ २९ ॥

इदानीं चन्द्रप्रभागुटिकां दर्शयन्नाह, चन्द्रप्रभेत्यादि।—‡चन्द्रप्रभा कर्पूरः, एके चन्द्रप्रभाशब्देन गटी शतावरीं वा कथयन्ति सज्ञाशब्दत्वात्। भूनिम्ब किरात। अमृत गुडूची। दारुक देवदारु। क्वचित् § "भूनिम्बामरदारुकम्" इति पाठो दृश्यते, तत्रामरदारु देवदारु। दार्वी दारुहरिद्रा। व्योष त्रिकटुकम्। माक्षिकधातु स्वर्णमाक्षिकम्। द्वौ क्षारौ इति—यवक्षारपचारौ। लवणत्रयमिति—सैन्धव सौवर्चल विड लवणत्रयम्। त्रिवृद्वृक्षाख्यं। दन्तीति—दन्तीमूलत्वक्, तदभावे दन्तीबीजान्यपि नवाक्षं देयानि इति कश्चित् सम्प्रदायः, न सर्वत्र। हतलौहं भस्मीकृतलौहचूर्णम्। शिलाजतु प्रसिद्धं, तच्चात्र शुद्धं ग्राह्यं, शोधनप्रकारश्चात्र ज्ञातव्यो विस्तरभयात्। शेषं द्रव्यं सुबोधम्। लाघवार्थं चैतेषां व्याख्या

---

* रसेन्द्रे चारलवणयोरेकैकस्य पाठः, तथा च 'लवणचारानशाधुग' इति।

† रसेन्द्रे गुग्गुलो कर्षद्वयमाधानिर्दिष्टम्।

‡ चन्द्रप्रभा इत्यस्य कर्पूरार्थः कुत्रापि कोषादौ न दृश्यते। रसेन्द्रे अष्टौ पाठः।

§ अमरदारुरित्येव पाठो युक्तः, रसेन्द्रे सुरदारुपाठदर्शनात् गुडूचीशब्दादर्शनाच्च।

विबन्धानाहशूलानि मेहनं ग्रन्थिमर्बुदम्।
अन्त्रवृद्धिं कटीशूलं श्वासं कासं विचर्चिकाम् ॥ ४० ॥
अण्डवृद्धिं तथा पाण्डुं कामलाञ्च हलीमकम्।
कुष्ठान्यर्शांसि कण्डूञ्च प्लीहोदरभगन्दरम् ॥ ४१ ॥
दन्तरोगं नेत्ररोगं स्त्रीणामात्तवजा रुजम्।
पुंसां शुक्रगतान् दोषान् मन्दाग्निमरुचिं तथा ॥ ४२ ॥
वायु पित्त कफं हन्यात् वृष्या बृंहा रसायनी।
चन्द्रप्रभाया कर्षस्तु चतुःभागो विधीयते ॥ ४३ ॥

गुग्गादौ काङ्कायनगुटिका।—

यमानी जीरक धान्यं मरिचं गिरिकर्णिका।
अजमोदोपकुञ्चो च चतुःभागाः पृथक् पृथक् ॥ ४४ ॥
हिङ्गु षट्शाणिकं कार्य्यं क्षारौ लवणपञ्चकम्।

सुबोधा ज्ञातव्या। चन्द्रप्रभादिविख्यातेति—चन्द्रप्रभेयं वटी आदिविख्याता पूर्वं प्रसिद्धेत्यर्थः, चन्द्रप्रभेवेत्यर्थः, अस्या सततमभ्यासाच्चन्द्रस्येव प्रभा कान्तिर्भवतीति, यद्वा, चन्द्रप्रभा नाम द्रव्यमादियस्या। सर्वरोगमिति—अवशिष्टं रोगजातमुत्कटरोगसमूहात्, तमपि नाशयितुं योग्या भवतीति भावः। क्रुञ्च शुक्रक्रुञ्चम्। विबन्धो वातादीनामप्रवृत्तिः। आनाहः उदरापूरः। मेहनमिति यद्यप्येवापदशशुक्रदोषादशोऽभिधीयन्ते। बल्या बलकरी। वृष्या शुक्रवृद्धिकरी। रसायनी जराव्याधिविनाशिनीत्यनेन पौनरुक्त्येन प्रभावोत्कृष्टत्वमस्या दर्शितम्। "चन्द्रप्रभाया कर्षस्तु चतुर्भागो विधीयते" इति पादद्वयं क्षेपकमामनन्ति कोचित् ॥ ३४—४३ ॥

अथ काङ्कायनगुटिकाविवरणमाह, यमानीति।—अत्र †गिरिकर्णिका "गणियारी" शब्दवाच्या, लोके "इस्कन्द" इति प्रसिद्धा। उपकुञ्चौ कृष्णजीरक।

---

* चक्रदत्तरसेन्द्रसारायुक्तकाङ्कायनेन सह एतस्य महानन्तरा दृश्यते।

† गिरिकर्णिकाशब्दः स्वतापरागितार्थे आस्फोतार्थे च आयुर्वेदटीकाकारैः व्यवह्रियते। बङ्गदेशे गणियारीशब्दः अग्निमन्थगणिकारिकादिशब्दानामपभ्रंशरूपे प्रसिद्धः, न तु गिरिकर्णिकायाः, मन्ये आस्फोता एव टीकाकारस्य दृष्टः "गणियारी" "इस्कन्द" इति भाषया प्रसिद्धा इति।

त्रिवृच्चाष्टमितैः शाणैः प्रत्येकं कल्पयेत् सुधीः ॥ ४५ ॥
दन्ती शटी पौष्करञ्च त्रिवृद्दारु दाडिमं शिवा।
चित्रोऽम्लवेतस शुण्ठी शाणैः षोडशभिः पृथक् ॥ ४६ ॥
बीजपूररसेनैषा गुटिका कारयेद्बुधः।
घृतेन पयसा मद्यैरुष्णोदकेन वा ॥ ४७ ॥
पिबेत् काङ्कायनप्रोक्ता गुटिका गुल्मनाशिनीम्।
मद्येन वातिकं गुल्मं गोचीरेण च पैत्तिकम् ॥ ४८ ॥
सूरेण कफगुल्मञ्च दशमूलैस्त्रिदोषजम्।
उष्ट्रीदुग्धेन नारोगा रक्तगुल्मा विनाशयेत् ॥
हृद्रोगं ग्रहणीं शूलं क्रिमीनर्शासि नाशयेत् ॥ ४८ ॥

आसवादि योगराजगुग्गुलु।—

नागरं पिप्पली चव्यं पिप्पलीमूलचित्रकौ।
भृष्टं हिङ्गुजमोदा च सर्षपो जोरकाह्वयम् ॥ ५० ॥

हिङ्गुजं भर्जितं देयम्। चाराविति—यवक्षार खर्जिकाक्षार। चव्यमत्र प्रसिद्धम्। त्रिवृद्विशेषः। दन्ती प्रसिद्धा। शटी कचूरभेदः। पौष्कर पुष्करमूल मद्यादौ कथनेन। दारु दारुहरीजम्। शिवाऽत्र हरीतक्यौ। चित्रकश्चित्रकजटा। पलशत उक्तमानतुलितानां चूर्णं कृत्वा गुटिकायोग्यान परिमितेन बीजपूररसेनाम्ल्यं मोदकवत् कार्या। घृतादिनुपान मात्रान्यमुक्ता विशेषानुपान मद्यादिक यदुक्तं तत्र त्रिदोषगुल्मे त्रिद्रव्यम्, न दोष योजनीयः। गुडमत्र गोगुडम्। दशमूलैरिति—क्वथितदशमूलकाथेन। काङ्कायनप्रोक्तामिति—काङ्कायनाचार्येण प्रोक्ता कथिता गुटिकामित्यर्थः। तत्पश्चात् गुटिकायनशोधिनाशिनी विहिता, तथा हि—"काङ्कायनेन शिवेत्य शुल्कारोगिभिर्विना। कथिनी गटिका ह्येव गुल्मानां विनाशन ॥" इति ॥ ४४—४९ ॥

अथ योगराजगुग्गुलुवटकमाह, नागरमिति।—नागरं शुण्ठी। भृष्टं हिङ्गुजमोदेति—भर्जितं हिङ्गु देयम उत्क्लेदभयात्, यत,—"चूर्णेषु भर्जितं हिङ्गु देयं सोत्क्लेदकरणत" (ग्रा० मञ्ज० ६ अ०) इति। अजमोदाऽत्र यवानी ग्राह्या, अन्य परि-

शोधोक्त्य चक्रदत्ते अर्शोऽधिकारोक्तकाङ्कायनादिक विद्यते, तत्र च उत्तरार्द्धे "भिषग्भिर्जतमिति प्रोक्त श्रेष्ठमशोविकारणाम्" इति पाठ। उक्त च काङ्कायनशोधनेन सह एतस्या काङ्कायनगुटिकाया महान् भेद।

वेणुकेन्द्रयवा पाठा विडङ्गं गजपिप्पली ।
कटुकाऽतिविषा भार्गी वचामूर्वे त्रिभागतः ॥ ५१ ॥
प्रत्येक शाणकानि स्युर्द्रव्याणीमानि विंशतिः ।
द्रव्येभ्यः सकलेभ्यश्च त्रिफला द्विगुणा भवेत् ॥ ५२ ॥
एभिश्चूर्णीकृते सर्वे समो देयश्च गुग्गुलुः ।
वङ्गं रौप्यञ्च नागञ्च लोहमारस्तथाऽभ्रकम् ॥ ५३ ॥
मर्दयेत् कलनिर्गुण्ड्या प्रत्येकं पलमिश्रितम् ।
गुडपाकसमं कृत्वा इदं दद्याद्यथोचितम् ॥ ५४ ॥
एकपिण्डं ततः कृत्वा धारयेत् घृतभाजने ।
गुटिका शाणमात्रास्तु कृत्वा याह्या यथोचिता ॥ ५५ ॥
गुग्गुलुर्योगराजोऽयं त्रिदोषघ्नो रसायनः ।
मैथुनाहारपानानां त्यागो नैवात्र विद्यते ॥ ५६ ॥

काञ्जनमाह । नीराजनमूलमिति—वेणुकेन्द्रयवेन विशिष्टम् । वेणुका प्रसिद्धा । गजपिप्पली प्रसिद्धा । भूम्यां पीलुपर्णी । शेषं प्रसिद्धम् । एतत् विंशतिसङ्ख्याकं द्रव्यगणं त्रिफलाशाणतुलितनिम्बं, प्रत्येकं टङ्कमितमाहुः । सकलद्रव्येभ्यस्तु त्रिफलाश्च द्विगुणान् देयं, तच्च चत्वारिंशत् शाणमितनिम्बं । त्रिफलाऽप्यत्र सप्तमाषा । गणनाया तुलनाया वा साम्यत्वमस्या । समसमो गुग्गुलुर्देय इति—तेन षष्टिशाणमितो गुग्गुलुर्भवति । एकपिण्डमित्यादिवाक्येनास्य कारणार्थं यावता पिण्डीभूतं स्यात् तावत्परिमाणेन घृतं याह्यमिति वैद्यानां व्यवहारोऽस्ति । पिण्डमेव कृत्वा निधानादिना ततः एव घृतभाजने धारयेत्, अतिस्निग्धत्वात् । गुटिका शाणमात्रास्त्विति—यद्यपि शाणपरिमिता गुटिका भवति, तथापि भक्षणावसरे यथोचिता याह्या तेन दोषादिकं बोध्य देया इति तात्पर्यार्थं, तथा चोक्तं—"चत्वारो माषका हीने मध्ये त्वष्टौ च माषकाः । श्रेष्ठे द्वादशका प्रोक्ता कोद्रविज्ञाय तत् विधा ॥" इति, यद्वा—शोधनार्थेऽस्य गुग्गुलो कर्षं शमनार्थे तु माषचतुष्टय इति व्यवहारः । मैथुनाहारपानानामित्यादि—अस्याभ्यासे मैथुनादयो न त्याज्या मैथुनं स्त्रीसेवा । एके "मैथुनाहारपानाभ्यां प्रयोजनञ्चात्र विद्यते

* "एके" इत्यारभ्य 'शरदि स्मरम्' इति यावत् व्याख्यानम् असङ्गतम् प्रक्षिप्तञ्च ।

सर्वान् वातामयान् कुष्ठान्शोषं ग्रहणीगदम्।
प्रमेहं वातरक्तञ्च नाभिशूलं भगन्दरम्॥ ५७॥
उदावर्त्तं क्षयं गुल्ममपस्मारमुरोग्रहम्।
मन्दाग्निं श्वासकासञ्च नाशयेदरुचिं तथा॥ ५८॥
रेतोदोषहरं पुंसां रजोदोषहरं स्त्रियाम्।
पुंसामपत्यजनकं वन्ध्यानां गर्भदस्तथा॥ ५९॥
रास्नादिक्वाथसयुक्तो विविधं हन्ति मारुतम्।
काकोल्यादिघृतात् पित्तं कफमारग्वधादिना॥ ६०॥
दार्वीघृतेन मेहाञ्च गोमूत्रेण च पाण्डुताम्।
मेदोदुष्टिञ्च मधुना कुष्ठं निम्बघृतेन च॥ ६१॥
छिन्नाक्वाथेन वातास्रं शोथं शूलं कणाघृतात्।
पाटलाक्वाथसहितो विषं मूषिकजं जयेत्॥ ६२॥
त्रिफलाक्वाथसहितो नेत्रार्त्तिं हन्ति दारुणाम्।
पुनर्नवादिक्वाथेन हन्यात् सर्वोदराण्यपि॥ ६३॥

इति पठन्ति एतत् सङ्गतं, तेन मैथुनादयो वाजीकरणमात्रं भवन्तीत्यर्थः। किन्तु उच्यते यत,—"वाराह्यरसयूषाक्तं दोषधात्ववलोचितम्। बुभुक्षितो भावयानमश्नीयाद्गुडसेवकं॥" इत्यादिवचनात् उचितं यथा मैथुनमपि, तथा हि—"मैथुनं वामतः कामं हेमन्ते वाजीकृता हिमे। व्याहतसन्ततरतिर्दृढपञ्चाङ्गदीपितः॥ प्रकामञ्च निषेवेत मैथुनं शिशिरागमे। शीते रात्रौ दिवा शीते प्रावृट्वर्जितवर्षणे। वसन्ते च दिवा रात्रौ ना स्मरेत् शरदि स्मरम्॥" इति। अस्यानुपानविशेषमाह, रास्नादिक्वाथसयुक्त इत्यादि।—रास्नादिक्वाथः क्वाथकल्पनायां कथितः, स च बृहद्रास्नादिर्लघुर्वा। काकोल्यादि चूर्णकल्पनायां ज्ञातव्यं, तच्च जीवनीयादिगणसञ्जम्, अस्य घृतेन क्वाथेनेत्यर्थः। आरग्वधादिनेति—आरग्वधादिगणक्वाथेनेत्यर्थः, अयमपि क्वाथकल्पनायाम्। दार्वीघृतेनेति—दार्वी दारुहरिद्रा तस्या घृतेन क्वाथेन। गोमूत्रेण च पाण्डुतामिति—अवाजीकरणत्वे प्रकृते व्यवहारात्। मधुना क्षौद्रेण। निम्बघृतेनेति—निम्बक्वाथेनेत्यर्थः। छिन्ना गुडूची, तस्या क्वाथेन। पाटला प्रसिद्धा, तस्या मूलत्वक् ग्राह्या। त्रिफला हरीतक्यादिकम्। पुनर्नवादिक्वाथः क्वाथकल्पनायां प्रसिद्धः॥ ५०—६३॥

अतरक्तादौ कैशोरगुग्गुलु ।—

त्रिफलायास्त्रय प्रस्था प्रस्थैका चामृता भवेत् ।
मङ्क्त्वा लोहपात्रेण सार्द्धं द्रोणाम्बुना पचेत् ॥ ६४ ॥
जलमर्द्धस्थित ज्ञात्वा गुग्गुलोश्चस्त्रगालितम् ।
तत क्वाथे क्षिपेच्छुद्ध गुग्गुलुं प्रस्थसम्मितम् ॥ ६५ ॥
पुन पचेदय पात्रे दर्व्या सङ्घर्षयेन्मुहु ।
मान्द्रीभत ततो ज्ञात्वा गुडपाकसमाकृतिम् ॥ ६६ ॥
चूर्णीकृत्य ततस्तत्र द्रव्याणीमानि निक्षिपेत् ।

अधुना कैशोरगुग्गुलवटकानाह, त्रिफलाया इत्यादि ।—सम्मिलितत्रयस्य त्रय एव प्रस्था तेन द्वादशकुडवा इत्यर्थ । प्रस्थैका चामृता भवेत इति—अमृता गुडूची, तस्या प्रस्थैकम, एके 'द्विप्रस्थममृता भवेत' इति पठन्ति अन्ये पाठ प्रचरति आहतत्वात यत्नान्तरदर्शनाद्वा, तथा च * 'द्वात्रिंशच्छिन्नरुहा-पलानि दद्यानि यत्नत" इति। मङ्क्त्वेति त्रिफलागुडूचीमित्यर्थ । द्रोणाम्बुना पचेदिति—एतद्द्रव्य चतुराढकपरिमितेन जलेन साङ्ग परिपचेदिति क्वाथविधानेन क्वाथार्द्धावशेष यत वस्त्रगालित स्त्रीयात। अपरकार्य्यमाह, गुग्गुलु गुग्गुलुमित्यादि—गुग्गुलोऽस्य निष्पावादित्वेन सप्तरात्र स्थापितत्वात, यद्वा, गुग्गु जायन्तेऽस्मिन् मित्यामनन्ति, यत गुग्गुलौ पञ्चजातय, तदयथा—'सवर्णवर्ण प्रथमो द्वितीय कुसुमद्युति । तृतीय पद्मरागस्तु चतुर्थश्चन्द्रनौलक ॥ पञ्चमो माहिषाक्षश्च नामत शास्त्रकोविदै ॥" इति। तत्र महिषाक्ष विधितम्, उक्तञ्च तत्रान्तरै— "वरमहिषलोचनीदरसन्निभवर्णस्य गुग्गुलो प्रस्थम" इत्यादि। अथ पात्रे लोहपात्रे दर्व्या सङ्घर्षयेन्मुहुरिति—दर्वी सञ्चालनक्रियाया प्रसिद्धैव, मुहुरिति—वारवार, कृत ? दग्धभयात्। गुडपाकसमाकृतिमिति—यथा गुडपाक तथा गुग्गुलो पाकमित्यर्थ, यत,—"गुडवद्गुग्गुलो पाक † सुगन्धस्तु विशेषत इति। कथञ्चिद् गुडपाकस्य तत्रान्तरे प्रथित, तदयथा—'तीक्ष्णपूर्णे यदा पात्रे क्षिप्तो गुग्गुलु गुड । क्षिप्तस्तु निश्चलस्तिष्ठेत पतितस्तु न शोभते ॥ एष पाको गुडाख्यो सर्वेषा परिकीर्त्तित ॥" इति। अपरकार्य्यमाह चूर्णीकृत्य ततस्तत्रेति।—च

* पाठोऽय चक्रपाणिसम्मत, तथा च—"द्वात्रिंशच्छिन्नरुहापलानि दद्यात् यत्नेन" इति।

† सवत्सस्तु विशेषत इति चक्रपाठ ।

त्रिफला - द्विपला ज्ञेया गुडूची पलिका मता ॥ ६७ ॥
षडङ्गं त्र्यूषणं प्रोक्तं विडङ्गानां पलार्द्धकम्।
दन्ती कर्षमिता कार्य्या त्रिवृत् कर्षमिता स्मृता ॥ ६८ ॥
ततः पिण्डीकृतं सर्वं घृतपात्रे विनिक्षिपेत्।
गुटिकां प्राणमात्रेण युञ्जयाद्दोषाद्यपेक्षया ॥ ६९ ॥
अनुपाने भिषक् दद्यात् कोष्णं नीरं पयोऽथवा।
मञ्जिष्ठादिमृतं वाऽपि युक्तियुक्तमुतापरम् ॥ ७० ॥
जयेत् सर्वाणि कुष्ठानि वातरक्तं त्रिदोषजम्।
सर्वव्रणानि गुल्मानि प्रमेहपिडकास्तथा ॥ ७१ ॥
प्रमेहोदरमन्दाग्नि-कासश्वयथुपाण्डुजान्।
हन्ति सर्वामयान्नित्यमुपयुक्तो रसायनं ॥ ७२ ॥

इति—गुडपाकादनन्तरं, तत्र इति—गुग्गुलुपाकद्रव्ये। त्रिफला द्विपला ज्ञेयेत्यादि—सम्मिलितत्रिफलायाः द्विपलमितं चूर्णं ग्राह्यम्। गुडूची पलपरिमिता, व्यवहारतस्तु गुडूच्या सत्त्वमादाय क्षिपेदिति मनोहरः। त्र्यूषणं त्रिकटुकं, सर्वं मिलित्वा षडङ्गम्। विडङ्गचूर्णमर्द्धपलम्। दन्तीमूलं कर्षमितम्। कोविदारत्वचं वीजान्यत्र क्षिपन्ति, तच्च सर्वमतम्। त्रिवृद्विशेषे तत्र पिण्डीकृतमित्यादिना अत्र कर्त्तव्यविधिरपि योगराजवत् बोद्धव्यः। गुटिकां प्राणमात्रेणेति—प्राणपरिमितां गुटिकां कृत्वा दोषाद्यपेक्षया, न तु नियतप्राणमात्रमेव, दोषापेक्षया यथा—कफे निष्कं, पित्ते द्विनिष्कं वायौ त्रिनिष्कम् इति। कोष्ठापेक्षया यथा "पञ्चाशो माषका होने मध्ये त्रिंशत् च माषकाः। श्रेष्ठे दाक्षायणा प्रोक्ता कोष्ठ विज्ञाय तत्त्रिधा॥" इति। ऋत्वपेक्षया यथा 'प्रावृट्काले च शीते च घृतयुक्तं प्रदापयेत्। शरत्काले वसन्ते च दापयेत् त्रिफलायुतम्॥ हेमन्ते शिशिरे चैव गोमूत्रेण समायुतम्॥" इति। अनुपाने तु कोष्णं नीरं पयोऽथवेत्यादि—पक्षे नीरं, मञ्जिष्ठादिमृतमिति—मञ्जिष्ठादिक्वाथे क्वाथकल्पोक्ता क्षेपितम्। युक्तियुक्तमुतापरमिति—उताथवा अपरमनुपानं युक्तियुक्तं रोगसात्म्यं दद्यादिति सम्बन्धः तथा हि—"यस्य रोगस्य यत् सात्म्यं दद्यात् तं तुपानकम्" इति। एतच्चाने

---

* "त्रिफलाऽर्द्धपला" इति चक्रपाणिसम्मतः पाठः गूढार्थदीपिकाकारस्यापि अयमेव पाठः समादृतः।

वासादिना नेत्रगदान् गुल्मादीन् वरुणादिना।
क्वाथेन खदिरस्यापि व्रणकुष्ठानि नाशयेत्॥
कैशोरकाभिधानोऽयं गुग्गुलुः कान्तिकारकः॥ ७३॥
अम्लं तीक्ष्णमजीर्णञ्च व्यायाम ममातपम्॥
मद्यं रोषं त्यजेत् सम्यग्गुणार्थी पुरसेवकः॥ ७४॥

भगन्दरादौ त्रिफलागुग्गुलुः।—

त्रिपलं त्रिफलाचूर्णं कृष्णाचूर्णं पलोन्मितम्।
गुग्गुलुं पञ्चपलिकं घोदयेत् सर्वमेकतः॥ ७५॥
ततस्तु गुटिकां कृत्वा प्रयुञ्जीताद्भ्रपेचया।
भगन्दरं गुल्मशोथावर्शांसि च विनाशयेत्॥ ७६॥

वक्ष्यमाणमस्ति। वासादिना नेत्रगदानिति—वासादिना वासादिक्वाथेन। वरुणादिना वरुणादिक्वाथेन। गुल्मादीनिति आदिग्रहणात् कृच्छ्राश्मरीप्रभृतीन्। कृच्छ्रं मूत्रकृच्छ्रम्। खदिरस्य क्वाथेनेति—खदिरो हृच्चावर्शेषु तस्य मूलत्वक्। कैशोरगुग्गुलुरिति—कैशोरो बालकः तस्य रूपं कैशोरकं, तेनाभ्यासे बालकस्येव रूपं भवतीत्यर्थः, अत एव कान्तिकारकं कथितं। अभ्यासे त्याज्यमाह, अम्लमित्यादि।—अम्लमम्लीका मातुलुङ्गादि। तीक्ष्णं राजिकादि। अजीर्णमन्नादिजम्। व्यायाम शरीरायासजनकं कर्म। मम बह्वायासकृत्वकष्टं कर्म। आतपं घर्मसेवां। मद्यं मद्यपानम्। रोषं क्रोधम्। सम्यक् त्यजेदिति यतो अम्लादीनि वातरक्तप्रकोपीणि भवन्ति। एके अम्लं तीक्ष्णमित्यादि श्लोकं न पठन्ति, क्षेपकोऽयमिति मन्यन्ते॥ ६४—७४॥

इदानीं त्रिफलागुग्गुलुवटकमाह, त्रिपलमित्यादि।—सम्मिलितफलत्रिकचूर्णं त्रिपलप्रमाणं ग्राह्यं, तेन हरीतक्यो पलमात्राः, विभीतक पलप्रमाणं, आमलकमपि पलमानमिति। कृष्णा पिप्पली तस्याश्चूर्णं पलप्रमितमिति। गुग्गुलुं पञ्चपालकमिति—पञ्चपलप्रमाणं गुग्गुलुं सङ्कृत्य घृतेन सह सङ्कृत्य चूर्णेन सह मोदका कार्या, अत एव घोदयेदित्युक्तं, घृतमत्र व्यवहारदर्शनात्। वह्न्यपेक्षटत्यादिना भक्ष्य नाम बोद्धव्यम्। गुल्मशोथावित्यत्र—गुल्मश्च शोथश्च। एके "भगन्दरं गुल्मशोथमर्शांसि च विनाशयेत्" इति पठन्ति, तत्र गुल्मेन सहितं शोथमिति॥ ७५।७६॥

प्रमेहादौ गोक्षुरादिगुग्गुलु ।—

अष्टाविंशतिमङ्ग्यानि पलान्यानीय गोक्षुरात् ।
विपचेत् षड्गुणे नीरे क्वाथो ग्राह्योऽवशेषित. ॥ ७७ ॥
तत पुन: पचेत्तत्र पुर मसपलं क्षिपेत् ।
गुडपाकसमाकार कृत्वा तत्र विनिक्षिपेत् ॥ ७८ ॥
त्रिकटु त्रिफला मुस्तं चूर्णित पलमसकम् ।
तत्र पिण्डीकृतस्याच्च गुटिका सुखयोजिता ॥ ७९ ॥
हन्यात् प्रमेह क्रूरांश्च प्रदर सूत्रघातकम् ।
वातास्र वातरोगांश्च शुक्रदोषं तथाऽश्मरीम् ॥ ८० ॥

कुष्ठादौ त्रिफलामोदक ।—

त्रिफलाऽष्टपला कार्य्या भल्लातश्च चतुष्पलम् ।
वाकुची पञ्चपलिका विडङ्गानां चतुष्पलम् ॥ ८१ ॥
हतलोहं त्रिवृद्भैव गुग्गुलुश्च शिलाजतु ।

अथ गोक्षुरादिगुग्गुलुं दर्शयन्नाह अष्टाविंशतीति।—गोक्षुरादिति—पञ्चाङ्गगोक्षुरकस्याष्टाविंशतिपलानि ग्राह्याणि, तानि चतुर्द्रोणे षड्गुणे पानीये सङ्ख्याङ्कावशेषो ग्राह्य: चतुर्द्रोणस्य षण्णवतिपलात्मकत्वात्, अष्टाविंशतेश्च पलपरिमाणात्। तत्र पचेदिति—पुन: पचेत्तस्मिन्नवशिष्टे क्वाथे। तत्राष्टाविंशतिपले पुरं मसपलं क्षिपेत्। तच्च किम्भूतं गुडपाकसमाकारमिति—यथा गुडपाको भवति तथा भवतीत्यर्थ: कार्यश्च, तच्च गुडपाकलक्षणं पूर्वमुक्तम्। तत्र विनिक्षिपेदिति—तत्र गुग्गुलुपाके विनिक्षिपेदक्ष्यमाणद्रव्याणीत्यर्थ। तानि कानि? इत्याह, त्रिकटु त्रिफला मुस्तमिति।—त्रिकटु व्याख्यातम्। त्रिफला हरीतक्यादिकम्। मुस्तं प्रसिद्धम्। एतत सकल पलसप्तक ग्राह्यं प्रत्येक पलमात्रमित्यर्थ। गुटिका सुखयोजितेति—अस्य गुटिका शाणमात्रा प्रकल्प्य यथादोष भक्षणीया इति भाव। हन्यात् प्रमेहक्रूरांश्च। सूत्रघातकम्। वातास्र वातरोगान् हनुस्तम्भादीन् ॥ ७७—८० ॥

अथ त्रिफलामोदकमभ्याह त्रिफलेत्यादि।—त्रिफलाऽष्टपला कार्य्या सम्मिलितफलत्रिकमष्टपलपरिमित भवति। भल्लात भल्लातकफलम्। हतलोहं त्रिवृद्भैवेति—सत्यमृतलौहचूर्णम्। हतलोहं गुग्गुलुश्च शिलाजतु चिकत्रिकम्' इति पाठे—त्रिकत्रिकं त्रिपलमित्यर्थ।

एकैकं पलमात्रं स्यात पलार्द्धं पौष्करं भवेत् ॥ ८२ ॥
चित्रकस्य पलार्द्धं स्याद्विशाणं मरिचं भवेत् ।
नागरं पिप्पली मुस्ता त्वगेलापत्रकुङ्कुमम् ॥ ८३ ॥
शाणोन्मितं स्यादेकैकं चूर्णयेत् सर्वमेकतः ।
ततस्तत् प्रक्षिपेच्चूर्णं पक्वखण्डे च तत्समे ॥ ८४ ॥
मोदकान् पलिकान् कृत्वा प्रयुञ्जीत यथोचितान् ।
हन्यात् सर्वाणि कुष्ठानि त्रिदोषप्रभवामयान् ॥ ८५ ॥
भगन्दरप्लीहगुल्मान् जिह्वातालुगलामयान् ।
शिरोऽक्षिभ्रूगतान् रोगान् हन्यात पृष्ठगतानपि ॥ ८६ ॥
प्राग्भोजनस्य देयं स्यादध कायस्थिते गदे ।
भेषजं भक्तमध्ये च रोगे जठरसंस्थिते ॥
भोजनस्योपरि ग्राह्यमूर्द्ध्वजत्रुगदेषु च ॥ ८७ ॥

अय पाठस्त्वसङ्गत एव, किन्तु "हतलोह त्रिवृत्त्रैव गुग्गुलस्य शिलाजतु" इति पाठ साधु, तत्र त्रिवृत्त्रिशोत, तेन लौहचूर्णादिशिलाजतुपर्यन्त * पलमात्रमाह । पौष्कर पुष्करमूल, पलार्द्ध ग्राह्यम । नागरादिकुङ्कुमान्त द्रव्यसप्तक शाणोन्मित प्रत्येकमिति भाव । पक्वखण्डे च तत्समे इति—तत्समे सकलद्रव्यसम्भारसाम्ये, तेन † सप्तविंशतिपलानीत्यर्थ । यथोचितानिति—यथादोषापेक्षया । जिह्वातालुगलामयानित्यनेन जिह्वामयान् तालुमयान्, गलामयान् एते मुखरोगे पठिता । हन्यात् पृष्ठगतान् रोगानित्यर्थ । प्राग्भोजनस्येति—प्रात काले । अध कायस्थिते गदे इति—गुदस्थादौ । जठरसस्थिते उदरादौ । ऊर्द्धजत्रुगदेष्विति—शिरोरोगादिषु । भोजनस्योपरि सायङ्काले ॥ ८१—८७ ॥

---

* प्रत्येक पलमात्रमाह इत्येव पाठ कारणीय, अन्यथा लौहादीना चतुर्णा मिलितानां पलमात्रानित्यर्थबोधापत्ते ।

† चिपलादिकुङ्कुमान्तैर्द्रव्यैर्मिलितै शाणोत्तरकर्षद्वयाधिकषड्विंशतिपलानि भवन्ति, न तु सप्तविंशतिपलानीति द्रष्टव्यम् ।

गण्डमालादौ काञ्चनारगुग्गुलु —

काञ्चनारत्वचो ग्राह्य पलाना दशकं भवेत् ।
त्रिफला षट्पला कार्या त्रिकण्टः स्यात् पलत्रयम् ॥८८॥
पलैकं वरुणं कुर्यादेला खर्जूरकं तथा ।
एकैक कर्षमात्रं स्यात् सर्वमेकत्र चूर्णयेत् ॥ ८९ ॥
यावच्चूर्णसिद्धं तैलं वाऽजाक्षीरं गुग्गुलु ।
सङ्कल्प्य सर्वमेकत्र पिण्डं कृत्वा च धारयेत् ॥ ९० ॥
गुटिकां शालमात्रां तां दद्यादेषां यथोचितम् ।
गण्डमाला ज्वरश्वास कुष्ठानि च शमन्त्यलम् ।
ग्रन्थीन् व्रणांश्च गुल्मांश्च कुष्ठानि च शमन्त्यलम् ।
प्रदेयश्चानुपानार्थं क्वाथो मृष्टिकाभव ॥
क्वाथः खदिरसाधन्य पथ्याऽजाक्षीरकं क्वाथकम् ॥ ९२ ॥

पृष्ठौ नाशादिमोदक ।—

निस्तुष माषचूर्णं स्यात्तथा गोधूमसम्भवम् ।
निस्तुष यवचूर्णं च शालितण्डुलज तथा ॥ ९३ ॥

अथ काञ्चनारगुग्गुलु प्रकटयन्नाह, काञ्चनारत्वच इति।—काञ्चनो वृक्षविशेष प्रसिद्ध एव निजनाम्ना, तस्य त्वक् दशपलपरिमिता ग्राह्या। त्रिफलेति—सम्मिलितफलत्रिक षट्पलप्रमितम् त्रिकण्टोऽपि निलिखो वृक्षविशेष, तस्यापि त्रयोदश ग्राह्या। एला त्वक् पत्रक मिति—गुग्गुलुत्रय प्रत्येक कर्षमात्र देयम्। गुग्गुलुत्रय सकलचूर्णसम, तेन त्रिकर्षोत्तराणि विंशतिपलानि भवन्ति। पिण्ड कृत्वेत्यादिना घृतेन सह सङ्कल्प्य स्निग्धभाण्डे धारयेदिति सम्प्रदाय। यथोचितमिति—यथादोषापेक्षया। अनुपानार्थं द्रव्यमाह क्वाथो मृष्टिकाभव इति।—मृष्टिकाया भूस्तृणज, केदारमुण्डो इति लोके। खदिर प्रसिद्ध, तस्य सारो मध्यभागस्थितकाष्ठविशेष। पथ्या हरीतकी। कोष्णमिति—उष्णादक, यत "क शिरो जलमाख्यातम्" इति वचनम् ॥ ८८—९२ ॥

अथ माषादिमोदकमाह, निस्तुषमित्यादि।—माषचूर्णं निस्तुष तुषरहित ग्राह्य, तथेति यद्वाङ्गोधूमचूर्णमपि निस्तुषमित्यर्थ। शालिधान्यनिर्मित, स च

चूर्णमेव पिप्पलीचूर्णं पलिकाभ्युपकल्पयेत् ।
ततः एकीकृतं सर्वं भर्जयेद्गोधूमेन च ॥ ९४ ॥
पर्वमात्रेण सर्वेभ्यस्तत. खण्डं समं क्षिपेत् ।
जलस्य द्विगुणं दत्त्वा पाचयेत् शनैः शनैः ॥ ९५ ॥
ततः पक्वं समुद्धृत्य घृतात् कुर्वीत मोदकान् ।
भुक्त्वा सायं पलार्धन्तु पिबेत् क्षीरं चतुर्गुणम् ॥ ९६ ॥
वर्षान्ते विधिवेत्थं तारार्क्षे यो रसायनम् ।
क्षत्वा रसयेत्सोऽरोगो जायते नरः ॥ ९७ ॥

इति नादापोत्पन्नेन [illegible] ग्रन्थसंग्रहे [illegible] ग्रन्थे [illegible] ग्रन्थे [illegible] ॥ ७ ॥

[illegible]

[illegible]

[illegible]

[illegible]

क्षाराद्दोषा [illegible] क्षीरोदधृ [illegible] क्षीरेण [illegible] क्रियाः ।
सोऽवलेह्य लेहः स्यात्सप्ताला स्यात् पलोन्मिता ॥१॥

यष्टिकी याच्य, तस्य तण्डुलान् आला तज्जात चूर्णं दयम् । पलिकानीति बहुवचनेन मात्रवृद्धादिषिग्वाधीनात्त द्रव्य प्रत्येक पलमात्रमाह कर्त्तव्यविधावव । ततः एकीकृतमित्यादि—चूर्णादष्टमांशेन गोधूमेन चूर्णं मनाग्भर्जयित्वा तदनु सकलचूर्णसमान खण्ड सङ्कृत्य खण्डाद्विगुणितेन जलेन सह पक्वा पलप्रमिता मोदका कार्या । सायं सेव्यमानस्य । पिबेत् क्षीर चतुर्गुणमिति—पलप्रमाण द्रव्य भक्षयित्वा यत्तच्चतुष्टय क्षीरमनुपेयमित्यर्थ । द्वौ मासौ विशेषेण वक्तव्यौ, यत चारात्रौ शुक्रच्युति करा भवत । न क्षायते नर इति—शुक्र धातुं भवतीति तात्पर्यार्थ ॥९३—९७॥

इति श्रीवाक्यात्मज-प्रकाशपण्डित-श्रीमाधवाचार्य-विरचितायां श्रीमाधवदीपिकायां मध्यखण्डे द्वितीयभागे षष्ठकल्पस्थाने नाम सप्तमोऽध्याय समाप्त. ॥ ७ ॥

[illegible] [illegible] [illegible] [illegible] उपसंहरति, क्षाराद्दोषाणामिति ।—

अवलेहे सितागुडद्रव्याणां मात्रा।—

सिता चतुर्गुणा कार्य्या चूर्णाच्च द्विगुणो गुड़ः।
द्रव चतुर्गुण दद्यादिति सर्वत्र निश्चयः॥ २॥

सम्यक्पक्वावलेहलक्षणम्।—

सुपक्के तन्तुमत्त्व स्यादवलेहोऽप्सु मज्जति।
स्थिरत्व पौड़िते मुद्रा-गन्धवर्णरसोद्भव॥ ३॥

क्वाथादीनामिति आदियहणात् खरसफाण्टकल्कादयोऽभिधीयन्ते। घनत्वमिति—सान्द्रत्व यावद्भवति तावत् पाक कर्त्तव्य इति भाव। पाकस्तु क्वाथादीना भवति, यत प्रथमत क्वाथविधिना पाक कृत्वा पश्चात् पाकेन लेह स्यादिति। तन्मात्रेति—तस्यावलेहस्य भक्षणार्थं मात्र पलमित बोद्धव्यम् इति सामान्यमात्र भक्षणेऽभिहितम्॥ १॥

इदानीमनुक्ते सितादीना परिमाणमाह, सितेति।—अनुक्तमात्रावलेहे सिता चतुर्गुणा देया, चतुर्गुणताऽत्र सकलद्रव्यादित्यर्थ। गुड़स्तु द्विगुण इति चूर्णद्रव्यात्। द्रव तोयक्षीरादिक चतुर्गुणम्, अत्रापि चूर्णादिति भाव। सर्वत्र निश्चय इति—स्वतन्त्रे परतन्त्रे वा॥ २॥

अथावलेहस्य सिद्धिलक्षणमाह, सुपक्के इति।—सम्यक् पक्वेऽवलेहे एतादृश लक्षण भवति, कीदृश तदाह. तन्तुमत्त्वमित्यादि—दर्व्या सञ्चालनेन तन्तुसयुक्त इव दृश्यते, तेन सृज्यमानोऽङ्गुलिग्राही भवतीत्यर्थ। अप्सु मज्जति पानीयमध्ये यदा चिप्तस्तदा निमग्नो भवति। स्थिरत्वमिति—निश्चलत्वम्, एतेन द्रवरहित इत्यर्थ, तथा हि—"तोयपूर्णे यदा पात्रे चिप्तो न प्लवते गुड। चिप्तस्तु निश्चलश्चिष्ठेत पतितस्तु न शीर्य्यते॥ एष पाको गुडादीना सर्वेषा परिकीर्त्तित॥" इति। पौड़िते मुद्रेति—तस्मिन्नङ्गुल्यादिपौड़िते सति मुद्रादीनामुद्भवो भवति,

---

* आदियहणात् खरसफाण्टकल्कादयोऽभिधीयन्ते इति यदुक्त तन्न सङ्गत, यत "क्वाथादेर्यत पुन पाकात घनत्व सा रसक्रिया" इत्यत्र पुन शब्दन द्वितीय वारपाको बोध्यत, खरस्य पाक एव न भवति द्वितीयपाकस्तु सुतरां नास्त्येव, एव पिण्डरूपस्य कल्कस्यापि प्रथमपाकरहितस्य पुन पाकेन घनत्वसम्पादन न सम्भवत्येव इति सुधीभिर्विभाव्यम्। आदिपदेन शीतफाण्टयोर्ग्रहणमिति वक्तु शक्यते, यत उष्णतोये निक्षेपात् तयो प्रथमपाक. सम्पद्यते एव इति।

अवलेहे अनुपानम्।—

दुग्धमिक्षुरसो यूषः पञ्चमूलीकषायजः।
वामाक्षाद्यो यथायोग्यमनुपानं प्रशस्यते ॥ ४ ॥

स यथा—

कासे कण्टकार्यवलेहः।—

कण्टकारीतुला नीर-द्रोणे पक्त्वा कषायकम्।
पादशेषं गृहीत्वा च तस्मिंश्चूर्णानि दापयेत् ॥ ५ ॥

---

* मुद्राऽत्र निश्चिता, यदुक्तं—"पौडिते तु यदाऽङ्गुल्या निम्नता तत्र जायते" इति। गन्धवर्णरसोऽत्र इति—सुगन्धोपेत सुरसोपेत इति, योऽवलेहो भवति स सुपक्व इत्यर्थः ॥ ३ ॥

इदानीमनुक्तेष्वनुपानमाह, दुग्धमिति।—दुग्धमिति सामान्यग्रहणेन सर्वाणि क्षीराणि यथादोषं गृह्यन्ते। इक्षुग्रहणं तत्र प्रधानकारणं गृह्यते। पञ्चमूलं कटुकं कृत्वा स कषायोऽभिधीयते यत्र। कषायजं यत्र यत्र इत्यर्थः, तेन पञ्चमूलस्य कषायेण क्षीरं दुग्धं इक्षुरसं च संयोज्य। कषायग्रहणं स्वरसक्वाथकल्कादयो गृह्यन्ते। वामाक्षाद्य इति—वामाक्षाद्यं वक्ष्यमाणम्। यथायोग्यमिति—यत यस्य दोषस्य योग्यं तत यथायोग्यम्, अनेन दोषानुरूपमिति व्याख्यानुसारं कथितम्, तद्यथा—वातेऽम्लमधुरलवणप्रायाः स्निग्धादयः, पित्ते मधुरकषायतिक्तप्रायाः शीतादयः, कफे तिक्तोषणकषायप्रायाः रूक्षादयः। भावा यथा, तथा श्रुतम्—† "अनुपानं प्रयोक्तव्यं कफव्याधौ पलं भवेत्। पलद्वयन्तु पित्ते वातेऽनिलजे च पलत्रयम्॥" इति। यद्वा—'गण्डूषे नावने देये सर्पौ क्षीरे तु पञ्च च। अनुपानं प्रयोक्तव्यं देशकालाद्यपेक्षया॥" इति। अनुपानमिति—अन्नं पश्चात् पानं, तत्र कुतः ? तदाह—"यथा जलगतं तैलं तत्क्षणादेव सर्पति। तथा भेषजमङ्गेषु प्रसरत्यनुपानतः॥" इति ॥ ४ ॥

स यथेति।—तं दर्शयन्नाह, कण्टकारीति—क्षुपकण्टकारिका, सा समूलफल-

---

मुद्रा अङ्गुलीचिह्नम्, अङ्गुलीरेखाश्च इति वृद्धाः।

† चक्रमङ्गुष्ठादौ—"अनुपानं प्रयोक्तव्यं व्याधौ श्लेष्मभवे पलम्। पलद्वयन्तु पित्तजे पित्तजे तु पलत्रयम्॥" इति पाठः।

पृथक् पलानि चैतानि गुडूचीचव्यचित्रकाः।
मुस्त कर्कटशृङ्गी च त्रायमाणं धन्वयासक ॥ ६ ॥
भार्गी राना शटी चैव शर्करा पलविंशतिः।
प्रत्येकञ्च पलान्यष्टौ प्रदद्याद्घृततैलयोः ॥ ७ ॥
पक्त्वा लेहत्वमानीय शीते मधुपलाष्टकम्।
चतुष्पल तुगाक्षीर्याः पिप्पलीना चतुष्पलम् ॥ ८ ॥
क्षिप्त्वा निदध्यात् सुदृढे मृन्मये भाजने शुभे।
लेहोऽयं हन्ति हिक्कार्त्ति-श्वासकासानशेषतः ॥ ९ ॥

चयचोणादौ च्यवनप्राश ।—

पाटलाऽरणिकाश्मर्य्य-विल्वारलुकगोक्षुराः।
पर्ण्यौ बृहत्यौ पिप्पल्य शृङ्गी द्राक्षामृताभयाः ॥ १० ॥
जला भूम्यामलौ वासा ऋद्धिर्जीवन्तिका शटी।

आखा द्राक्षा। नीरद्रोणे इति—चतुराढकपरिमिते पानीये। त्रायमाण प्रत्येक पलप्रमाणमाह। धन्वयासक दुरालभा। राना सुरभी। शर्करा पलविंशतिरिति सगतम्। घृततैलयोरिति मिलित्वा षोडशपलानि। घृतमत्र गोघृतम् आर्ज वा व्याधिविहितत्वात्। तैल कटुतैलमत्र वदन्त्येके यत "कासे श्वासे च हिक्काया कटुतैल प्रयोजयेत्" इति। क्वचिदस्य प्रयोगोऽपि दृश्यते, "गुड कटुकतैलेन मिश्रयित्वा समं लिहेत्। विषमाऽग्नियोगेन श्वास नर्मूलतो जयेत ॥" इति। शीते मधु पलाष्टकमिति—मधु क्षौद्रमष्टपलप्रमाण शीत हिमस्पर्शे विनाग्निपेपितित्यर्थ, यत, —'उष्णात्तमुष्णैकणे च तन्निहन्ति यथा विषम" (सु० सू० ४५ अ०) इति वचनात्। अपराणि द्रव्याण्याह, चतुष्पल तुगाक्षीर्या इत्यादि।—तुगाक्षीरी वाशी। पिप्पली प्रसिद्धा। सुदृढे सतिचिक्कणे। भाजने पात्रे। शुभे अमये मङ्गलत्वात्। अय लेह कण्टकारीलक्ष। अशेषत इति—सम्पूर्णारिष्टदर्शनादपि आसक्षया दित्यर्थ (?)। एतेनास्य प्रामाण्य दर्शितम् ॥ ५—९ ॥

अधुना च्यवनप्राशावलेहमाह, पाटलेत्यादि।—पाटला प्रसिद्धा। अरणि अग्निमन्थक। काश्मर्य गाम्भारी। विल्व प्रसिद्धम्। अरलुक श्योनाक। पर्ण्यौ ते तन्त्र शालपर्णी चेति, तच्च हृद्य "वरार्हद्य" शब्दवाच्यम्। बृहत्याविति—ते बृहत्यौ कण्टकारीद्वयमित्यर्थ। शृङ्गी कर्कटाख्या। भूम्यामलौ तालमखौ।

जीवकर्षभकौ मुस्तं पौष्कर काकनासिका ॥ ११ ॥
मुद्गपर्णी माषपर्णी विदारी च पुनर्नवा ।
काकोल्यौ कमल मेदे सूक्ष्मैलागुरुचन्दनम् ॥ १२ ॥
एकैक पलसम्मानं स्थूलचूर्णितमौषधम् ।
एकीकृत्य महत्पात्रे पञ्चामलशतानि च ॥ १३ ॥
पचेद्द्रोणजले क्षिप्त्वा ग्राह्यमष्टावशेषितम् ।
ततस्तु तान्यामलानि निष्कुनीकृत्य वाससा ॥ १४ ॥

† ऋद्धी इति द्विवचनत्वेन ऋद्धिवृद्धी ग्राह्ये। जीवन्ती शाकविशेष । जीवकर्षभकाविति द्वौ तेन जीवक ऋषभकश्चेति। काकनासिका "कौवाडोडी" इति लोके। विदारी कन्दविशेष । काकोल्याविति द्रव्यद्वय, तेन काकोली क्षीरकाकोली चेति। कमलमुत्पल, तदभावे पद्मबीज ग्राह्यम। मेटे द्वे मेदा महामेदा च। अगुरु कृष्णागुरु । चन्दन श्वेतम। स्थूलचूर्णितमिति—उदूखले मुषलादिभि कुट्टितमित्यर्थ, न तु वस्त्रगालितम। पञ्चामलशतानि चेति—आमलकफलाना गुडकानि पञ्चशतानि अत्र आकृतिमानम्, एव सर्वत्र पलादिमानाभाव, यथा वक्ष्यमाणे अगस्त्यहरीतक्यवलेहे "हरीतकीशत भद्रम" इत्यादि एव भल्लातकगुडे 'भल्लातकसहस्रे हे" इति। यत्र पलादिमानमुक्त तत्र तु पलादिमानेनैव व्यवहार, यथा पूर्वोक्तबाहुशालगुडे—"चतुष्पल स्याद्भल्लात' इति। पचेदिति—इत्थपरिपाट्यव्यवहारात तद्यथा—अखण्डितामलकफल कपटे पोट्टली बद्ध्वा क्वथनीय, तेन तानि मृद्यन्ताम् सु । अष्टावशेषितमिति—अत्र यत गृहीत तत वन्टिप्पणकारमतमालोक्य कृत, इन्दे तु—"ज्ञात्वा गतरस द्रव्य रस गृह्णीत गालितम" इत्यस्य व्याख्यायाम अष्टभागावशेषेण द्रव्याणा गतरसत्व स्यात इति। केचित्तु "ग्राह्य पादावशेषितम" इति पठन्ति, तत्र ‡ सुश्रुते वाग्भटे च "पादशेषे

* चरकवाग्भटादौ काकोली तथा मेदा इति एकवचनान्तपाठ एव न तु काकोलीद्वय तथा मेदाद्वयम्। तथा कमलमित्यत्र उत्पलम् इति पाठ उत्पल नीलोत्पलम्।

† मूले "ऋद्धि" इति एकवचनान्त एव पाठो दृश्यते, स च चरकादिसम्मत। टीकाकारव्याख्या न समीचीना।

‡ सुश्रुते च्यवनप्राशो नास्ति।

दृढहस्तेन सम्पीड्य क्षिप्त्वा तत्र ततो घृतम्।
* पलमष्टमितं तानि किञ्चिद्वह्नाऽल्पवह्निना ॥ १५ ॥
ततस्तत्र क्षिपेत् क्वाथं खण्डञ्चार्द्धतुलोन्मितम्।
लेहवत् साधयित्वा च चूर्णानीमानि दापयेत् ॥ १६ ॥
पिप्पली द्विपला देया तुगाक्षीरी चतुष्पला।
प्रत्येकञ्च त्रिशाणं स्यात्त्वगेलापत्रकेशरम् ॥ १७ ॥
तत्सर्वैकीकृतं सर्वं क्षिपेत् क्षौद्रञ्च षट्पलम्।
इत्येतच्चवनप्रोक्तं च्यवनप्राशसंज्ञितम् ॥ १८ ॥
लेहं वह्निबलं दृष्ट्वा खादेत् क्षीणो रसायनम्।
बालवृद्धक्षतक्षीणा नारीक्षीणाश्च शोषिणः ॥ १९ ॥
वृद्धरोगिणः स्वरक्षीणा ये नरास्तेषु युज्यते।
कासं श्वासं पिपासाञ्च वातासृग्मेहमर्शसम् ॥ २० ॥
वातपित्तं शुक्रदोषं मूत्रदोषञ्च नाशयेत्।
मेधा स्मृतिं क्षोषु हर्षं कान्तिं वर्णप्रसन्नताम् ॥
अस्य प्रयोगादाप्नोति नरो जीर्णविवर्जितः ॥ २१ ॥

रसैः" इत्येवोक्तम्। निष्कुलीकृत्येति—निष्कुलमिति चौमादिकषत्वात् षेधणाद्वा, तेन अस्थिवर्गादिरहितमित्यर्थः। सप्तपलपरिमितेन सर्पिषा तद्वर्जनं कार्य्यं, चक्रदत्तोक्तं—'सिता मत्स्यण्डिकाभावे धात्र्याश्च षट्भर्जनम्। चतुर्भागकृतं प्राश्यं द्रव्यं गतरसं भवेत्॥" इति। † खण्डस्य क्वाथमिति—शैराग्रहणाच्च, खण्डेनापि केचित् व्यवहरन्ति। क्षौद्रमत्र क्षौतीभूते दद्यात्। च्यवनप्रोक्तमिति—च्यवनो नाम मुनिस्तेन प्रोक्तं कथितम्। प्राश्यत इति प्राश्य च्यवनस्य प्राश्य इति भावः। क्षीणो धातुक्षीणः। रसायनमिति—जराव्याधिनाशनम्। नरो जीर्णविवर्जित इति—नरोऽस्य सेवी पुरुष जीर्णविवर्जितः जरारहितो भवतीत्यर्थः। यद्वा,

---

* चरकादौ "तैलसर्पिषो पलद्वादशके" इति पाठः।

† खण्डस्य क्वाथमिति व्याख्यानमसाधु। मूले "ततस्तत्र क्षिपेत् क्वाथं खण्डञ्चार्द्ध-तुलोन्मितम्" इति पाठः, तत्र धात्र्यष्टकभर्जनानन्तरं तत्र भर्जितामलके क्वाथं पूर्वोक्तं पटोलादीनां क्वाथम् अर्द्धतुलोन्मितं खण्डञ्च क्षिपेदित्येवास्य पाठस्य व्याख्या।

रक्तपित्ते कुष्माण्डावलेह।—

निष्कलीकृत्य कुष्माण्ड-खण्डात् पलशतं पचेत्।
निक्षिप्य द्विगुणं नीरमर्द्धशिष्टञ्च गृह्यते॥ २२॥
तानि कुष्माण्डखण्डानि पीडयेद्दृढवाससा।
आतपे शोषयेत् किञ्चिच्छूलाग्नैर्बहुशो व्यधेत्॥ २३॥
क्षिप्त्वा ताम्रकटाहे च दद्यात् * अष्टपलं घृतम्।
तेन किञ्चिज्जर्जयित्वा पूर्वोक्तं तज्जलं क्षिपेत्॥ २४॥
खण्डात् पलशतं दत्त्वा सर्वमेकत्र पाचयेत्।
सुपक्वे पिप्पली शुण्ठी जीरकं द्विपलं पृथक्॥ २५॥
पृथक् पलार्द्धं धान्याकं पत्रैलामरिचं त्वचम्।
चूर्णीकृत्य क्षिपेत्तत्र घृतार्द्धं क्षौद्रमावपेत्॥ २६॥

अजीर्णविवर्जी भवति, तदपि रोगमूलमेव, यत,—"प्रायेणाहार-वैषम्यादजीर्णं जायते नृणाम्। तन्मूलो रोगसङ्घातस्तन्निनाशान्निनश्यति॥" इति॥ १०—२१॥

अथ कुष्माण्डावलेहविवरणं दर्शयन्नाह, निष्कुलीति।—निष्कुलीकृत्येति—त्वक्छज्जादिरहितान् कुष्माण्डशकलानि सङ्गृह्येत्यर्थः। द्विगुणं नीरमिति कुष्माण्ड-परिमाणात्, तेन कुष्माण्डशकलानि तुलापरिमितानि द्वितुलामित नीरमिति, अर्द्धावशिष्ट क्वाथरूप जलम्। शूलाग्नैरिति—काष्ठमयशङ्कुमुखै। बहुशो व्यधेदिति—बहुच्छिद्राणि कुष्माण्डशकलानि कारयेदिति भाव, उक्तञ्च—इत्यभिप्राया पूर्वं निष्कुलीकृत तदनु कृतच्छिद्र पश्चात सखेद्य चौमेण वेष्टयित्वा पीडयेत्, आतप मनाक् सशोष्य पिष्ट्वा पलशत गृह्णीया पक्तव्यम्। तेन किञ्चिज्जर्जयित्वेति—किञ्चिदत यथावाक भर्जयत, तथा हि "मुक्तसर्पिषि कुष्माण्डे पाकौ गन्धेन मुद्रया" इति। तज्जलमिति—अर्द्धावशेषित पूर्वोक्त क्वाथम्। खण्डात् पलशतमिति—शर्करा पलशतम्। घृतार्द्धं क्षौद्रमावपेदिति—क्षौद्र मधु घृतमानादर्द्ध क्षिपेदात भाव। वपेदिति ग्रहणेन शीतीभूते तस्मिन् पश्चात मेलयेदित्यर्थ।

* चक्रदत्तायुर्वेदसारादौ घृतप्रस्थमित्युक्तम्।

ज्वाटेऽग्निमन्द दृष्ट्वा रक्तपित्तो क्षयो ज्वरी।
शोषतृष्णावमिच्छर्दि-श्वासकासक्षतातुरः ॥ २७ ॥
कृष्माण्डकावलेहोऽयं बालदुर्बलेषु युज्यते।
उरःसन्धानकृद्दृष्यो बृंहणो बलकृन्मतः ॥ २८ ॥

अथावलेह खण्डसूरणावलेह :—

युक्त्या कृष्माण्डखण्डस्य सूरणं विपचेत् सुधीः।
अग्नेर्मा मूढवातानां मन्दाग्नीनाञ्च युज्यते ॥ २९ ॥

काश्यं अथवा हरीतक्यवलेह :—

हरीतकीशतं भद्र यवानामाढकं तथा।
पलानि दशमूलस्य त्रिंशतिञ्च नियोजयेत् ॥ ३० ॥
चित्रक [illegible] तथा।
कपिकच्छूः [illegible] भागौ च गजपिप्पली ॥ ३१ ॥
बला पुष्करमूलस्य पृथक् त्रिपलमात्रया।

आतुरस्य शोषादिषु प्रत्येकमभिसम्बध्यते। बालदुर्बलेषु युज्यते इति—सोपलक्षणात् स्थानपरिवर्तनात्। वृष्य पुंस्त्वविवर्धकः। बृंहणो धातुवर्धकः। बलकृद्दोषघ्नो बलकरः इति। १२—२८।

अथानन्तरं खण्डसूरणावलेहमाह, युक्त्येति।—कृष्माण्डखण्डस्य युक्त्या कर्त्तव्यविधिना कृत्वा, सूरणावलेहः कर्त्तव्यः। सुधीरिति वचनेन पूर्वोक्तकृष्माण्डखण्डे यद्यत् यत्प्रमाणं वा कर्त्तव्यता तत्र सकलं विचार्य तेनैव प्रकारेण सूरणावलेहः साध्यः। विशेषेण मूढवातानां मन्दाग्नीनाञ्च युज्यते ॥ २९ ॥

अथ काश्यमल्पहरीतक्यवलेहं दर्शयन्नाह हरीतकीशतमित्यादि।—हरीतकीशतं हरीतकीशतसंख्याकं, न तु हरीतकीफलशतं, "शङ्खा फलानां शतञ्च पलानाम्" इति वचनात्। भद्रमिति—श्रेष्ठं हरीतकीफलशतं, तेन मध्यादिगुणसहितमित्यर्थः, तथा च स्मृतेः—"नवा त्रिंशा पुनः प्रोक्ता वृद्धा गौरी त्रिधा तथाऽम्बिका। निगद्यते या प्रथमं सा भद्रेत्यभिधीयते॥" इति। यवानामाढकमिति—यवोऽत्रविशेषः, तस्य चतुःषष्टिपलानि। केचित्तु "हरीतकीशतं भद्र-यवानामाढकं तथा" इति पठन्ति, तत्र भद्रयवा इन्द्रयवा इति व्याख्यानयन्ति, एतन्न प्रचरति, सर्वेषां सम्प्रदायविरोधात्;

पचेत् पञ्चाढके नीरे यवै: खिन्ने श्रृतं नयेत् ॥ ३२ ॥
तच्चाभयाशत दद्यात् क्वाथे तस्मिन् विचक्षण:।
सर्पिस्तैलाष्टकपलं क्षिपेत् गुडतुला तथा ॥ ३३ ॥
पक्वा लेहत्वमानीय सिद्धे शीते पृथक् पृथक्।
क्षौद्रञ्च पिप्पलीचूर्णं दद्यात् कुडवमात्रया ॥ ३४ ॥
हरीतकीह्यं खादेत्तेन लेहेन नित्यश:।
क्षय कास ज्वर श्वास हिक्कार्शोऽरुचिपीनसान् ॥ ३५ ॥
ग्रहणीं नाशयेदेष बलीपलितनाशन:।
बलवर्णकर: पुंसामवलेहो रसायनम् ॥
विहितोऽगस्त्यमुनिना सर्वरोगप्रणाशन: ॥ ३६ ॥

तस्मात् हरीतकीशत मद्रमिति पाठ साधु। दशमूलस्य विल्वतिपलानि प्रत्येक द्विपलमित्यर्थ। शेष द्रव्य प्रसिद्धम्। यवै खिन्नैरिति उपलक्षणे तृतीया। यवस्विन्नताऽत्र चतुर्भागावशेषे जले एव भवति, तेन चतुर्भागावशिष्टमेव ग्राह्यम्; तन्त्रान्तरेऽप्युक्त—"जलाढके पञ्चभिरद्भिरेव क्वाथ नयेत्" इत्यादि। पक्वा लेहत्वमानीयेति—व्यवहारात् हरीतकीशतस्य कर्षटे पोटलं बद्ध्वा क्वथन, पश्चादुत्तखिन्नहरीतकीशतस्य घृततैलयोर्भजन तदूढाधम, यथा तन्त्रान्तरे सवाथ-सिद्धहरीतक्या हरीतकीभर्जनमुक्त, तदत्र क्वाथे गुडतुला क्षोडयित्वा पाक: कर्त्तव्य, अवतरणसमये पिप्पलीचूर्णप्रक्षेप, शीतीभूते चापरेऽह्नि मधुदानमिति इद्धाना मतम्। सुगन्धार्थं मनाक् चातुर्जातमिति केचित, तदुक्त—"पिप्पली-चूर्णकुडव चातुर्जातावचूर्णितम्" इति। सर्पिस्तैलाष्टकपलमिति यदुक्त * तन्मिलित्वा ग्राह्यम। हरीतकीह्य खादेत तेन लेहेन नित्यश इति—यद्यपि गुडस्य भक्षणमान नोक्त तथापि हरीतकीद्विकपयइक्षणेन लेहस्य † पलमान भवत्येव, यथा तन्त्रान्तरे भागीगुडे "भक्षयेदभयामेका लेहयाड्पल लिहेत्" इति, तेनात्र हरीतकीभक्षणविधानात् गुडपल भक्ष्यमिति। अन्ये तु गुल्माच्छेदे हरीतकीन्यायात् गुड द्विपलमाहु, एतत् सर्वमेव व्याखेबलाबलत्वात् प्रचरति। अगस्त्यमुनिविहित लेहनाम्न सिद्धफलमुच्यत ॥ ३०—३६ ॥

* शिवदासेन पृथगष्टपलमाननिति व्याख्यातम्।
† सुश्रुते कषमानमुक्त, शिवदासेनापि तथैव व्याख्यातम्।

अग्नीरीगादौ कुटजावलेह ।—

कुटजत्वक्तुला द्रोणे जलस्य विपचेत् सुधी'।
कषायं पादशेषञ्च गृह्णीयात् वस्त्रगालितम् ॥ ३७ ॥
त्रिंशत् पलं गुडस्यात्र दत्त्वा च विपचेत् पुन.।
सान्द्रत्वमागत दृष्ट्वा चूर्णानीमानि दापयेत् ॥ ३८ ॥
रसाञ्जन मोचरस त्रिकटु त्रिफला तथा।
लज्जालु चित्रक पाठा विल्वमिन्द्रयवं त्वचम् ॥ ३९ ॥
भल्लातकं प्रतिविषा विडङ्गानि च बालकम्।
प्रत्येक पलसम्मान घृतस्य कुडवं तथा ॥ ४० ॥
सिद्धशीते ततो दद्यान्मधुन कुडव तथा।
जयेदषोऽवलेहस्तु सर्वान्यशोसि वेगत ॥ ४१ ॥
दुनामप्रभवान् रोगानतासारमरोचकम्।
ग्रहणीं पाण्डुरोगञ्च रक्तपित्तञ्च कामलाम् ॥ ४२ ॥
अम्लपित्त तथा शोथ कासश्चैव प्रवाहिकाम्।
अनुपाने प्रयोक्तव्यमाज तक्र पयो दधि ॥
घृतं जल वा जीर्णे च पथ्यभोजो भवेन्नर ॥ ४३ ॥

इदानी कुटजावलेहमाह, कुटजत्वमिति।—कुटजो वृक्षविशेष तस्य त्वक् छल्ली, सा पलशतपरिमिता ग्राह्या। पादशेषमिति—चतुर्थाश कषाय वस्त्रपूत कृत्वा ग्राह्यम्। कुत्रचिदेतन्न प्रचरति, किन्तु पादशेषमिति—पादस्य चतुर्थाशस्य यच्छेष चतुर्भाग तत् ग्राह्यम्, एतेनाष्टभागावशेष कथितम, तथा च तन्त्रान्तरे—"कुटजत्वक्पलशत जलद्रोणे विपाचयेत्। अष्टभागावशेषन्तु कषायमवतारयेत्॥ वस्त्रपूत तत क्वाथ पचेत्तेनैवमागतम्॥" इति। त्रिंशत्पल गुडस्यात्रेति—अत्र क्वाथे गुडस्य पुरातनस्य त्रिंशत पल दत्त्वा पुनर्विपचेदिति यावत सान्द्रत्व भवति। चूर्णार्थमपराणि द्रव्याण्याह, रसाञ्जनमिति—रसाञ्जन प्रतीत, तच्च दार्वीक्वाथसमुद्भवमिति प्रसिद्धि। मोचरस शाल्मलीवेष्टकम्। इन्द्रयव त्वचमिति—इन्द्रयव कुटजबीज, त्वक् गुडत्वक्। दुर्नामप्रभवान् रोगानिति—गुल्मोदरप्रभृतीन्, अनुपाने प्रयोक्तव्यमिति

रक्तातीसारादौ कुटजाष्टकम्।—

कुटजत्वक्तुलामार्द्रां द्रोणनीरे विपाचयेत्।
पादशेषं घृतं नीत्वा चूर्णान्येतानि दापयेत्॥ ४४॥
लज्जालुर्धातकी बिल्व पाठा मोचरसस्तथा।
मुस्त प्रतिविषा चैव प्रत्येकस्यात् पलं पलम्॥ ४५॥
ततस्तु विपचेद्भूयो यावद्वर्वीप्रलेपनम्।
जलेन छागदुग्धेन पीतो मण्डेन वा जयेत्॥ ४६॥
सर्वातिसारान् घोरास्तु नानावर्णान् सवेदनान्।
असृग्दर समस्तञ्च सर्वार्शांसि प्रवाहिकाम्॥ ४७॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां मध्यखण्डे चिकित्सितस्थानेऽवलेहकल्पनानामाष्टमोऽध्याय॥ ८॥

नवमोऽध्यायः।

अथ लेहपरिभाषा।—

लेहस्य पाकविधिमाह च।—

कल्काच्चतुर्गुणीकृत्य घृतं वा तैलमेव वा।

—आज तक्रम्, आज पयः, आज दधि, आज घृतञ्चेति। अत्र पानीयं तक्रादीनामभावात्, एतत् सकलमनुपान यथासात्म्य निषेवेतेत्यर्थः। जीर्णे चेति—द्रव्ये (१) परिणते सति पथ्यभोजी भवेन्नर इति भावः, यतः,—"औषधशेषे भुञ्जन" इत्यादिवाक्यानुरोधात्॥ ३९—४३॥

कुटजाष्टकावलेहमाह, कुटजेति।—अत्र कुटजाष्टकावलेहो व्याख्याया सुगम एवावगन्तव्यः। कर्त्तव्यविधिस्तु पूर्ववत् बोद्धव्यः। दर्वीप्रलेपनम् इत्यवलेहस्य सम्मिश्रितत्वं सूचितं पूर्वोक्तावलेहविधौ ज्ञातव्यम्॥ ४४—४७॥

इति श्रीवात्स्यान्वयप्रकाशवेद्य-श्रीभावमिश्रात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यखण्डे चिकित्सितस्थानेऽवलेहकल्पनानामाष्टमोऽध्यायः॥ ८॥

अथ लेहेति।—तत्र तावत् प्रथमतः परिभाषासूत्रं व्याचष्टे। इदानीं

चतुर्गुणे द्रवे माद्ध्य तस्य मात्रा पलोन्मिता ॥ १ ॥

स्नेहपाकाद्य क्वाथसाधनविधि ।—

निक्षिप्य क्वाथयेत्तोयं क्वाथ्यद्रव्याच्चतुर्गुणम् ।
पादशिष्टं गृहीत्वा च स्नेहं तेनैव साधयेत् ॥ २ ॥

क्वाथ्यस्य मृदमध्यादिभेदेन जलपरिमाणम् ।—

चतुर्गुणं मृदुद्रव्ये कठिनेऽष्टगुणं जलम् ।
तथा च मध्यमे द्रव्ये दद्यादष्टगुणं पयः ॥
अत्यन्तकठिने द्रव्ये नीरं षोडशिकं मतम् ॥ ३ ॥

क्वाथद्रव्यस्य परिमाणभेदेन जलपरिमाणम् ।—

कर्षादितः पलं यावत् क्षिपेत् षोडशिकं जलम् ।

स्नेहकल्पना दर्शयन्नाह कल्कादिति ।—अनुक्ते कल्कात् कल्कयोग्यद्रव्यात् घृत तैल वा चतुर्गुण ग्राह्य न तु दृषदि पेषितात् कल्कात् । द्रवमपि चतुर्गुण स्नेहपरिमाणात्, द्रव तोयादि । तस्य मात्रा पलोन्मितेति—तस्य सम्भिद्य स्नेहस्य पानार्थं पलोन्मिता पलप्रमाणा मात्रा ज्ञेया इति अनुक्तेषु सामान्यमिद मात्रान्यम् । परिभाषेयमपि सामान्यस्नेहपाकविधौ बोद्धव्या, तथा हि—"कल्कात् चतुर्गुण स्नेह स्नेहात् क्वाथश्चतुर्गुण । क्वाथाच्चतुर्गुणा वारि क्वाथ क्वाथ्यसमो मत ॥" इति । विशेषोऽपि क्वचिद्दृश्यते, यथा तत्रान्तरे वासाघृते बलाद्ये घृते वा, तद्यथा—"अवाप्यष्टगुणेनोये क्वथित क्वाथदग्धयो । प्रत्येक द्विगुणो भागो भिषक् सर्पिषि निक्षिपेत ॥" इति ॥ १।२ ॥

इदानी द्रव्यविशेषे क्वाथनिमित्त जलमानमाह, चतुर्गुणमिति ।—अत्र चतुर्गुणप्रमितिक द्रव्यपरिमाणात बोद्धव्य यावत्परिमाण क्वाथ्यद्रव्य भवति तावत्परिमाणाच्चतुर्गुणित जल ग्राह्यमित्यर्थ । मृद कठिन कठिनतरच्च द्रव्य तत्रैवानुमानतोऽवगन्तव्यम । तथा च मध्यमे द्रव्ये दद्यादष्टगुण पय इति—मध्यमे मृदादिमद्धाते पय पानीय यत्र मृदुकठिनतरद्रव्यमेकत्र मिलित्वा क्वाथ्य तत्राष्टगुण पानीय दत्त्वा पादशेष ग्राह्यमिति सर्वत्र, तथा हि—"मृदादिक्वाथ्यसङ्घाते मानमुक्ते चिकित्सका । मध्यमोभयभागित्वादिच्छन्त्यष्टगुण जलम् ॥" इति ॥ ३ ॥

अथ मतान्तरे परिमाणविशेषमाह, कर्षादित इति ।—कर्षादित इत्यादि-

तदूर्द्धं कुडव यावच्चवेदष्टगुणं पयः ॥
प्रस्थादितः क्षिपेन्नीरं खारो यावच्चतुर्गुणम् ॥ ४ ॥

स्नेहपाके जलादिद्रवभेदेन कल्कस्य परिमाणम्।—

अम्बुक्वाथरसैर्यत्र पृथक् स्नेहस्य साधनम्।
कल्कस्यांशं तत्र दद्यात् चतुर्थं षष्ठमष्टमम् ॥ ५ ॥
दुग्धे दधि रसे तक्रे कल्को देयोऽष्टमांशकः।
कल्कस्य सम्यक् पाकार्थं तोयमत्र चतुर्गुणम् ॥ ६ ॥

परिमाणं सामान्यद्रव्यविषये वर्त्तते, अन्यथा स्वल्पविरोधः, यावत् क्वाथद्रव्य कर्षादिपरिमाणात् पलं भवति तावतत्र षोडशांशं जलं दत्त्वा क्वाथ पादशेषं ग्राह्यं, षोडशिकमत्र क्वाथद्रव्यपरिमाणात्। ततस्तु पलादुपरि यावत कुडव क्वाथद्रव्यपरिमाणं भवति तावत्तत्र पयः पानीयमष्टगुणं भवेत क्वाथद्रव्यादित्यर्थः, अत्र क्वाथः चतुर्थांशं ग्राह्यं इति सर्वत्र। प्रस्थादित इति—प्रस्थादिपरिमाणात् यावत खारो भवति तावत्तत्र चतुर्गुणं नीरं पानीयं प्रक्षिप्य सङ्कार्य्य च पादशेषो ग्राह्यं इति तात्पर्य्यार्थः। आदिशब्दात् आढकद्रोणसूपद्रोणीप्रभृतया ग्राह्यः। यद्वा, प्रस्थस्यादि प्रस्थादिलक्षणात्, तेन शरावमपि गृह्यते, शरावादित इत्यर्थः ॥ ४ ॥

अपरमप्यनुक्तमाह, अम्बुक्वाथेति।—यत्र स्नेहपाके पानीयादिद्रवाणां द्रव्याणां मध्ये यदा एकेन पाकः स्यात् तदा तत्कल्कस्य कल्कद्रव्यस्य चतुर्थांशं षष्ठांशमष्टमांशं यथाऽनुक्रमेण देयम्, अनुक्रमो यथा—यदि अम्बुना केवलेन पाकस्तर्हि कल्कद्रव्यस्य चतुर्थांशं देयं, स्नेहपरिमाणादित्यर्थः। यदा केवलेन क्वाथेनैव पाकस्तदा कल्कद्रव्यस्य षष्ठांशं देयम्, अत्रापि स्नेहपरिमाणादित्यर्थः। यत्र तु केवलस्वरसेनैव साध्यते स्नेहः तत्र कल्कद्रव्यस्याष्टमांशं देयं, स्नेहमानादिति अत्रापि सर्वत्र इत्यनुक्रमः। अपरमपि, दुग्धे इति—अत्रापि एकद्रव्यसाध्यता सूचयति, तेन कल्कद्रव्यं स्नेहपरिमाणादष्टमांशं देयमिति भावः। कल्के त्यादि—यत्र तु अन्यद्रवैः केवलकल्केनैव साध्यते स्नेहस्तदा चतुर्गुणं * कल्कद्रव्यचतुर्गुणं तोयं

* कल्कद्रव्यचतुर्गुणं जलमिति व्याख्या न समीचीना साम्प्रदायिकसिद्धान्तविरोधात्, चतुर्गुणता तु स्नेहपरिमाणादेव इति सर्वव्यसिद्धान्तः। गूढार्थकारैरपि इयमेव व्याख्या समादृता, तथा च—"कल्कस्य सम्यक् पाकार्थं चतुर्गुणं जलमित्यर्थः" इति।

पञ्चादिद्रवेण स्नेहपाके द्रवपरिमाणम्।—

द्रवाणि यत्र स्नेहेषु पञ्चादीनि भवन्ति हि।
तत्र स्नेहसमान्याहुरर्वाक् च स्याच्चतुर्गुणम् ॥ ७ ॥

केवलकल्कसाध्यस्नेहपाकपरिभाषा।—

द्रव्येण केवलेनैव स्नेहपाको भवेत् यदि।
तदाम्बुपिष्टः कल्कः स्याज्जलञ्चात्र चतुर्गुणम् ॥ ८ ॥

कल्कोल्लेखविरहितस्नेहपाकपरिभाषा।—

क्वाथेन केवलेनैव पाको यत्रेरितः क्वचित्।
क्वाथद्रव्यस्य कल्कोऽपि तत्र स्नेहे प्रयुज्यते ॥ ९ ॥

निक्षिपेदिति सर्वत्र सम्यक् पाकार्थं बोद्धव्यम्, एतेन किमुक्तम्? यदा क्षीरादिभिः प्रत्येकेन स्वकल्केन पाकस्तदा चतुर्गुणं चतुर्थाशं पानीयं देयम्, पानीयं विना पाको नास्तीति सर्वमतम् ॥ ५।६ ॥

इदानीमनुक्तमानद्रव्याणां मानमाह द्रव्याणीति।—यत्र स्नेहपाकार्थं द्रवाणि क्षीरतक्रसमूहक्वाथादीनि अन्यान्यपि पञ्चप्रभृतीनि भवन्ति, अनुक्तमानानीति विषयः, तत्र तानि द्रवाणि स्नेहसमानि प्रत्येकमाहुराचार्याः, यथा वक्ष्यमाणाविफलाघृते। अर्वाक् द्रवं चतुस्त्रिवा तर्हि स्नेहपरिमाणाच्चतुर्गुणं ज्ञेयं प्रत्येकमित्यर्थः। एके यथापूर्वं चतुर्गुणमिति पठन्ति, तथापि स एवार्थः। कुत्रचित् द्रव्याणीति पाठो दृश्यते, सोऽसङ्गत एव ॥ ७ ॥

अथ केवलद्रव्यस्य स्नेहपाकार्थं मानमाह, द्रव्येणेति।—अत्र द्रव्यं स्नेहाच्चतुर्थांशं, कल्कार्थं वारि तावद्देयं यावता कल्कः स्यात्, यत पेषणे जलस्य परिमाणं न स्यात्। जलञ्चात्र चतुर्गुणमिति—अत्र कल्के जलं पानीयं चतुर्गुणं देयं, स्नेहमानादित्यर्थः। एके द्रव्यमानाच्चतुर्गुणं जलमिति व्याख्यानयन्ति, तन्न मनोहरं कल्कद्रव्याल्पत्वात् ॥ ८ ॥

अपरमाह, क्वाथेनेति।—यत्र स्नेहे क्वचिदिति—अनुक्ते केवलेन क्वाथेन

पारिभाषिकं न सर्वं समादियते।

† विफलाघृतस्य दृष्टान्तोऽत्र न युज्यते, यतः पारिभाषिकमनुक्तद्रवमानं त्रिफलायिणी, विफलाघृते तु सर्वेषामेव द्रवाणां मानोल्लेखो दृश्यते।

अकल्कस्नेहपाकपरिभाषा ।—

कल्कहीनस्तु य स्नेह. स साध्य. केवले द्रवे ॥ १० ॥

पुष्पकल्कस्नेहपाकपरिभाषा ।—

पुष्पकल्कस्तु य स्नेहस्तत्र तोय चतुर्गुणम् ।
स्नेहे स्नेहाष्टमाशश्च पुष्पकल्कः प्रयुज्यते ॥ ११ ॥

क्वाथं कृत्वा पाक कथित, तत्र स्नेहे क्वाथ्यद्रव्यस्य कल्क काय्य, * कल्काथेऽपि चतुर्गुण जलमिति, तेन यनैव द्रव्येण क्वाथ क्रियते, तेनैव तत्परिमितेन च द्रव्येणायमपि कल्कोऽत्र चतुर्गुणेन च जलेन सह साध्य, पूर्वं क्वाथेन साध्य पश्चात् कल्केनेत्यर्थ ॥ ९ ॥

अथ केवलद्रवसाधनमाह, कल्कहीन इति ।—य स्नेही घृततैलादिक कल्कहीन कल्करहितो भवेत्, स केवले द्रवे साध्य , द्रवमत्र चतुर्गुण स्नेह-परिमाणात ॥ १० ॥

इदानी पुष्पकल्कस्य परिमाणमाह पुष्पकल्क इति ।—य पुष्पकल्कसज्ञ स्नेह तत्र स्नेहे तोय पानीय चतुर्गुण देय, चतुर्गुणता च स्नेहपरिमाणात । स पुष्पकल्क स्नेहाष्टमाश प्रयुज्यते स्नेहस्याष्टमाश तेन साम्यो योज्य इत्यर्थ । पुष्पाणि यथा—नागकेशर-कुङ्कुम--लवङ्ग- टमनक सुरपुष्प-चम्पकोत्पल -पुण्डरीक-केतकी-जाती-कुसुम्भप्रभृतीनि । एके पुष्पकल्क प्रयुज्यते इत्यस्य स्थाने पत्रकल्क प्रयुज्यते

---

* पाका- क्वाथे सत्यपि पुन कल्काथं चतुर्गुण जलमिति यदुक्त तन्न समीचीन, सुश्रुतविरोधात, सुश्रुते येन केनापि द्रवेण सहैव कल्कपाकविधानात्, तथा च—"स्नेहाच्चतुर्गुणो द्रव, स्नेहचतुर्थाशो भेषजकल्क तदैकध्य ससृज्य विपचेत् इत्येष स्नेहपाककल्प" इति । किञ्च परिभाषायामपि केवलस्वरसचीरमाङ्गल्ये सह पाके कल्कस्य वीर्य्याधानार्थं चतुर्गुणजलेन पाकव्यवस्था अस्ति, न तु क्वाथेन सह पाके तथा च—"स्वरसक्षीरमाङ्गल्ये पाको यत्नेरित क्वचित् । चतुर्गुण जल तत्र वीर्य्याधानायमावपेत् ॥ न मुञ्चति रस द्रव्य क्षीरादिभिरुपस्कृतम् । कल्कस्य सम्यक् पाकार्थं जल तत्र चतुर्गुणम् ॥" इति । किञ्च केवलक्वाथेन सह पाके क्वाथ्यद्रव्यस्य कल्कोऽपि ग्राह्य इति परिभाषाऽपि चरकादिविरुद्धा, यत्र स्नेहे गणाधिकारात्ति विधत तत्रैव कल्कक्वाथयरुपविधिर्दृश्यते, तथा च—"यत्राधिकारणीक्तिर्गणे स्यात स्नेहसंविधौ । तत्रैव कल्पनिर्ग्रहाविष्यते स्नेहवेदिना ॥' इति ।

स्नेहपाकसिद्धिलक्षणम्।—

वर्त्तिवत् स्नेहकल्कः स्यात् यदाऽङ्गुल्या विमर्दितः।
शब्दहीनोऽग्निनिक्षिप्तः स्नेहः सिद्धो भवेत्तदा ॥ १२ ॥
यदा फेनोद्गमस्तैले फेनशान्तिश्च सर्पिषि।
गन्धवर्णरसोत्पत्तिः स्नेहसिद्धिस्तदा भवेत् ॥ १३ ॥

स्नेहस्य विविधपाकलक्षणम्।—

स्नेहपाकस्त्रिधा प्रोक्तो मृदुर्मध्यः खरस्तथा।
ईषत्सरसकल्कस्तु स्नेहपाको मृदुर्भवेत् ॥ १४ ॥
मध्यपाकस्य सिद्धस्य कल्के नीरसकोमले।
ईषत्काठिनकल्कश्च स्नेहपाको भवेत् खरः ॥ १५ ॥

दग्धामपक्वस्नेहयोर्दोषः।—

तदूर्द्धं दग्धपाकः स्यादाद्यक्लृप्तान्निषूयोजनः।
आमपाकश्च निर्वीर्यो वह्निमान्द्यकरो गुरुः ॥ १६ ॥

इति पठन्ति व्याख्यानयन्ति, तत् पक्वकल्कं प्रत्येवमाह, तथा हि—"गन्धनिर्यास पुष्पाणां सिद्धमीतेऽवतारितं। एतेषां गन्धवद्ग्रार्थं पक्वकल्कन्तु तद्विदुः ॥" इति ॥ ११ ॥

इदानीं स्नेहाना ससिद्धिलक्षणान्याह, वर्त्तिवदित्।—यदा स्नेहे परिपाचितः कल्कः अङ्गुल्या विमर्दितो वर्त्तिसदृशो भवति तदा सिद्धो ज्ञेयः। अथवा स एव कल्कः यदाऽग्नौ निक्षिप्तः शब्दरहितो भवति तदा सिद्धो ज्ञातव्य इति सामान्यम्। अपरमपि विशेषमाह—यदा स्नेहस्य पाकाले तैले फेनोद्गमो भवति सर्पिषि च फेनशान्तिर्भवति तदा सिद्धलक्षणं बोद्धव्यम्। गन्धवर्णरसोत्पत्तिरपि यदा तदा स्नेहः सिद्धः स्यात्, वर्णादिकमपि तैले सर्पिषि च ज्ञातव्यम् ॥ १२।१३ ॥

अधुना विविधस्नेहपाकस्य लक्षणमाह,—स्नेहपाक इति। ईषत्सरसकल्क इति।—यदा कल्के मान्द्रता किञ्चित् भवति अग्नौ निक्षिप्ते सति चटचटाशब्दो भवति तदा मृदुपाको ज्ञेयः। यदा नीरसः कल्को भवति कोमलश्च नातिकठिनो नातिमृदुरिति तदा मध्यपाकः। यदा किञ्चित् कठिनकल्को ज्ञातो नीरसश्च भवति तदा खरपाक इति। एतेषां परीक्षणमनुमानतोऽवगत्य गुरुरुक्तावदर्शनाद्वा ॥ १४।१५ ॥

दग्धामपक्वस्नेहयोर्दोषमाह तदूर्द्धमिति।—तदूर्द्धं खरपाकादूर्द्धं यदा स्नेहकल्कः

पाकविशेषेण स्नेहस्य उपयोगिता।—

नस्याग्नौ स्यान्मृदुः पाको मध्यमः सर्वकर्मसु।
अभ्यङ्गाग्नौ खरः प्रोक्तो युञ्जानादेर्यथोचितम्॥ १७॥

अस्य अस्य पक्वस्नादीनां गुणाधिक्यम्।—

घृततैलगुडादींश्च साधयेन्नैकवासरे।
प्रकुर्वन्त्यधिता ह्येते विशेषाद्गुणसञ्चयम्॥ १८॥

स यथा—

विषमज्वरादौ क्षीरषट्पलघृतम्।—

पिप्पलीपिप्पलीमूल-चव्यचित्रकनागरैः।
मसेन्धवैश्च पलिकैर्घृतप्रस्थं विपाचयेत्॥ १९॥

कठिनतरो भवति तदा दग्धो ज्ञेयः, स च सर्वकर्मसु निष्फलः स्यात् दाहकरश्च भवति। आमपाकस्येति—आमपाकोऽपरिपाककल्कः स्नेहो निर्वीर्यो भवति निःस्नेहणवीर्यरहित इत्यर्थः। वह्निमान्यकृच्चणयोगे गुरुश्च भवति॥ १६॥

इदानीं तस्य विविधपाकस्य गुणमाह नस्याग्नौमिति।—नस्यविषये मृदुपाकः स्नेहः। मध्यपाकस्तु सर्वकर्मसु यज्ञ्यते सर्वकर्म नस्याभ्यङ्गपानादिकम्। खरपाकस्तु केवलाभ्यङ्गे विहितः नान्यकर्मसु। यथोचितमिति—यथायोग्यं युञ्जानादित्यर्थः। एके "नस्याभ्यङ्गे खरः प्रोक्तः" इति पठन्ति तत्र सर्वमतं नस्ये तु मौख्यमाह॥ १७॥

स्नेहस्तु किमेकाहेनैव साध्य उत दीर्घदिवसैः? तद्विषयमाह, घृतेति।—घृततैलगुडेष्वेकाहे, गुडोऽवलेहः, आदियङ्कयात् दुग्धरसक्षारादयो ये चान्ये प्रयोगास्तान् सर्वान् एकस्मिन्नेव वासरे न साधयेत् न पाचयेत् इत्यर्थः। कृतलक्षाः, प्रकुर्वन्ति इत्यादिः।—एते स्नेहादयस्तु यदा ऽधिता भवन्ति तदा गुणसञ्चयं प्रकुर्वन्ति, अत एव बहुदिवसैः कृत्वा साधनीया इति भावः। तत्रान्तरेषु एतत् बहुद्रव्यसम्भार-विषयम्, अल्पात्मकादावेऽपि स्नेहपाके किञ्चिदिपाच्यापरेऽस्मिन् सिद्धोऽवतार्य्यः, गुडादिकमपि चापरेऽस्मिन् मधुदानादिकमुक्तं कृत्वा इति नैवं सर्वमतविरोधः॥ १८॥

स इति।—स यथेत्यनेन तं स्नेहपाकसमूहं दर्शयति यत्नकारः। तत्रादौ तावत् घृतकल्पना दर्शयन्नाह, यतस्तैलादिभिष्टौ घृतकल्पः पूर्वाचार्यैर्दर्शितः, तथैवात्रापि लिखितः। प्रथमतः क्षीरषट्पलकघृतव्याख्यानमाह, पिप्पलीति।—अत्र पिप्पल्यादिकं पञ्चद्रव्यं पञ्चकोलसंज्ञं बोद्धव्यम्, यतस्तन्त्रान्तरे पञ्चकोलघृतमस्य नाम प्रसिद्धम्।

क्षीरं चतुर्गुणं दत्त्वा तत् सिद्धं स्नेहनाशनम् ।
विषमज्वरमन्दाग्नि-हरं रुचिकरं परम् ॥ २० ॥

ग्रहण्यादौ चाङ्गेरीघृतम् ।—

पिप्पली पिप्पलीमूल चित्रको हस्तिपिप्पली ।
शुण्ठ्यष्टौ नागरं धान्यं पाठा बिल्वं यमानिका ॥ २१ ॥
द्रव्यैश्च पलिकैरेतैश्चतुःषष्टिपलं घृतम् ।
घृताच्चतुर्गुणो देयः चाङ्गेरीस्वरसो बुधैः ॥ २२ ॥
तथा चतुर्गुणं दत्त्वा दधि सर्पिर्विपाचयेत् ।
शनैः शनैर्विपक्तव्यं चाङ्गेरीघृतमुत्तमम् ॥ २३ ॥
तत् घृतं कफवातघ्नं ग्रहण्यर्शोविकारनुत् ।
हन्त्यानाहं गुदभ्रंशं मूत्रकृच्छ्रं प्रवाहिकाम् ॥ २४ ॥

ग्रहण्यादौ मसूरघृतम् ।—

मसूराणां पलशतं नीरद्रोणे विपाचयेत् ।
पादशेषं श्रुतं नीत्वा दत्त्वा बिल्वपलाष्टकम् ॥ २५ ॥

अत्र चतुर्गुणमिति—विटपविशेषं यस्य फलं गजपिप्पलीति श्रुतिः । पलिकैरिति—पलप्रमाणतः प्रत्येकमतः, अत एव क्षीरषट्पलकघृतमिदं चतुर्गुणक्षीरेण सह षट्पलप्रमाणषड्द्रव्यैश्च साधितमित्यर्थः । अत्र चतुर्गुणं नीरमपि देयं, सम्यक्पाकार्थमित्यन्यत्सम्प्रदायाभिप्रायं । घृतग्रहणमिति—षोडशपलमितम् । क्षीरस्य चतुर्गुणतोऽत्र घृतपरिमाणात् । तत् सिद्धमिति—सिद्धताऽस्य परिभाषोक्तविधानात् ॥ १९।२० ॥

अथ चाङ्गेरीघृतमाह, पिप्पलीति ।—अत्र हस्तिपिप्पली गजपिप्पली । शुण्ठ्यष्टौ गोक्षुरकः । नागरं शुण्ठी । बिल्वमत्र बिल्वशलाटुः । पलिकैरिति—पलप्रमाणं प्रत्येकम् । चाङ्गेरीस्वरस इति—चाङ्गेरी प्रसिद्धा, सा चाम्लरसा आमचाङ्गेरीति लोके प्रसिद्धा तस्या स्वरस इति—सद्योरस । बुधैरिति ग्रहणीन सद्योरसाभावात् क्वाथोऽपि देयः । दधि चतुर्गुणं घृतपरिमाणात् । शनैः शनैः पक्तव्यमिति—मन्दपावकपाचितमिति भावः, दग्धभयात् ॥ २१—२४ ॥

अथ मसूराद्यं घृतमध्याह, मसूराणामिति ।—मसूरोऽन्नविशेषः प्रसिद्धः । नीरद्रोणे जलद्रोणे, * चतुःषष्टिकुडवपरिमितं भवति । बिल्वं पलाष्टकमितं

---

* जलद्रोणः चतुःषष्टिकुडवपरिमितमिति यदुक्तं तन्न सम्मतोऽयम्, द्रोणः

घृतप्रस्थं पचेत्तेन सर्वातीसारनाशनम्।
ग्रहणीं भिन्नविट्कञ्च नाशयेच्च प्रवाहिकाम्॥ २६॥

रक्तपित्तादौ कामदेवघृतम्।—

अश्वगन्धा पलशत तदर्द्धं गोक्षुरं स्मृतम्।
शतावरी विदारी च शालपर्णी बलाऽमृता॥ २७॥
अश्वत्थस्य च शुङ्गानि पद्मबीज पुननवा।
काश्मर्य्याश्च फलञ्चैव माषबीज तथैव च॥ २८॥
पृथक् दशपलान् भागान् चतुर्द्रोणेऽम्भसि पचेत्।
द्रोणे शेषे रसे तस्मिन् पचेच्चैव घृताढकम्॥ २९॥
मृद्वीका पद्मक कुष्ठ पिप्पली रक्तचन्दनम्।
पत्रक नागपुष्पञ्च आत्मगुप्ताफल तथा॥ ३०॥

भवति, बिल्व बिल्वमज्जा, तच्च कल्कीकृत जलेन सह देयम्। कर्त्तव्यविधावपि मसूरा कपटवड्डा क्वाथ्या, सहग्निना च साधन कार्य्यम्॥ २५।२६॥

इदानी कामदेवघृतविवरण दर्शयन्नाह, अश्वगन्धेति।—अश्वगन्धामूल पलशत ग्राह्यम्। तदर्द्धं गोक्षुरमिति—पञ्चाशत्पल, गोक्षुराऽपि पञ्चाशा ग्राह्य। † अपराणि दशद्रव्याणि दशपलमिति प्रत्येकमाह, तानि कानि इत्याह, शतावरीत्यादि—सुगमम्। तत्र तु अश्वत्थशुङ्गानीति—पिप्पलशुङ्गानि सिद्धानि। काश्मरी गाम्भारी, तस्या फलानि। पद्मबीज प्रसिद्ध "कमलगट्टा" शब्दवाच्यम्। माषबीजमिति—माष प्रतीतम्। एतत सकल पानीयद्रोणचतुष्टये सकाथ्य पादशेष वस्त्रगालित ग्राह्यम्। अपराण्यपि कल्कयोग्यानि द्रव्याण्याह, मृद्वीकेत्यादि—मृद्वीका द्राक्षा। पद्मक

शब्देन चतु षष्टिकुडवपरिग्रहेण शुष्कद्रव्ये एव वोद्दिश्य न तु द्रवार्द्रयो, अत जल-द्रोणशब्देन चतु षष्टिशरावपरिमितमित्येवार्थ साधु।

* चक्रीक्तकामदेवघृते "बलाऽमृता" इत्यत्र "बला तथा" "घृताढकम्" इत्यत्र "घृतप्रस्थम्" "पत्रकम्" इत्यत्र "बालकम्" इति पाठान्तराणि।

† शिवदासेन "शतावर्यादीना बलान्ताना प्रत्येक पञ्चाशत्पलानीत्यर्थ, अश्वत्थशुङ्गादीनाञ्च पञ्चाना पृथक् दशपलानि, तदा मिलित्वा पलशतचतुष्टयं क्वाथ्ये प्रतिशत जलद्रोणौ देय पुनर्द्रव्ये जलद्रोण इत्युक्तं," इति व्याख्यातम्।

नीलोत्पल सारिवे हे जीवनीयो गणस्तथा।
पृथक्कर्षसमान् भागान् शर्करायाः पलद्वयम् ॥ ३१ ॥
रसस्य पौण्ड्रकेक्षूणामाढकैक समाहरेत्।
चतुर्गुणेन पयसा घृताढकं विपाचयेत् ॥ ३२ ॥
घृतमेतन्निहन्त्याशु रक्तपित्तसुरःक्षतम्।
क्लैब्यमकं पाण्डुरोग वर्णभेदं स्वरक्षयम् ॥ ३३ ॥
मूत्रकृच्छ्रमुरोदाहं पार्श्वशूलञ्च नाशयेत्।
एतत् सर्पिः प्रयात्यग्र्य बल्यन्त पुरवासिनाम् ॥ ३४ ॥

काष्ठविशेष तत्तु चन्दनवत् द्रव्यविशेष। आत्मगुप्ता कपिकच्छु तस्या फलानि। नीलोत्पल नीलकमलवाच्य, तदभावे कमलबीज ग्राह्यम्। सारिवे हे द्वात—कृष्णसारिवा शुक्लसारिवेति, ते "अपराई" शब्दवाच्ये, कृष्णसारिवा कालदूसवत्-पत्रा सुगन्धा, शुक्लसारिवा जम्बूवत्पत्रा व्रततौ। जीवनीयो गण इति—जीवन्ती मूल्यपर्णीयुक्काकोल्यौ जीवकर्षभौ। मेदे हे यष्टीमधुरो जीवनीयो गणो मत ॥" इति। तस्याप्रसिद्धत्वात् तत्साम्यगुणद्रव्याणि योज्यानि इति ब्रह्म-वैद्याना सम्मतम्। एतानि सहीकादीनि द्रव्याणि पृथक् कर्षप्रमाणानि ग्राह्याणि। शर्करायाः पलद्वयमिति—कैचित् सिद्धेऽस्मिन् शर्करायाः प्रक्षेपमाहुः। रसस्य पौण्ड्रेक्षूणामिति—† पौण्ड्रको विख्यात इक्षुविशेष, इक्षु सामान्य., स च स्त्रीहितेक्षुपञ्चतिको यथालाभ ग्राह्य। ननु इक्षुग्रहणेनैव पौण्ड्रकग्रहणप्राप्ति,

* जीवनीय जीवन्ती शाकविशेष इत्यादि व्याख्या न समीचीना, तन्त्रान्तरे "जीवकर्षभकौ मेदे काकोल्यौ मूल्यपर्णिके। जीवन्ती मधुकश्चेति जीवनीयो गणो मत ॥" इत्युक्तगणे जीवकशब्दस्य प्रथमग्रहणात, जीवन्तीशब्दस्य प्रथमोल्लेखत्वा न जीवनीयगण परन्तु जीवनीयशक्तिवद्धकत्वात् गणसाम्य जीवनीय इति सज्ञा ज्ञातव्या।

† रसस्य पौण्ड्रकेक्षूणाम् इत्यत्र पौण्ड्रकशब्द इक्षुविशेषण, बह्वीषु इक्षुजातिषु पौण्ड्रकसज्ञकक्षूणा रस इत्येवार्थ, चक्रादिसम्मत', न तु पौण्ड्रकेक्षुरस स्त्रीहितेक्षु-प्रभृतिसामान्येक्षुरसस्य इत्यर्थ., "रसस्य पौण्ड्रकेक्षूणामाढक तत्र दापयत्" इति चक्रसङ्ग्रहोक्ति.।

क्षीणाञ्चैवाग्रजातानां दुर्बलानाञ्च देहिनाम् ।
श्रेष्ठ बलकरं वर्ण्यं हृद्यं पुष्टिरसायनम् ॥ ३५ ॥
ओजस्तेजस्करं हृद्यमायुष्यं प्राणवर्द्धनम् ।
संवर्द्धयति शुक्रञ्च पुरुषं दुर्बलेन्द्रियम् ॥ ३६ ॥
सर्वरोगविनिर्मुक्तो पय.सिक्तो यथा द्रुमः ।
कामदेव इति ख्यात सर्पिरुक्तं महागुणम् ॥ ३७ ॥

उन्मादादौ पानीयकल्याणक घृतम् ।—

त्रिफला हे निशे कौन्ती सारिवे हे प्रियङ्गुका ।
शालपर्णी पृश्निपर्णी देवदार्वेलवालुकम् ॥ ३८ ॥
नत विशाला दन्ती च दाडिमं नागकेशरम् ।
नीलोत्पलैला मञ्जिष्ठा विडङ्ग कुष्ठपद्मकम् ॥ ३९ ॥
जातिपुष्पं चन्दनञ्च तालीसं वृहती तथा ।
एतै. कर्षसमै: कल्कैर्जल दत्त्वा चतुर्गुणम् ॥ ४० ॥

तत कथ भिन्नग्रहणम् ? उच्यते—पौष्कलग्रहण गुणप्राबल्यात् कृत, यत — "पौष्कल शीतल स्निग्धो वृष्य कफकृत सर" इति तस्मात पौष्कलो विशेषेणात्र ग्राह्यनीय (?)। अस्य रसस्याढक प्रत्येक द्विराढकग्रहणात (?) घृताढकमेक गोदुग्ध चतुराढकमिति ॥ २७—३७ ॥

अथ पानीयकल्याणक घृतम् आह, त्रिफलेति ।—त्रिफलाऽत्र हरीतकी-प्रभृतिफलत्रयम् । हे निशे हरिद्राद्वयम् । कौन्ती रेणुका । सारिवे हे कृष्णशुक्लभेदेन । प्रियङ्गुर्लताविशेष तस्या. फलानि । शालपर्णी पृश्निपर्णी इति कवराद्वयशब्दवाच्यम् । एलवालुक खनामख्यात, तस्य कुष्ठगन्धि कट्फलसदृशम् । नत तगरपादिका । विशालेन्द्रवारुणी । दन्ती प्रसिद्धा । दाडिम दाडिमफल बीजानि च । नीलोत्पल नीलकमल, तदभावे पद्मबीज द्रव्य ग्राह्यम् । एला इक्षरफला । जातौ मालती तस्या कुसुमानि । चन्दन श्वेतम् । तालीस खनामप्रसिद्धम् । बृहती बृहत्कण्टकारिका, एतानि कर्षप्रमाणानि प्रत्येकम् । जल पानीय चतुर्गुण देय घृतपाकमाप्तात् ।

घृतप्रस्थं पचेद्वामानपञ्चारे ज्वरे क्षये।
उन्मादे वातरक्ते च कासे मन्दानले तथा ॥ ४१ ॥
प्रतिश्याये कटीशूले तृतीयकचतुर्थके।
मूत्रकृच्छ्रे विसर्पे च कण्डूपाण्डामये तथा ॥ ४२ ॥
विषहृद्रोगमेहेषु सर्वेष्वेवोपयुज्यते।
बल्यानां पुत्रद भृत-यच्चरत्नोहरं स्मृतम् ॥ ४३ ॥

वातरक्ते अमृताघृतम्।—

अमृताक्वाथकल्काभ्यां सचोरं विपचेत् घृतम्।
वातरक्तं जयत्याशु कुष्ठं जयति दुस्तरम् ॥ ४४ ॥

कुष्ठादौ महातिक्तकं घृतम्।—

सप्तच्छद प्रतिविषा सम्याक कटुरोहिणी।
पाठा मुस्तसुशीरञ्च त्रिफला पर्पटस्तथा ॥ ४५ ॥

घृतप्रस्थमिति—* कुडवचतुष्टयप्रमित गव्य घृत भवति। केवलपानीयपरपाचनात् पानीयकल्याणकमस्य संज्ञा रूढा ॥ ३८—४३ ॥

अमृताद्यघृतविवरणमभ्याह, अमृतेति।—अमृता गुडूची तस्या क्वाथकल्काभ्या कृत्वा सचोर घृत विपाच्य वातरक्तादिके देयम्, तेन क्वाथचतुर्गुणजलेन सिद्ध, स च घृताच्चतुर्गुण इति परिभाषाया प्रतीत। कल्को दृषदि पेषित, स च घृताश्च तेन कल्कद्रव्य घृताच्चतुर्थांश देयमित्यर्थ। सचीरमिति—चतुर्गुण क्षीर घृत-परिभाषात्। कैश्चित्तु † खड्डसप्त प्रोक्तमिति पठन्ति एतदपि सङ्गत, न विरुद्ध द्रवान्तरत्वात। कल्केऽपि चतुर्गुण पानीय दत्त्वा पाचनीयमिति व्यवहार। अस्य पानमाहुरभ्यङ्गे च ॥ ४४ ॥

इदानी महातिक्तकघृतमाह, सप्तच्छद इति।—सप्तच्छद सप्तपर्णशब्दवाच्य, स च शाखोपपत्रसहित्या युग्मपत्र। प्रतिविषा अतिविषा। सम्याका राजवृक्ष तस्य

---

* प्रस्थेन कुडवचतुष्टयग्रहण गुरुद्रव्ये एव बोद्धव्य, द्रवाद्रव्येषु शरावचतुष्टयमिति ज्ञेयम्।

† परिभाषासिद्धत्वात् द्रव्यव्यवहाराच्च एतदेव मत सङ्गतमिति। कल्केऽपि चतुर्गुण पानीयमित्यादि यदुक्त तन्न सर्वसम्मत, तत्तु प्रागेव प्रदर्शितमिति।

पटोलनिम्बमञ्जिष्ठा पिप्पली पद्मक * शटी।
चन्दनं धन्वयासश्च विशाले हे निशे तथा ॥ ४६ ॥
गुडूची सारिवे हे च मूर्वा वासा शतावरी।
त्रायन्तीन्द्रयवो यष्टी भूनिम्बश्चाक्षभागिका' ॥ ४७ ॥
घृतं चतुर्गुणं दद्याद्घृतादामलकीरसः।
द्विगुणः सर्पिषश्चात्र जलमष्टगुणं भवेत् ॥ ४८ ॥
तत सिद्धं पाययेत् सर्पिर्वातरक्तेषु सर्वथा।
कुष्ठानि रक्तपित्तञ्च रक्तार्शांसि च पाण्डुताम् ॥ ४९ ॥
हृद्रोगगुल्मवीसर्प-प्रदरं गण्डमालिकाम्।
क्षुद्ररोगान् ज्वरांश्चैव महातिक्तमिदं जयेत् ॥ ५० ॥

कुष्ठादौ काशीशाद्य घृतम्।—

कासीसं हे निशे मृक्तं हरितालं मनःशिलाम्।
कम्पिल्लक गन्धकञ्च विडङ्गं गुग्गलुं तथा ॥ ५१ ॥
सिक्थकं मरिचं कुष्ठं तुत्थक गौरसर्षपान्।
रसाञ्जनञ्च सिन्दूरं श्रीवासं रक्तचन्दनम् ॥ ५२ ॥

फलम। चन्दन श्वेतम। विशाले हे इति—इन्द्रवारुणीद्वयम्। हे निशे इति—हरिद्राद्वयम। सारिवे हे इति—शुक्लकृष्णभेदेन। मूर्वा चोरस्थायु। वासा आटरूषक। त्रायन्ती त्रायमाणा। शेष द्रव्य प्रसिद्धम्। अक्षभागिका कर्षप्रमाणा' प्रत्येकम्। घृत चतुर्गुणमिति पूर्वद्रव्यसम्भारात। आमलकीफलस्वरसो द्विगुणो घृतपरिमाणात। स्वरसाभावे क्वाथोऽपि देय न दोष। जल पानीयचाष्टगुणं देय सम्यक्पाकार्थं सर्पिषो घृतपरिमाणात। एतत सिद्ध महातिक्तक नाम घृत वातरक्तादिषु प्रशस्तम ॥ ४५—५० ॥

अधुना कासीसाद्यघृतविवरणमाह, कासीसमिति।—कासीस द्रव्यविशेष मध्यवटल्यमृत, अथ भेद पुष्पकासीस तच्च किंचित पीतम। हे निशे हे हरिद्रे। कम्पिल्लको रोरीशब्दवाच्यो वृक्षविशेष, कम्पिल्लेत्यपरे। सिक्थक मधूच्छिष्टम।

---

* चरकवाग्भटचक्रदत्तेषु शटी इत्यत्र वचा तथा विशाला इत्येकवचनान्त एव पाठ न तु विशाले इति।

हरिमेदं निम्बपत्रं करञ्जं मारिवा वचाम।
मञ्जिष्ठां मधुकं मासीं शिरीष लोध्रपद्मकम् ॥ ५३ ॥
हरीतकीं प्रपुन्नाडं चूर्णयेत् कार्षिकान् पृथक्।
ततस्तच्चूर्णमालोड्य त्रिंशत्पलमिते घृते ॥ ५४ ॥
स्थापयेत्ताम्रपात्रे च घर्मे सप्त दिनावधि।
अस्याभ्यङ्गेन कुष्ठानि दद्रूपामाविचर्चिका' ॥ ५५ ॥
शूकदोषा विसर्पाश्च विस्फोटा वातरक्तजाः।
शिरःस्फोटोपदंशाश्च नाडीदुष्टव्रणानि च ॥ ५६ ॥
शोथो भगन्दरश्चैव लूता' शाम्यन्ति देहिनाम्।
शोधनं रोपणञ्चैव सवर्णकरणं घृतम् ॥ ५७ ॥

व्रणशोथे जात्यादिघृतम्।—

जातीनिम्बपटोलञ्च हे निशे कटरोहिणी।
मञ्जिष्ठा मधुकं सिक्थं करञ्जोशीरमारिवा' ॥ ५८ ॥

रसाञ्जन दार्वीक्वाथोऽवम्। सिन्दूर प्रसिद्धम। श्रीवास निर्य्यासद्रव्य राल शब्दवाच्यम। हरिमेदो बिट्खदिर श्रीलशब्दवाच्य। करञ्जो ह्रस्वकरञ्जो वृक्ष-विशेष, लोके चोला इति प्रसिद्ध। मारिवा आस्फोता "आफीदूं" इति लोके। मासी गन्धमासी जटाविटप। पद्मकं पद्मकाष्ठम। प्रपुन्नाड चक्रमर्दबीजानि। एतानि पृथक् कर्षप्रमितानि चूर्णीकृत्य त्रिंशत्पलपरिमिते घृते आलोड्य ताम्रपात्रे निधाय घर्मे धारयेत यावत् सप्त दिनानि भवन्ति, एतच्चाद्रवाग्निसिद्ध सूर्य्यपाकसञ्ज्ञमिति बोद्धव्यम्। अभ्यङ्गाम्नदाये तु कल्काई द्रव्य कल्कीभूत कृत्वा चतुर्गुणेन पानीयेन सह घृत विपाच्य पश्चात पचेपयोग्य द्रव्य चूर्णीकृत्य तत्र प्रक्षिप्य आलोड्य घर्मे सप्तदिनं यावत् धारयेत एव सिद्धो भवति। कल्काथे द्रव्य यथा—हरिद्रासुस्तरक्तचन्दनेरिमेदनिम्ब-पद्मकरञ्जसारिवावचामञ्जिष्ठामधुकमासीशिरीषलोध्रपद्मकहरीतकीप्रभृतिक शेष पचेपार्थं ज्ञेयम् ॥ ५१—५७ ॥

इदानीं जात्यादिक घृतमाह, जातीत्यादि।—जातीनिम्बपटोलमित्यत्र त्रयाणा पत्राणि ग्राह्याणि तन्त्रान्तरदर्शनात्, तथा च—"जातीनिम्बपटोलाना नक्तमालस्य पल्लवा" इत्यादि। हे निशे हे हरिद्रे, तेन हरिद्रा दारुहरिद्रा। कटुरोहिणी कटुकीशब्दवाच्यम्। मधुक यष्टीमधु। सिक्थ मदनकम्। करञ्जो

तुल्यञ्च विपचेत् सम्यक् कल्कैरेभिर्घृतं बुधः।
अस्य लेपाद्विरोहन्ति सूक्ष्मनाडीव्रणा अपि॥
मर्माश्रिताः क्लेदिनश्च गम्भीरा. सरुजो व्रणाः॥ ५९॥

उदरे बिन्दुघृतम्।—

चित्रकं शङ्खिनी पथ्या कम्पिल्लस्त्रिवृतायुगम्।
वृद्धदारुश्च सम्याको दन्ती च त्रिफला तथा॥६०॥
कोशातकी देवदाली नीलिनी गिरिकर्णिका।
सातला पिप्पलीमूलं विडङ्गं कटुकी तथा॥ ६१॥
हैमवारी च विपचेत् कल्कैरेभिः पिचुन्मितैः।
घृतप्रस्थं स्नुहीक्षीरं षट्पलन्तु पलद्वयम्॥ ६२॥
अर्कक्षीरस्य मतिमांस्तत् सिद्धं गुल्मकुष्ठहृत्।

वृद्धदारुश्च तस्य पत्राणि फलानि वा। उशीरं सुगन्धद्रव्यम्। सारिवा आस्फोता। तुल्यं हरितपाषाणवत् क्रविनद्रव्यविशेषः, एतत् साम्यमानम्। सकलद्रव्यात् घृत चतुर्गुण साध्यम्। अत्र कल्कपाचनार्थं चतुर्गुणं जलं देयम्। एके सिक्थतुल्यौ सिद्धे प्रक्षेपमाहुः, तथा च—'प्रक्षेप कारयेद्वीक्षान् सिद्धे सिक्थकतुल्यौ" इत्यादि। जातीकाद्य गौराद्यञ्च तैलमपि पच्यते, तथा च चक्रः,—"गौराद्य जातीकाद्यञ्च तैलमेव प्रसाध्यते। तैल सूक्ष्मानने दुष्टे व्रणे गम्भीर एव च॥" इति॥ ५८।५९॥

अधुना बिन्दुघृतमाह, चित्रकमिति।—अत्र चित्रक प्रसिद्धम्। शङ्खिनी यवतिक्ता, शङ्खपुष्पीशब्दवाच्या। कम्पिल्लक कवीला विख्याता, "रोहो" शब्दवाच्यामिति कोचित्। त्रिवृतायुगमिति—श्वेतकृष्णभेदेन 'त्रिवृता' द्वयम्। वृद्धदारु महाश्यामो दीर्घपत्र, वृक्षश्च विधाराशब्दवाच्य। सम्याक कृतनालक। दन्ती "दन्तिवनि" इति लोके, तथा फल जयपालशब्दवाच्यम्। त्रिफला हरीतक्यादिकम्। कोशातकी घोषारा। देवदाली बल्लीविशेष। गिरिकर्णिका 'शोफन्द दुग्धफन्द" इति प्रसिद्ध। सातला सप्तपर्णभेद, "घटपत्र" लोके। हैमवारी कटुष्ठ, क्वचिच्चोकशब्दवाच्यमिति वदन्ति। पिचुन्मितैरिति—कर्षप्रमाणै प्रत्येकम्। अत्र कल्काथै क्षीर चतुर्गुण दध्य व्यवहारात्, तथा च—"क्षुरकर्कशास्तु पयसा प्राकल्पानुपकल्पित। चतुर्गुण जल देय पाकार्थं बिन्दुसर्पिषि॥" (हन्द०) इत्यादि। स्नुहीक्षीर क्षुरकस्य क्षीर षट्पलप्रमित दयम्, अर्कक्षीरन्तु पलद्वयमिति वदन्ति कोचित्।

हन्ति शूलमुदावर्त्तं गोधाक्षानं भगन्दरम् ॥ ६३ ॥
शमयत्युदराण्यष्टौ निपीतं विन्दुसङ्ख्यया।
गोदुग्धेनोष्ट्रदुग्धेन कौलत्थेन घृतेन वा ॥ ६४ ॥
उष्णोदकेन वा पीत्वा विन्दुवेगैर्विरिच्यते।
एतद्विन्दुघृतं नाम नाभिलेपाद्विरिच्यते ॥ ६५ ॥

नेत्ररोगे त्रिफलाघृतम्।—

त्रिफलाया रसप्रस्थं प्रस्थं वासारसोद्भवम्।
भृङ्गराजरसप्रस्थं प्रस्थमाजं पयः घृतम् ॥ ६६ ॥
दत्त्वा तत्र घृतप्रस्थं कल्कैः क्वर्षमितैः पृथक्।
त्रिफला पिप्पली द्राक्षा चन्दनं सैन्धवं बला ॥ ६७ ॥
काकोली क्षीरकाकोली मेदा मांसी वचा नागरम्।
शर्करा पुण्डरीकञ्च कमलञ्च पुनर्नवा ॥ ६८ ॥
निशायुग्मञ्च मधुकं सर्वैरेभिर्विपाचयेत्।
नक्तान्ध्यं नकुलान्ध्यञ्च कण्डूं पिल्लं तथैव च ॥ ६९ ॥

अक्षमात्रमादाय तु अष्टपलपरिमितं सुधीक्षीरम्, एतत्प्रमाणन्तु अर्कक्षीरमिति। विन्दुसङ्ख्यया निपीतमिति—"विन्दु स्यात्तर्जनीपर्वदयनग्नोद्भूतो मित" इति, व्यवहारात् षडष्टमाषका देया। विन्दुवेगैरिति—यावत्सङ्ख्यान् विन्दून् पिबेत् तावन्मात्रवेग विरिच्यते इत्यर्थः। "नाभिलेपाद्विरिच्यते" इत्यनेनास्य प्रभावात्कृष्टत्व दर्शितम् ॥ ६०—६५॥

इदानीं त्रिफलाघृतव्याख्यानमाह, त्रिफलेति।—त्रिफलाया रसप्रस्थमिति, स्वरसाभावे क्वाथं कल्कं वा प्रचरति। वासारसोद्भव प्रस्थमिति—वासा आट रूषक। भृङ्गराजो मार्कव घुमराशब्दवाच्य। आज पयस्काशीदुग्धम्। एके "प्रस्थमाज पय घृतस्य इत्यन्वयं' मतान्तरव्या गुडूच्यास्च आमलक्या रस तथा। प्रस्थ प्रस्थ समाहृत्य सर्वैरेभिर्घृत पचत्॥" इति पठन्ति व्याख्यानयान्ति च। कल्कैरिति वक्ष्यमाणद्रव्यैः, तद्यथा—त्रिफला हरीतक्यादिकम्। चन्दन श्वेतम्। पुण्डरीक श्वेतकमलम्। कमल रक्तनीलत्वेन रक्त नील वा। निशायुग्मामिति—हारिद्रा द्वयम्। मधुक मधुयष्टी। एतत सर्व भोजनाग्रे भोजनमध्ये भोजनान्ते च

नेत्रस्रावञ्च पटलं तिमिरं काचकं जयेत्।
अन्येऽपि प्रशमं यान्ति नेत्ररोगाः सुदारुणाः॥
त्रैफलं घृतमेतद्धि पाने नस्यादिषूचितम्॥ ७०॥

व्रणशोथे गौराद्य घृतम्।—

हे हरिद्रे स्थिरा मूर्वा सारिवा चन्दनद्वयम्।
मधुपर्णी च मधुक-पद्मकेशरपद्मकम्॥ ७१॥
उत्पलोशीरमेदाभिस्त्रिफलापञ्चवल्कलैः।
कल्कैः कर्षमितैरेतैर्घृतप्रस्थं विपाचयेत्॥ ७२॥
विसर्पलूताविस्फोट-विषकीटव्रणापहम्।
गौराद्यमिति विख्यात सर्पिर्विषहरं परम्॥ ७३॥

शिरोरोगे मायूरघृतम्।—

बलामधुकरास्नाभिर्दशमूलफलत्रिकैः*।
पृथक् द्विपलिकैरेभिर्द्रोणनीरेण पाचयेत्॥ ७४॥
मयूर पक्षपित्ताक्त-शकृत्पादास्थवर्जितम्।
पादशेष घृतं नीत्वा क्षीरं दत्त्वा च तत्समम्॥ ७५॥

विहितम्, तथा च तन्त्रान्तरे—"ऊर्ध्वपानमथ पान मध्ये पानञ्च शस्यते" इति। शर्करादि सिद्धे प्रक्षेपमाहुरेके। नक्तान्ध्यादयो नेत्ररोगे विख्याता॥ ६६—७०॥

अधुना गौराद्य घृतमाह, हे हरिद्रे इति।—हरिद्रा दारुहरिद्रा। स्थिरा शालपर्णी। मूर्वा धीरस्वामु। सारिवा आस्फोता। चन्दनद्वयमिति—श्वेतरक्तभेदेन। मधुपर्णी यष्टीमधुभेद। मधुक मधुयष्टी। केचित्तु मधुयष्ट्या एव भागद्वय यान्ति हि पाठात्। पद्मक वृक्षविशेष। पद्मवल्कलैरित्यत्राये "जातीनिम्बपटोलज करञ्ज तिन्तासिकृत्पद्मकम्" इति पठन्ति, तत बहुपुस्तकेषु न दृश्यते। अत्रापि कल्कपाकार्थे पानीय चतुर्गुणमिति देय, परिभाषामतानुसारत। गौराद्यमिति—गौरा हरिद्रा॥ ७१—७३॥

अथ मयूराद्य घृतमाह, बलेति।—बला। मधुक यष्टीमधु। रास्ना सुरभि। दशमूल प्रसिद्धम्। फलत्रिक हरीतक्यादि। पृथक् द्विपलिकैरेभिरित्यस्य स्थाने

---

* बला इत्यादिश्लोके "दशमूलबलारास्नामधुकैस्त्रिफलै सह" इति पाठ भावप्रकाशसम्मत। "शकृत्पादास्थवर्जितम्" इत्यत्र "शकृत्पादास्थवर्जितम्" इति पाठान्तरम्।

घृतप्रस्थं पचेत् सम्यक् जीवनीयैः पिचून्मितैः।
तत् सिद्धं शिरसः पीडा मन्यापृष्ठग्रहं तथा ॥ ७६ ॥
अर्दितं कर्णनासाक्षि-जिह्वागलरुजो जयेत्।
पाने नस्ये तथाऽभ्यङ्गे कर्णपूरेषु युज्यते ॥
हेमन्तकालशिशिर-वसन्तेषु च शस्यते ॥ ७७ ॥

योनिव्यापत्सु हरीतकीघृतम्।—

त्रिफला मधुकं कुष्ठं द्वे निशे कटुरोहिणी।
विडङ्गं पिप्पली मुस्तं विशाला कट्फलं वचा ॥ ७८ ॥
द्वे मेदे द्वे च काकोल्यौ सारिवे द्वे प्रियङ्गुका।
शतपुष्पा हिङ्गु राम्ना चन्दनं रक्तचन्दनम् ॥ ७९ ॥

केचित् विपलिकेरिति पठन्ति मानयन्ति च। पक्वपित्तान्नशक्त्यादास्त्रवर्जित मयूरमेक द्रोणनीरेणेति—चतुराढकमितेन पानीयेन, व्यवहारत किन्तु अधिक जल देय, यत मयूरेण सह द्रव्याणा क्वाथविधान भवति। तथा च चक्र, —"दशमूलादिना तुल्यो मयूर इह गृह्यते" इति। एव मिलित्वा यावत क्वाथ्य भवति तावज्जल देयम्, तत्र "क्वाथ्याच्चतुर्गुण वारि" इत्यादि परिभाषया जल-व्यवस्थेति पूर्वव्याख्याप्रचार। क्षीर दत्त्वा च तत्समामिति—क्वाथसमम्, एके * घृतसम क्षीरमिति मन्यन्ते, तदपि सङ्गत द्रवान्तरत्वात्। जीवनीये पिचू न्मितैरिति—जीवनीयो मधुरगण, स यथालाभ ग्राह्य। पिचून्मित कर्षप्रमाणे प्रत्येक, जीवनीयस्तु कल्करूप इत्याहु। एतत् घृत पानाभ्यङ्गनस्यादिषु योज्यम्। सेव्यमेत हिमशिशिरवसन्तेषु इति, अन्यथा दोषकृत स्यात्, तथा चोक्त—'हेमन्त काले शिशिर च सेव्य वसन्तकाले च मयूरसर्पि। उष्णादिदाही विषभक्षणाच्च वर्षाशरद्ग्रीष्ममुखेषपथ्यम्॥ आहारजात हि विरुद्धमस्य कीटाश्च सर्पाश्च सरीसृपाश्च। पिपीलिकामत्कुणमक्षिकाश्च तेनोष्णकालेष्वहितो मयूर॥ तथैव काले जलदाभिरामे विसृज्य युक्तश्च बलञ्च बही। क्रियत्वमायात्यतिदीनभावात् अरण्मुखे तेन विवर्जनीयम्॥" इति॥ ७४—७७॥

इदानी हरीतक्यादिघृतमाह, त्रिफलेति।—विशालेन्द्रवारुणी। द्वे मेदे इति—

---

* एतदेव चरकादिसम्मतम्।

जातीपुष्पं तुगाक्षीरी कमलं शर्करा तथा।
अजमोदा च दन्ती च कल्कैरेतैश्च कार्षिकैः॥ ८०॥
जीवद्वत्सैकवर्णाया घृतप्रस्थञ्च गोः क्षिपेत्।
चतुर्गुणेन पयसा पचेदारण्यगोमये॥ ८१॥
सुतिथौ पुष्यनक्षत्रे मृद्भाण्डे ताम्रजे तथा।
ततः पिबेच्छुभदिने नारी वा पुरुषोऽथवा॥ ८२॥
एतत् सर्पिर्नरः पीत्वा स्त्रीषु नित्यं वृषायते।
पुत्रानुत्पादयेद्भीमान् वन्ध्याऽपि लभते सुतम्॥ ८३॥
अनायुषं या जनयेत् या च सूता पुनः स्थिता।
पुत्र प्राप्नोति सा नारी बुद्धिमन्तं शतायुषम्॥ ८४॥
एतत् फलघृत नाम भारद्वाजेन भाषितम्।
अनुक्तं लक्षणामूल क्षिपेदत्र चिकित्सकः॥ ८५॥

योनिव्यापत्सु खल्वफलघृतम।—

त्रिफला हे मदुचरे गुडूचीं सपुनर्नवाम।
शुकनासां हरिद्रे हे राक्षा मेदा शतावरीम्॥ ८६॥

मेदा मदुमेदा। हे च काकोल्याविति—काकोली क्षीरकाकोली। सारिवे हे इति—सारिवा कृष्णसारिवा "साव" इति लोके। प्रियङ्गुर्लताविशेष। राक्षा सुरभी। जाती सुमना तथा पृथम्। तुगाक्षीरी वंशी। कमलमुत्पलम। दन्ती जयपालमूलम। शेष स्पष्टं सुबोधम। एतेषां प्रत्येक कर्षप्रमितानां कल्कमाह। जीवद्वत्सा एकवर्णा या गोस्तस्या घृतमिति, जीवद्वत्सायहणमिति मङ्गलत्वात्। चतुर्गुणेन पयसेति—घृतपरिमाणात्। आरण्यगोमयैरिति—मन्दपावकपाचनत्वात्। अनुक्त लक्षणामूलमिति क्वचित पठ्यते, लक्षणा श्वेतकण्टकारिका, अन्ये अल्पविल्वपत्राह तथा हि—"पुत्रकाकारवक्त्राल्पविल्वुभिर्लाञ्छिता सदा। लक्षणा पुत्रजननी वल्लगन्धाकृतिर्भवेत॥ शरत्काले भवति सा फलपुष्पान्विता सदा। गृह्णीयात * पुष्यमूलार्के हस्तार्के चाभिमन्त्र्य च॥" इत्यादि॥ ७८—८५॥

अथ लघुफलघृतमाह, त्रिफलामिति।—मदुचरे हे पीतरक्तभेदेन। शुकनासा

---

* पुष्यमूलार्के हस्तार्के इत्यत्र पुष्यमूलचें हस्तचें इति पाठकल्पनं समीचीनम्।

कल्कीकृत्य घृतप्रस्थं पचेत् क्षीरे चतुर्गुणे।
तत् सिद्धं पाययेन्नारीं योनिशूलनिपीडिताम् ॥ ८७ ॥
पिच्छिला चलिता या च निःसृता विवृता च या।
पित्तयोनिश्च विस्रस्ता षण्ढयोनिश्च या स्मृता ॥ ८८ ॥
प्रपद्यन्ते हि ताः स्थानं गर्भं गृह्णन्ति चासकृत्।
एतत् फलघृतं नाम योनिदोषहरं परम् ॥ ८९ ॥

विषमज्वरादौ पञ्चतिक्तकं घृतम्।—

वृषनिम्बामृताव्याघ्री-पटोलानां शृतेन च।
कल्केन पक्वं सर्पिस्तु निहन्याद्विषमज्वरान् ॥
पाण्डु कुष्ठं विसर्पञ्च क्रिमीनर्शांसि नाशयेत् ॥ ९० ॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां मध्यखण्डे चिकित्सितस्थाने घृतकल्पना नाम नवमोऽध्यायः ॥ ९ ॥

श्लीपदम्। राला सुरभिः। शेषं द्रव्यं सुगमम्। एतत् सकलं घृतचतुर्थांशं ग्राह्यं, कल्कं कृत्वा क्षीरचतुर्गुणेन सह घृतं साध्यम्, अत्र कल्कार्थं चतुर्गुणं पानीयं देयं, चतुर्गुणं क्षेहपरिमाणात्। एतत् घृतं योनिदोषेषु प्रायशः प्रचरति। पिच्छिला चलितेत्यादयो योनिगदविशेषाः कथिताः, ते तु तत्रैव बोद्धव्याः ॥ ८६—८९ ॥

अथ पञ्चतिक्तकघृतमाह, वृषेति।—वृषः आटरूषकः, निम्बः प्रसिद्धः, अमृता गुडूची, व्याघ्री कण्टकारिका पटोलः प्रसिद्धः, एतेषां शृतेन क्वाथेन क्वाथार्थं द्रव्यं क्षेहद्विगुणम्, पानीयमत्र चतुर्गुणं क्वाथ्यचतुर्थांवशेषं ग्राह्यम्। कल्केनेति।—वृषादीनामपि कल्केन पाकमाह, कल्कार्थं घृतचतुर्थांशं द्रव्यकटत्वमाह। * पानीयमत्र चतुर्गुणं शोभनपाकार्थम्। अस्य पानाथङ्गमाह। इति घृतं समाप्तम् ॥ ९० ॥

इति श्रीबालव्याधिप्रकाशवैद्य-श्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यखण्डे चिकित्सितस्थाने घृतकल्पना नाम नवमोऽध्यायः ॥ ९ ॥

---

* मतमेतत् सुश्रुतादिविरुद्धं, तत्तु प्रदर्शितमेव।

दशमोऽध्यायः ।

तैलकल्पना ।—

विषमज्वरादौ लाचादितैलम् ।—

लाचाढकं क्वाथयित्वा जलस्य चतुराढकैः ।
चतुर्थांश्च घृत नीत्वा तैलप्रस्थे विनिक्षिपेत् ॥ १ ॥
मस्त्वाढकञ्च गोदध्नस्तत्रैव विनियोजयेत् ।
शतपुष्यामश्वगन्धा हरिद्रा देवदारु च ॥ २ ॥
कटुकीं रेणुका मूर्वा कुष्ठञ्च मधुयष्टिकाम् ।
चन्दन मुस्तक रास्ना पृथक्कर्षप्रमाणत. ॥ ३ ॥
चूर्णयेत्तत्र निक्षिप्य साधयेन्मृदुवह्निना ।
अस्याभ्यङ्गात् प्रशाम्यन्ति सर्वेऽपि विषमज्वराः ॥ ४ ॥
कासश्वासप्रतिश्याय-चिकपृष्ठग्रहास्तथा ।
वात पित्तमपस्मारमुन्मादं यक्षराक्षसान् ॥ ५ ॥
कण्डू शूलञ्च दौर्गन्ध्य गात्राणा स्फुरण जयेत् ।
पुष्टगर्भा भवेदस्य गर्भेणाभ्यङ्गतो भृशम् ॥ ६ ॥

क्षीणज्वरे अङ्गारकतैलम् ।—

मूर्वा लाचा हरिद्रे द्वे मञ्जिष्ठा सैन्द्रवारुणी ।
बृहती सैन्धवं कुष्ठं रास्ना मांसी शतावरी ॥

इदानी तैलकल्पनाया प्रथमतो लाचादितैलमाह, लाचाढकमिति ।—अत्र लाचारस तैलाच्चतुर्गुणो ज्ञेय, लाचाया आढकमपि निर्व्यासत्वाद्बहुतरम । मस्त्वाढकमपि तैलाच्चतुर्गुण ज्ञेयमित्यर्थ, गोदध्न इति—गोदधिसम्भव मस्तु, न तु दध्याढकमपि तैले पचनीय, यतस्तन्मात्रेऽपि—"लाचारस समादाय तैल-प्रस्थाच्चतुर्गुणम् । मस्तुनश्चाढक दद्याद्बृहत्यैरेभिश्च कार्षिकै ॥" इत्यादि । दधि-बृहणमत्र दधिसम्भवमस्तुपादनिमित्त कृत, यत मस्तु सप्तविध भवति;

आरनालाढके तत्र तैलप्रस्थं विपाचयेत्।
तैलमङ्गारक नाम सर्वज्वरविमोक्षणम्॥)

वातव्याधौ नारायणतैलम्।—

अश्वगन्धा बला बिल्वं पाटला बृहतीद्वयम्।
खदट्वाऽतिबला निम्ब श्योनाकञ्च पुनर्नवा॥ ७॥
प्रसारणोमग्निमन्थ कुर्याद्दशपलं भिषक्।
चतुर्द्रोणे जले पक्त्वा पादशेषं श्रुतं नयेत्॥ ८॥

—'स्वादुलवणाम्लकषायसन्दनात तथा घृतक्षीरभव सरत्व। असारमेव दधि सप्तधाऽस्मिन् वर्ग स्मृता मन्थनृपाणीव॥" (सु० सू० ४५ अ०) इति। द्रव्याण्यत्र प्रसिद्धानि। कोचन् 'वृक्षक मधुयष्टिकाम्" इत्यस्यार्थे 'मञ्जिष्ठापद्मकोशीर-मांसीलोहितचन्दनम्" इति पठन्ति व्याख्यानयन्ति च। कल्कात्तैल चतुर्गुणम्" इति परिभाषया यद्द्रव्यद्वय तदनुकल्कपरिमाणार्थं मनोहरम्। चूर्णयेदिति—अत्र चूर्णोपलक्षितत्वात् प्रथमं चूर्णीभूत क्वाथ पश्चात् दुग्धादि पेषित कुर्यादिति भाव। विकृष्टपृष्ठयष्टा इति—† तृतीयज्वरभेद कथित, यत,—"कफपित्तात् विकृष्टाङ्गो पृष्ठात वातकफात्मक" (च० चि० ज्वर०) इति वचनात। यद्यपि पूर्वं विषमज्वरयष्टयैव तृतीयकज्वर-प्राप्तिरुक्ताऽपि विशेषेण तृतीयकज्वरनाशनेऽस्य प्रभाव इत्यदोष। अस्य तैलस्याभ्यङ्गात् गर्भिणी स्त्री पुत्रगर्भा भवेत इति, प्रसादाऽऽस्येति केचित॥ १—६॥

अथ नारायणतैलव्याख्यानमाह, अश्वगन्धादीनि इति।—अत्राश्वगन्धादीनि प्रसिद्धानि,

---

- नारायणतैल निम्बशब्द पारिभद्राथक "पारिभद्रो निम्बतरुर्मन्दार पारिजातक" इति कोषात् कल्पान्तरे पारिभद्रपाठदर्शनाच्च। चक्रदत्ते कल्पोक्त-बलाऽश्वगन्धा-स्थाने पुनर्नवा इति पाठ।

† आकोडय सप्तविधदधिजात- सप्तविधमस्तुन स्वयोनिवत गुणवत्त्वप्रदर्शनपर न तु दध्यादितरद्रव्यजातमस्तन पोषणपर। अस्तु तु दधिनि घृतजलार्थं एव प्रसिद्धम्, यत्तु शुश्रुतेन कूर्चिकादधितक्रज मस्तुद्य मस्तुत्रय वा उक्त तत्तु नातिप्रसिद्धम।

‡ विकृष्टपृष्ठयष्टा तृतीयकज्वरभेद इत्यादि यदुक्त तत्र सङ्गत, विकृष्टपृष्ठयष्टस्तु वातव्याधावशेष एव, यदि विकृष्टपृष्ठयष्टशब्देनैव तृतीयको लभ्यते तदा वातव्याधि-विध्वंसनेन पार्श्वपृष्ठशिरोग्रह इत्यत्रापि पृष्ठशिरोग्रह इत्यनेन तृतीयक एव लक्षिता भावेत्मर्हति, यत,—"पृष्ठात वातकफात्मक। वातपित्ताच्छिरोग्राही विविध कालतायक॥" इति सुधीभिर्विभाव्यम्।

तैलाढकेन संयोज्य शतावर्य्या रसाढकम्।
क्षिपेत्तत्र च गोक्षीरं तैलात्तस्माच्चतुर्गुणम् ॥ ९ ॥
शनैर्विपाचयेद्भिः कल्कैर्द्विपलिकैः पृथक्।
कुष्ठैलाचन्दनबला-मासीशैलेयसैन्धवैः ॥ १० ॥
अश्वगन्धावचाराला-शतपुष्पेन्द्रदारुभिः।
पर्णीचतुष्टयेनैव तगरेण च साधयेत् ॥ ११ ॥
तत्तैलं नावनेऽभ्यङ्गे पाने वस्तौ च योजयेत्।
पक्षाघातं हनुस्तम्भं मन्यास्तम्भं गलग्रहम् ॥ १२ ॥
खल्लत्वं बधिरत्वञ्च गतिभङ्गं कटिग्रहम्।
गात्रशोषेन्द्रियध्वंसावसृक्शुक्रस्वरक्षयान् ॥ १३ ॥
अन्ववृद्धिं कुरण्डञ्च दन्तरोगं शिरोग्रहम्।
पार्श्वशूलञ्च पाङ्गुत्वं बुद्धिहानिञ्च गर्भस्रोम् ॥ १४ ॥
अन्यांश्च विषमान् वातान् जयेत् सर्वाङ्गसंश्रयान्।
अस्य प्रभावात् वन्ध्याऽपि नारी पुत्रं प्रसूयते ॥ १५ ॥

एतेषां मूलं ग्राह्यम्। केचित्तु "शतपुष्पाऽतिबला भद्रम्" इति पठन्ति, तत्र भद्रः पारिभद्रो वक्तपुष्पः सकण्टको वृक्षविशेषः स्वनाम्ना प्रसिद्धः, फलभद्रामूल-मित्यन्ये, तदभावे देवदारु ग्राह्यम्। दशपलमिति प्रत्येकम्। पादशेषमिति —द्रोणशेषम्। शतावरी प्रसिद्धा, तस्या सद्यीरसो वल्लपीडनादिना ग्राह्यः, तदभावे क्वाथितरसो वा। तत्र गोक्षीरं क्षिपेदिति—तत्र तैले। चकारादाज वा ग्राह्यं, वक्ष्यमाणदर्शनात्, तथा हि—"आजं वा यदि गव्यञ्च" इत्यादि। क्वचित् गव्यानुपलब्धौ गव्यमपि गुणसाम्यं, तथाऽपि छागीक्षीरेण पक्वमनभिष्यन्दि विदोषघ्नञ्च भवति। कल्कैरिति—कल्कार्हद्रव्यैः पृथक् द्विपलिकैरित्यर्थः, तद्यथा कुष्ठैलेत्यादि। अत्र चन्दनं श्वेतम्। शैलेयं शिलापुष्पम्। बला अतिबला। इन्द्रदारु देवदारु। पर्णीचतुष्टयेनेति—तेन शालपर्णी, पृश्निपर्णी, माषपर्णी, मुद्गपर्णी चेति पर्णीचतुष्टयं कथितम्। तगरं तगरपादिका, तदभावे * ग्रन्थिपर्ण-मिति सर्वत्र। एतस्मिन् तैले नावनादौ शीतम्। खल्लत्वं मन्दवचनत्वम्।

तगराभावे शिग्रुबीजटा ग्राह्या इति पारभाषा, शिवदासादिभिरपि अयमेवार्थो गृहीतः, "नत्र तगरमूलं स्वादभावे शिग्रुबीजटा" इत्युक्तम्।

मर्त्यो गजो वा तुरगस्तैलादस्मात् सुखी भवेत्।
यथा नारायणो देवो दुष्टदैत्यविनाशन॥
तथैव वातरोगाणां नाशनं तैलमुत्तमम्॥ १६॥

वैपथुवात वारुणीतैलम्।—

(वारुण्या औत्तर मूलं कुष्टितन्तु पलत्रयम्।
पलद्वादशकं तैलं क्षणं वह्नौ विपाचितम्॥
निष्कत्रय भक्तयुक्तं सेवेतास्माद्विनश्यति।
हस्तकम्पं शिरःकम्पं कम्पो मन्याशिराभवः॥)

वातव्याधौ बलातैलम्।—

बलामूलकषायेण दशमूलस्मृतेन च।
कुलत्थयवकोलानां क्वाथेन पयसा तथा॥ १७॥
अष्टाष्टभागयुक्तेन भागमेकञ्च तैलतः।
गणेन जीवनीयेन शतावर्य्येन्द्रदारुणा॥ १८॥
मांसिष्ठाकुष्ठशैलेय-तगरागुरुसैन्धवैः।
वचापुनर्नवामांसी*सारिवाद्वयपत्रकैः॥ १९॥

इन्द्रियध्वंस इति—इन्द्रियविषयनाश। गजतुरगावपि वातविकारपीडितौ। केचित्तु सुगन्धाद्यनवतारणसमये सुगन्धद्रव्याण्यनुक्तान्यपि प्रक्षिपन्ति, तद्यथा—"समङ्गालवकक्कोल नलिकालातिकोषकम्। त्वक्कुन्दुरुष्ककर्पूर-तुरुष्कशीतिवासकम्॥ सृक्काकुङ्कुमकस्तूरीदंशादवावतारितं॥" इति। एवमन्यत्रापि बोद्धव्यम्। अस्य ग्रन्थान्तरे पत्रकल्कसंज्ञा, यत,—"गन्धनिर्य्यासपुष्पाणां सिद्धे शीतेऽवतारिते। प्रक्षेपो गन्धसङ्घार्थं पत्रकल्कन्तु तद्विदुः॥" इति। नारायणसंज्ञा विष्णुकृतत्वात् शतावरीसाधनाद्वा ज्ञेया, नारायणीति शतावर्य्या पर्य्यायोऽस्ति। यद्वा अनेनैवोक्तत्वात् "यथा नारायणो देवो दुष्टदैत्यविनाशन। तथैव वातरोगाणां नाशनं तैलमुत्तमम्॥" इति, अत एव नारायणसंज्ञा। शतावरीसाधनात् शतावरी-नारायणतैलसंज्ञा इति प्रसिद्धं॥ ७—१९॥

इदानीं बलातैलमाह, बलामूलेति।—बलामूलकषायेणेति—कषायोऽत्र

* सारिवाद्वयस्थले सुश्रुतचक्राम्बा सारिवाकाकोलीसारिवा इति पठितम्, काश्यपस्तु सारिवा तगरपादुका इति भिषग्दासः।

शतपुष्याऽश्वगन्धाभ्यामेलया च विपाचयेत् ।
गर्भार्थिनीनां नारीणां नराणां क्षीणरेतसाम् ॥ २० ॥
व्यायामक्षीणगात्राणां सूतिकानाञ्च युज्यते ।
राजयोग्यमिदं तैलं सुखिनाञ्च विशेषतः ॥
बलातैलमिति ख्यातं सर्ववातामयापहम् ॥ २१ ॥

वातव्याधौ प्रसारणीतैलम् ।—

प्रसारणीपलशतं जलद्रोणेन पाचयेत् ।
पादशिष्टः स्रुतो ग्राह्यस्तैलं दधि च तत्समम ॥ २२ ॥

क्वाथरूप, * कल्कावशेषो वेति केचित् । दशमूल प्रसिद्ध तच्छृतेन क्वाथेनेत्यर्थः । कुलत्थयवकोलानां मिलित्वा क्वाथ । पयोऽव गव्यमाज वा । अष्टांशावशेषेणेति—तेन बलाक्वाथस्याष्टौ भागा तैलभागापेक्षया दशमूलक्वाथस्याष्टौ, सम्मिलितयवादीना क्वाथस्याष्टौ, पयसस्त्वष्टौ भागा तैलस्यैको भाग । जीवनीयगणो मधुरवर्ग, तद्यथा—"जीवन्ती सूक्ष्मपर्णीयुक् काकोल्यौ जीवकर्षभौ । मेदे यष्टीति मधुरो जीवनीयगणो मत ॥" इति । ग्रीष सुबोधम । † तत्रान्तरेऽस्य दशपाकबलातैलमिति रूढा तत्रैव यथोक्तमानेन दशवार यावत पक्तव्य वीर्योत्कर्षार्थं, बहुपाकेन स्नेहक्षयोऽत्र नास्ति, चीरगतस्नेहपूरणात । एतदभिप्रायेणैव केचिदित्थ मन्यते तद्यथा—बलामूलकषायेणैक पाक दशमूलशतेन द्वितीय, कुलत्थादीनां पृथक् क्वथ पाका, तत्र कुलत्थादीना पृथक् तैलादष्टगणो ज्ञेय, पयसा षष्ठ पाक, जीवनीयशतेन सप्तम शतावरीरसेनाष्टम, ईक्षदारुशतेन केवलेन नवम ईक्षदारुपरिमाणं क्वाथवत, यत जीवनीयगणशतावरीईक्षदारूणा त्रय पाकास्तृतीयान्तपदस्थेन व्याख्याता, वक्ष्यमाणसप्तिष्ठादिकल्केन दशम इति । तस्माद्दशपाकबला इति रूढास्य वदन्ति केचित । अन्यत्सम्प्रदाये पूर्वपक्ष प्रचरति । केचित्तु सकलोचितद्रव्यैर्दशवार यावत पाकस्य पुनरावृत्तिर्भवतीति मन्यते तदव्यवहाराटसङ्गतम ॥ १७—२१ ॥

अधुना प्रसारणीतैलमाह, प्रसारणीति ।—प्रसारणी प्रसिद्धा, तन्मूल कुट्टयित्वा

---

* कल्कावशेषो वा इति मतन्तु सर्वथैव सर्वतन्त्रविरुद्धम् ।

† दशपाकबलातैल वातरक्ताधिकारे श्रीचक्रपाणिना निर्दिष्टं, तद्यथा—"बलाक्वाथकल्काभ्या तैल क्षीरचतुर्गुणम् । दशपाकं भवेदेतत—" इत्यादि । इदन्तु बलातैल चक्रेण वातव्याधौ, सुश्रुतेन मूढगर्भे पठितम्, तत्र तत्रास्य दशकृत्व, पाकस्य मूले टीकायां वा सूचनाऽपि नास्ति ।

काञ्जिकञ्च समं तैलात् क्षीरं तैलाच्चतुर्गुणम्।
तैलात्तथाऽष्टमांशेन सर्वकल्कानि योजयेत्॥ २३॥
मधुकं पिप्पलीमूलं चित्रकं सैन्धवं वचा।
प्रसारणी देवदारु रास्ना च गजपिप्पली॥ २४॥
भल्लातं शतपुष्पा च मासौ चैर्भिर्विपाचयेत्।
एतत्तैलवरं पक्वं वातश्लेष्मामयान् जयेत्॥ २५॥
कौब्ज्यं पङ्गुत्वखञ्जत्वे गृध्रसीमर्दितं तथा।
हनुपृष्ठशिरोग्रीवा-कटिस्तम्भञ्च नाशयेत्॥
अन्यांश्च विषमान् वातान् सर्वानाशु व्यपोहति॥२६॥

वातव्याधौ † माषतैलम्।—

माषौ यवोऽतसी क्षुद्रा मर्कटी च कुरण्टकः।
गोकण्टकण्टकस्यैषा कुर्य्यात् सप्तपलं पृथक्॥ २७।
चतुर्गुणाम्बुना पक्त्वा पादशेषं घृतं नयेत्।
कार्पासास्थीनि बदर शृङ्गवीजं कुलत्थकम्॥ २८॥

पलशतं सङ्गृह्य द्रोणपरिमितेन जलेन सङ्काथ्य पादावशेषो ग्राह्यः, तेन साम्यं तैलं तिलसम्भव ग्राह्यं, द्रोणस्तु चतुराढक इति, आढकश्चत षष्टिपलमित्यर्थः। दधि च तैलसमं, काञ्जिकमपि तैलसमं, क्षीरं चतुर्गुणं तैलपरिमाणात्। तैलस्याष्टमांशेन कृत्वा वक्ष्यमाणद्रव्याणां भागः। तत्र मधुकं यष्टीमधु। भल्लातो भल्लातकफलम्। मासौ माषौ। एतच्च तन्त्रान्तरेषु कुलत्थप्रसारणीतैलमिति संज्ञा, कौब्जेऽत्यर्थं विहितत्वात्। हनुपृष्ठशिरोग्रीवाकटीस्तम्भमिति—तेन सम्भग्नो हन्वादिभि प्रत्येकमभिसम्बध्यते॥ २२—२६॥

सम्प्रति माषादितैलमाह, माष इति।—माषादिटुरण्टकान्तं द्रव्यं पृथक्सप्तपलमित मिलित्वा षट्पञ्चाशत्पलानि भवन्ति। तवातसी उमाबीजम्। क्षुद्रा कण्टकारिका। मर्कटी कपिकच्छुः। कुरण्टक सहचर। गोकण्ट गोक्षुरक। टुण्टकः श्योनाक। कार्पासास्थिप्रभृति कुलत्थान्त पृथक् चतुर्थांशपल, तेन मिलित्वा षट्-

---

* पक्त्वा क्षीरं तैलात् द्विगुणमित्याह।

† पक्त्वैतन्माषतैलीक्तकल्कद्रव्यापेक्षया अत्र कुष्ठ तथा जटामासौति द्रव्यद्वयमधिकम्। किञ्च कटुका इत्यत्र कटुकमिति तत्र पाठ, कटुक मरिचमिति शिवदासः।

पृथक् चतुर्दशपलं चतुर्गुणजले पचेत्।
चतुर्थांशावशिष्टञ्च गृह्णीयात् क्वाथमुत्तमम् ॥ २८ ॥
प्रस्थैक क्षागमासस्य चतुःषष्टिपले जले।
निक्षिप्य पाचयेद्धीमान् पादशेषं घृत नयेत् ॥ ३० ॥
तैलप्रस्थे तत सर्वान् क्वाथानेतान् विनिक्षिपेत्।
कल्कैरेभिश्च विपचेटमृताकुष्ठनागरैः ॥ ३१ ॥
रास्नापुनर्नवैरण्डैः पिप्पल्या शतपुष्पया।
बलाप्रसारणीभ्याञ्च माष्या कटुकया तथा ॥ ३२ ॥
पृथगर्द्धपलैरेतै. साधयेत् मृदुवह्निना।
हन्यात्तैलमिद शीघ्रं ग्रीवास्तम्भापबाहुकौ ॥ ३३ ॥
अर्द्धाङ्गशोषमाक्षेपमूरुस्तम्भापतानकौ।
आखाकम्पं शिरःकम्प विश्वाचीमर्दित तथा ॥
माषादिकमिद तैलं सर्ववातविकारनुत् ॥ ३४ ॥

वातव्याधौ शतावरीतैलम्।—

शतावरी बलायुग्मं पर्ण्यौ गन्धर्वहस्तकः।
अश्वगन्धा श्वदष्ट्रा च विल्व. काशः कुरण्टकः ॥३५॥
एतान् सार्द्धपलान् भागान् कल्कयेच्च विपाचयेत्।

प्रत्यग्रत्वलानि भवन्ति। अव बदर बदरीफलानि। क्षागमासस्येहाप्युक्तपरिमाणस्य क्वाथ। तैलस्य प्रस्थम। क्वाथानेतानिति—पूर्वोक्तान्। एभिस्त्रिभिर्द्रवैर्मेलित्वा चातुगुण्य द्रवत्वात तैलभागादित्यर्थ। कल्कार्थद्रव्याण्यपि पृथगर्द्धपलमितानि भवन्ति। तचामृता गुडूची। नागर शुण्ठी। एरण्ड एरण्डमूलम्। शतपुष्पा मिसी। माषी जटाख्या। कटुका रोहिणी। एतत तैल प्रायेण नस्याथमाह। सर्ववातविकारनुत इत्यनेन वातनाशनाथात्र प्रचुरतवमस्य माहात्म्य दार्शतम् ॥२७—३४॥

अथ शतावरीतैलमप्याह, शतावरीति।—शतावरी दिव्यौषधि। बलायुग्ममिति—बला अतिबला नागबला। पर्ण्यौ द्वे त शालपर्णी पृश्निपर्णी चेति। गन्धर्वहस्तक एरण्ड। श्वदष्ट्रा गोक्षुरक। विल्व इति—अत्र विल्वमूलम्। काश प्रसिद्ध; तस्य

चतुर्गुणेन नीरेण पादशेष श्रृत नयेत् ॥ ३६ ॥
नियोज्य तैलप्रस्थे च क्षीरप्रस्थं विनिक्षिपेत्।
शतावरीरसप्रस्थं जलप्रस्थञ्च योजयेत् ॥ ३७ ॥
शतावरीदेवदारु-मासीतगरचन्दनम्।
शतपुष्पा बला कुष्ठमेला शैलेयमुत्पलम् ॥ ३८ ॥
ऋद्धिर्मेदा च मधुक काकोली जीवकस्तथा।
एषा कर्षसमैः कल्कैस्तैलं गोमयवह्निना ॥ ३९ ॥
पचेत्तन्मूर्द्धतैलेन नरः स्त्रीषु हृषायते।
नारी च लभते पुत्र योनिशूलञ्च नश्यति ॥ ४० ॥
अङ्गशूल शिरःशूल कामला पाण्डुता गरम्।
गृध्रसीप्लीहशोषाश्च मेहान् दण्डापतानकम् ॥ ४१ ॥
सदाह वातरक्तञ्च वातापित्तगदार्दितम्।
असृग्दर तथाऽऽध्मान रक्तपित्तञ्च नश्यति ॥ ४२ ॥
शतावरीतैलमिद कृष्णात्रेयेण भाषितम्।
श्रीं नारायणोये स्वाहा।
उत्तराभिमुखो भूत्वा खनेत् खदिरशङ्कुना ॥ ४३ ॥

मूलम्। कुरण्टक सहचर, अस्यापि मूलमत्र। एतान् सार्द्धपलान् भागानिति—एतान् पूर्वोक्तान्, भागानिति—पृथग्भूतान्, सार्द्धपलानिति—अष्टपलेन सह पल, तेन षट्कर्षामत प्रत्येकमाहु, * मिलित्वा प्रस्थमेकम्। जलप्रस्थञ्च योजयेदिति—जल पानीय, तच्चात्र कल्कपाकायमभिहितम्। तत् कल्कद्रव्यमाह, शतावरीत्यादि।—तत्र मासी गन्धाख्या। तगर प्रसिद्धम्। चन्दन श्वेतम्। शैलेय शिलापुष्पम्। उत्पल कमल, तदभावे पद्मबीजम्। ऋद्ध्यादिजीवकान्तद्रव्यलाभात् तत्साम्यगुणद्रव्य प्रयोज्यमिति सर्वत्र। गोमयवह्निनेति यज्ञस्य सदाग्नेसाधनार्थम्। मूर्द्धतैलनेति—मूर्द्धतैलेन तथा मूर्द्धि पूरितेन तैलेनेत्यर्थ। नर पुरुष स्त्रीषु हृषायत हर्षं प्राप्नोतीत्यर्थ, पानादभ्यङ्गतो वा। कृष्णात्रेयेणेति—कृष्णात्रेय पुनर्वसुरिति

---

* प्रत्येक सार्द्धपलानितानि एकादशद्रव्याणि मिलित्वा अष्टपलाधिक प्रस्थमान भवति, न तु प्रस्थमानम्।

"ओं सर्वव्याधिसाधनीये स्वाहा" इत्युत्पाटनमन्त्रः।
"ओं कुमारीजीवनाये स्वाहा" इति पानमन्त्र ।

अर्श सु काशीशाद्य तैलम।—

कासीस लाङ्गली कुष्ठं शुण्ठी कृष्णा च सैन्धवम्।
मनःशिलाऽश्वमारश्च विडङ्गं चित्रको द्रुम ॥ ४४ ॥
दन्ती कोशातकीबीजं हेमाह्वा हरितालकम्।
कल्कैः कर्षमितैरेतैस्तैलप्रस्थं विपाचयेत् ॥ ४५ ॥
स्नुह्यर्कपयसी दद्यात् पृथक् द्विपलसम्मिते।
चतुर्गुणं गवां मूत्रं दत्त्वा सम्यक् प्रसाधयेत् ॥ ४६ ॥
कथित खरनादेन तैलमर्शोविनाशनम्।
क्षारवत् पातयत्येतदर्शांस्यभ्यङ्गतो भृशम् ॥
बलौर्न दूषयत्येतत् क्षारकर्मकरं स्मृतम् ॥ ४७ ॥

देन कथितमित्यर्थः। अथ क्वाथखरसकल्कार्थं यत् शतावरीमूलं प्रोक्तं तदनेनैव मन्त्रेणोत्पाटनम्, कृत्वा १ वह्न्याऽपत्यादिकरणार्थं, तद्यथा—वह्न्यमाणेनोद्धारपूर्वं-काष्टाक्षरमन्त्रेण कृत्वा उत्तराभिमुखी भूत्वा खदिरशङ्कुना खदिरकाष्ठ-कीलकेन खनेत्। पश्चात् ओङ्कारसहितेनैकादशाक्षरमन्त्रेणोत्पाटनं कुर्यात्, मन्त्रस्वरूपाद्यं कथितं। अथ पानमन्त्रमाह, ओङ्कारयुतेन दशाक्षरेण मन्त्रेण क्षीरपानमिति। एते मन्त्रा मूलं प्रसिद्धा, ते तत एव ज्ञातव्या। शतावरी दिव्यौषधिरित्यनेन या सर्वा शतावरीसदृश्य औषध्यस्ता सर्वा एवमेव ग्राह्या इत्यर्थः ॥ ३५—४३ ॥

इदानीम् अपराणि क्षुद्रतैलान्याह। तत्रादौ कासीसाद्य दर्शयन्नाह, कासीसमिति। —कासीसं द्रव्यविशेषं भल्लातदलमृतं, तन्नेदं पुष्पकासीसं किञ्चित् पीतम्। लाङ्गली कलिकारिका। कृष्णा पिप्पली। अश्वमार करवीरक। द्रुम कुटजो वृक्षविशेषः। कोशातकी जालिनी, तस्या बीजमिति। हेमाह्वा स्वर्णक्षीरी, सा तु रक्तक्षीर-सेहुण्डभेदः, यस्य मूलं "धोक" इति प्रसिद्धम्। तैलप्रस्थमिति—चतुष्कुडवम् स्नुह्यर्कपयसी इति—स्नुही सेहुण्ड, अर्क प्रसिद्ध, तयोः पयसा पृथक् द्विपलमितेन

वातरक्ते पिण्डतैलम्।—

मञ्जिष्ठासारिवासर्ज-यष्ट्याह्वैः सिक्थकैः पलोन्मितैः।
पिण्डाख्यं साधयेत्तैलमभ्यङ्गाद्वातरक्तनुत् ॥ ४८ ॥

प्रामादौ अर्कतैलम्।—

अर्कपत्ररसे पक्वं हरिद्राकल्कमयुतम्।
नाशयेत् सार्षपं तैलं पामा कच्छ्रूं विचर्चिकाम् ॥ ४९ ॥

कुष्ठे मरिचाद्यं तैलम्।—

मरिचं हरितालञ्च त्रिवृत रक्तचन्दनम्।
मुस्तं मनःशिला मांसी द्वे निशे देवदारु च ॥ ५० ॥

लाधितमित्यर्थः। गोमूत्रे चतुर्गुणमत्र तैलपरिमाणात्। खरनादाचार्येण कथितमिदं दुग्धमनिष्कल्कनाथम्, एतच्च चारकर्मकरेण न गुरुदूषकमित्यर्थ ॥ ४४—४७ ॥

अथ पिण्डतैलमाह, मञ्जिष्ठेति।—अत्र सारिवा आस्फोता, सा च द्विविधा शुक्ला कृष्णा च, या लम्बूलत्वलतति सा शुक्ला, या कालस्कन्धत्वा सुगन्धा सा कृष्णेति। सर्जो धूपन, "राल" इति प्रसिद्ध। यष्टी मधुयष्टी। सिक्थो मधूच्छिष्ट "मयन" शब्दवाच्य, एतत् द्रव्य तैलाच्च कल्कार्थम्, अशश्चतुर्थांश। अन्यान्तरे पयोऽन्वितमिति पाठ, तत्र पय क्षीर, तच्च द्रवलाच्चतुर्गुण तैलपरिमाणात्, नेतन्मनोहरम्, यत पिण्डाख्यत्वेन सकल द्रव्य चारण पिण्डफलसदृश कल्कीभूत कृत्वा साधयदिति सम्प्रदायो बहुना दृश्यते, अत एव पिण्डाख्यामिति—पिण्डीभूतलात् पिण्डनामक तैल पिण्डतैलमित्यर्थ। पिण्डरूपत्वात् कल्काऽस्य न घोलनीय इत्याह। तैलमवैरञ्जनमपि गृह्णन्ति अन्यतो दर्शनात्, तथा हि—"सारिवासर्जयष्ट्याह्व मधूच्छिष्टै, पयोऽन्वितै। सिद्धमैरञ्ज तैल वातरक्तरुजापहम्॥" इति। पयोऽत्र सामान्यत्वाद्गव्यम् ॥ ४८ ॥

अथार्कतैलमाह, अर्केति।—अर्कपत्ररसोऽत्र चतुर्गुणस्तैलपरिमाणादिति व्यवहार दृश्यत्वात्। हरिद्रा चतुर्थांशा तैलमानात्, अथो, कल्कार्थं मानमाह, तस्य मान यावत् कल्क स्यात्। सार्षपग्रहण व्याविविक्षितत्वात्। प्रामादयो रोगा कुष्ठरोगे पाठिता ॥ ४९ ॥

मरिचाद्य तैलमाह मरिचमिति।—अत्र त्रिवृन्निगात। द्वे निशे हरिद्रे द्वे, तेन

---

१ चक्रोक्तस्वल्पमरिचाद्यतैले मरिचादिकल्कद्रव्याणा प्रत्येक कर्षद्वय विवक्ष्य तत्र गोमूत्रञ्च चतुर्गुणमिति पाठो दृश्यते।

विशाला करवीरश्च कुष्ठमर्कपयस्तथा।
तथैव गोमयरसं कुर्य्यात् कर्षमितान् पृथक् ॥ ५१ ॥
विषञ्चार्द्धपलं देयं प्रस्थञ्च कटतैलकम्।
गोमूत्रं द्विगुणं दद्याज्जलञ्च द्विगुणं भवेत् ॥ ५२ ॥
मरिचाद्यमिदं तैलं सिद्धं कुष्ठव्रणापहम।
जयेत् कुष्ठानि सर्वाणि पुण्डरीक विचर्चिकाम् ॥
पामा श्वित्राणि रक्तञ्च कण्डू कच्छूं प्रणाशयेत् ॥ ५३ ॥

अरूषिकाया विफलाद्य तैलम।—

त्रिफलाऽरिष्टभूनिम्ब द्वे निशे रक्तचन्दनम्।
एतैः सिद्धमरूषीणां तैलमभ्यञ्जने हितम् ॥ ५४ ॥

पलिते निम्बबीजतैलम।—

भावयेन्निम्बबीजानि भृङ्गराजरसेन हि।
तथाऽसनस्य तोयेन तत्तैलं हन्ति नश्यतः ॥
अकालपलितं सद्यः पुंसां दुग्धान्नभोजिनाम् ॥ ५५ ॥

हरिद्रा दारुहरिद्रा। विशालेन्द्रवारुणी। करवीर अश्वघ्न। अर्कपय गोमयरसस्य किञ्चिदधिको देय द्रवद्रव्यत्वात्। प्रस्थमिति—चतुर्भि कुडवै प्रमित कुडव चतुर्थल इति। गोमूत्र द्विगुणमिति—अत्र यत गोमूत्र द्विगुण कथित तत द्विगुणित-जलग्रहणात, अन्यत्र चतुर्गुण गोमूत्रमिति तत्र जल नास्ति, जलमत्र सम्यक् पाकार्थ-मुक्तम। केचिदिति मन्यन्ते अत्र कल्कालोडनार्थं जलमुक्त, न तु केवलजल-पाकार्थम (?) एतदपि सङ्गत न विरोध। कुष्ठव्रणापहमिति—कुष्ठान्त (?) व्रणानि तानपहन्तीति। श्वित्रपुण्डरीकादयो भेदा कुष्ठस्यैवागन्तव्या ॥ ५०—५३ ॥

अथ विफलाद्य तैलमाह, विफलारिष्टेति।—अत्र विफला हरीतकीप्रभृतिकम। अरिष्टो निम्ब। भूनिम्ब किराततिक्त। द्वे निशे हरिद्रे द्वे। एतैरिति—द्रव्यै. कल्क कृत्वा तैल साध्यम, तत्र तैलाच्चतुर्गुण जल देयं सम्यक् पाकार्थं द्रवानुक्तत्वात्। तैलाश कल्कद्रव्यमिति। एतदपि तैल कुष्ठोक्त सवर्णकरमाहुः ॥ ५४ ॥

इदानी केशरञ्जनार्थं निम्बबीजतैलमाह भावयेदिति।—एतेन निम्बबीजानि निशुद्धानि गृहीत्वा भृङ्गराजरसेन असङ्गत् विभाव्य तदनु बीजसारक्काथेनापि बहुशो

पलिते यष्टिमधुकाद्य तैलम्।—

यष्टीमधुककाराभ्यां नवधात्रीफलैः श्रुतम्।
तैलं नस्यकृतं कुर्यात् केशान् श्मश्रूणि भङ्गुरम् ॥ ५६ ॥

इन्द्रलुप्ते करञ्जाद्य तैलम्।—

करञ्जचित्रको जाती करवीरश्च पाचितम्।
तैलमेभिर्दृतं हन्यादभ्यङ्गादिन्द्रलुप्तकम् ॥ ५७ ॥

पलिते नीलिकाद्य तैलम्।—

नीलिका केतकीकन्द भृङ्गराजः कुरण्टकः।
तथाऽर्जुनस्य पुष्पाणि बीजकः सुमनोऽपि वा ॥ ५८ ॥

भावयित्वा पुनस्तानि सशोष्य यत्ने सम्पीड्य तैलं ग्राह्यम्। अस्य नावनस्यकालपलितघ्नं भवति। पथ्यमत्र दुग्धौदनं भवति ॥ ५५ ॥

अथ यष्टीमधुकतैलमाह, यष्टीमधुकेति।—अत्र यष्टीमधुकं "मूलहटी" शब्दवाच्यम्। चारो यवक्षार। एतद्द्वयं समं तैलाच्चतुर्थांशं भवति। नवधात्रीफलैरिति—नूतनधात्रीफलानि, एतैर्नवधात्रीस्वरसेन तैलाच्चतुर्गुणेन कल्कं कृत्वा तैलं पाच्यं, पश्चान्मधुकष्टीयवक्षारकल्केन साध्यमित्यर्थः। अस्य नावनात् केशान् शिरोरुहान् श्मश्रूणि मुखलोमानि भङ्गुरं इति—सुघनान् कुर्यादित्यर्थः ॥ ५६ ॥

इदानीं करञ्जाद्य तैलमाह, करञ्ज इति।—करञ्जो हृद्दुल्करञ्जो वृक्षविशेषः तस्य फलानि पल्लवानि वा। चित्रक प्रसिद्धः तस्य मूलं पत्राणि वा। जाती सुमना तस्याः पत्राणि। करवीरः अश्वघ्नः, तस्यापि पत्राणि, एतद्द्वयोक्तपरिमितेन कल्केन पाचितं तैलमिन्द्रलुप्तापहं भवति, अस्याभ्यङ्गमाह। इन्द्रलुप्तं केशनाशं ॥ ५७ ॥

अथ नीलिकाद्य तैलमाह, नीलिकेति।—नीलिका नीलिनी प्रसिद्धा तस्याः पत्राणि। केतकी विख्याता तस्याः कन्दः मूलविशेषः। भृङ्गराजकुरण्टकयोः पत्राणि, कुरण्टकः सहचरः। अर्जुनो वृक्षविशेषस्तस्य कुसुमानि। बीजकोऽर्जुन-

---

नार इत्यत्र चक्रदत्ते क्षीरम इति पाठः, तथा च—"तैलं सयष्टिमधुकैः क्षीरे धात्रीफले श्रुतम्" इति। "क्षीरमेव चतुर्गुणं द्रवान्तराभावात्" इति शिवदासव्याख्या। एतेन यष्टिमधुधात्रीफलयोः कल्क इति बोध्यम्। गूढार्थदीपिकायामपि क्षीरम् इति पाठः।

कृष्णास्तिलाश्च तगरं समूलकमल तथा।
अयोरजः प्रियङ्गुश्च दाडिमत्वग्गुडूचिका ॥ ५९ ॥
त्रिफला पद्मपद्मश्च कल्कैरेभिः पृथक् पृथक्।
कर्षमात्रैः पचेत्तैलं त्रिफलाक्वाथमयुतम् ॥ ६० ॥
भृङ्गराजरसेनैव सिद्धं केशस्थिरीकृतम्।
अकालपलित हन्ति दारुणञ्चोपजिघ्रिकाम् ॥ ६१ ॥

पलितादौ भृङ्गराजतैलम्।—

भृङ्गराजरसेनैव लोहकिट्टं फलत्रिकम्।
सारिवाञ्च पचेत् कल्कैस्तैलं दारुणनाशनम् ॥
अकालपलित कण्डूमिन्द्रलुप्तञ्च नाशयेत् ॥ ६२ ॥

तस्य सारो ग्राह्य। सुनना जातौ तथा पत्राणि। तगर प्रसिद्धम्। समूलकमलमिति—सकन्दकमलमित्यर्थ। अयोरजो लोहचूर्णम्। प्रियङ्गुर्लताविशेषस्यास्याः फलानि। दाडिमत्वक् दाडिमफलत्वक्। त्रिफला हरीतक्यादिकम्। पद्मपद्मः कमलमूलग्रन्थितन्तुत्तिका, तदभावेऽन्यतडागोद्भवा कृष्णमृत्तिका ग्राह्या। एतानि पृथक् कर्षप्रमाणानि गृहीत्वा कल्क कार्य्य। तैल तिलतैल, तच्च सकलद्रव्याच्चतुर्गुणम्। त्रिफलाक्वाथोऽत्र चतुर्गुणस्तैलपरिमाणाच्च। भृङ्गराजरसोऽपि त्रिफलाक्वाथसम। एतत्तैल कृष्णीकरणमाह सतताभ्यङ्गात्। दारुण शिरोरोगे पठितम् ॥ ५८—६१ ॥

अथ भृङ्गराजतैलमाह, भृङ्गराजेति।—भृङ्गराजरसोऽत्र चतुर्गुण स्नेहात्। लोहकिट्टादिक सर्वं तैलाच्चतुर्थाश कुर्य्यात कल्कत्वात्। केचित्तु भृङ्गराजपत्राणि कल्कनिमित्तान्याहु, तथा हि—* "भृङ्गराजत्रिफलोत्पलशारि-लोहपुरीषसमन्वितकारि। तैलमिद पच दारुणहारि कुञ्चितकेशघनस्थिरकारि॥" इति, एतच्च कस्यचित् सम्प्रदाये कर्त्तव्यविधानम् ॥ ६२ ॥

---

* एतत्तैलस्याद्य प्रमाणत्वेनावतारण निरर्थकमेव प्रतीयते, यत शिवदासकृतव्याख्यानुसारेण तैलमिदम् एतद्ग्रन्थोक्तभृङ्गराजतैलात् अन्यदेव, एतद्ग्रन्थोक्ततैल उत्पलसहकारयोरुल्लेखो नास्ति, अत्र तु उत्पलसमन्वितकारि इति कल्कार्थं नीलोत्पलसहकारार्थेकमधिक, तथा भृङ्गराजस्यापि चतुर्गुणरस एव पाकाद्यर्थात् दृश्य, न तु तत्पत्रकल्क, इति शिवदासमत सुधीभि, द्रष्टव्यम्।

मुखरोगे खदिरमेदाद्य तैलम्।—

खदिरमेदत्वच क्षुण्णा पचेच्छुतपलोन्मिताम्।
जलद्रोणे ततः क्वाथं रक्षोयात् पादशेषितम् ॥ ६३ ॥
तैलस्यार्द्धाढकं दत्त्वा कल्कैः कर्षमितैः पचेत्।
खदिरेङ्गुदवङ्गाभ्यां गैरिकागुरुपद्मकैः ॥ ६४ ॥
मञ्जिष्ठालोध्रमधुकैर्लाक्षान्यग्रोधमुस्तकैः।
त्वग्जातीफलकर्पूर-कक्कोलखदिरैस्तथा ॥ ६५ ॥
पत्तङ्गधातकीपुष्प-सूक्ष्मैलानागकेशरम्।
कट्फलेन च संमिश्रं तैलं मुखरुजं जयेत् ॥ ६६ ॥
प्रदुष्टमांसं पलितं श्यावदन्तञ्च शोषिरम्।
श्यावदन्तं प्रहर्षञ्च विद्रधिं कृमिदन्तकम ॥
दन्तस्फुरणटोगन्ध्यं जिह्वातालोष्ठजा रुजाम् ॥ ६७ ॥

नाडीव्रणादौ जात्याद्य तैलम्।—

जातीनिम्बपटोलानां नक्तमालस्य पल्लवैः।
सिक्थ मधुक कुष्ठैश्च निशे कटुरोहिणी ॥

अथ खदिरमेदाद्य तैलमाह, खदिरमेदेति।—खदिरमेदो विटखदिर, "रेवज" शब्दवाच्य, तस्य त्वक् क्षुण्णा पलशतोन्मिता तुलयमाना ग्राह्या ताञ्च मदक्ष्य जलद्रोणे क्षिप्त्वा पादशेष यावत् पचेत् तैलमानात् द्विगुणितमित्यर्थः। तैलस्यार्द्धाढकमिति—तैल तिलसम्भवनलाढक द्वात्रिंशत्पलमितम्। कल्कैरिति—कल्कार्थद्रव्यै कर्षमितै प्रत्येकम्। तत्र खदिरमेदो विट्खदिर, अत्रेद यत पुनर्ग्रहण कल्कार्थं ग्राह्यम। गुरुक कृष्णागुरु। पद्मक काष्ठविशेष। मधुक यष्टीमधु। लाक्षाऽत्र लाक्षारस, किञ्चिदधिकस्य द्रवत्वात्। न्यग्रोधो वटवृक्षस्य पत्राणि त्वक् वा। त्वक् सराङ्गम्। कर्पूरस्त्र प्रक्षेपे साधु भवति। खदिर खादिरसार। पत्तङ्ग कुचन्दनम। कट्फल प्रसिद्धम। तत्रमिद मुखरोग प्रायशो गण्डूषत्वेन प्रचरति। प्रदुष्टमासादिदन्तस्फुरणान्त सर्व दन्तरोग ज्ञातव्यम। टोगन्ध्य मुखदुष्टस्य।-जिह्वातालोष्ठजा रुजामित्यत्र—तत्र जिह्वारुज तालुरुजम् ओष्ठरुजञ्च ॥ ६३—६७ ॥

मञ्जिष्ठा पद्मक लोध्रमभया नीलमुत्पलम्।
तुत्थकं सारिवा वीजं नक्तमालस्य दापयेत्॥
एतानि समभागानि पिष्ट्वा तैलं विपाचयेत्।
नाडीव्रणे समुत्पन्ने स्फोटके कच्छूरोगिषु॥
सद्य. शस्त्रप्रहारेषु दग्धविद्धेषु चैव हि।
नखदन्तक्षते देहे व्रणे दुष्टे प्रशस्यते॥)

कर्णशूले हिङ्ग्वाद्य तैलम्।—

हिङ्गुतुम्बुरुशुण्ठीभिः कटुतैलं विपाचयेत्।
तस्य पूरणमात्रेण कर्णशूलं प्रणश्यति॥ ६८॥

बाधिर्ये बिल्वतैलम्।—

बालबिल्वानि गोमूत्रे पिष्ट्वा तैलं विपाचयेत्।
साजक्षीरञ्च नीरञ्च बाधिर्यं हन्ति पूरणात्॥ ६९॥

इदानीं हिङ्ग्वाद्य तैलमाह, हिङ्गिति।—तुम्बुरु खेनामप्राख्यम्। हिङ्ग्वादीना द्रव्याणामत्र समभागेन कल्कमाह, विपाचयेदिति यद्दृष्टात्। कल्कार्धं तोयमाह-रसक्रियात्। अक्षमस्मदादयेऽपि छागमूत्रेण कल्कं कृत्वा तैलेन मूत्रेणालोड्य हिङ्ग्वादि पचेत्। कटुतैलं सार्षपमत्र तीक्ष्णत्वात्। पूरणमत्र कर्णपूरण तच्च ग्रन्थान्तरादवगन्तव्यम्, तद्यथा—'धारयेत पूरण कर्णे कर्णमूल विमर्दयन्। रुज. स्यान्मादव यावन्माचाशतमवेदने॥" (वा० सू० २२ अ०) इति। मात्रालक्षणमपि प्रसङ्गतो लिख्यते—'यावत् पर्य्येति हस्ताग्र दक्षिण जानुमण्डलम्। निमेषान्मेषकालेन सा मात्रा परिकीर्त्तिता॥" (वा० सू० २२ अ०)॥ ६८॥

अथ बालबिल्वतैलमाह, बालेति।—बालबिल्वानि बिल्वशलाटूनि, तानि गोमूत्रेण कल्कीकृतानि गोमूत्रेणावलाद्य तैले पाच्यानि।* तैलमत्र सार्षप, पूर्वयोगानुवर्त्तनात्। अत्र क्षीर नीरञ्च तैलाच्चतुर्गुण प्रत्येकमाह। कुत्रचित् जल-

* शिवदासेनात्र तैलस्य विशेषो नोक्त मूलेऽपि विशेषानुक्तत्वात् तिलतैलस्यैव ग्रहणमत्र युक्तम्। किञ्च शिवदासेनात्र आजक्षीर तैलसम गोमूत्र चतुर्गुण चतुर्गुण वा इति व्याख्या कृता।

कर्णरोगे चारतैलम्।—

बालमूलकशुङ्गाना चारः चारयुगं तथा।
लवणानि च पञ्चैव हिङ्गु शिग्रु महौषधम् ॥ ७० ॥
देवदारु वचा कुष्ठं शतपुष्पा रसाञ्जनम्।
ग्रन्थिकं भद्रमुस्तञ्च कल्कैः कर्षमितैः पृथक् ॥ ७१ ॥
तैलप्रस्थञ्च विपचेत् कदलीबीजपूरयोः।
रसाभ्यां मधुशुक्तेन चातुर्गुण्यमितेन च ॥ ७२ ॥

पाकौ न दृश्यते, केवल क्षीरपाकौ बिल्वकल्कपाकश्चेति सम्प्रदाया इदानाम्। तन्त्रान्तरेऽपि—"फलं बिल्वस्य मूलेन पिष्ट्वा तैलं विपाचयेत्। † सक्षीरं तच्च विपचेद्बाधिर्ये कर्णपूरणम्॥" इति। अत्र यन्नीरमुक्तं तत् सम्यक् पाकार्थं पानीयं विना स्नेहपाको न सुगम इति केचित् ॥ ६९ ॥

अथ चारतैलमाह, बालमूलकेति।—बालमूलकं लघुमूलकं, तस्य शुङ्गा नालविशेषास्तज्जात चार इति। चारयुगमिति—चारद्वन्द्वं तेन स्वर्जिकाचारौ यवचारश्चेति। पञ्च लवणानि प्रसिद्धानि। शिग्रु, शोभाञ्जनकं, अस्य ‡ मूलत्वरसो ग्राह्य। महौषधं शुण्ठी। रसाञ्जनं प्रसिद्धं निजनाम्ना, तदभावे दारुहरिद्रा ग्राह्या तन्मूलत्वात्। ग्रन्थिकं पिप्पलीमूलम्। भद्रमुस्तं नागरमुस्तम्। तैलं § सार्षपमवाप्यादि।

बालमूलकशुङ्गानामिति पाठं तथा शुङ्गा नालविशेषा इति टीकाकारव्याख्या च वाग्भटादिविरुद्धा, वाग्भटे "शुष्कमूलकखण्डानाम्" इति चक्रदत्ते "बालमूलकशुण्ठीनाम्" इति च पाठ। मन्ये मूले शुण्ठीनामित्यत्र शुङ्गानामिति पाठ प्रमादात सञ्जात। किञ्च ग्रन्थिकमित्यत्र वाग्भटचक्रदत्तयोः भूर्जग्रन्थिरिति पाठ तथा पञ्चलवणस्थाने चतुर्लवणपाठो दृश्यते, तथा मानानुक्तत्वात् कल्कस्य स्नेहपादिकत्वञ्च दृश्यते।

† सक्षीरमित्यत्र चक्रसङ्ग्रहे साजाक्षीरम् इति पाठं, तथा च—"फलं बिल्वस्य मूलेन पिष्ट्वा तैलं विपाचयेत्। साजाक्षीरं तद्धि हरेत् बाधिर्ये कर्णपूरणे॥" इति।

‡ शोभाञ्जनस्य मूलत्वरस कल्क इति केनापि न व्याख्यातम्।

§ विशेषानुक्तौ तैलशब्देन तिलतैलस्यैव प्रायशो ग्रहण दृश्यते।

पूयस्रावं कर्णनादं शूलं बधिरतां क्रमीन्।
अन्यांश्च कर्णजान् रोगान् मुखरोगांश्च नाशयेत् ॥ ७३ ॥

मधुशुक्तम्।—

जम्बीराणां फलरसं प्रस्थैक कुडवोन्मितम्।
माक्षिकं तत्र दातव्यं पलैका च पिप्पली स्मृता ॥ ७४ ॥
एतत्सर्वीकृतं सर्वं मृद्भाण्डे च निधापयेत्।
यवाभ्रो मधुसंयुक्तं शृङ्गवेरगुडान्वितम ॥
धान्यराशिस्थितिरात्रिस्थं मधुशुक्तमुदाहृतम् ॥ ७५ ॥

पीनसे पाठाद्य तैलम्।—

पाठा हे च निशे मूर्वा पिप्पली जातिपल्लवैः।
दन्त्या च तैलं संसिद्धं नस्यं स्याद्दुष्टपीनसे ॥ ७६ ॥

पूतिनासाया व्याघ्र्याद्य तैलम्।—

व्याघ्रीदन्तीवचाशिग्रु-तुलसीव्योषसैन्धवैः।
कफस्य पाचनं तैलं पूतिनासोदकापहम् ॥ ७७ ॥

प्रस्थं षोडशपलानि। कटलीकन्दस्वरसं बीजपूरफलरसञ्च प्रत्येक तैलाच्चतुर्गुणनाहुं द्रवत्वात्। मधुशुक्तमपि चतुर्गुणम्। पूयस्रावं कर्णस्येति। शूलमपि कर्णसम्बन्धि। क्रमयस्त्वव कर्णसम्भवाय। एतदपि तैल मुखरोगे प्रशस्त गण्डूषकरणत्वात ॥७०—७३ ॥

जम्बीराणामिति।—केचित्तु तन्त्रान्तरोक्त मधुशुक्तलक्षणमेतस्मिन्नर्थे पठन्ति तदयथा, —"यवाभ्रो मधुयुक्तञ्च शृङ्गवेरगुडान्वितम। धान्यराशौ विरात्रस्थ मधुशुक्तमुदाहृतम ॥" इति। अथवा "धान्यस्थाटि शुचौ भाण्डे सच्चौद्रगुडकाङ्किकम। धान्यराशौ विरात्रस्थ शुक्त चुक्रं तदुच्यते ॥" इति। एतेषां यथालाभ दैयमिति न दोष ॥ ७४।७५ ॥

सम्प्रति पाठाद्य तैलं दर्शयन्नाह, पाठेति।—पाठा प्रसिद्धा। हे निशे इति—हरिद्राद्वयम। मूर्वा चोरस्याय। जातिपल्लवैरिति—जाती सुमना तस्या पत्राणि। दन्ती प्रसिद्धा। पाठादिद्रव्याणा समानमिन्तिताना कल्क तैलाद्यमाह ॥ ७६ ॥

अथ व्याघ्रीतैलमाह, व्याघ्रीति।—व्याघ्री कण्टकारिका। दन्ती प्रसिद्धा। शिग्रुः शोभाञ्जनक। तुलसी प्रतीता तस्या पत्राणि। व्योष त्रिकटक, तेन शुण्ठीमरिच-

---

* पिप्पलीव्याने चक्रपाणिना पिप्पलीमूल पठितम्। शिवदासेन पिप्पली-मूलस्य चत्वारि पलानि मधुनश्च शरावमेकमिति व्याख्यातम्।

क्षवथौ कुष्ठाद्य तैलम्।—

कुष्ठ विल्वकणाशुण्ठी-दार्वाकल्ककषायवत्।
साधित तैलमाज्यं वा नस्यात् क्षवथुनाशनम् ॥ ७९ ॥

नासाश्र म गृहधूमाद्य तैलम्।—

गृहधूमकणादारु-क्षारनक्ताह्वसैन्धवैः।
सिद्ध शिखरिबीजैश्च तैलं नासार्शसां हितम् ॥ ७९ ॥

कुष्ठे वज्रीक्षीराद्य तैलम्।—

वज्रीक्षीर रविक्षीर द्रव धुस्तूरचित्रजम।
महिषीविड्भव द्रावं सर्वांशं तिलतैलकम् ॥ ८० ॥

पिप्पली इति। एतेषा कल्कै सिद्ध तैलं कफस्य पाचनमुक्तं पानत्वात्। पूतिनासोदकापहमिति च—पूतिनासो नासादुर्गन्ध, नासोदक नासास्राव, एतद्वय हन्ति नस्याभ्यासात् ॥ ७७ ॥

इदानी कुष्ठतैलमाह, कुष्ठमिति।—विल्वमव विल्वफल मूल वा तदभावे। कणा पिप्पली। कल्ककषायवदिति—कल्कद्रव्येण साधितमित्यर्थ, यत पञ्चकषाया कथिता। * यद्वा—कुष्ठादीना कल्केन कषायेण च तैल साध्यम, कषायशब्द क्वाथे प्रायश प्रवर्तते, तत क्वाथार्थमेतद्द्रव्य स्नेहसम ग्राह्य, चतुर्गुणेन नीरेण सक्वाथ्य पादशेषेण साध्य, कल्कार्थञ्च तैलाक्षेन साध्यमित्यर्थ। एवमाज्य घृतमपि साध्यम। क्षवथुश्चिक्का ॥ ७८ ॥

अथ गृहधूमतैलमाह, गृहधूमेति।—गृहधूम विख्यात। कणा पिप्पली। दारु देवदारु। क्षार यवक्षार। नक्ताह्व करञ्जफलम्। शिखरिबीजैश्चेति—शिखरी अपामार्ग तस्य बीजै फलै। एके सिद्ध शिरीषबीजैश्चेति पठन्ति व्याख्यानयन्ति च। एतेषा कल्कै तैलाश्रमाह। सिद्धमिद नावनेऽभ्यङ्गे वा प्रशस्तम् ॥ ७९ ॥

अधुना वज्रीतैलमाह, वज्रीक्षीरमिति।—वज्री सेहुण्डस्य क्षीर दुग्धम्। रविक्षीरमिति—अर्कदुग्धम्। धुस्तूरकचित्रकपयोद्रव स्वरसमित्यर्थ। महिषीविड्भव द्राव महिषीशकृत्स्वरसम्। सर्वांश तिलतैलकमिति—सर्वं वज्रीक्षीरादि

* इयमेव व्याख्या समीचीना। क्वाथार्थमेतत द्रव्यं स्नेहसम ग्राह्यमित्यादि व्याख्या तु न समीचीना, स्नेहद्विगुणमेव मिलितक्वाथाना मान परिभाषासम्मत व्यवहारासद्धञ्च।

पचेत्तैलावशेषञ्च गोमूत्रेऽथ चतुर्गुणे।
तैलावशेष पक्वा च तत्तल प्रस्थमात्रकम् ॥ ८१ ॥
गन्धकाग्निशिलाताल विडङ्गातिविषाविषम्।
तिक्तकोशातकीकुष्ठ-वचामासोकटुत्रयम् ॥ ८२ ॥
पीतदारु च यष्ट्याह्व स्वर्जिकाक्षारजीरकम्।
देवदारु च कषाय चूर्ण तैले विनिक्षिपेत् ॥
वज्रातैलमिदं ख्यातमभ्यङ्गात् सर्वकुष्ठनुत् ॥ ८३ ॥

लोमशातने करवीराद्य तैलम्।—

करवीरशिफादन्ती त्रिवृत्कोशातकीफलम्।
रम्भाक्षारोदके तैलं प्रशस्तं लोमशातनम् ॥ ८४ ॥

अथ चन्दनाद्य तैलम्।—

(चन्दनाम्बुनख ८ याम्यं यष्टीशैलेयपद्मकम्।

पक्वद्रव तस्याश्च चतुर्थाश भाग तत्सममिति तैलमित्यर्थ। एके सर्वाश्च तैल मित्यनेन सर्वपक्वद्रव्यसाम्य तैलमिति वदन्ति, एतन्न प्रचरति यत पक्वद्रवत्वेन प्रत्येक तैलसममाहु, तथा चोक्तमत्रैव परिभाषाया—'द्रवाणि यत्र स्नेहेषु पक्वादीनि' (शा० मध्य० ९ अ०) इत्यादिवाक्यम्। पुनरपि तत गोमूत्रचतुर्गुणेन पक्वा तैलावशेष प्रस्थमात्र गृहीत्वा वक्ष्यमाणद्रव्याणा प्रत्येक कर्षप्रमितानां चूर्णं तत्तैले मिश्रयित्वा स्वनगुप्त धारयेत्। गोमूत्र पृथगुक्तत्वाच्चतुर्गुणम्। चूर्णद्रव्याण्याह—तत्राग्नि-भल्लातक, चित्रकजटा वा। शिला मनशिला। ताल हरितालम। विष प्रसिद्धम्। तिक्तकोशातकी कटुकोशातकीफलमिति। मासी जटाख्या। कटुत्रय त्रिकटकम्। पीतदारु दारुहरिद्रा। यष्ट्याह्व मधुयष्टी। स्वर्जिकाक्षार प्रसिद्ध। एतेषा चूर्णार्थं द्रव्याणामपि कल्कमाहुरेके। सर्वकुष्ठनुदिति—सर्वकुष्ठम् अष्टादशप्रकारम् ॥ ८०—८३ ॥

अथ करवीरादितैलमाह करवीरेति।—सुगमम् ॥ ८४ ॥

इति श्रीबालव्याध्यप्रकाशवैद्यश्रीभावमिश्रात्मजेनाढमल्लेन विरचितायां शार्ङ्गधर-दीपिकायां मध्यखण्डे चिकित्सितस्थाने तैलकल्पनानाम दशमोऽध्याय ॥ १० ॥

चक्रदत्ते 'याम्यम्' इत्यत्र "वाम्यम्" 'सैव्यम्' इत्यत्र "शटी" "पत्र-त्रैलम्' इत्यत्र "पत्र तैलम्' "हरिद्रा सारिवा" इत्यत्र "हरिद्रे सारिवे" इति पाठभेदा।

मञ्जिष्ठा सरलं दारु सेव्यैलं पूतिकेशरम् ॥
पत्रकैलं सुरामांसा कक्कालं वनिताऽम्बुदम् ।
हरिद्रा सारिवा तिक्ता लवङ्गागुरुकुङ्कुमम् ॥
त्वग्रेणुनलिका चेति तैल मस्तुचतुर्गुणम् ।
लाक्षारससमं सिद्ध ग्रहघ्न बलवर्धनम् ॥
अपस्मारज्वरोन्माद-कृत्याऽलक्ष्मीविनाशनम् ।
आयुःपुष्टिकरञ्चैव वशीकरणमुत्तमम् ॥
विशेषात् क्षयरोगघ्न रक्तपित्तहर परम् ॥)

गण्डमालाया वचाद्य तैलम् ।—

(वचा शटी हरिद्रे हे देवदारुमहौषधी ।
हरीतकीमतिविषा-मुस्तकेन्द्रयवान् समान् ॥
एतान् दशपलान् भागाश्चतुर्द्रोणेऽम्भस. पचेत् ।
चक्रमर्दरसैस्तैल कटुक मृदुनाऽग्निना ॥
पादशेषे विनिक्षिप्य सिन्दूरमवतारयेत् ।
एतत्तैलं निहन्त्याशु गण्डमाला सुदारुणाम् ॥)

गण्डमालाया लाङ्गलीतैलम् ।—

(निर्गुण्डीस्वरसे तैल लाङ्गलीमूलकल्कितम् ।
तैल नस्यान्निहन्त्याशु गण्डमाला सुदारुणाम् ॥)

वातव्याध्यादौ धुस्तूराद्य तैलम् ।—

(धुस्तूररसमादाय हयमारान्तिकारसम् ।
भृङ्गराजरसञ्चैव सारिणी निम्बपत्रकम् ॥
शोभाञ्जनश्चित्रकञ्च अश्वगन्धा प्रसारणी ।
शिरीषः कुटजोऽनन्ता शाल्मली नक्तपत्रकम् ॥
रविप्रियो महानिम्बो डिण्डिघोषा महेरणा ।
बला ज्योतिष्मती चैव श्यामाकञ्चक्रमर्दकः ॥

एतैस्तु रसमादाय तैलतुल्यञ्च दीयते।
देवदारु हरिद्रे द्वे मासौ कुष्ठं सचन्दनम्॥
मरिच त्रिवृता दन्ती हरितालं मनःशिला।
कम्पिल्लको गन्धकश्च खदिर पिप्पली वचा॥
रसाञ्जनञ्च सिन्दूर श्रीवासो रक्तचन्दनम्।
हरिमेदस्तथा तुम्बी मञ्जिष्ठा सिन्दुवारकः॥
करवीरजटा रास्ना विश्वा श्रेष्ठा च पौष्करम्।
शटी तालीशपत्रञ्च प्रियङ्गु रेणुका तथा॥
चातुर्जातकमञ्जीर कक्कोल जातिपत्रिका।
ज्योतिष्मतो च पत्रिका विषस्य द्विपलं भवेत्॥
आढक कटुतैलस्य गोमूत्रञ्च चतुर्गुणम्।
मृत्पात्रे लोहपात्रे च शनैर्मृद्वग्निना पचेत्॥
मज्जाश्रित त्वग्गतञ्च वातञ्चास्थिगत तथा।
ऊरुग्रहञ्चाढ्यवातं कृच्छ्रं दण्डापतानकम्॥
कुब्जत्वञ्चाथ शोथञ्च पक्षाघात तथार्दितम्।
हनुस्तम्भं शिरःकम्प मूर्च्छितं दृष्टिविभ्रमम्॥
अपस्मारं तथोन्मादं तथा चैवापतन्त्रकम्।
आक्षेपकञ्चास्थिभग्नं सन्धिभग्नञ्च नाशयेत्॥)

केषुचित पुस्तकेषु तैलमिदमधिकत्वेन दृश्यते।

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचिताया शार्ङ्गधरसंहिताया मध्यखण्डे चिकित्सितस्थाने तैलकल्पना नाम दशमोऽध्याय॥ १०॥

एकादशोऽध्यायः ।

सन्धानकल्पना ।—

आसवारिष्टादीना सामान्यलक्षणम् ।—

द्रवेषु चिरकालस्थं द्रव्यं यत् सन्धितं भवेत् ।
आसवारिष्टभेदैस्तु प्रोच्यते भेषजोचितम् ॥१॥

आसवारिष्टयो भेदो माचा च ।—

यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः ।
अरिष्टः क्वाथसिद्धः स्यात्तयोर्मानं + जलोन्मितम् ॥२॥

इदानीं सन्धानकल्पना दर्शयन्नाह, द्रवेष्विति ।—तत्र सामान्य यथा—द्रवेषु कल्पनागणितेषु द्रवद्रव्येषु यत् द्रव्यं चिरकालं सन्धानीभूतं भवति तच्च आसवारिष्टादिभेदैः कृत्वा मद्यमित्युच्यते । आसवारिष्टभेदैरिति बहुवचनत्वेन सीधुसुरादिकमपि गृह्यते । आसव इति प्रसिद्धः । सुरा पैष्टी । आसवो गुडयोनिः, + सूयते तोयकार्ये क्रियते यस्मिन् स आसवः । स्थिरमद इति चिरकालमत्तताकारी । अरिष्ट इति द्रव्यप्रधानः । अस्य भेदः सीधुरिति, सीधुशब्देन मद्यभेदमाह, तच्चोभयप्रधानम् । एतदपि विधिधनिति केचित्, पैष्टिकं माध्वीकं गौडमिति । मैरेयकं त्वपि भेदोऽस्य वदन्त्येके । स यथा—सुरासवयो प्रत्येकं निष्पादितयोरैकीकृत्य पुनः सन्धानो मैरेयः । इति सङ्क्षेपेणोक्ता मद्यभेदाः ॥ १ ॥

इदानीं तस्य विशेषलक्षणान्याह, यदिति ।—तयोरासवारिष्टयोर्मानं पानार्थं

---

* अत्र 'जलोन्मितम्' इत्यपपाठः, मन्ये लेखकप्रमादात "पलोन्मितम्" इत्यत्र "जलोन्मितम्" इत्यायातम् । टीकाकारकृता अस्य व्याख्याऽपि न मनोरमा ।

+ व्युत्पत्तिरेषा निबन्धमर्यादे सुरासव इति शब्दस्य डल्हनेन प्रदर्शिता, केवलासवशब्दस्य ईदृशी व्युत्पत्तिर्न दृश्यते "आसूतत्वादासवः" इति चरकेणापि तथा व्युत्पत्तिदर्शनात् । स्थिरमद इति गुणोल्लेखोऽपि अत्र अयुक्तः सुरासव एव तादृशगुणविशिष्टः तथा च—'तीक्ष्णः सुरासवो हृद्यो मूत्रल कफवातनुत् । सुखप्रियः स्थिरमदो विशेषाऽनिलनाशनः ॥" (सु० सू० ४५ अ०) इत्युक्तत्वात् । अत्र डल्हनः—'सुरया सूयते तोयकार्ये क्रियते यस्मिन् स सुरासवः, स स्थिरमदः चिरकालमत्तताकारी" इति । किञ्च "अरिष्ट इति द्रव्यप्रधानः' इत्यपि डल्हनविरुद्धं, डल्हनेन 'द्रव्यप्रधान आसवः" इत्युक्तत्वात् ।

अनुक्तमानारिष्टादौ गुडचौद्रादीनां मानम्।—

अनुक्तमानारिष्टेषु द्रवद्रोणे तुलां गुडम्।
चौद्रं क्षिपेद्गुडादर्द्धं प्रक्षेपं दशमाशिकम् ॥३॥

शीतरस-पक्वरससौधूनां लक्षणम्।—

ज्ञेयं शीतरसं सौधुरपक्वमधुरद्रवैः।
सिद्धं पक्वरसः सौधुः सम्यक्पक्वमधुरद्रवैः ॥४॥

तुलनारूपं जलोन्मितमिति—जलपानमात्रं, जलपानन्तु अल्पमेव कथितम्, नैतन्मनोहरम् कृतौ मदात्ययविषयत्वात्। नीरुजानां तन्मात्रौषधमानं यत् तज्जलशब्देन कल्प्यते, तद् यथा—"गुडकाय पिबेत् प्रातः सोपदंशं पलद्वयम्। मध्याह्ने द्विगुणं तच्च स्निग्धाहारेण पाचयेत्॥" इत्यादिवचनात्। एके द्विपलोन्मितमिति पठन्ति व्याख्यानयन्ति च ॥ २ ॥

अथारिष्टेषु द्रव्यपरिमाणमनुक्तत्वाद्दर्शयन्नाह अनुक्तमानेति।—द्रवद्रोणे* द्रोणद्वयपरिमिते द्रवे क्वाथादिके। तत्र तुलामिति सन्धानिकद्रव्याणां दर्शनम्, तानि मधूकपुष्पप्रभृतीनि गुडपरिमाणादर्द्धपरिमाणानि। मन्यन्ति गुडमानमपि क्वाथद्रव्यपरिमाणादर्द्धं बोद्धव्यम्। तथा च परिभाषायां—'क्वाथद्रव्यस्य यद्भवेत् मानं क्वाथे नीत्वा तु धारयेत्। पात्रे मृन्मयके भूमौ निखाते तु गुडं न्यसेत्॥ क्वाथादर्द्धं ततो द्रव्यं प्रदेयञ्चाष्टमाशिकम्। चौद्रं क्षिपेत् गुडादर्द्धं शर्करां च तथा न्यसेत्॥ कर्कन्धुमूलपभृतीन् गुडतुल्यं प्रदापयेत्। धातकीकुसुमं देयं चौद्रशर्करयोर्द्विकम्॥ सम्यक् पक्वं ततो ज्ञात्वा न्यसेत् यत्नं प्रसाधयेत्॥" इति। प्रक्षेपं दशमाशिकम् इति—प्रक्षेपं पश्चाद्देयं द्रव्यं दशमाशिकं गुडपरिमाणादित्यर्थः ॥ ३ ॥

इदानीं सौधुप्रभृतीनां प्रत्येकलक्षणान्याह, ज्ञेयं इति।—यत् सौधुं अपक्वमधुरद्रवैरिक्षुरसप्रभृतिकैः सिद्धं ज्ञातं स शीतरससंज्ञं ज्ञेयं। यत् सम्यक्पक्वमधुरद्रवैः सिद्धं स पक्वरससंज्ञं। एतद्धि तत्कालकारकसंज्ञादवगन्तव्यम् ॥ ४ ॥

* मूले "द्रवद्रोणे" "चौद्रं गुडादर्द्धम्" इत्यायुक्तम्, टीकायां पुनः "द्रोणद्वये" "मधुगुडमानमपि क्वाथद्रव्यपरिमाणादर्द्धम्" इत्यादि व्याख्या दुर्बोधा।

विविधसुराभेदाना लक्षणम्।—

परिपक्वान्नसन्धान-समुत्पन्ना सुरां जगुः।
सुरामण्ड: प्रसन्ना स्यात्तत: कादम्बरी * घन: ॥५॥
तदधो जगलो ज्ञेयो मेदको जगलाद्घन:।
वक्वसो हृतसार: स्यात् सुरावीजञ्च किण्वकम् ॥६॥

वारुणीलक्षणम्।—

यत्तालखर्जूररसै: सन्धित सा हि वारुणी ॥७॥

शुक्तलक्षणम्।—

कन्दमूलफलादीनि सक्षेहलवणानि च।

इदानीं सुराविशेषलक्षणमाह, परिपक्वान्नेति।—यत शाल्यादिक सम्याच्च पुन सन्धित भवति तेन यत समुत्पन्न ता सुरा जगु, एषा पेष्टी सुरा, लोके "वगनी" शब्दवाच्या विख्याता। अथान्ये बहवो भेदास्तानाह, सुरामण्ड इत्यादि।—य सुरामण्ड उपर्यच्छो भाग सा प्रसन्ना कथिता। यो घन स एव कादम्बरीशब्देन वाच्य, घनस्तु सुराभाग एव। य सुराया अध स्थितो भवति स जगलो ज्ञेय। यो जगलात किञ्चित् घन स मेदकसुरासज्ञ कादम्बर्या भिन्न, किञ्चित घनलात। यो हृतसार स वक्वससज्ञ। सुरावीजन्तु किण्वकमिति —आलिप्तप्रभव किण्वकमिति कथितम्। एते सुराभेदा दर्शिता, ते च लोकतो ज्ञातव्या ॥ ५।६ ॥

अथ वारुणीलक्षणमाह, यत्तालेति।—इयमपि सुराभेद। ताल तालवृक्ष। खर्जूरो वृक्षविशेष प्रसिद्ध। रस इति फलरस। सन्धितमिति पूर्ववत्। यद्वा—ताल-खर्जूरवृक्षयोरुपरिभाग छित्त्वा तत्र घटमारोप्य यो रसो घटे पतितस्तत्रैव चिर-कालस्था भवति सा वारुणी स्पष्ट कथितेत्यभिप्राय। लोके "सेन्धी" शब्दवाच्या ॥७॥

अधुना शुक्तादिलक्षण दर्शयन्नाह, कन्दमूलेति।—एतच्च सामान्यलक्षणमभि-हितम्। कन्दमूलफलादीनि इति—कन्दानि शूरणप्रभृतीनि, मूलानि मूलकप्रभृतीनि, फलानि करमर्दकरम्भाफलप्रभृतीनि, आदिशब्दात् पत्रपुष्पनालादयो गृह्यन्ते।

---

* "घन" इत्यत्र "घना" इति पाठान्तर साधु। प्रसन्नापेक्षया कादम्बरी घना भवति इति तस्यार्थ।

यत्र द्रवेऽभिषूयन्ते तच्छुक्तमभिधीयते ॥
विनष्टमम्लता यातं मद्य वा मधुरद्रवम् ॥८॥

चुक्रालचणम् ।—

विनष्टः सन्धितो यस्तु तच्चुक्रमभिधीयते ॥९॥

गुडशुक्तलचणम् ।—

गुडाम्बुना मतैलेन कन्दमूलफलैस्तथा ।
सन्धितञ्चाम्लता यातं गुडशुक्तं तदुच्यते ॥१०॥

इक्षुशुक्त मृद्वीकाशुक्तञ्च ।—

एवमेवेक्षुशुक्तं स्यान्मृद्वीकासम्भवं तथा ॥११॥

न केवल लवणतैल, चकारात् राजिकाहरिद्रादीनामपि ग्रहणम्, व्यवहारतस्तु लवणत्यागेनापि प्रचरति। यत्र द्रवे पानीयप्रभृतिके एतानि वस्तूनि अभिषूयन्ते सन्धानीभूतानि क्रियन्ते तत शुक्तमभिधीयते इति। ननु "शुक्त चुक्रमुच्यते" इति वदन्ति, तत कथमस्य शुक्तसञ्ज्ञा कथ्यते ? सत्यम्, शुक्तवत् सन्धिताना कन्दादीनामपि चुक्रसञ्ज्ञा अवाप्यभिहिता न तु साक्षात शुक्तत्वोक्तम (?)। अथ अवापि मद्यलचणमाह, एतदपि शुक्तभेदमाह, तदुक्त गुणावल्या—"गौडानि रसशुक्तानि मधुशुक्तानि यानि च। यथापूर्वं गुरुतराण्यभिष्यन्दकराणि च॥" (सु० सू० ४५ अ०) इति। विनष्टमम्लता यात मद्यमिति तदुच्यते—"सर्वं मद्य पञ्चरस कालान्तरवशात् यदा। व्यक्ताऽन्यरसमम्लत्व याति शुक्त तदुच्यते॥" इति। मधुरद्रवमिति—गुडेक्षुरसमधुप्रभृतिकम्, तथा हि—"यन्मस्वादि शुचौ भाण्डे सगुडक्षौद्रकाञ्जिकम्। धान्यराशौ विरावस्थ शुक्त चुक्र तदुच्यते॥" इति॥ ८॥

विनष्ट इति।—विनष्ट विगतरस। सन्धित सन्धानीभूत॥ ९॥

इदानी गुडादिशुक्तलचणमाह, गुडेति।—गुडशुक्तमिति—गुडप्रधान शुक्तमित्यर्थ। शेष सुगमम्॥ १०॥

एवमेवेति।—गुडशुक्तवदिक्षुरसशुक्त सन्धेयम्। इक्षुशुक्तमिति—इक्षुरसादिकृतम्। मृद्वीका द्राक्षा तत्सम्भव शुक्तम एतदपि पूर्ववत् सन्धेयम्। एके मृद्वीकासम्भवमित्यस्य स्थाने "मधुना सम्भवम्" इति पठन्ति व्याख्यानयन्ति च मधुना सम्भवमिति—मधुकृतशुक्तमुच्यते, तदुक्त—"जम्बीराणा फलरस विष्पलीमूल कृतम। मधुभाण्डे विनिक्षिप्य धान्यराशौ निधापयेत॥ वाहेण तज्जातरस मधुशुक्तमुदाहृतम्॥" इति। मधुभाण्डे मधुपूर्णभाण्डे इत्यर्थ॥ ११॥

तुषाम्बु सौवीरकयो र्लक्षणम्।—

तुषाम्बु सन्धित क्लेयमामैर्विदलितैर्यवैः।
यवैस्तु निस्तुषैः पक्वैः सौवीरं सन्धित भवेत् ॥१२॥

काञ्जिकलक्षणम्।—

कुल्माषधान्यमण्डादि सन्धितं काञ्जिकं विदुः ॥१३॥

शिखाकौलक्षणम्।—

शिखाकौ सन्धिता क्लेया मूलकैः सार्षपादिभिः ॥१४॥

रक्तपित्ते उशीरासव।—

उशीरं बालकं पद्मं काश्मरीं नीलमुत्पलम्।
प्रियङ्गु पद्मकं लोध्रं मञ्जिष्ठा धन्वयासकम् ॥१५॥

इदानीं तुषाम्बुकाञ्जिकमाह, तुषाम्बु इति।—आमैरपरिपक्वैर्विदलितैः खण्डिते इदन्यैर्यवैः सन्धानं क्रियते तत् तुषाम्बु कथितम्। विपरीतैस्तु सौवीरमिति, कीदृशैः? निस्तुषैस्तुषरहितैः पक्वैः क्लेदनीयैः। यवैः निस्तुषैरित्यत्र यवैरपि गोधूमसन्धानमिति सूचयति, तथा हि—"सौवीरक सुवीराम्ल क्लेद गोधूमसम्भवम्" इति। तुषाम्बु सौवीरकञ्च काञ्जिकभेदमाह, ते तु विरेचनप्रकरणे प्रायशः प्रचरतः ॥ १२ ॥

कस्मिंश्चित् कुल्माषादि लक्षणं प्रकटयन्नाह, कुल्माषेति।—काञ्जिकं धान्याम्लम्। कुल्माषः। कुल्माषतमाषा, धान्यं रक्तशाल्यादि, तेन च तृणाम्लकोद्रवादिकमपि गृह्यते, मण्डः माण्डिप्रभव इति। अन्ये कुल्माषभवं धान्यभवं मण्डञ्च व्याख्यानयन्ति। आदिशब्दात् यवचणकादिकृतमपि बोद्धव्यम्, यत अस्य बहवो भेदा दृश्यन्ते, ते तु टीकायामेव ज्ञातव्याः ॥ १३ ॥

अथ शिखाकौमाह, शिखाकौति।—शिखाकौ सन्धानकभेदः। मूलकः प्रसिद्धः। सार्षपादिभिरिति—सार्षपशाकेन सन्धानम्, आदिग्रहणादन्यशाकैरपि क्रियते ॥ १४ ॥

इदानीमासवान्तरं प्रकारभेदमाह उशीरमिति।—एतदुशीरासवव्याख्यानमेव व्याख्यानं सर्वासवानाम्। "कुल्माष कड्खिन्नमाष," इति चू० दी०।

पाठा किराततिक्तञ्च न्यग्रोधोडुम्बरं शटीम्।
पर्पट पुण्डरीकञ्च पटोलं काञ्चनारकम् ॥१६॥
जम्बूशाल्मलिनिर्य्यासं प्रत्येकं पलसम्मितान्।
भागान् सुचूर्णितान् कृत्वा द्राक्षाया पलविंशतिम् ॥१७॥
धातकीं षोडशपलां जलद्रोणद्वये क्षिपेत्।
शर्करायास्तुला दत्त्वा क्षौद्रस्यैकतुला तथा ॥ १८ ॥
मासैक स्थापयेद्भाण्डे मासीमरिचधूपिते।
उशीरासव इत्येष रक्तपित्तविनाशन ॥
पाण्डुकुष्ठप्रमेहार्श-कृमिशोथहरस्तथा ॥ १९ ॥

परिणामशूलादौ कुमार्य्यासव।—

(सुपक्वरससप्तेऽं कुमार्य्याः पत्रमाहरेत्।
यत्नेन रसमादाय पात्रे पाषाणसम्भवे ॥
द्रोणे गुडतुला दत्त्वा घृतभाण्डे निधापयेत्।
माक्षिकं पक्वलोहञ्च तस्मिन्नर्द्धतुला क्षिपेत् ॥
कटुत्रिक लवङ्गञ्च चातुर्जातकमेव च।
चित्रक पिप्पलीमूल विडङ्ग गजपिप्पली ॥
चविकं हवुषा धान्यं क्रमुक कटुरोहिणी।
मुस्ता फलत्रिक रास्ना देवदारु निशाद्वयम् ॥
मूर्वा मधुरसा दन्ती मूल पुष्करसम्भवम्।
बला चातिबला चैव कपिकच्छुस्त्रिकण्टकम् ॥
शतपुष्पा हिङ्गुपत्री आकल्लकमुटिङ्गणम्।
पुनर्नवाद्वयं लोध्र धातुर्माक्षिकमेव च ॥

सुबोधमेव। मासैक मासैकपर्य्यन्त स्थापयेत् सुधानपटित्यर्थ। मासीमरिच-धूपिते भाण्डे इति—मासी शटाख्या। भाण्ड साधनयोग्यम्। केचित्तु मासीमरिच चूर्णस्य प्रक्षेपमाहुः। रक्तपित्तमाशु व्यस्य नाशयति वा ॥ १५—१९ ॥

एषाच्चार्द्धपलं दत्त्वा धातक्यास्तु पलाष्टकम्।
पलच्चार्द्धपलच्चैव पलद्वयमुदाहृतम्॥
वपुर्वयःप्रमाणेन बलवर्णाग्निदीपनम्।
हृद्यं रोचनं बृंह्यं पक्तिशूलनिवारणम्॥
अष्टाविंशतिजान् रोगान् क्षयमुग्रञ्च नाशयेत्।
विंशति मेहजान् रोगानुदावर्त्तमपस्मृतिम्॥
मूत्रकृच्छ्रमपस्मार शुक्रदोष तथाऽश्मरीम्।
कृमिजं रक्तपित्तञ्च नाशयेत्तु न संशयः॥)

च्यवनप्राशावलेह।—

पिप्पली मरिचं चव्यं हरिद्रा चित्रको घनः।
विडङ्गं क्रमुको लोध्रं पाठा धात्र्यालबालुकम्॥ २०॥
उशीरं चन्दनं कुष्ठं लवङ्गं तगरं तथा।
मासौ त्वगेला पत्रञ्च प्रियङ्गुर्नागकेशरम्॥ २१॥
एषामर्द्धपलान् भागान् सूक्ष्मचूर्णीकृतान् शुभान्।
जलद्रोणद्वये क्षिप्त्वा दद्याद्गुडतुलाचयम्॥ २२॥
पलानि दश धात्र्या द्राक्षा षष्टिपला भवेत्।
एतान्येकत्र संयोज्य मृद्वग्नौ च विनिक्षिपेत्॥ २३॥
क्षात्वाऽऽगतरसं तस्य पाययेदग्नपेक्षया।
क्षयं गुल्मोदरं कार्श्यं ग्रहणीं पाण्डुतां गदम्॥
अर्शांसि नाशयेच्छीघ्रं पिप्पल्याद्यासवस्त्वयम्॥ २४॥

अथ पिप्पल्याद्यासवमाह, पिप्पलीति।—अथ पिप्पल्याद्यासव क्षयादिरोगे प्रयुक्त। अत्र बलो मूलम। क्रमुक पूगीफलम। धात्री आमलकी। एलबालुक स्वनामख्यात कुष्ठगन्धि कटुफलकन्दद्रव्यविशेष। त्वक् वराङ्गम्। शेष प्रसिद्धम्। शुभानिति—शुभान्, वस्त्वगाधिकारात्। क्षात्वाऽऽगतरसमिति—आगतरस क्षात्वा तदन्न दग्धेन कृत्वा घर्षयेत् पश्चात वस्त्वगालित पाययत्। एके मासैलागतरस भवतीति वदन्ति, तन्मौर्ख्यमेतत। अन्यपेक्षया अग्निबलापेक्षया। एतदातुर

पाण्डरोगादौ लोहासव ।—

लोहचूर्णं त्रिकटकं त्रिफलाञ्च यमानिकाम् ।
विडङ्गं मुस्तक चित्रं चतुष्पलमितं पृथक् ॥ २५ ॥
धातकीकुसुमानान्तु प्रक्षिपेत् पलविंशतिम् ।
चूर्णीकृत्य तत' क्षौद्रं चतु'षष्टिपल क्षिपेत् ॥ २६ ॥
दद्याद्गुडतुला तत्र जलद्रोणद्वय तथा ।
घृतभाण्डे विनिक्षिप्य निदध्यान्मासमात्रकम् ॥ २७ ॥
लोहासवमिम मर्त्यः पिबेद्वह्निकरं परम् ।
पाण्डुक्षयग्रहगुल्मानि जठराण्यर्शसां रुजम् ॥ २८ ॥
कुष्ठ प्लीहामय कण्डू कासं श्वासं भगन्दरम् ।
अरोचकञ्च ग्रहणीं हृद्रोगञ्च विनाशयेत् ॥ २९ ॥

ग्रहण्यादौ मही*कारिष्ट ।—

(मृद्वीकाया' पलशतं चतुर्द्रोणेऽम्भसः पचेत् ।
द्रोणशेषे सुशीते च पूते तस्मिन् प्रदापयेत् ॥

विषय, स्वस्थानान्तु परिभाषीक्तभावया, तदयथा—"द्वावञ्जली क्षुत्तमाया मात्रा हीना च ' षट्पला। चतुष्पला मध्यमा च यात्रा सान्नच सानिषम ॥ अतोऽन्यथा हि भक्षणे अरदंशीभक्षतौ तथा। शीर्षादिक प्रकुरुते विधिवत् तेन गृह्यते ॥" इति ॥ २०—२४ ॥

इदानी लोहासवविवरणमाह, लोहचूर्णमिति।—इमं लोहासव मर्त्य पुरुष पिबेत यस्मात पर वह्निकर भवति। लोहचूर्णमयचूर्णम। त्रिकटक प्रसिद्धम्। त्रिफला हरीतक्यादिकम्। चतुष्पलमित पृथगिति—प्रत्येक कुडवप्रमाणमित्यर्थ। घृतभाण्डमिति चिक्कणत्वाद्दृढत्वात्। मासैक यावत सन्धितव्य ततो जातरसं भवति। धातक्या विंशतिपलं गुडस्य च तुला क्षिपेत ॥ २५—२९ ॥

---

* पाठोऽयमसङ्गत हीनमात्रापेक्षया मध्यममात्राया अल्पत्वेनोक्तत्वात्, अतश्च "द्वावञ्जली क्षुत्तमाया मात्रा मध्या च षट्पला। चतुष्पला हीनमात्रा—" इत्यादि पाठोऽत्र सङ्गत.।

तुले द्वे क्षौद्रखण्डाभ्यां धातक्या प्रस्थमेव च।
कक्कोलकं लवङ्गञ्च फलं जात्यास्तथैव च॥
पलाशकञ्च मरिचत्वगेलापत्रकेसरम्।
पिप्पली चित्रकं चव्यं पिप्पलीमूलरेणुके॥
घृतभाण्डे विनिक्षिप्य चन्दनागुरुधूपिते।
कर्पूरवासितो ह्येष ग्रहण्या दीपनः परः॥
अर्शसां नाशने श्रेष्ठ उदावर्त्तस्य गुल्मनुत्।
जठरक्रिमिकुष्ठानि व्रणानि विविधानि च॥
अक्षिरोगशिरोरोग गलरोगाश्च नाशयेत्॥)

ज्वरे कुटजारिष्ट।—

तुला कुटजमूलस्य मृद्वीकार्द्धतुला तथा।
मधूकपुष्पकाश्मर्य्य भागान् दशपलोन्मितान्॥ ३०॥
चतुर्द्रोणेऽम्भसः पक्त्वा क्वाथे द्रोणावशेषिते।
धातक्या विंशतिपलं गुडस्य च तुला क्षिपेत्॥ ३१॥
मासमात्रं स्थितो भाण्डे कुटजारिष्टसञ्ज्ञितः।
ज्वरान् प्रशमयेत् सर्वान् कुर्य्यात्तीक्ष्णं धनञ्जयम्॥ ३२॥

विद्रध्यादौ विडङ्गारिष्ट।—

विडङ्गं ग्रन्थिकं रास्ना कुटजत्वक्फलानि च।
पाठेलवालुकं धात्री भागान् पञ्चपलान् पृथक्॥ ३३॥

इदानीमरिष्ट दर्शयन्नाह, तुलामित।—अथ कुटजारिष्ट सर्वज्वरान् हन्ति इति। सर्वानिति—अष्टप्रकारान्। अथ च धनञ्जयमग्निं तीक्ष्णं पाचकाग्निसामर्थ्यं यथा स्यात् तथा कुर्य्यात्। अत्र कुटजो वृक्षविशेष। मृद्वीका द्राक्षा। तुला पलशत श्रेयम्। मधूकपुष्पकाश्मर्य्यफलाना पृथक् दशपलानि देयानि, काश्मर्य्यफलानाचे क्वथ्यो ग्राह्या। एतत् सकल मासमात्र यावत सन्धितव्यम्॥ ३०—३२॥

अथ विडङ्गारिष्टमाह, विडङ्गमिति।—ग्रन्थिक पिप्पलीमूलम। केचित् ग्रन्थिकस्थाने क्रमुकमिति पठन्ति, तत्र क्रमुक पूगीफलम्। राम्ना सुरभी।

अष्टद्रोणेऽम्भस पक्त्वा कुर्याद्द्रोणावशेषितम्।
पूते शीते क्षिपेत्तत्र क्षौद्रं पलशतत्रयम् ॥ २४ ॥
धातकीं विंशतिपला त्रिजात द्विपल तथा।
प्रियङ्गुकाञ्चनाराणा सलोध्राणा पल पलम् ॥ २५ ॥
व्योषस्य च पलान्यष्टौ चूर्णीकृत्य प्रदापयेत्।
घृतभाण्डे विनिक्षिप्य मासमेक निधापयेत् ॥ २६ ॥
तत. पिबेद्यथार्हन्तु जयेद्विद्रधिमुत्थितम्।
ऊरुस्तम्भाश्मरीमेहान् प्रत्यष्ठीलाभगन्दरान् ॥
गण्डमाला हनुस्तम्भ विडङ्गारिष्टसंज्ञक. ॥ २७ ॥

प्रमेहादौ देवदार्वाद्यरिष्ट ।—

तुलार्द्धं देवदारो स्याद्दासा च पलविंशति:।
मञ्जिष्ठेन्द्रयवा दन्ती तगरं रजनीद्वयम् ॥ २८ ॥
राम्ना कृमिघ्न मुस्तञ्च शिरीषं खदिरार्जुनौ।
भागान् दशपलान् दद्यात् यमान्या वल्लकस्य च ॥२९॥
चन्दनस्य गुडूच्याश्च रोहिण्याश्चित्रकस्य च।

फलानीति—कुटजफलानि। पाठा अम्बष्ठा। पलवालुक प्रक्षिप्तम्। धात्री आमलकी एतत् पृथक् पञ्चपलपरिमितम्। पूते वस्त्रगालिते। शीते हिमस्पर्शे, शीतयद्दष्ण मत्र मधुनेत्यनलात्, "उष्णैर्विरुध्यते मधु" इति वचनात्। त्रिजातमिति—त्रिसुगन्ध त्रिख्यात तच्च मिलित्वा द्विपलमित्यर्थ। व्योषस्य त्रिकटुकस्य मिलित्वाऽष्टौ पलानि। कर्त्तव्यताऽस्य व्यवहारतो बोद्धव्या। यथार्हमिति—यथायोग्य, तेन दोषान्यपेक्षया दातव्यमित्यर्थ। एष त्रिडङ्गारिष्टो विद्रधिप्रभृतीन् रोगान् जयेत। तत्राश्मरी रोग ॥ २३—२७ ॥

अथ देवदार्वादिकारिष्टमाह, तुलार्द्धमिति।—देवदारोरिति षष्ठ्यन्तत्वात् काष्ठ ग्राह्यम्। दासा पाटलकस्य मूल ग्राह्यम्। इन्द्रयवा कुटजबीजानि। दन्ती प्रसिद्धा। तगर प्रसिद्धम्। रजनीद्वय हरिद्राद्वयम्। राम्ना प्रसिद्धा। कृमिघ्न विडङ्गम्। शिरीषो वृक्षविशेष। खदिरोऽपि वृक्ष। अर्जुन इति—वृक्षविशेष। एतत् सकल पृथक् दशपलपरिमि, मूलमिति—मञ्जिष्ठादि अर्जुनान्तम्। यमान्यादि

भागानष्टपलानेतानष्टद्रोणेऽम्भसः पचेत् ॥ ४० ॥
द्रोणशेषे कषाये च पूते शीते प्रदापयेत्।
धातक्याः षोडशपल माक्षिकस्य तुलात्रयम् ॥ ४१ ॥
व्योषस्य द्विपल दद्यात्त्रिजातस्य चतुष्पलम्।
चतुष्पल प्रियङ्गोश्च द्विपलं नागकेशरम् ॥ ४२ ॥
सर्वाण्येतानि सच्चूर्ण्य घृतभाण्डे निधापयेत्।
मासादूर्ध्वं पिबेदेन प्रमेहं हन्ति दुर्जयम् ॥ ४३ ॥
वातरोगान् ग्रहण्यर्शो मूत्रकृच्छ्राणि नाशयेत्।
देवदार्वादिकोऽरिष्टः कुष्ठकुष्ठविनाशनः ॥ ४४ ॥

कुष्ठादौ खदिरारिष्ट।—

खदिरस्य तुलार्द्धन्तु देवदारु च तत्समम्।
वाकुचो द्वादशपला दार्वी स्यात् पलविंशतिः ॥ ४५ ॥
त्रिफला विंशतिपला ह्यष्टद्रोणेऽम्भसः पचेत्।
कषाये द्रोणशेषे च पूते शीते विनिक्षिपेत् ॥ ४६ ॥
तुलाद्वयं माक्षिकस्य तुलैका शर्करा मता।
धातक्या विंशतिपल कक्कोलं नागकेशरम् ॥ ४७ ॥
जातीफल लवङ्गैला त्वक्पत्राणि पृथक् पृथक्।

क्षिप्तकान्त पृथक् चाष्टपलमित, तत्र वत्सक कुटज। रोहिणी कटुकीशब्दवाच्या। पूते वस्त्रगालित। शीते शीतीभूते। व्योषस्य मिलित्वा द्विपलम्। त्रिजातस्यापि मिलित्वा चतुष्पलानि, त्रिजात त्रिसुगन्धम्। प्रियङ्गोरिति फलानि। एष पूर्वयुक्त्या कर्त्तव्य दृष्टव्यवहारेण वा ॥ ३८—४४ ॥

अथ खदिरारिष्टमाह, खदिरस्येति।—खदिर प्रसिद्ध, तथा अस्य सारो ग्राह्य। देवदारु काष्ठ, तत्समामिति—खदिरसारसमम्। वाकुची सोमराजी, तस्या फलानि। दार्वी दारुहरिद्रा। त्रिफला हरीतकीप्रभृतिकफलत्रय, तच्च मिलित्वा विंशतिपलानि। एतत् सकल सङ्कृत्य अष्टद्रोणे पानीये सङ्काथ्य द्रोणशेषौ ग्राह्य, तत्र वक्ष्यमाणद्रव्याणि प्रक्षिपेत्। तानि कानि इत्याह —माक्षिकस्य मधुन। तुलैकेति—तुला पलशतमिति। धातक्या इति—

पलोन्मितानि क्षणाया दद्यात् पलचतुष्टयम् ॥ ४८ ॥
घृतभाण्डे विनिक्षिप्य मासादूर्ध्वं पिबेन्नरः।
महाकुष्ठानि हृद्रोगं पाण्डुरोगार्बुदे तथा ॥ ४९ ॥
गुल्मं ग्रन्थिं क्रमोन् कास श्वास प्लीहोदरं जयेत्।
एष वै खदिरारिष्टः सर्वकुष्ठनिवारणः ॥ ५० ॥

क्षयादौ बब्बूलारिष्ट।—

तुलार्द्धयञ्च बब्बूल्याश्चतुर्द्रोणे जले पचेत्।
द्रोणशेषे रसे शीते गुडस्य च तुलां क्षिपेत् ॥ ५१ ॥
धातकीं षोडशपलां क्षणाञ्च दिपलां तथा।
जातीफलानि कक्कोलमेलात्वक्पत्रकेशरम् ॥ ५२ ॥
लवङ्गं मरिचञ्चैव पलिकान्युपकल्पयेत्।
मासं भाण्डे स्थितस्त्वेष बब्बूलारिष्टको जयेत्॥
क्षय कुष्ठमतीसार प्रमेहश्वासकासकम् ॥ ५३ ॥

क्षयादौ द्राक्षारिष्ट।—

द्राक्षातुलार्द्धं द्विद्रोणे जलस्य विपचेत सुधीः।
पादशेषे कषाये च पूते शीते विनिक्षिपेत् ॥ ५४ ॥
गुडस्य द्वितुला तत्र त्वगेलापत्रकेशरम्।
प्रियङ्गुमरिचं क्षणा विडङ्गञ्चेति चूर्णयेत् ॥ ५५ ॥
पृथक् पलोन्मितैर्भागैस्ततो भाण्डे निधापयेत्।
समन्ततो घट्टयित्वा पिबेज्जातरसं ततः ॥ ५६ ॥

धातकीकुसुमानि। कक्कोल प्रसिद्धम्। त्वक् वराङ्गम्। क्षणा पिप्पली, तस्या पलचतुष्टयम्। घृतभाण्डे इति—घृतावलिप्ते भाण्डे इति वा योज्यम्। एष खादिरारिष्ट कुष्ठेष्वपि प्रसिद्ध ॥ ४५—५० ॥

अथ बब्बूलारिष्टमाह, तुलार्द्धमित्यादि।—बब्बूल करटकीवृक्षविशेष, तस्य त्वक ग्राह्या। क्षणा पिप्पली। शेष सुगमम्। कर्षोन्मितोऽस्य पूर्ववत ॥ ५१—५३ ॥

अथ द्राक्षारिष्टमाह, द्राक्षेति।—समन्ततो घट्टयित्वेति—समन्तत सर्वत

उरःक्षतं क्षयं हन्ति कासश्वासगलामयान्।
द्वाचारिष्टाह्वयः प्रोक्तो बलकृन्मलशोधनः॥ ५७॥

प्लीहादौ रोहीतकारिष्ट।—

रोहीतकतुलामेका चतुर्द्रोणे जले पचेत्।
पादशेषे रसे शीते पूते पलशतद्वयम्॥ ५८॥
दद्याद्गुडस्य धातक्या पलषोडशिकं मतम्।
पञ्चकोलं त्रिजातञ्च त्रिफलाञ्च विनिक्षिपेत्॥ ५९॥
चूर्णयित्वा पलाशेन ततो भाण्डे निधापयेत्।
मासादूर्द्ध्वञ्च पिबता गुदजा यान्ति सङ्क्षयम्॥ ६०॥
ग्रहणीपाण्डुहृद्रोग प्लीहगुल्मोदराणि च।
कुष्ठशीफार्शचिहरो रोहीतारिष्टसञ्ज्ञकः॥ ६१॥

बालोकरणादौ दशमूलारिष्ट।—

(पर्ण्यौ बृहत्यौ गोकण्टो विल्वोऽग्निमन्थकोऽरलुः।
पाटला काश्मरी चेति दशमूलमिहोच्यते॥)
दशमूलानि कुर्वीत भागैः पञ्चपलैः पृथक्।

सङ्क्षयेदित्यर्थः। मासमेकं यावत् भवति तावत् सञ्चितं धारयेत् तस्मात्तस्य भवति। मलशोधना वातादीनां शोधनं पुरीषादिशोधनो वा। शेषं सुगमम्॥ ५४—५७॥

अथ रोहीतकारिष्टमाह, रोहीतकेति।—रोहीतको वृक्षविशेषो विख्यातः, तस्य मूलत्वक् ग्राह्या। पादशेषे द्रोणावशिष्टे रसे क्वाथे पूते वस्त्रगालिते शीते क्षिप्तस्यर्थे पलशतद्वयमिति—तुलाद्वयं गुडस्येत्यन्वयः। पञ्चकोलमिति—पिप्पली, पिप्पलीमूलं, चव्यं, चित्रकं, नागरम्। त्रिजातामिति—त्रिसुगन्धं, तस्य एलात्वक् पत्रकम्। त्रिफला हरीतक्यादिकम्। एतत् पञ्चकोलप्रभृतकं पृथक् पलपरिमितं ग्राह्यम्। शेषं सुगमम्॥ ५८—६१॥

अथ दशमूलारिष्टमाह, दशमूलानि कुर्वीतेति।—दशमूल विख्यातमेव,

पञ्चविंशत् पलं कुर्य्याच्चित्रकं पुष्करं तथा ॥ ६२ ॥
कुर्य्यात्त्रिंशत् पलं नाम्ना गुडूची तत्समा भवेत्।
पलै षोडशभिर्भागैर्वो रविभक्तैर्दुरालभा ॥ ६३ ॥
खदिरो वीजसारश्च पथ्या चेति पृथक् पलै।
अष्टभिर्गणितै कुष्ठं मञ्जिष्ठा देवदारु च ॥ ६४ ॥
विडङ्गं मधुकं भार्गी कपित्थोऽक्षः पुनर्नवा।
चव्यं मामो प्रियङ्गुश्च सारिवा कृष्णजोरकम् ॥ ६५ ॥
त्रिवृता रेणुका राम्ना पिप्पली क्रमुकं शटी।
हरिद्रा शतपुष्पा च पद्मकं नागकेशरम् ॥ ६६ ॥
मुस्तमिन्द्रयवः शुण्ठी जीवकर्षभकौ तथा।
मेदा चान्या महामेदा काकोल्यौ ऋद्धिवृद्धिके ॥ ६७ ॥
कुर्य्यात् पृथक् द्विपलिकान् पचेदष्टगुणे जले।
चतुर्थांशं घृतं नीत्वा मृद्वग्नौ सन्निधापयेत् ॥ ६८ ॥
ततः षष्टिपलां दत्त्वा पचेन्नीरे चतुर्गुणे।
त्रिपादशेषं शीतञ्च पूर्वक्वाथे घृतं क्षिपेत् ॥ ६९ ॥

तथा हि—"पर्ण्यौ द्वे द्वे पलौ गोकण्टो विल्वोऽग्निमन्थनोऽरणी। पाटला काश्मरी चेति दशमूलमिहोच्यते॥" इति, तच्च पृथक् पञ्चपलमित भवति, मिलित्वा पञ्चाशत पलानि इत्यर्थः। पुष्कर तथेति—पुष्कर पुष्करमूल तदभावे कुष्ठ ग्राह्य तथेति यष्टयेतदपि पञ्चविंशतिपलमित स्यात्। गुडूची तत्समा भवेदिति—तत्समा लोध्रपरिमाणसमा, तेन विंशतिपलप्रमाणेयमपि बोद्धव्या। रविभक्तैर्दुरालभेति—दुरालभा धन्वयासक, सा च रविभक्तैर्द्वादशकै, पलैरिति शेष। खदिर खदिरसार। वीजसार रक्तपीतको वृक्षविशेष। पथ्या हरीतकी। एतत्त्रय पृथक् पलाष्टक देयम्। कुष्ठपूर्वक वक्ष्यमाण द्रव्य पञ्चविंशतिपलित च पृथक् द्विपलप्रमाण ज्ञेयम्, तत्र मधुक यष्टीमधु। अक्ष विभीतक। तत्र "कपित्थेक्षु पुनर्नवा" इति पाठे—इक्षु इक्षुरस, एतन्न प्रचरति। प्रियङ्गुर्लतावि शेष। सारिवा आस्फोता। वृद्धता निशोत। रेणुका स्वनामत ख्याता। क्रमुक पूगीफलम्। शटी कर्चूरभेद। पद्मक काष्ठ, न तु कमलम्। वृहाष्टवर्गेऽस्याप्रसिद्धत्वात (?) सनद्रव्याणि योज्यानि। अष्टगुणे

द्वात्रिंशत् पलिकं चोद्र दद्याद्गुडचतुःशतम्।
त्रिंशत् पलानि धात्र्याः काक्कोलं जलचन्दनम् ॥ ७० ॥
जातीफल लवङ्गञ्च त्वगेलापत्रकेशरम्।
पिप्पली चेति मञ्जूषं भागैर्द्विपलिकैः पृथक् ॥ ७१ ॥
प्राणमात्राञ्च कस्तूरीं सर्वमेकत्र निक्षिपेत्।
भूमौ निखातयेद्भाण्ड ततो जातरसं पिबेत् ॥ ७२ ॥
कतकस्य फलं क्षिप्त्वा रसं निर्मलतां नयेत्।
ग्रहणीमर्शसि श्वास कास गुल्म भगन्दरम् ॥ ७३ ॥
वातव्याधि क्षयं छर्दिं पाण्डुरोगञ्च कामलाम्।
कुष्ठान्यर्शांसि मेहाञ्च मन्दाग्निमुदराणि च ॥ ७४ ॥
शर्करामश्मरीं मूत्र-कृच्छ्रं धातुक्षयं जयेत्।
कृशाना पुष्टिजननी बन्ध्याना गर्भद परः ॥
अरिष्टो दशमूलाख्यस्तेज शुक्रबलप्रद ॥ ७५ ॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां मध्यखण्डे भिषक्सिद्धितस्थाने सन्धानकल्पनानाम एकादशोऽध्याय ॥ ११ ॥

जलं इति सकलक्वाथद्रव्यपरिमाणात्। धृत क्वाथत चतुर्थांश पादशेषम्। तत इति—पश्चात्। षष्टिपलमिता द्राक्षा चतुर्गुणे पानीये क्वाथयित्वा क्षिप्तादर्शेष यावच्च पादहीनमित्यर्थ। चतुर्गुणताऽत्र द्राक्षापरिमाणात्, एतदपि पूर्वक्वाथे क्षिपेदित्यर्थ। दत्त्वा गुडचत् शतमिति—गुडस्य तुलाचतुष्क यावन्मित्यर्थ। काक्कोलप्रभृतिपिप्पलीपर्य्यवसान दशद्रव्य पृथक् द्विपलमित भवति, तत्र जलं बालकम्। चन्दन श्वेतम्। जातरस जातरसताऽत्र तत्कर्मकारकसक्काथादवगन्तव्या। कतकफलप्रक्षेप तन्निर्मलार्थम्। इदानीमेते अरिष्टाद्योऽपि कच्छपयन्त्रेण साधिता दृश्यन्ते तद्गुणा एव भवन्ति च, अतस्तज्ज्ञापनार्थं यन्त्रविधिमाह,—"आसवादिकमुक्त यत सन्धान वैद्यिपाचयेत्। कच्छपे भिषजा श्रेष्ठस्तद्गुण तत्र निर्दिशेत्॥ सम्यक् पक्व ततो ज्ञात्वा न्यसेत गन्धे प्रसाधयेत्। द्रव्य सौगन्धिक यत्र न्यसेत पश्चात्र पातयेत्॥ धाराधरो दापयेद्वन सुगन्धाभिश्च कुड्मलम्। तेन सौम्य भवेन्नूनं सुगन्धञ्च मनोरमम्॥ क्लेदशाखादिदोष प्रच्छोद्य तेनोपशाम्यति॥" इति। "आसवादिकसिद्ध्यर्थमयमेव विधि. स्मृत.। काचने राजते पात्रे काचे वाऽपि

द्वादशोऽध्यायः ।

धातूना शोधनमारणाधिकारः ।—

सप्तधातुनिर्देश ।—

स्वर्णतारारताम्राणि नागवङ्गौ च तीक्ष्णकम् ।
धातवः सप्त विज्ञेयास्तत्तान् शोधयेद्बुध ॥ १ ॥

स्वर्णादिधातुपञ्चकाना शोधनम् ।—

स्वर्णतारारताम्राय-पत्राण्यग्नौ प्रतापयेत् ।
निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥ २ ॥

मनोहरे ॥ रक्षणीय प्रयत्नेन बहुवैनोपदेशत ॥" इति । [सौगन्धिक द्रव्यमिति—चन्दनप्रभृतिकम् । त्रसेदिति सन्धानपात्रे]। केचित "आमवादिकमुक्त यत" इत्यादि पाठ न पठन्ति प्रक्षेपकोऽयमिति वदन्ति , यतो बहुपुस्तकेषु न दृश्यते ॥ ६२—७५ ॥

इति श्रीवास्तव्यान्वयप्रकाशवैद्यश्रीभावमिश्रात्मजेनाढमल्लेन विरचितायां शार्ङ्गधर-दीपिकायां मध्यखण्डे चिकित्सितस्थाने सन्धानकल्पनानाम एकादशोऽध्याय ॥११॥

अथेदानी धातूना समुदायेन शोधनमारण दर्शयन्नाह, तत्र तावत पूर्वं तत्सङ्ख्या यथा, स्वर्णेति ।—स्वर्णादितीक्ष्णान्ता सप्त धातवो विज्ञेया विशेषेण सप्त धातवो बोद्धया यतस्तत्रान्तरे अष्टधातव इति मन्यन्ते , तत्राष्टधा लोहसज्ञा , तथा हि—"स्वर्ण तार तास्रनाग रङ्ग कान्तञ्च तीक्ष्णकम् । मुण्डान्तमष्टधा लोह कास्यार घोषक त्रिधा ॥ उपलोह समाख्यातम" इत्यादि । ततस्तान शोधयेत् बुध इति—बुधस्तद्विशेषज्ञ तान् स्वर्णादीन् । अत्र स्वर्णं प्रसिद्धम । तार रौप्यम । आर पीतलोह तच्च तास्रघोषभेदाभ्या सङ्गातमित्येके भाषन्ते । अत्रैव घोषभेदो यशद इति वाच्य । शिवमते तु टेवजातत्वेन षडेव ग्राह्या , तथा हि—शिवस्य तेज प्रथितो रसेन्द्रो देवीभव गन्धमथाभ्रकञ्च । शुक्रन्तु सूर्यस्य सहस्ररश्मेश्चन्द्रस्य रौप्य परमेश्वरस्य ॥ विष्णोस्तु हेम प्रभव वदन्ति नागञ्च नागस्य तु वासुकेश । लोह यमस्यैव तु कालमूर्तेर्वङ्गञ्च शुक्रस्य पुरारिदो बुधा ॥" इति , तस्मादार-सज्ञस्त्वौपाधिक ॥ १ ॥

इदानी तच्छोधनमारणमाह, स्वर्णेति ।—सुवर्णादीना चतुर्णा पत्राणि कृत्वा

गोमूत्रे च कुलत्थाना कषाये च त्रिधा त्रिधा।
एव स्वर्णादिलोहाना विशुद्धि सम्प्रजायते ॥ ३ ॥

नागवङ्गयो शोधनम्।—

नागवङ्गौ प्रतप्तौ च गालितौ तैर्निषिञ्चयेत्।
त्रिधा त्रिधा विशुद्धि स्याद्रविदुग्धेन च त्रिधा ॥ ४ ॥

स्वर्णमारणम्।—

स्वर्णाच्च द्विगुणं सूतमम्लेन सह मर्दयेत्।
तल्लोकसम गन्ध निदध्यादधरोत्तरम् ॥ ५ ॥
गोलकञ्च ततो रुन्ध्याच्छरावदृढसम्पुटे।
त्रिशद्वनोपलैर्दद्यात् पुटान्येवं चतुर्दश ॥
निरुत्थं जायते भस्म गन्धो देय. पुन पुन: ॥ ६ ॥

तानि चाग्नौ पुन सन्तप्तानि कृत्वा वक्ष्यमाणद्रव्येषु त्रिधा त्रिधेत यथा स्यात्त्रिषिञ्चेत्, प्रत्येकमिति शेष, एव सुवर्णादीना चतुर्णा विशुद्धिर्भवति। स्वर्णादिलोहाना-मिति ग्रहणेन तीक्ष्णादीनामपि शुद्धिरेव बोद्धव्या। अत्र तैल तिलसम्बन्धि। तक्र विभागाभिज्ञम्। क्षाराम्लक प्रसिद्धम्। कुलत्थोऽत्रविशेष ॥२।३॥

अथ नागवङ्गयोर्विशेषशुद्धि दशयन्नाह नागेति।—प्रतप्ताविति—अग्नौ सन्तापितौ, अत एव गालिताविति—द्रवीभूतौ कृत्वा, तैर्निषिञ्चयेदिति—तै पूर्वोक्ततैलतक्रादिद्रवै, त्रिधा त्रिधेति—प्रत्येक तैलादिभिर्निषिञ्चेदित्यभिप्राय। विशेषमपि न केवल पूर्वोक्तद्रव्यैर्निषिञ्चेत्, किन्तु रविदुग्धेनाकक्षीरेणापि त्रिधा कृत्वा शोधयेदिति पूर्वशोधनादयमेव विशेष ॥ ४ ॥

अथ धातुमध्ये स्वर्णमारणमाह स्वर्णादेति।—सूत पारद तच्च सुवर्ण-परिमाणात् द्विगुण ग्राह्यम्। अम्लेन बीजपूरादिना। तल्लोकसम गन्धमिति —तत्सूतपारदकृतेन गोलकेन साम्य शोधितगन्धक सङ्गृह्य तल्लोकस्याध उपरि च दत्त्वा शरावसम्पुटे सन्धाय पुटेदिति तात्पर्याभिप्राय'। सम्प्रदाये किञ्चित् गन्धक दत्त्वा गोलक कार्य्य, पश्चात् शेष गन्धमुपरि देयम्। दृढसम्पुटे इति—दृढग्रहणेन सत्कर्पटक सूच्यते, तेन सत्कर्पटकेनाच दृढता कार्य्या। एव चतुर्दशपुटे कृते निरुत्थ जायते, सुवर्णमिति शेष। निरुत्थताऽत्यर्थमूर्च्छना कथ्यते, न तु स्वर्णस्य

मतान्तरे स्वर्णमारणम्।—

काञ्चने गालिते नागं षोडशांशेन निक्षिपेत्।
चूर्णयित्वा तथाऽम्लेन दृष्ट्वा कृत्वा च गोलकम्॥ ७॥
गोलकेन समं गन्धं दत्त्वा चैवाधरोत्तरम्।
शरावसम्पुटे धृत्वा पुटेत् त्रिंशद्वनोपले॥
एवं सप्तपुटैर्हेम निरुत्थं भस्म जायते॥ ८॥

मतान्तरे स्वर्णमारणम्।—

काञ्चनाररसैर्घृष्ट्वा समसूतकगन्धयोः।
कज्जल्या हेमपत्राणि लेपयेत् सममात्रया॥९॥
काञ्चनारत्वचः कल्कैर्मृषायुग्मं प्रकल्पयेत्।
धृत्वा तत्सम्पुटे गोलं मृन्मूषासम्पुटे पचेत्॥१०॥
निधाय मन्थिरोधञ्च कृत्वा सशोष्य कोकिलैः।
वह्निं खरतरं कुर्य्यादेवं दद्यात् पुटत्रयम्॥
निरुत्थं जायते भस्म सर्वकार्य्येषु योजयेत्॥ ११॥

स्तिर्भवति। पुटमेव त्रिंशद्वनोपले कृत्वा देयं, तच्च कुक्कुटपुटसङ्ख्यया विहितम्। वनोपलं शुष्कगोमयं, तच्च करञ्जाग्रशब्दवाच्यम्। गन्धो देयः पुनः पुनरिति—गुडगन्धकयोः पूर्वोक्तविधानेन प्रत्येकं पुटे योज्यमित्यर्थः॥ ५।६॥

अपरमपि स्वर्णमारणमाह, काञ्चने इति।—काञ्चने स्वर्णे गालिते द्राविते सति तत्र नागं षोडशके क्षिपेत्, षोडशांशेन काञ्चनपरिमाणात् नागं ग्राह्यम्। अत्र मातुलुङ्गप्रभृतिकम्। अधरोत्तरमिति—गोलकस्योपरि चाधश्च गन्धकं देयम्। सम्पुटविधानञ्च पूर्ववत् कार्य्यम्। केचिदत्र वनोपलैर्विंशतिसङ्ख्यकैरेव मन्यन्ते। एवमिति—अनेन प्रकारेण सप्तपुटे कृते हेम भस्म भवति॥ ७८॥

अन्यत्र स्वर्णमारणमाह, काञ्चनारेति।—काञ्चनारो वृक्षविशेषः प्रसिद्धः, तस्य पत्राणां त्वचो वा रसः खरसः। पारदः गन्धकश्च समानौ तयोः कज्जली कार्येति सम्बन्धः। हेमपत्राणि स्वर्णपत्राणि। सममात्रयेति—तया कज्जल्या समया स्वर्णपत्रपरिमाणया। शेषं विधानं पूर्ववत्। कोकिलैरिति—शुष्कगोमयसञ्ज्ञैरङ्गारैरित्यर्थः, यत वह्निं खरतरं कुर्य्यादिति ग्रहणात्। एवमिति—अमुना प्रकारेण पुटत्रयमित्यवशेषोऽन्वेतव्यः॥ ९—११॥

मतान्तरे स्वर्णमारणम्।—

काञ्चनारप्रकारेण लाङ्गली हन्ति काञ्चनम्।
ज्वालामुखी तथा हन्यात्तथा हन्ति मनःशिला ॥१२॥

मतान्तरे स्वर्णमारणम्।—

शिलासिन्दूरयोश्चूर्णं समयोरर्कदुग्धकै ॥
सप्तैव भावना दद्याच्छोषयेच्च पुनः पुनः ॥१३॥
ततस्तु गालितं हैन्नि कल्कोऽयं दीयते समः।
पुनर्घर्मदतितरां यथा कल्को विलीयते ॥
एवं वेलात्रयं दद्यात् कल्कं हैमसमं भवेत् ॥१४॥

मतान्तरे स्वर्णमारणम्।—

पारावतमलैर्लिप्तेदथवा कुक्कुटोद्भवैः।
हेमपत्राणि तेषां च प्रदद्यादन्तरान्तरम् ॥१५॥
गन्धचूर्णं समं धृत्वा शरावयुग्मसम्पुटे।
प्रदद्यात् कुक्कुटपुट पञ्चभिर्गोमयोपलैः ॥१६॥

काञ्चनारेति।—अथवा काञ्चनारप्रकारेण लाङ्गलीप्रकारमपि ज्ञानीयात् लाङ्गली कलिहारी। अथवा ज्वालामुखीप्रकारमपि काञ्चनारप्रकारवत् वीडव्यम्, ज्वालामुखी त्रयस्त्री, सा चतुर्विधा भवति "श्वेता रक्ता तथा पीता कृष्णा ज्वालामुखी भवेत्" इति एतज्जातिचतुष्टय श्वेतरक्तादिकुसुमै ज्ञात्वा ज्ञानीयात् ॥१२॥

अथान्यदपि स्वर्णमारणप्रकारमाह, शिलेति।—शिला मनःशिला। सिन्दूर प्रसिद्ध। समयो समानमानयो। भावनापरिमाणं च यावद्द्रव्य मृत भवति। गालिते द्राविते हैन्नि सुवर्णे कल्कोऽयमिति—अय कल्क शिलासिन्दूरज, कल्कयन्त्रेण स्वान्ते योज्य। सम इति—स्वर्णसमानसम कल्क। एवमिति—अमुना प्रकारेण वेलात्रय विधारमित्यर्थ ॥ १३।१४ ॥

अथान्यप्रकारमाह, पारावतेति।—पारावत प्रसिद्ध। मल पुरीषम। लिप्येत् इति हेमपत्राणीत्यर्थ। अथवा कुक्कुटोद्भवैरिति—कुक्कुटस्यासचूड तदुद्भवैर्मलैरिति सम्बन्ध। तेषां स्वर्णपत्राणाम् अन्तरान्तर यथा स्यात् तथा स्वर्णपत्रसम गन्धकचूर्णं देय, तानि च शरावयुग्मसम्पुटे धृत्वा तत सम्पुट कुक्कुटपुटविधानेन पाच्य, पञ्चभिर्गोमयोपलैरिति—पञ्चसङ्ख्याके शुष्कगोमये।

एवं नवपुटान् दद्याद्दशमञ्च महापुटम्।
त्रिंशद्वनोपलैर्देयं जायते हेमभस्मकम् ॥१७॥

मृतलक्षणस्य गुणा।—

सुवर्णञ्च भवेत् स्वादु तिक्तं स्निग्धं हिमं गुरु।
बुद्धिविद्याऽस्मृतिकरं विषहारि रसायनम् ॥१८॥

रौप्यमारणम्।—

भागैकं तालकं मर्द्यं जम्बीनाम्लेन केनचित्।
तेन भागत्रयं तार-पत्राणि परिलेपयेत् ॥१९॥
शुष्कं त्वा मूषापुटे रुद्ध्वा पुटेत् त्रिंशद्वनोपलैः।
समुद्धृत्य पुनस्तालं दत्त्वा रुद्ध्वा पुटे पचेत् ॥
एव चतुर्दशपुटैस्तार भस्म प्रजायते ॥२०॥

मतान्तरे रौप्यमारणम्।—

स्नुहीक्षीरेण सम्मिश्रं माक्षिकं तेन लेपयेत्।
तालकस्य प्रकारेण तारपत्राणि बुद्धिमान् ॥
पुटेच्चतुर्दशपुटैस्तारं भस्म प्रजायते ॥२१॥

एवमिति—अनेन प्रकारेण नवसङ्ख्याकानि पुटानि दद्यात्, दशमञ्च महापुटमिति—महापुटं त्रिंशद्वनोपलै कृत्वा देयम् ॥ १५—१८ ॥

इदानी तारमारण प्रकटयन्नाह, भागैकमिति।—तालक हरिताल भागैक तारपत्रभागादित्यर्थ। जम्बीन जम्बीरफलरसेन, अम्लग्रहण मधुरजम्बीर-निषेधार्थम्। केनचिदित्यनेन केनाप्यम्लेन वा, कृत जम्बीरभावात्, तेन चुक्रादिकमपि ग्राह्यम्। तेन तालकेन सह भागत्रयमिततारपत्राणि प्रलेपयेत्, भागत्रय तालकपरिमाणात्। पुटविधान पूर्ववत्। त्रिंशद्वनोपलैरित्यनेन महापुट दर्शितम्। एवमिति—उक्तपुटविधानेन चतुर्दशपुटक बोद्धव्यम् ॥ १९।२० ॥

अपरमपि तारमारणमाह, स्नुहीक्षीरेणेति।—स्नुहीक्षीरेणेति—स्नुही सेहुण्ड। माक्षिक धातुमाक्षिकम्। पूर्वोक्तहरितालविधानवन्माक्षिकविधानेन कृत्वा चतुर्दशपुटानि यावत् भवन्ति तावत् तार रौप्य भस्म स्यात् ॥ २१ ॥

पित्तलमारणम्।—

अर्कक्षीरेण संमिश्रो गन्धकस्तेन लेपयेत्।
समेनास्य पत्राणि शुद्धान्यस्रद्रवैर्मुहुः ॥२२॥
ततो मूषापुटे धृत्वा पुटेत् गजपुटेन च।
एवं पुटद्वयेनैव भस्मसार भवति ध्रुवम् ॥२३॥

काम्यमारणम्।—

आरवत् काम्यमप्येव भस्मता याति निश्चितम् ॥२४॥

ताम्रपित्तलकाम्यमारणानि।—

अर्कक्षीरवदाजं स्यात् क्षीरं निर्गुण्डिका तथा।
ताम्ररीतिध्वनिबधे समगन्धकयोगतः ॥२५॥

ताम्रमारणम्।—

सूक्ष्माणि ताम्रपत्राणि कृत्वा संखेटयेद्बुधः।
वामरत्रयमस्लेन तत खल्वे विनिक्षिपेत् ॥२६॥

इदानीमारमारणमाह अर्कक्षीरेणेति।—आर पीतलोह तस्य ताम्रमप्यव वदन्त्येके। तेन गन्धककल्केन। समेनारसमानेन। शुद्धान्यस्रद्रवैर्मुहुरिति—पूर्वम् आरपत्राणि अस्रद्रवैर्जम्बीरप्रभृतिकै कृत्वा, मुहरिति—वेलावश विशुष्कानि कृत्वा पश्चात् गन्धककल्केन लेपयेदित्यभिप्राय। गजपुट पूर्व दर्शितमेव। एवमिति—अमुना प्रकारेण पुटद्वय काम्यम ॥ २२।२३ ॥

काम्यमारणमाह आरवदित्यादि।—काम्य प्रसिद्धम। आरवदित्यनेन शोधनमारणे चास्य तद्वदेव बोद्धव्ये। एवमिति ग्रहणेन घोषमपि आरवत् ज्ञेय विशुद्धौ मारणे च, तथा हि—"काम्यारघोषपत्राणि तेन कल्केन लेपयेत्। कृत्वा गजपुट पक्त्वा शुद्धिमायान्ति निश्चितम ॥ ताम्रवच्च स्मृति तेषा कृत्वा सर्वत्र योजयेत ॥" इति। घोष काम्यभेद "यशद" इति लोके ॥ २४ ॥

अपरमप्याह अर्कक्षीरवदित्यादि।—अर्कक्षीरप्रकारवदजाक्षीरेण गन्धककल्क काम्यम। तथाऽनेन प्रकारेण निर्गुण्डीस्वरसेन गन्धककल्क काम्यमिति प्रयोगान्तरम। ताम्रादीना वधे मारणे। ताम्र, रीत्यार, ध्वनि: काम्यम्। समगन्धकयोगत इति—धातुसमानगन्धकी ग्राह्य इत्यभिप्राय ॥ २५ ॥

सम्प्रति ताम्रमारण दर्शयन्नाह, सूक्ष्माणि ताम्रपत्राणीति।—सूक्ष्मत्वमत्र

पादांशं सूतकं दत्त्वा याममम्लेन मर्दयेत्।
तत उद्धृत्य पत्राणि लेपयेद्द्विगुणेन च ॥२७॥
गन्धकेनाम्लपृष्टेन तस्य कुर्याच्च गोलकम्।
ततः पिष्ट्वा च मौनाक्षीं चाङ्गेरीं वा पुनर्नवाम् ॥२८॥
तत्कल्केन वहिर्गोलं लेपयेदङ्गलोन्मितम्।

कण्टकवेधिदण्डम। सम्वेदयेद्बुध इति—अम्लेन काञ्जिकादिना वासरत्रयं दिनत्रितयं यावद्दोलायन्त्रेण स्वेदन कुर्यादिति भाव, पत्राणामिति शेष। सम्यक्-यन्त्रेण तास्रस्यातिदोषनिवृत्ति सूचयति। यद्यपि शुद्धिरस्य पूर्वं कथिता तथापि पुन शोधनमस्य विषनिवृत्त्यर्थं कालिमाऽपगमार्थञ्च विहितम, यत,—"न विष विषमिच्छन्ति तास्रमेव महाविषम। विषस्य चैकदोषस्तु शुल्बदोषोऽष्टधा मत ॥" तद्यथा—"भस्मो मूर्च्छा विदाहश्च कुष्ठं क्लेदनभेदने। सन्ताप-श्चाक्षिपक्ष्मैव शुल्बदोषो विषोपम ॥" इति। कालिमरहितमपि—"शुकतुण्ड-क्रियाभ क्वेटे रक्त तथा मृदु स्निग्धम। ताम्र भवति सकृष्ण तच्छुद्ध कालिमरहितम ॥" अत एवाम्लेन पुन शोधनमभिहित न दोष। बुध इति—तज्ज्ञात्वाद्विविधस्य यतस्तत ताम्र द्विविधम, एक म्लेच्छमुखमपर नेपालमिति, तथा हि—"म्लेच्छ नेपालक ताम्र तयोर्नेपालमुत्तमम। नेपालादभवद्गोत्य शुल्ब म्लेच्छमिति स्मृतम ॥ सितकृष्णाकृतिच्छाय वान्तिभेदकरञ्च यत। चालनाच्च पुन कृष्ण ताम्र म्लेच्छमृदाहृतम ॥ स्निग्धं मृदुल रक्त विशोधनसम गुरु। विदोषहरण श्रेष्ठ चारान्नेनेति वैकृतिम ॥ तन्नेपालकमित्युक्त देहलोहविधायकम। व्रान्तिमान्द्यज्वरहर क्लेदमेदक्षमापहम ॥" इति। तत इति—पश्चात्। पादाश सूतकमिति—सूतक पारद पादाश ताम्रमानचतुर्थांश याम प्रहरमेक यावत् अम्लेन लम्बीरनिम्बुकप्रभृतिरसेन मर्दयेत इति भाव। पुनस्तेनैवाम्लेन पृष्टेन द्विगुण गन्धकेन कृत्वा लेपयेत पत्राणीति शेष, द्विगुणता रसपरिमाणात न तु ताम्रमानात। अम्लमम्लदाये तु गन्धकं वहनर योज्य तेन तास्रमानात द्विगुणमित्यर्थ। अन्यत्रोक्त —"ताम्रपादेन सूतेन सार्द्धं पत्र प्रलेपयेत। तान्द्विगुणगन्धेन क्षुण्णपिष्टेन तत पुन ॥ लिप्त्वा क्षुण्णोर्द्धग देय सुपिष्टाक्षपत्रिकाम। तत पिण्ड भाण्डगर्भे तु कृत्वा चूल्या विपाचयेत ॥" इत्यादि। तस्य कृत्वाच गोलकमिति—तस्य ताम्रमयद्रव्यस्य। मौनाक्षी "मछिकी" शब्दवाच्या। चाङ्गेरी अम्लपत्रिका प्रसिद्धा। तत्कल्केनेति—द्रव्याणा द्रव्याणा

भृत्वा तन्नोलकं भाण्डे शरावेण च रोधयेत् ॥२८॥
बालुकाभि प्रपूर्य्याथ विभूतिलवणाम्बुभि ।
दत्त्वा भाण्डमुखे मुद्रा ततश्चुल्ल्या विपाचयेत् ॥२०॥
क्रमवृद्धाग्निना सम्यक् यावद्यामचतुष्टयम् ।
स्वाङ्गशीतलमुद्धृत्य मर्दयेत् शूरणद्रवैः ॥२१॥
दिनैकं गोलकं कुर्य्यादर्द्धगन्धेन लेपयेत् ।
सप्तृतेन ततो मूषा पुटे गजपुटे पचेत् ॥२२॥
स्वाङ्गशीत समुद्धृत्य मृत ताम्र शुभ भवेत् ।
वान्ति भ्रान्ति क्लम मूर्च्छा न करोति कदाचन ॥२३॥

सौमकमारणम् ।—

ताम्बूलीरससम्पिष्ट-शिलालेपात् पुनः पुनः ।
द्वात्रिंशद्भिः पुटैर्नागो निरुत्थो याति भस्मताम् ॥२४॥

मतान्तरे सौमकमारणम् ।—

अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निक्षिपेत् ।

व्यस्तानां मिलितानां वा कल्कं वदन्ति तज्ज्ञाः । अङ्गलोन्मितमिति—अङ्गलोल्लेख वयाणामेकस्य वा, अङ्गलसत्र मध्यमाङ्गुलिमध्यपर्वसूत्रम् । रोधयेदित्यनेन विभूतिलवणाम्बुभि कृत्वा शरावसन्धौ मुद्रां कारयेदिति भाव, भाण्डमुखे च कारयेत् । विभूति गोमयभस्म । लवणसत्र पाशुलवणम् । अम्बु पानीयम् । क्रमवृद्धाग्निनेति—मृदुमध्यखराग्निना । शूरण सुवीर्यम् । अथ च नारितस्यास्य मुद्रार्थं विधिमप्याह, स्वाङ्गशीतल मृदित्यादि ।—तत्तास स्वाङ्गशीतल मृदित्वा पश्चात् शूरणद्रवै कृत्वा दिनमेक सम्मर्द्य पश्चाद्गोलक कृत्वा सप्तृतेनार्द्धगन्धककल्केन गोलक लेपयित्वा तदनु मूषान्तर्धृत्वा निरोध्य च गजपुटे पचत अनेन तत चूर्णेन भक्षणयोग्य भवति, अर्द्धगन्धक तासपरिमाणात्, शेष ताम्र भागद्वय गन्धकमेकभागमित्यर्थ । घृतमपि गन्धकसाम्य भवति ॥२६—२३॥

अथ नागमारणमाह ताम्बूलीति ।—ताम्बूली ताम्बूलवल्ली प्रसिद्धा । शिला मन शिला सा चतुर्थांशा सम्मदापात्। पुन पुनरिति—प्रत्येकपुटे मन शिलया प्रलिप्य पुटेन एव द्वात्रिंशत्पुटानि प्रसिद्धानि भवन्ति, न तु प्रत्येकपुटे वारवार प्रलेपन, प्रलेपनन्त्वेकवारमेकपुट प्रतीत्यर्थ । नाग सीसकम् ॥ २४ ॥

अथापरमपि नागमारणमाह, अश्वत्थचिञ्चात्वक्चूर्णमिति ।—अश्वत्थ पिप्पल, ।

मृत्पात्रे द्रावितं नागं लोहदर्व्या प्रचालयेत् ॥३५॥
यामैकेन भवेद्भस्म तत्तुल्याच्च मनःशिलाम्।
काञ्जिकेन दृढं पिष्ट्वा पचेद्दृढपुटेन च ॥३६॥
खाङ्गशीतं पुनः पिष्ट्वा शिलया काञ्जिकेन च।
पुनः पुटेच्छरावाभ्यामेवं षष्टिपुटैर्मृतिः ॥३७॥

वङ्गमारणम्।—

मृत्पात्रे द्रावितं वङ्गं चिञ्चाऽश्वत्थत्वचो रजः।
चिञ्चा चिञ्चा चतुर्थांशमयोदर्व्या प्रचालयेत् ॥३८॥
ततो द्वियाममात्रेण वङ्गभस्म प्रजायते।
अथ भस्मसमं तालं चिञ्चाऽम्लेन प्रमर्दयेत् ॥३९॥
ततो गजपुटे पक्त्वा पुनरम्लेन मर्दयेत्।
तालेन दशमांशेन यामैकं ततः पुटेत् ॥
एवं दशपुटैः पक्वो वङ्गस्तु म्रियते ध्रुवम् ॥४०॥

चिञ्चा अम्लिका। चतुर्थांश भस्मतः सौवर्चकपरिमाणात् एतेन वारवारं भस्मन क्षेपणमुक्तं, न तु एकवारं, यतो वक्ष्यमाणवङ्गमारणे प्रोक्तं "चिञ्चा चिञ्चा" इति, तद्वदत्रापि, तेन यावन्नागस्य भस्म भवति तावत् क्षार देयं, पश्चान्नागभस्मन तुल्या शिलाच्च काञ्जिकेन सम पिष्ट्वा दृढपुटे गजपुटसञ्ज्ञके पचेत्, एव षष्टिपुटै. कृत्वा मृतिर्भवति, षष्टिपुटान्तत्र शिलयैव सह कार्य्याणि, न तु चिञ्चाऽश्वत्थयोर्भस्मना, भस्मसस्कारस्त्वेकदैव ॥ ३५—३७ ॥

इदानीं वङ्गमारण दर्शयन्नाह, मृत्पात्रे इति।—मृत्पात्र खर्परम्। चिञ्चा अम्लिका। अश्वत्थ पिप्पल। रजस्पूर्णमनयोर्मध्येऽम्लस्य चिञ्चा चिञ्चा इति वारवारम। चतुर्थांशमिति वङ्गपरिमाणात् वल्कलचूर्णस्य, एतत् परिमाणमेकवार क्षेपणार्थम्, अतस्तावत् क्षिपेत् यावत् भस्म भवति, तेन वङ्गपरिमाणसम वल्कलरज कार्य्यमिति सम्प्रदाय। अयोदर्व्या लौहमयदण्डेन। अथेति पश्चात् कार्य्ये क्रमार्थः, भस्मसममित्यादि।—ताल हरिताल, तत वङ्गभस्मसाम्य भवति, तेन किमुक्तम्? वङ्गभस्म हरितालञ्च सम मात्र सकृच्च अम्लेन काञ्जिकादिना विमर्द्य तत् गोलकाकार कृत्वा शरावसम्पुटे धार्य्यं, सम्पुटनिरोधश्च

लौहमारणम्।—

शुद्धं लौहभवं चूर्णं पातालगरुडौरसैः।
मर्दयित्वा पुटेदग्नौ दद्यादेवं पुटत्रयम् ॥४१॥

कृत्वा गजपुटे पचेत्, तत्पश्चात् तमुद्धृत्य पुनर्दशमाशेन तालकेन सह सम्यग्व्याख्यरसैः कृत्वा तत पुटेत दश, एव सप्तटविधानवदिति शेष। अग्निपुटन्तु किञ्चिन्यूनमिति सम्प्रदाय, एव दशपुटे कृत्वा वह्नौ क्षिपेत् भवति ॥ ३८—४० ॥

अथ लौहमारणमाह, शुद्धमिति।—शुद्ध शोधित जात्युत्कृष्ट वा। शोधनमस्य पूर्वं कथितमेव। जातिभेदा केषाञ्चित ज्ञापनार्थं लिख्यन्ते यथा—"देवासुरसमाजेन मथ्यमाने महोदधौ। समुत्पन्न पुरा तस्मिन्नमृत देवजीवनम ॥ पीथ्यमानात मृतेस्तस्मादस्थिता क्षुद्रबिन्दव। ज्ञात्वा तान् भूगतान् बिन्दून् योगमासाद्य धूर्जटि ॥ लोहपाषाणरूपेण कृत्वा तान् वसुधातले। मायरोगाभिभूता ये मानवास्ते भजन्तु तान् ॥ इत्येव शिवगुप्ता ये सुधाया बिन्दव परम। तेषा मया समासेन कथ्यते साधन स्फुटम् ॥" इति। अथ जातिभेदा यथा—यद्यपि नागार्जुनमते अष्टादश लौहजातय सन्ति तदृयथा—माण्डूर, माण्डक, सारलौह, मध्यसारलौह, स्थूलसारलौह चक्रमर्दलौह, वन्यलौह, वज्रकलौह, सुराग्रस, कान्तिल, भद्रलौह, गरलग्रथितलौह वज्र, पाण्डि, निरङ्गम् अर्बुदक, कान्त, कुलिशमिति, तथाऽप्यन्येषा मते त्वष्टैव श्रेष्ठतमा, तथा हि—"सामान्याद्विगुण मार तस्मादष्टगुण काल। कलै शतगुण भद्र भद्राद्वज्र सहस्रधा ॥ वज्रात् षष्टिगुण पाण्डि निरङ्गाद्दशभिर्गुणै। तत कोटिगुण तस्मादयस कान्तक मतम् ॥" इति। एतेषा व्यञ्जनञ्च तल्लान्तराद्दैव लिख्यते, लक्षणविशेष विना श्रेष्ठमश्रेष्ठ न ज्ञायते तस्मात्लिख्यते, यथा—"चमाभच्छिखराकार लिङ्गान्वेवाञ्चिते सति। दृश्यन्ते यत्र सूक्ष्माणि सारञ्च तदुदाहृतम ॥ यत्र कृष्णायसे विशल्लक्षणानि सितानि च। पल्लवाल्पकृतौन्याद्भुक्त बुधा कृष्णवज्रकम् ॥ यत्र कृष्णतरा भूमिर्वर्त्तुलाङ्कानि सर्वश्र। रेखा व्याप्तेमवर्णा च तत पाण्डि च विधीयते ॥ कलिङ्गरसमावर्त्ता यदुक्तञ्च विचक्षणै। किञ्चित्तप्ते जले क्षिप्त तैलबिन्दुर्न सर्पति ॥ अपि कैनापि कालेन निर्मलत्व न मुञ्चति। भक्ष्यते यत्र कालेन निरङ्ग तदयी मतम् ॥ येन पर्वतसारण भक्ष्यन्ते शुष्ककाष्ठवत। अन्यानि गिरिसारणि तत्तीक्ष्ण कान्तमुच्यते ॥" कान्तस्य लक्षणमन्यत्राप्युक्त,—"पात्रे यस्मिन् प्रसरति जले तैलबिन्दुर्निषिक्त;

पुटत्रय कुमार्या च कुठारकुलत्थरसै.।
पुटषट्कं ततो दद्याद्तव तौक्ष्ण्यमृतिर्भवेत् ॥४२॥

मतान्तरे लौहमारणम —

क्षिपेद्दा दशमाशेन दरदं तौक्ष्ण्यचूर्णत:।
मर्दयेत् कन्यकाद्रावैर्यामयुग्मं तत. पुटेत् ॥
एव सप्तपुटैर्मृत्यु लोहचूर्णमवाप्नुयात् ॥४३॥

मतान्तरे लौहमारणम।—

रसै: कुठारच्छिन्नाया: पातालगरुडीरसै:।
स्नेन चार्कदुग्धेन तौक्ष्ण्यस्यैवं मृतिर्भवेत् ॥४४॥

द्विर्गुणं च विमृदनीति निज तिक्तता निम्बकल्क । पाके दुग्ध भवति शिखराकारकं नैति भूमौ कान्त लोह भवति तदिद लक्षणोक्त न चान्यत् ॥" इति, तस्मादनेन मध्ये कान्तलोह श्रेष्ठतम, यत —"लोहाद्दशगुण मुख्य मुख्यात्तीक्ष्ण मतीक्ष्णितम। तीक्ष्णाद्दशगुण कान्त भक्षणात् कुरुते गुणम ॥ तस्मात कान्त सदा सेव्य जरा-मृत्युहर नृणाम ॥" इति। तच्च कान्त चतुर्विध भवति, तथा हि—"भ्रामक शकटश्चैव चुम्बक द्रावक तथा। चतुर्विध भवेत कान्तमेकैक द्विगुण मतम ॥" इति जातिभेदा सङ्क्षेपेणोक्ता। सम्प्रति मारणविधिरपि तेषा कथ्यते, लोहभव चूर्णमित्यादि।—पातालगरुडी पातालमूली प्रसिद्धा, सा च छिन्नरुहा-ऽऽकृतिलक्षणेदम् तदभावे छिन्नरुहैव ग्राह्या। पुटभव गजपुटम्। कुमारी प्रसिद्धा। कुठारकुलत्थरसैरिति—कुठार. कुठारच्छिन्ना, कुटजभेद इत्यन्ये, तदभावे अम्लवेत् गच्छन्त्यपरे, अम्लत्वसम्भवे कुठारच्छिन्ना तिपानीयशब्दवाची द्रव्यविशेषो ग्राह्य। कुलत्थोऽन्नविशेष प्रसिद्ध। पुटषट्कमित्यनेन प्रत्येक पुटत्रय पूर्ववद्दोध्यम् ॥४१।४२॥

अन्यत्रेत्यपरमपि मारणमाह, क्षिपेदिति।—दरद द्विर्गुणम्। दशमाश दरद लोहचूर्णात। कन्यका कुमारी। पुटभव गजपुटविधानम्। यामयुग्ममिति मर्दनपरिमाणम्। एवमित्यनेन सप्तपुटे कृत्वा सिद्ध भवति ॥४३॥

मारणान्तरमाह, रसैरिति।—अथवा कुठारच्छिन्नाया रसै कृत्वा दरद लोहचूर्णञ्च पूर्ववत् सम्मर्द्य पुटेत्, अनेनापि सप्तपुटै. सिद्धमेतत्। अथवा पातालगरुडीरसैकवारदेव, अथवा स्नेन पूर्ववत् योग. कर्त्तव्य। अर्कदुग्धेन तद्वदेव प्रचार। एतत् योगचतुष्टयं दरदसम्बन्धि भवति, सप्तपुटसम्बन्धि

मतान्तरे लौहमारणम्।—

सूतकाद्विगुणं गन्धं दत्त्वा कुर्याच्च कज्जलीम्।
द्वयोः समं लोहचूर्णं मर्दयेत् कन्यकाद्रवैः॥४५॥
यामयुग्मं ततः पिण्डं कृत्वा ताम्रस्य पात्रके।
घर्मे धृत्वा रुवकस्य पत्रैराच्छादयेद्बुधः॥४६॥
यामार्द्धनोष्णता भूयाद्वान्यराशौ न्यसेत्ततः।
दत्त्वोपरि शरावन्तु त्रिदिनान्ते समुद्धरेत्॥४७॥
पिष्ट्वा च गालयेद्वस्त्रादेव वारितरं भवेत्।
एव सर्वाणि लोहानि स्वर्णादीन्यपि मारयेत्॥४८॥

सर्वधातूना मारणम्।—

शिलागन्धार्कदुग्धाक्ता स्वर्णाद्याः सर्वधातवः।
म्रियन्ते द्वादशपुटैः सत्यं गुरुवचो यथा॥४९॥

वा विशेषम्। अत्र कुठारच्छिन्ना प्रसिद्धा, "तिपानी" शब्दवाच्येत्यपरे। पातालगरुडो छिरहट्ट। स्नन्य स्रोभव, नाच्यन्, प्रयोगान्तरदर्शनात्। तथा च—"छिडुलस्य पलान् पञ्च नारीस्तन्येन पेषयेत्। तेन लोहस्य पत्राणि लेपयेत् पलपञ्चकम्॥" इत्यादि॥४४॥

अन्यदपि मारणमाह, सूतकादिति।—सूतक पारदम्। गन्धं गन्धकम्। द्वयोरिति—पारदगन्धकयोः। कन्यका कुमारी। यामार्द्धनोष्णता भूयादित्यनेन तद्दृश्यपिण्ड घटिकाचतुष्टय यावत् घर्मे धारयेदित्यर्थः। तत इति—पश्चात्। "दत्त्वोपरि शरावमित्यनेन तद्दृश्यपिण्ड पूर्वम् एरण्डपत्रैर्वेष्टयित्वा पश्चात् ताम्रसम्पुटे लन्मयसम्पुटे वा सन्निधाय तदनु धान्यराशौ स्थापयेदित्यर्थः। तथा हि—"गुड सूत द्विधा गन्ध कृत्वा खल्लेन कज्जलीम्। द्वयोः समं लोहचूर्णं मर्दयेत् कन्यकाद्रवैः॥ यामद्वयात समुद्धृत्य तद्गोलं ताम्रपात्रके। आच्छाद्यैरण्डपत्रैश्च यामार्द्धनोष्णता भवेत्॥" इत्यादि। एवमिति—पूर्वोक्तविधिना सर्वाणि लोहानि कान्ततीक्ष्णमुण्डप्रभृतीनि स्वर्णादीनि अपि अनया वृत्त्या च मारयेदिति भावः। आदिशब्दग्रहणात् रौप्यताम्रादय॥४५—४८॥

अपरमपि शिलागन्धार्कदुग्धाक्ता इत्यादि।—सुगमम्। सत्यमित्यनेन वारितर

उपधातुनिर्देश।—

माक्षिकं तुत्थकाभ्रौ च नीलाञ्जनशिलालकाः।
रसकश्चेति विज्ञेया एते सप्तोपधातवः॥ ५०॥

स्वर्णमाक्षिकशोधनम्।—

माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च।
मातुलुङ्गद्रवैर्वाऽथ जम्बीरोत्थद्रवैः पचेत्॥ ५१॥
चालयेल्लोहजे पात्रे यावत् पात्रन्तु लोहितम्।
भवेत्ततस्तु संशुद्धि स्वर्णमाक्षिकमुच्यते॥ ५२॥

स्वर्णमाक्षिकमारणम्।—

कुलत्थस्य कषायेण घृष्ट्वा तैलेन वा पुटेत्।
तक्रेण वाऽऽजमूत्रेण म्रियते स्वर्णमाक्षिकम्॥ ५३॥

रौप्यमाक्षिकशोधनम्।—

कर्कोटीभेषशृङ्ग्यर्कैर्वज्रक्षीरैर्दिनम्।
भावयेदातपे तोये विमला शुध्यति ध्रुवम्॥ ५४॥

श्चवेदित्यर्थः, यथा गुरुवचस्तथाऽत्र बोद्धव्यम्। एतेन किमुक्तम्? घृतं लोहस्तु पश्चात् संस्कारित कृत्यादित्यभिप्रायः, तथा हि—"घृततुल्यं मृतं लोहं लोहपात्रगतं पचेत्। तौर्यं घृतं समादाय योगवाहेषु योजयेत्॥" इत्यादि॥४९॥

अथोपधातुशोधनमारभ्य, ते के उपधातव? इति दक्षयज्ञाह, माक्षिकमिति।—माक्षिकं धातुमाक्षिकं, तत् द्विविधम्, एकं स्वर्णमाक्षिकम् अपरं तारमाक्षिकं काच्यमाक्षिकमिति। तुत्थकं प्रसिद्धम्। अभ्रं अभ्रकम्। नीलाञ्जनं प्रसिद्धम्। शिला मनःशिला। आलकं हरितालम्। रसकं खर्परकं, स च तुत्थकभेदः। एते सप्त उपधातवः कथिताः॥ ५०॥

इदानीं प्रत्येकेन शोधनमारणमाह, माक्षिकस्येति।—स्पष्टम्॥ ५१—५३॥

कर्कोटीति।—विमला * स्वर्णमाक्षिकभेदः। कर्कोटी वन्ध्याकर्कोटी ज्ञेया, मेषशृङ्गी वल्लीसंज्ञा प्रसिद्धा एतयोर्द्वये सचीरैः, पत्राणामिति शेषः। जम्बीरजैरिति—जम्बीरफलरसैः। दिनमिति, मर्दयेत् इति शेषः, तेन प्रत्येकरसेन कृत्वा

---

* विमला रौप्यमाक्षिकं, न तु स्वर्णमाक्षिकभेदः। गूढार्थदीपिकायामपि तदेवोक्तम्।

तुत्थकशोधनम्।—

विष्ठया मर्दयेत्तत्थ मार्जारककपोतयोः।
दशाशं टङ्कणं दत्त्वा पचेन्मृदुपुटेन तु॥
पुटं दध्ना पुटं चौद्रैर्देयं तुत्थविशुद्धये॥ ५५॥

अभ्रकशोधनम्।—

कृष्णाभ्रकं धमेद्वह्नौ तप्तं क्षीरे विनिक्षिपेत्।
भिन्नपत्रन्तु तत् क्षत्वा तण्डुलीयाम्लयोर्द्रवैः॥
भावयेदष्टयामं तदेवं शुध्यति चाभ्रकम्॥ ५६॥

दिनैकं मर्दयेदित्यर्थः। आतपे तीव्रे इति—तीव्रघर्मे, तीव्रघर्माभावे अग्नौ शोधयेदित्यपि सम्प्रदायः, उक्तञ्च—"जम्बीराणां रसे स्निग्धे मेषशृङ्गीरसेऽथवा। दध्नातीक्ष्णेन वा पाच्यं घस्रं विमलशोधनम्॥" इति॥५४॥

अथ तुत्थकशोधनमाह, विष्ठया मर्दयेदिति।—विष्ठा पुरीषम्। मार्जारककपोतयोरिति—मार्जारकौ विडाल, कपोत प्रसिद्ध, अनयो पुरीषत्वज्ञानतो ग्राह्यम। टङ्कणं सौभाग्यसार दशांशमिति तुत्थकपरिमाणात। मृदुपुटन्तु कङ्कटपुटप्रभृतिकम। पश्चात् दध्ना क्षत्वा पुटमेकं देयं, तदनु चौद्रैरपि पुटमेकं दद्यादित्यर्थः॥५५॥

अधुना अभ्रकशोधनमाह कृष्णेति।—कृष्णाभ्रक वज्रजातिमत्र कथितम् यतस्त्वभ्रकन्तु चतुर्विधं भवति तथा हि तल्लान्तरादुत्पत्तिप्रभृतिकं लिख्यते यथा—'पुरा वधाय ब्रह्मस्य वज्रिणा वज्रमुद्धृतम्। विस्फुलिङ्गास्ततस्तस्य गगनं परिसार्पता॥ निपेतुर्मेघानधीघात शिखरेषु महीभृताम्। तेभ्य एव समुत्पन्ना तत्तद्गिरिषु चाभ्रकम्॥ तत वज्रं वज्रजातत्वादभ्रमभ्रवीक्षणात्। गगनच्युतजातत्वादूचिरे गगनं सुरा॥ तत ब्राह्मणक्षत्रियवैट् शूद्रभेदाच्चतुर्विधम्। क्रमेणैव सित रक्त पीत कृष्णञ्च वर्णत॥ पिनाकं दद्दुरं नाग वज्रञ्चेति चतुर्विधम। पिनाकाद्यास्त्रयो वर्ज्या वज्रजाति समाहरेत॥ मुञ्चत्यग्नौ विनिक्षिप्त पिनाक दलसञ्चयम। दर्दुरं निक्षिप्त त्वग्नौ कुरुते दद्दुरध्वनिम्॥ नागञ्चाग्नौ विनिक्षिप्त फूत्कारञ्च विमुञ्चति। वज्राभ्रकन्तु वह्नित्थं न क्वचित विकृति व्रजेत॥ तस्मात वज्राभ्रक योज्य व्याधिवाडवभस्मजित्॥ तत्र दक्षिणश्रेष्ठेऽर्क-शोषाद्दलगुण हि तत। अल्पसत्त्व तदाधत्ते अग्नौ सत्त्व गुणप्रदम्॥ अथ चोत्तरश्रेष्ठेत्थं बहुसत्त्व गुणाधिकम्। शसन्ति मुनय. सर्वे

अभ्रमारणम्।—

कृत्वा धान्याभ्रकं तत्तु शोषयित्वाऽथ मर्दयेत्।
अर्कक्षीरैर्दिनं खल्ले चक्राकारञ्च कारयेत्॥ ५७॥
वेष्टयेदर्कपत्रैश्च सम्यक् गजपुटे पचेत्।
पुनर्मर्द्यं पुनः पाच्य सप्तवार प्रयत्नतः॥ ५८॥
ततो वटजटाक्वाथैस्त्रिदिनं पुटत्रयम्।
म्रियते नात्र सन्देहः सर्वयोगेषु योजयेत्॥ ५९॥

मृताभ्रस्य प्रयोगार्हताकरणम्।—

तुल्यं घृत मृताभ्रेण लोहपात्रे विपाचयेत्।
घृते जीर्णे तदभ्रन्तु सवयोगेषु योजयेत्॥ ६०॥

मृताभ्रस्य गुणाः।—

मृतं खभ्रं हरेन्मृत्युं जरापलितनाशनम्।
अनुपानैश्च संयुक्तं तत्तद्रोगहरं परम्॥ ६१॥

प्रयोगे क्षणमभ्रकम्॥" इति। शोधनञ्चाह तण्डुलीयाम्ल इति—तण्डुलीया मेघनादः, अम्ल काञ्जिकं, तदभावे लवणीरप्रभृतिकं ग्राह्यम्। अष्टयामं त्रयोदश्यधो-क्तेन प्रत्येक चतुर्यामितमित्यर्थः॥५६॥

अथ मारणं यथा, कृत्वा धान्याभ्रकमित्यादि।—धान्याभ्रकविधानन्तु तन्त्रान्तरादवगन्तव्यं, तदयथा—"वट्टा धान्ययुते वस्त्रे मर्दयेत् काञ्जिकेन सह। आदायाधोगतं शुद्धं शुष्कं धान्याभ्रकं भवेत्॥" इति। अथवा—"चूर्णाभ्रं शालिसंयुक्तं वट्टा कम्बलके तथा। विराव्य काञ्जिकेनाथ्य तत क्लिन्नं मर्दयेद्दृढम्॥ कम्बलाङ्कलितं शुष्कं मारणादौ प्रशस्यते॥" इति। वेष्टयेदर्कपत्रैरित्यनेन चक्राकारं द्रव्यं पत्रैर्वेष्टयित्वा अग्नौ पुटेत। सम्यगिति गृहणेन तत् पत्रवेष्टितं चक्राकारं द्रव्यं खर्परे निधाय उपरि च खर्परं दत्त्वा तदूर्ध्वाधः आरण्यकोपलानि च दत्त्वा अग्निं प्रज्वाल्य गजपुटे पुटेदिति तात्पर्यार्थः। एवं सप्तवारं यावत् पुटेत्, अर्कक्षीरैरेवेत्यर्थः। ततः पश्चात् वटजटाक्वाथे कृत्वा पुटत्रयमेव देयम्॥ ५७—५९॥

अथ मृताभस्यापि शुद्धिमाह, तुल्यमित्यादि।—सुगमम्॥ ६०॥

अधुना मृताभस्य गुणमप्याह, मृतमिति।—केचिदमुं श्लोकं न पठन्ति, बहुस्थानेष्वप्रचारत्वात्॥६१॥

मतान्तरे अभ्रकमारणम्।—

शुद्धं धान्याभ्रक मुस्तं शुण्ठीषड्भागयोजितम्।
मर्दयेत् काञ्जिकेनैव दिन चित्रकजे रसे ॥ ६२ ॥
ततो गजपुट दद्यात्तत्क्वाथेनोद्धृत्य मर्दयेत्।
त्रिफलावारिणा तद्वत् पुटैर्देवं पुटैस्त्रिभिः ॥ ६३ ॥
बलागोमूत्रमुस्ताली-तुलसीशूरणद्रवै।
मर्दित पुटित वह्नौ त्रिर्त्रिवेलं व्रजेन्मृतिम् ॥ ६४ ॥

मतान्तरे अभ्रकमारणम्।—

(धान्याभ्रकस्य भागैक द्वौ भागौ टङ्कणस्य च।
पिष्ट्वा तदभ्रमूषाया रुद्ध्वा तीव्राग्निना पचेत्॥
स्वभावशीतलं चूर्णं सर्वयोगेषु योजयेत्॥)

नीलाञ्जनशोधनम्।—

नीलाञ्जन चूर्णयित्वा जम्बीरद्रवभावितम्।
दिनैकमातपे शुद्धं भवेत् कार्य्येषु योजयेत् ॥ ६५ ॥

अथान्यप्रकारोऽभ्रकमारणस्य, तमपि व्याचष्टे शुद्ध धान्याभ्रकमिति।—शुद्धि पूर्वं कथिता। धान्याभ्रकविधान पूर्वमेव प्रदर्शितम्। मुस्त शुण्ठी च षड्भागयोजितं प्रत्येक षड्भागताऽत्र अभ्रकपरिमाणात्। काञ्जिकेन मर्दनञ्चैकदिनमित्यर्थ। त्रिफलावारिणा त्रिफलाक्वाथेनेत्यर्थ। तद्वत पुटेरिति—गजपुटविधानेन। एव पुटैस्त्रिभिरिति—त्रिफलाक्वाथेन पुटत्रय दद्यादित्यभिप्राय। एवमिति—गजपुटविधानादिना बलाप्रभृतीना पञ्चद्रव्याणा द्रवै कृत्वा प्रत्येकेन त्रिवेल मर्दित पश्चात् वह्नौ पुटितञ्चाभ्रक मृति व्रजेदित्यर्थ। एके चात्र योगत्रय मन्यन्ते, तन्मते तु मुस्तप्रभृतिचित्रकान्तैरेको योग, केवलत्रिफलया द्वितीय', बलाप्रभृतिशूरणान्तैस्तृतीय इति ॥६२—६४॥

सम्प्रति नीलाञ्जनशोधनविधिमाह, नीलाञ्जनमिति।—नीलाञ्जन प्रसिद्धम्। अस्य भेद सौवीराञ्जन श्वेतकृष्णवर्णभेदात्। एतस्मादपि सीसकोत्पत्तिर्जायते। जम्बीरद्रवैरिति—जम्बीरफलरसै.। शेष सुगमम् ॥६५॥

गैरिकादिशोधनम्।—

एवं गैरिककाशीश-टङ्कणानि वराटिका।
तौरी शङ्खश्च कङ्कुष्ठं शुल्बमायाति निश्चितम्॥ ६६॥

मनःशिलाशोधनम्।—

पचेत्त्राहमजामूत्रैर्दोलायन्त्रे मनःशिलाम्।
भावयेत् सप्तधा पित्तैरजायाः शुद्धिमृच्छति॥ ६७॥

एवमित्यादि।—एव नीलाञ्जनशोधनप्रकारेणैव गैरिकादयो विशोध्या। गैरिक प्रसिद्ध, गैरिक स्वर्णगैरिकञ्च। काशीशमिति—तच्च द्विविध काशीश पुष्पकाशीशञ्च, काशीश भस्मवदल्पवत्, पुष्पकाशीश तद्वेद किञ्चित् पीत। टङ्कण सौभाग्य-क्षार। वराटिका कपर्दिका। तौरी स्फटिका, "फिट्कारी" शब्दवाच्य तद्वेद। शङ्ख प्रसिद्धम्। कङ्कुष्ठ सुवर्णचोरी, अस्य भेद चोक इति प्रसिद्ध, स च रक्तचोरसेहुण्ड इति प्रतीते। निश्चितमित्यनेनान्यत् शोधनमपि नापेक्षयेत्, यत-स्तन्त्रान्तरेष्वपि नानाप्रकारेण शोधनमस्ति, तस्मादनेनैवात्र शोधनमेतेषा प्रति-पादितम्॥६६॥

अथ मनःशिलाशोधनमाह, पचेदिति।—मनःशिला प्रसिद्धा। दोलायन्त्र-विधानञ्च सम्प्रदायतो लिख्यते, मनःशिला कणश कृत्वा कदलीदले स्थापयित्वा तदनु चतुर्गुणेन वस्त्रेण च पोट्टल बद्ध्वा मूत्रपूरिते भाण्डे विधिवत् स्वेदयेत् यावद्दिनत्रय भवति, दिनत्रयेण रात्रिरपि गच्छत, तस्माद्रात्रावपि स्वेदयेत इत्यभिप्राय एके भावयन्ति, किन्तु दिनत्रयमेव न तु रात्रौ स्वेदन विहितम्, यतो रात्रावहन्यन्ते दग्धादिभयात्, तथा हि—"मुद्गढे कदलीपत्रे वस्त्रखण्डे चतुर्गुणे। तन्मध्ये तान् विनिक्षिप्य बध्नीयाच्च सुपोट्टलीम्॥ चाराम्लमूत्रवर्गेण स्वेदयेच्च दिनत्रयम। तथा स्वेद प्रकर्त्तव्या मज्जयेत पोट्टली यथा॥ भवेन्न च तलस्पर्शा भाण्डस्यापि कदाचन॥" ततो दोलायन्त्रप्रमाणमपि—"द्रवद्रव्येण भाण्डस्य पूरितार्द्धस्य तस्य च। मुखे तिर्य्यक् कृते दण्डे तद्दृश्य सूत्रलम्बितम्॥ स्वदयेत्तन्मध्यमत दोलायन्त्रमिति स्मृतम्॥" इति। भावयेत् सप्तधा पित्तैरिति—तदनु स्वेदिता मनःशिला अजाया, पित्तद्रवे कृत्वा सप्तधा घर्मे भावयेत्। भावनाद्रवस्तु यावद्दृश्य द्रावित भवति, एव शुद्धिमृच्छतीति। एके "चालयेदारनाले वा सर्वयोगेषु योजयेत्" इति पठन्ति व्याख्यानयन्ति च॥६७॥

हरितालशोधनम्।—

तालकं कणशः कृत्वा सचूर्णकाञ्जिके क्षिपेत्।
दोलायन्त्रेण यामैकं ततः कुष्माण्डजैर्द्रवैः॥ ६८॥
तिलतैले पचेत् यामं यामञ्च त्रिफलाजले।
एवं यन्त्रे चतुर्यामं पाचं शुध्यति तालकम्॥ ६९॥

खपरशोधनम्।—

नरमूत्रैश्च गोमूत्रे सप्ताहं रसकं पचेत्।
दोलायन्त्रेण शुद्धिः स्यात्ततः कार्य्येषु योजयेत्॥ ७०॥

सर्वधातूनां सत्त्वपातनम्।—

लाक्षा मौना पयस्याग्रं टङ्कणं मृगशृङ्गकम्।
पिण्याक सर्षपाः शिग्रुर्गुञ्जोर्णागुडमैन्धवाः॥ ७१॥
यवक्षारो घृतं क्षौद्रं यथालाभं विचूर्णयेत्।
एभिर्विमिश्रिताः सर्वे धातवो गाढवह्निना॥
मूषाध्माता प्रजायन्ते मुक्तसत्त्वा न संशयः॥ ७२॥

इदानीं तालकशोधन प्रकटयन्नाह, तालकमिति।—तालकं हरिताल, सचूर्णकाञ्जिके क्षिपेदिति—चूर्णं कणशोभावनिमित्तं, कथम्? यथा क्षौद्रचूर्णयुक्त काञ्जिके भाण्डे क्षिप्ता दोलायन्त्रविधानेन खेदयेत्। दोलायन्त्रविधिस्तु पूर्वं दर्शित एव। तत इत्थनेन यामैकं खेदनं सूचितम्। कुष्माण्डजैर्द्रवैरिति—कुष्माण्ड फलस्य सद्यीरसैः क्वाथैर्वा। त्रिफलाजलैरिति—क्वथितत्रिफलाजलैः। शेषं सुगमम्॥६८।६९॥

अथ रसकशोधन व्याचष्टे, नरमूत्रैरिति।—रसकं खर्परकं, तस्य तुल्यभेदं, नरमूत्रैर्गोमूत्रैश्च पृथक् पचेत् न तु मिलितमूत्रद्वये। नरमूत्रे सप्ताहं यावत् पचेत् दोलायन्त्रेण अथवा गोमूत्रे,—"सप्ताहात् खेदितं शुद्धं रसकं नरवारिणा" इत्यादिवचनात्॥७०॥

अथेदानीं सत्त्वपातेन सत्त्वनिर्गमं प्रकटयन्नाह, लाक्षेति।—लाक्षा प्रसिद्धा। शिग्रुर्शोभाञ्जनचक्रं मूलं वा। गुञ्जाफलानि। ऊर्णा मेषरोमाणि। गुडमैन्धवे

क्षौरकशोधनम्।—

कुलत्थकोद्रवक्काथैर्दोलायन्त्रे विपाचयेत्।
व्याघ्रीकन्दगतं वज्रं त्रिदिनं तत् विशुध्यति ॥ ७३ ॥

प्रसिद्धे। यवतिक्ता सर्पाक्षी। यथालाभमिति—व्यस्त समस्त वा ग्राह्यम्। सर्वे धातव इति—वातग्रहणेन उपधातव उपरसाश्च ग्राह्या, यत —"यल्लोपरि स्थागी (?) ऽग्नि रसे तत सर्वभागने। कर्त्तव्य तत गुणाधिक्याद्रसज्ञैरिति निश्चितम॥" इति। गाढवह्निना कृत्वा मूषायां पातयेत् इति—तेन पातालयन्त्रेण वा यथायोग्य सत्त्वनिर्गम कार्य्येत्यर्थ। तथा हि—"सर्वतुल्यञ्च धात्वाद्यं भूनाग मृत्तिका पुनः। तथा पाषाणचूर्णानि कठिनैरण्डमाषयेत॥ मेलयेन्माक्षिके पञ्च टङ्कादिशतदलके। दृढमध्य वरो कृत्वा कपमावद्य शोषयेत॥ कोटीयन्त्रैर्धमेत वज्रवङ्गारे खादिरोद्भवे॥ विवार यावयेदेव सत्त्व पतति निर्मलम्॥ अथवा ग्रन्थोक्तेन सत्त्वमभ्रकादिषु ज्ञेया कथा॥" कोटीयन्त्र प्रसिद्धमेतत। एतेषा सत्त्वनिर्गम सम्प्रदायतो यथा गुरुसकाश दृष्ट्वा वा कार्य्यो न दोष ॥७१।७२॥

रत्नाना शोधनमारणमभ्याह, तावत्पूर्व वज्रस्य शोधनमाह, कुलत्थेति।—वज्र क्षौरक, तच्चतुर्विध भवति, तथा हि—"श्वेता रक्ता पीता कृष्णाश्चतुर्वर्णा वज्रजातय। रसायने भवेत् विप्र शुभ सिद्धाष्टदायक॥ क्षत्रियो सत्युनिर्द्रक्षो बलीपलितरोगहा। धनप्रदो भवेत् वैश्य पीतो दैन्यस्य दार्ढ्यकृत॥ कृष्ण शूद्रो रुजा हन्ता वपुलभ्य करोति च। पुल्लीनपुसकाख्येते लक्षणेन तु लक्षयेत॥ सुवृत्ता: फलवत्सम्पूर्णलेखावन्ता दृढत्वरा। पुरुषाख्ये समाख्याता रेखाबिन्दुविवर्जिता॥ रेखाबिन्दुसमायुक्ता षडस्राकृता स्त्रिय स्मृता। विकीर्णदृढदीर्घश्च तन्नपुसकमेव च॥ पूर्वपूर्वन्तु ते श्रेष्ठा पुरुषा रसबन्धका। शरीरकान्तिजनका भोगदा वज्रयोषित॥ नपुसकास्त्वल्पयोग्या अकाना सत्त्ववर्जिता। स्त्रिय स्त्रीणा प्रदातव्या क्लीवे क्लीव तथैव च॥ सर्वेषा सर्वदा योज्या पुरुषा बलवत्तरा॥" इति। अन्यत्रापि—"पञ्च दोषा गुणा पञ्च छाया चैव चतुर्विधा। श्वेता रक्ता तथा पीता कृष्णा चैव निगद्यते॥ षट्कोण लघु तोक्ष्णञ्च बहुदृष्टिदलञ्च (?) यत्। जले तरति यत वज्र तत ग्राह्य रसकर्मणि॥" इति। एतस्य शोधनादिकमभ्याह, कुलत्थेत्यादि।—कुलत्थोऽन्नविशेष प्रसिद्ध। कोद्रवोऽप्यन्नविशेष। क्वाथेन कृत्वा दोलायन्त्रे विपाचयेदित्यभिप्राय॥ ७३॥

हीरकमारणम्।—

तप्तं तप्तन्तु तत् वज्रं खरमूत्रैर्निषेचयेत्।
पुनस्तप्त्वा पुनः सेच्यमेवं कुर्य्यात्त्रिसप्तधा ॥ ७४ ॥
मञ्जपैस्तालकं पिष्ट्वा यावद्भवति गोलकम्।
तन्नोले निहितं वज्रं तन्नोलं वह्निना धमेत् ॥ ७५ ॥
निश्चयेटखमूत्रेण तन्नोले च क्षिपेत पुनः।
रुद्ध्वा धमेत पुनः सेच्यमेवं कुर्य्यात्त्रिसप्तधा ॥
एवञ्च म्रियते वज्रं चूर्णं सर्वत्र योजयेत् ॥ ७६ ॥

मतान्तरे हीरकमारणम्।—

हिङ्गुसैन्धवसंयुक्ते क्वाथे कौलत्थजे क्षिपेत्।
तप्तं तप्तं पुनर्वज्रं भूयाच्चूर्णं त्रिसप्तधा ॥ ७७ ॥

मतान्तरे हीरकमारणम्।—

मण्डूकं काञ्यजे पात्रे निगृह्य स्थापयेत् सुधीः।
स भौतो मूत्रयेत्तत्र तन्मूत्रे वज्रमावपेत् ॥
तप्तं तप्तञ्च बहुधा वज्रं यैव मृतिर्भवेत ॥ ७८ ॥

एतस्य मारणमाह तप्तमिति।—दोलायन्त्रस्वेदित तत वज्र पश्चादग्नौ सन्तप्तं कृत्वा तदनु खरमूत्रे निषेचयेत एव त्रिसप्तधा कृत्वा मृत वज्र श्रेष्ठ भवतीत्यर्थ। कैश्चित्तु दोलायन्त्रे स्वेदनम् अहोरात्रेणैव भवति, तथा च तन्त्रान्तरे—"कुलत्थ-कोद्रवक्वाथे दोलायन्त्रेण पाचयेत्। अहोरात्रात समुद्धृत्य हयमूत्रेण भावयेत॥" इति ॥ ७४—७६ ॥

अथाल्पदपि वज्रमारणमाह, हिङ्गुसैन्धवेति।—कुलत्थ प्रसिद्ध, तद्भवे क्वाथे हिङ्गुसैन्धवकल्केन वज्र खिप्ताऽग्नौ सन्ताप्य कुलत्थक्वाथेनैव सेचयेदिति तात्पर्यम् ॥ ७७ ॥

अथाल्पमपि वज्रमारणमाह, मण्डूकमिति।—मण्डूकाना मूत्रविधानमत्र सुबोध ज्ञातव्यम। तत्रादौ वज्रमग्नौ सन्तप्त कृत्वा तत मण्डूकमूत्रे भावयेत सेचयेदित्यर्थ। तप्तं तप्तञ्च बहुधा इति कोऽर्थः? सप्तवार यावत् कुर्य्यादित्यर्थ. ॥ ७८ ॥

वैक्रान्तशोधनम्।—

वैक्रान्तं वज्रवच्छोध्यं नीलं वा लोहितं तथा ॥ ७९ ॥

वैक्रान्तमारणम्।—

घृतमूत्रेण तत् सेच्य तप्तं तप्तं हिमम्बुधा।
ततस्तु मेषदुग्धस्य पञ्चाङ्गगोलके क्षिपेत् ॥ ८० ॥
पुटेन्मूषापुटे रुद्ध्वा कुर्य्यादेवञ्च सप्तधा।
वैक्रान्तं भस्मता याति वज्रस्थाने नियोजयेत् ॥ ८१ ॥

सर्वरत्नानां शोधनम्।—

स्नेदयेद्दोलिकायन्त्रे जयन्त्याः स्वरसेन च।
मणिमुक्ताप्रवालानि यामैकं शोधनं भवेत् ॥ ८२ ॥

सर्वरत्नानां मारणम्।—

कुमार्य्यास्तण्डुलीयेन स्वरसेन च निषेचयेत्।

इदानीं वैक्रान्तशोधनमारणमाह, वैक्रान्तमिति।—वज्रवच्छोध्यमिति—यथा वज्रं पूर्वं शोधितं कृतमित्यादिक्रमेण तथा वैक्रान्तमपि संशोध्य पश्चान्मारयेदित्यभिप्रायः, यतो "वैक्रान्तं वज्रभेदं स्यात्" इति। केषाञ्चिन्मते चतुर्विधं भवति वज्रम्, अत्र द्विविधमेव ग्राह्यं श्रेष्ठत्वात्। घृतमूत्रेणेति।—घृतमूत्रेण घीटकमूत्रेण। तप्तं तप्तमिति कीदृश? तप्ता अग्नौ सन्ताप्य मूत्रे आवर्पादित्यर्थः, एवं चतुर्दशवारं यावत् कुर्य्यात्। ततः पश्चात् वैक्रान्तं मेषदुग्धं मेषदुग्धिका तस्य पञ्चाङ्गं तस्य गोलकं कृत्वा तत्र वैक्रान्तं मेलयित्वा पश्चान्मूषापुटं रुद्ध्वा अग्नौ पचेत्। पञ्चाङ्गं तत्स्वरूपपुष्पफलमूलानि। एवं सप्तधा कृत्वा भस्मता याति। कैश्चित्तु मेषदुग्धस्थेत्यस्य स्थाने "ततश्चोत्तरवाक्येन" इति पठन्ति तस्मात् पञ्चाङ्गं लघु-इन्द्रवारुण्या ग्राह्यं यस्मात्तरदर्शनाच्च, तथा हि—"ततश्चोत्तरवाक्येन पञ्चाङ्गगोलके क्षिपेत्। रुद्ध्वा मूषापुटे पश्चादुद्धृत्य गोलकात् पचेत्॥ क्षिप्त्वा रुद्ध्वा पचेच्चैव सप्तधा भस्मता नयेत्॥" इति। वज्रस्थाने नियोजयेदिति—तत् वैक्रान्तं तस्य कार्य्ये नियोजयेदित्यभिप्रायः, अत एव वैक्रान्तं वज्रवच्छोध्यमिति कथितम्॥ ७९—८१॥

इदानीं प्रवररत्नशोधनमारणमाह, स्नेदयेदिति।—जयन्ती शाकभेदः। मणिमुक्ताप्रवालानीति—मणयो नानाविधाः, ते माणिक्यपुष्परागनीलमाणवैदूर्य्यगारुत्मतप्रभृतयः। मुक्ता मौक्तिकं, साऽपि बहुधा भवति। प्रवालं विद्रुमं, तदपि बहुविधम्।

प्रत्येक सप्तवेलञ्च तप्ततप्तानि क्षालयेत् ॥ ८३ ॥
मौक्तिकानि प्रवालानि तथा रत्नान्यशेषतः।
क्षणात् विविधवर्णानि स्त्रियन्ते नात्र संशयः ॥ ८४ ॥

कुमार्या इति।—कुमारी नारीशब्दवाच्या। तच्छोषा मेघनाद। खल्व चीरम्। तत्र किमुक्तम्? रत्नादीनि पूर्वं दोषायत्त्व नयेत्या खरसेन सप्तवेद यावेक यावत पश्चात् तदग्रो सप्तधा कृत्वा कुमार्याद्रौनामेकतमरसेन भावयेत एव सप्तधा कृत्वा मलानि भवन्तीत्यर्थ। मौक्तिकानीति बहुवचनलेनाष्टप्रकाराणि तेषामुच्यते, तद्यथा —"मेघानामथ शङ्खानां वराहस्य च दन्तिन। मौनज वप्रजञ्चैव फणिज शुक्तिज तथा॥ अष्टौ मुक्ताफलान्येव मदा धारणकर्मणि। गुणयुक्तानि गृह्यन्ते दोषयुक्तानि वर्जयेत्॥" यत — स्थूल वृत्त गुरु स्निग्ध रश्मितारतलान्वितम्। श्वेतमाह्लादक स्वच्छ मुक्तायाश्च गुणा दश॥" इति। प्रवालानीति बहुवचनेनानापि जातिगुणदोषादिक सूचयति, तथा हि—"आतरक्तश्च दीप्तश्च विद्रुम परिमण्डलम। स्निग्धश्च स्वच्छरूपश्च वज्र गुरु सम गुरु॥ षड्गारसदृश पिण्ड प्रवालेऽमी गुणा दश॥ गोर रङ्गलताक्रान्त सूक्ष्म वक्र सकीटरम्। रूक्ष कृष्ण लघु श्वेत प्रवालमशुभ त्यजेत्॥" तथा रत्नान्यशेषत इति—अशेषतोऽपि तज्ज्ञसकाशादवगन्तव्यानि। तेषाञ्च लक्षणानि लिख्यन्ते यथा—"पद्मराग कुरुविन्द सुगन्ध नीलगन्धकम्। माणिक्यञ्चैव विज्ञेय ब्राह्मणादिक्रमेण तु॥ निर्धूम ज्वलदङ्गारनिन्द्रगोपसमप्रभम। गुञ्जारागप्रतीकाश माणिक्य रसकर्मणि॥ चम्पेयकसमो वर्णेर्हेमवर्ण सुनर्मल। आतदीप्तो भवेद्यस्तु पद्मराग स उच्यते॥ स्थूलवृत्तमसृच्छाय भ्राजिष्णु श्वेतमुज्ज्वलम्। गुरु स्निग्ध तथा प्रोक्त रसराजस्य कर्मणि॥ इन्द्रनीलो महानीलो नीलश्च कृष्णनीलक। एते नीलास्तु चत्वारो ब्राह्मणादिक्रमेण तु॥ अतसीपुष्पसङ्काश नीलजीमूतसन्निभम्। य करोति पथो नील महानील तदुच्यते॥ विडालनेत्रसङ्काश नातिगात सुनिर्मलम्। चल लसुनसच्छाय वैदूर्य्य रसकर्मणि॥ विज्ञेयो गरुडाङ्गार कीरपक्षा द्वितीयक। तृतीया वप्रपत्रश्च चतुर्थो धूलिधूसर॥ खद्योतद्युतिसङ्काशा मयूरकण्ठसन्निभ। कामलत्व चतुर्थो सु-प्रशस्त रसकर्मणि॥" इति। किमुक्त बहुना— पञ्च दोषा गुणा पञ्च छाया चैव चतुर्विधा। श्वेता पीता तथा रक्ता कृष्णा चेव निगद्यते॥ सर्वे भानुनिभा दोषा दोषा पटलवर्जिता। निर्जैर्वर्णै समायुक्ता उत्कृष्टा रसकर्मणि॥" इति॥ ८२—८४॥

मतान्तरे सर्वरत्नाना शोधनमारणम् ।—

उक्तमाक्षिकवत् मुक्ता: प्रवालानि च मारयेत् ।
वज्रवत् सर्वरत्नानि शोधयेन्मारयेत्तथा ॥ ८५ ॥

शिलाजतुशोधनम् ।—

शिलाजतु समानीय शोषतप्तशिलाच्युतम् ।

अथ प्रयोगान्तरमाह, उक्तमाक्षिकवादित्यादि ।—पूर्वोक्तस्वर्णमाक्षिकशोधनविधानवत मुक्ताप्रवालानि शोधयेत् । सर्वरत्नानि च वज्रशोधनमारणविधिवत् सम्यक् साधयेदित्यभिप्राय ॥८५॥

अथेदानी शिलाजतुशोधनप्रकार दर्शयन्नाह, शिलाजतित्यादि ।—जतुलाक्षा तत्प्रकाशवत शिलाख्य प्रस्तुत द्रवविशेष शिलाजतुशब्दवाच्य । तन्त्रान्तरेऽपि—"नासि शुक्ले शुचौ चैव शिला सूर्यांशुतापिता । जतुप्रकाश स्वरस शिलाख्य प्रस्रवन्ति हि ॥ शिलाजतिति विख्यात सर्वव्याधिविनाशनम ॥" इति । नन् रूक्षकाठिनाना शिलाना कथ स्निग्धद्रव स्वरस सम्भवति ? सत्यम, अत्र शिलोपलक्षितत्वात * तत्तद्धातव एव प्रस्रवन्ति, तथा चोक्त—"शैलस्य धातो स्वरस शिलाख्य सूर्यप्रतापाज्जतुसम्प्रकाशम । कृष्ण भवेन्मूत्रसमानगन्ध तदद्रवस्यन्तु शिलाजतु स्यात ॥" इति । मतान्तरेऽपि—'हैमाद्या सूर्यसन्तप्ता स्रवन्ति गिरिधातव । जलाभ मृदु मृत्स्नाच्छ यन्मल तच्छिलाजतु ॥" (च० चि० करप्रचितौषरसा०) इति । तन्त्रान्तरेऽपि प्रसिद्धमेतत, तद्यथा—"तप्तादीनान्तु (?) लोहाना षष्ठामन्यतमान्वयम । शैल श्वगन्धतश्चापि षड्योनिग्रथित चितौ ॥" इति । यत,—"लोहाद्भवति तत यस्माच्छिलाजतु जतुप्रभम । तस्य लोहस्य यत बीर्य रस वाऽपि बिभर्त्ति तत ॥" इति । प्रसङ्गतोऽपि चतुष्टय यथा—"हस्तो वै रजतात तास्रात तथा स्वादयसादपि । गोमूत्रगन्धि सर्वेषा यथापूर्वमनुत्तमम ॥" इति । अन्यत्रापुक्त—"वपुषीसायसादीनि प्रधानान्युत्तरोत्तरम् । यथा तथा प्रयोगेऽपि श्रेष्ठा श्रेष्ठगुणा स्मृता ॥" इति । चतुर्णामपि मुख्याना प्रस्रव शिलाजतुचतुष्टयमल गुणख्यापनाय चान्ययोनिवारणाय भवतीति । समालोयेति—अत्र सम्यक्-ग्रहण श्रेष्ठत्वग्रहणनिमित्तमवगन्तव्यम । कथमस्य श्रेष्ठत्वमित्याह कथित—"तेषु कृष्ण मल स्निग्ध लघु नि शर्कर भवेत । गोमूत्रगन्धवच्चापि

---

* अत्र चक्रपाणि,—"हैमादिशब्देनेह हैमादिसम्भवस्थानभूतशिला उच्यते, यतो न साक्षात् सुवर्णादिभ्य एव शिलाजतु भवति" इति ।

गोदुग्धैस्त्रिफलाक्वाथैर्भृङ्गद्रावैश्च मर्दयेत्॥
आतपे दिनमेकैक * तच्छुद्ध शुद्धता व्रजेत्॥ ८६॥

मतान्तर शिलाजतुशोधनम्।—

मुख्या शिलाजतुशिला सूक्ष्मखण्डप्रकल्पिताम्।
निक्षिप्यालुप्तपात्रोदे यामैक स्थापयेत् सुधी॥ ८७॥
मर्दयित्वा ततो नीरं गृह्णीयात् वस्त्रगालितम्।
स्थापयित्वा च मृत्पात्रे धारयेदातपे बुध.॥ ८८॥

तत् प्रधान प्रचक्षते॥" इति। ग्रीष्मतप्तशिलाद्भुतमिति—यद्यप्यन्यस्मिन् काले शिलाजतुप्रस्रव दृश्यते तथाऽपि ग्रीष्मे खरतरकिरणतापितात्र शिलाभ्यो गुणवत्तर भवति। गोदुग्धैरित्यादिबहुवचनान्त कृत्वा बहुवार भावयेदित्यभिप्राय। भृङ्गो माकव "घमरा" इति लोके। अत्र भाव्यसमानक्वथनीय द्रव्य ग्राह्यम्। क्वथनीय-द्रव्यसप्तगुणे जले निक्षिप्य चतुर्भागावशिष्टे कषाये भावयेत्। तच्छुद्ध शुद्धता व्रजेदिति—ननु पूर्व यच्छुद्ध स्यात् तत कथ पश्चाच्छुद्धता व्रजेदिति, अत्र शुद्धशब्दार्थ किमयम्? उच्यत—पूर्व शिलाजतुपिण्ड शुद्धादिना सशोध्य पश्चादनेन विधिना शोधयेदित्यदोष, तथा हि—"दुष्टौषधीकीटपतङ्गदग्ध-सल्लालिकादोषनिवारणार्थम्। लोढाढकौ निस्वगडुचिसर्पिर्यवैर्यथावत् परिधूपयच्च॥" इति। पूर्वशोधनमेवात्र सवसतम्॥ ८६॥

अथान्यकरणप्रकारमाह मुख्या शिलाजतुशिलामिति।—मुख्या पूर्व दर्शिता तज्जातिषु श्रेष्ठा। शिलाजतुशिलामिति—शिलाजतो शिलावत सघनपिण्ड सङ्गृह्य पश्चात् पूर्वोक्तविधिना सशोध्य तदन् सूक्ष्मखण्ड यथा स्यात् प्रकल्प्य अलुप्त-पात्रोदे प्रक्षिप्य यामैक यावत स्थापयेत्। सुधीरिति—सङ्केत सुधीरिति गृहणमत्र मुकरणविधानार्थ यतोऽत्र करण कालादिकमपेक्षते, यथोक्तम्—"अथोषाकाल रविरातपयुक्तो व्यक्ते दिवाने समभूमिभागे। पात्रेषु कृष्णायसनिर्मितेषु विधानवद्वाथवत् पचेत्तु॥' कथम्? यथा—"शिलाजतु श्रेष्ठमवाप्य पात्रे प्रक्षिप्य तस्मादिगुणञ्च तोयम। उष्ण तदर्धे मृदमत्र दत्त्वा विशोषयत्तन्मृदित यथावत्॥ ततस्तु यत कृष्णमुपैति चाह्ने विलीयमान रविरश्मितप्तम्। तत काचपात्रेऽम्बुतमे विधाय तत्रापर कोष्णजल क्षिपेत्तु॥ पुनश्च तस्मादपरन्तु पात्रादुद्धाच्च पात्राद-

* "तच्छुद्धम्" इत्यत्र "तच्छुष्कम्' इति पाठान्तर सङ्गतम्।

उपरिस्थं घनं यत् स्यात्तत् क्षिपेदन्यपात्रके।
धारयेदातपे तस्मादुपरिस्थं घनं नयेत्॥ ८९॥
एवं पुनः पुनर्नीत्वा द्विमासाभ्यां शिलाजतु।
भूयात् कार्य्यक्षमं वङ्गौ क्षिप्तं लिङ्गोपमं भवेत्॥ ९०॥
निर्धूमञ्च ततः शुद्धं सर्वकर्मसु योजयेत्।
अध स्थितञ्च यच्छेषं तस्मिन्नीरं विनिक्षिपेत्॥
विमर्द्य धारयेत घर्मे पूर्ववच्चैव तन्नयेत्॥ ९१॥

मण्डूरशोधनम्।—

अच्चाङ्गारैर्धमेत् किट्टं लोहजं तत् गवां जलैः।
सेचयेत्तप्ततप्तञ्च सप्तवार पुनः पुनः॥ ९२॥

परन्तु भूय। पुनस्ततोऽर्द्धन्तु (?) निधाय क्षण यदुद्धृत तत पुनराहरेच्च॥ यदा विशुद्ध जलमच्छमर्द्ध (?) प्रच्छन्नभावात् मलयेत्तु तस्मात्। तदा त्यजेत तस्मिन्मल (?) शिलाजत् स्याज्जलमथडमेवम्॥" इति। भूयात् कार्य्यक्षममिति—अनेन प्रकारेण यश्चिलाजत् खेड शुद्ध कृत तत सर्वकार्य्येषु योजयेदित्यभिप्राय, तथा हि—"शुद्ध भावितयुक्तन्तु विधिनाऽनेन मानव। शिलाजतु प्रयुञ्जान सवरोगै प्रमुच्यते॥" इति। वङ्गौ क्षिप्तमिति—एव सस्कारितस्याश्च श्रेष्ठत्व तदा स्यात् यदाऽग्नौ क्षिप्ते सति निर्धूम भवति, लिङ्गोपमञ्च भवति, तथा हि—"वङ्गौ क्षिप्तन्तु निर्धूम यच्च लिङ्गोपम भवेत्। शुद्ध योज्य समुद्दिष्ट हारीताद्यैर्महर्षिभि॥" इति॥ ८७—९१॥

अथ मण्डूरकरणविधानमाह, अचेति।—अच्चाङ्गारैरिति बहुवचनलेनान्यकाष्ठोद्भवैरपि धमेदिति न दोष। किट्ट लोहमल तत बहुवार्षिक ग्राह्य श्रेष्ठत्वात्, तथा हि—"शतोर्द्धमुत्तम किट्ट मध्यमाशीतिवार्षिकम्। अधम षष्टिवर्षोर्ध्व ततो हीन विषोपमम॥" इति। लोहजमिति सामान्यलोहग्रहणेन मुण्डादिसमस्तलोहसम्भव ज्ञातव्य, तद्गुणमपि च, यत,—"यानि लोहानि यत्सङ्गा-लक्षणानि गुणानि च। मण्डूर तद्गुण दृष्ट यल्लोहमाप यद्गुणम्॥" अत एव—"किट्टाद्गुणगुण मुण्ड मुण्डात् तीक्ष्ण शतोन्मितम्" इत्यादि। अन्यच्च—"ये गुणा मारिते मुण्डे ते गुणा मुण्डकिट्टके। तस्मात सर्वैव मण्डूर रोगशान्तौ नियोजयेत॥" इति। गवां जलैर्गोमूत्रै। तथा च निर्वाप्य बहुशो मूत्रै सेचयेदिति, एव सप्तवार कुर्य्यात्।

चूर्णयित्वा ततः क्वाथैर्द्विगुणैस्त्रिफलाभवैः।
आलोड्य भर्जयेत् वह्नौ मण्डूरं जायते वरम् ॥ ९३ ॥

चारप्रस्तुतविधि।—

चारवृक्षस्य काष्ठानि शुष्काण्यग्नौ प्रदीपयेत्।
नीत्वा तद्भस्म मृत्पात्रे क्षिप्त्वा नीरे चतुर्गुणे ॥ ९४ ॥
विमथ्य धारयेद्रात्रौ प्रातरच्छं जलं नयेत्।
तन्नीरं क्वाथयेत् वह्नौ यावत् सर्वं विशुष्यति ॥ ९५ ॥
ततः पात्रात् समुल्लिख्य क्षारो ग्राह्यः सितप्रभः।
चूर्णाभ. प्रतिमाद्येः स्यात् पेय. स्यात् क्वाथवत् स्थित' ॥
इति क्षारद्वय धीमान् युक्तकार्येषु योजयेत् ॥ ९६ ॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां मध्यखण्डे चिकित्सितस्थाने धातुशोधनमारणाधिकारो नाम द्वादशोऽध्याय ॥ १२ ॥

पुन पुनरिति ग्रहणेनात्र सप्तवार नियतं किन्तु यावत् शोष्यते तावन्निर्वापयेदित्यभिप्राय, तथा चोक्त—"लोहकिट्टं सुमन्दाग्नौ यावत् तप्तं शोष्यते स्वयम्। तच्छोषं याहयेत्तेषा मण्डूरन्तु प्रयोजयेत्॥" इति, एव सप्तवार कृत्यात। त्रिफलाक्वाथस्य द्विगुणतोऽत्र। मण्डूरं जायते वरमिति—श्रेष्ठ, शुष्कताऽस्याञ्जनसादृश्यात् भवति ॥ ९२।९३ ॥

अथ क्षारकल्पना दर्शयितुमाह, क्षारवृक्षस्येति।—क्षारवृक्षोऽत्र शुष्काक: कथित, स च पवतज "नोरव" इति लोके। कैश्चित् सामान्यग्रहणेनान्ये क्षारवृक्षा अपि गृह्यन्ते इत्याह, तद्यथा—"कुटजपलाशार्कक्षपाटभद्रविभीतकारग्वधतिलकाकक्षद्रपामार्गपाटलानक्तमालवषकटलौचिल्लकपूतीकेन्द्रवृक्षाम्लातास्फोतारक्षसप्तच्छदाग्रमन्थगृञ्जाश्वतवश कोशातकी समूलफलपत्रशाखा दहेत" (सु० सू० ११५०) इति। काष्ठानीति बहुवचनेनात्र क्षारवृक्षस्य काष्ठानि बहून् खण्डान् कृत्वा अवपाद्य दहेदित्यभिप्राय, तथा तत्रान्तर—"तत्रिकीर्षुः शरदि गिरिसानुज शुचिरुपोष्य प्रशस्तेऽहनि प्रशस्तदेशजातमनुपहत मध्यमवयस मङ्गल्यसितसुकुसुमधिवासापरेद्यु, पाटयित्वा खण्डश प्रकल्प्यावपाद्य निवातदेशे निचितं कृत्वा तिलनालैरादीपयेत्। अथोपशान्तेऽग्नौ तद्भस्म पृथक् गृह्णीयात्" (सु० सू०

त्रयोदशोऽध्यायः ।

रसगन्धकशोधनमारणाधिकारः ।—

पारदप्रशंसा ।—

पारद सर्वरोगाणा जेता पुष्टिकर स्मृतः ।
* सुदिने साधित कुर्य्यात् संसिद्धिं देहलोहयोः ॥ १ ॥

११ अ०) इति । चूर्णाभ प्रतिसार्य्य इति—प्रतिसार्य्य प्रतिसारणीय । य क्वाथवत स्थित स पेय पानीय इतिभङ्ग, एव चारस्य वैविध्य भवति इति । युक्तकार्य्येषु युक्त्याधिषु यथायोग्य शोधयदित्यर्थ । युक्तव्याधिषु यथा—"तत्र प्रतिसारणीय: कुष्ठकिटिभदद्रुमण्डलकिलासभगन्दरार्बुदार्शोदुष्टव्रणनाडीचर्मकीलतिलकालकन्यच्छ-व्यङ्गनखकवाल्पविद्रधिक्रमिविषादिषूपदिश्यते, समस्तु च मुखरोगेषूपालम्भाऽधिलिङ्गोप-कुशदलवेटभेषु तिसृषु च राहिणीषु, एतेषु चैवानुशस्त्रप्रणिधानमुक्तम । पानीयस्तु गरगुल्मोदरानाहशूलाजीर्णारोचकानाहश्वकरोऽश्मर्य्यामत्यन्तविद्रधिक्रमिविषार्श सूप-युज्यते" (सु० सू० ११ अ०) इति । पानीय पानार्ह, चारोदकमित्यर्थ । ये चान्येऽपि पाक्यस्नाज्यक्षारा यथायोग्य वक्तव्यास्तेषा चूर्णवटकावलेहादिषु प्रयोग कर्त्तव्य । शोभनमिति ग्रहण चारकर्मणि चतुरो भिषक् तथा प्रयतेत न यथा चारोऽगुणो भवति, तद्यथा—"नेवातितीक्ष्णो न मृदु शुक्ल स्निग्धोऽथ पिच्छिल' । अभिष्यन्दी शिव शीघ्र चारो लृष्टगुण स्मृत ॥" (सु० सू० ११ अ०) इति । दोषाश्चास्य यथा—"अत्यौष्ण्यमतिपैच्छिल्यमतितीक्ष्णविसार्पता । अत्यर्थ मार्दवं शैत्यमत्यर्थं सान्द्रमेव च ॥ न्यूनौषधविपक्वत्व चारदोषा नव स्मृता ॥" इति ॥ ९४—९६ ॥

इति श्रीवाग्भट्याम्नायप्रकाशवैद्यश्रीभावमिश्रात्मजेनाढमल्लेन विरचितायां
आङ्गधरदीपिकायां मध्यखण्डे चिकित्सितस्थाने
धातुशोधनमारणाधिकारो नाम द्वादशोऽध्याय ॥ १२ ॥

अथेदानीं रसप्रशंसापूर्वक तच्छोधनमारणादिकमाह, पारद इति ।—सव-सिद्धो पार ददातीति पारद, अत एव रसप्रशंसायामुक्त—"तेजो मृगाङ्कमौलेः सोढ स्वेनैव तेजसा पुरुषै । अजरामरत्वचिंतरणकल्पतरु तं रसेश्वर वन्दे ॥"

---

* "सुदिने" इत्यत्र "सुस्नेन" इति पाठान्तरम् ।

पारदपर्य्याया ।—

रसेन्द्रः पारदः सूतो हरजः सूतको रसः।
बुधैस्तस्येति नामानि ज्ञेयानि रसकर्मसु ॥ २ ॥

अपरमपि—"अणिमाद्यष्टगुणैर्विभूतिदोष न संसारमपारपारदम्। (१) मुक्तैक रसराज भूतले कोऽन्योऽधास्ते जरापहाऽपर ? ॥" इति। दृढत्व पारद सुदिने साधित: स च देहलाहथो सिद्धि कुर्य्यादिति तात्पर्य्यार्थ। देहसिद्धिर्व्याधिहरत्वेन शरीरारोग्यता, लोहसिद्धिश्च स्वर्णरजतकरणादिक्ष। पुन कीदृशो रस ? सर्वरोगाणा जेता सर्वे च त रोगा शरीरमनोऽभिपन्ना ज्वरमदमूर्च्छादय, तेषा जेता विनाशकर इत्यर्थ। पुन किम्भूतो रस ? पुष्टिकर इति—पुष्टिधातुपोषण ता करोति इति पुष्टिकर, अत एव पाषणाद्दालीकरणशक्त्या अयमपि विख्यात। सुदिने इति—शोभनदिवसे, ज्योति शास्त्रोक्तसौम्यतिथिनक्षत्रादियुक्ते दिने इत्यर्थ, तथा चोक्त—"नत्वा गुरु भैरवकन्यकावटु हिपालन सिद्धसमुच्चरितम्। अत्र सुशील बहिकज्जल रस निवेशयेत खल्वतले शुभे दिने ॥" अन्यत्राप्युक्त—"विजने पवनादिवर्जिते वा दृशे सौम्यदिने दिनादिकाले। बलिमत्र विधाय पूजनञ्च तदनुविधि प्रतिमन्त्रित विधिज्ञ ॥" इति। साधित सात—परिमाणादिकेन सस्कारित, तद्यथा—"रसो ग्राह्य सुनक्षत्रे पलाना शतमात्रकम्। पञ्चाशत् पञ्चविंशद्वा दश पञ्चकमेव वा॥ पलान्यून न कर्त्तव्य रससस्कारमुत्तमम्॥ तस्मात् सूतविशुद्ध्यर्थं सद्भावैर्निपुणैर्युत। सर्वोपस्कारमादाय रसकर्म समाचरेत ॥" इत्यादि। ससिद्धि मिति—ऽदृढिकोनामूर्ध्विकोच्च, उक्तञ्च यत,—"बद्ध खेचरता पट नयद्धरते व्याधिसमूह मूर्च्छित। जारितो जन्मजराविनाशन क्रामितो रञ्जितो मुक्तिमुक्तिद.॥ यदि पञ्चत्वगत हि सूतक भवित स्यादमरत्वकारकम्। जलौकाकारनिबद्ध सर्वजो ग्रथितो मन्मथरसदायक ॥ भस्माकाकारगत गिरीशजलमिश्रित भूचरभूतिसिद्धिदम्। भारापारमपारपारद तस्मात् क करुणाकरोऽपर ? ॥" इति। देहलोहयोरिति—देह शरीर तस्य सिद्धिर्जराव्याधिराहित्य, लोह सुवर्णादि तस्य सिद्धि सस्कारत्वम्, अत्र विस्तरभयान्न लिखितम् ॥ १ ॥

इदानी रसराजस्य पर्य्यायनामान्याह रसेन्द्र इति।—रसेन्द्रेत्यादिरसान्तानि

* गूढार्थदीपिकायते "बुधैस्तस्येति" इत्यत्र "मुकुन्दस्येति" इति पाठ.। "मुकु शोच ददातीति मुकुन्द." इति तत्र व्याख्या।

नवविधधातूना नवग्रहसञ्ज्ञकत्वम्।—

ताम्रतारारनागाश्च हेमवङ्गौ च तीक्ष्णकम्।
कास्यक वृत्तलोहश्च धातवो नव ये स्मृता॥
सूर्य्यादीना ग्रहाणा ते कथिता नामभिः क्रमात्॥ ३॥

पारदशोधनम्।—

राजीरसोनमूषाया रस क्षिप्त्वा विवन्धयेत्।
वस्त्रेण दोलिकायन्त्रे स्वेदयेत् कार्ष्णिकेक्षुग्रहम्॥ ४॥

पारदस्य नामानि रसकर्मसु ज्ञेयानि। के? बुधै। तस्येति—रसस्य। इति-यद्यपि सङ्क्षेपनामान्यभिहितानि, अन्यान्यपि सन्ति विस्तरेण तथा हि—"रसो महारस सूतस्त्रिनेत्रश्च विलोचन। हरबीजश्चलश्चैव बीजेन्द्रोऽथ रसायन॥ पारदश्च सुवर्णाख्यो महावाङ्गलश्चैव च। लोकेश खेचरो दिव्य सौभाग्य परमामृत॥ अग्नि-हेमनिधिश्चैव अनन्तो ज्ञानमेव च। सूक्ष्म शान्त प्रभुश्चैव कलिकालकर स्मृत॥ एतानि रसनामानि तथाऽन्यानि शिवे यथा॥" इति॥ २॥

पूर्वं हेमलोहयोरिति यल्लोहयुग्मं, तेषा लोहाना नवग्रहनामाङ्कितत्वेन नवसङ्ख्याकथनमाह, ताम्रेति।—ताम्रादयो नवसङ्ख्या धातवो मता, ते सूर्य्यादीना नवग्रहाणा नामभि कृत्वा क्रमात कथिता। एतेन किम उक्तम्? ताम्र-मादित्यसञ्ज्ञ, तार रौप्य सोमसञ्ज्ञम, आर पीतलोह तत मङ्गलसञ्ज्ञ, नाग सीसक तत् बुधसञ्ज्ञ, हेम सुवर्ण तत बृहस्पतिसञ्ज्ञ, वङ्ग शुक्रसञ्ज्ञ,तीक्ष्णकमय तत शनिसञ्ज्ञ काष्ण राहुसञ्ज्ञ, वृत्तलोह केतुसञ्ज्ञामिति क्रम। एते धातवो नवग्रहनामभिर्नीता. ॥ ३॥

इदानी रसशोधनकमाह, राजीति।—राजीरसोनेत्यादिना प्रथमत स्वेदनसस्कारविधिरारभ्यते, यतो भूयास सस्कारा सन्ति, ते के इत्याह—"मस्वेदन मर्दनमूर्च्छने च उत्थापन पातनबोधने च। नियामन दीपनमेव चाष्टौ पूर्वं कृता कर्मणि सूतकस्य॥" इति। अन्यत्राप्यक्तम्—"अष्टौ च रसमस्कारा द्रव्ये रसायने मता। एते प्रथम कार्य्या पश्चात् सवत्र योजयेत॥" रसादिति रसशोधनकर्म यत् पूर्वमुक्त तत कर्मशब्द उप-स्कारादीन् प्रशसयति, यत,—"सर्वोपस्कारमादाय रसकर्म समाचरत" इत्यादि-वचनम्। तथा हि—"उपस्कार न यो वेत्ति तस्य सिद्धि कथ भवेत्?" इत्यपि। तस्मादुपस्कारापि कतिपयानि लिख्यन्ते, तद्यथा—तुलाभाजन, तच्च द्विविध—तुला

दिनैकं मर्दयेत् सूतं कुमारीसम्भवैर्द्रवैः।
तथा चित्रकजै. क्वाथैर्मर्दयेदेकवासरम् ॥ ५ ॥

घटकक्षेति। खल्लभाजन तच्च त्रिविध—पाषाणखल्ल लौहखल्ल तासखल्लञ्च। कण्डनी, सा च द्विविधा—शिलाकण्डनी, पाषाणकण्डनी च। विचित्रखर्पराणि। तासादीना भाजनानि सन्त्यज्ञानि च। कोष्ठिका सा च त्रिविधा—ज्वालकोष्ठिका, खर्परकोष्ठिका, मृत्तिकोष्ठिका चेति। भस्त्रिका, सा च त्रिविधा—चर्मभस्त्रिका, कर्परभस्त्रिका, मुखभस्त्रिका चेति। नलिका, सा च द्विविधा—नलिका वज्रनलिका चेति, नलिका लौहमयी वज्रनलिका सुन्मयी। मूषा, सा च द्विविधा—पक्वा अपक्वा च, अपक्वाया भेदो वज्रमूषा या कृष्णकारेण मृत्तिकया कृता सा पक्वमूषा, तयोर्भेदा यथा—मूषा, गोलना, अन्धमूषा, नलिकामूषा, सम्पुटीमूषा, ढोलीमूषा इष्टिकामूषा चारमूषा, मेत्रवाटिलवणमूषा, खर्परमूषा, कोकिलाख्यमूषा, हेमतारतासलोहसीसकमूषादय। खण्डियन्त्र, स द्विविध,—पवनखण्डियन्त्र, काकमुखखण्डियन्त्रमिति। इत्यकुठकनिघातादय सर्वाणि सुवर्णकारोपस्कराणि च। पुट, तच्चतुर्विध—तुषपुट, करीषपुटम् उपलपुट, खदिरादिकाष्ठपुटश्चेति। यन्त्राणि च, तद्यथा—शिलायन्त्र, पाषाणयन्त्र मूषरयन्त्र, वज्रनलिकायन्त्र, गजदन्तभाजनयन्त्र दोलायन्त्रम् अधःपातनयन्त्रम् ऊर्द्धपातनयन्त्र तिर्यामकयन्त्र डमरुकयन्त्र, कटाहयन्त्र, काचभाजनयन्त्र, पातालयन्त्र, तुलायन्त्र कच्छपयन्त्र, चक्रयन्त्र, चाकीयन्त्र, वालुकायन्त्रम्, अग्निजोनियन्त्र, गन्धकटङ्किकायन्त्र, मूषायन्त्र वाणयन्त्र गरुडयन्त्र सारणयन्त्र जालिकायन्त्र, धारणयन्त्रादीनि अन्यान्यपि यथायोग्य भवन्ति तत्र तत्र एव ज्ञातव्यानि। तत्र आदौ स्वेदनावधिमाह "राजीरसोनमूषाया रस चिक्षा विनिक्षिपेत्" इत्यादिव्याख्यानं सम्प्रदायतो लिख्यते, यथा—राजीकादिकल्केन मूषा कृत्वा तत्र रस मेलयित्वा उपरि कदलीदलैर्वेष्टयित्वा तदुपरि चतुर्गुणेन वस्त्रेण पोट्टल बद्ध्वा काञ्जिकादिपूरिते भाण्डे दोलायन्त्रविधानेन स्वेदयेत् यावद्दिनत्रय भवति, दिनत्रयेण वाक्षिरपि गल्लते, तनाद्वारात्र स्वेदयेदित्यभिप्राय। एतदपि विधान तन्त्रान्तरे चोक्त, तद्यथा—"राजिका लवण हिङ्गु चित्रक व्योषसयुतम। सूतपादमित सर्वं खर्जिका चारसयुतम् ॥ शिग्रुपत्ररसेनैव पिष्ट कुण्डलिकाकृतम्। कुर्य्यात् मूर्जदले सम्यगथवा कदलीदले ॥ सुपक्के च दृढे वाऽपि वस्त्रखण्डे चतुर्गुणे। रस मध्ये विनिक्षिप्य वल्मीयासु सुरोद्दलीम् ॥ चारान्तमूत्रवर्गेण स्वेदयेच्च दिनत्रयम्। तथा खेद, प्रकर्त्तव्यो

काकमाचीरसैस्तद्वद्दिनमेकञ्च मर्दयेत्।
त्रिफलायास्तथा क्वाथे रसो मर्द्यः प्रयत्नतः ॥ ६ ॥
ततस्तेभ्यः पृथक् कुर्य्यात् सूत प्रक्षाल्य काञ्जिकैः।
ततः क्षिप्त्वा रसं खल्ले रसादर्द्धांशसैन्धवम् ॥ ७ ॥
मर्दयेन्निम्बुकरसैर्दिनमेकमनारतम्।
ततो राजी रसोनस्य मुख्यस्य नवसादरः ॥ ८ ॥

मज्जिता पोट्टली यथा ॥ भवेच्च तत्समर्थो भाण्डस्यापि कदाचन ॥" इति। दोलायन्त्रप्रमाणं—"द्रवद्रव्येण भाण्डस्य पूरितार्द्धस्य तस्य च। मुखं तिर्य्यक्कृते दण्डे रसं सूत्रेण लम्बितम्। तं स्वेदयेन्मध्यगतं दोलायन्त्रमिति स्मृतम् ॥" अथ प्रत्येकसंस्कारान्ते मर्दनमुक्त्वा, तत्र कस्य दशयत्राह, दिनैकं मर्दयेत् सूत कुमारीस्वरसैर्द्रवैरित्यादि।—एतेषां वक्ष्यमाणद्रव्याणां द्रवैः क्वाथैः खल्ले सूतं मर्दयेत् तेन प्रत्येकरसेन कृत्वा दिनैकं मर्दयेदित्यर्थः। कुमारी प्रसिद्धा। चित्रक श्चित्रकजटा। काकमाची "काकैया" शब्दवाच्या। त्रिफलाया हरीतक्यादिकम्। एभिर्यत्नपूर्वकं मर्दयित्वा पश्चात् काञ्जिकैः प्रक्षाल्य शोधयेदित्यर्थः, काञ्जिकैरिति बहुवचनत्वेन जलेन तक्रेण वा क्षालनीयम् तथा च तन्त्रान्तरे—"भवेद्दोलैकसंस्कार प्रान्तेषु दृढमर्दनम्। मार्दवं स्थापयेत् घर्मे यावच्छुष्कतरो भवेत् ॥ तक्रेण काञ्जिकेनाथ शुक्तेनोष्णोदकेन वा। ततः सर्वं समानीय क्षालयेदिति बुद्धिमान् ॥ तथा यत्न प्रकुर्वीत यथा न क्षीयते रसः ॥" इति। अथ स्वेदनसंस्कारमभिधाय मर्दनसंस्कार दर्शयत्राह, तत क्षिप्त्वा रसं खल्ले रसादर्द्धांशसैन्धवमित्यादि।—तत इति—स्वेदनपूर्वकमर्दनानन्तर त रसं खल्ले क्षिप्त्वा मर्दयेदिति, किं कृत्वा वक्ष्यमाणसैन्धवप्रमुखद्रव्ये, एतन्मर्दन तत्रखल्लाभिहितमिति सम्प्रदायः, तथा हि—'युक्त सूतस्य सर्वस्य तत्रखल्ल विमर्दनम्। अज्ञानकृत् तथाग्निश्च भृगर्भे वितय क्षिपेत् ॥ तस्योपरि स्थित खल्ल तत्रखल्लमिद भवत् ॥" इति। "अथवा तीव्रघर्मे च कारयेच्च प्रमर्दनम्" इति सम्प्रदायः। अनारतमात्— अनालस्य यथा भवति तथा मर्दयेदिति भावः। अनारतग्रहणेनापि अन्यान्यहितद्रव्यैरपि मर्दनीय न दोषो ग्रन्थान्तरे दर्शनात्, तथा हि—"चारास्लवर्गसूर्वादिविषेरुपविषैस्तथा। दिव्यौषधिसमूहैश्च मर्दयाद्दृढसंयम ॥" अनुक्तानामपि मर्दनीयद्रव्याणाञ्च परिमाण ग्रन्थान्तरादवगन्तव्यम्, तद्यथा—'पारदस्य कलाशत मेषजैन प्रमर्दयेत्। द्रवेण यावता सर्वं द्रुत भवति मर्दनम् ॥ इति। इदानीं मर्दन

एतै रसममैस्तद्वत् सूतो मर्द्यस्तुषाम्बुना।
ततः सशोष्य चक्राभं कृत्वा लिप्त्वा च हिङ्गुना ॥ ९ ॥
हिंस्रालोमसमृद्धे धृत्वा पूरयेल्लवणेन च।
अधः स्थाल्यां ततो मृद्वा दद्याद्दृढतरा बुधः ॥ १० ॥

संस्काराद्यनन्तर मूर्च्छनसंस्कारविधिमाह, ततो राज्ञी रसोनसेत्यादि।—तत इति—मर्दनसंस्काराद्यनन्तरम्। राज्ञी राजिका। रसोन "लसुन" इति प्रसिद्ध। मूल्यस्य नवसादरयुक्तिकालवण मूल्य येषां यान्य इत्यर्थ। तस्य येषता पैंगानीशब्दवाच्या प्रसिद्धा। तद्वदिति—मर्दनोक्तप्रकारेण मर्दयेत्। तुषाम्बुनेति—काञ्जिकेन क्वाथेन चालन स्वेदनञ्च पूर्ववत् कार्यं रसमूर्च्छनोत्थापनान्तं यतो मूर्च्छनानन्तरमुत्थापनमपि कार्यमिति सर्वत्र, तथा हि—"दोलास्वेद प्रकुर्वीत मधुचाराम्लमूत्रकै। उत्थाप्य मूर्च्छयेत् पश्चात् त्रिवारञ्च पुनः पुनः ॥" इति। अथवा—"तत खल्लेन तेनैव श्लक्ष्णीकृत्यापयेद्रसम। चारा मूत्रकरा सर्वे सर्वे चाम्ला प्रबोधका ॥" इति। मूर्च्छनोत्थापनविधिमभिधाय सम्प्रति पातनाह्याह, ततः सशोष्य चक्राभमित्यादि।—तत इति—मूर्च्छनोत्थापनानन्तरम्। सशोष्येति—एके सशोष्येत्यनेन मूर्च्छितमेव रस चक्राभ कृत्वा पातयेदिति व्याख्यानयन्ति, तन्न बहुसम्मतत्वेन मूर्च्छितमुत्थापन कृत्वा पश्चात्कृत्वे सह पिष्टिका कृत्वा चक्रिका कृत्यादित्यभिप्राय। अन्यवाप्यक—"भागास्त्रयो रसस्याक-चूर्णपादांशसयुतम। दत्त्वाऽम्ल मर्दयेत् तावत् यावत् पिष्टि प्रजायते ॥ यदा न जायते पिष्टि किञ्चित्तुल्य तदा क्षिपेत ॥" इति सर्वत्र। पिष्टीकृतरसचक्री हिङ्गुना लिप्त्वा धार्या। हिङ्गुनाऽपि षोडशांश पारदपरिमाणात्। हिंस्रालोमसमृद्धेति विख्यातम। लवणपूरण सम्प्रदायदर्शनात् बोद्धव्यम। दृढतरा मृदामिति—मृदाऽव सम्प्रदायिकी कार्या, यथा गुरुसकाशाद्दा दृष्टा तथा। अथवा—सहदीना स्वापनार्थं सदाऽभ्यक्ता मृदा अव लिप्यन्ते तथा च—"वल्मीकमृत्तिकागार-पूरण लोहकिट्टकम। श्वेतपाषाणकल्कैव तत सर्वं चूर्णयेत् समम ॥ सवतुल्य तुष दत्त्वा सर्वं तोयैर्विमर्दयेत। मृषादिसम्पट कृत्वात् सर्वसन्धिप्रलेपने ॥" अथवा—"तुष भागद्वय यान्य भागैक वस्त्रखण्डकम। स्वदशगुणी भाग जलं दत्त्वा प्रमर्दयेत ॥ तत्रैकं शुष्क किञ्चित दत्त्वा तावत् प्रकुट्टयेत्। यावत् सिक्थसमाभासं सत्पिण्ड जायते तदा ॥ यथा न मुञ्चता याति

विशोष्याग्निं विधायाधो निषिञ्चेदम्बुनोपरि।
ततस्तु कुर्य्यात्तीव्राग्निं तदध प्रहरत्रयम् ॥ ११ ॥
एवं निपातयेदूर्द्धं रसो दोषविवर्जितः।
अधोर्द्धपिठरीमध्ये लग्नो ग्राह्यो रसोत्तमः ॥ १२ ॥

तथा यत्न समाचरेत। एव सप्तदिनादूर्द्धं मृद यौगे प्रयोजयेत ॥ कूपिकादि विलेपार्थं यत्नार्थञ्च भिषक् क्रमात ॥" अपरमपि—"हरीतकीटङ्कणपर्णचूर्णं खरी गुड पाशुपट्टं समाशम्। वल्मीकमृत सर्वसमा तदर्द्धं वस्त्र तथा गोमयकस्य सर्वम ॥ जलेन मर्द्यं मृदनोपम तत यन्त्रादिसन्धौ विनिवेशनीयम् ॥" इति। अपराण्यपि —"लोहकिट्ट तप दग्ध शुक्तिचूर्णञ्च कर्करा। एतानि समभागानि तावद्भागेन मृत्तिका ॥ कर्पटेन समायुक्ता सा हि वज्रोपमा भवेत ॥" "दग्धतुषस्यैकभागो मृङ्गाग-त्रयमेव च। कपट श्लक्ष्णमयुक्त वज्रमत्येति योजयेत ॥ इष्टकाचूर्णभागैक समभागा तु मृत्तिका। मूषावन्त्र प्रकर्त्तव्यो घमनात वज्रता व्रजेत ॥" "भागैक लोहकिट्टस्य तुषदग्धस्य तथा। मृङ्गागचयमयुक्त किञ्चित कृत्य प्रदापयेत ॥ एकत्र कुट्टयेत सर्वं मृत्तिका वज्रवद्भवेत ॥" निषिञ्चेदम्बुनोपरि इति—उपरि अम्बुना निषिञ्चेदिति. कोऽर्थ ? तत स्थालीसम्पुटयन्त्र चुल्ल्या निधाय अग्नि प्रज्वाल्य तदुपरि शीत जलं पुन पुन चिपेदित्यभिप्राय। सजलवस्त्रखण्डमपि तदुपरि धार्य्यमिति मन्मदाय। अन्यत्रापुक्त—"मरुच्य भाण्डहयगर्भमध्ये पिष्टौ तत सम्पटमत्रण तम। निवेश्य चल्लान्त अने प्रदीप-प्रमाणमस्थायतले विदध्यात ॥ आय शिरस्यस्य जलार्द्रमेक वस्त्र चिपेदल्पमनुष्णमेव ॥" इति। दोषविवर्जित इति यत् ग्रहणं कृत, तत् सर्वदोषरहित पारद एभि पञ्चभि सस्कारोपायैरेव भवतीत्यस्याभिप्राय, तस्मात पञ्चैव सस्कारा अनेनात्र स्वीकृता। के ते दोषा ? तथा हि—"मल विष वह्निगुरुत्वचापल नैसर्गिक दोषमुशन्ति तज्ज्ञा। उपाधिकौ द्वौ वपुनागसम्भवौ रसेन्द्रराजे कथयन्ति वैद्या ॥" ननु पातनत्रयेणैव नागवङ्गकृतदोषो विनष्टो भवति नान्ये, तथा हि —"निश्चितौ चेद्रसे नाग-वङ्गौ विक्रयहेतुना। स्यात्ताभ्या क्रमिणो दोषस्तन्मात्र पातनत्रयात् ॥" इति। तत कथमत्र पञ्चभिरेव सर्वदोषविवर्जितो भवति ? सत्यम, ऊर्द्धपातनान्तर्गतमधस्थित्यक्पातनसज्ञीति तस्याभिप्राय, तत पातनत्रय तन्त्रान्तराद्व-गन्तव्यम्। अथवा—"अधोर्द्धपिठरीमध्ये लग्नो ग्राह्यो रसोत्तम" इत्यत्र अध-शब्देनात्रशिष्टसस्कारा गृह्यन्ते, ते च पातनगोधननियामनाख्या इत्यदोष। अथ

गन्धकशोधनम्।—

लोहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत्।
तप्ते घृते तत्समानं क्षिपेद्गन्धकजं रजः॥ १३॥

केषाञ्चित् ज्ञापनार्थं प्रसङ्गेन पातनत्रयमाह ऊर्ध्वपातनमधश्च कथितम्। अथ पातनं तिर्यक्पातनञ्च दर्शयन्नाह, तथा च तन्त्रान्तरे—"कटाहं मृतं कृत्वा तस्याधो लेपयेद्रसम्। द्विगुणेन च गन्धेन जारयेत् ब्रह्मकाष्ठया॥ वस्त्रान्तानि मृदा लिप्त्वा जलं स्थाल्युपरि न्यसेत्। स्थालीकटाहयो सान्धं लेपयेत् सुदृढं मृदा॥ कटाहोपरि कर्तव्यमुपलाग्निप्रदीपनम्। जलमध्ये रसो याति शुद्धं तिष्ठति ब्रह्मणे॥ गुल्लाद्रसो रसात् ताम्र पातनेयं पृथक् कृतम्। मृतभाण्डखटने मन्थमिलति (?) भाण्डकम्। तथा मन्थिद्वयो कार्य्य पातनत्रययन्त्रके॥ जलस्थाने काञ्जिकञ्च दापयेन्नात्र संशय॥" इति। तिर्यक्पातनमप्याह तथा हि—"घटे रसं विनिक्षिप्य सजलं घटमन्थकम्। तिर्यङ्मुखं द्वयो कृत्वात् तन्मुखं रोधयेत् सुधी॥ रसाधो ज्वं लयेदग्नं यावत् सूतो जलं विशेत्। तिर्यक्पातनमित्युक्तं सिद्धैर्नागार्जुनादिभिः॥" इति। अथापराण्यपि प्रसङ्गतो लिख्यन्ते तथा हि—"स्थूलसैन्धवपोट्टलिं कार्य मूषापुटद्वयम्। स्थापयित्वा रसं तत्र नवसारं कलाञ्चकम्॥ सन्धिं निरुध्य यत्नेन वेष्टयेत् कपटं मृदा। स्थापयेद्भूधरे यन्त्रे वह्निं कुर्याद्दिनत्रयम्॥ यन्त्रादुद्धृत्य सूतं तं स्वेदयेत् तदनन्तरम्। बीजपूरफलं वाऽथ द्वन्द्वं सत्यज्य कारयेत्॥ मैन्धवेन समं सूतं तत्र मध्ये विनिक्षिपेत्। स्वेदयेद्दोलिकायन्त्रे ह्यस्तवर्गे दिनत्रयम्॥ एवं ह्यग्निसहो जातो रसेन्द्रः सर्वकर्मसु॥" इति नियामकम्। अथ बोधनमाह—"अथ सूतं समुद्धृत्य काचकूप्यां विनिक्षिपेत्। शुक्लाम्लेनाथ सम्पूर्य हारे मुद्रां प्रदापयेत्॥ स्थापयेद्भूधरे यन्त्रे स्वेदयद्दिनसप्तकम्। स्वाङ्गशीतं समुद्धृत्य कषाये स्वेदयेत् पुनः॥ कर्कोटीकच्छकोशाङ्गं सपाच्यस्वजनाकवैः। दिनत्रयं सारनाले स्वेदयच्छुद्ध्यशान्तये॥" इति बोधनम्। अथ दीपनमाह—"लवणं राजिकाक्षिङ्गं कन्यासारकटुत्रयम्। वृषणं लसुनञ्चैव मातुलुङ्गरसाप्लुतम्॥ पिण्डमध्ये रसं कृत्वा स्वेदयेत् सप्तधा पुनः। अनुद्गारो भवेत्तेन यामाज्जीर्णेऽपि जीर्यति॥ अनेनैव भवेच्छुद्धं सर्वं दोषविवर्जितं॥" अथवा—"कीरतुण्डगरुडौ ऋषिच्छटा कन्यका कुमारिका च वायसी। आसुरी च विजया तथा तथा वह्निदीपनकराश्च सूतके॥" इत्यष्टौ संस्काराः सङ्क्षेपेणोक्ताः॥ ४—१२॥

इदानीं गन्धकशोधनं दर्शयन्नाह, लोहपात्रे इति।—गन्धकज रज इति—गन्धा-

विद्रुत गन्धकं ज्ञात्वा दुग्धमध्ये विनि क्षिपेत्।
एव गन्धकशुद्धिः स्यात् सर्वकार्य्येषु योजयेत् ॥ १४ ॥

हिङ्गुलशोधनम्।—

मेषीक्षीरेण दरदमल्लवर्गैश्च भावितम्।
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितम् ॥ १५ ॥

हिङ्गुलात रसाकर्षणविधि।—

निम्बूरसैर्निम्बपत्र-रसैर्वा याममात्रकम्।

स्यात गन्धक तदुयथा—"श्वेतद्वीपे पुरा टेव्या क्रीडत्या प्रस्तृत रज'। क्षीरार्णवे तु स्नाताया दुकूल रजसाऽन्वितम ॥ धौत यत मथित वस्त्र गन्धवद्गन्धक स्मृतम ॥ चतुर्द्धा गन्धक प्रोक्तो रक्त पीतोऽसित सित। रक्तो हेमाक्षयासूक्त पीतश्चैव रसायने ॥ व्रणादिलेपने श्वेत श्रेष्ठ कृष्ण सुदुर्लभ ॥" "एव गन्धकशुद्धि स्यात सर्वकर्मसु योजयेत" इति—एवमिति ग्रहणेन शोधनान्तरमपि दर्शित, तत ग्रन्थान्तरादवगन्तव्यम, यथा—"क्षीरेण भाण्डमापूर्य्य वस्त्रणावेष्य तन्मुखम्। वस्त्रमध्ये क्षिपेत गन्धमुख यत्नात पिधापयेत ॥ अरावेण ततो वह्नि प्रज्वाल्योद्वमवस्थितम्। भाण्डके निपतेत यावत गन्धस्तावत मन्थयेत ॥ क्षणानौ तु स्वय नीते गन्धकन्तु समुद्धरेत ॥" इति ॥ १३।१४॥

इदानीं दरदशोधनमाह, मेषीक्षीरेणेति।—मेषी अवि। अस्लवर्गैश्चेति—"जम्बीरमातुलुङ्गाद्यैरम्लवर्गगणो मत" इति। अम्लवर्गैश्चेत्यत्र चकारग्रहणेनान्यत् शोधनमनुमीयते, तथा च—"शुद्ध स्याद्दरद सप्त-क्रत्वो खाद्याम्लभावित'। मल-दोषादिक नास्ति सर्वकार्य्येषु योजयेत ॥" इति। अस्य जात्यादिकञ्च लिख्यते केषा ञ्चित् सुबोधार्थम, यथा—"रसगन्धकसम्भूत हिङ्गुल प्रोच्यते बुधै। तस्मात् नृतच्च यत् ग्राह्य सर्वदोषविवर्जितम् ॥ दरदस्त्रिविधो ज्ञेयश्चमार शुकतुण्डक। हसपाद-स्त्रीय स्यात गुणवानुत्तरोत्तरम ॥ हसपादच तत्राद्य तारकर्मणि योजयेत। तत् हेमकिट्टसङ्काश तदन्यस्त्रीप्रसाधने ॥ चर्मार कृष्णवर्ण स्यात सपीत शुकतुण्डक। सत्त्वपाते च तत् प्रोक्त शोध्यमौरभदुग्धके ॥" तथा च—"जवाकुसुमसङ्काशो हसपादो महोत्तम। रसायने सर्वलोह-मारणे रसरञ्जने ॥" इति ॥ १५ ॥

अथ दरदात् रसाकृष्टिर्भवति तामपि दर्शयन्नाह, निम्बूरसैरिति।—निम्बूरसनिम्बपत्ररसमान भावनायुक्तिवत् बोद्धव्यम्। केचित्तु निम्बूरसै निम्बपत्र-रसैरित्यस्य स्थाने जम्बीरै पारिभद्ररसैरिति पठन्ति व्याख्यानयन्ति च ग्रन्थान्तर-

पिष्ट्वा दरदमूर्ङ्च पातयेत् सूतयुक्तिवत् ॥
तत. गुडरस तस्मान्नीत्वा कार्य्येषु योजयेत् ॥ १६ ॥

गुडरसस्य मुखकरणविधि ।—

कालकूटो वत्सनाभ' शृङ्गिकश्च प्रदीपन' ।
हालाहलो ब्रह्मपुत्रो हारिद्र' सक्तुकस्तथा ॥
सौराष्ट्रक इति प्रोक्ता विषभेदा अमी नव ॥ १७ ॥
अर्कसेहुण्डधुस्तूर-लाङ्गलीकरवीरकम् ।
गुञ्जाऽहिफेनावित्येता' सप्तोपविषजातय: ॥ १८ ॥
एतैर्विमर्दित: सूतस्ङ्खनपत्त्व' प्रजायते ।
मुखञ्च जायते तस्य धातूञ्च ग्रसते क्षणात् ॥ १९ ॥

दर्शनात, तथा हि—"पारिभद्ररसे पेष्य हिङ्गुल यामनावकम्। लम्बीराणा द्रवैर्वाऽथ पात्य पातनयन्त्रके ॥" इति। अत्र पारिभद्र "फलइदा" शब्दवाच्यो न तु निम्बकण्टकपालाच इत्यपरे। पातयेत् सूतयुक्तिवदिति—सूतयुक्ति पूर्वं कथिता, सा पातनयन्त्राधिकृता भवति ॥ १६ ॥

अथ रसमुखकरणमाह, कालकूट इति।—कालकूटप्रभृतिको विषभेद तत्परीक्षकमकाशादवगन्तव्य। किञ्चिल्लक्षणमपि लिख्यते यथा—"घनं रुचञ्च कठिन भिन्नाञ्जनसमप्रभम्। कन्दाकार समाख्यात कालकूट महाविषम् ॥ वत्सनाभ पाण्डुरञ्च किञ्चिद्रूक्ष घन तथा। घन गुरु च निबिड शृङ्गाकारञ्च शृङ्गिकम् ॥ प्रदीपन शिखिशिखा कारञ्च गुरु चिक्कणम। चक्राकार भवेत् वक्र नील हालाहल मतम् ॥ ब्रह्मपुत्र पाण्डुर स्यात् हरिद्राभ हारिद्रकम्। चिवमुत्पलकन्दाभ सक्तुक शक्तवद्वत् ॥ सौराष्ट्रक शुद्धवर्ण विज्ञेय विषलक्षणम् ॥" इति। एतेषा मध्ये एकविंशिकलानि यथालाभ सङ्गृह्य रसस्य षोडशांशेन कृत्वा मर्दनीयानि, षोडशांशताऽत्र एकस्यैवेत्यर्थ। उपविषेषु लाङ्गली कलिकारिका। अहिफेनमिति—अहिफेन विषसत्त्वसमुद्भवमिति ज्ञेयम, तथा हि—"समुद्रे चैव जायन्ते विषसत्त्वान्यतोऽधिका। तेभ्य फेन समुत्पन्नमहिफेन चतुर्विधम ॥ केचिदाहु सर्पाणा फेन स्यादहिफेनकम्॥" यथा—"धारण श्वेतवर्णञ्च रक्तवर्णञ्च नारकम्। सारञ्च पीतवर्णञ्च कृष्णवर्णञ्च मारणम् ॥ विषवद्युक्तम फेन युज्यते रसकर्मणि ॥" इति।

मतान्तरे शुद्धरसस्य सुखकरणविधि ।—

अथवा कटुकक्षारौ राजी लवणपञ्चकम् ।
रसोनो नवसारश्च शिग्रुश्चैकत्र चूर्णितैः ॥ २० ॥
समांशैः पारदाटेतैर्जम्बीरेण द्रवेण वा ।
निम्बूतोयैः काञ्जिकैर्वा सोष्णखल्वे विमर्दयेत् ॥
अहोरात्रत्रयेण स्याद्रसे धातुचरं सुखम् ॥ २१ ॥

मतान्तरे शुद्धरसस्य सुखकरणविधि ।—

अथवा विन्दुलीकोटे रसो मर्द्यस्त्रिवासरम् ।
लवणास्त्रैर्मुखं तस्य जायते * धातुहृत्त्वरा ॥ २२ ॥

गन्धकजारणम् ।—

अथ कच्छपयन्त्रेण गन्धजारणमुच्यते ।
मृत्कुण्डे निक्षिपेत्तोयं तन्मध्ये च शरावकम् ॥ २३ ॥

केचित्तु खाखसज चीरविशेषमिति मन्यन्ते तदभावात्। एव सर्वत्र। शेष सुगमम्। मानमप्येतेषां पूर्ववत् ॥ १७—१९ ॥

अन्यदपि सुखकरणमाह, अथवेति।—कटुकक्षारावितिकटक त्रिकटुकम्। क्षारौ यवक्षारप्रभृतिक। लवणपञ्चक प्रसिद्धम्। रसोन इति—लशुन। नवसार-शूलिकालवण। शिग्रु शोभाञ्जनम्। एतत सकल समभावेन कृत्वा पारदसाम्य ग्राह्यम्। शेष सुगमम्। धातुचरमिति कोऽर्थ ? धातुग्रसनार्थमिति भाव ॥ २०।२१ ॥

अपरमपि सुखकर दर्शयितुमाह, अथवेति।—एभिर्वक्ष्यमाणद्रव्यैस्त्रिदिन मर्द्य रसो यदा भवति तदा तस्य त्वरा शीघ्र धातुहृत सुवर्णादिधातुग्रहणसमर्थं सुख भवति। विन्दुलीति—कोटविशेष, स च षड्विन्दुरिति प्रसिद्ध, तथा हि—"षड्विन्दुकस्य कोटस्य श्वेता स्यु पञ्चविन्दव। भिन्नवर्णस्तथा चैक सान्तरश्चेति-वर्णत ॥" इति। लवणास्त्रैरिति—लवण पञ्चलवणम्, अम्लोऽम्लवर्ग, स च जम्बीरमातुलुङ्गप्रभृतिक ॥ २२ ॥

इदानी गन्धकजारणनिमित्त कर्म दर्शयन्नाह, अथेति।—अथशब्दोऽत्र सुख

* "धातुघस्मरम्" इति पाठान्तरम्।

महत् कुण्डपिधानाभं मध्ये मेखलया युतम्।
लिप्त्वा च मेखलामध्य चूर्णेनात्र रसं क्षिपेत् ॥ २४ ॥
रसस्योपरि गन्धस्य रजो दद्यात् समाशकम्।
दत्त्वोपरि शरावञ्च भस्ममुद्रा प्रदापयेत् ॥ २५ ॥
तस्यापरि पुटं दद्याच्चतुर्भिर्गोमयोपलैः।
एव पुन पुनर्गन्ध षड्गुणं जारयेद्बुधः ॥
गन्धे जीर्णे भवेत् सूतस्तीक्ष्णाग्नि सर्वकर्मसु ॥ २६ ॥

पारदमारणम्।—

धूमसारं रस तोरीं गन्धकं नवमादरम्।
यामैक मर्दयेदम्लैर्भाग कृत्वा समाशकम् ॥ २७ ॥

कारणान्तरव्याप्यक। कच्छपयन्त्र प्रसिद्ध, तत्स्वरूप दर्शितमेव। तत्परिमाण यथा—"प्रसृतगोपलोन्मान सूतकोत्थलक क्षुत (१)। लावक पुटको ज्ञेय प्रदत्त समधाटके ॥ कच्छपस्त्रिगुणैस्तेषु कौक्कुट कच्छपेस्त्रिभि। कौक्कुटे पञ्चभि स्त्रिद्वा मेघनादोऽथ यूथके ॥ दर्ग गजपुट ख्यातो ज्ञेय षष्टिकपालके। तैस्तु त्रिगुणितैर्ज्ञेयो दृढाग्निश्च महापुट ॥" इति। चर्णेनेति—शुक्तिकाचूर्णेन। समाशकमिति—रससाम्य गन्धक योज्यम्, साम्यताऽत्र प्रत्येकपुटसिद्धयर्थ, तेन षड्गुणगन्धक षट्पुट कृत्वा भवति पारदपरिमाणात्। भस्ममुद्रामिति—विभूतिपाशुलवणाभ्या कृतामिति सम्प्रदाय। शरावमेव लोहमय मन्यन्त केचित्, तथा क्षुक्त—"जलपूर्ण दृढ पात्र मृत्तिकाभि समाहरेत्। तदन्त खर्पर दद्यात् मृत्तिकीर्ण दृढ नवम्॥ बिन्दु दत्त्वा तदुपरि बीजपूररस क्षिपेत्। उपरिष्टात् बिड दद्यात् ततो लोहकटोरिकाम्॥ अयस्कान्तमयो वाऽपि पैत्तलो मूर्तवित्रहम्। उपरिष्टादधोवक्त्रा दत्त्वा सम्यक् विलेपयेत्॥ खटीपुट ग्रिवीभक्त सम्यङ्निष्पिष्य मुद्रयेत्। ऊह ज्ञेय पुट तस्य यन्त्र कच्छपसज्ञकम्॥ जारणार्थं रसस्योक्त गन्धादीनामशेषत॥" इति। अत्र गन्धकविधानन्तु अस्यैव सम्प्रदायतो व्याख्यातम्। अन्यत्र—रसस्योपरि चाधस्येति। तीक्ष्णाग्निरिति—अत्यर्थं बुभुक्षितो भवति, राक्षससज्ञक इत्यपर। सर्वकर्मास्विति, योज्य इत्यभिप्राय ॥ २३—२६॥

सम्प्रति रसमारणविधिमाह, धूमसारमिति।—धूमसार गृहधूमम्। रसं

काचकूप्या विनिक्षिप्य ताञ्च मृद्वग्निमुद्रया।
विलिप्य परितो वक्त्रे मुद्रा दत्त्वा च शोषयेत् ॥ २८ ॥
अधःसच्छिद्रपिठरी-मध्ये कूपीं निवेशयेत्।
पिठरीं बालुकापूरैर्भृत्वा चाकूपिकागलम् ॥ २९ ॥
निवेश्य चुल्ल्या तदधः कुर्य्याद्दीप्तिं शनैः शनैः।
तस्मादप्यधिकं किञ्चित् पावकं ज्वालयेत् क्रमात् ॥ ३० ॥
एवं द्वादशभिर्यामैर्म्रियते सूतकोत्तमः।
स्फोटयेत् खाङ्गशीतं तमूर्द्धगं गन्धकं त्यजेत् ॥
अधःस्थं मृतसूतञ्च सर्वकर्मसु योजयेत् ॥ ३१ ॥

मतान्तरे पारदमारणम्।—

अपामार्गस्य बीजानां मूषायुग्मं प्रकल्पयेत्।

पारदम्। * तोरी स्फटिका। नवसादरं प्रसिद्धम्। अङ्गैरिति—अम्बीरनिम्बुकारमैरित्यर्थः। समांशकं भागमिति—एतेन किमुक्तम? पूर्वोक्तं सकलद्रव्यं प्रत्येकं रसमानं मेलयेदिति क्रम इति भावः तथा ह्युक्तं—"पृथक् समं समं कृत्वा पारदं गन्धकं तथा। नवसारं धूमसारं स्फटिकं यामभावकम॥ निम्बुनीरेण सम्मर्द्य काचकूप्या विपाचयेत्। मुखे पाषाणखटिकां दत्त्वा मुद्रां प्रदापयेत्॥ सप्तभिर्मृत्तिकावस्त्रैः पृथक् शोष्य वेष्टयेत्। सच्छिद्रायां भुवि स्थाप्या कूपिका मध्यनिवेशयेत्॥ पूरयेत् भिक्षतापूरैरागलं मतिमान् भिषक्। निवेश्य चुल्ल्यां दृढेन मन्दमध्यखरक्रमात्॥ प्रज्वाल्य द्वादश यामं खाङ्गशीतं समुद्धरेत्। स्फोटयित्वाऽथ यत्नेन च ऊर्द्धलग्नं बलिं त्यजेत्॥ अधःस्थं रससिन्दूरं सर्वकर्मसु योजयेत्॥" इति। केचित्तु धूमसारस्थाने शोषकं पठन्ति तच्च सङ्गतं तन्त्रान्तरदर्शनात्—"पृथक् पृथक् समं कृत्वा पारदं गन्धकं तथा। नवसारं स्फटिकञ्च सनागं यामभावकम॥ निम्बुनीरेण सम्मर्द्य काचकूप्यां विनिक्षिपेत्। बुधस्य बालुकायन्त्रे यामद्वादशकं पचेत्॥ खाङ्गशीतं स्फोटयित्वा ऊर्द्धलग्नं बलिं त्यजेत्। अधःस्थं रससिन्दूरं योजयेद्रसकर्मणि॥" इति। शेषं सुबोधम्॥ २७—३१॥

---

* "तोरी गुर्जरदेशोद्भवा स्फटिका, या रक्तवर्णा भवति" इति गु० दी०।

तत्सम्पुटे न्यसेत् सूत मलपूदुग्धमिश्रितम् ॥ ३२ ॥
द्रोणपुष्पीप्रसूनानि विडङ्गमिरिमेदक ।
एतच्चूर्णमधोर्द्वंच दत्त्वा मुद्रा प्रदीयते ॥ ३३ ॥
त गोल सन्धयेत् सम्यक् मृन्मूषासम्पुटे सुधीः ।
मुद्रा दत्त्वा शोषयित्वा ततो गजपुटे पचेत् ॥
एवमेकपुटेनैव जायते भस्म सूतकम् ॥ ३४ ॥

मतान्तरे पारदमारणम् ।—

काष्ठोडुम्बरिकादुग्धे रस किञ्चित् विमर्दयेत् ।
तद्दुग्धघृष्टहिङ्गोश्च मूषायुग्म प्रकल्पयेत् ॥ ३५ ॥
चिप्ता तत्सम्पुटे सूत तत्र मुद्रा प्रदापयेत् ।
कृत्वा त गोलक प्राज्ञो मृन्मूषासम्पटेऽन्धयेत् ॥
पचेत् मृदुपुटेनैव सूतको याति भस्मताम् ॥ ३६ ॥

अन्यदपि रसमारणमाह, अपामार्गेऽपेति।—अपामार्ग प्रसिद्ध, तस्य बीजानि जलेन पिष्ट्वा सम्पुटाकारा मूषा कार्या, तत्सम्पुटमध्ये सूत पारद मलपूदुग्धमर्दन कृत्वा न्यसेत् धारयेदित्यर्थ । मलपू काष्ठोडम्बरिका। पश्चादुक्तद्रव्यचूर्ण तदुपरि अर्धस्य दत्त्वा सन्धय मृन्मूषाया मुद्रयेत। द्रोणपुष्पी "नहुल" इति प्रसिद्धा, "गूमा" शब्दवाच्या इति लोके, तस्या प्रसूनानि पुष्पाणि। विडङ्ग प्रसिद्धम् इति इरिमेदकौ विट्खदिर, तस्य लक यात्रा। त गोल सन्धयेदिति—त रसादि-जनितगोलक सम्यगवरोधयेत् मूषायाम् ॥ ३२—३४ ॥

अन्यदपि रसमारण प्रकटयन्नाह, काष्ठोडुम्बरिकादुग्धेरिति।—काष्ठोडुम्बरिका "कुडुम्बरि" शब्दवाच्या। तद्दुग्धघृष्टहिङ्गोश्चेति—काष्ठोडुम्बरिकादुग्धेनैव हिङ्ग ग्राह्य तेन मूषा कृत्वा तन्मध्ये रस मेलयित्वा सर्वं गोलक कृत्वा पश्चात् मृन्मयमूषायाम् अन्धयेत् अवरोधयेदित्यर्थ । मृदुपुटेनैवेति—लघुगजपुटेनैवेत्यर्थ ; लघुगजपुटलक्षण तन्मात्तरेऽभिहितम्, तद्यथा—"निपुणविहितगर्त षोडशैरङ्गुलैर्यो मितसकलविभागस्तस्य मध्ये निधाय। ज्वलनमतिविशुष्कैर्गोमये पारदस्य लघुगजपुटमेतत् प्रोक्तमेव मुनीन्द्रै ॥" ३५।३६ ॥

मतान्तरे पारदमारणम्।—

नागवल्लीरसैर्घृष्टः कर्कोटीकन्दगर्भितः।
मृन्मूषासम्पुटे पक्वः सूतो याल्येव भस्मताम् ॥ ३७ ॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां मध्यखण्डे चिकित्सितस्थाने रसगन्धकशोधनमारणाधिकारो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः।

रसकल्पना।—

सर्वज्वरे ज्वराङ्कुशरसः।—

खण्डितं हरिणं शृङ्गं ज्वालामुख्या रसैः समम्।
कृत्वा भाण्डे पचेच्चुल्ल्या यामयुग्मं ततो नयेत् ॥ १ ॥

अपरमपि पारदमारणं दर्शयन्नाह, नागवल्लीति।—नागवल्ली ताम्बूलवल्ली, तस्या पत्ररसेन घृष्टो मर्दितः पारदः कर्कोटीकन्दगर्भितः सन् मृन्मूषासम्पुटे निरुध्य गजपुटे पचेत्। कर्कोटी वन्ध्याकर्कोटकीवल्ली, तस्याः कन्दम्। शेषं सुबोधम् ॥ ३७ ॥

इति श्रीवाक्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां मध्यखण्डे चिकित्सितस्थाने रसगन्धकशोधन-मारणाधिकारो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

इदानीं मिश्ररसानामध्यायं प्रकटयन्नाह, तत्रादौ ज्वराङ्कुशनामरसं व्याचष्टे, खण्डितमिति।—हरिणस्येदं हारिणं शृङ्गं विषाणं तच्च खण्डितं शकलीकृतं, सङ्कुचमित्यर्थः। ज्वालामुख्या रसैरिति—ज्वालामुखी जयन्ती तस्या पत्राणां स्वरसः, सा ज्वालामुखी चतुर्धा भवति, तथा हि—"शुक्ला पीता तथा रक्ता कृष्णा ज्वालामुखी भवेत्" इति, लोके "खसिनि" शब्दवाच्या। केचित्तु ज्वालामुखीत्यनेन भल्लातकमिति व्याख्यानयन्ति, तन्न सर्वसम्मतम्। समांशत्वं समशब्दो मिलितार्थे वर्त्तते इति केचित्, न तु समसमत्वं साम्यं, यतः सम्प्रदायेष्वपि

अष्टाशं त्रिकटुं दद्यान्निष्कमात्रञ्च भक्षयेत्।
नागवल्लीरसे सार्द्धं वातपित्तज्वरापहम् ॥ २ ॥
अथ ज्वराङ्कुशो नाम रसः सर्वज्वरापहः।
ऐकाहिक द्व्याहिकञ्च त्र्याहिकं वा न संशयः ॥ ३ ॥

विषमज्वरे * ज्वरारिरस ।—

पारदं रसकं तालं तुल्यं टङ्कणगन्धके।
सर्वमेतत् समं शुद्धं कारवेल्लीरसैर्दिनम् ॥ ४ ॥
मर्दयेल्लेपयेत्तेन ताम्रपात्रोदरं भिषक्।
अङ्गुल्यर्द्धप्रमाणेन ततो रुद्ध्वा च तन्मुखम् ॥ ५ ॥
पचेत्तं बालुकायन्त्रे क्षिप्त्वा धान्यानि तन्मुखे।
यदा स्फुटन्ति धान्यानि तदा सिद्धं विनिर्दिशेत ॥ ६ ॥
ततो नयेत् स्वाङ्गशीत ताम्रपात्रोदरान्भिषक्।
रसं ज्वरारिनामानं विचूर्ण्य मरिचैः समम् ॥ ७ ॥
माषैकं पर्णखण्डेन भक्षयेन्नाशयेज्ज्वरम्।
त्रिदिनैर्विषमं तीव्रमेकाह्नित्रितुर्यकम् ॥ ८ ॥

ज्वालामुख्या रसे क्षिप्त्वा सगन्धं बहुशो भावयित्वा कारवेदित्यभिप्राय, यदुक्तम्—"अमर्दयावित शुद्धं हारिणं कुटितं रसैः। ज्वालामुख्या पचेद्भाण्डे गतं तत्र भक्षं चूर्णयेत्॥" इत्यादि। अष्टांशं त्रिकटुं दद्यादिति—शुद्धभागात् मिलितकटुत्रयस्य। सर्वज्वरापहः इत्यनेन सन्निपातजनितमपि नाशयेत ॥ १—३ ॥

अथ ज्वरारिरसविवरणमाह, पारदमिति।—अत्र रसक खर्परकम। तालं हरितालम्। तुल्यं प्रसिद्धम। टङ्कण सौभाग्यक्षारम। एके "तुल्यं टङ्कणगन्धके" इत्यत्र "तुल्यक गन्धक कथा" इति पठन्ति, तत्र कथा मनःशिला, एतत् बहुस्थानेषु न प्रचरति, अन्यतो दर्शनात्, "रसश्च रसक ताल शिखितुण्डश्च टङ्कणम। गन्धकश्च समं पिष्ट्वा कारवेल्ला रसैर्दिनम्॥" इत्यादि। कारवेल्ली "करेला" शब्दवाच्या। इत्थपरिपाट्याश्च पूर्वोक्त सकलद्रव्य समभाग सङ्कृत्य कारवेल्लीपत्ररसेन विवार रस सम्मर्द्य तत्कल्केन ताम्रपात्रोदरमङ्गुलाद्धप्रमाण प्रलिप्य हण्डिकामध्येऽधोमुख

* रसेन्द्रे अस्य शीतभङ्गो रस इति संज्ञा।

विषमज्वरे शीतज्वरारिरस ।—

तालक तुत्थकं ताम्रं रस गन्ध मन'शिलाम्।
कर्षं कर्षं प्रयोक्तव्यं मर्दयेत्त्रिफलाम्बभिः ॥ ९ ॥
गोल न्यसेत् सम्पुटके पुटं दद्यात् प्रयत्नतः।
ततो नीत्वाऽर्कदुग्धेन वज्रीदुग्धेन सप्तधा ॥ १० ॥
दन्त्या क्वाथेन श्यामाया भावयेत् सप्तधा पुनः।
माषमात्रं रसं दिव्यं पञ्चाशन्मरिचैर्युतम् ॥ ११ ॥
गुड गव्याणकञ्चैव तुलसीदलयुग्मकम्।
भक्षयेत्त्रिदिनं भक्त्या शीतारिर्दुर्लभ' परः ॥ १२ ॥

सम्पाद्य मुद्रा कृत्वा तदनु बालुकायन्त्रे पचेत यावत्तदुपरि क्षेपेण स्फटन्ति। अङ्गुलमङ्गुष्ठोदरमध्यम्। माषमानमत्र विषमतीव्रज्वरनिमित्तम् अन्यत्राल्पमिति, तथा हि—"रसो ज्वरारि सिद्धोऽयं द्विगुञ्जो वातजे ज्वरे। दातव्य पणखण्डेन तत्क्षणान्नाशयेज्ज्वरम्॥" इति ॥ ४—८ ॥

इदानी शीतज्वरारि प्रकटयन्नाह, तालकमिति।—तालक हरितालम। ताम्रमिति—यद्वतास्रभस्म। रस पारदम। गन्ध गन्धकम्। कर्षमिति द्विरुक्तेन प्रत्येक कर्षप्रमाणमित्यर्थ। त्रिफलाम्बभिरिति—त्रिफला हरीतक्यादिक तथा क्वाथेनेत्यर्थ। पुट दद्यादिति—सकलद्रव्यचूर्ण त्रिफलाक्वाथेन सम्मर्द्य गोलक कृत्वा तदनु शरावसम्पटे धृत्वा तदुपरि मृत्तिका लिप्त्वा गजपुटे पचेदित्यर्थ। प्रयत्नत इति—गुरुमकाग्नात् दृष्टकमनेपुण्यात्। पश्चात् त रस शरावाभ्यन्तरात् सङ्गृह्य अर्कदुग्धेन वज्रीदुग्धेन * दन्तीमूलस्वरसेन श्यामारसेन च सप्तधा भावयेत् सप्तधा भावना प्रत्येकेनेत्यर्थ। वज्री सेहुण्ड। दन्तीमूलस्वरसाभावे क्वाथो ग्राह्य। श्यामा निसोत, तथा मूलस्यापि स्वरस क्वाथो वा, एव सिद्धो भवति। अन्यत-सम्प्रदायेऽपि द्रव्यचतुष्टयेन भावना दत्त्वा पश्चात् पूर्वोक्तविधानेन गजपुटे पक्त्वा सिद्धो भवति इति। अन्यत्रापि दृश्यत, तथा हि—"पञ्चाङ्गारविक्षीरै-र्दन्तीश्यामारसेन च। सप्तधा सप्तधा घर्मं शरावपुटके पचेत्॥" इत्यादि।

* इय व्याख्या तथा वक्ष्यमाणा दन्तीमूलस्वरसाभावे क्वाथो ग्राह्य इत्यादि व्याख्या च न समीचीना, मूल दन्तीश्यामयो क्वाथस्यैव सूत्रतया उल्लेखात्।

पथ्यं दुग्धोदनं देयं विषम शीतपूर्वकम्।
दाहपूर्वं हरत्याशु तृतीयकचतुर्थकौ॥
द्व्याह्निक सततञ्चैव वैवर्ण्यञ्च नियच्छति॥ १३॥

सर्वज्वरे ज्वरघ्नी गुटिका।—

भागैक स्याद्रसाच्छुद्धादैलेय पिप्पली शिवा।
आकारकरभो गन्ध' कटुतैलेन शोधित'॥१४॥
फलानि चेन्द्रवारुण्यास्तुर्भागमिता अमी।
एके मर्दयेच्चूर्णमिन्द्रवारुणिकारसै॥१५॥
माषोन्मिता गुटीं कृत्वा दद्यात् सर्वज्वरे बुध'।
छिन्नारमानुपानेन ज्वरघ्नी गुटिका मता॥१६॥

एतन्माषपरिमित पञ्चाशन्मरिचै सह गुडगद्याणयुतञ्च तुलसीपत्रद्वयञ्च भक्षयेद्दिवसे। दिव्यमिति—श्रेष्ठम् ऋषिप्रणीतत्वात्। पञ्चाशन्मरिचैरिति—गणनामात्रम्। गद्याणकमिति—कर्षाधकसंज्ञम्। एके गुडतुलसीपत्रयो-रनुपानमाहु। भक्षयेति—पूर्वं द्विजगुरुपूजनं सभाव्य पश्चादाश्विन्यपूर्वक भक्षयेदिति भाव। वैवर्ण्यमत्र ज्वरजनितम् अन्यरोगजनित वा॥ १२—१३॥

अथ ज्वरघ्नीगुटिकामाह, भागैक स्याद्रसाच्छुद्धादिति।—गुटिकास्तु पूर्व कथिता। रस पारद, तस्यैको भाग। ऐलेय कुमारीरसजनितस्निग्धासदृश्य-विशेष "एलुवा" इति प्रसिद्ध तदभावे कुमारीपत्ररस एव ग्राह्य इत्यपरे, केचिदैलेयशब्देन एलवालुक वदन्ति, तच्च कुष्ठगन्धिकफलसदृश भवति लोके प्रसिद्धञ्च, एतन्न सर्वसम्मतम्। शिवा हरीतकी। आकारकरभ इति—भाव्यलक्ष प्रसिद्ध। कटुतैलेन शोधित गन्ध इत्यन्वय, कटुतैल सार्षपम्। फलानि चेन्द्रवारुण्या इति—इन्द्रवारुणी चिर्भटी, तस्या फलानि। एके मूलानि चेन्द्रवारुण्या वदन्ति, तत बहुप्रलक्षेष न दृश्यत, तस्मादसङ्गतोऽय पाठ। चतु-र्भागमिता अमीति—अमी ऐलेयप्रमुखषट्द्रव्यविशेषास्तुर्भागमिता भवन्ति भागो ऽव पारदपरिमाणात्। एतत सकल चूर्णीभूत कृत्वा इन्द्रवारुणीफलरसेन मर्दयेदित्यर्थ। खरसपरिभावनञ्च द्रव्यभावनायोग्य देय, तच्च यावच्चूर्ण स्रावित भवति तावद्देयमिति भाव। छिन्नारमानुपानेनेति—छिन्ना गुडूची तस्या खरसेनानुपानम्, अनुपानमात्रात्र तल्लाक्षणिकादवगन्तव्या, तद्यथा—"रसाना-

यथादौ लोकनाथरसे ।—

शुद्धो बुभुक्षितः सूतो भागद्वयमितो भवेत् ।
तथा गन्धस्य भागौ द्वौ कुर्यात् कज्जलिका तयोः ॥१७॥
सूताच्चतुर्गुणेष्वेव कपर्देषु विनिक्षिपेत् ।
भागैक टङ्कण दत्त्वा गोक्षीरेण विमर्दयेत् ॥१८॥
तथा शङ्खस्य खण्डानां भागानष्टौ प्रकल्पयेत् ।
क्षिपेत् सर्वं पुटस्यान्तश्चूर्णलिप्तशरावयो. ॥१९॥
गर्त्ते हस्तान्मितं धृत्वा पुटेत् गजपुटेन च ।
स्वाङ्गशीतं समुद्धृत्य पिष्ट्वा तत् सर्वमेकतः ॥२०॥

मनुपान आर्द्रदल पलमष्टकम् । वातपित्तकफप्राये यथायोग्यमनुक्रमात ॥" इति । ज्वरघ्नोति—सामान्येन सर्वज्वरहरित्यर्थ ॥ १४—१६ ॥

इदानीं लोकनाथरसं प्रकटयन्नाह शुद्ध इति।—सूत पारद शुद्ध संस्कारित, संस्कारो ह्यस्य पूर्वं कथितः । बुभुक्षित क्षुधित कारित, ह्यौरात क्षीर, स च भागद्वयपरिमित । तथा गन्धस्य द्वौ भागौ तयेति शब्देन गन्धकस्यापि ग्रीधन दर्शितम् । तयोरिति—गन्धकपारदयो । सूताच्चतुर्गुणेष्वेवेत्यादि—सूतात सूत पारमाणात । कपर्दकेषु वराटकेषु, कपर्दकलक्षणञ्च तन्त्रान्तरादवगन्तव्यम, तद्-यथा—"तुलनाया गुरुतरान् पञ्चगुञ्जान् दशद्रिगान् । वराटान् स्थूलपीतांश्च रस-कर्मणि योजयेत ॥" इति । भागैक टङ्कण दत्त्वादिति—कोऽर्थ ? पारदपरिमाण टङ्कणस्य सौभाग्यसार सङ्कल्प्य गोक्षीरेण सह कल्कीकृत्यानेनैव कल्केन तान् रसगर्भित-वराटान् विमर्दयेदित्याभप्राय । तथा शङ्खस्य खण्डानामिति—ग्रीधितशङ्खस्य खण्डाना शकलाना भागा अष्टौ ग्राह्या पारदस्य कभागापेक्षयेत्यर्थ । सम्प्रदायस्तु शङ्खशकलानि क्षीर सप्ताध्य पश्चात्तेनैव क्षीरेण सह श्लक्ष्णानि संपिष्य पश्चादनेनैव कल्केन तान् वराटान् लेपयेदित्याभप्राय । अन्ये तु शङ्खशकलान वराटिकाभि सह पुटेत । चूर्णलिप्तशरावयोरिति—चूर्णं शुक्तिशङ्खादिसम्भव, तच्च "कनि शब्दवाच्य, तेनालिप्तशरावकौ कृत्वा तान्या सम्पुट कारयेदित्यर्थ, शरावसम्पुटसान्धिषु सान्ध्यार्थिकी मृदा कार्येति व्यवहार, तदुपरि च सप्तेप कार्य इत्यपि व्यवहार । गज पुटेनेति—यद्या गजपुटविधानं तथैवात्र पुटेदित्यर्थ, तच्च गोमयादिना गर्त्ते कृतम् ।

षड्ङ्गाम्मिसं चूर्णमेकोनत्रिंशदूषणैः।
घृतेन वातजे दद्यान्नवनीतेन पित्तजे ॥२१॥
क्षौद्रेण श्लेष्मजे दद्यादतीसारे क्षये तथा।
अरुचौ ग्रहणीरोगे कार्श्ये मन्दानले तथा ॥२२॥
कामखासेषु गुल्मेषु लोकनाथस्मो हितः।
तस्योपरि घृतान्नञ्च भुञ्जीत कवलत्रयम् ॥२३॥
मद्ये क्षणैकमुत्तान शयीतानुपधानके।
अनम्लमन्न सघृत भुञ्जीत मधुरं दधि ॥२४॥
प्रायेण जाङ्गलं मांसं प्रदेयं घृतपाचितम्।
मदुग्धभक्त दद्याच्च जातेऽग्नौ मान्यभोजने ॥२५॥
सघृतान् मुद्गवटकान् व्यञ्जनेष्ववचारयेत्।
तिलामलककल्केन स्नापयेत् सर्षपाऽथवा ॥२६॥

एकोनत्रिंशदूषणैरिति—एकेन यत् ऊनं मरिचानां त्रिंशत्तेन सह षड्रत्रिकप्रमाणं भक्षयेत्। घृतेन वातजे दद्यादित्यादि—अत्र वातजे पित्तजे कफजे च अतीसारादावग्रे वक्ष्यमाणा क्रियमा बोद्धव्या। तस्योपरि घृतान्नमिति—पूर्वं रसं भक्षयित्वा पश्चात् तदुपरि कवलत्रयं घृतान्नं भुञ्जीत घृतेन युक्तमन्नं घृतान्नम्, अन्नमेव भोजनम्। मद्ये सट्टायाम्। अनुपधानके उपधानं शिरोऽधः तेन रहिते, मद्य इति अध्याहार्यं, तेन मद्यगुणान् यथा स्यात्तथा सावशेषयेत्। पश्चात् पथ्यापथ्यमाह, अनम्लमित्यादि।—अनम्लम् अम्लरसरहितम् अम्लञ्च मातुलुङ्गप्रभृतिकम्। अन्नं भक्षितमन्नं तेन भक्ष्यादिकम्। सघृतामिति—घृतयुक्तम्। मधुरं दधीति—मधुरं कोमलजीवित (?) यद्वा—मधुरयुक्तं तत्तु रसालादि। प्रायेण जाङ्गलं मांसमिति—मांसभक्षणञ्चात्र विहितं बाहुल्येन जाङ्गलं प्रधानतमं तदपि घृतपाचितं कार्यम्। यद्यपि जाङ्गलं बहुविधं, तदुच्यते—जङ्घालो बिलेशयः प्रतुदो गुहेशया प्रसहा वनगोचरा बिलेशया ग्राम्यश्चेति तथाऽप्येतत् तु रागापेक्षया दद्यात्। घृतपाचितमिति तैलनिषेधात् गुणाधिक्याच्च, तथा हि—"मांसं यत्तैलसिद्धन्तु बोधयेत् पित्तरक्तकृत्। लघुग्रहणीदोषघ्नं दृष्टिप्रसादनम्। अनर्थावीर्य्यं पित्तघ्नं मनोज्ञं घृतसाधितम्।" (सु० सू० ४६ अ०) इति। सघृतानिति—घृतसाधितान्। अथवा सर्षपा

अभ्यङ्गयेत् सर्षपा च स्नान कोष्णोदकेन च।
क्वचित्तैल न गृह्णीयान्न बिल्व कारवेल्लकम् ॥ २७ ॥
वार्त्ताकु शफरीं चिञ्चा त्यजेद्व्यायाममैथुने।
मद्य मन्थानक हिङ्गु शुण्ठी माषान् मसूरकान् ॥ २८ ॥
कुष्माण्डं राजिका * कार्पं कार्ष्णिकञ्चैव वर्जयेत्।
त्यजेदयुक्तनिद्राञ्च काम्यपात्रे च भोजनम् ॥ २९ ॥
ककारादियुत सर्वं त्यजेच्छाकफलादिकम्।
पथ्याऽथ लोकनाथस्तु शुभनक्षत्रवासरे ॥ ३० ॥
पूर्णातिथौ सिते पक्षे जातं चन्द्रबले तथा।
पूजयित्वा लोकनाथ कुमारी भोजयेत्तत' ॥ ३१ ॥
दान दत्त्वा द्विघटिका मध्ये ग्राह्यो रसोत्तमः।
रसाच्चेज्जायते तापस्तदा शर्करया युतम् ॥ ३२ ॥
सक्त्व गुड्च्या गृह्णीयाद्दशरोचनया युतम।
खर्जूरं दाडिम द्राक्षामिक्षुखण्डानि ‡ चारयेत् ॥ ३३ ॥
अरुचौ निस्तुष धान्य घृतभृष्ट मशकरम्।
दद्यात्तथा ज्वरे धान्य-गुड्चीक्वाथमाहरेत् ॥ ३४ ॥

घृतन स्नान कारयेत, कोष्णोदकेन स्नानन्तु अध कायस्येति, यत —"उष्णाम्बना-ऽध कायस्य परिषेकी बलावह। तेनैव तूत्तमाङ्गस्य बलहृत केशचक्षुषाम॥" (वा० सू० २अ०) इति। क्वचित तैल न गृह्णीयादित—क्वचित क्वापि तैलयुक्त न काय्ये तन दीपादिष्वपि तैल निषिद्ध स्यात। अथ त्याज्यमाह बिल्वमिति—बिल्वफलम। कारवेल्लक करलाशब्दवाच्य फलमिति। वार्त्ताकु वृन्ताकम। शफरी चुटमत्स्यम। चिञ्चा प्रसिद्धा। व्यायाम शरीरायासजनन कर्म। मैथुन स्त्रीसेवा। मद्यादिकमिति सुगमम। त्यजेदयुक्तनिद्राञ्चेति—अयुक्तनिद्रा दिवानिद्रादिकम्। ककारादियुत सर्वमिति—सर्वमाहारनिमित्त ककारपूर्वक

---

* "कोपम" इत्यत्र "कोलम" इति पाठान्तरम।

† "पथ्य" इत्यत्र "ग्राह्य" इति पाठान्तरम।

‡ "चारयेत्" इत्यत्र "खादयेत्" इति पाठान्तरम।

उशीरवामकक्वाथ दद्यात् ममधुशर्करम्।
रक्तपित्ते कफे श्वासे कासे च स्वरभङ्गये ॥ ३५ ॥
अग्निभृष्टजयाचूर्णं मधुना निशि दीयते।
निद्रानाशेऽतिसारे च ग्रहण्या मन्दपावके ॥ ३६ ॥
मौवर्चलाभयाकृष्णा चूर्णमुष्णोदकैः पिबेत्।
शूलेऽजीर्णे तथा कृष्णा मधुयुक्ता ज्वरे हिता ॥ ३७ ॥
प्लीहोदरे वातरक्ते कुष्ठार्शस्वेव गुदाङ्कुरे।
नासिकादिषु रक्तेषु रसं दाडिमपुष्पजम् ॥ ३८ ॥
दूर्वायाः स्वरसं नस्ये प्रदद्याच्छर्करायुतम्।
कोलमज्जा कणा वह्नि-पत्रभस्म मशर्करम् ॥ ३९ ॥
मधुना लेहयेच्छर्दि-हिक्काकासोपशान्तये।
विधिरेष प्रयोज्यस्तु सर्वस्मिन् पोट्टलीरसे ॥ ४० ॥
मृगाङ्के हेमगर्भे च मौक्तिकाख्येऽपरेषु च।
इत्यर्थं लोकनाथाख्यो रसः सर्वरुजो जयेत् ॥ ४१ ॥
(वराटभस्म मण्डूरं चूर्णयित्वा घृतं पचेत्।
तत्समं मरिचं चूर्णं नागवल्ल्या विभावितम् ॥
तच्चूर्णं मधुना लेह्यमथवा नवनीतकैः।
मासमात्रं क्षयं हन्ति यामे यामे च भक्षितम् ॥
लोकनाथरसो ह्येष मण्डलाद्राजयक्ष्मनुत् ॥)

अथादौ मृगाङ्कपोट्टलिरस।—

भूर्जवत्तनुपत्राणि हेम्ना सूक्ष्माणि कारयेत्।
तुल्यानि तानि सूतेन खल्वे क्षिप्त्वा विमर्दयेत् ॥ ४२ ॥

शाकफलादिकं त्यजेत्। निशि पथ्ये शुक्ले पथ्ये। अग्निभृष्टजयाचूर्णमिति—जया भङ्गा। वह्निपत्रभस्मेति—वह्नौ मयूर। मृगाङ्के मृगाङ्कपोट्टलिके। हेमगर्भे हेमगर्भपोट्टलिके। मौक्तिकाख्ये मौक्तिकाख्यपोट्टलिके। अपरेष्वपि पञ्चरत्नपोट्टलिकाप्रभृतिषु एष विधिः प्रयोज्य इति ॥ ३९—४१ ॥

अथ मृगाङ्कपोट्टलीनामरसं व्याचष्टे, भूर्जवदिति।—भूर्जो वृक्षविशेषः, तस्य

काञ्चनाररसेनैव ज्वालामुख्या रसेन वा।
लाङ्ख्या वा रसैस्तावत् यावद्भवति पिष्टिका ॥ ४३ ॥
ततो हेम्नश्चतुर्थांश टङ्कणं तत्र निक्षिपेत्।
पिष्टमौक्तिकचूर्णञ्च हेमद्विगुणमावपेत् ॥ ४४ ॥
तेषु सर्वसमं गन्धं क्षिप्त्वा चैकत्र मर्दयेत्।
तेषां कृत्वा ततो गोलं वासोभि परिवेष्टयेत् ॥ ४५ ॥
पश्चान्मृदा वेष्टयित्वा शोषयित्वा च धारयेत्।
शरावसम्पुटस्यान्तस्तत्र मुद्रां प्रदापयेत् ॥ ४६ ॥
लवणापूरितं भाण्डे धारयेत्तञ्च सम्पुटम्।
मुद्रां दत्त्वा शोषयित्वा बहुभिर्गोमयैः पुटेत् ॥ ४७ ॥
ततः शीतं समाहृत्य गन्धं सूतसमं क्षिपेत्।
दृष्ट्वा च पूर्ववत् खल्ले पुटेद्गजपुटेन च ॥ ४८ ॥

त्वक् तदाकाराणि तनूपलानि, तनूकरणेन यथा अङ्गादीना मनोहरार्थं स्वर्णकारा कुर्वन्ति तद्वदापि कार्य्यमौषधार्थं। सूक्ष्माणीति—तानि तनूपलानि तिलवत् खण्डितानि कृत्वेत्यर्थः। सूतेन पारदेन समं मर्दनं कृत्वा खल्ले क्षिप्त्वा मर्दनीयम्। कथम? यथा काञ्चनाररसेनेत्यादि।—काञ्चनारो वृक्षविशेष प्रसिद्ध एव। ज्वालामुखी लताजातीयः, सा चतुर्विधा भवति तथा हि—'श्वेता रक्ता तथा पीता कृष्णा ज्वालामुखी भवत' इति। लाङ्खी कलिहारिका। यावद्भवति पिष्टिकेति—कीदृश? तत्र सुवर्णरसद्रव्य(?) यावद्वत्त्वा प्राप्य पिष्टिका स्यात् तावद्रसैर्मर्दनीयम्। अत्यन्तस्निग्धायै तु पूर्वोक्तशोधितरसे सुवर्णपत्राणि दत्त्वा तदन् ईषदूष्णस्थलौ दत्त्वा उपरि पात्र मुखाप्य गाढं मर्दयेत् यावत् घनभस्मवद्भवति पश्चात्तत्रैव मह मन्मर्थं गोलकार्थं पिष्टिका कारयेदित्यर्थः। ततो हेम्नश्चतुर्थांश टङ्कण तत्र निक्षिपेदिति—तत पिष्टीकरणानन्तर तत्र पिष्टीकृतद्रव्ये टङ्कण सौभाग्यसार हेम्न सुवर्णस्य चतुर्थांश क्षिपेत्, तेन यदा सुवर्ण चतु भाग भवति तदा टङ्कण भागमेकमित्यर्थः। पिष्टमौक्तिकचूर्णमिति—शोधितमौक्तिकचूर्णं सुवर्णपरिमाणाद्विगुण सङ्गृह्य मेलयेदिति भावः। तेषु पूर्वोक्तद्रव्येषु सर्वसम समसद्रव्यसाम्य गन्धक क्षिप्त्वा सर्वमेकत्र मर्दयेदित्यभिप्राय, मर्दनमत्र पूर्वोक्तरसैरिति व्यवहार। सर्वसममिति—सर्वं पारदसुवर्णटङ्कणमौक्तिकमित्यर्थः। तेषा कृत्वा

खाङ्गशीतं ततो नीत्वा गुञ्जायुग्मं प्रयोजयेत्।
अष्टभिर्मरिचैर्युक्तं क्षणाच्चयमुतोऽथवा ॥ ४८ ॥
विलोक्य देया दोषादौनेकैका रसरक्तिका।
सर्पिषा मधुना वाऽपि दद्याद्दोषाद्यपेक्षया ॥ ५० ॥
लोकनाथसमं पथ्यं कुर्य्यात् स्वस्थमनाः शुचिः।
श्लेष्माणं ग्रहणीं कासं श्वासं क्षयमरोचकम् ॥
मृगाङ्कोऽयं रसो हन्यात् क्षयत्वं बलहीनताम् ॥ ५१ ॥

क्षयादौ हेमगर्भपोटली रस —

सूतात् पादप्रमाणेन हेम्न पिष्टं प्रकल्पयेत्।
तयो. स्याद्द्विगुणो गन्धो मर्दयेत् काञ्चनारकै ॥ ५२ ॥
कृत्वा गोलं क्षिपेन्मूषा सम्पुटे मुद्रयेत्तत।
पचेद्भूधरयन्त्रेण वासरत्रितय बुध ॥ ५३ ॥

ततो गोल वालुकाभि परिवेष्टयेदिति—इत्यपाठान्तु तत गोलकरूप दत्त्व पूर्व शराव-सम्पुटे कृत्वा तत्सन्धौ माम्रदाधिकौ मुद्राच दत्त्वा तत भाण्ड गजपुटविधानेन पुटेत, पश्चात् खाङ्गशीत द्रव्य गृहीत्व यावत् परिमाण पारद पूर्वं तावत् परिमाणमत्यङ्गमरिचकच दत्त्वा मर्दयित्व च पूर्ववत् पुटेत, मर्दनमत्र पूर्वोक्तरसे, एव सिद्धो भवति। शेष सुबोधम ॥ ४२—५१ ॥

अथ हेमगर्भपोटलीनामरस प्रकटयन्नाह सूतात् पादप्रमाणेनेत्यादि।—सूत पारद स च शोधितो ग्राह्य, तस्य पादमितशोधितेन सम हेम ग्राह्यम, हेम्न इति ग्रहणेनात्र पक्षाणि काञ्चनीत्यर्थ। तानि पूर्वोक्तानीति सम्बन्ध (१)। पिष्टो-विधानन्तु पूर्ववत् बोद्धव्यम्। तयो स्यात् द्विगुणो गन्ध इति—तयो पारदसुवर्णयो द्विगुण परिमाणात्, तेन पारदसुवर्णयोरेको भाग, गन्धकस्य द्वौ भागौ। काञ्चनारो वृक्षविशेष तस्य पक्षाणा स्वरसेन मर्दयेत् यावत् पिष्टिकाकार भवति। मृत्सम्पुटे शरावसम्पुटे मध्ये च मुद्रा कारयेत्, मुद्रा साम्रदाधिको काय्या। तत इति ग्रहणेन तत् सम्पुट मृल्लपटकैश्च लेपयेदिति भाव। पचेत भूधरयन्त्रेण वासरत्रितय बुध इति—वासरत्रय यावत् भूधरयन्त्रेण कृत्वा पचेत। अत्रत्यम्-दायेऽपि गोमये कृत्वा पुन पुनरग्नि प्रज्वालयेत यावद्धूनत्रय भवति इत्यभिप्राय, तत्रस्तु पुटषट्क दद्यादित्यर्थ.। पुटषट्कञ्च गोमयाग्निना, न तु शरावसम्पुट

तत उद्धृत्य तत् सर्वं दद्यात् गन्धञ्च तत्समम्।
मर्दयेदार्द्रकरसैश्चित्रकस्वरसेन च ॥ ५४ ॥
स्थूलपोतवराटाश्च पूरयेत्तेन युक्तितः।
एतस्मादौषधात् कुर्य्यादष्टमाशेन टङ्गणम् ॥ ५५ ॥
टङ्गणार्द्धं विषं दत्त्वा पिष्ट्वा सेहुण्डदुग्धकैः।
मुद्रयेत्तेन कल्केन वराटानां मुखानि च ॥ ५६ ॥
भाण्डे चूर्णप्रलिप्ते च धृत्वा मुद्रा प्रदापयेत्।
गर्त्ते हस्तोन्मितं धृत्वा पुटेत् गजपुटेन च ॥ ५७ ॥
खाङ्गशीत रसं ज्ञात्वा प्रदद्यात्लोकनाथवत्।
पथ्यं मृगाङ्कवज्ज्ञेयं त्रिदिनं लवणं त्यजेत् ॥ ५८ ॥
यदा छर्दिर्भवेत्तस्य दद्यात् * छिन्नाम्भृतं तदा।
मधुयुक्तं तथा श्लेष्म-कोपे दद्यान्नडार्द्रकम ॥ ५९ ॥
विरेके भर्जिता भङ्गा प्रदेया दधिसंयुता।
जयेत् कासं क्षयं श्वासं ग्रहणीमरुचिं तथा ॥ ६० ॥
अग्निञ्च कुरुते दीप्तं कफवातं नियच्छति।
हेमगर्भः परो ज्ञेयो रसः पोट्टलिकाभिधः ॥ ६१ ॥

अथातो द्वितीयहेमगर्भपोट्टली रस।—

रसस्य भागाश्चत्वारस्तावन्तः कनकस्य च।

षड्वारं कार्य्यं, तटैकवारमेव। पश्चात् कार्य्यमाह तत उद्धृत्येत्यादि—तत सर्वं द्रव्यं गन्धकेन समं कृत्वा पश्चादार्द्रकरसेन चित्रकजटास्वरसेन च सम्मर्द्य तेन पिष्टद्रव्येण वराटकान् पूरयत, पश्चात् तन्मुखानि टङ्गणविषं सेहुण्डदुग्धेन पिष्ट्वा तेन मुद्रयेत्, टङ्गणमान पूर्वद्रव्यसम्भारादष्टमांश ग्राह्य विषन्तु टङ्गणार्द्धमित्यर्थ। शेष सुबोधम् ॥ ५२—६१ ॥

अथ द्वितीया हेमगर्भपोट्टली तामपि दर्शयन्नाह, रसस्येति।—सकल स्वस्वपरिमित रससुवर्णादिकमेकत्र सम्मर्द्य पचेदिति तात्पर्य्यार्थ। केषाञ्चित इत्तपाठ्यामेव,

---

* "छिन्नाम्भृतम्" इत्यत्र "छिन्नारसम्" इति पाठान्तरम्।

तयोश्च पिष्टिका कृत्वा गन्धो द्वादशभागिक ॥ ६२ ॥
कुर्य्यात् कज्जलिका तेषा मुक्ताभागाश्च षोडश ।
चतुर्विंशच्च शङ्खस्य भागैकं टङ्कणस्य च ॥ ६३ ॥
एकत्र मर्दयेत् सर्वं पक्वनिम्बकजै रसैः ।
कृत्वा तेषा ततो गोलं मूषासम्पुटके न्यसेत् ॥ ६४ ॥
मुद्रा दत्त्वा ततो हस्त मात्र गर्त्ते च गोमये ।
पुटेत् गजपुटेनैव स्वाङ्गशीतं समुद्धरेत ॥ ६५ ॥
पिष्ट्वा गुञ्जाचतुर्मान दद्यात् गव्याज्यसयुतम् ।
एकोनविंशदुन्मान-मरिचैः सह दीयते ॥ ६६ ॥
राजते मृन्मय पात्रे * काचजे वाऽवलेहयेत् ।
लोकनाथसम पथ्य † कुर्य्याच्च स्वस्थमानस ॥ ६७ ॥
कासे श्वासे क्षये वाते कफे ग्रहणिकागदे ।
अतीसार प्रयोक्तव्या पोट्टलौ हेमगर्भिका ॥ ६८ ॥

विषमज्वरे ज्वराङ्कुशो रस ।—

गुडसूतौ विष गन्ध प्रत्येकं शाणसम्मितम् ।
धूत्तबीज त्रिशाण स्यात् सर्वभ्या द्विगुणा भवेत् ॥ ६९ ॥
हेमाह्वा कारयेदेषा सूक्ष्मं चूर्णं प्रयत्नतः ।

यथा—गुडपारद प्रथमतो मूर्च्छित कृत्वा पश्चात्तदुभयत्र गोलक कारयत । अस्मत्सम्प्रदाये तु लोकनाथपोट्टलौषध कर्त्तव्या सा च पूर्वं कथितैव । मुक्ताश्चात्र शङ्खवत् प्रक्षिप्ता ज्ञेया । शेष सुगमम् ॥ ६२—६८ ॥

अथ द्वितीयज्वराङ्कुशरसमाह, गुडसूत इति ।—गुड संस्कारित', संस्कारा ह्यत्र पूर्वं कथिता । विषमपि गुड, तत्रापि पूर्वं विहितमेव। गन्धो गन्धक, खाऽपि गुड ग्राह्य । शाण टङ्कैक प्रत्येकमित्यर्थ.। धूत्तबीजमिति

---

* "काचजे" इत्यत्र "काचने" इति पाठान्तरम् ।

† "कुर्य्याच्च स्वस्थमानस" इत्यत्र "कुर्य्यात् प्रयतमानस" इति पाठान्तरम् ।

देय जम्बोरमज्जाभिश्चूर्णं गुञ्जाद्वयोन्मितम् ॥ ७० ॥
आर्द्रकस्वरसैर्वाऽपि ज्वरं हन्ति त्रिदोषजम् ।
ऐकाहिकं द्व्याहिकं वा, त्र्याहिकं वा चतुर्थकम् ॥
विषमञ्च ज्वरं हन्यादिख्यातोऽयं ज्वराङ्कुशः ॥ ७१ ॥

अतिसारे आनन्दभैरवो रसः ।—

दरदं वत्सनाभञ्च मरिचं टङ्कणं कणाम् ।
चूर्णयेत् समभागेन रसो ह्यानन्दभैरवः ॥ ७२ ॥
गुञ्जकं वा द्विगुञ्जं वा बलं ज्ञात्वा प्रयोजयेत् ।
मधुना लेहयेच्चानु कुटजस्य फलं त्वचम् ॥ ७३ ॥
चूर्णितं कर्षमात्रन्तु त्रिदोषोत्थातिसारजित् ।
दध्यन्नं दापयेत् पथ्यं गव्याजं तक्रमेव च ॥
पिपासायां जलं शीतं विजया च हिता निशि ॥ ७४ ॥

—धुस्तूरबीजानि, तानि चिटङ्गितानि। हेमाह्वा स्वर्णक्षीरी, सा क्षीरशब्दवाच्या पर्षा तु सर्वेभ्यश्चतुर्थ्येभ्यो द्विगुणा ग्राह्या तेन षट्त्राणद्विगुणितेत्यर्थः। जम्बोरफलमज्जाद्रवैरल्पोऽपि दोषापेक्षया बोद्धव्य परस्परभावेऽपि। त्रिदोषजमिति—अत्र समत्वम्। विषमज्वरमिति पुनर्ग्रहणेन प्रायशो विषमज्वर नाशनाथस्य प्रभावो न दोष, कृत ? विख्यातत्वात् ॥ ६९—७१ ॥

अथानन्दभैरवरसस्य व्याख्यान दर्शयितुमाह, दरदमिति।—दरद हिङ्गुलम। वत्सनाभ विषम। टङ्कण सौभाग्यक्षारम। कुटजस्य फलमिन्द्रयव, त्वक् कुटजस्येव मिलित्वा कर्षमित्यर्थः। एतदनुपान पथ्यञ्च प्रायशोऽतीसारे प्रशस्तम। गव्याज गोसम्बन्धम् अजासम्बन्धञ्च तक्र, तत्तु विभागभिन्नम्, तथा हि—"उदश्वित्तक्र वारुक्षम। तक्र विभागभिन्नन्तु केवल मथित स्मृतम॥" इति। केवलोऽय कफाग्निमान्द्ये योज्य इति व्यवहारो ग्रहणैव्याना दृश्यते। पिपासायां सत्या शीतल जल देय, न तृष्णा रसनिमित्तत्वात। निशि रात्रौ विजया भङ्गा हिता पथ्या, अवैव प्रयोगे, तेन प्रातरेवाय रस शीलनीय इति भाव ॥ ७२—७४ ॥

सान्निपातज्वर लघुसूचिकाभरणो रस :—

विषं पलमितं सूत शाणिकश्चूर्णयेद्वयम्।
तच्चूर्णं सम्पुटे क्षिप्त्वा काचलिप्तशरावयोः ॥ ७५ ॥
मुद्रां दत्त्वा च सप्तोष्य ततश्चुल्ल्यां निवेशयेत्।
वाङ्गं शनैः शनैः कुर्यात् प्रहरद्वयसङ्ख्यया ॥ ७६ ॥
ततः उद्घाटयेन्मुद्रामुपरिस्थं शरावकात्।
संलग्नं या भवेत् सूतस्तं गृह्णीयाच्छनैः शनैः ॥ ७७ ॥
वायुस्पर्शो यथा न स्यात्तथा कूप्यां निवेशयेत्।
यावत् सूच्या मुखे लग्नं कूप्यां निर्याति भेषजम् ॥ ७८ ॥
तावन्मात्रा रसो देयो मूर्च्छिते सन्निपातिनि।
क्षुरेण प्रक्षिप्तं मूर्ध्नि तत्राङ्गुल्या च घर्षयेत् ॥ ७९ ॥
रक्तभेषजसम्पर्कान्मूर्च्छितोऽपि हि जीवति।
तथैव सर्पदष्टस्तु मृतावस्थोऽपि जीवति ॥
यदा तापो भवेत्तस्य मधुरं तत्र दीयते ॥ ८० ॥

अथ लघुसूचिकाभरणरस व्याख्यास्यामः विषमिति।—विष प्रसिद्ध पलमित षोडशशाणमितम्। सूत पारद शाणिकश्चूर्णयेद्वयम्। प्रथमतोऽभ्यन्तरे काचलिप्तं कृत्वा तयो सम्पुटे चूर्णं मेलयित्वा माम्रदार्यिकी मुद्रा तत्रान्यौ काच्या ततश्चुल्ल्या निवेशयेदादात—कोष्ठ ? तत रसगर्भसम्पुट वालुकायन्त्रे निधायाध शरावलग्न यथा स्यात विपचादित्यभिधायोऽग्न्तामाम्रदायक। यथा कर्परपाकार्थं यन्त्रविधिस्तद्वदत्रापि उपरिस्थशरावकलग्नो धूमसदृश कज्जलवदम सूची तु रसपरीक्षणार्थं शलाका कथ्यते सा तु मसूरदलमध्यमुखो भवति तन्मुखे यावल्लग्नो रसो भवति तावद्देयो रस इति रसवादिना व्यवहार। मूर्च्छिते मृतप्राये सान्निपातिनि पुरुषे। तत्रैव सर्पदष्ट इत्यौत—यथा सन्निपात भक्षण मूर्च्छा मदनचाभिहित तथैव सर्पदष्टे इत्यर्थ। ताप सन्तापो रसजनित इत्यादि। मधुरमिक्षुविकार द्राक्षादाडिमखर्जूरादिक मपि सम्प्रदायत ॥ ७५—८० ॥

सन्निपातज्वरे * जलबन्धु रस ।—

सूतभस्मसम गन्ध धात्र्या दत्त्याम्लन शिला ।
माक्षिकं पिप्पली व्याष प्रत्येक शिलया समम् ॥ ८१॥
चूर्णयेत् भावयेत् पित्तैर्मर्त्यमायूरसम्भवै ।
सप्तधा भावयेच्छुष्क देय गुञ्जाद्वयं हितम् ॥ ८२ ॥
तालपर्णीरसस्यानु पञ्चकोलयुतोऽथवा ।
जलबन्धूरसो नाम सन्निपातं नियच्छति ॥
जलयोगश्च कर्त्तव्यस्तेन वीर्य्यं भवेद्रसे ॥ ८३ ॥

सन्निपातज्वर पञ्चवक्त्र रस ।—

शुद्धं सूत विष गन्धं मरिच टङ्कण क्रमात् ।
मर्दयेद्भृङ्गजद्रावैर्दिनमेकञ्च शोषयेत् ॥ ८४ ॥

इदानी जलबन्धुरसको रसमाह, भस्मसूतसम गन्धमिति ।—सूतस्य पारदस्य भस्म तत्समान गन्धकमित्यर्थ । धात्र्या दत्त्या फलान्यत्र योज्यानि, एतन्मतोऽहम् । अत्र "गन्धात् पाठ मन शिला" इति पाठ सङ्गत । तेन गन्धकपरिमाणस्य चतुर्थांशसमाना मन शिला ग्राह्या अत एव 'प्रत्येक शिलया समम' इति वचनम । माक्षिक स्वर्णमाक्षिकम । व्योष शुण्ठीमरिचपिप्पलीसङ्गकम । पिप्पली द्विकलतया द्विगुणा ग्राह्या, एकद्रव्यपरिमाणात । एके जलपिप्पलीमत्र व्याख्यानयन्ति तन्न सुसमतम । मर्त्यो मोर, सामान्यत्वेन पारज्ञतमर्त्या ग्राह्य म च राजत, तादृशस्यान्योऽपि । मयूरो नीलकण्ठ । सप्तधा भावयेत् इति—प्रत्येक सप्तवारमित्यर्थ । हितमिति दोषानुपाने योज्यम । पञ्चकोल यथा—"पिप्पली पिप्पली मूल चव्यचित्रकनागरै । पञ्चकोलमिति ख्यातम" इत्यादि । जलयोगश्च कर्त्तव्य इति—अनेन शीतलजलपान, तज्जलनापि हृदयनेत्रप्राङ्कणमिति सम्प्रदाय ॥ ८१—८३ ॥

अधुना पञ्चवक्त्ररस दर्शयन्नाह शुद्धमित्यादि ।—सूत पारदम । विष प्रसिद्धम । गन्ध गन्धकम । एतत्त्रय शुद्धमपि ग्राह्यम्, शुद्धिरेषा पुनर्भावनैव । टङ्कण सौभाग्यक्षारम, एतस्यापि शोधन विहित, तत भाजनमेके भाषन्ते । धुस्तूरो धुस्तूरस्य पत्राणा स्वरसेरित्यर्थ, धुस्तूरफलरसैर्वा यदाह परतो वक्ष्यमाणान्भृङ्गरसे धुस्तूरफलरसै-

* "जलचूडारस" इति नामान्तरम ।

पञ्चवक्त्रो रसो नाम त्रिगुञ्जः सन्निपातजित्।
अर्कमूलकषायन्तु सव्यूषमनुपाययेत्॥ ८५॥
युक्तं दध्योदनं पथ्यं जलयोगञ्च कारयेत्।
रसेनानेन शाम्यन्ति मक्षौद्रेण कफाज्वराः॥ ८६॥
मध्वार्द्रकरसञ्चानु पिबेदग्निविवृद्धये।
यथेष्टं घृतमाभाषो भक्तो भवति पावकः॥ ८७॥

सन्निपातज्वरे उन्मत्तरसः।—

रसं गन्धकतुल्यांशं धुस्तूरफलजद्रवैः।
मर्दयेद्दिनमेकन्तु तत्तुल्यं त्रिकटुं क्षिपेत्॥
उन्मत्ताख्यो रसो नाम्ना नस्ये स्यात् सान्निपातजित्॥८८॥

सान्निपातज्वरे अञ्जनम्।—

निस्वरजैपालबीजञ्च दशनिष्कं विचूर्णयेत्।
मरिचं पिप्पली सूतं प्रतिनिष्कं विमिश्रयेत्॥ ८९॥

रिति वचनात्। दिनमेकञ्च शोषयेदिति—तत सकल द्रव्य वस्त्रगालित कृत्वा पश्चाद्धुस्तूरस्वरसेन सप्तवार भावयेदित्याभिप्राय, प्रत्येकभावनाया मर्दनञ्च कार्य्यम। व्यूषमिति—व्यूषण त्रिकटुक, तच्च शुण्ठीमरिचपिप्पलीसमम्, एतेषा चूर्णेन सयुक्तमर्कमूलकषायन्तु अनुपानमाह। युक्तं दध्योदन पथ्यमिति—दोषाग्निबलादि कानुरूपम्। जलयोगश्चात्र जलवत्सुरसवत कार्य्यं तत पूर्वं प्रतिपादितमेव। मक्षौद्रेणेति—क्षौद्र मधु तेन सहावलेहित। कफाज्वरा शीघ्रत्वादय दृति। अग्निवृद्धय तु मध्वार्द्रकरसमनुपिबेत्। रसपरिमाणन्तु पूर्वोक्तमेव। अनेन पावकोऽग्नि भक्त समर्थो भवति, पाकाद्यर्थमिति यावत्॥ ८५—८७॥

अथान्यतरस्वरूपमाह दर्शयन्नाह रस गन्धकतुल्यांशमिति।—अय रसो नाम्ने योज्य स तु प्रथमनरूपो ज्ञेय। उत्कटसान्निपाते रात्रावाहयपरिमितञ्च भक्षणेऽपि दर्शयित्वात्सम्प्रदायेऽनुभूतम्। तत्तुल्यं त्रिकटं क्षिपेदिति—तत्तुल्य रसगन्धक साम्य त्रिकटं शुण्ठीमरिचपिप्पलीकम्। शेष सुबोधम्॥ ८८॥

अथ सान्निपातेऽञ्जनं व्याचष्टे, निस्वरजैपालबीजमिति।—जैपालबीज तत निस्वरक् निस्तुष कृत्वेत्यर्थ.. एतादृश दशटङ्कमित ग्राह्यम्। मरिच पिप्पली सूतञ्च प्रत्येक टङ्कक, सूत पारद तच्चात्र मूर्च्छित ग्राह्यम्।

भाव्यो जम्बीरजैर्द्रावै सप्ताहं सम्प्रयत्नतः ।
रसोऽयमञ्जने दत्तः सन्निपातं विनाशयेत् ॥ ९० ॥

उदावर्त्ते नाराची रस ।—

सूत टङ्गणकं तुल्यं मरिचं सूततुल्यकम् ।
गन्धकं पिप्पली शुण्ठी द्वौ द्वौ भागौ विचूर्णयेत् ॥ ९१ ॥
सर्वतुल्य त्रिफेन्द्री-बीजं निस्तुषित भिषक् ।
त्रिगुञ्जो रेचनं सिद्ध नाराचोऽयं महारसः ॥
आध्मान मलविष्टम्भमुदावर्त्तञ्च नाशयेत् ॥ ९२ ॥

विरेचने इच्छाभेदी रस ।—

टरटं टङ्गण शुण्ठी पिप्पली चैककार्षिका ।
हेमार्द्धा पलमात्रा स्याद्दन्तीबीजञ्च तत्समम् ॥ ९३ ॥
विचूर्ण्यैकत्र सर्वाणि गोदुग्धेनैव साधयेत् ।
त्रिगुञ्जं रेचनं दद्याद्विष्टम्भाध्मानरोगिषु ॥ ९४ ॥

सर्वमेहे वसन्तकुसुमाकरो रस ।—

(द्वौ भागौ हेमभूतस्य गगनस्यापि तत्समम् ।

जम्बीरजैरिति—जम्बीरफलरसै । सन्निपातमिति—सामान्येन सर्वं सन्निपातं, विशेषेण तान्त्रिके योज्योऽयमित्यभिप्राय ॥ ८९।९० ॥

अथ महानाराचोऽय रस, सूतमिति।—सूत पारद, टङ्गण सौभाग्यक्षार, तुल्य साम्यम। मरिचमपि पारदसाम्यमिति। गन्धक, पिप्पली च शुण्ठी च द्विभागा ज्ञेया, तैर्नैकद्रव्यभागापेक्षया प्रत्येक द्वौ भागौ। सर्वतुल्य दन्तीबीजमिति—पूर्वोक्त-षड्द्रव्यसाम्य दन्तीबीज ग्राह्यमित्यर्थ। निस्तुषित तुषरहित जैपालमिति यावत। रचनमिति—भेदनपर्य्यायम। ननु रचनभेदनयो को भेद ? उच्यते, तत्रैव दीपन-पाचनाध्याये यदपक्वञ्चेत्यादि वोद्धव्यम ॥ ९१।९२ ॥

अथेच्छाभेदीनाम रसमाह, दरटमिति।—टङ्गण सौभाग्यक्षारम। हेमार्द्धा स्वर्णक्षीरी, "चोक" इति प्रसिद्ध। दन्तीबीजञ्च तत्समामिति—स्वर्णक्षीरीपरिमाण समम्। एतत सर्वं सचूर्ण्य गोदुग्धेन कृत्वा साधयेत, साधनन्तु वक्ष्यो तावदेव यावत क्षीरहीन भवति, क्षीरपरिमाणन्तु द्रव्यसम्भाराच्चतुर्गुण ग्राह्यमिति सम्प्रदाय ॥ ९३।९४ ॥

लोहभस्म त्रयो भागाश्चत्वारो रसभस्मनः ॥
वङ्गभस्म त्रिभागं स्यात् सर्वमेकत्र मर्दयेत्।
प्रवालं मौक्तिकञ्चैव रससाम्येन दापयेत् ॥
भावना गव्यदुग्धेन रसैर्घृष्टाऽऽटरूषकैः।
हरिद्रावारिणा चैव मोचकन्दरसेन च ॥
शतपत्ररसेनापि मालत्याः स्वरसेन च।
पश्चान्मृगमदश्चन्द्र-तुलसीरसभावितः ॥
कुसुमाकर इत्येष वसन्तपदपूर्वकः।
गुञ्जाद्वयं ददीतास्य मधुना सर्वमेहनुत् ॥
सिताचन्दनसयुक्तश्चास्रपित्तादिरोगजित् ॥)

अथ राजमृगाङ्को रसः।—

सूतभस्मत्रयो भागा भागैकं हेमभस्मकम्।
सूततास्रस्य भागैकं शिलागन्धकतालकम् ॥ ९५ ॥
प्रतिभागद्वयं शुद्धमेकीकृत्य विचूर्णयेत्।
वराटीः पूरयेत्तेन छागीक्षीरेण टङ्कणम् ॥ ९६ ॥
पिष्ट्वा तेन मुखं रुद्ध्वा मृद्भाण्डे तन्निरोधयेत्।
शुष्कं गजपुटे पक्त्वा चूर्णयेत् स्वाङ्गशीतलम् ॥ ९७ ॥
रसो राजमृगाङ्कोऽयं चतुर्गुञ्जः क्षयापहः।

अथ राजमृगाङ्करसमाह, सूतभस्मेति।—अत्र सूतपारदस्य त्रयो भागा, सूत स्वर्णस्य भागैक, सूततास्रस्य च भागैकम्, एके सूताभ्रकस्य भागैकमिति पठन्ति, तत्र सर्वसम्मतम। शिलागन्धकतालकमिति—शिला मनःशिला, गन्धक प्रतीत, तालक हरिताल, शुद्धानामेतेषाञ्च भागद्वय प्रत्येकम्। वराटीलक्षणञ्च पूर्वोक्तश्लोकनाथस्से द्रष्टव्यम्। तेन पूर्वोक्तमकलद्रव्यचूर्णेन। टङ्कण सौभाग्यक्षारम। सद्भाण्डे सूत्कर्पटनिर्मिते पात्रे। गजपुटोपलक्षणत्वात् षोडशाङ्गुलगर्त्ते पचेटिति सम्प्रदाय, अन्यथा बहुतरज्वलनसम्पर्काद्दग्धेन त्वनर्थकरो भवति। अनुपान दोषापेक्षया पृथ-

---

* "सूततास्रस्य" इत्यत्र "सूततारस्य" इति रसेन्द्रे पाठ।

दशपिप्पलिकाचौद्रैरेकोनत्रिंशदूषणैः ॥ ९८ ॥
सघृतं दापयेत् पथ्यं स्तोकोपाग्निश्रमास्त्यजेत् ।
पथ्यं वा लघुमासानि राजरोगप्रशान्तये ॥ ९९ ॥

चयकासे स्वयमग्नि रस ।—

शुद्धं सूतं द्विधा गन्धं कुर्य्यात् खल्लेन कज्जलीम् ।
तयोः समं तीक्ष्णचूर्णं मर्दयेत् कन्यकाद्रवैः ॥ १०० ॥
द्वियामान्ते कृतं गोलं ताम्रपात्रे विनिक्षिपेत् ।
आच्छाद्यैरण्डपत्रेण यामार्द्धंऽत्यूषणा भवेत् ॥ १०१ ॥
धान्यराशौ न्यसेत् पश्चादहोरात्रात् समुद्धरेत् ।
* मञ्जूषं गालयेद्रस्ते सत्यं वारितरं भवेत् ॥ १०२ ॥

गैव, तेन दशपिप्पलिकाचौद्र सहावलेह्या रसस्य ज्ञातव्य, अथवा एकोनत्रिंशद्दूषणैरिति—एकोनत्रिंशत्सङ्ख्याकमरिचैः सचौद्रैरवलेह्यो बोद्धव्य । एके "माक्षिकेण त्रिंशद्दूषणैः" इति पठन्ति, तत्र घृतमरिचैः सह प्रचार साधु । केवलचौद्रेणापीति केचित तथा च भिन्न सगाङ्क तन्त्रान्तरे दृष्ट्वा प्रतिपादितम, यत,—"अष्टभिर्मरिचैर्युक्ता क्षणावयुताऽथवा । विलोक्य देया दोषादिम् एकैकरसवर्द्धिका ॥ सर्पिषा मधुना वाऽपि दद्याद्दोषाद्यपेक्षया ॥" इत्यादि ॥ ९५—९९ ॥

अथ अग्निरसविवरणमाह, शुद्धं सूतमिति ।—द्विधा गन्धमिति शुद्धपारदपरिमाणात्, गन्धकमप्यत्र शोधित ग्राह्यम् । तयो समं तीक्ष्णचूर्णमिति—तीक्ष्णचूर्णं पाषाणादिघर्षणान्नघ्नम्, स्तलीहृचूर्णञ्चेति केचित, तयो सममिति—गन्धकपारदमाश्र्य भवति । कन्यका कुमारी । मर्दनञ्च यावत् शुष्कात्र स्यात बहुतरायासेनेत्यर्थ । द्वितपाठ्यान्तु—पूर्वोक्तद्रव्यपिण्डं सङ्कृत्य एरण्डपत्रैरावेष्ट्य पश्चात्तमसम्पुटके धृत्वा तदन् सम्पुटमपि पत्रैराच्छाद्य घर्मे धारयेत यावदुष्ण भवति, पश्चात तत् सम्पुट यथोक्तमेव धान्यराशौ सप्ताहपेत अहोरात्र यावत्, सम्प्रदाये तु त्रिदिनपर्य्यन्त

---

* गूढार्थदीपिकायां "वारितरं भवेत्" इत्यनन्तर "भावयेत् कन्यकाद्रावै सप्तधा मृदुजैस्तथा । काकमाचीकुरण्टाद्यै द्रवैर्मुण्ड्या पुनर्नवै ॥ सहदेव्यमृतानीलीनिर्गुण्डीचित्रजैस्तथा । सप्तधा तु पृथक् द्रावैर्भाव्य शोष्य तथाऽऽतपे ॥ सिद्धयोगो ह्ययं ख्यात सिद्धानाञ्च मुखागत । अनुभूतो मया सत्य सर्वरोगगणापह ॥ खर्पादीन् मारयेदेव चूर्णीकृत्य तु लोहवत् ॥" इत्यधिक. पाठ. ।

त्रिकटुत्रिफलैलाभिर्जातीफललवङ्गकैः।
नवभागोन्मितैरेतैः समं पूर्वरसो भवेत् ॥ १०३ ॥
सचूर्णं लेहयेत् क्षौद्रैर्भक्ष्य निष्कद्वयं दृढम्।
क्षयमग्निरसा नाम्ना क्षयकासनिकृन्तनः ॥ १०४ ॥

कासे अमृताणवो रस ।—

(पारद गन्धक शुद्ध सूतलोहस्य टङ्कणम।
राम्नाविडङ्गत्रिफला-देवदारुकटुत्रयम् ॥
अमृता पद्मकं क्षौद्र विश्व तुल्यांशचूर्णितम्।
त्रिगुञ्जं सर्वकासार्त्तैः सेवयेदमृतार्णवम् ॥)

श्वासे सूर्यावर्त्तो रस ।—

* सूतार्द्धो गन्धको मर्द्यो यामैक कन्यकाद्रवैः।
द्वयोस्तुल्यं ताम्रपत्रं पूर्वकल्केन लेपयेत् ॥ १०५ ॥
दिनैकं स्थालिकायन्त्रे पक्वमादाय चूर्णयेत्।
सूर्यावर्त्तो रसो ह्येष त्रिगुञ्जः श्वासमर्जिद्भवेत् ॥ १०६ ॥

धारयेत् वक्ष्यमाणलोहरसायने विहितत्वात। एव सिद्धो रसोऽपरद्रव्यैः सह साम्यो भक्ष्य तत यथा, त्रिकटुक प्रसिद्धम्। त्रिफला हरीतक्यादिकम। एला इलैची। जातीफल प्रतीतम्। लवङ्गमपि विख्यातम्। एतच्च नवद्रव्य पूर्वरससाम्य सचूर्ण्य निष्कद्वय टङ्कद्वय क्षौद्रै सहावलह्यमित्यर्थ ॥ १००—१०४ ॥

अथ सूर्यावर्त्तरसमाह, सूतार्द्धो गन्धको मर्द्य इति।—सूत पारद, स च गन्धकपरिमाणादर्द्धो ग्राह्य इत्यभिप्राय, तथा च तन्त्रान्तरे—"सूतमेक द्विधा गन्ध याम कन्याविमर्दितम्। द्वयोस्तुल्यं ताम्रपत्रं स्थाल्या गर्भे निरोधयेत ॥ सम्यक् सल्लवणे सार्द्ध चतुर्यामं पचेत सुधी ॥" इत्यादि। श्वेष सुबोधम्। अनुपानमप्यत्र दोषविशेषेण देय न दोष ॥ १०५।१०६ ॥

---

* "सूतार्द्धो गन्धको मर्द्य." इत्यत्र "सूतक गन्धक मर्द्यम्" इति रसेन्द्रे पाठ.।

वातव्याधौ स्वच्छन्दभैरवो रस ।—

शुद्ध सूतं मृतं लोह ताप्य गन्धकतालके ।
पथ्याऽग्निमन्थं * निर्गुण्डी वृषण टङ्कण विषम् ॥१०७॥
तुल्याश मर्दयेत् खल्ले दिनं निर्गुण्डिकाद्रवैः ।
सुण्ठीद्रावैर्दिनैकन्तु द्विगुञ्ज वटकीकृतम् ॥ १०८ ॥
भक्षयेद्वातरोगार्त्तो नाम्ना स्वच्छन्दभैरवम् ।
राम्नाऽमृताटेवदारु-शुण्ठीवातारिज घृतम् ॥
सगुग्गुलुं पिबेत् कोष्णमनुपान सुखावहम् ॥ १०९ ॥

यक्ष्मा हसपोट्टली रस ।—

दग्ध्वा कपर्दकं पिष्ट्वा वृषणं टङ्कणं विषम् ।
गन्धक शुद्धसूतञ्च तुल्य जम्बीरजैर्द्रवैः ॥ ११० ॥
मर्दयेद्वत्सयेन्माष † मरिचाज्य लिहेदनु ।
निहन्ति ग्रहणीरोग पथ्य तक्रौदन हितम ॥ १११ ॥

अथ स्वच्छन्दभैरवरसमाह, शुद्धमिति ।—शुद्ध सूतमिति—रसोद्धारत रस मूर्च्छितमित्यर्थ । ताप्य स्वर्णमाक्षिकम्, एतदपि शोधित ग्राह्यम । गन्धकतालकमपि शुद्धमेव देयम्, तालक हरितालम् । पथ्या हरीतकी । अग्निमन्थोऽरणिभेद । वृषण चिरटुकम् । टङ्कण सौभाग्यक्षार, तच्चाव भर्जित ग्राह्यम् । विषमपि एकद्रव्य-भागसाम्यम् । सकलद्रव्यमपि समभावम । निर्गुण्डिकाद्रवैरिति —निर्गुण्डिपत्तस्वरसै । सुण्ठी केदारसुण्ठी विख्याता, अथवा स्वरसैरपि दिनैक मर्दनीयम । अनुपानमाह— राम्ना सुरभौ । अमृता गुडूची । देवदारु शुण्ठी च प्रसिद्धा । वातारिरेरण्डमूलम् । एतषा समाना घृत क्वथितमित्यर्थ । गुग्गुलुमेव प्रक्षेपमाह ॥ १०७—१०९ ॥

अथ हसपोट्टली रस, दग्ध्वा कपर्दकमिति ।—कपर्दक वराटक, तदभावे शङ्खो ऽप्यत्र ग्राह्य । मर्दनमेव यामचतुष्टय यावदिति सम्प्रदाय । मरिचाज्यप्रमाणन्तु दोषापेक्षयाऽवगन्तव्यम्, अवाज्य घृतम । निहन्ति रोगमिति —रोगसतीसारप्रभृतिकम् ।

---

* रसेन्द्रे "निर्गुण्डी" इत्यत्र "शुङ्खी" इति पाठात वातगजाङ्कुशनाम्ना पठिता-ऽय योग ।

† "मरिचाज्यम्" इत्यत्र "मरिचाद्रकम्" इति रसेन्द्रे पाठ ।

अश्वमार्या विविक्रमो रस ।—

मृत ताम्रमजाचौरैः पाच्य तुल्यैर्गतद्रवम् ।
तत्ताम्र शुद्धसूतञ्च गन्धकञ्च समं समम् ॥ ११२ ॥
निर्गुण्डीस्वरसैर्मर्द्यं तद्गोलं मन्थयेद्दिनम् ।
यामैक बालुकायन्त्रे पाच्यं भोज्य द्विगुञ्जकम् ॥ ११३ ॥
बीजपूरकमूलन्तु सजलञ्चानुपाययेत् ।
रसस्त्रिविक्रमो नाम्ना मासैकेनाश्मरोप्रणुत् ॥ ११४ ॥

कुष्ठे महातालेश्वरो रस ।—

तारं ताप्य शिला सूतं शुद्ध सैन्धवटङ्कणे ।
समांशं चूर्णयेत् खल्ले सूताद्विगुणगन्धकम् ॥ ११५ ॥
गन्धतुल्य मृत ताम्र जम्बीरैर्दिनपञ्चकम् ।

तद्गोदनमिति—तक्र विभागमिश्रम, तथा हि—"विषादाम्बुहृतस्नेह तक्र याहि लघु स्मृतम्" इति ॥ ११०-१११ ॥

अथ विविक्रमरसमाह, मृत ताम्रमजाचौरैरिति ।—मृत ताम्र ताम्रभस्म, छागीचौरेण भाव्य कृत्वा लाङ्गले सम्भरपात्रे वा सम्पाचयेत् यावद्गतद्रव भवति, इत्यनेन मृततासंज्ञा कथितेत्यभिप्राय । तद्गोल मन्थयेदिति—तद्भव्यगोलक मूषा-सम्पुटे मेलयित्वा तन्मुख सम्भव्य बालुकायन्त्रे सम्पाच्य सिद्धो भवति । बालुकायन्त्र रससारणाध्याये प्रोक्तम । भोज्य द्विगुञ्जकमिति—भोज्य भक्ष्य द्विगुञ्जमित्यर्थ । बीजपूरजटाकल्कमनुपानस्य दोषापेक्षया ॥ ११२—११४ ॥

अथ महातालेश्वररसमाह, तारमिति ।—तार रौप्यम । ताप्य स्वर्णमाक्षिकम । शिला मनःशिला । सूत पारदम् । शुद्धशब्द तारादिभि प्रत्येकमभिसम्बध्यते । टङ्कण

* "तारम्" इत्यत्र "तालम्" इति पाठ रसेन्द्रे गूढार्थदीपिकायाञ्च । किञ्च रसेन्द्रे अन्य अपरमपि पाठवैषम्य दृश्यते तथा च—"तालताप्यशिलासूत शुद्ध टङ्कण-सैन्धवम् । सम सचूर्णयेत खल्ले सूताद्विगुणगन्धकम् ॥ गन्धाद्विगुणलौहञ्च जम्बीरास्लेन मर्दयेत । ततो लघुपुटे पाच्य खाङ्गशीत समुद्धरेत् । त्रिशदश विषशाक चिक्षा सर्व विचूर्णयेत् । माक्षिकाख्येन सम्मिश्र निम्बार्क भक्षयेत् सदा ॥ मध्व ज्यवांगुलीचूण कर्षं लिह्यात्तत परम् । सर्वान कुष्ठान् निहन्त्याश्च महातालेश्वरो रस ॥" इति ।

मर्द्यं षड्भिः पुटैः पाच्य भूधरे सम्पुटोदरे ॥ ११६ ॥
पुटे पुटे द्रवैर्मर्द्यं सर्वमेतत्तु षट्पलम्।
द्विपलं मारित ताम्र लोहभस्म चतुष्पलम् ॥ ११७ ॥
जम्बीराम्लेन तत् सर्वं दिनं मर्द्यं पुटेलघु।
त्रिशदंशं विषचास्य क्षिप्त्वा सर्वं विचूर्णयेत् ॥ ११८ ॥
माक्षिकाज्येन सम्मिश्र निष्काई भक्षयेत् सदा।
मध्याज्यैर्वाकुचीचूर्णं कर्षमात्रं लिहेदनु ॥
सर्वकुष्ठानि हन्त्याशु महातालेश्वरो रसः ॥ ११९ ॥

कुष्ठे कुष्ठकुठारी रस।—

भस्मसूतसमो गन्धो मृतायस्ताम्रगुग्गुलू।
त्रिफला च महानिम्बखित्तकस्य शिलाजतु ॥ १२० ॥
इत्येतच्चूर्णित कुर्य्यात् प्रत्येक शाणषोडश।
चतुर्षष्टिः करञ्जस्य बीजं चूर्णं प्रकल्पयेत् ॥ १२१ ॥

सौभाग्यकारम, एतेषा साम्यमानमित्यर्थ। शोधित गन्धक मृतताम्रञ्च द्विगुण ग्राह्य सूतपरिमाणात्। जम्बीरेरिति—जम्बीरफलरसै, दिनपञ्चक यावत् पुन पुन-र्जम्बीररस दत्त्वा मर्दनीय, घर्मे इति शेष। पश्चाद्भूधरयन्त्रे मृन्मयमूषासम्पुटोदरे क्षिप्त मुद्रितञ्च सकल द्रव्य पाचितमित्यर्थ। एव षड्वार यावत् पुट देय प्रतिपुटे तु जम्बीररसे क्षिप्त्वा मर्दनीयम्। एतन्मर्दन यथाकाल, नाव पञ्चदिनमर्दन नियत-मिति सम्प्रदाय। अथवा वक्ष्यमाणमर्दनाभप्रायेण दिनमेक यावत्। भूधरयन्त्रन्तु पूर्वोक्तद्विगभंरसे द्रष्टव्यम्। एव सशिष्टमिद षट्पलप्रमित मृदुक्त्वा वक्ष्यमाण-द्रव्ये सह पुनर्मर्दयेत, दिनमेकन्तु जम्बीररसेनेत्यर्थ। तदन लघुपुट पूर्वोक्तेन विधा-नेन देयम्, कुक्कुटपुटमित्यन्ये। पुनरपि एव सिद्धस्यास्य यत त्रिशद्भाग तेन सम विष योज्यमित्यर्थ। माक्षिक घृतञ्चाव चूर्णलाक्षपरिमाण देयम्। निष्काई टङ्काई, माषकद्वयमिति यावत्। सदा शब्दोऽत्र रससेव्यविषय सूचयति, तेन सेव्योऽय रस इति तात्पर्यार्थ। अनुपाने तु वाकुची सोमराजीफलानि। आज्यमत्राप माक्षिकम ॥ ११५—११९ ॥

अथ कुष्ठकुठाररसमाह, भस्मसूतसम इति।—भस्मसूतसमो गन्ध इत्यनेन रसादि-शिलाजतुपर्य्यन्त द्रव्य पृथक् षोडशशाणमित ग्राह्य, तत्र मृतायो मारितलोहचूर्णं मृत-

चतुःषष्टिर्मृतञ्चाभ्र मध्वाज्याभ्यां विलोडयेत्।
स्निग्धभाण्डे धृत खादेद्दिनिष्क सर्वकुष्ठनुत्॥
रसः कुष्ठकुठारोऽय गलत्कुष्ठनिवारणः॥ १२२॥

कुष्ठे श्वित्रे च उदयादित्यो रस।—

शुद्ध सूत द्विधा गन्धं मर्द्यं कन्याद्रवैर्दिनम्।
तत् गोलं पिठरीमध्ये ताम्रपात्रेण रोधयेत्॥ १२३॥
सूतकार्द्धिगुणेनैव शुद्धेनाधोमुखेन च।
पार्श्वे भस्म निधायाथ पात्रोर्द्धं गोमय जलम्॥ १२४॥

ताम्रचूर्णञ्च। विफला हरीतक्यादिकम्। महानिम्बो "वकाइन" शब्दवाच्य। करञ्जो ज्ञेयः करञ्ज, अस्य बीज फल चतुःषष्टिभागमित्यर्थः। मधुघृतपरिमाणन्तु यावत सकल द्रव्यम् आलोडित स्यात्, तावन्मान योज्यमिति। द्विनिष्क द्वेद्वय, द्विनिष्कादधिकमानमपि देय न दोष। उक्तमन्यत्रापि—"रसो बलिस्तामय पुरोऽग्नि शिलाजतु स्यादिषतिन्दुकस्य। * वरा च तुल्य गगन करञ्ज पृथक् पृथक् भागचतुष्टयञ्च॥ सम्मर्द्य सर्व मधुना घृतेन घृतस्य पात्रे निहित प्रयत्नात्। कर्षे भजेत प्रत्यहमस्य पथ्य शाल्यादन दुग्धमधुवयञ्च॥ विशीर्णकर्णाङ्गुलिनासिकोऽपि भवेदनेन अरतुल्यमूर्त्ति। दारापरित्याग इह प्रदिष्टो जलौदन तत्र निबद्धमूर्त्ति॥" इति॥ १२०—१२२॥

अथोदयादित्यरसमाह, शुद्धं सूतमिति।—द्विधा गन्ध द्विगुणित गन्धक पारदभागादिति शेष। कन्या कुमारी। दिन दिनमेक यावत। पिठरी मृदा निर्मितपात्रविशेष। सूतकार्द्धिगुणेनेति—एतेन ताम्रशरावक पारदपरिमाणात् द्विगुणितमानेन घटित विद्यात्। शुद्धेनेति—शुद्धताम्रनिर्मितेन अथवा अभ्रद्रव्यादिना शोधितशरावकेणेत्यर्थः। शुद्ध ताम्र खलजात्युत्कृष्टम्, यत तत्ताम्र द्विविधम्, एक म्लेच्छसज्ञम्, अपर नैपालमिति, तथा हि—"म्लेच्छ नैपालक ताम्र तयोर्नैपालमुत्तमम्" इति।

---

* "वरा च—"इत्यादिरत्ने रसेन्द्रे—"वरा च तुल्य गगनञ्च सर्वं करञ्जबीज सचतुष्टयञ्च"इति पाठ, तत्रास्य "गलत्कुष्ठारिरस" इति नाम। टीकाकारेण मूलश्लोकस्य समथनार्थं यदय योग प्रदर्शित तन्न समीचीनतया प्रतिभाति, यत मूले महानिम्बपाठ, टीकाया विषतिन्दुक इति पाठ, तथा योगद्वयस्य भागवैषम्यमपि विद्यते, एवञ्च मूलयोगात् टीकोक्तयोग पृथगिति मन्तव्यम्।

किञ्चित् किञ्चित् प्रदातव्य चुल्लया यामदय पचेत्।
चण्डाग्निना तदुद्धृत्य स्वाङ्गशातं विचूर्णयेत्॥ १२५॥
काष्ठोडम्बरिकावल्कं त्रिफलाराजवृक्षकम्।
विडङ्ग वाकुचीबीज क्वाथयेत्तेन भावयेत्॥ १२६॥
दिनैकमुदयादित्यो रसो देयो द्विगुञ्जकः।
विचर्चिका टढकुष्ठ श्वेतकुष्ठञ्च नाशयेत्॥ १२७॥
अनुपानञ्च कर्त्तव्य वाकुचीफलचूर्णकम्।
खदिरस्य कषायेण समेन परिपाचितम्॥ १२८॥
त्रिशाण तत् गवा क्षीरै क्वाथैर्वा त्रैफलै पिबेत्।
त्रिदिनान्ते भवेत् स्फोट सप्ताहाद्वा किलासके॥ १२९॥
नीलीं गुञ्जाञ्च कासीस धुस्तूरं हसपादिकाम्।
सूर्य्यभक्ताञ्च चाङ्गेरीं पिष्टाऽऽमूलात् प्रलेपयेत्॥ १३०॥
स्फोटस्थानप्रशान्त्यर्थं सप्तरात्र पुनः पुनः।

कर्त्तव्यविधिरस्यस्य यथा—तत् गोलकाकार द्रव्य दृढतलदृण्डिकान्ते निवेश्य तदुपरि ताम्रपिधानकं दत्त्वा पश्चात् सन्धि मुद्रयित्वा विशोष्य तदनु सुदोपरि अङ्गुलद्वयोत्सेध सर्वतो भस्मावकीर्य्य पश्चात् ताम्रशरावोपर्य्येव सजलगोमय किञ्चित किञ्चिदिति वार वार दापयेत्, यावत् यामदय भवति तावत् खराग्निना पचेदित्यभिप्राय। अथ पश्चात् काव्यमाह—एव निष्पन्नामम रस सचूर्ण्य पश्चात् काष्ठोडुम्बरिकादीना क्वाथेन भावयत् तेन सप्ता भवति। दिनैकमिति—प्रत्येक द्रव्यमेकैक दिन भावयत्। काष्ठोडुम्बरिका "कटगुलार" शब्दवाच्या। राजवृक्षक कृतमालक तस्य पर्याणि। अस्यानुपानमाह—खदिरस्य खदिरसारस्य कषायेण क्वथितरूपेण समेन वाकुचीफलचूर्णसमानमानेन सह परिपाचित तदिति—वाकुचीचूर्ण, तच्च त्रिशाण टङ्कत्रय सङ्ख्य गवा क्षीरे त्रैफले क्वाथैर्वा पिबेत् रसमिति। किलासके कुष्ठविशेषे, श्वित्रभेदो वा किलास इति वाच्य। एके किलास इत्यस्य स्थाने न सशयमिति पठन्ति व्याख्यानयन्ति च। पश्चात् ते स्फोटा वक्ष्यमाणप्रलेपात् आमूल यथा स्यात् तथा प्रलेपिता कार्य्या, तेन सकलस्फोटा सघन प्रलेपिता कार्या इति भाव। केचित् "पिष्टाऽऽमूलात् प्रलेपयत" इत्यस्य स्थाने "तुल्य पिष्टा प्रलेपयेत" इति पठन्ति। लेपार्थं

श्वेतकुष्ठं निहन्त्याशु साध्यासाध्यं न संशयः ॥ १२१ ॥
अपरः श्लिलेपोऽपि कथ्यतेऽत्र भिषग्वरैः।
गुञ्जाफलाग्निचूर्णञ्च लेपितं श्वेतकुष्ठनुत् ॥
श्लिलाऽपामार्गभस्मापि लिप्तं श्वित्रं विनाशयेत् ॥ १२२ ॥

सुप्तिकुष्ठे सर्वेश्वरो रसः।—

शुद्धं सूतं चतुर्गन्धं पलं यामं विचूर्णयेत्।
मृतताम्राभ्रलोहानां दरदञ्च पलं पलम् ॥ १२३ ॥
सुवर्णं रजतञ्चैव प्रत्येकं दशनिष्ककम्।
माषैकं मृतवज्रञ्च तालसत्त्वं पलद्वयम् ॥ १२४ ॥
जम्बीरोन्मत्तवासाभिः स्वक्कर्कविषमुष्टिभिः।
मर्द्यं हयारिजैर्द्रावैः प्रत्येकेन दिनं दिनम् ॥ १२५ ॥
एवं सप्तदिनं मर्द्यं तत् गोलं वस्त्रवेष्टितम्।
बालुकायन्त्रगं स्वेद्यं त्रिदिनं लघुवह्निना ॥ १२६ ॥
आदाय चूर्णयेच्चूर्णं पलैकं योजयेद्विषम्।

द्रव्याण्याह, नीलीत्यादि।—नीलीत्यत्र तिल इति केचित्। अथापरो वक्ष्यमाणं प्रलेपो लेपको इति मन्यमाना पठन्ति (?) ॥ १२१—१२२ ॥

अथ सर्वेश्वररसमाह, शुद्धं सूतमित्यादि।—शोधितं पारदं पलप्रमाणं ग्राह्यम्। गन्धं गन्धकं चतुरंशं—चतुष्पलं वक्ष्यमाणपलग्रहणात्, तेन रसोऽपि पलप्रमाणं इति भावः। यामं विचूर्णयेदिति—तयोः शुद्धरसगन्धकयोः कज्जलीं कुर्यादित्यभिप्रायः। मृतताम्राभ्रलोहानामिति—मृतताम्रं मृतमभ्रकं मृतलोहमिति। मृतग्रहणेन दरदं छिन्नमपि शोधितं ग्राह्यम्। सुवर्णं रजतञ्चैवेति—चकारग्रहणात् सुवर्णरौप्यमपि मृतं देयम्। मृतवज्रं मृतहीरकम्। तालसत्त्वं हरितालसत्त्वम्। अथ भावनार्थं द्रव्यमाह, जम्बीरेत्यादि।—उन्मत्तो धुस्तूरकः। स्वक्कर्कौ पत्ररसः, स्नुही सेहुण्डः। विषमुष्टिः कुचलाशब्दवाच्यः, एके विषमुष्टिशब्देन महाविषं, तन्न सर्वसंमतम्। हयारिः करवीरः। बालुकायन्त्रगं स्वेद्यमिति—बालुकायन्त्रं प्रसिद्धम्। अन्यत् सुप्रदायेतु तत् पीठलोकम् उक्तद्रव्यकल्केन प्रलेपितं कृत्वा पश्चात् बालुकायां भूमि-

हिपल पिप्पलीचूर्णं मिश्र सर्वेश्वरो रसः ॥
हिगुञ्जो लिह्यते चौद्रे सुप्तिमण्डलकुष्ठनुत् ॥ १३७ ॥
वाकुची देवकाष्ठञ्च कर्षमात्रं सुचूर्णयेत्।
लिहेदेरण्डतैलाक्तमनुपान सुखावहम् ॥ १३८ ॥

सुप्तिकुष्टे स्वर्णचौरी रस ।—

हेमाह्वा पञ्चपलिका क्षिप्ता तक्रघटे पचेत्।
तक्रे जीर्णे समुद्धृत्य पुन. क्षीरघटे पचेत् ॥ १३९ ॥
क्षीरे जीर्णे समुद्धृत्य क्षालयित्वा विशोधयेत्।
तच्चूर्णं पञ्चपलिक मरिचाना पलद्वयम् ॥ १४० ॥
पलैक मूर्च्छित सूतमेकीकृत्य तु भक्षयेत्।
निष्कैक सुप्तिकुष्टार्त्त' स्वर्णक्षीरो रसो ह्ययम् ॥ १४१ ॥

प्रमेहे मेहवज्री रस ।—

* भस्मसूतं मृत कान्त मुण्डभस्म शिलाजतु।
शुद्धं ताप्यं शिला व्योम त्रिफलाऽङ्कोलबीजकम् ॥ १४२ ॥

गतायां मध्ये क्षिप्त्वा तदुपरि सप्ताष्टभिर्गोमयैराद्दीपयेत्, तेन सिद्धो भवति। एव त्रिदिनमित्यनेन विवेलमिति व्याख्यातम्। शेष सुगमम् ॥ १३३—१३८ ॥

अथ स्वर्णक्षीरीरसविवरणमाह हेमाह्वामिति।—हेमाह्वा स्वर्णक्षीरी "चोक" इति प्रसिद्ध। तक्रघटादिविधानञ्चास्य गुडो कथितम्। मूर्च्छित सूतमिति कज्जा-हरत्वात्, तथा हि—"सूतो हन्ति जरामत्यु मूर्च्छितो व्याधिघातक। बद्ध खेचरता दद्यात् कीऽन्य सूतात् कृपाकर ॥" इति। क्षालयित्वा विशोधयेदित्यस्य स्थाने जले प्रक्षाल्य शोधयेदिति पाठ ॥ १३९—१४१ ॥

इदानी मेहवज्ररसमाह, भस्मसूतमिति।—भस्मसूत पारदभस्म। मृत कान्तमिति —मृतकान्तलौहचूर्ण, कान्तलौह लौहसारणे पूर्व दर्शितम। मुण्डभस्मेति—मुण्डमपि लौहविशेष, एतदपि पूर्व कथितमेव, केचि मुण्डमिति किट्टविशेष मन्यन्ते, तन्न सर्व मतम्। केचिन्मुण्डस्थाने उरगभस्मेति पठन्ति, तत्र उरगभस्म नागभस्मेति कस्य-

* रसेन्द्रोक्तमेहवज्रेण सह अस्य किञ्चन्मात्र वैलक्षण्य दृश्यते, यथा—"कान्त मुण्डभस्म व्योम अङ्कोलबीजक षट्सम्मितानि" इत्येतेषु स्थानेषु रसेन्द्रे यथाक्रम "कान्तलौहभस्म व्योम बिल्वजीरक षड्निष्कम्" इति पाठान्तराणि।

कपित्थ रजनीचूर्णं भृङ्गराजेन भावयेत्।
त्रिशद्वारं विशोष्याथ मधुयुक्तं लिहेत् मदा॥ १४३॥
निष्कमात्रो हरेन्मेहान्मेहवज्रो रसो महान्।
महानिम्बस्य बीजानि पिष्ट्वा षट्सम्मितानि च॥ १४४॥
पलतण्डुलतोयेन घृतनिष्कद्वयेन च।
एकीकृत्य पिबेच्चानु हन्ति मेह चिरन्तनम्॥ १४५॥

उदररोगे महावाङ्ग रस।—

चतु: सूतस्य गन्धाष्टौ रजनी त्रिफला शिवा।
प्रत्येकञ्च द्विभाग स्यात्त्रिवृज्जेपालचित्रकम्॥ १४६॥
प्रत्येकञ्च त्रिभाग स्यात्कृष्ण दन्ती च जीरकम्।
प्रत्येकमष्टभाग स्यादेकीकृत्य विचूर्णयेत्॥ १४७॥
जयन्तीस्नुक्पयोभृङ्ग-वह्निवातारितैलकै।

चित्रतम्। शुद्ध ताप्यमिति—ताप्य सुवर्णमाक्षिकम। शिला मन शिला। व्योम अभ्रकम, एके व्योमस्थाने व्योषमिति पठन्ति व्याख्यानयन्ति च, तत्र व्योष त्रिकटुकम। त्रिफला हरीतक्यादिकम। भृङ्गोत्थबीज प्रसिद्धम। कपित्थ कपित्थफलम। रजनी हरिद्रा। भृङ्गराजो मार्कवशब्दवाच्य। एतत सकल द्रव्य समभाग ग्राह्यमिति सम्प्रदाय। एके भृङ्गराजेन भावयेदित्यस्य स्थाने सप्त भाव्यञ्च भृङ्गिनामिति पठन्ति। निष्कमात्र इति—चतुर्मासक। अनुपाने तु महानिम्बो "वकाऽन" सज्ञक, तस्य बीजानि फलानि तानि च षट्सङ्ख्यानि ग्राह्याणि। तण्डुलतोय पलप्रमाणम्। शेष सुगमम॥ १४२—१४५॥

अथ महावङ्गिरसमाह, चतु सूतस्येति।—सूतस्य पारदस्य चत्वारो भागा। गन्धकस्य चाष्टौ भागा। रजनीप्रभृति पञ्चद्रव्याणि पृथक् द्विभागयुतानि भवन्ति, रजनी हरिद्रा। त्रिफला हरीतक्यादिकम। शिवा हरीतकी, अनेन हरीतकी द्विकलेन भागात सैव द्विगुणा कार्या, काचिच्छिवाख्याने शिला इति पठन्ति व्याख्यानयन्ति च, तत्र शिला मन शिला। त्रिवृज्जेपालचित्रक प्रत्येक त्रिभागयुत ग्राह्यम, त्रिवृत्रिशोत। जैपाल दन्तिबीजम। चित्रक चित्रकगटात्मक्। कृष्ण दन्ती च जीरकमपि प्रत्येकमष्टभाग ज्ञेयम्, कृष्ण कृष्णम, तच्च शुण्ठीमरिचपिप्पलीसङ्गम। दन्ती प्रसिद्धा।

प्रत्येकेन क्रमाङ्ग्राह्यं सप्तवार पृथक् पृथक् ॥ १४८ ॥
महावह्निरसो नाम निष्कमुष्णजलैः पिबेत्।
विरेचनं भवेत्तेन तक्रभक्तं ससैन्धवम् ॥ १४९ ॥
दिनान्ते दापयेत् पथ्य वर्जयेच्छीतल जलम्।
सर्वोदरहर प्रोक्तो मूढवातहरः परः ॥ १५० ॥

गुल्मप्लीहादौ विद्याधरी रस।—

गन्धकं तालक ताप्य * सूततास्र मनःशिलाम्।
शुद्धं सूतञ्च तुल्यांशं मर्दयेद्भावयेद्दिनम् ॥ १५१ ॥
पिप्पल्यासु कषायेण वज्रीक्षीरेण भावयेत्।
निष्कार्द्धं भक्षयेत् क्षौद्रैर्गुल्म प्लीहादिकं जयेत् ॥
रसो विद्याधरो नाम गोमूत्रञ्च पिबेदनु ॥ १५२ ॥

परिणामशूले विनेत्रो रस।—

टङ्कणं हारिण शृङ्गं स्वर्णं + शुल्व सूत रसम्।
दिनैकमार्द्रकद्रावैर्मर्द्यं रुद्ध्वा पुटे पचेत् ॥ १५३ ॥

क्षीरक श्वेतम्। अथ भावनार्थं द्रव्याण्याह, जयन्तीत्यादि।—जयन्ती शाकभेद, लोवन्तीत्यपरे। स्नुक्पय सेहुण्डक्षीरम्। शृङ्गं मार्कव, तच्च घमराशब्दवाच्य, न तु शृङ्गमत्र गुडत्वक्। वह्निशिवक। वातारितैलमेरण्डतैलम्। शेषं सुबोधम् ॥ १४६—१५० ॥

अथ विद्याधररसमाह, गन्धकमिति।—ताप्यमत्र सुवर्णमाक्षिकम्। शुद्धसूतमिति—संस्कारितसूतम्, एतत सकल समभाग मर्दयेत्। भावयेद्दिनमिति—पूर्वं द्रव्य सकल सम्यर्द्धं पश्चादुक्तद्रवेण भावयेत्। दिनमिति—प्रत्येकम्। शेष सुगमम् ॥ १५१।१५२ ॥

अथ विनेत्ररसमाह, टङ्कणमिति।—टङ्कण सौभाग्यक्षार तच्चात्र भर्जित ग्राह्यम्।

---

* "सूततास्रम्" इत्यत्र "स्वर्णं" "क्षौद्रैः" इत्यत्र "सूतानुपानत" "गोमूत्रम्" इत्यत्र "गोदुग्धम्" इति रसेन्द्रे।

+ रसोऽयं "शुल्वम्" इत्यत्र "गन्ध" इति पाठभेदेन त्रिगुणाख्यरसनाम्ना रसेन्द्रे पठित।

त्रिनेत्राख्यरसस्यैकं माषं मध्याज्यकैर्लिहेत्।
सैन्धवं जीरकं हिङ्गु मध्याज्याभ्यां लिहेदनु॥
पक्षिशूलहरं ख्यातो मात्रमात्रान्न संशयः॥ १५४॥

शूले शूलगजकेशरी रस।—

शुद्धं सूतं द्विधा गन्धं यामैकं मर्दयेद्दृढम्।
द्वयोस्तुल्यं शुद्धताम्रं सम्पुटे तन्निरोधयेत्॥ १५५॥
ऊर्ध्वाधो लवणं दत्त्वा मृद्भाण्डे धारयेद्भिषक्।
ततो गजपुटे पक्त्वा स्वाङ्गशीतं समुद्धरेत्॥ १५६॥
सम्पुटं चूर्णयेत् सूक्ष्मं पर्णखण्डे द्विगुञ्जकम्।
भक्षयेत् सर्वशूलार्त्तो हिङ्गु शुण्ठीं च जीरकम्॥ १५७॥
* वचामरिचजं चूर्णं कर्षमुष्णजले पिबेत्।
असाध्यं नाशयेच्छूलं रसोऽयं गजकेशरी॥ १५८॥

अग्निमान्द्ये अग्नितुण्डीवटी रस।—

शुद्धसूतं विषं गन्धमजमोदा फलत्रयम्।
स्वर्जिक्षारं यवक्षारं वह्निसैन्धवजीरकम्॥ १५९॥
सौवर्चलं विडङ्गानि सामुद्रं लवणं समम्।
विषमुष्टिं सर्वतुल्यं जम्बीराम्लेन मर्दयेत्॥

स्वर्णं शुल्वनाम ताम्रवत् द्वयम्। रोधनमत्र शरावसम्पुटावधानम्। पुटमत्र गजपुटम्। शेषं सुगमम्॥ १५३-१५४॥

अथ गजकेशरीरसमाह, शुद्धं सूतमिति।—दृढमर्दनेनात्र रसगन्धकयोः कज्जली कृत्यादित्यभिप्रायः। सम्प्रदायस्तु, अम्लरसेन सह दृढमर्दनं कार्यं न दोषः। द्वयोस्तुल्यं शुद्धताम्रमिति—द्वयोः पारदगन्धकयोः। शुद्धताम्रं मृततास्रम्। एके द्वयोस्तुल्ये शुद्धताम्रसम्पुटे इति पठन्ति व्याख्यानयन्ति च, सम्पुटं चूर्णयेदिति वचनादयमेव पक्ष समीचीनः, तेन ताम्रसम्पुटे एव रसगन्धकमर्दनं रोधयेदित्यर्थ इति। अनुपानं हिङ्वादिचूर्णं वक्ष्यमाणं वचमानं सङ्कल्प्य चतुर्गुणेनोष्णोदकेन सह पिबेत्॥ १५५-१५८॥

अथाग्नितुण्डीवटीरसमाह, शुद्धसूतमित्यादि।—एके शुद्धसूतसमं गन्धमिति पठन्ति,

---

* "वचामरिचजं चूर्णम्" इत्यत्र "सौवर्चलं विडङ्गानि" इति पाठान्तरम्।

मरिचाभा वटीं खादेद्वह्निमान्द्यप्रशान्तये ॥ १६० ॥

अजीर्णे अजीर्णकण्टको रस —

शुद्धसूतं विष गन्ध सम सर्वं विचूर्णयेत्।
मरिच सर्वतुल्याश्च कण्टकार्य्याः फलद्रवैः ॥ १६१ ॥
मर्दयेद्भावयेत् सर्वमेकविंशतिवारकम्।
वटीं गुञ्जात्रय खादेत् सर्वाजीर्णप्रशान्तये ॥
अजीर्णकण्टकः सोऽय रसो हन्ति विसूचिकाम्॥ १६२ ॥

कफे मन्यानभैरवो रस।—

सूतं सूत शृत ताम्र हिङ्गु पुष्करमूलकम्।
सैन्धव गन्धक तालं कट्कीं चूर्णयेत् समम् ॥ १६३ ॥
पुनर्नवादेवदालो-निर्गुण्डीतण्डुलीयकैः।
तिक्तकोशातकोद्भवैर्दिनैकं मर्दयेद्दृढम् ॥ १६४ ॥
माषमात्रं लिहेत् क्षौद्रे रस मन्यानभैरवम्।
कफरोगप्रशान्त्यर्थं निम्बक्वाथ पिबेदनु ॥ १६५ ॥

विष न पठन्ति, तदसङ्गत, बहुस्थानेषु दृष्टत्वात। विषमुष्टि कुचैलाशब्दवाच्य, स च सकलद्रव्यपरिमाणेन साम्या योज्य। एके वह्निमान्द्यप्रशान्तये इत्यन्ते तदनुपानश्लोकमेक पठन्ति मानयन्ति च "पथ्या शुण्ठी गुडश्चानु पलार्द्धं भक्षयेत् सदा। अग्नितुण्डी वटी ख्याता सर्वरोगकुलान्तका॥" इति ॥ १५९।१६० ॥

अथाजीर्णकण्टकरसमाह, शुद्धसूतमित्यादि।—शुद्धरस शुद्धविष शुद्धगन्धकश्च एतत्त्रिक समभाव सङ्गृह्य तदनु एभिस्त्रिभि साम्यञ्च मरिचचूर्ण कृत्वा खल्वे तत्तुल्य सचूर्ण पश्चात्तत्क्वाथेन भावयेत् यावत्कविंशतिसङ्ख्यक भवति तावद्भावये-दित्यर्थ। कण्टकार्य्या इति—लघुकण्टकारिफलानि। केचिदनुपानाय श्लोकमेक पठन्ति,—"अनु स्यादीश्वरीमूल तोयपिष्टञ्च पाययेत्। अङ्गवाम्लमूल वा वारिणा ऽजीर्णजिद्भवेत॥" एतन्न प्रचरति ॥ १६१।१६२ ॥

अथ मन्यानभैरवरसमाह, सूत सूतमित्यादि।—अत्र पुष्करमूलाभावे कुष्ठ ग्राह्यम्। गन्धक तालमपि शोधित ग्राह्यम्, ताल हरितालम्। तण्डुलीयो मेघनाद. ॥ १६३—१६५ ॥

वातव्याधौ वातनाशनो रस ।—

सूतहाटकवज्राणि ताम्रं लोहञ्च माक्षिकम्।
ताल नीलाञ्जनं तुल्यम् * अब्धिफेनं समाशकम् ॥ १६६ ॥
पञ्चाना लवणानाञ्च भागमेकं विमर्दयेत्।
वज्रीक्षीरैर्दिनैकन्तु रुद्धाऽधो भूधरे पचेत् ॥ १६७ ॥
माषैकमार्द्रकद्रावैर्लेहयेद्वातनाशनम्।
पिप्पलीमूलजक्काथ सकणमनुपाययेत् ॥
सर्वान् वातविकारास्तु निहन्त्याक्षेपकादिकान् ॥ १६८ ॥

सन्निपातादौ कनकसुन्दरो रस ।—

कनकस्याष्टभागाः स्यु सूतो द्वादशभिर्मतः।
गन्धोऽपि द्वादश प्रोक्तस्ताम्र भागद्वयोन्मितम् ॥ १६९ ॥

अथ वातनाशनरसमाह, सूतहाटकवज्राणीति।—सूत पारदम्। हाटक सुवर्णम्। वज्र हीरकम्। एके माक्षिकस्थाने गन्धकमिति पठन्ति, एतन्नवीहरम्। ताल हरितालम्। नीलाञ्जन प्रसिद्धं, तदभावे सौसकं वाह्य तत्सदृशत्वात्। अब्धिफेन समुद्रफेनम्। एतत् सकल समभावम्। पञ्चाना लवणाना पञ्चभागा इत्यर्थ, "भिन्नसौवर्चलोपेत विड सामुद्र गडम" इति पञ्चलवणम्। रुद्धाऽधो भूधरे पचेदिति—एतत सकलम् एकदिन सम्मर्द्य पथाऽधरयन्त्रे अध पचेदित्यभिप्राय। भूधरयन्त्रन्तु पूर्वं दर्शितमेव। अनुपाने सकणमिति—पिप्पलीचूर्णं प्रक्षेपण कुर्यात। + अयमेव रसो ग्रन्थान्तरे भूतोन्मादार्थं पठित। अत्र क्वचित विपरीतता दृश्यते, तथा हि—"सूतायस्तामसमञ्च सूत स्वर्णं सम समम्। सूतपाद सूत वज्र ताल गन्धं सम शिलाम ॥ तुल्य नीलाञ्जन गुडमब्धिफेन सम रसात। पञ्चाना लवणानाञ्च प्रतिभाग रसोन्मितम ॥ चित्रकैर्भृङ्गराजेश्च वज्रीदुग्धेश्च मर्दयेत्। दिनान्ते गोलक कृत्वा रुद्धा गजपुटे पचेत ॥ महाभूताङ्कुशो नाम रसो गुह्याह्य लिखेत्। आर्द्रकस्य रसैरेव भूतोन्मादप्रशान्तये ॥ पिप्पल्याश्च पिबेच्चानु दशमूल कषायकम् ॥" इति ॥ १६६—१६८ ॥

अथ कनकसुन्दररसमाह, कनकस्येत्यादि।—कनकादीन्यत्र सूतानि ज्ञाप्यानि।

---

* "अब्धिफेनम्" इत्यत्र "अहिफेनम्" इति गू० दी०।

+ रसेन्द्रे वातव्याधौ वातनाशनरस, उन्मादे भूताङ्कुशरसश्च इयमेव अस्ति, परन्तु उभयोर्मेलनान्तर।

अभ्रकं स्याच्चतु शाणं माक्षिकञ्च द्विशाणिकम्।
वङ्गो द्विशाण* सौवीरं त्रिशाणं लोहमष्टकम् ॥ १७० ॥
विषं त्रिशाणिक कृत्वा लाङ्गली पलसम्मिता।
मर्दयेद्दिनमेकन्तु रसैरम्लफलोद्भवै. ॥ १७१ ॥
दद्याद्भृदुपुटं वङ्गो तत सूक्ष्म विचूर्णयेत्।
माषमात्रो रसो देय. सन्निपाते सुदारुणे ॥ १७२ ॥
आर्द्रकस्वरसेनैव रसोनस्वरसेन वा।
किलास सर्वकुष्ठानि विसर्पञ्च भगन्दरम् ॥
ज्वरं गरमजीर्णञ्च जयेद्रोगहरो रस ॥ १७३ ॥

सन्निपाते सन्निपातभैरवो रस ।—

रसो गन्धस्त्रिकर्षः स्यात् कुर्य्यात् कज्जलिका तयोः।
ताम्रतारारवङ्गाहि-सारास्त्रैकैककार्षिका ॥ १७४ ॥
शिग्रुज्वालामुखीशुण्ठी-विल्वेभ्यस्तण्डुलीयकात्।
प्रत्येक स्वरसै कुर्य्यात् यामैकैक विमर्दनम् ॥ १७५ ॥
कृत्वा गोलं धृतं वस्त्रे लवणापूरितं न्यसेत्।

शाणोपलक्षितत्वादत्र भाग एव बोद्धव्य, यथासम्भवत्वात्। कनकमत्र * सुवर्णम। सूत पारद। गन्धो गन्धक। सौवीर सौवीराञ्जनम्। लोह सारमञ्जम। लाङ्गली कलिहारिका। अम्लफलानि बीजपूरजम्बीरप्रभृतीनि। मृदुपुटमत्र गजपुटविशेषम्। शेष सुगमम ॥ १६९—१७३ ॥

अथ सन्निपातभैरवरसमाह, रसो गन्धस्त्रिकर्षं स्यादित्यादि।—रस पारद, गन्धो गन्धक, एतदुभय मिलित त्रिकर्षं स्यादित्यर्थ। ताम्रतारारवङ्गाहि-सारास्त्रैकैक-कार्षिका इति—ताम प्रसिद्धम्। तार रौप्यम्। आर पीतलोहम्। वङ्ग रङ्ग-वाच्यम्। अहि सीसकम्। सारो लोह। एतत्तामादिक सर्वं मृत वाह्यमिति सम्प्रदाय'। एकैककार्षिका इति—प्रत्येक कर्षसम्मिता इत्यभिप्राय। अपरमपि, शिग्रु श्वेताञ्जनम्। ज्वालामुखी जयन्ती। विल्वेभ्य इति—विल्वमूलात्, रसैरिति शेष। तण्डुलीय मेघनादशब्दवाच्य। स्वरसमत्र सद्यस्क क्वथितरस

* कनक धुस्तूरमिति गू० दी०।

काचभाण्डे ततः स्थाल्या काचकूपीं निवेशयेत् ॥ १७६ ॥
बालुकाभिः प्रपूर्य्याथ वह्नियोगमथ भवेत्।
तत उद्धृत्य त गोल चूर्णयित्वा विमिश्रयेत् ॥ १७७ ॥
प्रवाणचूर्णकर्षेण शाणमात्रविषेण च।
कृष्णसर्पस्य गरलैर्द्दिवेल भावयेत्तथा ॥ १७८ ॥
तगर मुशली मासी हैमाह्वा वेतस कणा।
नीलिनीपत्रकश्चैला चित्रकश्च कुठेरक ॥ १७९ ॥
शतपुष्पा देवदाली धुस्तूरागस्त्यसुण्डिकाः।
मधूकजातीमदन-रसैरेषा विमर्दयेत् ॥ १८० ॥
प्रत्येकमेकवेलञ्च ततः सशोष्य धारयेत्।
वीजपूराद्रकद्रावैर्मरिचैः षोडशोन्मितैः ॥ १८१ ॥
रसो द्विगुञ्जाप्रमितः सन्निपातेषु दीयते।
प्रसिद्धोऽय रसो नाम्ना सन्निपातस्य भैरवः ॥ १८२ ॥

ग्रहण्या यहणीकपाटो रस ।—

तारमौक्तिकहैमानि सारश्चैकैकभागिकाः।

वा। अथ प्रत्येपार्थं द्रव्याण्याह, तत्र सिद्धरसे प्रवाणचूर्णकर्षेणेति—प्रवाणचूर्णं विषचूर्णञ्च मिश्रयेत्, प्रवाणचूर्णं कषप्रमाणं, विषचूर्णं शाणमात्रमिति, प्रवाणमिति—प्रकर्षेण वाणं सुधाचूर्णमित्यर्थः। एके प्रवालचूर्णं पठन्ति, तत्र प्रवालचूर्णं विद्रुमचूर्णं, शुक्तिकाचूर्णमित्यपरे, तदभावे शङ्खचूर्णमित्यस्मदीय सम्प्रदायः। भावनार्थं द्रव्याण्याह, कृष्णसर्पस्य गरले लात्वा तत् पूर्वोक्तं द्रव्यं द्विवेल यावद्भावयेत्। गरल तद्विष विशेषम्। तगरादिभिश्च तत वारमेक भावयेत्, प्रत्येकमिति—पृथक् पृथक्। तगर प्रसिद्धम। मासी जटाख्या। हैमाह्वा स्वर्णक्षीरी। वेतसी जलवेतस। कणा पिप्पली। नीलिनीपत्रकमिति—नीलिकापत्रम्। एके नीलिनी पत्रकञ्च द्रव्यद्वय व्याख्यानयन्ति, तच्च सर्वमतम्। कुठेरक प्रसिद्ध। देवदाली वल्लीविशेष। सुण्डिका केदारमुण्डी। मधूक मधुकवृक्ष। जाती मालती। रसोऽत्र सद्यस्क, क्षयितो वा यथालाभात्। अथ सिद्धरसो द्विगुञ्जाप्रमित षोडशमरिचान्वितो वीजपूराद्रकरसेन सह भक्षयेत् ॥ १७४—१८२ ॥

अथ ग्रहणीकपाटरसमाह, तारमौक्तिकहैमानीत्यादि।—सुगमम्।

द्विभागो गन्धकः सूतस्त्रिभागो मर्दयेदिमान् ॥ १८३ ॥
कपित्थस्वरसैर्गाढं मृगशृङ्गे ततः क्षिपेत्।
पुटेन्मध्यपुटेनैव तत उद्धृत्य मर्दयेत् ॥ १८४ ॥
बलारसैः सप्तवेलमपामार्गरसैस्त्रिधा।
लोध्रप्रतिविषामुस्त-धातकीन्द्रयवामृताः ॥ १८५ ॥
प्रत्येकमेषा स्वरसैर्भावना स्यात्त्रिधा त्रिधा।
माषमात्रो रसो देयो मधुना मरिचैस्तथा ॥ १८६ ॥
हन्यात् सर्वानतीसारान् ग्रहणीं सर्वजामपि।
कपाटो ग्रहणीरोगे रसोऽयं वह्निदीपनः ॥ १८७ ॥

यष्टव्या ग्रहणीवज्रकपाट।—

सूतसूताभ्रकं गन्धं यवक्षारं मटङ्गणम्।
अग्निमन्थ वचा कुर्य्यात् सूततुल्यानिमान् सुधीः ॥१८८॥
ततो जयन्तीजम्बीर-भृङ्गद्रावैर्विमर्दयेत।
त्रिवासरं ततो गोल कृत्वा सशोष्य धारयेत् ॥ १८९ ॥
लोहपात्रे शरावञ्च दत्त्वोपरि विमृद्रयेत्।
अधो वह्निं शनैः कुर्य्यात् यामार्द्धं तत उद्धरेत् ॥ १९० ॥

मध्यपुटन्तु लघुपुटसञ्ज्ञं, तच्च षोडशाङ्गुलगर्त्ते प्रतिपादितम्, तथा हि—"निपुणविहितगर्त्ते षोडशैरङ्गुलैर्वा मितसकलविभागस्तस्य मध्ये निधाय। ज्वलनमतिविशुष्कैर्गोमये सूतसिद्धं लघुगजपुटमेतत् प्रोक्तमेव मुनीन्द्रैः" ॥ इति। मरिचमाननमत्र माषमात्रम्, अथवा यथादोषापेक्षया देयम ॥ १८३—१८७ ॥

अथ ग्रहणीवज्रकपाटरसमाह, सूतसूताभ्रकमिति।—सूतसूत पारद भवति, तावत्परिमाणानि पृथक् षड्द्रव्याणि ग्राह्याणि। एवं षड्द्रव्यन्तु पारदसाम्य देयमिति, तन्न सर्वसम्मतम्, किन्तु सूतपारदस्यैको भाग, अभ्रकादीना षड्भागा इति सर्वसम्मतम्। ततस्तदनन्तरम्। जयन्ती शाकभेद। जम्बीर जम्बीरफलरस। भृङ्गो मार्कव। त्रिवासरमित्यनेनैकद्रव्यस्यैकाहमेव भावना देयेत्यभिप्राय.। लोहपात्रे इत्यादिना पिठरोद्य वालुकाभि. प्रपूर्य्येत्यस्मदीयसम्मदायात् कार्य्यो न

रसतुल्यां प्रतिविषा दद्यान्मोचरस तथा।
कपित्थविजयाद्रावैर्भावयेत् सप्तधा पृथक् ॥ १८१ ॥
धातकीन्द्रयवा मुस्ता लोध्र बिल्व गुडूचिका।
एतद्रसैर्भावयित्वा वेलैकैकञ्च शोषयेत् ॥ १८२ ॥
रस वज्रकपाटाख्य शाणैकं मधुना लिहेत्।
वह्नि शुण्ठीं विडं बिल्वं लवण चूर्णयेत् समम् ॥
पिबेदुष्णाम्बुना चानु सर्वजा ग्रहणीं जयेत् ॥ १८३ ॥

वाजीकरणे मदनकामदेवो रस ।—

तारं वज्रं सुवर्णञ्च ताम्र सूतकगन्धकम्।
लोह क्रमविवृद्धानि कुर्य्यादेतानि मात्रया ॥ १८४ ॥
विमर्द्य कन्यकाद्रावैर्न्यसेत् काचमये घटे।
विमुद्रा पिठरीमध्ये धारयेत् सैन्धवावृते ॥ १८५ ॥
पिठरीं मुद्रयेत् सम्यक् ततश्चुल्ल्या निवेशयेत्।
वह्निं शनैः शनैः कुर्य्यादहिनैक तत उद्धरेत् ॥ १८६ ॥
स्वाङ्गशीतञ्च सच्चूर्ण्य भावयेदर्कदुग्धकै.।
अश्वगन्धा च काकोली वानरी * मुशलीचुरः ॥ १८७ ॥

लोध्र। यामार्द्धमित्यनेन घटिकाचतुष्टय यावत एतत सिद्ध भवति, तत प्रतिविषा मोचरसञ्च पृथक् सिद्ध रसतुल्य मेलयित्वा पश्चादुक्तद्रव्यस्य रसे कृत्वा भावयेत। प्रतिविषा अतिविषाशब्दवाच्या। मोचरस शाल्मलीनिर्य्यासम। एके प्रतिविषा-मोचरसयोरपि भावनामाहु । विजयाऽत्र भङ्गा। सप्तधा भावना एकद्रव्येण कार्य्या, अन्येषा वक्ष्यमाणाना पृथगेकवार, तत्र धातकी धातकीकुसुमानि। इन्द्रयव कुटज-बीजम्। राम्ना सुरभी। मध्वत्र लेहन यावत्तावन्मान देयम्। अनुपानार्थद्रव्येषु वह्निशिवकजटा। विड बिडलवणम। लवण सैन्धवम ॥ १८८—१९३ ॥

अथ मदनकामदेवरसमाह, तारमित्यादि।—तार रौप्यम्। वज्र हीरक, तद-भावे वैक्रान्त ग्राह्यमिति व्यवहारात्। सूतक पारद। लोह सारसङ्गम्। अत्र क्रमवृद्धिस्तु पूर्वद्रव्यादुत्तरवृद्धिर्भवेद्या। अस्मत्सम्प्रदाये तु रजतादीनि द्रव्याणि अत्र मृतानि देयानीति व्यवहारोऽपि दृश्यते। कन्यका कुमारी। विमुद्रामिति

* "मुशलीचुक." इति पाठान्तरम्।

त्रित्रिवेल रसैरासा शतावर्य्याश्च भावयेत् ।
पद्मकन्दकसेरूणा रसै. काशस्य भावयेत् ॥ १९८ ॥
कस्तूरीव्योषकर्पूर-कक्कोलैलालवङ्गकम् ।
पूर्वचूर्णाटष्टमाशमेतच्चूर्णं विमिश्रयेत् ॥ १९९ ॥
सर्वैः समां शर्कराञ्च दत्त्वा शाणोन्मितं पिबेत् ।
गोदुग्धद्विपलेनैव मधुराहारसेवकः ॥ २०० ॥
अस्य प्रभावात् मौन्दर्य्यं बलं तेजोऽभिवर्द्धते ।
तरुणी रमयेत् बह्वीः शुक्रहानिर्न जायते ॥ २०१॥

वाजीकरणे कन्दर्पसुन्दरो रस' ।—

सूतो वज्रमहिर्मुक्ता तार हेमासिताभ्रकम् ।
रसै' कर्षाशकानेतान्मर्दयेदिरिमेदजैः ॥ २०२ ॥
प्रवालचूर्णं गन्धञ्च द्विद्विकर्षं विमिश्रयेत् ।
ततोऽश्वगन्धास्वरसैर्विमर्द्य मृगशृङ्गके ॥ २०३ ॥

काचकूपीमिति शेष । सैन्धवचूर्णञ्च काचकूपीमुभयतो देयम। सिद्धरसस्य भाव नार्थं द्रव्याख्याह—अर्कदुग्धमर्कभव क्षीरम । काकोली प्रसिद्धा । वानरी कपिकच्छू । मृशली तालमूली कन्दविशेष । इक्षुर कोकिलाक्ष । पद्मकन्द कमलकन्द । कमेरुकोऽपि विख्यात । काश तृणसज्ञ प्रसिद्ध । पश्चाच्चूर्णार्थे द्रव्याख्याह, कस्तूरीत्यादि ।—कस्तूरी मृगनाभिजा, व्योष त्रिकटुकम। पूर्वचूर्णात भावनाभि प्रतिपादितद्व्यादष्टमाश दद्यात, तेन पूर्वचूर्ण सप्तभाग कस्तूरीप्रमुखश्चैकभाग-मिति ॥ १९४—२०१ ॥

अथ कन्दर्पसुन्दररसमाह सूत इत्यादि।—सूत पारद । वज्र क्षीरकम। अहि' सीसकम। मुक्ता प्रसिद्धा। तार रौप्यम। हेम सुवर्णम। असिताभ्रक कृष्णाभ्रकम्। एतत् सर्वमपि मारित ग्राह्यमित्यव व्यवहार । एतेषा मानमपि कर्षप्रमाण प्रत्येकम्। इरिमेदो विट्खदिर, स च "रैणेज" शब्दवाच्य, तस्य त्वक् ग्राह्या । अपरद्रव्यद्वयमपि मेलनार्थं द्विद्विकर्षं प्रत्येक देयम, तत्र प्रवालचूर्ण विद्रुमचूर्णम्। गन्ध गन्धकम्। मृगशृङ्गके मृगशृङ्गसम्पुटे तदौषध

क्षिप्त्वा मृदुपुटे पक्त्वा भावयेद्धातकीरसैः।
काकोली मधुकं मांसी बलात्रयं विसेङ्गटे ॥ २०४ ॥
द्राक्षा पिप्पलवन्दाक बाण पर्णीचतुष्टयम्।
परूषक कसेरुश्च मधूक वानरी तथा ॥ २०५ ॥
भावयित्वा रसैरेषा शोषयित्वा विचूर्णयेत्।
एला त्वक् पत्रक वाशी लवङ्गागुरुकेशरम् ॥ २०६ ॥
मुस्तं मृगमदः कृष्णा जलं चन्द्रश्च मिश्रयेत्।
एतच्चूर्णैः शाणमितै रसं कन्दर्पसुन्दरम् ॥ २०७ ॥
खादेच्छाणमितं रात्रौ सिता धात्री विदारिका।
एतासां कर्षचूर्णेन सर्पिष्कर्षेण संयुतम् ॥ २०८ ॥
तस्यानु पिपलं चौरं पिबेत् सुखितमानसः।
रमणी रमयेद्यत्नैर्न हानिं क्वापि गच्छति ॥ २०९ ॥

धार्यमित्यभिप्रायः। मृदुसम्पुटञ्च लघुगजपुटमित्यर्थः। पश्चाद्भावनार्थं द्रव्याण्याह —धातकी धातकीकुसुमानि। काकोली खनामख्याता। मधुकं मधुकत्वक्। मांसी जटाख्या सुगन्धद्रव्यम्। बलात्रयं प्रसिद्धं, तत्र बला अतिबला नागबलेति। विस मृणाल, भसीरूपशब्दवाच्यं लोके। इक्षुदं इक्षेर्दुदम्। द्राक्षा प्रसिद्धा। पिप्पलवन्दाकमिति—पिप्पलवृक्षस्य वन्दा, वन्दा च विटपलम्बी गुल्मविशेषः, एके पिप्पलवन्दाक द्रव्यद्वयं वर्णयन्ति, तत्र पिप्पल पिप्पलत्वक् वन्दा इक्षुवन्दा प्रसिद्धा। अपरे पिप्पलीवन्दाकमिति व्याख्यानयन्ति। बाण सहचर, एके बाणस्थाने वरीति पठन्ति। पर्णीचतुष्टयमिति—माषपर्णी मुद्गपर्णी शालपर्णी पृश्निपर्णी चेति। परूषक फालसाशब्दवाच्यम्। कसेरुक प्रसिद्धम्। मधूक मधुकवृक्षपुष्पाणि। वानरी कपिकच्छूः। एतेषां स्वरसेन प्रत्येक भावयेदित्यर्थः। अथ चूर्णार्थं द्रव्याण्याह, एला त्वक् पत्रकमित्यादि।—वाशी त्वक्क्षीरी, श्वशरीचना इति प्रसिद्धा। अगुरु प्रसिद्धम्। केशर नागकेशरम्। मुस्त प्रसिद्धम्। मृगमद कस्तूरी। कृष्णा पिप्पली। जल बालकम्। चन्द्र कर्पूर। एतत् सकल शाणमित टङ्कप्रमाण भक्षणार्थम्। रात्रौ निशामुखे। अनुपाननाह—पिपल चौर पिबेत्, कथम्भूतम्? सितादीना द्रव्यत्रयाणा चूर्ण मेलयित्वा कर्षमात्र सङ्गृह्य कर्षमानेन च घृतेन सह सम्यर्द्य सम्मिश्रितम्। सिता सत्यङ्गी। धात्री आमलकी। विदारिका विदारीकन्द।

रसायने लोहरसायनम्।—

शुद्धे रसेन्द्रभागैके द्विभाग शुद्धगन्धकम्।
क्षिपेत् कज्जलिका कुर्य्यात्तत्र तीक्ष्णभव रजः॥ २१०॥
क्षिप्त्वा कज्जलिकातुल्य प्रहरैक विमर्दयेत्।
ततः कन्याद्रवैर्घर्मे त्रिदिनं परिमर्दयेत्॥ २११॥
ततः सञ्जायते तस्य सोष्णो धूमोद्गमो महान्।
अत्यन्तं पिण्डित कृत्वा ताम्रपात्रे निधापयेत्॥ २१२॥
मध्ये धान्यकुशूनस्य त्रिदिनं धारयेद्बुधः।
उद्धृत्य तस्मात् खल्ले च क्षिप्त्वा घर्मे निधाय च॥ २१३॥
रसै· कुठारच्छिन्नायास्त्रिवेल परिभावयेत्।
सशोष्य घर्मे क्वाथैश्च भावयेत्त्रिकटोस्त्रिधा॥ २१४॥
वासाऽमृताचित्रकाणा रसैर्भाव्य क्रमात्त्रिधा।
लोहपात्रे तत. क्षिप्त्वा भावयेत्त्रिफलाजलै॥ २१५॥

सुखितमानस स्वस्थ, न त्वातुर. तस्य अविहितत्वात्। न ह्यनि क्वापि गच्छतीति —स पुरुष वोध्यहानि न प्राप्नोति इत्यर्थ॥ २०२—२०९॥

अथ लोहरसायनमाह शुद्धे रसेन्द्रभागैके इत्यादि।—शुद्ध सस्कारित रसेन्द्र पारद तस्यैको भाग। शुद्धगन्धकस्य द्वौ भागौ, गन्धकशुद्धिश्च पूर्वं कथितैव। तत्र कज्जलिकायाम्। तीक्ष्णभव रज इति—लोहचूर्णं शुद्धम्, घृतसारचूर्णम् इत्येके, तच्च पूर्वकज्जलिकासाम्य ग्राह्यम। प्रहरैक मर्दन केवल कज्जलिकालोहचूर्णयोरेव कथित न तु खरसादिना। वक्ष्यमाणखरसैरेव त्रिदिन यावदित्यभिप्राय। घर्मे इति —खरतरसूर्य्यातपिते, अत एव तस्य सोष्णो महान् धूमोद्गमो भवति इति। तेनैव लोहमृति स्यादित्येके। घृतसते तु धान्यकुशूलोषित विरात्र यावद्भवति पश्चात यदुद्धरेत तत्कालमेव घर्मे धारणेन इति स्यात्। अत्यन्तपिण्डितमित्यनेन एरण्ड-पत्रवेष्टनादिकमभिप्रेतम्। पश्चात काय्यमाह. रसैरित्यादि।—कुठारच्छिन्ना "तिपानी" शब्दवाच्या, कुरेजा इत्यपरे। त्रिवेलमित्यनेनापरद्रव्याणामपि सङ्ग्रह, तेनैकैक-रसेन त्रिवेल भावयेदित्यर्थ। घर्मे च प्रत्येक शोषणमपि विहितम्। त्रिकटो त्रिभूषणस्य, "शुण्ठीमरिचपिप्पल्यस्त्रिकटुस्त्रिभूषण स्मृतम्" इति। वासा आटरूषक.।

निर्गुण्डीदाडिमत्वग्भि * विसभृङ्गकुरण्टकैः।
पलाशकदलीद्रावैर्वीजकस्य घृतेन च ॥ २१६ ॥
नीलिकाऽलम्बुषाद्रावैर्बब्बूलफलिकारसैः।
भावयेत्त्रिस्त्रिवेलञ्च ततो नागबलारसैः ॥ २१७ ॥
शतावरीगोक्षुरकैः पातालगरुडोद्भवैः।
त्रित्रिवेलं यथालाभं भावयेदेभिरौषधैः ॥ २१८ ॥
ततः प्रातर्लिहेत् क्षौद्र-घृताभ्यां कोलमात्रकम्।
पलमात्रं † वराक्वाथं पिबेदस्यानुपानकम् ॥ २१९ ॥
मासत्रयं शीलित ह्याद्वलीपलितनाशनम्।
मन्दाग्नि श्वासकासौ च पाण्डुता कफमारुतौ ॥ २२० ॥
पिप्पलीमधुसयुक्तं हन्यादेतन्न संशयः।
वातासृग्मूत्रदोषाश्च ग्रहणी गुदजा रुजम् ॥ २२१ ॥
अण्डवृद्धिं जयेदेतच्छिन्नासत्त्वमधुप्लुतम्।
बलवर्णकरं वृष्यमायुष्यं परमं स्मृतम्।
जयेत् सर्वामयान् कालादिदं लोहरसायनम् ॥ २२२ ॥
कुष्माण्ड तिलतैलञ्च माषान्नं राजिका तथा।
मद्यमम्लरसञ्चैव त्यजेल्लोहस्य सेवकः ॥ २२३ ॥

अम्लता गुडूची। लोहपात्रे तत क्षिप्तेति—पूर्वं स्नत्वापे पाच्यमिति प्राह, पाषाणखल्ले वा। त्रिफलाजलै त्रिफलाक्वाथै, त्रिफला हरीतक्यादि। दाडिमत्वक् बल्कलम्। विस मृणालम्। भृङ्गी माकव। कुरण्टक सहचर। पलाश कदलीद्रावैरिति—पलाश प्रसिद्ध, तस्य द्राव स्वरिध्यर्थ, कदलीद्राव कदली कन्दनिर्यास। बीजका विजयसारी वृक्षविशेषस्य घृतेन क्वाथेन। नीलिका नीली। अलम्बषा मुण्डी। बब्बूलफलिका बब्बूलवृक्षस्य फलानीत्यर्थ। नागबला गाङ्गेरुकी। शतावरीगोक्षुरकौ प्रसिद्धौ। पातालगरुडी क्षिरइण्टिशब्दवाच्या। अनुपाने वराक्वाथ त्रिफलाक्वाथम। छिन्नासत्त्व गुडूचीसत्त्वम। शेष सुबोधम ॥ २१०—२२३ ॥

---

* "विस" इत्यत्र "वासा" इति पाठान्तर न समीचीनम, वासाया प्रागेवोक्तत्वात्।

† "वरा" इत्यत्र "बला" इति पाठान्तरम्।

जैपालशोधनम्।—

(जैपाल रहित त्वगङ्गररसक्षाभिर्मले माहिषे
निक्षिप्त त्रयहमुष्णतोयविमलं खल्ले सवासोऽर्दितम्।
क्षिप्त नूतनखर्परेषु विगतस्नेहं रजःसन्निभ
निम्बूकाम्बुविभावितञ्च बहुश शुद्धं गुणाढ्यं भवेत्॥

विषशोधनम्।—

विषन्तु खण्डशः कृत्वा वस्त्रखण्डेन बन्धयेत्।
गोमूत्रमध्ये निक्षिप्य स्थापयेदातपे त्रयहम्॥
गोमूत्रञ्च प्रदातव्यं नूतन प्रत्यह बुधै।
त्रयहेऽतीते समुद्धृत्य शोषयेन्मृदु पेषयेत्॥
शुध्यत्येव विष तच्च योग्य भवति चार्त्तिजित्।
खण्डीकृत्य विषं वस्त्र परिवेष्टन्तु दोलया॥
अजापयसि सस्विन्न यामत शुद्धिमाप्नुयात्।
अजादुग्धाभावतस्तु गव्यक्षीरेण शोधयेत्॥)

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां मध्यखण्डे चिकित्सितस्थाने रसकल्पना नाम चतुर्दशोऽध्याय॥ १४॥

विविधमुनिनिबन्धा ये सन्तु प्रसिद्धा
सुमतिदुरवबोधाले मया नैव दृष्टा।
तदपि गुरुसकाशात यच्छ्रुत तत व्यलेखि
क्षाढमल्लभिषजाऽस्या भावसिंहात्मजेन॥

इति श्रीवात्स्यान्वयप्रकाशवैद्य-श्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधर-दीपिकायां मध्यखण्डे चिकित्सितस्थाने रसकल्पनानाम चतुर्दशोऽध्याय॥ १४॥

इति शार्ङ्गधरसंहितायां मध्यखण्डः समाप्तः।

अथ उत्तरखण्डः ।

प्रथमोऽध्यायः ।

अथ स्नेहपानविधिः । (क)—

चतुर्विध स्नेह स्नेहपानकालश्च ।—

स्नेहश्चतुर्विध. प्रोक्तो घृतं तैल तथा वसा ।
मज्जा च त पिबेन्मर्त्य किञ्चिदभ्युदिते रवौ ॥ १ ॥

(क) अथ उत्तरखण्ड व्याख्यातु प्रतिजानीते । तत्राय सम्बन्ध, मध्यखण्डान्ते रसायनवाजीकरणार्थं रसा उक्ता, ते चाविशद्धशरीरे न स्वकार्यकरणक्षमा, उक्तञ्च वाग्भटे—"अविशुद्धे शरीरे हि युक्तो रसायना विधि । वाजीकरो वा मलिने वस्त्र रङ्ग इवाफल ॥" (वा० उ० ३९ अ०) इति, तस्मात् शरीरशुद्ध्यर्थं पञ्चकर्माणि योजयेत, तानि च स्नेहस्वेदाभ्या विना न सम्भवन्ति, उक्तञ्च—"स्नेह-स्वेदावनभ्यस्य कुर्यात् सशोधनन्तु य । दारु शुष्कमिवामि शरीर तस्य दीप्यते ॥" (वा० सू० १८ अ०) इति, तस्मात स्नेहाध्यायमेव प्रथम व्याख्यास्याम, अथेति ।—स्नेहस्य घृतादि पानस्य विधिर्विधान, स च विधिश्चरके यथा सप्रश्न उक्तस्तमाह—"साङ्ख्यं सङ्ख्यातसङ्ख्येयं सहासीन पुनर्वसुम्। जगदितार्थं पप्रच्छ वह्निवेश. स्नेहमथयम् ॥ किं योनय ? कति स्नेहा ? के च स्नेहगुणा पृथक् ?। कालानुपाने के कस्य ? कति काश्च विचारणा ?॥ कति मात्रा ? कथ मात्रा ? का च केषूपदिश्यते ?। कस्य कैश्चो हित स्नेह ? प्रकर्षे स्नेहने च क ?॥ स्नेह्या के ? के च न ? स्निग्धास्निग्धातिस्निग्धलक्षणम् ?। किं पानात प्रथमम् ? पीते जीर्णे किञ्च हिताहितम् ?॥ के मृदुक्रूर-कोष्ठा ? का व्यापद ? सिद्धस्य का ?। अच्छे संशोधने चैव स्नेहे का वर्त्तयिष्यते ?॥ विचारणा केषु योज्या ? विधिना केन तत प्रभो !?। स्नेहस्या-मितविज्ञान ! ज्ञानमिच्छामि वेदितुम ॥" (च० सू० स्नेहाध्या०) इति। तत्र "सङ्ख्यानमधीयन्ते विन्दन वा ते साङ्ख्या तै, किंविशिष्टै ? सङ्ख्यातसङ्ख्येयं सङ्ख्याता सङ्ख्या यैस्ते सङ्ख्यातसङ्ख्येया ज्ञातज्ञेया इत्यर्थ, तै सह आसीनम, अत वा "सङ्ख्यातसङ्ख्येय सहासीन पुनर्वसुम्" इति पाठ, एतदुक्त भवति—साङ्ख्यै सहासीन पुनर्वसु सङ्ख्याविकारकार्या कथाया वर्त्तमान तत्कालानुरूपम् अग्निवेशोऽपि स्वसशय पृष्टवान्। किमकोऽयम्।

तत्र "कति स्नेहा ?" एतत्प्रश्नोत्तरमाह,—स्नेह इति।—स स्नेहः

स्नेहस्य द्विविधयोनि तयो श्रेष्ठनिर्देशश्च ।—

स्थावरो जङ्गमश्चैव द्वियोनि' स्नेह उच्यते ।
तिलतैलं स्थावरेषु जङ्गमेषु घृतं वरम् ॥ २ ॥

मिश्रस्नेहाना नामानि ।—

द्वाभ्या त्रिभिश्चतुर्भिस्तैर्यमकस्त्रिवृतो महान् ॥ ३ ॥

स्नेहपाने तस्य सात्म्यीभवने च कालनियम ।—

पिबेत्त्र्यह चतुरह पञ्चाहं षडहं तथा ।

चतुप्रकार, घृतादिभेदात, तत्र घृत गव्य श्रेष्ठत्वात। तैल तिलजन्य । वसा—"शुद्धमासस्य य स्नेह सा वसा परिकीर्तिता" (सु० ग्रा० ४ अ०) इति। मज्जा इति—मस्तकमज्जा अस्थिमज्जा वा, तथा च—"स्थूलास्थिषु विशेषेण मज्जा तत्रोत्तरोत्तर । अस्थितरेषु सर्वेषु सरक्त मेद उच्यते ॥" (सु० ग्रा० ४ अ०) इति। "क काल ?" एतस्य उत्तरमाह, तमिति।—"शीतकाले पिबेत्स्नेहसुखाकाले पिबेन्नित्यम्" (ग्राङ्ग० उत्तर० १ अ०) इति ॥ १ ॥

"किं योनय ?" एतस्योत्तरमाह स्थावर इति।—तत्र स्थावराश्चतुर्विधा, —वनस्पतय, वृक्षा, वीरुध', ओषधय इति। जङ्गमा खल्वपि चतुर्विधा, —जरायुजाण्डजस्वेदजोद्भिज्जा। एतेषा स्वरूपमनन्तरो ज्ञातव्यम, तथा च चरके—"स्नेहाना द्विविधा सौम्य ! योनि स्थावरजङ्गमा। तिल, पियालाभिषुकौ विभीतकाश्विवाभयैरण्डमधूकसर्षपा। कुसुम्बिल्वारुकमूलकातसी-निकोचकाबीटकरञ्जशिग्रुका ॥ स्नेहाश्रया स्थावरसञ्ज्ञितास्तथा स्वर्जङ्गमा मत्स्यमृगा सपक्षिण। तेषा दधिक्षीरघृतानिष वसा स्नेहेषु मज्जा च तथोपदिश्यते ॥" (च० सू० स्नेहाध्या०) इति। त्रिवा दन्ती। अभया हरीतकी इति। वरावरत्वमाह तिलेति।—तैलघृतयोर्वरत्वञ्च सस्कारस्यानुवर्त्तनादिति, उक्तञ्च—"तैल सयोगसस्कारात सर्वरोगापह मतम" (च० सू० अन्नपाना०) इति। अवरोदाहरण चन्दनादि तैलम्। तत घृतमपि शास्त्रे व्यवहारार्थम ॥ २ ॥

मिश्रितस्नेहनामान्याह, द्वाभ्यामिति।—यो द्वाभ्या स्नेहाभ्या मिश्रितो योग स यमक कथित। यस्त्रिभि स्नेहैर्मिश्रित स त्रिवृत। यश्चतुर्भि स्नेहै सयुत स महान् कथित इत्यभिप्राय ॥ ३ ॥

स्नेहसात्म्ये कालावधिमाह, पिबेदिति।—कुत्रचित् स्नेह सेवित, सन् त्र्यहात् पर

सप्तरात्रात् परं स्नेह. सात्म्यीभवति सेवितः ॥ ४ ॥

दोषादीना बलाबलानुसारेण पानीयस्नेहस्य मात्रा।—

दोषकालाग्निवयसा बलं दृष्ट्वा प्रयोजयेत्।
हीनाच्च मध्यमा ज्येष्ठा मात्रा स्नेहस्य बुद्धिमान् ॥ ५ ॥

अमात्रादिविहितस्य स्नेहस्य अपकारिता।—

अमात्रया तथाऽकाले मिथ्याऽऽहारविहारतः।
स्नेहः करोति शोफार्शस्तन्द्रानिद्राविसंज्ञताः ॥ ६ ॥

सात्म्यीभवति क्वचित् चतुरह, पञ्चाह, षडहञ्च। सप्तरात्रात् परमिति—सप्तदिनं यावत्। इयम् अहरादिमर्य्यादा कोष्ठस्य मृदुमध्यक्रूरता ज्ञेया। पर सप्तरात्रादूर्द्धं सेवित सात्म्यीभवति। सात्म्यीभूतस्य स्नेहस्य गुणा वाग्भटे—"सात्म्यीभूतो हि कुरुते न मलानामुदीरणम्" (अष्टाङ्ग स०) इति। चरके तु—"स्नेहनस्य प्रकर्षो तु सप्तरात्रविरात्रको" (च० सू० स्नेहाध्या०) इति। वाग्भटे तु—"ब्राह्मच्छ्रदौ कोष्ठे क्रूरे सप्तदिन पिबेत्" (वा० सू० १६ अ०) इति, इदत्यविरोध ? मैव, सर्वेषा विषयभेदात् मृदु-मृदुतर-मध्य-मध्यतर-क्रूर क्रूरतरकोष्ठविषयाणि वचनानि ज्ञातव्यानि ॥ ४ ॥

अथ स्नेहपानमात्राविषयमाह दोषेति।—मात्रालक्षणमग्रे वक्ष्यमाणम्। दोषास्त्रिविधास्तुल्यविधा वा तेषा बलम् उत्कृष्ट-मध्यात्यादिभेदेन ज्ञेयम्। काल शीतोष्णवर्षालक्षणस्त्रिविध, तस्य बलं हीनमध्यातिमात्रस्वरूप, भेषजग्रहणकाल वा। अग्निरपि सम-विषम-मन्द-तीक्ष्णभेदेन चतुर्विध, अस्य बल पाचकापाचकरूपम्। वयोऽपि बाल मध्योत्तरभेदेन त्रिविध, तस्यापि बल स्वशक्तिसामर्थ्यम्। बुद्धिमानिति, सदैव इति शेष, तथा हि—"यथादोष यथाकाल यथाग्नि यथाबलम्। स्नेहं पक्वमपक्व वा पाक (?) युञ्जाद्विचित्यक ॥" इति। दोषादीनपेक्ष्य स्नेहस्य हीनादिमात्रा प्रयोजयेत्, हीनतरामपि प्रयोजयेत्, उक्तञ्च—"ह्रस्वमध्योत्तमा मात्रा तात्साम्यस्य ह्रसीयसीम। कल्पयेद्धीक्ष्य दोषादीन् प्रागेव तु ह्रसीयसीम ॥" (वा० सू० १६ अ०)। "अज्ञातकोष्ठे हि बहु कुर्याज्जीवितसंशयम्" (अष्टाङ्गस०) इति ॥ ५ ॥

अमात्रादिसेवितस्य स्नेहस्य दोषमाह, अमात्रयेति।—स्नेहोऽमात्रया मात्राः ह्रस्वादिपरिमाणानि तान्योऽन्यथा विषमप्रमाणेन। अकाले असमये। तथा मिथ्याऽऽहारविहारतो वा सेवित शोफादीन् करोति। मिथ्याहारो यथा—"अकाले चातिमात्रञ्च असात्म्य यच्च भोजनम्। विषमाशनञ्च यद्भुक्त मिथ्याऽऽहार. स

अग्निबलभेदेन पानीयस्नेहस्य मात्रा।—

दैया दीप्ताग्नये मात्रा स्नेहस्य पलसम्मिता।
मध्यमाय विकर्षा स्याज्जघन्याय द्विकार्षिकी ॥ ७ ॥

मतान्तरे पानीयस्नेहस्य मात्रा।—

अथवा स्नेहमात्राः स्युस्तिस्रोऽन्याः सर्वसम्मताः।
अहोरात्रेण महती जीर्यत्यल्पा तु मध्यमा ॥
जीर्यत्यल्पा दिनार्द्धेन सा ज्ञातव्या सुखावहा ॥ ८ ॥

कथ्यते ॥" इति। * मिथ्याविहारो मलपरित्यागस्त्रीसेवादिषु अन्यथा विहरणम्। विसम्मता मूर्च्छाभेद। अस्यार्थे—"प्रकुर्य्यात् लङ्घनं तत्र स्नेहं ज्ञात्वा विरेचनम्" इति केचित् पठन्ति व्याख्यानयन्ति च ॥ ६ ॥

इदानीं स्नेहपानमात्रामाह,—ईयेति। दीप्ताग्नये इति—प्रदीप्तकोष्ठपुरुषायेत्यर्थः, पलसम्मिता मात्रा, एवं मध्यमाय विकार्षिकी स्यात्, जघन्याय हीनबलानलाय द्विकार्षिकी। एके प्रबलमध्यजघन्यसंज्ञा दोषविशेषेषु मन्यन्ते, तदपि सङ्गतं, तन्त्रान्तरदर्शनात्, उक्तञ्च—†"उत्तमस्य पलं मात्रा विभिन्नाग्नेश्च मध्यमे। जघन्यस्य पलार्द्धेन स्नेहक्वाथौषधेषु च ॥" इति ॥ ७ ॥

अथ विकल्पान्तरविहिता मात्रा दर्शयन्नाह, अथवेति।—अथवेति प्रकारेण कालभेदेन इत्यर्थः। अन्या पलादिभ्योऽन्या विलक्षणा, वैलक्षण्यञ्चादसम्मतत्वमित्यत आह सर्वसम्मता इति—चरकवाग्भटादिसम्मता, उक्तञ्च चरके—"अहोरात्रमहः क्रत्स्नमहोरात्रञ्च प्रतीक्षते। प्रधाना मध्यमा रूक्षा स्नेहमात्रा जरां प्रति ॥ इति तिस्र समुद्दिष्टा मात्रा स्नेहस्य मानतः॥" (च० सू० स्नेहाध्या०) इति। वाग्भटेऽपि—"द्वाभ्यां चतुर्भिरष्टाभिर्यामैर्जीर्यन्ति याः क्रमात्। रूक्षमध्योत्तमा मात्रा" (वा० सू० १६ अ०) इति। अहोरात्रेण महती जीर्यतीति। नन्वहोरात्रग्रहणं सकृदयकृदयाद्यादकं न भवति, कुतः? अहनि द्वयोर्नाडिकयोरनन्तरं पीतस्य स्नेहस्य परेऽह्नि घटिकाद्वयानन्तरं पाकः, स चाहोरात्रग्रहणेनैव गृह्यते,

---

* "अशक्तः कुरुते कर्म ग्लानो नैतत् करोति हि। मिथ्याविहार इत्युक्तः सदा चैनं विवर्जयेत्॥" इति तु मिथ्याविहारलक्षणमत्र पठित सङ्गतार्थकम्।

† "उत्तमस्य उत्तमबलानलस्य पुंसः, मध्यमे मध्यमबलानले पुंसि, तथा जघन्यस्य हीनबलानलस्य पुंसः" इति चक्रदत्तटीकायां शिवदासव्याख्या।

मात्राभेदेन स्नेहस्य गुणविशेष ।—

अल्पा स्याद्दीपनी वृष्या स्वल्पदोषेषु पूजिता।
मध्यमा स्नेहनी ज्ञेया बृंहणी भ्रमहारिणी॥
ज्येष्ठा कुष्ठविषोन्माद-ग्रहापस्मारनाशिनी॥ ८॥

अङ्गोरावग्रहणम् अष्टौ प्रहरप्रमाणकालपरं ज्ञेयम्, एव परमचतुरश वाग्भटेनाष्टौ प्रहरादिप्रमाणमेवोक्त, तदवाप्यङ्गोरावमष्टौ प्रहरपरं ज्ञेयम्, एवमुत्तरत्रापि व्याख्येयम्। सेति—सा अल्पा ह्रस्वा सुखावहा ज्ञातव्या सुखकारिणीत्यर्थ, शीघ्रपाकत्वात्॥ ८॥

अथ तासां विषयमाह, अल्पेति।—अल्पा मात्रा स्नेहस्य दीपनी अग्निदीप्तिकरीत्यर्थ, भवति, हृष्या शुक्रवर्द्धिकरी, स्वल्पदोषेषु हीनबलेषु दोषेषु वा पूजिता, कारणे कार्योपचारात् स्वल्पदोषेषु स्वल्परोगेषु वा इति स्वल्पानलेनाल्पसात्म्यत्वात्। चतुःप्रहरैर्या पाकं प्राप्नोति सा मध्यमा, सा स्नेहनी रूक्षाणां, बृंहणी सवर्धातूना, भ्रमशुक्रावष्टम्भेवाधसावात्, वस्तुदर्शनम्। ज्येष्ठेति।—ज्येष्ठा उत्तमा कुष्ठादिनाशिनी भवति। चरके तु ह्रस्वादिमात्राणां विषयगुणाश्चोक्ता, यथा—'ये तु क्लेशासहा बालाश्च सुकुमारा सुखोचिता। रिक्तकोष्ठबलश्लेष्मपित्ता मन्दाग्नयश्च ये॥ ज्वरातीसारकासाश्च ये चिरसमुत्थिता। स्नेहमात्रा पिबेयुस्ते ह्रस्वा ये चावरा बले॥ परिहारे सुखा चेषा मात्रा स्नेहनबृंहणी। हृष्या बल्या निरावाधा चिरध्यायनुवर्त्तते॥" (च० सू० स्नेहाध्या०) अत्र बालादय क्लेशासहिष्णुत्वात् ह्रस्वस्नेहनमात्राहा। सुखोचिता इति न सुकुमारविशेषण, किन्तु पृथगेव सुखसात्म्या अभिमता। रिक्तकोष्ठबलश्लेष्मपित्तमिति—वातप्रकृतिविकाराणाम् अहितम्। ये चावरा बले अल्पबला इत्यर्थ। परिहारे सुखेति—व्यायामसुरतवचनमित्यादिके परिहारे सति सुखनिरयसाधत्ते, अतो ह्रस्वाऽपि मात्रा परिहारे सति सुखमाद्यात। तत्र मध्यमोत्तमयोर्नियतरा परिहार कर्त्तव्य, इत्येव "यतो" (?) निर्देश इति कश्चित्। अन्यस्तु व्याचष्टे—परिहारविषये सुखेयमक्रियमाणेऽपि परिहारे न दोषावहेत्यर्थ। "प्रभूतस्नेहनित्या ये क्षुत्पिपासाऽसहा नरा। पावकश्चोत्तमबलो येषा ये चोत्तमा बले॥ गुल्मिन सर्पदष्टाश्च विसर्पीपहताश्च ये। उन्मत्ता रूक्षमूत्राश्च गाढवचस एव च॥ पिबेयुरुत्तमा मात्रा तस्या पाने गुणान् शृणु। विकारान् श्लथयत्येषा शीघ्र सम्यक् प्रयोजिता। दोषानुत्क्लिष्य मात्रा सवमार्गानुसारिणी। बल्या पुनर्नवकरी शरीरेन्द्रियचेतसाम्॥" (च० सू० स्नेहाध्या०) इत्युत्तमा।

दोषभेदेन स्नेहप्रयोगनियम ।—

केवल पैत्तिके सर्पिर्वातिके लवणान्वितम्।
पेय बहुकफे चापि व्योषक्षारसमन्वितम् ॥ १० ॥

घृतपानार्हा ।—

रूक्षक्षतविषार्त्तानां वातपित्तविकारिणाम्।
हीनमेधास्मृतीनाञ्च सर्पिष्पानं प्रशस्यते ॥ ११ ॥

मध्यमामाह—"अरुष्कास्फोटपिडका-कण्डूपामाभिरर्दिता। कुष्ठिनश्च प्रमोढाश्च वातश्लेष्मिकाश्च ये॥ नातिबह्वग्निनश्चैव सृष्टकोष्ठाश्चैव च। पिबेयुर्मध्यमा मात्रा मध्यमाश्चापि ये बले॥ मात्रैषा मन्दविभ्रंशा न चातिबलहारिणी। सुखेन च स्नेहयति शोधनार्थे च युज्यते॥" (च० सू० स्नेहाध्या०) इति। अरुष्केवारुष्का, अरुषिका शिरोरोगविशेष। अर्दिता पीडिता। प्रमोढा अत्यर्थं प्रमेहपीडिता। तस्या गुणानाह, मात्रैषा मन्दविभ्रंशेति।—मन्दा अल्पा विभ्रंशा बलहान्यादयो यस्या सा, यदा आतुरादिदोषाभावात् विभ्रंशो नोत्पद्यते तदा सुखेन स्नेहयति। शोधनार्थे युज्यते इत्यनेनैतत् कथयति उक्तमा मात्रा शमनाय, तथा च चरके—"विकारान् शमयत्येषा शीघ्रं सम्यक् प्रयोजिता" (च० सू० स्नेहाध्या०) इति। रूक्षा बृंहणार्था, उक्तञ्च "मात्रा स्नेहनबृंहणी" (च० सू० स्नेहाध्या०) इति, अस्यार्थ,—स्नेहनबृंहणकर्मकारिणी इयं भुवनकामानां (?) विरेचनकामानाञ्च प्रयुज्यते। इति मात्राविवरणम् ॥ ९ ॥

अथ दोषविशेषेण स्नेहविषयमाह, केवलमिति।—केवलं प्रक्षेपरहितं पैत्तिके व्याधौ। लवणमत्र सैन्धवं, व्याधिविहितद्रव्यमपि लवणं ग्राह्यम्। बहुकफे कफप्राये व्याधौ व्योषादियुतं हितं, व्योषं विकटु चारो यवक्षारादि ॥ १० ॥

सर्पिर्विषयमाह, रूक्षेति।—रूक्षादिभिस्त्रिभिरार्त्ता, रूक्ष रूक्षगुण द्रव्यं रूक्षगुणो वायुश्च, वातप्रकृतीनामित्येके, क्षतम् उरःक्षत तेन आर्त्ता, विष स्थावरं जङ्गमञ्च तेन आर्त्ता पीडिता। वातपित्तविकारिणामिति—वातपित्ते अत्र पृथक् मिलिते वा। तथा हीनमेधास्मृतीनामिति—मेधा ग्रन्थार्थधारणसामर्थ्यं, स्मृति पूर्वानुभूतस्मरणम्, अनुबन्धात्मिका बुद्धिरिति यावत्। चरके तु—"वातपित्तप्रकृतयो वातपित्तविकारिणः। चक्षुःकामा क्षता क्षीणा वृद्धा बालास्तथाऽबलाः॥ आयुःप्रकर्षकामाश्च बलवर्णस्वरार्थिनः। पुष्टिकामा प्रजाकामा सौकुमार्य्यार्थिनश्च ये॥ दीप्तौजःस्मृतिमेधाग्नि बुद्धीन्द्रियबलार्थिनः। पिबेयुः सर्पिरार्त्ताश्च दाहग्रस्त-

तैलपानार्हा ।—

क्रमिकोष्ठानिलाविद्धाः प्रवृद्धकफमेदसः।
पिबेयुस्तैलसात्म्या ये तैल दाढ्यार्थिनस्तु ये ॥ १२ ॥

वसापानार्हा ।—

व्यायामकर्षिताः शुष्क-रेतोरक्ता महारुजः।
महाग्निमारुतप्राणाः वसायोग्या नराः स्मृताः ॥ १३ ॥

विषाग्निभि ॥" (च० सू० स्नेहाध्या०) इति। दौप्ति प्रभा। भोजस्तु—"हृदि तिष्ठति यत शुद्धमौष्ण्यलोहितपीतकम"। वाग्भटेऽपि—"तत्र धौम्यति-मेधाऽग्नि-काङ्क्षी ग्रसत घृतम्" (वा० सू० १६ अ०) इति। "मेधाऽग्नि" इत्यत्र "मेधादि" इति सम्यक् पाठ। आदियहणात—"ग्रस धौम्यतिमेधाग्नि-बलायु शुक्रचक्षुषाम्। बालवृद्धप्रजाकान्ति-सौकुमार्यस्वराग्निनाम्॥ क्षतक्षीण-परीसर्प ग्रस्ताग्निग्लपितात्मनाम्। वातपित्तविषोन्माद-शोषालक्ष्मीश्चरापहम्॥ स्नेहानामुत्तम शीत वयस स्थापन परम्। सहस्रवीर्य विधिभिर्घृत कर्म-सहस्रकृत॥" (वा० सू० ५ अ०) इति॥ ११॥

तैलस्य विषयमाह, क्रमीति।—क्रमिकोष्ठानिलाविद्धादयस्तैल पिबेयु। तव (?) क्रमिकोष्ठा कोष्ठान्त क्रमय। अनिलाविद्धा वातव्याधिभिर्व्याप्तशरीरा। दाढ्याधिन दृढशरीराकाङ्क्षिण। तैल तिलस्नेह। चरके तु—"प्रवृद्धश्लेष्ममेदस्का-श्चश्लथ्लपगलोदरा। वातव्याधिभिराविष्टा वातप्रकृतयश्च ये॥ बल तनुत्व लघुता दृढता स्थिरगात्रता। स्निग्धश्लक्ष्णतनुत्वक्ता ये च काङ्क्षन्ति देहिन॥ क्रमिकोष्ठा क्रूरकोष्ठास्तथा नाडीभिरर्दिता। पिबेयु शीतले काले तैल तैलोचिताश्च ये॥" (च० सू० स्नेहाध्या०) इति। तनुत्व क्लथत्वम्। लघुता लाघवम्। दृढता काठिन्यम्। स्थिरगात्रता निश्चलगात्रताम् इति॥ १२॥

अथ वसाविषयमाह, व्यायामेति।—एवविधा नरा पुरुषा वसायोग्या। व्यायामेन दुर्बलशरीरा, शुष्क रेत शुक्र, रक्त रुधिरञ्च येषा ते तथा, अत एव चरके—"सशुष्करेतोरुधिरा" (च० सू० स्नेहाध्या०) इत्युक्तम्। महाग्निमारुत-प्राणा इति—महाग्नीरुल्काग्निर्भस्मको वा, महान्मारुत बलवान् मारुत, स चान्नीऽपसञ्चारकत्वेनेष्ट, उक्तञ्च चरके—"बलवान् मारुतो येषा खानि चाबल्य तिष्ठति" (च० सू० स्नेहाध्या०) इति। वाग्भटेऽपि—"वाताहतपथेषु च"

मज्जपानार्हा।—

क्रूराशयाः क्लेशसहा वातार्त्ता दोषवक्षयः।
मज्जानञ्च पिबेयुस्ते सर्पिर्वा सर्वतो हितम्॥ १४॥

ऋतुभेदेन दोषभेदेन च स्नेहपानकाल।—

शीतकाले दिवा स्नेहमुष्णकाले पिबेन्निशि।
वातपित्ताधिके रात्रौ वातश्लेष्माधिके दिवा॥ १५॥

नस्यादिषु प्रयोज्यस्नेहनियम।—

नस्याभ्यञ्जनगण्डूष-मूर्द्धकर्णाक्षितर्पणे।
तैलं घृतं वा युञ्जीत दृष्ट्वा दोषबलाबलम्॥ १६॥

(वा० सू० १६ अ०) इति। महाप्राणा महाबला, उक्तञ्च चरके—"महच्चाग्निबलं येषाम्" (च० सू० स्नेहाध्या०) इति। अथवा प्राणो वायु, सुश्रुते च—"अग्नि सोमौ वायु सत्त्व रजस्तम पञ्चेन्द्रियाणि भूतात्मेति प्राणा" (सु० शा० ४ अ०) इति। क्लेशसहत्वञ्च महाबलेन, अत एवोक्त वाग्भटे—"रूक्ष-क्लेशसहात्यग्नि-वाताहतपथेषु च" (वा० सू० १६ अ०) इति॥ १३॥

मज्जाविषयमाह, क्रूरेति।—क्रूराशया क्रूरकोष्ठा। क्लेशसहा कष्टसहा। वातार्त्ता वातरोगिण। दोषवक्षयक्षीणाग्नय। मज्जाया अलाभे सर्पिः प्रयोगमाह, सर्पिर्वा सर्वतो हितमिति।—सर्वत सर्वस्नेहविषये सर्वव्याधौ च, सर्पिर्घृत हित पथ्यम्, एतच्च मज्जालाभे ज्ञेयम्॥ १४॥

आत्ययिके व्याधौ स्नेहस्य कालमाह, शीतेति।—वातपित्ताधिके इति—अत्र वातस्य योगवाहित्वात पित्ताधिकस्य गृह्यते एव वातश्लेष्माधिके इत्यत्रापि व्याख्येयम्। पित्तश्लेष्माधिकस्तु नोक्तोऽप्यत्र साधारण शीत एव काले पिबेदिति द्रष्टव्यम्। रात्रा-विति—सायम॥ १५॥

अथ तैलघृतयोर्विशिष्टकर्म दर्शयन्नाह, नस्येति।—दोषशब्दोऽत्र शरीरदूषणा-द्दोषा वातादय, धातवो रसाद्या, मलाश्च मूत्रा, तेषा बलाबल दृष्ट्वा सम्यक् विचार्य्य तैल घृत वा यत्र तैलसात्म्य दोषबल तत्र तैलमेव युञ्जात, यत्र घृतसात्म्य तत्र घृतमेवेति तत्तत्सात्म्याना तत्तत् युञ्जीत॥ १६॥

स्नेहविशेषे अनुपानविशेष ।—

घृते कोष्णं जलं पेयं तैले यूषः प्रशस्यते ।
वसामज्ज्ञोः पिबेन्मण्डमनुपानं सुखावहम् ॥ १७ ॥

स्नेहहिडादीनां स्नेहप्रयोगनियम ।—

स्नेहहिषः शिशून् वृद्धान् सुकुमारान् क्रशानपि ।
उष्णकामानुष्णकाले सह भक्तेन पाययेत् ॥ १८ ॥

इदानीं स्नेहानामनुपानान्याह घृते इति ।—अनु पश्चात् नियतं पानम् अनुपानम्। घृते कोष्णं जलं पेयम्। तैले यूषमनुपानम्। वसामज्ज्ञो मण्डमनुपानम्। केचिन्मण्डग्रहणेनात्र स्नोतोविशोधनत्वात् दधिमण्डमाहुः, तन्न, यतो भक्तमण्डोऽपि मृदूकरोति स्रोतांसि, उक्तञ्च—"मण्डो वातानुलोमन । वृष्यश्लानिदोषशोषघ्न पाचनो धातुसाम्यकृत् ॥ स्रोतोमादवकृत स्नेही सस्नुचयति चानलम् ॥" (वा० सू० ६ अ०) इति। सुखावहमिति—सुखम् आवहति करोति तत् सुखावह, सम्यक् पाकादिकरणात्, उक्तञ्च वाग्भटे—"अनुपान करोत्यूर्जा वृष्टिं व्याधेश्च दृढाङ्गताम्। अन्नसङ्घातशैथिल्य विक्लित्तिजरणानि च ॥" (वा० सू० ८ अ०) इति। अन्यत्र—"जीर्णाजीर्णविशङ्कायां पुनरुष्णोदकं पिबेत्। तेनोद्गारविशुद्धि स्यात्ततश्च लघुता क्वचि ॥" (वा० सू० १६ अ०) इति। एतदुष्णोदकं सामान्येन सर्वस्नेहेऽपि हितम, उक्तञ्च—"उष्णोदकानुपानञ्च स्नेहानामथ शस्यते। घृते भल्लातकस्नेहात्तत्र तोयन्तु शीतलम् ॥" इति ॥ १७ ॥

सान्नस्नेहस्य विषयमाह, स्नेहैरिति ।—स्नेहहिष स्नेहाढ्यम् । "उष्णकामान्" इत्यत्र "तृष्णाकुलान्" इति पठन्ति केचित । सह भक्तेनेति—भक्तमोदन, चकारोऽत्र लुप्तोदय, तेन चरकोक्तास्तु विंशतिस्नेहविचारणा ग्राह्या, ता यथा—"ओदनस्य विलेपी च रसो मांस पयो दधि। यवागू सूपशाकौ च यूष काम्बलिक खड ॥ शुक्तबस्तिखपिण्डश्च मद्य स्नेहास्तथैव च। भक्ष्यमभ्यञ्जन बस्तिस्तथा चोत्तरबस्तय ॥ गण्डूष कर्णतैलञ्च नस्य मूर्ध्नि तिर्पणम्। चतुर्विंशतिरित्येता स्नेहस्य प्रविचारणा ॥" (च० सू० स्नेहाध्या०) इति। वाग्भटोक्तास्तु षष्टिविचारणाश्चैव ग्राह्या, ता यथा—"रसभेदैकशस्त्वाभ्या चतु षष्टिर्विचारणा" (वा० सू० १६ अ०) इति। ननु "अच्छपेयस्तु य स्नेहो न तामाहुर्विचारणाम" (च० सू० स्नेहाध्या०) इति चरकवचनात् कथ चतु षष्टिधा? इति विरोध, नैव, नाद्य (?) पेयो

सद्य स्नेहनकरौ योगौ।—

सर्पिष्मती बहुतिला यवागूः स्वल्पतण्डुला।
सुखोष्णा सेव्यमाना तु सद्यः स्नेहनकारिणी॥ १९॥
शर्कराचूर्णसंसृष्टे दोहनस्थे घृते तु गाम्।
दुग्ध्वा क्षीरं पिबेत् * रूक्ष सद्य स्नेहनमुच्यते॥ २०॥

विचारणा इत्यस्यायमर्थः,—†अच्छपेयस्नेह सा न विचारणा, सात्म्यार्तुव्याध्यादिष विचारणा अस्त्येव उक्तञ्च चरके—"रसैर्यौपहित स्नेह समासव्यासयोगिभि। षड्भिस्त्रिषष्टिधा सङ्ख्या प्राप्नोत्येकश्च केवल॥ एवमेषा चतुःषष्टि स्नेहाना प्रविचारणा। औकर्तुव्याधिपुरुषान् प्रयोज्या जानता भवेत॥" (च० सू० स्नेहाध्या०) इति। पुरुषग्रहणेन देशसात्म्यमवरुद्ध, यतो देशमपेक्ष्य पुरुषस्य तत्सात्म्य, तथा पुरुषग्रहणेन प्रकृतिबलवय शरीरप्रभृतयोऽवरुद्धा इति॥ १८॥

रूक्षाणा सद्य स्नेहनयोगद्वयमाह, सर्पिष्मतीति।—सर्पिष्मती बहुघृता। सद्य इति—तस्मिन्नेव दिवसे त्वरया स्नेहन करोति। सद्योग्रहण स्तुतिपरमित्यन्ये, व्याहेण स्नेहयतीत्यर्थः। अत एवोक्त सेव्यमानेति। अपरमपि, शर्कराचूर्णसंसृष्टे इति।—दोहनस्थे दोहनभाण्डे स्थिते घृते, किम्भूते? शर्कराचूर्णसंसृष्टे शर्करामिश्रिते तद्भाण्डे गा दुग्ध्वा रूक्ष पुरुष पिबेत् तद्धृत सद्य स्वल्पकालेन स्नेहनमुच्यते इति॥१९।२०॥

---

* "रूक्ष" इत्यत्र "उष्णम्" इति गु० दी०।

† "अच्छपेय ओदनाद्यसम्बन्धे सति पेय इत्यर्थः। अच्छपेय वर्जयित्वा अन्यभक्षनादिप्रयोज्य केवल स्नेह तथा ओदनादिगतै षड्भि रसैर्योपहित सन् स्नेहस्त्रिषष्टिसङ्ख्यात्मक, एव चतुःषष्टि प्रविचारणा स्यु, अन्यभक्षनादयस्तु यद्यपि शुद्ध स्नेहसम्पाद्या तथाऽपि जठराग्निसम्बन्धेन व्याप्रियन्ते इति तत्रे विचारणाशब्देनोच्यन्ते" इति चरकतात्पर्यदीपिका। "अच्छ केवलो य पीयते सा विचारणा न भवति, मृर्दादितर्पणादिना तु केवलस्य स्नेहस्य य उपयोग सा च विचारणेति। त्रिषष्टिसङ्ख्याविच्छिन्नेन रसभेदेन सह उपयुक्तस्य स्नेहस्य तथा एकैकत्वेन केवलेन असहायेन मृर्दादितर्पणादौ प्रयुक्तेन स्नेहेन सह अस्य चतुःषष्टिर्विचारणा," इति वाग्भट-टीकायामरुणदत्तः।

स्नेहाजीर्णे चिकित्सा।—

मिथ्याचाराद्बहुत्वाद्वा यस्य स्नेहो न जीर्यति।
विष्टभ्य वाऽपि जीर्यंत वारिणोष्णेन वामयेत् ॥ २१ ॥

स्नेहाजीर्णे चिकित्सान्तरम्।—

स्नेहस्याजीर्णशङ्काया पिबेदुष्णोदकं नरः।
तेनोद्गारो भवेच्छुद्धा भक्तं प्रति रुचिस्तथा ॥ २२ ॥

स्नेहव्यापन्नितृष्णाया चिकित्सा।—

स्नेहेन पैत्तिकस्याग्निर्यदा तीक्ष्णतरीकृतः।
तदाऽस्योदीरयेत्तृष्णा विषमा तस्य वामयेत् ॥
शीतं जलं पाययेच्च पिपासा तेन शाम्यति ॥ २३ ॥

अथ स्नेहाजीर्णे चिकित्सामाह, मिथ्येति।—मिथ्याचाराद्दोषोदकादीनाम्। अमिथ्याचारस्तु वाग्भटेनोक्तः,—"उष्णोदकोपचारी स्यात् ब्रह्मचारी क्षपाशयः। न वेगरोधी व्यायाम-क्रोधशोकक्षितातपान् ॥ प्रवातयानस्थानाध्व भाष्याभ्यासनसंस्थिती। नीचात्युच्चोपधानाङ्घ स्वप्नधूमरजांसि च ॥ यान्यहानि पिबेत्तानि तावन्त्यन्यान्यपि त्यजेत् ॥" (वा० सू० १६ अ०) इति। बहुत्वात् स्नेहानामधिकाद्वा। अथवा विष्टभ्य विष्टभ्य कृत्वा जीर्यंत तमपि वामयेदित्यर्थः। अस्मात्ये केचित् पठन्ति—"तत स्नेहं पुनर्दद्यात् लघुकोष्ठाय देहिने"। अयं पाठो बहुषु पुस्तकेषु न दृश्यते। वैद्यसम्प्रदाये तु—"तत स्नेहं पुनर्दद्यात्" इति दिनान्तरे जातबले देयमिति ॥ २१ ॥

स्नेहाजीर्णे अन्यदपि प्रतीकारमाह, स्नेहस्येति।—स्नेहस्याजीर्णशङ्कायामपि उष्णोदकं पिबेत् किमुत जीर्णे इत्यनेन सर्वास्वप्यवस्थासु उष्णोदकमनुपाने प्रशस्तमित्यभिप्रायः। फलमाह, तेनेति।—तेन उष्णोदकेन उद्गारशुद्धि रुचिश्च भक्तं प्रति जायते, भोजने रुचिर्जायते इत्यपि। तन्त्रान्तरे तु—"स्नु पच्यमाने तृड्दाहभ्रमसादारतिक्लमाः। परिषिच्याङ्गरुग्णाभिर्जीर्णे स्नेहे ततो नरम् ॥" (सु० चि० ३१ अ०) इति ॥ २२ ॥

स्नेहोपद्रवभूतायास्तृष्णायाश्चिकित्सामाह, स्नेहेनेति।—पैत्तिकस्य पित्तप्रकृतेः पुरुषस्य। तीक्ष्णतरीकृत इति—अत्यर्थं तीक्ष्णत्वं प्राप्त। तदा तस्मिन् काले अस्य पुरुषस्य तृष्णा विषमा कठिनाम् उदीरयत् उत्पादयेत्, तस्य वामयेत्, उष्णाम्बु पीत्वा स्नेहामतिं ग्रसेत्, उक्तञ्च—"स्नेहपीतस्य चेत्तृष्णा पिबेदुष्णोदकं नरः। एवञ्चानुप-

स्नेहपानानर्हा ।—

अजीर्णी वर्जयेत् स्नेहमुदरी तरुणज्वरी ।
दुर्बलोऽरोचकी स्थूलो मूर्च्छार्त्तो मदपीडितः ॥ २४ ॥
दत्तवस्तिर्विरिक्तश्च वान्तस्तृष्णाश्रमान्वितः ।
अकालप्रसवा नारी दुर्दिने च विवर्जयेत् ॥ २५ ॥

स्नेहपानार्हा ।—

स्वेद्यसंशोध्यमद्यस्त्री-व्यायामासक्तमानसा ।
हृद्या बाला कृशा रूक्षा क्षाणास्रा क्षीणरेतसः ॥
वातार्त्तास्तिमिरार्त्ता ये तेषां स्नेहनमुत्तमम् ॥ २६ ॥

सम्यक्स्निग्धस्य तथा रूक्षस्य च लक्षणम् ।—

वातानुलोम्यं दीप्तोऽग्निर्वर्चः स्निग्धमसंहतम् ।
मृदुस्निग्धाङ्गता ग्लानिः स्नेहोद्वेगोऽथ लाघवम् ॥
विमलेन्द्रियता सम्यक् स्निग्धे रूक्षे विपर्ययः ॥ २७ ॥

शाम्यत्या स्नेहसुरयाम्बुना वमेत ॥" (सु० चि० ३१ अ०) इति। "च" शब्द प्रकारान्तरे, यौ० जल पाययित्वा तेन इतना पिपासा शाम्यति ॥ २३ ॥

अथ स्नेहाशाम्यानाह अजीर्णीति।—अजीर्णी स्नेहं वर्जयेत न पिबेत। तथा तरुणज्वरी आमज्वरी। दुर्बलो बलहीन। अरोचकी अरोचकार्त्त। स्थूलो मेदुर। मदपीडित मदाक्रान्तः। दत्तवस्ति यस्य वस्तिकर्म कृतम। विरिक्त कृतविरेक। वान्त कृतवान्तिक। तृष्णाश्रमान्वित तृष्णायुक्त श्रमयुक्तश्च। अकालप्रसवा नारीति—गर्भपातसाधाया युक्ता स्त्री। षोडशवर्षादर्वागपि प्रसवोऽकालप्रसव इत्येके। दुर्दिनं मेघाच्छन्नेऽह्नि दादनम्। चकारादाम्यटाक्षा,—"स्नेह्या न क्षतिमन्दाग्नि-तीक्ष्णाग्न्यस्थूलदुर्बलाः। ऊरुस्तम्भातिसाराम गलरोगगरादरे ॥ मूर्च्छाच्छर्यरुचि श्लेष्म-तृष्णामद्यैश्च पीडिताः। अपप्रसूता युक्ते च नस्ये बस्तौ विरेचने ॥" (वा० सू० १६ अ०) इति ॥ २४-२५ ॥

स्नेह्यानाह, स्वेद्येति।—स्वेदादाना स्नेहनम उत्तमम्, एते स्नेहार्हा। स्वेद्या स्वेदार्हा। संशोध्या वमनविरेचनार्हा। मद्यादिषु आसक्त मानस चित्त येषा ते तथा। तथा क्षीणास्रा क्षीणरक्ता। क्षीणरेतस क्षीणशुक्रा। वातार्त्ता इति वातेनार्त्ता पीडिता। तिमिरार्त्ता नैमिरिका इति ॥ २६ ॥

सम्यक् स्निग्धस्य लक्षणमाह, वातानुलोम्यमिति।—सम्यक्स्निग्धे एतानि

अतिस्निग्धस्य लक्षणम्।—

भक्तद्वेषो मुखस्रावो गुदे दाहः प्रवाहिका।
तन्द्राऽतीसारपाण्डुत्वं भृशं स्निग्धस्य लक्षणम् ॥ २८ ॥

रूक्षातिस्निग्धयो चिकित्सा।—

रूक्षस्य स्नेहनं स्नेहैरतिस्निग्धस्य रूक्षणम्।
श्यामाकचणकाद्यैश्च तक्रपिण्याकसक्तुभिः ॥ २९ ॥

लक्षणानि भवन्ति। वातानुलोम्यं वातस्य अनुलोमता। अग्निर्जठराग्निर्दीप्तः। वर्च पुरीषं स्निग्धं चिक्कणम् असङ्गतं ग्रथितम्। मृदुस्निग्धाङ्गता च भवति। ग्लानिरोजसश्च क्षयः (१)। स्नेहोद्रेकः स्नेहपाने द्वेषः। लाघवं शरीरलघुता। विमलेन्द्रियतेति—चक्षुरादीन्द्रियाणां विमलत्वं स्वस्वविषयग्रहणसामर्थ्यम्, एतैर्लक्षणैः सम्यक् स्निग्धो ज्ञेयः। रूक्षे लक्षणमाह, रूक्षे इति।—रूक्षे विपर्ययश्च भवति, स च स्निग्धलक्षणस्य, उक्तञ्च चरके—"पुरीषं ग्रथितं रूक्षं वायुरप्रगुणो मृदु। पक्वाशयस्थो रौक्ष्यञ्च गात्रस्यास्निग्धलक्षणम्॥" (च० सू० स्नेहाध्या०) इति। वायुरप्रगुणः। मृदु पक्वाशयस्थम्। अन्यत्राप्युक्तम्—"पुरीषं ग्रथितं रूक्षं क्लेशादेव विपच्यते। उरो विदह्यते वायुः कोष्ठाटपरि धावति॥ दुर्वर्णो दुर्बलश्चापि रूक्षो भवति मानवः॥" (सु० चि० ३१ अ०) इति॥ २७॥

अतिस्निग्धलक्षणमाह, भक्तद्वेष इति।—भृशं स्निग्धस्यातिस्निग्धस्य भक्तद्वेषादि लक्षणम्। तत्र भक्तद्वेषो भोजनानाकाङ्क्षा। मुखस्राव क्लेष्मास्रावः। गुदे दाहः। "गुदे पाक" इति क्वचित् पाठः। प्रवाहिका अतीसारभेदः। तन्द्रा प्राक् व्याख्याता। अतीसरणमतीसारः। पाण्डुत्वं शरीरस्य। चरके तु—"पाण्डुता गौरवं जाड्यं पुरीषस्याविपक्वता। तन्द्रीरुचिरुत्क्लेशः स्यादतिस्निग्धलक्षणम्॥" (च० सू० स्नेहाध्या०) इति। जाड्यं जडीभावः कायस्य। पुरीषस्याविपक्वता सामता। निद्रार्त्तस्य विषयाग्रहणं तन्द्रोक्तं। उत्क्लेशो क्लेशः॥ २८॥

अथ हीनातिस्निग्धस्योपक्रममाह, रूक्षस्येति।—रूक्षस्य पुरुषस्य स्नेहैः सह, स्नेहनकारिभिस्नेहघृतादिभिः स्नेहनं कार्य्यम्। अतिस्निग्धस्य रूक्षणं कार्य्यम्। रूक्षयोगमाह, श्यामाकेति।—श्यामाकादिभिः रूक्षणं कार्य्यम्, आदिग्रहणात् वाग्भटोक्तं सर्वं ग्राह्यम्, यथा—"चुक्रुण्डीक्लेदनस्वेदं रूक्षपानान्नभेषजम्। तक्रारिष्ट

स्नेहसेविनो लक्षणम्।—

दीप्ताग्नि शुद्धकोष्ठश्च पुष्टधातुर्दृढेन्द्रियः।
निर्जरो बलवर्णाढ्य स्नेहसेवी भवेन्नरः॥ ३०॥

स्नेहसेविन अपथ्यम्।—

स्नेहे व्यायामसञ्जीत-वेगाघातप्रजागरान्।
दिवास्वप्नमभिष्यन्दि रूक्षान्नञ्च विवर्जयेत्॥ ३१॥

इति श्रीदासीदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां उत्तरखण्डे स्नेहविधिनाम प्रथमोऽध्यायः॥ १॥

खलीहाल यवश्यामाकाकोद्रवाः॥ पिप्पली त्रिफला चौद्र पथ्या गोमूत्रगुग्गुलू। यथास्व प्रतिरागञ्च स्नेहव्यापदि साधनम्॥" (वा० सू० १६ अ०) इति। कोचित् "श्यामाकचणकाद्येषु" इत्यत्र "श्यामाकाकोद्रूषान्ने" इति पठन्ति। पिण्याके नि स्नेहतिलकल्कम॥ २९॥

अथ स्नेहसेविनो लक्षणमाह, दीप्तेति।—स्नेहसेवी नरः दीप्ताग्नि स्यात्, अग्निरत्र जठराग्नि। शुद्धकोष्ठ इति—मध्यकोष्ठक्रूरकोष्ठादिरहित। पुष्टधातुः पुष्टरसादिधातुः। दृढेन्द्रिय चक्षुरादीन्द्रियबलयुक्त। निर्जरः। बलवर्णाढ्य बलाढ्य वर्णाढ्यश्च सुरूपश्च। वाग्भटे तु—'दीप्ताग्निरग्नि परिशुद्धकोष्ठ प्रत्यग्रधातुर्बलवर्णयुक्त। दृढेन्द्रियो मन्दजरः शताय स्नेहोपसेवी पुरुष प्रदिष्ट॥" (वा० सू० १६ अ०) इति॥ ३०॥

स्नेहसेवाया वर्ज्यानाह, स्नेहे इति।—स्नेहे स्नेहपाने। व्यायाम शरीरायासजनन कर्म। सञ्जीतमिति—अत्यर्थशीतवातादिकम्। वेगाघातमिति—वेगानां मूत्र-पुरीषोत्सर्गेच्छानाम् आघातम अवरोध वेगधारणमित्यर्थः। प्रजागरमिति—रात्रि-जागरणम्। अभिष्यन्दि श्लेष्मप्रकोपि-दध्यादिकमित्यर्थः। रूक्षान्नमिति—श्यामाक-चणकादिकम्। एतच्च सामान्य स्नेहपानविषये, यत्र च अतिस्निग्धता भवति तत्र रूक्षान्न विहितमेव, तत् पूर्वमेव प्रदर्शितम्॥ ३१॥

इति श्रीबालव्याख्यप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधर-दीपिकायामुत्तरखण्डे स्नेहविधिनाम प्रथमोऽध्यायः॥ १॥

———

द्वितीयोऽध्यायः ।

अथ स्वेदविधि. । (क)—

चतुर्विधस्वेदाना नामानि ।—

स्वेदश्चतुर्विध प्रोक्तस्तापोष्मस्वेदमंत्रकौ ।
उपनाहो द्रव स्वेद सर्वे वातार्त्तिहारिण: ॥ १ ॥

दोषावस्थेषु स्वेदविशेष ।—

स्वेदो तापोष्मजौ प्राय. श्लेष्मघ्नौ समुदीरितौ ।
उपनाहस्तु वातघ्न: पित्तसङ्गे द्रवो हित' ॥ २ ॥

(क) अथ स्नेहाध्यायानन्तर स्वेदविधि व्याख्यातु प्रतिजानीते, अथेति ।—अथशब्द आनन्तर्ये स्नेहविधिकथनानन्तर स्वेदविधि , स्वेदस्य विधिर्विधानम्, उक्तञ्च —"स्नेहस्वेदावनश्यन्त कुर्यात् स्नेहनमेव य । दारु शुष्कमिवानामे शरीर तस्य दीर्यते ।" (वा० सू० १८ अ०) इति। चरकऽपि—"स्नेहपूर्वं प्रयुक्तेन स्वेदेनावर्जितऽनिले। पुरोषमूत्ररेतासि न सज्जन्ति कथञ्चन ॥" (च० सू० स्वेदाध्या०) इति। वाग्भटेऽपि—"शुष्काण्यपि हि काष्ठानि स्नेहस्वेदोपपादने । शक्य कर्मण्यता नेतुं किमु गात्राणि जीवताम् ॥" (वा० चि० २१ अ०) इति। तेन युक्त स्नेहानन्तर स्वेदाभिधानम् ।

तत्र तावत् पूर्व स्वेदसङ्ख्यामाह स्वेद इति।—स्विद्यतेऽनेनेति व्युत्पत्त्या स्वेदोऽग्नि , तस्य विधि कर्मचातुरी। चतुर्विधत्वमाह—एकलापसङ्ग स्वेद । द्वितीयस्तूष्म-सङ्ग । तृतीय उपनाह , उपनाहो निबन्धनमिति प्रश्लेषेण अथ भेद, शास्त्रण इति । चतुर्थो द्रवस्वेद इति । एतेषा लक्षण वोद्वक्ष्यम् , अन्यत्राप्युक्तञ्च—"तत्रै कैकतपाणि-काम्बवसने स्वेदोऽथवाऽङ्गारकैर्लेपात् वातहरे सहाम्लल्वणसङ्गे सुखोष्णैर्भवेत् । एव तत्तदयोऽम्बुवातशमनक्षायादिसेकादिभिस्तत्तदोषानिषेधनोऽङ्गवङ्गहृद्ग्राप्ये श्लिलाद्यी-क्षणात् ॥" इति। एष्वेव चतुर्षु यथाक्रम चरकोक्तसङ्करस्वेदाद्यवरोध । सङ्करादिस्वेदा यथा—"सङ्कर प्रसरो नाडो परिषेकोऽवगाहनम् । जेन्ताकोऽग्निघन कर्षू कुटी भू. कुम्भिरेव च ॥ कूपो होलाक इत्येते स्वेदयन्ति त्रयोदश ॥" (च० सू० स्वेदाध्या०) इति ॥ १ ॥

स्वेदावति।—पित्तसङ्गे द्रवो हित इति—पित्तयुक्ते वाते द्रवस्वेदो हित.,

प्रवरावरभेदस्वेदस्य विषयः।—

महाबले महाव्याधौ शीते स्वेदो महान् स्मृतः।
दुर्बले दुर्बलः स्वेदो मध्यमे मध्यमो मतः॥ ३॥

दोषविशेषे रूक्षादिस्वेदनियमः।—

बलासे रूक्षणस्वेदो रूक्षस्निग्धः कफानिले।
कफमेदोऽनिले वाते क्षीणे गेहरवेः करान्॥ ४॥
नियुद्धं मार्गगमनं गुरुप्रावरणक्रुधाः।
चिन्ताव्यायामभाराश्च सेवेतामयमुक्तये॥ ५॥

पित्तसङ्गेऽत्र स्वेदसङ्गतो विहितः। वातकफयोरेव स्वेदसङ्गः, यदुक्तं चरके—"वातश्लेष्मणि वाते वा कफे वा स्वेद इष्यते" (च० सू० स्वेदाध्या०) इति। अल्पे पित्तसंसर्गे वाते द्रवस्वेदः, स चोष्णवात प्रबलौ वातकफौ इति, क्षीणे पित्तन्तु द्रवत्वेन सौक्ष्म्यात्। वाग्भटेऽपि—"स्वेदलापोपनाहोष्म-द्रवभेदाच्चतुर्विधः" (वा० सू० १७ अ०) इति॥ २॥

अथ विविधस्वेदस्य विशेषमाह, महाबले इति।—महाबले महाबलपुरुषे, महाव्याधौ च कफोल्बणवातविकारादौ शीते शीतले शीतार्दितपुरुषे वा महान् स्वेदो विहितः। दुर्बले पुरुषे पित्तप्राये वा दुर्बल स्वेदो द्रवप्राया विहितः। मध्यमे मध्यमबलपुरुषे वातप्राये वा मध्यम मध्यमस्वेद उपनाहप्रायो विहितः, तथा चोक्तं—"तापोपनाहद्रवबाष्पपूर्वा स्वेदास्ततोऽल्पप्रथमौ कफे स्म। वायौ द्वितीयः पवने कफे च पित्तोपसृष्टे विहितस्तृतीयः॥" इति॥ ३॥

अथ दोषविशेषेण स्वेदविशेषमाह, बलासे इति।—बलासे कफे रूक्षणस्वेदः बालुकावस्त्रकपालाङ्गारादिनिर्मितः। कफानिले इति—कफानिल-संसर्गे रूक्षस्निग्ध इति, स च शाल्वणप्रभृतिकः। कफमेदोऽनिले वाते इति—मेदो हि सर्वशरीरिणामुदरस्थम अस्थिषु च, तथा हि—"स्थूलास्थिषु विशेषेण मज्जा त्वस्थन्तराश्रितः। अस्थितरेषु सर्वेषु सरक्त मेद उच्यते॥" (सु० शा० ४ अ०) इति, अनेन सकफेनानिले वायौ क्षीणमेदादिके कृत्स्नादित्यभिप्रायः, क्षीणमेदसङ्गारादिभिः सन्तप्तमित्यर्थः। रवेः करान् सूर्यकिरणान्। नियुद्धं बाहुयुद्धम्। गुरु प्रावरणमिति—प्रावारादिना-कौशेयप्रवेणीकुथकप्रभृतिकम्। क्रुधा कोपः, पित्तजनिका। चिन्ता चिन्ताजनिका

प्राक् स्नेहादौ।—

येषां नस्यं विधातव्यं वस्तिश्चापि हि देहिनाम्।
शोधनीयाश्च ये केचित् पूर्वं स्नेह्याश्च ते मताः॥ ६॥

विधान, मदानाशकरत्वात्। व्यायाम इति—शरीरायासजनन नियुद्धादिव्यतिरिक्त कर्म। एतान् भयमुक्तौ कफमेदोहृतवातजनितरोगशान्त्यै सेवेत, धातुर इति शेषः। चिन्ताध्याने भयमिति केचित् तेनापि मनःसन्तापत्वात् क्रोधवत्, तथा हि—'व्यायामीक्षणदुष्टकुक्षवल्लकीक्षपानभयमनसा। उपनाहनृत्यतापौ दशाग्निगुणवर्जिता स्वदा॥" भयन्तु उन्मादकारणमपि * तन्नाशकं स्यात्, यथा दृश्यन्ते च घट्टनचलितस्य सन्धे पुनर्घट्टनेनैव सम्यग्विश्लेषणम्, तद्वदिहापि ज्ञेयम्॥ ४।५॥

अथ क्रमेण ये पूर्वं स्नेह्यास्तानाह, येषामिति।—येषां पुरुषाणां नस्यं विधातव्यमिति—नस्यं दातव्यं ते नस्यात्मकस्नेह्या इत्यर्थः, न तु नस्यं विधाय पश्चात् स्नेह्या इति भावः। येषां देहिनां वस्तिरनुवासननिरूहाख्यो दातव्यो तेषामपि पूर्वं स्नेहकर्म कार्यम्। ये केचिच्छोधनीया वमनविरेकादियोग्यास्तेऽपि पूर्वं स्नेह्या इत्यर्थः। परमार्थतस्तु, विरेचने विधातव्ये सति † व्यह स्नेहपानं परम्, वमने पुनरेकाहोपरमे स्नेहः, यदाह कश्चित् सुदान्तसेन,—"एकाह दिनमन्यच्च कफमुत्क्लेश्य तत्करे" इति॥ ६॥

---

* तन्नाशकम् इति पाठः अशुद्धतिविरहितः, अन्ये "तन्नाशकः" "तन्नाशमनम्" इत्यादिरूपः कश्चित् पाठो भवेत् ग्रन्थान्तरे एतदशुद्धपाठदर्शनात् तथा च चरकतात्पर्यदीपिकायां—"भयहर्षयोरुन्मादकारणत्वेऽपि तौ पुनरुन्मादे विपर्ययत्वमेवोक्तं सान्त्वन हर्षण भयमर्त्सादिना" इति।

† चरकसुश्रुतवाग्भटादिषु एवमभिहित—विरेचने कर्त्तव्ये स्नेहक्रियानन्तरं दिवसत्रय स्नेहपानं परित्यज्य तस्मिन्नेव दिनत्रये स्निग्धद्रवौदनसौदनभुक् स्वेदमाचरन् विरेचनयोगं पिबेत्, एव वमनेऽपि स्नेहपानानन्तरमेकमहः स्नेहादुपरतं तस्मिन्नपरमदिवसे एव स्निग्धद्रवौदनसौदनभुक् स्वेदमाचरन् परेऽहनि कफमुत्क्लेश्य वमनयोगं पिबेत इति, तथा च "स्निग्धद्रवौदनधन्वौत्य-रसभुक् स्वेदमाचरेत्। स्निग्धस्त्र्यह स्थित कृत्वा विरेक वमन पुन॥ एकाह दिनमन्यच्च कफमुत्क्लेश्य तत्करे॥" (वा० सू० १६ अ०) इति। किञ्च 'स्नेहात् प्रस्कन्दन जन्तुस्त्रिराचोपरत पिबेत्। स्नेहद्रवमुष्णञ्च व्यह भुक्त्वा रसौदनम्॥ एकाह्नोपरत-स्त्रिवृत् भुक्त्वा प्रच्छदन पिबेत्॥" (च० सू० स्नेहाध्या०) इति।

पश्चात् खेदाहौ।—

पश्चात् स्वेद्या गते शल्ये * मूढगर्भगते तथा।
काले प्रजातकाले वा पश्चात् स्वेद्या नितम्बिनी ॥ ७ ॥

पूर्वं पश्चाच्च खेदार्हौ।—

† स्वेद्या पूर्वं त्रयः श्लीह-भगन्दर्यर्शसस्तथा।
अश्मर्य्यश्चातुरो जन्तु समये शस्त्रकर्मणः ॥ ८ ॥

इदानीं ये पश्चात् स्वेद्यास्तानाह, पश्चादिति।—"मूढगर्भगतं तथा" इत्यत्र "मूढगर्भाद्यपद्रवे" इत्येके। "मूढगर्भगते तथा" इत्यपि पाठः, कश्चित्, अथाद्रक्तस्रावाद्यपद्रवरहिता पश्चात् स्वेद्या इत्यर्थः। काले प्रसवसमये प्रजातकाले सम्यग्जातसमये। नितम्बिनी स्त्री। तन्त्रान्तरेऽपि—"पश्चात् स्वेद्या हते शल्ये मूढगर्भाद्युपद्रवा। सम्यक् प्रजाता काले या पश्चात् स्वेद्या विजानता॥" (सु० चि० ३२ अ०) इति। (चक्रदत्ते) ॥ ७ ॥

अथ ये उभयतः स्वेद्यास्तानाह, स्वेद्या इति।—श्लीहभगन्दरार्शसां त्रय एव दोषा त्रय एवोपद्रवा वा, ते चापि वातादिदोषजनिता इत्यर्थः। ‡ तथेतियद्यपाठान्नेते पूर्वं स्वेद्या किन्तु पश्चात् स्वेद्या इति तात्पर्य्यार्थः।

---

* पाठोऽयं सुश्रुतविरोधी, अनुपद्रवमूढगर्भ एव पश्चात् स्वेद्यतया तत्रोक्तत्वात्, "अथात रक्तस्रावाद्यपद्रवरहिता पश्चात् स्वेद्या" इति टीकाकारव्याख्यानमपि तस्यैव पाठस्य समर्थकमिति। तथा "काले प्रजातकाले" इति पाठोऽपि तद्वत् "काले प्रजाता सम्यक् च" इति तत्रोक्तपाठत्वात्। एतच्च टीकाकारव्याख्या लिपिकरप्रमादात् यद्यपि सङ्गतिविरहिता, तथाऽपि "सम्यक् जातसमये" इत्युक्तिरपि तस्यैव पाठस्य समर्थिका, अकाले प्रसूताया अस्वस्थत्वात् अतिरिक्तरक्तस्रावशङ्कया। "गर्भिणी पुत्रिता सूताम्" इति वाग्भटीक्ते "सूताम् अपप्रसूता प्रसूतगर्भामिति यावत्, अन्यास्तु खेदात् रक्तातिप्रवृत्तिः स्यादिति भावः" इति शिवदासव्याख्या।

† सुश्रुते "स्वेद्या पूर्वं च पश्चाच्च भगन्दर्यर्शसस्तथा। अश्मर्य्यां चातुरो जन्तु शेषान् शास्त्रं प्रचक्षते ॥" इति पाठः।

‡ "तथेति यद्यपाठात् नेते पूर्वं स्वेद्या किन्तु पश्चात् स्वेद्या," इत्यत्र "नेते केवलं पूर्वं स्वेद्या, किन्तु पश्चादपि स्वेद्या,' इत्येव साधुपाठः।

सर्वविधस्वेदस्य सामान्यकालनियम ।—

सर्वान् स्वेदान् निवाते च जीर्णाहारे च कारयेत् ॥ ९ ॥

स्वेदस्य फलम् ।—

स्वेदाद्धातुस्थिता दोषाः स्नेहक्लिन्नस्य देहिनः।
द्रवत्वं प्राप्य कोष्ठान्तर्गत्वा यान्ति विरेकताम् ॥ १० ॥

स्वेदकाले दृश्यनेयी रचनाविधि ।—

स्विद्यमानशरीरस्य हृदयं शीतलैः स्पृशेत्।

तथा चोक्तं—* "स्वेद्या पुनरयथादाहनान्तरमुष्णाम्बुतप्तकटाहोपवेशनरूपम्"। एवमन्यदपि यथायोग्यं बोद्धव्यम्। अनुरातुर शस्त्रकर्मण शस्त्रविधानस्य समये काले स्नेहभगन्दरादौनित्यर्थ । शस्त्रकर्मण पश्चात् पूर्वञ्चैते स्वेद्या इत्यभिप्राय ॥ ८ ॥

अथ स्वेदकालावस्था दर्शयितुमाह, सर्वानिति।—सर्वान् तापोष्मोपनाहद्रव-द्रव्यान् निवाते वातरहितस्थाने जीर्णाहारे सति, जीर्णाहारलक्षणञ्च, तथा हि—"उद्गारशुद्धकरणाद्वा वेगोत्सर्गो यथोचित। लघुता क्षुत् पिपासा च जीर्णाहारस्य लक्षणम्॥" इति। प्रायेण तु विष्टब्धेऽजीर्णेऽपि स्वेदो विहित, उक्त हि—"विष्टब्धे स्वेदन कार्यम्" इति वचनात् ॥ ९ ॥

अथ स्वेदाद्दोषस्य येन विधिना अपगमस्तमाह, स्वेदादिति।—धातुस्थिता इति—रसादिधातुगता, दोषा वातादय, स्नेहक्लिन्नस्य देहिन इति—स्नेहाभ्यक्त-शरीरस्य पुरुषस्य, यत स्नेहस्वेदपूर्वकमेव शोधन द्रवत्व प्राप्येति—दोषा एव यत (?) ये मार्गेषु कोष्ठा स्वस्थानस्था वा धातुस्था अपि वा ते सम्यक्स्वेदैर्योजिता सन्त द्रवत्व प्राप्य कोष्ठान्तर्गता पश्चाच्छोधने कृता शान्ति यान्तीत्यभिप्राय, तथा चोक्त—"स्नेहात क्लिन्ना धातुसंस्थाश्च दोषा स्वस्थानस्था ये च मार्गेषु कोष्ठा। सम्यक्स्वेदैर्योजितास्ते द्रवत्व नीता कोष्ठ शोधने यान्ति शान्तिम्॥" इति ॥ १० ॥

स्वेदितस्य आश्वासनार्थं विषयमाह, स्विद्यमानेति।—स्विद्यमानशरीरस्य

* स्वेद्या पूर्वञ्च पश्चाच्च इत्यस्य व्याख्याया त्रिवेदासेन "भगन्दरे अर्शसि च पूर्वं स्वेदस्तप्तलौहशलाकया दाहरूप, पश्चात् स्वेदस्तु दाहानन्तरमुष्णोदकोपवेशन-रूपो ज्ञेय" इत्युक्तम्। टीकाकारस्य स्वेद्या पुनरित्यादि व्याख्या तु अथसङ्गति-विरहिता, "यथा" इत्यत्र "अथवा" इति पाठे स्यात् तु कथञ्चिदर्थसङ्गति. स्यात्।

स्नेहाभ्यक्तशरीरस्य शीतैराच्छाद्य चक्षुषी ॥ ११ ॥

स्वेदानर्हा।—

अजीर्णी दुर्बलो मेही क्षतक्षीणः पिपासितः।
अतिसारी रक्तपित्ती पाण्डुरोगी तथोदरी ॥ १२ ॥
मदार्त्तो गर्भिणी चैव न हि स्वेद्या विजानता।
एतानपि मृदुस्वेदै स्वेदसाध्यानुपाचरेत् ॥ १३ ॥

अतिस्वेदजा रोगा तेषां सामान्यविधिश्च।—

अतिस्वेदात् सन्धिपीडा दाहस्तृष्णा क्लमो भ्रमः।
पित्तासृक्पिडकाकोपस्तत्र शीतैरुपाचरेत् ॥ १४ ॥

स्नेहाभ्यक्तशरीरस्वेति पादद्वयस्य कोऽभिप्राय ? अनेन पूर्व स्नेहाभ्यक्तशरीरस्य पश्चात् स्वेदितस्य पुरुषस्येत्यर्थः, यत सर्वस्वेदेष्वपि स्नेहाभ्यङ्गो विहित इति प्रसिद्ध, तथा चोक्त दृष्टान्तेन—"नानभ्यक्त नापि चाक्लिन्नदेहे स्वेदो योज्य स्वेदविद्भि क्वचित्। दृष्ट लोके काष्ठमक्लिन्नमाशु गच्छेन भङ्ग स्वेदयोगैर्दहीतम॥" (सु० चि० ३२ अ०) इति। शीतैराच्छाद्य चक्षषी इति—सवाङ्गेषु स्वेदे क्रियमाणे चक्षुरुपघातार्थमुक्त, शीतैरिति—पद्मपत्रादिभि। अस्याग्रे "हृदय हृषणी दृष्टि स्वेदयन्कटु वा न वा" इति केचित पठन्ति व्याख्यानयन्ति च। अत्र चक्षषी इत्युपलक्षणत्वात हृदयादिरक्षणमेव कार्य्यमित्यनेनैव गृहीतार्थत्वात् ॥ ११ ॥

अथ येऽपि रोगिणोऽस्वेद्यास्तानाह, अजीर्णीत्यादि।—एते रोगिणो न स्वेद्या, यत स्वेदादपि तेषा देहनाशो भवति कदाचिन्न भवति तदा एतेषा विकारा अपि असाध्यत्व यान्तीति भाव, अत एव विजानता पुरुषेणेति ग्रहणम्, तथा हि—"स्वेदार्दिषा यान्ति देहा विनाशञ्चासाध्यत्व यान्ति तेषा विकारा" (सु० चि० ३२ अ०) इति। अजीर्णीति—अजीर्णे भक्ते इति सामान्य, विशेषेण विष्टब्धाजीर्णे स्वेदो विहित 'विष्टब्धे स्वेदन कार्यम' इति वचनात्। यदुक्तमन्यत्रापि—"स्वेदै साध्यो दुर्बलोऽजीर्णभक्ता यदि स्याता स्वेदनौद्यौ ततस्तौ" इति। शेष सुबोधम। केचिदत्र अङ्ग पठन्ति—"मृदुस्वेद प्रयुञ्जीत तथा चन्मुक्तदृष्टिषु' इति ॥ १२।१३ ॥

अथ स्वेदस्यातियोगेन दोषमाह अतिस्वेदादिति।—पिडकाकोप इति—स्फोटादीनाम्, अथवा पिडकाकोठ इति पाठ, कोठा वरटीदष्टसङ्काश। तत्र शीतैरुपाचरेदिति—पानाभ्यञ्जने चात्र शीता क्रिया कार्या, विधिज्ञेन इति

तापस्वेदस्य नियम ।—

तेषु तापाभिध स्वेदो बालुकावस्त्रपाणिभिः ।
कपालकन्दुकाङ्गारैर्यथायोग्य प्रयुज्यते ॥ १५ ॥

ऊष्मस्वेदस्य नियम ।—

ऊष्मस्वेद प्रयोक्तव्यो लोहपिण्डेष्टकाश्मभिः ।
प्रतप्तैरल्पमित्तैश्च काये * नक्तकवेष्टिते ॥ १६ ॥

ऊष्मस्वेदस्य अन्यविधनियम ।—

अथवा वातनिर्नाशि-द्रव्यक्वाथरमादिभिः ।
उष्णैर्घटं पूरयित्वा पार्श्वे छिद्रं विधाय च ॥ १७ ॥
विमुद्याग्र्य त्रिखण्डाच्च धातुजा काष्ठवशजाम् ।

ग्रेष, यदुक्तम्,—"अतिस्विन्नमथाश्वास्य शीताम्बुप्राशन हितम्" इति। चरकै तु उक्त —"उक्तस्तस्याग्नितोये यो वैधिक सर्वशो विधि । सोऽतिस्विन्नस्य कर्त्तव्यो मधुरस्निग्धशीतल ॥" (च० सू० स्वेदाध्या०) इति ॥ १४ ॥

इदानी यत पूर्व चतुर्विधमक्त तत योगद्वारेण प्रकटयन्नाह, तेष्वित्यादि।—तेषु पूर्वोक्ततापादिस्वेदेषु। तापाभिध स्वेदस्तापस्वेद । बालुकादयोऽव बह्निसन्तप्ता ज्ञेया । कपाल खर्पर । यथायोग्य इति—यथादोषापेक्षया यथास्थानस्थित-व्याध्यनुरूप इत्यर्थ । अय तापस्वेदोऽभिहित ॥ १५ ॥

अथोष्मस्वेदविवक्षया योगद्वारेण तत्स्वरूपमाह, ऊष्मस्वेद इति।—काये नक्तकवेष्टिते इति—न नक्तका वातहरपटपल्लवाद्य तैर्वेष्टित शरीर कृत्वा पश्चात् विहितस्वेदद्रव्येण स्वेदयेदिति भाव ॥ १६ ॥

अन्यदाह अथवेति।—वातनिर्नाशिद्रव्याणि दशमूलपभृतीनि तेषा क्वाथ स्वरसश्च यथासम्भव ग्राह्य । पार्श्वे छिद्र विधायेति—घटपार्श्वे नाडिकामुखप्रमाण रन्ध्र कारयेत। विमुद्याग्र्यमिति—घटमुख मुद्रयेदिति नाडिकाघटसन्धिरपि

---

* "नक्तकवेष्टिते" इत्यत्र "वस्त्रावेष्टिते" इति क्वचित पाठ। गूढार्थ-दीपिकाया "रक्तकवेष्टिते" इति पाठ , रक्तक कम्बलम्। सुश्रुते "आर्द्रालक्तक-परिवेष्टितम्" इति 'आर्द्रवस्त्रावच्छन्नम्" इति च पाठ ।

† नक्तकशब्द कपटपर्याय "वसौ नक्तककर्पटौ" इत्यमर,, कर्पट वस्त्रखण्ड-मित्यर्थ । वटपल्लवार्थक नक्तकशब्द कुत्रापि न दृश्यते ।

षडङ्गुलास्यां गोपुच्छा नाडीं युञ्जाद्द्विहस्तिकाम् ॥१८॥
सुखोपविष्टं स्नभ्यक्त गुरुप्रावरणावृतम्।
हस्तिशुण्डिकया नाड्या स्वेदयेद्वातरोगिणम् ॥ १९ ॥

ऊष्मस्वेदस्य अन्यविधनियम।—

पुरुषायाममात्रा वा भूमिमुत्कीर्य्य खादिरैः।
काष्ठैर्दग्ध्वा तथाऽभ्युक्ष्य क्षीरधान्याम्लवारिभि ॥ २० ॥
वातघ्नपत्रैराच्छाद्य शयान स्वेदयेन्नरम्।
एव माषादिभि स्विन्नै शयानं स्वेदमाचरेत् ॥ २१ ॥

मृदयेदिति सम्प्रदाय। नाडीस्वरूपमाह त्रिखण्डामित्यादि।—त्रिखण्डा मृदुमध्यप्रबलस्वेदविषयत्वात खण्डत्रययुक्तामित्यर्थ। धातुजामिति—सुवर्णादिधातुनामतम। अथवाऽप्यभावे काष्ठवशजामिति—वशकाष्ठादिघटिताम्। षडङ्गुलास्यामिति—षडङ्गुल कुण्डलाकृतिमुत्तरलग्न नाडिकामुखमिति भाव। किञ्चिद्धिनग्नघटलग्नमुख (?) भवतीति गोपुच्छाकारानुकारामिधानत्वात सम्प्रदायविषय तेन लघुमुख घटलग्न कारयेत, हस्तन्मुखनातुरनाभ्यग्नमिति भाव। द्विहस्तिकामिति—द्विहस्तपरिमाण त्रिखण्डानामित्यर्थ। गुरुप्रावरण तूलोपप्रभृतिकम्। हस्तिशुण्डिकयेत्युक्तमपि नाड्या कार दृढयति न दोष पौनरुक्त्या। अथवा हस्तिशुण्डिकेति नाड्याश्च स्वेदस्य सज्ञा विहिता, हस्तिशुण्डाकाश्च स्वेद इति तात्पर्याथ ॥ १७—१९ ॥

अन्योष्मस्वेदविधानमाह, पुरुषायामनामानामिति।—पुरुषप्रमाण यथा स्यात्, आयामश्च दीर्घविस्तारया। खादिरै काष्ठैरिति—खदिरो रक्तसार। दग्ध्वेति, भूमौ तप्तस्थाननिति शेष, तत्र काष्ठज्वलन कृत्वाङ्गारानिति भाव। तथेति—पश्चात क्षीरादिभि क्त्वा अभ्युक्ष्येति—न तु (?) काष्ठाङ्गारानि तत्रस्थापनीय क्षीरधान्याम्लप्रभृतीनामेकतमेन कृत्वा तदेव सेचयेदिति भाव। धान्याम्ल काञ्जिकविशेष तदभावे तक्र ग्राह्यमिति व्यवहारात्। पश्चात कार्यमाह वातघ्नपत्रैरित्यादि।—तत्र वातघ्नपत्रैरेरण्डप्रभृतिकै। तच्छयन भूमौ तप्तनिर्मितरूप तत्पत्रैराच्छादन तत्र वातार्त्तपुरुष सवेश्य स्वेदयेदित्यभिप्राय। एवमिति—अनेनैव प्रकारेण स्विन्नैर्माषादिभिरपि शयनस्वेदमाचरेयोयम, एतदुक्त भवति माषकाथजलेनापि भूमौ तप्तायां सेचनम्, अथवा स्विन्नवाष्पै (?) वाष्पपरिस्विन्न वातार्त्तनर स्वेदयेदित्येके ॥ २०।२१ ॥

उपनाहस्वेदस्य नियम ।—

अथोपनाहस्वेदञ्च कुर्य्यादातहरौषधैः ।
प्रदिह्य देहं वातार्त्तं क्षीरमासरमान्वितैः ॥
अम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैः ॥ २२ ॥

महाशाल्वणस्वेदस्य नियम ।—

उत ग्राम्यानूपमांसैर्जीवनीयगणेन च ।
दधि-सौवीरक-क्षीरैर्वीरतर्वादिना तथा ॥ २३ ॥
कुलत्थ माष-गोधूमैरतसी तिल-सर्षपैः ।
शतपुष्पा-देवदारु शैफाली-स्थूलजीरकैः ॥ २४ ॥
एरण्डमूलबीजैश्च राम्ना-मूलक-शिग्रुभिः ।
मिषि-कृष्णा-कुठेरैश्च लवणैरम्लसंयुतैः ॥ २५ ॥
प्रसारणखगन्धाभ्यां बलाभिर्दशमूलकैः ।
गुडूच्या वानरीबीजैर्यथालाभ समाहृतैः ॥ २६ ॥
चुल्ल्यै स्विन्नेश्च वस्त्रेण बद्धैः सस्वेदयेन्नरम् ।
महाशाल्वणसञ्ज्ञोऽय योगः सर्वानिलार्त्तिहृत् ॥ २७ ॥

अथोपनाहस्वेदविधानमाह, अथेति।—उपनाह क्षीणबद्धलालिप, बन्धन-मित्येकै। वातहरौषधैरिति—काकोल्यादिगणात यथालाभ ग्राह्यमिति व्यवहार। क्षीरमासरसान्वितैरिति—क्षीर गव्य, तदभावे आज, सामान्यत्वाच्च यथायोग्य दध्यपि। मासरम ग्राम्यानूपसम्भव वक्ष्यमाणत्वात, तस्य रस मासरसमित्यर्थ। अम्लपिष्टैरिति—अम्लै काञ्जिकादिभि। सलवणैरिति—लवणोऽत्र सैन्धवम्। स्नेह स्नेहयुतैरिति—स्नेहोऽत्र चतुर्विधो स्नेहो यथायोग्यसम्भवात। अपरमपि शाल्वण-स्वेद्य ॥ २२ ॥

अपरमप्युपनाहविधानमाह, उतेति।—ग्राम्यानूपमांसादिवानरीबीजपर्य्यन्तद्रव्यै यथालाभग्राह्यै चुल्ल्यै कुट्टिते स्विन्ने क्वथिते तदनु वस्त्रेण बद्धे पोट्टलकाकारे सस्वेदयेत। नरमिति—वातार्त्तं पुरुषम्। अय महाशाल्वणसंज्ञयोग प्रसिद्ध एव,

---

* "मिषि" इत्यत्र "निशा" इति पाठान्तरम्।

यदुक्तम्—"आनूपग्राम्यसाधारे खेद शाल्यकी मत" इति। ग्राम्या अश्वाश्वतर-गो खरोष्ट्र-वस्तीरश्च मेट पृच्छकप्रभृतय। आनूपवर्गस्तु पञ्चविध तत यथा—कूलचरा, प्लवा, कोशस्था पाटिन मत्स्याश्चेति। तच कूले चरन्तीति कूलचरा, ते यथा—"तवेभ-महिष-न्यङ्कु-कङ्कु-रोहित-शूकरा। खड्गि-गोकर्ण-चमरा सृमरा काल-पुच्छक॥ कीटकारमलेद्याश्च (?) पञ्चव कूलचारिण॥" प्लवा यथा—"हस सारस कादम्ब-क्रौञ्च-कारण्डव प्लवा। बलाका-बक-चक्राङ्ग-जीवञ्जीवाम्बुकुक्कुटा॥ उत्क्रोश पुण्डरीकाच्च-शरारी सनितुण्डका। काकतुण्ड घनाराव मद्ग पुष्करशारिका॥ काचाच-माल्लका श्वेतवराहाद्या प्लवा स्मृता॥" कोशस्था यथा—"शङ्ख शङ्खनख शुक्तिभल्लूक-शम्बूकादय"। पाटिनस्य—* "उद्र-कुम्भीर-शिशुमार-कुम्भीरका। नक्र कूर्म-भल्लूकाना पाटिन परिकीर्त्तिता॥" मत्स्या यथा—"गोमत्स्यो मुरल कृष्ण-मत्स्यको बहुलो रस। राजी चिलिचिमाद्यास्य मत्स्या प्रोक्ता समासत॥" इति। इत्यानूपमामवर्ग। एतेषा स्वरूपमव विस्तरभयान्न लिखितम। जीवनीयगणेन चेति—तदुक्त सुश्रुते,—"काकोलीक्षीरकाकोली लोवकर्षभक-मुद्गपर्णीमाषपर्णी-मेटामहामेटा-च्छिन्नरुहा-कर्कटशृङ्गी-तुगाक्षीरी-पद्मक-प्रपौण्डरीक-ऋद्धिवृद्धिसहीकाजीवन्त्यो मधुकश्चेति" (सु० सू० ३८ अ०) जीवनीयो गण। दधिमीवीरकक्षीरेति—मीवीरक काञ्जिकभेद। वीरतरादिना लशेति—वीरतरादिगण सश्रुतेऽवगन्तव्य—"वीरतरसहचरदशमूलबृहत्पञ्चमूली-गुन्द्रालकुशकाशाश्मभेदकाग्निमन्थमीरटावसुकवसिरभल्लककुरण्टकैन्दीवरकपोतवङ्का स्वदष्ट्रा चेति" (सु० सू० ३८ अ०)। ग्रैष्मालोस्थूलजीरकेति—ग्रैष्मालो निर्गुण्डी, "सभारू" इति लोके। स्थूलजीरक कृष्णजीरक। एरण्डस्य मूल बीजञ्च ग्राह्यम्। मिसि शतपुष्पा। कुठेरक स्वनामप्रसिद्ध। लवणैरिति बहुवचनेनाव पञ्चलवणानि यथायोग्य देयानि, अपराण्यपि यावुचारप्रभृतीनि न दोष। अम्लवयुनैरिति अम्लोषवर्गो (०) हितो ग्राह्य। बलाभिरिति बहुवचनाद्बलाचतुष्टयेषु यथालाभमिति योज्यम। दशमूल प्रसिद्ध, स च दशभ्यैर्मिलित, तदुयथा—"शालपर्णी पृश्निपर्णी बृहती कण्ट-कारिका। तथा गोक्षुरकयैव लघुमूलमिति स्मृतम॥ बिल्वोऽग्निमन्थ श्योनाक काश्मर्य्य पाटला तथा। श्रेय बृहत पञ्चमूल दशमूलमुमे स्मृतम॥" इति। वानरी-

* सुश्रुते—"कूर्मकुम्भीरकटककृष्णकर्कटकशिशुमारप्रभृतय पाटिन" इति पाठ। उद्रस्य कूलचरवर्गे भल्लूकस्य च कोशस्थवर्गे पूर्वं तथा कुम्भीरस्य च वारुणय ग्रहणमिति सुधीभिरवधेयम्।

द्रवस्वेदस्य नियम ।—

द्रवस्वेदस्तु वातघ्न-द्रव्यक्काथेन पूरितम् ।
कटाहं कोष्ठकं वाऽपि सूपविष्टोऽवगाहयेत् ॥ २८ ॥

द्रवस्वेदार्थं द्रवस्य परिमाणम् ।—

नाभेः षडङ्गुलं यावन्नग्नः क्काथस्य धारया ।
कोष्णया स्कन्धयो. सिक्तस्तिष्ठेत् स्निग्धतनुर्नरः ॥
एव तैलेन दुग्धेन सर्पिषा स्वेदयेन्नरम् ॥ २९ ॥

स्वेदार्थं द्रवावगाहने कालनियम ।—

एकान्तरो द्व्यन्तरो वा स्नेहयुक्ताऽवगाहने ॥ ३० ॥

बीजैरिति—कपिकच्छूबीजै । एतैर्द्रव्यैरन्यस्यैवा योगा बोद्धव्या, भिन्नवृतौयान्त-पदत्वात । शेष सुबोधम ॥ २३—२७ ॥

इदानी द्रवस्वेदविधिमाह, द्रवस्वेद इति ।—पित्तसङ्गे द्रवो हित इति पूर्वोक्त-त्वात । वातघ्नद्रव्यक्काथेनेति—वातघ्नद्रव्यं काकोल्यादिगणप्रमुख, तच्च पूर्वं व्याख्या-तम् । कटाहं कोष्ठकञ्च विविधमिति द्रवस्वेद, वा-ग्रहणात चर्मद्रोणीप्रभृतिकमपि यथालाभ द्रवस्वेदविधौ ग्राह्यम ॥ २८ ॥

इदानी द्रवस्य परिमाणमाह, नाभेरित्यादि ।—यावन्नाभेरुर्ध्वं सूपविष्ट पुरुषो नग्नो भवति तावत क्काथादिक धारया योजयेदित्यर्थ । इत्येव कटाहावगाह इद (?) परिमाणम । कोष्ठे तूत्थित पुरुषो यावत स्कन्धयोरुपरि सिक्तो नग्न तावत्तिष्ठे-दित्यभिप्राय । स्निग्धतनुता सर्वस्वेदेऽपि बोद्धव्या । एवमुक्तप्रकारेणैव तैलादिनाऽपि यथायोग्य स्वेदयेदित्यर्थ ॥ २९ ॥

अथावगाहनक्कालनियममाह, एकान्तर इति ।—यथावगाहने यथा आदौ स्नेह-युक्त स्नेहावगाहस्तदा एकान्तर एकाहान्तर द्व्यन्तरो द्विदिनान्तरो वा कर्त्तव्य इति व्यवस्थाविषय, न तु सर्वावगाहने नियमोऽयम । तत्रत्र कालनियम' कृत , तत्तान्तरे तु न कृत, तथा पूर्वमुक्त—नाभेरुर्ध्वं षडङ्गुलप्रमाण क्काथतैलादिधारणं, तत्तान्तरे तु अन्यथा, वैद्यालङ्कारे—"कटाहे स्कन्धपे पात्रे किंवा पाषाणसम्भवे । आकण्ठमग्नो नियमेन प्रहर प्रातरेव वा ॥ रोमान्तेष्वनुपेषु स्थित्वा मात्रावशतवयम् । तत, प्रस्विद्यति स्नेहैश्चतुर्भिर्गच्छति त्वचम् ॥ पञ्चभिश्च भवेद्रक्त षड्भिर्मांस प्रपद्यते । मेद-स्थान सप्तभिस्तैरष्टभिस्त्वस्थिषु व्रजेत् ॥ नवभिर्याति मज्जान दशभिर्न विकारयेत् ।

स्वेदार्थं स्नेहावगाहने फलम्।—

शिरामुखै रोमकूपैर्धमनीभिश्च तर्पयन्।
शरीरे बलमाधत्ते युक्त स्नेहोऽवगाहने ॥ ३१ ॥

ततस्तु शमयेत् रोगान् वातपित्तकफोद्भवान्॥ स्रोतसां मार्दवकर कफवातविनाशन:। धातूना पुष्टिजननो बलवर्णकर पर ॥ वातरोगानशेषाश्च जयेदेव विशेषत ॥" इति। अन्यत्रापि कण्ठपर्य्यन्तधारणमुक्त यथा—"द्रोणो काष्ठस्य तैलेन सुखोष्णेन प्रपूरयेत। तत्र स्थित्वा यथान्यायं कण्ठपर्य्यन्तमाहनम्॥ सुखी च सुकुमारश्च सुखार्थी श्रम-पीडित। गाहेत घटिकासाद्ध तैलद्रोण्याच यत्नत॥ ततो निःसृत्य हृष्टात्मा खट्टाया चर्मकै पुन। सुखेन मर्दन कृत्वा यावत्तैल विशुष्यति॥ उद्वर्त्तन तत: कृत्वात स्नानच विधिपूर्वकम। त्वचि कान्तिकर सद्य पारुष्यच विनश्यति॥ बल-पुष्टिकर सद्या वातरोगच्च नाशयेत्। अन्ये च त्वग्भवा रोगा मन्दानलसमुद्भवा॥ यथ शुष्यति सर्वाङ्ग गतिश्चय तु विद्वत्ता। तत्र द्रोण्याच तैलेषु गाहयेद्घटिकाद्वयम्॥ क्षीणेन्द्रिया क्षीणयुक्ता ज्वरक्षीणाश्च ये नरा। वातार्त्तौ हर्षणौ येषामल्पहर्षश्च दारुण॥ पङ्गुल पीठसर्पी च गृध्रसी वातशूलवान्। कलायखञ्जक तूनी प्रतूनीञ्च विशेषत॥ एतान् सर्वान् निहन्त्याशु छिन्नाक्षमिव मारुत॥" इति। तेनाद्य आङ्गधरोक्त कालनियमवचन सुकुमारादिविषय, तथा नाभेरूर्द्ध षडङ्गुलग्रहणं हृदयरक्षार्थं तत्कालरोक्त दारुणवातरोगग्रस्तविषय कण्ठपर्य्यन्तावगाहनन्तु सुकुमारादि-विषयम्, अत एवात्र चरके—"पद्मोत्पलपलाशैर्वा स्वेद्य सहत्य चक्षुषो। सुखा-बलौभि शीताभि शीतलैर्भाजनैरपि॥ जलार्द्रै जलजैर्हस्तै स्विद्यतो हृदय सुखेत॥" (च० सू० स्वेदाध्या०) इति। नेवहृदयरक्षार्थविषयमिद आङ्गधरवचन ज्ञेयम्॥ ३०॥

अथ सम्यक् स्नेहावगाहने फलमाह, शिरामुखैरिति।—अवगाहने युक्त स्नेह एकान्तरादिविधिना सम्यक् प्रयुक्तश्चेत् तादृश एव शिरादिभिस्तर्पयन् सन् शरीरे बलमाधत्ते, तर्पयन् धातूनिति शेष, यदुक्त—"मात्राभिस्त्रिचतु पञ्च-षटसप्ताष्टभि-रात्रजैत। रसादयोऽशनेर्दोष्यि-मज्जधातून् यथाक्रमम॥" इति। मात्रायाश्च प्रसङ्गतो लक्षण सङ्ख्या च लिख्यते यथा—"अञ्जानुन करावर्त्तं कुर्य्यात स्फोटिकया यूतम। एषा मात्रा भवेदेका सर्व्वत्रैव निश्चय॥" सङ्ख्या यथा—"वेदनोपशम पञ्च-शतसहस्रशतानि वा। सहस्र वाऽपि मात्राणा कुर्य्यादौषबलाबलम्॥" इत्यादि। शिरामुखै रोमकूपैरिति—शिराणा मुखानि रोमकूपप्रतिबद्धानीति भाव। शिराश्च

जलसिक्तास्य वर्द्धन्ते यथा मूलेऽङ्कुरास्तरोः।
तथा धातुविबृद्धिर्हि स्नेहसिक्तस्य जायते॥
नात परतरः कश्चिदुपायो वातनाशनः॥ ३२॥

सम्यक्स्विन्नस्य लक्षणम्।—

श्रोतःशूले व्युपरमे स्तब्धगौरवनिग्रहे।
* दोषाग्नौ मार्दवे जाते स्वेदनाद्विरतिर्मता॥ ३३॥

दोषादिवहा इति ग्रन्थकारः, "सन्धिबन्धनकारिण्यो दोषधातुवहा शिराः" (शार्ङ्ग० पूर्व० ५ अ०) इति। तास्च स्थूलसूक्ष्मभेदेनापि द्विधा भवन्ति, तासां नाभिर्मूलत्वादूर्ध्वमधश्चैकैकः प्रसरः, तथा चोक्तम्—"यावत्यस्तु शिराः कायं सम्भवन्ति शरीरिणाम्। नाभ्या सर्वा निबद्धास्ता प्रतन्वन्ति समन्ततः॥" (सु० शा० ७ अ०) इति। धमनीभिश्चेति—प्राणादनिलपूरणाद्धमन्यो रसवहाश्चतुर्विंशतिसङ्ख्यकाः, एताश्चापि नाभिप्रभवा अभिहिताः, चकारात् 'तासामपि मुखानि रोमकूपप्रतिबद्धानि, ये स्वेदमभिवहन्ति रसश्चापि सन्तर्पयन्त्यन्तर्बहिश्च, तैरेव चाभ्यङ्गपरिषेकावगाहालेपनवाष्पाद्यैस्तु शरीरमभिप्रतिपद्यते" (सु० शा० ७ अ०) इति। अथ स्नेहावगाहनाङ्गतुल्यौ सत्यौ तद्दृष्टान्तेनास्य प्राधान्यमाह, जलसिक्तस्येति।—मूले पानीयसिक्तस्य इक्षोर्यथा अङ्कुरा पल्लवादिरूपा वर्द्धन्ते, तद्वदत्रापि धातुवृद्धौ बोद्धव्यम् अत एव नात परः इति—यस्मात् स्नेहावगाहनात् अपरो वातनाशको योगो न प्रधान इति भावः॥ ३१।३२॥

अथ स्वेदकर्मणो विरतिविषयमाह, श्रोतेति।—शूले व्युपरमे इति—शूलशान्तौ सत्यां, शूलशब्देन वातादिजनितो वेदनासमूहो बोद्धव्यः। स्तब्धो गौरवस्याङ्गानां तथानिर्वहो नाम तस्मिन् जाते सति। दोषाग्नौ सति, मार्दवमपि अङ्गानां स्रुदता तस्मिन्नपि जाते सति, विरतिर्विश्राम, तेन अपि कारणेन स्वेदगुणोऽवगन्तव्यः, तथा चोक्तम्—"अग्नेर्दीप्तिर्मार्दवं लक्ष्मप्रसादः भक्तेच्छा श्रोतसां निर्मलत्वम्। कुक्षेः शुद्धिः क्षुत्प्रतिनिद्रा सतन्द्रा सम्यक् स्वेदे लक्ष्यतेऽग्र्येदाशु युक्ते॥" (सु० चि० ३२ अ०) इति। सौषधस्वेदातियोगलक्षणमुक्तं वाग्भटे—"पित्तासृक्कोपतृष्मूर्च्छा-श्वराङ्गसदनभ्रमाः। सन्धिपीडा ज्वरः श्यावरक्तमण्डलदर्शनम्॥ स्वेदातियोगाच्छर्दिश्च तत्र लङ्घनमौषधम्॥" (वा० सू० १७ अ०) इति॥ ३३॥

---

* "दोषाग्नौ मार्दवे जाते" इत्यत्र 'सञ्जाते मार्दवे स्वेदे" इति चरकपाठः।

सम्यक्स्विन्नस्य आचारनिर्देश ।—

सम्यक् स्विन्नं विमृदितं स्नातमुष्णाम्बुभिः शनैः।
भोजयेच्चानभिष्यन्दि व्यायामं न च कारयेत् ॥ ३४ ॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायाम्
उत्तरखण्डे स्वेदविधिर्नाम द्वितीयोऽध्याय ॥ २ ॥

तृतीयोऽध्यायः।

अथ वमनविधिः। (क)—

संशोधनस्य कालनिर्देश ।—

शरत्काले वसन्ते च प्रावृट्काले च देहिनाम्।
वमनं रेचनञ्चैव कारयेत् कुशलो भिषक् ॥ १ ॥

सुस्विन्नस्य पश्चात् कर्म दर्शयति, सम्यगिति।—विमृदितमिति—स्नेहावगाहानन्तरं सुखमर्दनम्। उष्णाम्बुभिरुष्णोदके स्नातम्। अनभिष्यन्दि भोजयेत् जाठराग्निं सन्दीपनार्थम्। व्यायाम शरीरायासजनकं कर्म। कैश्चित्—"व्यायामं न च कारयेत्" इत्यत्र "सर्वमाचारमाचरेत्" इति पाठं पठन्ति, आचार स्नेहाचरणं तच्च वाग्भटेऽप्युक्तम्—"उष्णोदकोपचारी स्यात् ब्रह्मचारी क्षपाशयः। न वेगरोधी व्यायाम-क्रोधशोकहिमातपान्॥ प्रवातयानयानाध्व-भाष्याध्यासनसंस्थिति। नीचात्युच्चोपधानाङ्ग-स्वप्नधूमरजांसि च॥" (वा० सू० १६ अ०) इति ॥ ३४ ॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायामुत्तरखण्डे स्वेदविधिर्नाम द्वितीयोऽध्याय ॥ २ ॥

(क) अथेदानीं कृतस्नेहस्वेदस्य शोधनाधिकारः, उक्तञ्च वाग्भटे—"स्नेहक्लिन्नाः कोष्ठगा धातुगा वा स्रोतोलीना ये च शाखास्थिसंस्थाः। दोषा स्वेदैस्तु द्रवीकृत्य कोष्ठं नीता सम्यक् शुद्धिभिर्निर्हियन्ते॥" (वा० सू० १७ अ०) इति। अत्र शाखास्थिसंस्थाः बहुवचनग्रहणात् पञ्चकर्मणा ग्रहणम्, तेनादौ स्थानानुरोधात् प्राक् वमनं पश्चाद्विरेचनमाद्यम् इति। अत एवाह, अथेति।—वमनप्रधानो विधिः वमनविधिः शोधनप्रकारः।

अथ वमनादीनां कालमाह, शरत्काले इत्यादि।—शरत्कालादिशब्देनात्यन्तसमीप-

वमनार्हा।—

बलवन्त कफव्याप्त हृल्लासादिनिपीडितम्।
तथा वमनसात्म्यञ्च धीरचित्तञ्च वामयेत् ॥ २ ॥

वमनसाध्या रोगा।—

विषदोषे स्तन्यरोगे मन्देऽग्नौ श्लीपदेऽर्बुदे।
हृद्रोग कुष्ठ-वीसर्प-मेहाजीर्ण-भ्रमेषु च ॥ ३ ॥
विदारिकाऽपची-कास-श्वास पीनस हृद्विषु।
अपस्मारे ज्वरान्माद तथा रक्तातिसारिषु ॥ ४ ॥
नासा-तालुगलौष्ठपाकेषु कर्णस्रावे ऽधिजिह्वके।
गलशुण्डयामतीसारे पित्तश्लेष्मगदे तथा ॥
मेदोगदेऽरुचौ चैव वमनं कारयेत् भिषक् ॥ ५ ॥

साधारणकाल उपलक्ष्यते, उक्तञ्च—"श्रावणे कार्त्तिके चैत्रे मासि साधारणे क्रमात्। शोधयेषाञ्चिनचित्तान् वाय्वादीनाय निर्हरेत्॥" (वा० सू० १३ अ०) इति। ऊर्ध्वभागदोषनिहरण वमनम्, अधोभागदोषनिहरण विरेचनम्। चकारात् बस्तिनस्यादय। कुशलो भिषगिति—दोषदेश्यकालसात्म्यप्रकृतिवयोवह्निधातुसत्त्वविशेषज्ञाने शोधने च कुशल इति ॥ १ ॥

सम्प्रति वमनार्हमाह, बलवन्तमिति।—बलवन्त वमनसामर्थ्ययुक्तम्। कफव्याप्तमिति—कफोल्बणगदव्याप्तम्। हृल्लास उपस्थितवमनता, तदादिरोगपीडितमित्यर्थ, आदिशब्दात् कासश्वासाद्य पित्तासृक्प्रभवा। वमनसात्म्यमिति—वमन सात्म्य यस्य तम्। धीरचित्त न कातरमित्यर्थ पूर्वपदमिति शेष ॥ २ ॥

अथ ये रोगा वाम्यास्तानाह, विषेति।—ननु अपस्मारादीनामनिलप्रधानत्वात् कथमत्र वमन युक्तम्? उच्यते पाण्डुरोगी क्रमिव्याप्त इति वक्ष्यमाणव्याप्तशब्देन प्रवृद्धपाण्डुरोगे निषिद्धापक्रमे कफावस्थायाञ्च वृद्ध शेष, यदुक्त—"पाण्डुरोगी भिषक् कुर्याद्बृंहण शोधनम्" इति। अत्र ऊर्ध्वशोधन वमनादिकम् अध शोधन विरेचन, विरचनञ्चात्र तीक्ष्णमेव, "बालस्य तीक्ष्णान्यनुशीलनानि" इति वचनात् ॥ ३—५ ॥

---

* द्विजिह्वके इति पाठ न समीचीन, तदाख्यरोगाभावात् तल्लेषु पदमनाच्च।

वमनानर्हौ।—

न वामनीयस्तिमिरो न गुल्मी नोदरी कृशः।
नातिवृद्धो गर्भिणी च न स्थूलो न क्षतातुरः॥ ६॥
मदार्त्तो बालको रूक्षः क्षुधितश्च निरूहितः।
उदावर्त्युर्ध्वरक्तौ च दुश्छर्दि केवलानिली॥
पाण्डुरोगी कृमिव्याप्तः पठनात् स्वरघातकः॥ ७॥

वमनानर्हाणामवस्थाविशेषे वमनविधिः।—

एतेऽप्यजीर्णव्यथिता वाम्या ये विषपीडिताः।
कफव्याप्ताश्च ते वाम्या मधुक्काथस्य पानतः॥ ८॥

अथावाम्यानाह, नेति।—तिमिरप्रभृतिभिर्व्याधिभिर्व्याप्ता पुरुषा न वामनीया इत्यभिप्रायः, यतः,—"अवम्यवमनाद्रोगा जायन्ते यान्ति दैर्घ्यताम्। असाध्यता वा गच्छन्ति नैतं वाम्यानतं स्मृता॥" (सु० चि० ३३ अ०) इति। दुश्छर्दिरित्यनेन यद्यपि सामान्यमभिहितं, तथापि बहुदोषान्वितच्छर्द्या वमनं कार्यं न दोषः, यदुक्तं सुश्रुते—"छर्दिषु बहुदोषासु वमनं हितमुच्यते" (सु० चि० ३३ अ०) इति॥ ६।७॥

अथ यदाप्यतेऽप्यजीर्णादिव्यथितास्तदा वामनीया इति विचार्याह, एते इत्यादि।—एते पूर्वोक्तास्तिमिरादयः, ते यदा अजीर्णव्यथिता विषपीडिता कफव्याप्ता वा भवन्ति, तदा वाम्या इत्यभिप्रायः। कफव्याप्ता इति निश्चितं, तथा हि—"कफजे वमनं श्रेष्ठं रेचनं पित्तजे गदे। बस्तिर्वातगदे कार्य्यमामजे त्वामपाचनम्॥" इति। कुत वाम्यानमाह, मधुक्काथस्य पानत इति।—मधुक्काथो मधुयष्टीक्काथः, यद्वा—मधु क्षौद्रं, क्काथ क्काथितं जलम्, अन्यार्द्रहितद्रव्यस्य वा प्रकरणत्वात्, कषायस्यात्र सर्वं कोष्णं कार्यं इति चरकवचनात्। उष्णविरोधित्वेन मधूष्णं निषिद्धमिति विवक्षायां न यावन्मधूष्णं विरुद्धम्, यदुक्तं—"प्रच्छर्दने निरूहे च मधूष्णं न निवार्य्यते। अल्पस्यापाकमाश्वेव तथौर्ध्वमाहिवर्त्तते॥" (वा० सू० ५ अ०) इति। अत एव "यात्यवी दोषमादाय पच्यमानं विरेचनम्। गुणोत्क्लेषात् व्रजत्यूर्ध्वमपक्वं वमनं पुनः॥" (सु० चि० ३३ अ०) इति॥ ८॥

---

* "मधुक्काथपानतः" इति पाठान्तरम्।

सुकुमारादीना वमनविधि ।—

सुकुमार कृशं बालं वृद्धं भीरुञ्च वामयेत्।
पीत्वा यवागूमाकण्ठं चौरतक्रदधोनि वा ॥ ९ ॥

वमनस्य पूर्वकर्तव्यानिर्देश ।—

असात्म्यैः श्लेष्मलैर्भोज्यैर्दोषानुत्क्लेश्य देहिनः।
स्निग्धस्विन्नाय वमनं दत्त सम्यक् प्रवर्त्तते ॥ १० ॥

वामकद्रव्ये अवश्यदेयद्रव्यनिर्देश ।—

वमनेषु च सर्वेषु सैन्धव मधु वा हितम् ॥ ११ ॥

---

* यदा अजीर्णादिपीडततिनिरादयोऽपि सुकुमारादिषु भवन्ति तदा वक्ष्यमाणप्रयोगेणैव वाम्या इत्यत आह, सुकुमारमिति ।—वमनसाध्यविकारपीडिता सुकुमारादयोऽपि यवाग्वादीनामत्यतमेनाकण्ठ पाययित्वा वामयेदित्यर्थ । यवाग्वाश्चत्र कफकरत्वात् कफोत्क्लेशनायाभिमथनिमित्राय, यदुक्त—"पाशुधाने यथा वृष्टि क्लेदयत्यतिकर्दमम्। तथा श्लेष्मणि सङ्घे यवागू श्लेष्मवहनी ॥" (हा०) इत्यभिप्रायविषय वक्ष्यमाणेनैव चरितार्थत्वात्। चौरतक्रदधि यथादोषापेक्षया व्यस्त देयम् ॥ ९ ॥

पूर्वसूक्त वक्ष्यमाणेनैव चरितार्थत्वात्तानाह, असात्म्यै श्लेष्मलैर्भोज्यैर्दोषानुत्क्लेश्य देहिन । स्निग्धस्विन्नाय वमन दत्त सम्यक् प्रवर्त्तते ॥ इति ।—स्निग्धस्विन्नायेति—स्नेहपानपूर्वकाय स्वेदपूर्वकाय पुरुषायेत्यर्थ, न तु स्नेहस्वेदायेति, यत स्नेहपानादेकाहमुपरतमपराद्धे एव स्विन्नमिति प्रसिद्धि । भालुकिना स्नेहपानात ब्राह्मण वमन दर्शितम्, तद्यथा—"स्निग्धस्विन्नशरीरस्य दद्यात् प्रच्छर्दन ब्राह्मात्। दशरात्रे गते वान्ते भूयो दद्यादिरेचनम ॥" इति ॥ १० ॥

अथ वमनद्रव्येषु मधुसैन्धवयोर्विशेषेणैवोपादेयत्वमाह, वमनेष्विति ।—मधुसैन्धवयोरभिमतत्वञ्च सर्वत्रैव ज्ञेय यदुक्त—"यथाविकारविहिता मधुसैन्धव-

---

* उक्तिरत्र न सुश्रुतसम्मता, यत सुकुमार कृशमित्यादिश्लोक सुकुमारादयः केन वाम्या इतिविषयक न तु अवाम्यानामवस्थाविशेषे वमनप्रयोगविषयक । अजीर्णव्याधतादीनामवाम्याना वमनावस्थाया प्रागेव सुश्रुतेन यद्योपाय विषय सुकुमारादीना क्लेशासहाना सामान्यवमनप्रसङ्गे एव मृदुवमनार्थं पाठत न तु अवश्यवमनप्रसङ्गन, यथा—"तत्र सुकुमार कृश बाल वृद्ध भीरु वा वमनसाध्येषु विकारेषु चौरदधितक्रयवागूनामन्यतमेनाकण्ठ पाययेत्" (चि० ३२ अ०) इति।

वमनविरेचनोपयोगिद्रव्यनिर्देश ।—

बौभत्सं वमन दद्यात् विपरीतं विरेचनम् ॥ १२ ॥

वमनार्थं क्वाथविधि ।—

क्वाथद्रव्यस्य कुडव श्रपयित्वा जलाढके ।

* अर्द्धभागावशिष्टञ्च वमनेष्ववचारयेत् ॥ १३ ॥

वमनार्थं क्वाथपानस्य उत्तमादिमात्रा ।—

क्वाथपाने नवप्रस्था ज्येष्ठा मात्रा प्रकीर्त्तिता ।

मध्यमा षण्मिता प्रोक्ता त्रिप्रस्था च कनीयसी ॥ १४ ॥

सयुताम् । कोष्ठ विभज्य भेषज्य-मात्रा मन्त्राभिमन्त्रिताम् ॥" (वा० सू० १८ अ०) इत्यादि । अत्रोष्णेऽपि कषाये मधुनैव न विरुद्धे, वमनव्यापक्लृप्तेर्वोर्हणमनात् । वैद्य त्वयोगे पाकमश्नव मन्यमाना मधु न प्रतिपद्यन्ति इति केचित् । मन्त्रास्तु— "ब्रह्मदत्तोऽग्निवेष्टेन्द्र" (वा० सू० १८ अ०) इत्यादिग्रन्थो ज्ञेय ॥ ११ ॥

कौदृश वमनार्हं द्रव्य देय तदाह, बौभत्समिति ।—बौभत्स विकृतरसवर्णप्रायं वमन वमनद्रव्यमित्यर्थ, तेन लालाहृल्लासकरद्रव्यमित्यभिप्राय । विपरीत विरेचनमिति—विपरीत बौभत्सद्रव्यात्, तेन भक्षणे मनोज्ञमविकृतमित्यर्थ ॥ १२ ॥

इदानी क्वाथक्वाथयोर्मानमाह, क्वाथेति ।—क्वाथद्रव्य पटोलवासानिम्बप्रभृतिक, तस्य कुडवमित चतुःपलप्रमाणम् । जलाढके इति—चतुःषष्टिपलमिते पानीये । अर्द्धभागावशिष्टमिति—प्रस्थद्वयमित यावन्मित्यर्थ । इद परिमाणमप्येकदैव पानाशक्तावादिभज्य देयम् । क्वाथस्तूत्वे तु मलबलगुणो (?) यद्यपीद खात्तदा स एव पुन पेय इति व्यवहारादयमेवावगन्तव्य । कषायमपि पूर्णशरावं पाययेदित्युक्त, तथेहापि कषायपानव्यवस्थेति केचित् ॥ १३ ॥

अथ क्वाथक्वाथादौना पानेऽव मानमाह, क्वाथेति ।—षण्मितेति—षट्प्रस्था । कनीयसी लघ्वी, एतत्परिमाण पश्चाज्जलपानस्याह (?) अन्यथा पूर्वापरयोरव्यवस्था स्यात् । यद्वा—पूर्वपरिमाणन्तु यवागूवादौना पाचनार्थमभिहित, पश्चात् क्वाथपानस्येत्यर्थ । तत्र यवागूवादुपकल्प्येदिति पाठान्तरे इन्दोक्तमात्रया व्यवहार इति चक्र । चरके तु "मदनफलकषायमात्राप्रमाणन्तु खलु सर्वसंशोधनमात्राप्रमाणानि च प्रतिपुरुषमपेक्षितव्यानि भवन्ति । यावद्धि यस्य संशोधन पीत

* चक्रसङ्ग्रहे परिभाषायाञ्च "चतुर्भागावशिष्टञ्च" इति पाठ ।

वमनार्थं कल्कादीनाम् उत्तमादिमात्रा।—

कल्कचूर्णावलेहाना त्रिपल श्रेष्ठमात्रया।
मध्यमा द्विपला विद्यात् कनीया पलसम्मिता॥ १५॥

उत्तमादिभेदेन वमनस्य वैगिकात्तिकमाननिर्देश।—

वमने चापि वेगा स्युरष्टौ पित्तान्तमुत्तमा।
षड्वेगा मध्यमा वेगाश्चत्वारस्त्ववरे स्मृताः॥ १६॥

वमनादौ प्रष्टव्यमानस्य पारिभाषिकाश्च।—

वमने च विरेके च तथा शोणितमोक्षणे।

वैकारिकदोषहरणायोपपद्यते, न चातियोगायोगाय, तावदस्य मात्राप्रमाण वेदितव्यम्' (च० सू० उपकल्प०) इति। तथा वाग्भटेन—"कोष्ठ विभज्य भैषज्य-मात्राम्" (वा० सू० १८ अ०) इत्यादिवचनेनैव दर्शित, कोष्ठस्य प्रतिपुरुष भिन्न एव। दृढबलेन शरावमात्रा पीत्वा एकवार पानार्थं, जलाढकावशिष्ट प्रशस्तश्च (?)। द्विस्त्रिवार पानमित्येके। शरावस्य पूर्णत्वाभिधान सङ्ख्यार्थं पूर्णकुम्भवदिति जेज्जटचक्रौ इति॥ १४॥

अपरमपि द्रव्यविशेषेषु मानविशेषमाह, कल्कोत।—एतासु दोषव्याधीनवेक्ष्य प्रयोक्तव्या। कल्क दृषदि पेषितम्। चूर्ण वस्त्रगालितम्। अवलेहो लेह्यद्रव्यम्॥ १५॥

अथ वमनसङ्ख्यामाह, वमने इति।—वमने तु मध्यमोत्तमावरवेगाना षडष्टौ चत्वारो विहिता, इयमेव दोषादिव्यवस्था कार्यता। अष्टौ वेगा इति—अष्टवार यावद्वमनमेवेत्यभिप्राय, एव षट् चत्वारोऽवगन्तव्या, तथा हि—"जघन्य-मध्यप्रवरेषु वेगाश्चत्वार इष्टा वमने षडष्टौ। दशैव ते द्विस्त्रिगुणा विरेके प्रशस्यतया * शोणितमोक्षणे च॥" इति। पित्तान्तम इति कफे (?) अथवा पित्तान्तं यावत इत्यनेन सुवान्तलक्षण प्रतिपादितमेव, यदुक्त—'पित्ते कफस्थानु मुख प्रसृत्ते मुहुर्मुहु श्लेष्मगुरूंश्च सृजेत् चापि। लघौ च देहे कफसंक्षये च स्थिते सुवान्त पुरुष व्यवस्येत॥" (सु० चि० ३३ अ०) इति॥ १६॥

---

* "शोणितमोक्षणे च" इत्यत्र चरकचक्रदत्तयो, "द्विस्त्रिचतुर्गुणश्च" इति पाठ, वाग्भटे च "स्याद्द्विचतुर्गुणश्च" इति पाठ।

सार्द्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः ॥ १७ ॥

दोषभेदेन वमनद्रव्यस्य भेदानदेश ।—

कफे कटूकतीक्ष्णाद्यै पित्ते स्वादुहिमैर्जयेत् ।
सुस्वादुलवणाम्लोष्णै ससृष्टं वायुना कफम ॥ १८ ॥
क्षणा राठफलं सिन्धु कफे कोष्णजलैः पिबेत् ।
पटोलवासानिम्बैश्च पित्ते शीतजलं पिबेत् ॥ १९ ॥
सश्लेष्मवातपीडाया सक्षौद्र मदनं पिबेत् ।
अजीर्णे कोष्णपानीयैः सिन्धुं पीत्वा वमेत् सुधीः ॥ २० ॥

वमनविधि ।—

वमन पाययित्वा च जानुमात्रामने स्थितम् ।

* अष्टेदानी वेगाना परिमाणमाह वमने इति ।—अर्द्धमित्यनेन द्विगुणितं ज्ञेयोऽयमिति विज्ञायतम् ॥ १७ ॥

अथ दोषविशेषेण द्रव्यविशेषमाह, कफमिति ।—कटूक मरिचादि, तीक्ष्णं राजिकादि, उष्णमग्निसन्तप्तमित्यर्थ, उष्णवीर्यप्राय द्रव्य वा। स्वादुहिमैरिति—स्वादु मधुररसाधिक द्रव्य हिम शीतमर्थं शीतवीर्य वा। सुस्वादुलवणाम्लोष्णैरिति—मधुररससहिताभ्यामम्ललवणरसाभ्यामित्यर्थ उष्णमप्यत्र स्पर्शात्। ससृष्ट वायुना कफमिति अत एव कवलानिल वमने निषिद्धम इति पूर्वं दर्शितमेव। वाग्भटे तु—"कफे तीक्ष्णाकटूकै पित्ते स्वादुहिमैरपि। वमेत स्निग्धाम्ललवणै ससृष्टे मरुता कफे॥" (वा० सू० १८ अ०) इति। यदेतद्दोषविशेषेण द्रव्यविशेषमुक्त तदर्थं योग सन्धानमाह—क्षणा, राठफल मदनफल, सिन्धु सैन्धवम्, एतच्च कल्कीकृतम् उष्णपानीयेनालोड्य पीत्वा वमेदित्यर्थ। क्षणादीना मिलित्वा कर्ष इति केचित। व्यवहाराच्च क्षणादीना पृथक् कर्षमात्र देयमिति सम्प्रदाय। पटोलवासानिम्बैश्चेति—पटोलादिभि कृत्वा घृत शीत कार्य, पटोलादीना मिलित्वा पल, पाकार्थ जलाढक पादशेष कषायम। सक्षौद्र मदन पिबेदिति—क्षौद्रेण मदनफल पिबेदिति, क्षौद्रेण मदनफल कल्कीकृत्य तेनैव सहालोड्य पिबेत इत्याभिप्राय, मदनफलकल्कस्य कफ प्रत्येपेण प्रचार। अजीर्णे इत्यादि।—अत्र सैन्धवप्रक्षेपमाह ॥ १८—२० ॥

उत्तमद्विपर्यन्त वमनसूचनार्थं वमनविधिमाह वमनमिति।—वमन वमन-

* टीकेय दुर्बोधा मूलश्लोकेन सङ्गतिवैकल्या च। 'अर्द्धेन अधिकेन वर्त्तमानं सप्तोदशप्रस्थमत्युच्यते' इति गू० दी०।

कण्ठमेरण्डनालेन सृग्वन्तं वामयेद्भिषक् ॥
ललाटं वमतः पृष्ठं पार्श्वे द्वे च प्रधारयेत् ॥ २१ ॥

दुष्टान्तस्य लक्षणम्।—

प्रसेको हृद्ग्रहः कोठः कण्डूर्दुष्टिः क्षुदिति भवेत् ॥ २२ ॥

अतिवान्तस्य लक्षणम्।—

अतिवान्ते भवेत्तृष्णा हिक्काहारो विसञ्ज्ञिता।
जिह्वानिःसर्पणं चास्याश्चक्षुर्निर्नुदनं हरेत् ॥
रक्तक्षुतिं क्षवनञ्च कण्ठपीडा च जायते ॥ २३ ॥

क्वाथं पाययित्वा भिषक् वामयेत्, कम्? जानुमात्रावगाने स्थितं रोगिणम्, किम्भूतम्? एरण्डनालेन कण्ठं सृग्वन्तं, तस्य वमतः ललाटं द्वे पार्श्वे धारयेत्। उक्तञ्च वाग्भटे —'प्राङ्मुखं पाययेत् पीतं मुहूर्तमनुपालयेत्। तत्मना जातहृल्लासं प्रसेकं क्षुदयेत्ततः ॥ अङ्गुलिभ्यामनामाभ्यां नालेन मृदुनाऽथवा। गलतालुरुजन् वेगानग्रहत्तान् प्रवर्तयन्॥ प्रवर्तयन् प्रवृत्तास्तु जानुतुल्यासने स्थितः। उभे पार्श्वे ललाटञ्च वमतस्यास्य धारयेत्॥" (वा० सू० १८ अ०) इति ॥ २१ ॥

अथ दुष्टान्तं लक्षणमाह, प्रसेक इति।—दुष्टुक्षुदिति दुष्टान्ते पुरुषे, किञ्चिद्दान्ते इत्यभिप्राय प्रसेको मुखस्य कफस्राव इत्यर्थः। हृद्ग्रहो हृदयाविशुद्धि, हृद्रोग इत्यपरः। कोठ क्षुद्रोगे पठितः, स यथा—'वरटीदष्टसङ्काशः कण्डूमान् लोहितोऽस्रकफपित्तात्। क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैः॥" (भाव०) इति। दुष्टुक्षुदिता च वान्तिविधारणादेव प्राक्ता, तस्मादपि कोठादय सम्भवन्ति, तथा हि—"विसर्पकोठकुष्ठानि कण्डूपाण्डामयज्वराः। सकासश्वासहृल्लास व्यङ्गश्यावत्वचो वमेः॥" (वा० सू० ४ अ०) इति। वमेरिति—वान्तिविधारणादित्यर्थः। अस्यान्ते तच्चिकित्सार्थं सार्द्धं श्लोकं केचित् पठन्ति, तत् यथा—"गण्डूषधूमनाडीभिरान कृत्य मुक्त्वा तदहनि। व्यायाम स्त्रीरतञ्चैव प्रयत्नाद्वै विरेचनम॥ सचारलवणं तैलमभ्यङ्गार्थं च शस्यते॥" (वा० सू० ४ अ०) इति। प्रक्षेपक मन्यमानैरस्माभिरपि न लिखित यतो बहुपुस्तकेषु न दृश्यते ॥ २२ ॥

इदानीम् अतिवान्तलक्षणमाह, अतिवान्ते इति।—विसञ्ज्ञिता मूर्च्छाभेदः, जिह्वानिःसर्पणञ्च भवति, जिह्वाया, निःसर्पणमपि द्विविधम्, एकमल्पप्रविष्टरूपम्,

वमनातियोगे चिकित्सा।—

वमनस्यातियोगे तु मृदु कुर्याद्विरेचनम् ॥ २४ ॥
वमनान्तःप्रविष्टाया जिह्वाया कवलग्रहाः।
स्निग्धाम्ललवणैर्हृद्यैः * घृतक्षीरसमैर्हिताः ॥
फलान्यम्लानि खादेयुस्तस्य चान्येऽयतो नराः ॥ २५ ॥
निःसृतान्तु तिलद्राक्षा-कल्कं लिप्त्वा प्रवेशयेत्।
व्यावृत्तेऽक्षिणि घृताभ्यक्ते पीडयेच्च शनैः शनैः ॥ २६ ॥

अपरं बहिर्निर्गमनविषयम्। अक्ष्णोर्व्यावृत्तिर्नेत्रयोः परिवर्तनम्, अथवा व्यावृत्तिरिति—आकुंचनम्। हनुसंहतिरिति—चिबुकचलनादिराहित्यम्। ष्ठीवन रक्तस्येत्यसृक्च ॥ २३ ॥

अथ वमनातिप्रयोगोत्पन्नानां रोगाणां चिकित्सामाह, वमनस्येति।—स्निग्धाम्लवणैर्हृद्यैर्घृत (?) वमनातिप्रयोगेण प्रभवा तृष्णादिरोगा एभिर्विहितप्रयोगैः शाम्यन्तीत्यभिप्रायः। कथं यद्येवमाह—यदा वमनातियोगो भवति तदा मृदु विरेचनं दद्यात्, मृदु रेचनं मस्तुशीरादिना। अपरमपि विविधप्रकारेण पतितजिह्वाया योगचतुष्टयमुक्त्वा तद्व्याख्यानमाह, वमनान्त प्रविष्टायामित्यादि।—अन्त प्रविष्टायामिति—सङ्कुचितायाम्। अत्र कवलग्रहा स्निग्धाद्यै कल्पिता हिता पथ्या इत्यर्थः। स्निग्धं खेलादि, अम्ल अम्लीका मातुलुङ्गादि लवणं सैन्धवादि, एतेषां मध्ये हृद्यैर्मनोह्लादकरैरित्यर्थः। घृतक्षीरसमैरिति—घृतक्षीरमिश्रितैरित्यर्थः। स्नेहगण्डूषेनैव घृतगण्डूषप्राप्तिरेव, तत्र कथं पुनर्घृतगण्डूषम? उच्यते, स्निग्धशब्देनोक्ते पुनर्घृतोपादानं स्नेहक्रियातिशयद्योतनार्थम्। अपरमप्युपायमाह, फलानीत्यादि।—अम्लानीति—अम्लीकानिम्बकपटोलानि। तस्मादयत इति—तस्य जिह्वार्तस्य पुरुषस्येत्यर्थः, अयत पुरत, स्थित्वेति शेषः। अन्ये नरा इति—अन्यपुरुषा अनेन जिह्वा चलिता भवतीत्यभिप्रायः। एतच्चान्त प्रविष्टाया बहिर्निःसृतायाश्च जिह्वाया बोद्धव्यम्। अथ निःसृतायाः पृथक् योगद्वयमाह, निःसृतामित्यादि।—निःसृता बहिर्निर्गता, जिह्वामिति शेषः। तिलद्राक्षाकल्कमत्र साम्येन कैवलमाह। अपरमपि व्यावृत्तेऽक्षिणि योगमाह—घृताभ्यक्ते इति। व्यावर्तित्यपि पाठान्तरं, व्यावर्तिति—जिह्वा पूर्वकल्कादिना

* "घृतक्षीरसमै" इत्यत्र "घृतक्षीररसै" इति गूढार्थदीपिकाधृतपाठः साधुः सुश्रुतादौ रसशब्दग्रहणदर्शनात्।

हनुमोक्षे स्मृतः स्वेदो नस्यञ्च श्लेष्मवातहृत्।
रक्तपित्तविधानेन रक्तच्छर्दिमुपाचरेत्॥ २७॥
धात्रीरसाञ्जनोशीर-लाजाचन्दनवारिभिः।
मन्थं कृत्वा पाययेच्च मधुसर्पीद्रशर्करम्॥
शाम्यत्यनेन तृष्णाद्या पीडाश्छर्दिसमुद्भवा॥ २८॥

सम्यक् वमनलक्षणम्।—

हृत्कण्ठशिरसां शुद्धिर्दीप्ताग्नित्वञ्च लाघवम्।
कफपित्तविनाशश्च सम्यक् वान्तस्य लक्षणम्॥ २९॥

चलितेत्यर्थः (१) यदि चलिता जाता द्राक्षाक्षीरघृताभ्यक्ते (१) सति जिह्वा शनैः शनैः कृत्वा पीडयेत् अलनयदिति भावः। हनुमोक्षाश्रयमाह, हनुमोक्षे स्मृत स्वेद इत्यादि।—स्वेदोऽत्र चतुर्थो मध्ये विहितस्वेद एव कार्यः। नस्यमपि तद्विहितं, तच्च श्लेष्मवातघ्नद्रव्यकृतमित्यर्थः, तेन श्लेष्मवातघ्नं यन्नस्यं तद्देयम्। अन्ये श्लेष्मवातघ्नं भवतीति व्याख्यानयन्ति, यत कफवातनिर्हरणत्वेन हनुमोक्षे स्मृतं तन्मूलत्वात्। अन्ये श्लेष्मवातहृदित्यनेनापरमप्यपाय कथयन्ति, तत विचार्य योज्यमिति। रक्तच्छर्यामपि योगमाह, रक्तपित्तविधानेनेत्यादि।—रक्तपित्तविधान रक्तपित्तचिकित्सायामनन्यतसेन ज्ञातव्यम्। अन्योपद्रवाणां चिकित्सितमाह, धात्रीरसाञ्जनोशीरेत्यादि।—धात्रीं आमलकीफल रसाञ्जन दार्वीक्वाथसमुद्भवं उशीर मृणाल, लाजा भृष्टधान्यप्रभवा, चन्दन रक्त, वारिभिरिति—एतेषां वारि तोय यास्य, घृतत्वात् कल्कत्वाच्च (१)॥ २४—२८॥

अथ सम्यग्वान्तलक्षणमाह, हृदिति।—हृच्छब्दि हृदयलघुताकरा, कण्ठशुद्धिः कण्ठे पाटव कण्ठश्लेष्मापगमात्, शिर शुद्धि शिरोलघुत्व ततश्चपीडादिविनाशात्। दीप्ताग्नित्वमिति—ननु वान्तस्य सहसा मन्दोऽग्निर्भवति, उक्तञ्च—"सशोधनास्त्रविस्राव स्नेहयोजनलङ्घने। यात्यग्निर्मन्दता तस्मात् क्रम पेयादिमाचरेत्॥" (वा० सू० १८ अ०) इति, तत कथमत्र दीप्ताग्नित्वम? इति। उच्यत—अत्र शोधनेनाग्नेरुपघातो भवति नाग्नेरुच्छेदः, तस्योपघातस्य पेयादिपञ्चकेन पुनर्दीप्तत्वात् दीप्तत्वम, उक्तञ्च वाग्भटेन—"पेया विलेपीमकृत कृतञ्च यूष रस चौनुभय तथैकम। क्रमेण सेवेत नरोऽन्नकालान् प्रधानमध्यावरशुद्धिशुद्ध॥ यथाऽणुरग्निस्तृणगोमयाद्यैः सन्धुक्ष्यमाणो भवति क्रमेण। महान् स्थिर सर्वपचक्षयैव शुद्धस्य पेयादि-

सम्यक वमने पथ्यम्।—

ततोऽपराह्णे दीप्ताग्नि मुद्गषष्टिकशालिभिः।
हृद्येश्च जाङ्गलरसैः कृत्वा यूषञ्च भोजयेत्॥ ३०॥

सम्यक् वमनस्य फलम्।—

तन्द्रा निद्राऽऽस्यदौर्गन्ध्यं कण्डूश्च ग्रहणी विषम्।
सुवान्तस्य न पीडायै भवन्त्येते कदाचन॥ ३१॥

भिरन्तरग्नि॥" (वा० सू० १८ अ०) इति, तस्माद्दीप्ताग्नत्व युक्तम्। तथा लाघवं शरीरस्य, अत एव कफपित्तविनाशश्च इति, इत्यनेन शरीरपाटवमप्युक्तम्। अथवा वान्तिसमये तद्दिन एवाग्निर्हानिर्दुर्वान्ते च सम्यक् वान्ते अपरदिने च दीप्तोऽग्निरित्यदोष, अत एव वक्ष्यमाणश्लोके अजीर्णादिक वर्जयेत् सुधी. इति ग्रहणात्॥ २९॥

अथ वान्तस्य पथ्यमाह, तत इति।—ततोऽनन्तर, शुद्धेरनन्तरमित्यर्थः, दीप्ताग्नि अपराह्णे अपरदिने द्वितीययामावसाने वा, अत एव दीप्ताग्नित्वमिति भाव, मुद्गषष्टिकशालिभिर्भोजयेत, मुद्गादयोऽत्र पेयादिकरणेपयोगित्वेन मुद्गादीना यूषपेयाविलेप्य काष्या। अदीप्ताग्नित्वेति द्वितीये दिवसे (१)। उक्तञ्च—"तत सायं प्रभाते वा स्नात क्षुधान् सुखाम्बुना। पुराणरक्तशालीनामस्नेहलवणीषणम्॥ भुञ्जानो रक्तशाल्यन्न भजेत् पेयादिक क्रमम्॥" (वा० सू० १८ अ०) इति। तथा यूषञ्च पर जाङ्गलरसै हृद्यै कृत्वा भोजयेत्, तेनाग्नबल्य,—यूषरसादीनामकृताकृतत्वेन हृद्यत्व श्रेयम्, उक्तञ्च—"पेया विलेपीमकृतं कृतञ्च यूष रस चौभयत्र तथैकम्। क्रमेण सेवेत नरोऽन्नकालान् प्रधानमध्यावरशुद्धियुक्त॥" (वा० सू० १८ अ०) इति। "श्रेया कृताकृतासे च स्नेहादियुतवर्जिता" (सुद०) इति। षष्टिकोऽत्र गौरषष्टिक "गौरश्चासितगौरत" इति वचनात्। शालिरत्र रक्तशालि, एवविधा महाशाल्यादय॥ ३०॥

सुवान्तस्यैते पीडाद्यर्थं न भवन्ति इत्याह, तन्द्रेति।—तन्द्रा अक्षीन्मीलननेत्रत्वम्। निद्रा प्राक् व्याख्याता। आस्यदौर्गन्ध्य मुखदौर्गन्धता। विष विषजनितोपसर्ग, यदुक्त—"कफप्रसेकस्वरभेदनिद्रा तन्द्रास्यदौर्गन्ध्यविषोपसर्गा। गुरुत्वकण्डूग्रहणी-विकारा न सन्ति जन्तोर्वमनं कदाचित्॥" इति। कदाचन इति—न कस्मिंश्चित् काले भवन्तीत्यर्थ, यथा—"छिन्ने तरौ पुष्पफलप्ररोहा यथा विनाश सहसा व्रजन्ति।

वमने अपथ्यम्।—

अजीर्णं शीतपानीयं व्यायामं मैथुनं तथा।
स्नेहाभ्यङ्गं प्रकोपञ्च दिनैकं वर्जयेत् सुधीः॥ ३२॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां-
मुत्तरखण्डे वमनविधिनाम तृतीयोऽध्यायः॥ ३॥

तथा हृते श्लेष्मणि छर्दनेन तस्मा विकारा प्रलयं प्रयान्ति॥" (सु० चि० ३३ अ०) इति॥ ३१॥

कृतवमनस्य पथ्यमाह, अजीर्णमिति।—पेयादिद्रव्यस्याजीर्णमतिमात्रपानात्, तत्राग्नेर्मन्दत्वात्। शीतपानीयं शीतजलस्य शीतगुणैरकरणात्, अत एवोक्तम्—"उष्णोदकोपचारी स्यात् ब्रह्मचारी च पाठयेत्। न वेगरोधो व्यायामं क्षीणक्षीणकफेऽतपान्॥ प्रवातयानयानाध्व भाष्याध्यासनसंस्थिति। नीचात्युच्चोपधानाङ्घ्रि-स्वप्नधूमरजांसि च॥" (वा० सू० १६ अ०) इति। अत एवोक्त—"तृष्णागल्पाल्पमुष्णाम्बु पिबेदातकफज्वरे। तत कफं विलयं नीत्वा तृष्णामाशु निवर्त्तयेत्॥ उदीर्य चाग्निं स्रोतांसि मृदूकृत्य विशोधयेत्। लीनपित्तानलस्वेदं शक्नुयाद्वातनुन्नयेत्॥ निद्राजाड्यारुचिहर प्राणानामवलम्बनम्। विपरीतमतः शीघ्रं दोषसङ्घातवर्द्धनम्॥" (वा० चि० १ अ०) इति। व्यायाम शरीरायासजनक कर्म। दिनैकमित्युपलक्षणं, तेनान्यदपि कालं बोद्धव्यम्, यदुक्त—"वमनादिविधानेषु यावत् कालन्तु गच्छति। तावत्तु परिहर्त्तव्यं शीततोयादिसेवनम्॥" इति॥ ३२॥

इति श्रीकाक्षपुटान्वयप्रकाशवेदश्रीभाकविहरात्मजेनाढमल्लेन विरचितायां
शार्ङ्गधरदीपिकायामुत्तरखण्डे वमनविधिनाम तृतीयोऽध्यायः॥ ३॥

चतुर्थोऽध्यायः ।

अथ विरेचनविधि' । (क)—

विरेचनात पूर्वकर्त्तव्यनिर्देश ।—

स्निग्धस्विन्नस्य वान्तस्य दद्यात् सम्यक् विरेचनम् ॥ १ ॥

विरेचनात पूर्वं वमने अकृते दोषनिर्देश ।—

अवान्तस्य त्वधः स्रस्तो ग्रहणीं छादयेत् कफः ।
मन्दाग्निं गौरवं कुर्य्याज्जनयेद्वा प्रवाहिकाम् ॥ २ ॥

विरेचनात पूर्वं कर्त्तव्यान्तरनिर्देश ।—

अथवा पाचनैराम बलासञ्च विपाचयेत् ।

(क) अथ विरेचनाध्याय व्याख्यास्याम, अथेति ।—सम्बन्धस्तु प्रागुक्त एव ।

विरेचनविषयमाह, स्निग्धेति ।—पूर्वं स्नेहपानयुक्तस्य स्वेदयुक्तस्य चेत्यर्थं, वान्तस्येति वमन कृत्वा, एतेन स्नेहपानादीनामनन्तरेण विरेचन न कार्य्यमित्यभिप्राय , तथा हि—'पित्तसमुत्क्लेशेनीकृत्य स्नेहस्वेदै कृते सति । वमने च कृते पूर्वमेव सम्यक् विरेचयेत् ॥" इति । वमनानन्तरमपि स्निग्धस्विन्नस्येति; यदुक्त—* "कर्मणा वमनादीनामन्तरे त्वन्तरे पुन । स्नेहस्वेदौ प्रयुञ्जीत सशोधन-मनन्तरम् ॥" इति । स्निग्धस्विन्नस्य किमर्थं तत दृष्टान्तेन द्रढयति, यथा—"स्नेहस्वेदावकृत्वाऽग्ये यस्तु सशोधन पिबेत । दारु शुष्कमिवानाम्ये देहस्य विशीर्य्यते ॥" (सु० चि० २३ अ०) इति ॥ १ ॥

वमनेऽप्यकृत सति दोषमाह, अवान्तस्येत्यादि ।—अध स्रस्तोऽध प्राप्त, वेचन-द्रव्यप्रभाववशात, एतादृश कफस्तदा ग्रहणीमाच्छादयेत्, ग्रहणीसन्निश्रितान्नस्य, यदुक्तम्—"अग्न्यधिष्ठानमन्नस्य ग्रहणात ग्रहणी मता" (च० चि० ग्रहणी०) इति । अत एवादौ वमनेनात्र कफनिग्रहो विधेय । सोऽप्यामाशयसमाश्रयत्वात् स्रोतोऽवरोधहेतु न केवल ग्रहणीच्छादन करोति, मन्दाग्निमित्यादि, अत्र गौरवं शरीरस्येति। प्रवाहिकाऽतीसारभेद ॥ २ ॥

अथ काय्यान्तरमाह, अथवेति ।—पाचनैरिति—पाचनद्रव्ये आमनिति—

---

* "कर्मणा वमनादीनामन्तरेष्वन्तरेषु च। स्नेहस्वेदौ प्रयुञ्जीत स्नेहमन्ते प्रयोजयेत् ॥" (च० सिद्धि० वमनविरेचनस्था०) इति पाठ. ।

स्निग्धस्य स्नेहने. कार्ये स्वेदे. स्विन्नस्य रेचनम् ॥ २ ॥

वैरेचनिक-कृत्यनिर्देश ।—

शरद्वसन्ते च देयं शुद्धौ विरेचनम् ।
अन्यदाऽऽत्ययिके कार्ये शोधनं शोधयेत् बुधः ॥ ४ ॥

अपरिपक्वरसम्, तथा हि—"अग्नेरानलदौर्बल्यादविपक्वस्तु यो रसः। स आमसञ्ज्ञो दोषाणां सर्वदोषप्रकोपकः ॥" इति। एतेन न केवलमामं श्लेष्माणञ्च विपाचयेत् कृतवमनस्यापि पूर्वं पाचनं दत्त्वा पश्चाद्विरेचयेदित्यभिप्रायः। अथवेति यदृच्छात्तेन वमनं विना पाचनं देयमित्यर्थः। संशोधनकर्मणोऽपि पाचनस्य प्राधान्यमुक्तम्. तथा चौषटे चोक्तं—"प्राक् पाचनं स्नेहविधिविधेयं स्वेदस्तत स्याद्वमनं विरेकः। निरूहणं स्नेहनवस्तिकर्म नस्यं क्रमश्चेति भिषग्वराणाम् ॥" इति। एषा क्रमाभिप्रायेण विनाऽपि विरेचनस्य पूर्वं पाचनं कर्त्तव्यमेवेति व्यवहारः सङ्गत एव। अथ पाचनमभिधाय विरेचनमपि कस्य कथं दातव्यमित्याह, स्निग्धस्येति।—पूर्वं कृतस्नेहनस्य कै ? स्नेहनैर्घृतादिभिः। न केवलं स्निग्धस्य रेचनं, किन्तु स्वेदैरपि स्विन्नस्य स्वेदितस्य विरेचनं प्रशस्तम्, यद्वा—स्नेहने स्वेदैरिति सम्बन्धः। स्नेहस्वेदैरित्यनेन दोषाणां सुखमुत्पाटनं सूचितम्, यत —"स्नेहस्वेदप्रचलिता रसैः स्निग्धशरीरिता। दोषा कोष्ठगता जन्तो सुखं हर्तुं विशोधनैः ॥" (सु० चि० ३३ अ०) इति। पूर्वमुक्तमप्यदः पुनरेव दृढयति न दोषः पौनरुक्त्येन। केचित् वत्स्यमाणेन शरदृतावित्यनेन श्लोकेन मिलित्वा व्याख्यानयन्ति, तत्र—शरदृतौ स्निग्धस्य स्नेहने कृत्वा विरेचनं कार्ये, वसन्ते च स्वेदे स्विन्नमेव रेचनं देयं, न तु स्निग्धस्य, इति न सर्वसम्मतम् ॥ ३ ॥

वसन्ते तु विरेचनकालमाह, शरदिति।—अत्र शुद्धौ चास्वस्थस्य शोधनाय शरदृतौ वसन्ते च विरेचनं देयं, च कारादन्यास्वपि, तदुक्तं—"शोतोष्ण दोषचयं वसन्ते विशोधयन् शीघ्रमनल्पकाले। घनात्यये वार्षिकमाशु सम्यक् प्राप्नोति रोगा-नृतुनान्न जातु ॥" (वा० सू० ४ अ०) इति। विरेचनमित्यनेन विशेषेण रेचनं शरदादिविधेयं। अन्यदा हिमशिशिरयोरीषत् काले आत्ययिके कार्ये तस्मिन् विरेचनं कृते सति पूर्वं पश्चात् विहितशोधनं शोधयेदित्यभिप्रायः, अत एव बुध इति—कालविशेषज्ञो दोषविशेषज्ञश्च ॥ ४ ॥

विरेचनाईरोगनिर्देश ।—

पित्ते विरेचन युञ्जात्तामोद्भूते गदे तथा।
उदरे च तथाऽऽध्माने कोष्ठाशुद्धौ विशेषतः ॥ ५ ॥

संशोधनस्य गुणा ।—

दोषाः कदाचित् कुप्यन्ति जिता लङ्घनपाचनैः।
ये तु संशोधने शुद्धा न तेषां पुनरुद्भवः ॥ ६ ॥

अथ विरेचन केषां नियत तानाह पित्ते विरेचनमिति ।—पित्तजनितानामुपद्रवाणां पित्तात्मकाना नियतो विनाश इति केवलपित्तेऽपि विरेचनमभिहितम्, तथा च तन्त्रान्तरेऽपि—"शरीरजाना दोषाणा क्रमेण परमौषधम्। वस्तिर्विरेको वमन तथा तैल घृत मधु ॥" (वा० सू० १ अ०) इति। आमोद्भूते गदे तथेति—आमजनितव्याधौ, आमवातविकारादावित्यर्थ। उदरे इति—उदररोगरूढि। आध्मानोदरापूर। कोष्ठाशुद्धाविति—कोष्ठस्य अशुद्धि बद्धकोष्ठ इति प्रसिद्धि, विशेषत इत्यनेनैवमादीनामपरेषामपि विरेचन विशेषेण कुर्यादित्यर्थ ॥ ५ ॥

अथ शरीरशुद्धौ शोधनमुक्त, तस्य फल तथा शोधनस्य प्राधान्यविवक्षयेन विरेचनमुख्यत्वाच्च, दोषा इति।—अथ श्लोक शोधनपदग्रहणेनान्यच्छोधनप्रयोऽपि भवति। अतश्चार्थेन लङ्घनपाचनैरित्युक्तेन वमनविषयस्य निषेधपरत्वात् विरेचनाध्याये स्थीकृत। ननु येऽपि लङ्घनपाचनैर्जितास्ते पुन कथ सम्भवन्ति? उच्यते—कदाचिदतिस्वल्पहेतुलाभेन जिता अप्यजिता दोषा मूलानुच्छेदात्

---

* कदम्बकृतायुर्वेददीपिकायामस्य श्लोकस्य व्याख्या यथा—लङ्घनमनौपवास, पाचनस्य पृथगुपादानात्। सप्तसु शमनेषु इदमेवग्रहण प्रधानत्वात्। ये तु संशोधने, शुद्धा दोषास्तेषा न पुनरुद्भव, अयमर्थ —लङ्घनादय शमनत्वात सञ्चितान् दोषान् समूलान नोन्मूलयन्ति किन्तु शमयन्ति, ते कदाचित स्वल्पहेतुनाऽपि कुप्यन्ति, ये शोधनैः शुद्धा तेषा पुनरुद्भवो न भवति छिन्नसञ्चयत्वात्, उक्तञ्च सुश्रुते—"सञ्चयेऽपहृता दोषा लभन्ते नोत्तरा गती" (सू० सू० २१ अ०) इति। बहुपुस्तकेषु "दोषा कदाचित् कुप्यन्ति" अस्य श्लोक 'पित्ते विरेचन युञ्जात्' इत्यस्यार्धे पठन्ति, तदसङ्गतमेव शोधनपरतैवास्य श्लोकस्य पूर्वश्लोक। "शरत्काले वसन्ते च" इत्यय शोधनपर एव तेन शोधनफलार्थ एवाय श्लोक। तेन—"शरत्काले वसन्ते च" अस्य श्लोकस्यार्धे "दोषा कदाचित् कुप्यन्ति" अयं श्लोक पठनीय.। विरेचनस्यापि शोधनत्वात यथाकथञ्चित् समाधेय वा।

विरेचनानर्हा।—

बालवृद्धावतिस्निग्धः क्षतक्षीणो भयान्वितः।
श्रान्तस्तृषार्त्तः स्थूलश्च गर्भिणी च नवज्वरी ॥ ७ ॥
नवप्रसूता नारी च मन्दाग्निश्च मदात्ययी।
शल्यार्दितश्च रूक्षश्च न विरेच्या विजानता ॥ ८ ॥

मूलभूताश्रयगतदोषदूष्यसङ्घातात् असम्यक् जिता अल्पमपि हेतुं प्राप्य पुनः कुप्यन्तीति भावः, तेन तेषां पुनरुद्भव इति। अशोधनेन मूलदोषजयादल्पहेतुना न कदापि प्रकोपः, बलवत्तरहेतुना भवत्येव ॥ ६ ॥

इदानीं यं विरेचने * न निषिद्धास्तानाह बालेति।—विरेच्या इति—विशेषेण रेच्या न भवन्तीत्यभिप्रायेणाल्परेचनस्य प्राप्तिरेव, अत एव बालवृद्धयोरप्यय निषेध सामान्य, विशेषेण तु विरेकसाध्यव्याध्युपयुक्तयो किञ्चिद्धेयमित्यक्तम्, तथा च—"अग्निचारविरेकैस्तु बालवृद्धौ विवर्जयेत्। तत्साध्येषु विकारेषु मृदौ कुर्यात् क्रियां भृशं ॥" (सु० सू० ३५ अ०) इति, निषिद्धाचरणमन्यत्राप्युक्तम्—"अत्यर्थपित्ताभिपरीतदेहान् विरेचयेत्तानपि मन्दवीर्यैः" (सु० चि० ३३ अ०) इति। तानपि निषिद्धबालवृद्धादीन्। अतिस्निग्ध इति—अतिस्नेहपानादियुक्त, तथा हि,—"न चातिस्निग्धकायस्य दद्यात् स्नेहविरेचनम्। दोषा प्रभाविता भूयो क्षीयन्ते तेन वर्त्मसु॥" इति। क्षतक्षीण इति—धातुशोषणत्वेन शोषो कथित, स च राजयक्ष्मभेद। भयान्वितो भययुक्त, भयशोकत्वेन शोकाभितप्तस्य दीनस्य वा निषेधो दर्शित, यदुक्त—"क्षीणक्षया रूक्षितबालवृद्ध दीनोऽथ शोषी भयशोकतप्त" इत्यादि। स्थूलो बहुमेदान्वित। मन्दाग्निरपि कफोल्बणत्वात्। रूक्षो वातोल्बण इति, अथवा रूक्ष इति—अस्निग्ध। तथा चुक्त—"विरूक्ष्य स्नेहसात्म्यन्तु भृश सस्नेह्य रेचयेत्" (सु० चि० ३३ अ०) इति। विजानतेत्यनेन विरेचनविषयविकल्पविशेषज्ञेन वैद्येनेत्यर्थ, यत —"विरेचनैर्याप्ति नरा विनाशमज्ञप्रयुक्तैरविरेचनीया" (सु० चि० ३३ अ०) इति ॥ ७।८ ॥

---

* विरेचनैर्निषिद्धा इति भवित् युक्त सुश्रुतादौ एषामविरेच्यत्वेनोक्तत्वात्। गूढार्थदीपिकायामपि एतदेवोक्त तथा च—"अविरेचनयोग्यानाह, एते बालादयो विजानता विशेषज्ञपुरुषेण न विरेच्या." इति।

विरेचनार्हा ।—

जीर्णज्वरी गरव्याप्तो वातरक्ती भगन्दरी ।
अर्शः पाण्डूदरग्रन्थि-हृद्रोगारुचिपीडिताः ॥ ९ ॥
योनिरोगप्रमेहार्त्ता गुल्मप्लीहव्रणार्दिताः ।
विद्रधिच्छर्दिविस्फोट-विसूचीकुष्ठसयुताः ॥ १० ॥
कर्णनासाक्षिरोवक्त्र-गुदमेढ्रामयान्विताः ।
प्लीहशीर्षाक्षिरोगार्त्ता क्रिमिक्षीणानिलार्दिताः ॥
शूलिनो मूत्रघातार्त्ता विरेकार्हा नरा मताः ॥ ११ ॥

दोषभेदेन कोष्ठभेदनिर्देश ।—

बहुपित्तो मृदुः कोष्ठो बहुश्लेष्मा च मध्यमः ।
बहुवातः क्रूरकोष्ठो दुर्विरेच्यः स कथ्यते ॥ १२ ॥

विरेकसाध्यान् रोगानाह, जीर्णज्वरीति ।—जीर्णज्वरिप्रभृतयो विरेकार्हा नराः मताः, आचार्यास्तानिति शेषः । जीर्णज्वरीति—पुराणज्वरी, तस्य विरेकसाध्यत्वात् । गरव्याप्त इति—गर कृत्रिमं विषं तेन व्याप्तः दूषितः । तथाऽर्शआदिपीडिताः । तथा योनिरोगादिभिरर्दिताः । तथा विद्रध्यादियुताः । तथा कर्णनासाक्षिरोवक्त्रगुद-मेढ्रामयान्विता इति—कर्णादिगतामयान्विता इत्यर्थः, तेनामयशब्दः कर्णादिभिः सह सम्बध्यते । प्लीहशीर्षाक्षिरोगार्त्ता इति—प्लीहादिरोगव्याप्ता इत्यर्थः । क्रिमिक्षीणा-निलार्दिता इति—क्रम्यादिभिरार्दिताः पीडिताः । विरेकार्हा इति—विरेचनयोग्या इत्यर्थः ॥ ९—११ ॥

अथ विरेचनज्ञानार्थं कोष्ठभेदानाह, बहुपित्त इति ।—बहुपित्तः कोष्ठः मृदुः, बहुकफः मध्यः, बहुवातः क्रूरः । मध्यमेन शोधनेन हीनयोगी क्रूरः, अतियोगी मृदुः, सम्यग्योगी मध्यः । ससर्गसन्निपातजकोष्ठे योगवाहित्वं कफस्य ज्ञेयं वचनबलात्, यदाह खारणादिः,—"वातोल्बणा स्यात् ग्रहणी क्रूर-कोष्ठस्य देहिनः । पित्तला मृदुकोष्ठस्य योगवाही तयोः कफः ॥" इति । तेन वातकफाभ्यां क्रूरः, मध्यो वातपित्ताभ्यां, सन्निपाताच्च मृदुः । ननु "बहु-वातश्लेष्मा क्रूरः" (सु० चि० ३३ अ०) इति सुश्रुतेन बहुकफस्य क्रूरत्वमुक्तम्, इह तु मध्यमत्वमिति विरोधः ? नैवं, सुश्रुतवाक्यस्य ससर्गपरत्वादिति बोपदेवपण्डिताः । दुर्विरेच्य इति—क्रूरात् श्यामादिकैरप्यविरेच्यः ॥ १२ ॥

मृदादिकोष्ठभेदेन मृद्वादिमात्रानिर्देश ।—

मृद्वी मात्रा मृदौ कोष्ठे मध्यकोष्ठे च मध्यमा ।
क्रूरे तीक्ष्णा मता द्रव्यैर्मृदुमध्यमतीक्ष्णकै. ॥ १३ ॥

मृदुमध्यतीक्ष्णविरेचनद्रव्यानिर्देश ।—

मृदुर्द्राक्षापयोष्णाम्बु-तैलैरपि विरिच्यते ।
मध्यस्तु त्रिवृतातिक्ता-राजवृक्षैर्विरिच्यते ॥
क्रूर. स्नुक्पयसा हैम-क्षीरोदन्तीफलादिभिः ॥ १४ ॥

उत्तमादिभेदेन वैगिकी मात्रिकी च मात्रा ।—

मात्रोत्तमा विरेकस्य त्रिंशद्वेगै. कफान्तगा ।
वेगैर्विंशतिभिर्मध्या हीनोक्ता दशवेगकै' ॥ १५ ॥

कोष्ठानुरूपा मात्रामाह, मृद्वीति ।—मृदादिद्रव्यै मृद्वादिकोष्ठकेषु मृद्वादिमात्रा मता, आचार्यैरिति शेष । ननु मृदादिद्रव्यै' द्वाद्या मात्रा भवति किमर्थं मृदादि मात्रेतीत्यादि ? उच्यते, हीनयोगातियोगसम्यग्योगाय, ते च वैद्याधीना , उक्तञ्च —"अल्पस्यापि महागुण्यं प्रभूतस्याल्पकर्मता । कुर्यात् सर्वेषविशेष-कालसंस्कार-युक्तित ॥" इत्यादि मात्राज्ञानार्थमुक्तम् ॥ १३ ॥

मृदादिद्रव्याणि तानि कानि ? इत्यत आह, मृदुरिति।—मृदु कोष्ठ द्राक्षादिभि सम्यक् विरिच्यते, तच द्राक्षा गोजनी। पय गोदुग्धम। उष्णाम्बु उष्णोदकं, पानीयत्वेन मध्यमेऽपि ग्रहणम्, अथवा अम्बुशब्द सारकसस्यादिद्रवोपलक्षण । तैल-मैरण्डतैलम। मध्यस्तु मध्यकोष्ठ न क्रूरो न मृदुरिति मध्यपदाभिधानात्, स च त्रिवृतादिभि सम्यक् विरिच्यते, त्रिवृता श्यामा। तिक्ता कटुकी। राजवृक्षो गिरि मालक । क्रूर इति—क्रूरकोष्ठ स्नुक्पयोहैमक्षीरीयादिभिर्विरिच्यते, स्नुक् सेहुण्ड । हैमक्षीरी स्वर्णक्षीरी। दन्तीफल जयपाल । आदिग्रहणात् कुम्भीतिल्वकादय ॥१४॥

विरेकमात्रोत्तमादिमात्राया * वाङ्गकैलिङ्गक (?) परिमाणमाह, मात्रोत्तमेति।—उत्तमा मात्रा इति—प्रवरा वेगमात्रा त्रिंशद्वेगैर्यथा, तथा कफान्तगेति कैलिङ्गक

---

* आयुर्वेदे मागधकालिङ्गमेदेन मानद्वय दृश्यते, न तु वाङ्गकैलिङ्गकमान मिति। मागधादिमानमपि औषधद्रव्याणा परिमाणज्ञानार्थं न तु विरचने त्रिंशद्वारादिवेगज्ञानार्थम् इति। वस्तुतस्तु आयुर्वेदशास्त्रे वैगिकी मानिकी-मात्रिकी-सैद्धिकीभेदेन चतुर्विधा मात्रोक्ता, सा च चक्र-डल्हन-शिवदासादिभिः

उत्तमादिभेदेन मानिकी मात्रा।—

द्विपलं श्रेष्ठमाख्यातं मध्यमञ्च पलं भवेत्।
पलार्द्धञ्च कषायाणां कनीयस्तु विरेचनम्॥ १६॥
कल्कमोदकचूर्णानां कर्षं मध्याज्यलेहने।
कर्षद्वयं पलं वाऽपि वयोरोगाद्यपेक्षया॥ १७॥

मानम। तथा विंशतिभिर्वेगैर्मध्या, तथा दशभिर्वेगैर्हीना उक्तञ्च वाग्भटे—"जघन्यमध्यप्रवरे तु वेगाश्चत्वार इष्टा वमने षडष्टौ। दशैव ते द्विगुणा विरेके—" (वा० सू० १८ अ०) इति। तुल्यामानमप्युक्तं तेनैव—"प्रस्थतुल्या स्याद्विचतुर्गुणस्य"। "द्विवान् सविट्कानपनीय वेगान्मेध्ये विरेके वमने तु पीतम्" (वा० सू० १८ अ०) इति। केचिदुत्तमस्य वायो क्रूरकोष्ठस्य च उत्तमा मात्रा तीक्ष्णाऽभिमता, अत एव कफान्तगा एव मध्यमाऽपि, तथा मृदुकोष्ठस्य हीना इति व्याख्यानयन्ति॥ १५॥

इदानीं कषायगुटिकाचूर्णात्मकानां विरेचनद्रव्याणां परिमाणमाह, द्विपलमिति।—कषायाणामिति—कषायशब्देन स्वरसशृतशीतफाण्टानां चतुर्णां ग्रहणं, कल्कस्य पृथगुपादानात। द्विपलं श्रेष्ठमित्यनेन वातजनितकोष्ठस्येत्यर्थः विरेचनं श्रेष्ठमानं कषायाणामुत्तमा मात्रेत्यर्थः। पलं मध्यमं मध्यमा मात्रा, कफेन मध्यमं कोष्ठं कथितं। पित्तजनितमृदुकोष्ठस्य अर्द्धपलं कनीयं हीना मात्रेत्यर्थः। कल्कमोदकचूर्णानामिति।—कल्कादीनां कर्षं मध्याज्ययोगेन विरेचनम्, वा अथवा वयोरोगाद्यपेक्षया कर्षद्वयं पलं वा विरेचनम्। मधुघृतमानं विषमतया योज्यम्, उक्तञ्च—"भजतो विषमं तुल्यांशे मधुसर्पिषी" इति। आदिग्रहणात् कोष्ठादि ज्ञात्वा विरेचनं देयम्॥ १६।१७॥

संशोधनप्रकरणे स्वव्याख्यायां विशदीकृतवान्। तत्र विशदादिवेगे य उत्तमादिमात्रानिर्देशः सा वैगिकी शुद्धिं विशदादिवेगानर्थवत्त्वात्, "प्रस्थतुल्या द्विवचतुर्गुणस्य" इत्यनेन मलस्य द्विप्रस्थादिमानेन य हीनादिमात्रानिर्देशः सा मानेनिर्थवत्त्वात् मानिकी शुद्धिं, या तु पित्तान्त वमन कफान्त विरेचनमित्यनेनोक्ता सा वमनविरेचनयोर्दोषप्रहरणत्वेन निर्थवत्त्वात् आन्तिकी शुद्धिं, या पुनः हृत्कण्ठशिरसां शुद्धिं इत्यादिलिङ्गानिर्देशेन प्रदर्शिता, सा लिङ्गैर्निर्थवत्त्वात् लैङ्गिकी शुद्धिं, अत्र तु केवलं वैगिकी आन्तिकी च द्विविधा शुद्धिं प्रदर्शिता अत वैगिकान्तिकपरिमाणमाह इत्येव पाठो भवितुं युज्यते इति।

दोषभेदेन विरेचनद्रव्यनिर्देश।—

पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादिभि पिबेत्।
त्रिफलाक्वाथगोमूत्रै पिबेत् व्योष कफार्दितः॥ १८॥
त्रिवृत्सैन्धवशुण्ठीना चूर्णमस्रे पिबेन्नर।
वातार्दितो विरेकाय जाङ्गलाना रसैश्च वा॥ १९॥

एरण्डतैलप्रयोग।—

एरण्डतैलं त्रिफला-क्वाथेन द्विगुणेन च।
युक्त पौत पयोभिर्वा न चिरेण विरिच्यते॥ २०॥

अथ वातादीना क्रीडमावादिभेदेन कातपयप्रयोगान् दर्शयन्नाह पित्तोत्तरे इति।—पित्ते विरेचनस्य प्राधान्यख्यापनार्थं प्राक् पित्तोत्तरग्रहणम। पित्तोत्तरे कोष्ठे द्राक्षाक्वाथादिभि त्रिवृच्चूर्णं पिबेत। आदिग्रहणात् चीरेक्षुकाश्मर्य्यस्वादुस्कन्धवरा-रसादिभि। कफार्दित त्रिफलाक्वाथगोमूत्रै व्योष विकटुक त्रिवृच्चूर्णञ्च पिबेत, अथापि विरेकायेति सम्बन्ध। वातार्दित त्रुवतशुण्ठीसैन्धवाना चूर्णमस्रेमेन्द्रकाङ्गिक बीजपूररसादिभि अथवा जाङ्गलाना रसैर्हरिणैणतित्तिरलावादीना रसैर्मासरसै-र्विरेचन पिबेत। वाग्भटे तु—"अथ काले तु तच्चूर्णं (श्यामाशशूर्णं) किञ्चिन्नागर सैन्धवम्। वातानने पिबेदस्रे पित्ते माज्यसितासखु॥ चीरद्राक्षेक्षुकाश्मर्य स्वादुस्कन्ध वरारसै। कफान्ये पौलुरस-मूत्रमद्यास्लकाञ्जिकै॥ पञ्चकोलादिचूर्णैश्च युक्त्या युक्त कफापहै। त्रुवत्कल्कक्वाथेन साधित सर्पिषो हिम॥ मधुविज्ञातमयुक्तो लेहो वृद्ध्या विरेचनम्। अजगन्धा तुगाक्षीरी विदारी शर्करा त्रुवत॥ चूर्णित मधुसर्पिर्भ्या लाढ्वा साधु विरिच्यते। सन्निपातज्वरस्यश्च पिपासादाहपीडित॥ लिप्तेष्वन्तिन्नतया द्विधा क्लृप्तेक्षुगण्डिका। एकीकृत्य पचेत् स्निग्ध पुटपाकेन भक्षयेत्॥ मृद्वीकाभ्या समा नीली तैस्त्रुवत तैश्च शर्करा। चूर्णं फलरसक्षौद्र-सक्तुभिस्तर्पण पिबेत्। वातपित्तकफोत्लेषु रोगीष्वल्पानलेषु च। नरेषु सुकुमारेषु निरपाय विरेचनम॥" (वा० क० २ अ०) इति। चक्रदत्ते तु—क्लिन्ना द्विधेक्षु परिलिप्य कल्केभिरभिसंस्कृतै परिवेष्य रज्ज्वा। पक्वान्त सम्यक् पुटपाकयुक्त्या खादेत्त त पित्तगदी मुशीतम॥" (सु० सू० ४४ अ०) इति॥ १८।१९॥

अथ क्रूरकोष्ठादीनामपि तत्तत्त्वमेव विरेकार्थे प्रकारमाह, एरण्डतैलमिति।—अथ योगस्तिक्रोष्ठविषये योज्य। तत्र पयोभिर्वेति—वा-शब्दो विकल्पार्थे, तेन

वर्षासु विरेचनयोग ।—

त्रिवृता कौटजं बीजं पिप्पली विश्वभेषजम् ।
समृद्वीकारसक्षौद्रं वर्षाकाले विरेचनम् ॥ २१ ॥

शरदि विरेचनयोग ।—

त्रिवृद्दारुलभा मृस्ता शर्करोटीक्षचन्दनम् ।
द्राक्षाम्बुना सयष्ट्याह्वं : शीतलञ्च घनात्यये ॥ २२ ॥

शिशिरवसन्तयो विरेचनयोग ।—

पिप्पली नागरं सिन्धु श्यामा च त्रिवृता सह ।
लिहेत् क्षौद्रेण शिशिरे वसन्ते च विरेचनम् ॥ २३ ॥

ग्रीष्मे विरेचनयोग ।—

त्रिवृता शर्करा तुल्या ग्रीष्मकाले विरेचनम् ॥ २४ ॥

त्रिफलाक्काथदग्धाया मिलित्वैव तैल पेयमित्येके। व्यासेन वा पयसैव केवलेन त्रिगुणेनेत्यन्ये ॥ २० ॥

इदानी षडतुविरेकविषयत्वेन तद्योगानुरूपान योगानाह, त्रिवृतेति।—त्रिवृतादिभिर्वर्षाकाले प्रावृषि विरेचन, तत्र दोषसञ्चयात। त्रिवृत् श्यामा। कौटज बीजम् इन्द्रयव । पिप्पली मागधी। विश्वभेषज शुण्ठी। मृद्वीका द्राक्षा तस्या रस । क्षौद्र मधु इति। वर्षायग्रहणेन प्रावृट्ग्रहण, दोषोपचयप्रकोपनिमित्तात् ॥ २१ ॥

घनात्यये शरत्काले योगमाह त्रिवृद्दारुलभेत्यादि।—त्रिवृत श्यामा। दारुलभा अमृदान्ता, तस्या अलाभे यवासक । मृस्ता भद्रमुस्ता। शर्करा सितोपला। उशीर्य बालकम्। चन्दन श्वेतचन्दन, चूर्णयोगत्वात्। द्राक्षाम्बुना गोक्षनीक्काथेन रसेन वा। सयष्ट्याह्व यष्टीमधुसहितम्। शीतलं शीतगुण शीतस्पर्शञ्च तेन पित्तघ्नत्वमस्य योगस्य कथितम, अत एव शरत्काले योग्यताऽस्य योगस्य इति ॥ २२ ॥

शिशिरे वसन्ते च विरेचनमाह, पिप्पलीं नागरमिति।—पिप्पली कणा। नागर शुण्ठी। सिन्धु सैन्धवम्। श्यामा श्यामामूला त्रिवृत। त्रिवृत मालविकाख्या अरुणमूला च। उक्तञ्च—"विद्याद्विवृच्च तन्मूल श्यामं श्यामाकृति त्रिवृत" इति। शिशिरग्रहणेन हेमन्तस्यापि ग्रहणम्, वाग्भटे तु—"त्रिवृता चित्रक पाठामजाजीं सरल वचाम। स्वर्णक्षीरीञ्च हेमन्ते चूर्णमुष्णाम्बुना पिबेत ॥" (वा० क० २ अ०) इति ॥ २३ ॥

---

* "शीतलम्" इत्यत्र "सातलाम्" इति चरकवाग्भटयो. पाठ। सातला अर्कक्काया।

अभया-मोदक ।—

अभया मरिच शुण्ठी-विडङ्गामलकानि च ।
पिप्पली पिप्पलीमूल त्वक् पत्रं मुस्तमेव च ॥ २५ ॥
एतानि समभागानि दन्ती च त्रिगुणा भवेत् ।
त्रिवृद्दष्टगुणा ज्ञेया षड्गुणा चात्र शर्करा ॥ २६ ॥

शीते विरेचनमाह, त्रिवृतेति ।—तुल्या शर्करा शीतकाले शीताख्ये काले विरेचन देयम। अन्यत् सुगमम्। अत्र केचित् सर्वर्तुक योग पठन्ति। तदयथा—"त्रिवृता त्रुवृषा दन्ती सप्तला कटुरोहिणीम्। स्वर्णक्षीरीच सचूर्ण गोमूत्रे भावयेत्ताहम् ॥ एष सर्वर्तुको योग * स्त्रिधाना मलदोषहा ॥" अस्य श्लोकस्य दन्तीस्थाने वाराहटे वायन्ती पठिता, "त्रिवृत, वायन्ती, त्रुवृषा, सातला, कटुरोहिणी"। अन्यत समान ज्ञेयम्। अथ पाठो बहुपुस्तकेषु न दृश्यत, चेपकोऽयमिति मत्वास्माभिरपि न व्याख्यात ॥ २४ ॥

अथ सर्वकालीनशीतनार्थं अभयामोदकमाह, अभयेति।—एते अभया-मोदका सर्वर्तुषु प्रसिद्धा। क्वापि शीतविरेचनसङ्ग। त्वक् गुडत्वक्। दन्ती त्रिगुणा पृथक् भागापेक्षया। एव त्रिवृदपि चाष्टगुणा, शर्कराऽप्येव षड्गुणा। केचित् सकलद्रव्येभ्य षड्गुणत्वमष्टगुणत्व व्याख्यानयन्ति, तन्न तन्त्रान्तरसंवादात, उक्तञ्च—

अभया पिप्पलीमूल मरिच नागर तथा। त्वक् पत्र पिप्पली मुस्त विडङ्गा-मलकानि च ॥ कर्ष प्रत्यक्षमेषान्तु दन्त्या सर्वत्रय तथा। षट्कर्षास्तु सिता देया दिपल त्रिवृता भवेत् ॥ सर्व सचूर्णित कृत्वा मधुना मोदक तथा। खादेत प्रतिदिनञ्चैक शीतवारु पिबेज्जलम ॥ तावद्विरिच्यते जन्तुर्यावदुष्ण न सेवते। पाण्डुरोग विष कास कुष्ठापार्श्वरुज तथा ॥ पृष्ठार्त्ति सूत्रकृच्छ्रञ्च दर्नाम सभगन्दरम्। अश्मरीमेहकृष्ठञ्च दाहशोथोदराणि च ॥ यक्ष्माण चक्षुरोगञ्च क्रम वैद्येन जानता। योजितोऽय निहन्त्याशु अभयानाम मोदक ॥" इति। * दृढबलेन एला चाधिकाऽस्ति—"व्योषत्वक्पत्रमुस्तैला-विडङ्गामलकाभया। सम-भागा भिषक् दद्यात त्रिगुणञ्च सकुलकम् ॥ त्रिवृतोऽष्टगुण भाग शर्करायाश्च षड्-

---

* "दृढबलेन एला चाधिका अस्ति" इत्यत्र "दृढबलेन पिप्पलीमूलस्थाने एला पठिता" इत्येव पाठो भवितुमर्हति।

मधुना मोदकान् कृत्वा कर्षमात्रप्रमाणतः।
एकैक भक्षयेत् प्रात शीतच्चानु पिबेज्जलम् ॥ २७ ॥
तावद्विरिच्यते जन्तुर्यावदुष्णं न सेवते।
पानाहारविहारेषु भवेन्नियन्त्रण सदा ॥ २८ ॥
विषमज्वरमन्दाग्नि पाण्डुकासभगन्दरान्।
दुर्नामकुष्ठगुल्मार्शो गलगण्डभ्रमोदरान् ॥ २९ ॥
विदाहप्लीहमेहांश्च यक्ष्माण नयनामयान्।
वातरोगास्तथाऽऽध्मान मूत्रकृच्छ्राणि चाश्मरीम् ॥ ३० ॥
पृष्ठपार्श्वोरुजघन-जङ्घोदररुज जयेत्।
सततं शीलनादेषा पलितानि प्रणाशयेत् ॥
अभया-मोदका ह्येते रसायनवरा. स्मृताः ॥ ३१ ॥

विरेचकपानानन्तर कर्त्तव्यनिर्देश।—

पीत्वा विरेचनं शीत जलैः समिच्य चक्षुषी।
सुगन्धं किञ्चिदाघ्राय ताम्बूल शीलयेद्वरम् ॥ ३२ ॥
निवातस्थो न वेगाश्च धारयेन्न स्वपेत्तथा।
* शीताम्बु न स्पृशेत् क्वापि कोष्णनीरं पिबेन्मुहुः ॥ ३३ ॥

गुणम् ॥" (च० क० श्यामाविडत्०) इत्यादि। मधुनेति मोदक-करणोचितमानेन। शीतच्चानु पिबेज्जलमिति योगप्रभावोऽयम्। अन्यत्र शीताम्भसा स्तम्भ स्यात्। रसायनम् इति—रसादिकरणात् रसायन पुष्टिबलवर्णकृत्, अथवा रसायनाङ्गमिद विरेचन रसायनमिति प्राणदा मोदका ॥ २५—३१ ॥

विरेचन पीत्वा किं कुर्यात्तदाह, पीत्वेति।—शीतजलैरिति—विरेकौषध-क्लमनाशार्थं शीतलजलेन नेत्रसेचनम्। तथा सुगन्ध सुगन्धसुरभि उत्तमचन्दनादी-न्याघ्राय पश्चादुत्तम श्रेष्ठ ताम्बूल जीर्णताम्बूलीपत्रकृत शीलयेत्। निवातस्थ इति वेगप्रवृत्त्यर्थम्। वेगाश्च न धारयेत्, ऊर्ध्ववातादिरोगोत्पादकत्वात्। स्वापेन

गूढार्थदीपिकायां "शीताम्बुना" इति पाठ, तथा "क्वापि कदापि उष्णले शीताम्बुना स्पृशेत् न सर्वदा" इति व्याख्या च युक्ततया न प्रतिभाति।

सम्यक्वमनविरेचनयो लक्षणम्।—

बलासौषधपित्तानि वायुर्वान्ते यथा व्रजेत्।
रेकात्तथा मलं पित्तं भेषजञ्च कफो व्रजेत् ॥ २४ ॥

विरेचनायोगस्य लक्षणम्।—

दुर्विरिक्तस्य नाभेस्तु स्तब्धत्व कुक्षिशूलता।
पुरीषवातसङ्गश्च कण्डूमण्डलगौरवम् ॥
विदाहोऽरुचिराध्मान भ्रमस्कर्दिश्च जायते ॥ २५ ॥

विरेचनायोगस्य चिकित्सा।—

तं पुनः पाचनैः स्नेहैः पक्त्वा सस्नेह्य रेचयेत्।
तेनास्योपद्रवा यान्ति दोषाग्निर्लघुता भवेत् ॥ २६ ॥

विरेकौषधशक्तिहानि स्यात्। शीताम्बु इत्यादि—शीतोदक क्वापि पानादौ न सेवेत, रेकस्तब्धकत्वात्। अत एवाह—कोष्णनीर पिबेन्मुहुरिति—वार वार कोष्ण जल पेय रेकैककरणाच्चेत्यर्थ ॥ २२।२३ ॥

सम्यक् वान्तलक्षणेन सम्यक् विरेकलक्षणमाह, बलासौषधपित्तानीति।—यथा वमने प्रथम बलास कफ प्रवर्त्तते, पश्चात् वमनद्रव्य निर्गच्छेत्, तदन् पित्तानि, बहुवचनत्वेन हरितपीतानि कटतिक्तप्रायाणीति, तत्पश्चात् वायुरिति, 'तथा एवमपि विरेकात् प्रथम मल पुरीष तदन् पित्त तत्पश्चात् विरेचन द्रव्य, तदन् कफ प्रवर्त्तते इति, तेन 'कफान्तश्च विरेचनम्" इति वचनात्। एतेन सम्यक् वान्त सम्यक विरिक्तस्य कथित इत्यभिप्राय, अन्यथा दुर्वान्तो दुर्विरिक्त इति। दुर्वान्तलक्षणं वमनाध्यायेऽभिहित, दुर्विरिक्तलक्षणमचैवाग्रे वक्ष्यति ॥ २४ ॥

अथ दुर्विरिक्तलक्षणमाह, दुर्विरिक्तस्येति।—दुर्विरिक्तस्य न सम्यक् विरिक्तस्य नरस्य नाभे स्तब्धत्वादयो जायन्ते। नाभेरिति—नाभ्यपलक्षितस्य प्रदेशस्य पक्वाशयाख्यस्य स्तब्धत्व स्तब्धता। नाभेरिति षष्ठ्यन्त वदन्ति केचित्, तत्र नाभेरेव स्तब्धत्वम। तथा कुक्षिशूलता कुक्ष्यो शूलम। पुरीषवातसङ्गेति—मलवातयो सङ्गो रोध। तथा कण्डूमण्डलगौरवमिति—कण्डू शरीरे, मण्डलग्रन्थेनात्र वरटोदग्रसदृश, गौरव शरीरोदरयो। विदाहो पित्तवद्दाह। अरुचिररोचक। आध्मानमुदरापूर। भ्रमश्चक्राढढखेव वस्तुदर्शनम। कर्दि वान्तिरेति दुर्विरिक्तस्य लक्षणम् ॥ २५ ॥

अथास्य दुर्विरिक्तस्य पुनः चिकित्सामाह, तमिति।—त दुर्विरिक्तं पुरुष पाचनैः

विरेचनातियोगस्य लक्षणम्।—

विरेकस्यातियोगेन मूर्च्छा भ्रंशो गुदस्य च।
शूलं कफातियोगः स्यान्मांसधावनसन्निभम्॥
मेदोनिभं जलाभासं रक्तं वाऽपि विरिच्यते॥ ३७॥

विरेचनातियोगस्य चिकित्सा।—

तस्य शीताम्बुभिः सिक्ता शरीरं तण्डुलाम्बुभिः।
मधुमिश्रैस्तथा शीतैः कारयेद्वमनं मृदु॥ ३८॥
मद्दकारत्वचं कल्कं दध्ना सौवीरकेण वा।
पिष्ट्वा नाभिप्रलेपेन हन्त्यतीसारमुल्बणम्॥ ३९॥
अजाक्षीरं रसं वाऽपि वैष्किरं हारिणं तथा।
शालिभिः षष्टिकैः स्वल्पं मसूरैर्वाऽपि भोजयेत्॥

पाचनौषधैः पक्वा अर्थादाम दोषञ्च क्लेदं रूक्षत्वं रेचयेत्। तेनेति—तेन पाचनक्लेदनेनास्य दुर्विरिक्तस्योपद्रवा यान्ति नश्यन्तीत्यर्थः, ततः दोषाग्निर्भवेत्, लघुता च शरीरस्य भवति॥ ३६॥

इदानीं विरेकातियोगस्य लक्षणमाह, विरेकस्येति।—विरेकस्यातियोगेन मूर्च्छादयो भवन्ति। गुदस्य भ्रंश इति—गुदस्य बहिर्निर्गमनं, तच्चातिसम्यग्वहणात् भवति, उक्तञ्च—"प्रवाहणातिसाराभ्यां निर्गच्छति गुदं बहिः" (सु० नि० १३ अ०) इति। शूलं नानाप्रकारकमत्र ज्ञेयं, तेन परिकर्त्तिकाऽप्यत्र भवति। कफातियोगे स्यात् कफस्य अतिसरणं भवति। तथा मांसधावनसन्निभादिकं विरिच्यते मांसधावनसन्निभं मांसधावनोदकतुल्यं मेदोनिभं मेदसदृशं, जलाभासमिति—जलसदृशं स्वच्छमित्यर्थः, रक्तं वाऽपि विरिच्यते इति—रक्तमेव वा विरिच्यते। अन्ये मांसधावनादीनि चास्य विशेषणानि मन्यन्ते निष्पुरीषत्वात्। इति विरेकातियोगलक्षणम्॥ ३७॥

अथ विरेकातियोगचिकित्सामाह, तस्येति।—तस्य वमनं मृदु कारयेत्—तस्य विरेकार्दितस्य वमनं मृदु कारयेत्, किं कृत्वा? शीताम्बुभिः शीतजलैः शरीरं सिक्ता सिञ्चयित्वा। तण्डुलाम्बुभिरिति—तण्डुलधावनोदकैः, मधुमिश्रैरिति—तण्डुलधावनैर्मधुमिश्रैरित्यर्थः। शीतैरिति—शीतवीर्यद्रव्यैः। लेपमाह, मद्दकारत्वचमित्यादि।—मद्दकारः, अस्य तस्य त्वचं कल्कं दध्ना सौवीरकेण काञ्जिकभेदेन वा पेषयित्वा नाभिप्रलेपेन उल्बणमतीसारं हन्यात्। भोजनमाह, अजाक्षीरमित्यादि।

शीतैः सङ्ग्राहिभिर्द्रव्यैः कुर्यात् सङ्ग्रहणं भिषक् ॥ ४० ॥

सम्यक् विरिक्तस्य लक्षणं तत्र कर्त्तव्यञ्च।—

लाघवे मनसस्तुष्टावनुलोमं गतेऽनिले।
सुविरिक्तं नरं ज्ञात्वा पाचनं पाययेन्निशि ॥ ४१ ॥

विरेचनस्य गुणा।—

इन्द्रियाणां बले बुद्धेः प्रसादे वह्निदीपनम्।
धातुस्थैर्य्यं वयःस्थैर्य्यं भवेद्रेचनसेवनात् ॥ ४२ ॥

—क्षीरादिकं रक्तशालिभिः षष्टिकैर्वा सह भोजयेत्। क्षीरस्य केवलस्यापि पानमाङ्गारके सङ्ग्राहकत्वात्। रसं मांसरसं वेष्किर द्वारिण वा, विष्किरा लावतित्तिरादय। शालिभिरिति—रक्तशाल्यादिभिः। षष्टिकैरिति प्रसिद्धैः। स्वल्पनित्यनेन मृष्टतण्डुलभवं शाकुनमपि देयं, मयूरैरपि स्वल्पं भोजनं देयं, स्वल्पस्नेहभयात्। अथवा शीतैः शीतवीर्य्यैर्द्रव्यैः सङ्ग्रहणं कुर्य्यात् इति ॥ ३८—४० ॥

सम्यक् विरिक्तस्य पाचनादिप्रकारमाह, लाघवे इति।—लाघवे शरीरस्येति। मनसस्तुष्टाविति—चित्तसन्तोषे। अनिले वायौ अनुलोमम् अधोभागं गते सति एतल्लक्षणेन सुविरिक्तं नरं जानीयात्, एवं ज्ञात्वा तस्यापि पाचनं निशि दद्यात्। पाचनस्यौषधत्वात् वोदश्च (१), तच्च मुद्गयूषादिकमित्येके, यदुक्तं—"विरेचनानां सर्वेषां दध्यन्नं स्नेहने हितम्। आमाल्ये च प्रदातव्यमन्यथा मृद्गयूषकम्॥" इति। केचित्तु पाचनं पाययेन्निशीति पदं विना पठन्ति, ननु सम्यक् विरिक्तस्यायमेव क्रमः यथा "प्रातिश्च विट्पित्तकफानिलानां सम्यक् विरिक्तस्य भवेत् क्रमेण" इति। न चैवं कफान्तपदव्याघातः। तेन पाचनपाटः केषाञ्चन्मनोहरः (१) यतो वायुर्हि निशि कफे कृते आमाशये शून्यतया केवलं सरतीति। यद्वा आचार्य्येण पदपूरणार्थं लिखितः (१), नैनास्यान्योऽभिप्रायः। पाचनं रात्रावेवेत्यर्थः ॥ ४१ ॥

विरेचनस्य फलमाह, इन्द्रियाणामिति।—इन्द्रियाणां चक्षुरादीनां बले स्वस्वविषयग्राहकताशक्त्यतिशयः। बुद्धेः प्रसादे प्रसन्नता। वह्नेः कोष्ठाग्नेः दीपनं भवति। धातूनां रसादीनां स्थैर्य्यं नाशस्य गुरुत्वात्, तेनैव हेतुना वयसः स्थैर्य्यं करोति, उक्तञ्च वाग्भटे—"बुद्धेः प्रसादे बलमिन्द्रियाणां धातुस्थिरत्वं ज्वलनस्य दीप्तिम्। चिराच्च पाकं वयसः करोति सुशोधनं सम्यगुपासमानम्॥" (वा० सू० १८ अ०) इति ॥ ४२ ॥

विरिक्तस्य अपथ्यम्।—

प्रवातसेवा शीताम्बु स्नेहाभ्यङ्गमजीर्णताम्।
व्यायामं मैथुनञ्चैव न सेवेत विरेचितः॥ ४३॥

विरिक्तस्य पथ्यम्।—

शालिषष्टिकमुद्गाद्यैर्यवागूं भोजयेत् कृताम्।
जङ्गालविष्किराणां वा रसैः शाल्योदनं हितम्॥ ४४॥

सम्यक् विरेचनाभावे कर्तव्यनिर्देशः।—

(विरेकाद्यौषधे पीते सम्यक् यो न विरिच्यते।
पिबेदुष्णाम्बुना तत्र सैन्धवं दोषशान्तये॥)

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायाम्
उत्तरखण्डे विरेचनविधिनाम चतुर्थोऽध्यायः॥ ४॥

कृतविरेचनस्य प्रवातादीन् निषेधयति, प्रवातेति।—विरेचितं कृतविरेचनं प्रवातसेवादीन् न सेवेत, प्रकृष्टवातसेवनं तस्य च दोषकरत्वात्। शीताम्बुसेवनं स्रोतोरोधादिकारणात्। स्नेहाभ्यङ्गस्याग्निमान्द्यकरत्वात्, उक्तञ्च—"बल्योऽभ्यङ्गः कफयुक्त-कृतस्नुड्भाजीर्णिभिः" (वा० सू० २ अ०) इति। चकारात् क्षण (?) जागरणं वेगानाञ्च रोधनं क्रोधशोकहिमातपातिभाष्याध्यासनसंस्थितिनीचासनोपधानाङ्घ्रिप्रादीनि॥ ४३॥

अथ विरिक्तस्य पेयादि पथ्यार्थं द्रव्याण्याह, शालीति।—यवागूशब्दः पेयादिलक्षणार्थः, तेन शाल्यादिभिः कृता पेयादयो ज्ञेयाः, सा यवागूः नानाविधा पूर्वं व्याख्याता। तथा जङ्गालविष्किराणां रसैः शाल्योदनं हितम्, उक्तञ्च—"क्रमेणान्नानि भुञ्जानो भजेत प्रकृतिभोजनम्" (वा० सू० १८ अ०) इति। संशोधने पेयादिक्रम एव हितः, उक्तञ्च वाग्भटे—"संशोधनास्रविस्राव-स्नेहयोजनलङ्घने। यात्यग्निर्मन्दतां तस्मात् क्रमं पेयादिमाचरेत्॥" (वा० सू० १८ अ०) स च यथा—"पेया विलेपीमकृतं कृतञ्च यूषं रसं चौभयं तथैकम्। क्रमेण सेवेत नरोऽन्नकालान् प्रधानमध्यावरशुद्धिशुद्धः॥" (वा० सू० १८ अ०) इति। तत्र जङ्गालाः हरिणेभादयः, विष्किराः लावतित्तिरादयः। प्रधानशुद्धया यत्र पुरुषः त्रीन् अन्नकालान् पेयादीन् सेवेत, मध्यशुद्धया शुद्धः द्वौ द्वौ अन्नकालौ, अवरशुद्धया शुद्धः एकैकमन्नकालं पेयादिकं सेवेत इति॥ ४४॥

इति श्रीबालव्याख्यया प्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधर-
दीपिकायामुत्तरखण्डे विरेचनविधिर्नाम चतुर्थोऽध्यायः॥ ४॥

पञ्चमोऽध्यायः ।

अथ वस्तिविधिः । (क)—

वस्तेर्द्वैविध्य निरुक्तिञ्च ।—

वस्तिर्द्विधाऽनुवास्याख्यो निरूहश्च ततः परम् ।
वस्तिभिर्दीयते यस्मात्तस्माद्वस्तिरिति स्मृतः ॥ १ ॥

द्विविधवस्तेर्लक्षणम् ।—

यः स्नेहैर्दीयते स स्यादनुवासननामकः ।
कषाय-क्षीर-तैलैर्यो निरूह्यः स निगद्यते ॥ २ ॥

द्विविधवस्ते क्रमविधि ।—

तत्रानुवासनाख्यो हि वस्तिर्यः सोऽत्र कथ्यते ।
पूर्वमेव ततो वस्तिर्निरूहाख्यो भविष्यति ॥
निरूहादुत्तरश्चैव वस्तिः स्यादुत्तराभिधः ॥ ३ ॥

(क) अथ वस्तिविधि व्याख्यातु प्रतिजानीते । तत्राद्य सम्बन्ध,—"पञ्चकर्म वमनं, रेक, निरूहोऽन्वास नावनम्" इति । वमनविरेकयोरुक्तत्वात् पारिशेष्यात् वस्तिविधिमाह,—अथेति ।

वस्तिरिति ।—वस्तिर्द्विधा द्विप्रकार, एकोऽनुवासनाख्य, द्वितीयो निरूहसज्ञ । वस्तिनिरुक्तिमाह—यस्मात वस्तिभिश्चर्मपुटकैर्दीयते तस्मात वस्ति ॥ १ ॥

अथानुवासननिरूहयो लक्षणमाह, य इति ।—स्नेहै पक्वस्नेहै य दीयते सोऽनुवासनाख्य । य कषायादिभि स निरूहो निगद्यते, निरूह वस्तेर्भेद एवाख्यापनार्थ, क्षीरकषायादिभिरेवाय दीयते ॥ २ ॥

अथानुवासनादीनामनुक्रमविधानमाह, तत्रेति ।—तत्र तेषु वस्तिषु मध्ये य, अनुवासननामा वस्ति स पूर्वमेवाध्याये कथ्यते इति सम्बन्ध । तत इति—अनुवासनानन्तर निरूहाख्य वस्तिर्भविष्यति कथयिष्यते इत्यभिप्राय । निरूहादुत्तर निरूहवस्तेरनन्तरम् उत्तराभिध उत्तरनामा वस्ति कथयिष्यते इति सम्बन्ध, तेन त्रय एवाध्याया पृथक् ज्ञातव्या । यद्वा—पूर्वमेवानुवासनवस्ति कार्य्य, तत्पश्चान्निरूहवस्ति कार्य्य, तदनु उत्तरवस्तिरिति । इति क्रमविधयानुक्रम (१), तथा हि—"दत्त्वा स्निग्धतनु ज्ञात्वा तत, पश्चान्निरूहयेत्" (१) (सु० चि० ३७ अ०) इत्यादिवचनात् ॥ ३ ॥

अनुवासनस्य भेद भेदस्य तस्य मात्रा च।—

अनुवासनभेदश्च मात्रावस्तिरुदीरितः।
पलद्वयं तस्य मात्रा तस्मादर्द्धोऽपि वा भवेत् ॥ ४ ॥

अनुवासनार्हा।—

अनुवास्यस्तु रूक्ष स्यात्तीक्ष्णाग्निः केवलानिली ॥ ५ ॥

अथवा कथनक्रमेणैव वस्तिरनुवासनभेद एव इत्यत आह, अनुवासनेति।—मात्राकृतभेदत्वान्मात्रावस्ति। तस्य मात्रामाह, पलद्वयमिति।—तस्येति—मात्रावस्तेः पलद्वय द्विपलप्रमाणम्। तस्मादिति—द्विपलादर्द्धं पलप्रमाणमात्रा भवेत। एतेनायमर्थः सम्पन्न, यस्योत्तमा षट्पलादिमात्रा अर्हति तस्य द्विपल प्रथम, तत पलार्द्धेन वृद्धि, एव नवभिर्दिनै षट्पली मात्रा पूर्णा भवति। तथा यस्य त्रिपली मात्रा अर्हति तस्य पल प्रथम देय, ततश्च कर्षेण वृद्धि, एव नवभिर्दिनै त्रिपली मात्रा भवति। एव कनीयसी मात्राऽपि ज्ञेया, साऽपि वा-ग्रहणाद्वोह्या। ता मात्रा अग्रे प्रकटयिष्यति ग्रन्थकृत् ॥ ४ ॥

अथानुवासनयोग्यमाह, अनुवास्य इति।—रूक्ष पुरुषोऽनुवास्य अनुवासनयोग्य इत्यर्थ। तीक्ष्णाग्निरिति—भस्मकाख्यवह्नियुत। केवलानिलीति—ननु "वस्तिर्वाते च पित्ते च कफे रक्ते च शस्यते। सर्वेषु सन्निपाते च वस्तिरेव हित सदा ॥" (सु० चि० ३५ अ०) इत्यादिवचनात् कथ केवलानिली अनुवास्य इति? उच्यते औनपि दोषान् पक्वाशयगतान् वस्तिर्जयति। * आमाशयगतवस्ति पच्यमाना सयोग त पित्तविरेक इति परम सत्पूर्वपक्षसिद्धान्त' (?)। अन्यत्रापुक्त—"पित्त वा कफपित्त वा पित्ताशयगत हरेत्। सस्न वीन् मलान् वस्तिर्जयेत् पक्वाशयस्थितान् ॥" (च० चि० ज्वर०) इति। एव रक्तमपि दुष्ट रक्तप्रसादनद्रव्यैर्दत्तवस्ति प्रसादयति। खलते तु केवलानिलीत्यस्य समाधानमेतत, तत् यथा—आस्थापनानुवासन खलु सर्वोपक्रमेभ्यो वाते प्रधानतमम, रोगविशेषविषये वीक्ष्यमित्यदोष। अन्यदपि समाधान सविस्तर तदत्र विस्तरभयान्न लिखितम् ॥ ५ ॥

---

* आमाशयगतवस्तिरित्यादि टीकाकारोक्तिर्दुर्बोधा। शिवदासेन चक्रोक्तानुवासनाधिकारस्य व्याख्याया—"यद्यपि सुश्रुते वस्तिर्वाते च पित्ते च कफे रक्ते च शस्यते" इत्यनेन पित्तकफरक्तानामपि वस्तिविषयत्वमुक्त, तथापि 'वस्तिर्वातहराणाम्' इति वचनात् प्राधान्येन वायोरेव वस्तिविषयत्व पित्तकफयोस्तु वातस्थानगतयोस्तथा

अनुवासनानर्हा।—

नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलस्तथोदरी।
* नाख्याप्या नानुवास्या स्युरजीर्णोन्मादहृट्ग्रुताः॥
शोकमूर्च्छारुचिभय-श्वासकासक्षयातुराः॥ ६॥

यथानुवासने ये त्याज्यास्तानाह, नेति।—कुष्ठी तथा प्रमेही स्थूलो मेदस्वी तथा उदरी च एतेऽनुवास्या न भवन्तीत्यर्थः। तु पुनरिति ग्रहणात् एते तु आस्थापनीया इत्यभिप्राय, यदुक्तमन्यत्रापि—"उदरी च प्रमेही च कुष्ठी स्थूलश्च मानवः। † अवश्य स्थापनीयास्ते नानुवास्या कथञ्चन॥" (सु० चि० ३५ अ०)

स्वस्थानस्थितयोर्वातानुबन्धयोर्वा वस्तिविषयता, यदाह चरकः,—"पित्तं वा कफपित्तं वा पित्ताशयगतं हरेत्। स्रंसनं त्रीन् मलान् वस्तिः पक्वाशयगतान् जयेत्॥" इति। तथा "एकोऽपक्वस्थनिलं स्वस्थानात् पित्तं द्वितीयस्तु कफं तृतीयः"। रक्तमपि दुष्टं रक्तप्रसादनद्रव्यैर्दत्तवस्तिः प्रसादयति दोषहरणेनानुलोमयति" इति। वृद्धभट्टेनापि अत्र सविस्तरं लिखितं, तथा हि—"केवलानिलजीति केवलानिलजौ चानुवास्यौ इति विरुद्धमिवाभाति तन्नात्तरसवादात्, उक्तञ्च वाग्भटे—'वातोल्बणेषु दोषेषु वाते वा वस्तिरिष्यते' इति। सुश्रुतेऽपि—'वस्तिर्वाते च पित्ते च कफे रक्ते च शस्यते। स्रंसने सन्निपाते च वस्तिरेव सदा हितः॥' इति। अत्रोच्यते—वस्तिर्हि पक्वाशयगतं कफपित्तवातं निर्हरति, उक्तञ्च चरके—'पित्तं वा कफपित्तं वा पित्ताशयगतं हरेत्। स्रंसनं त्रीन् मलान् वस्तिः पक्वाशयगतं हरेत्॥' इति। सस्मादौ च वातादिक एव वस्तिः। अनेनैवाभिसन्धिना प्राह वाग्भटः,—'वातोल्बणेषु' इति। रक्तप्रसादनद्रव्येण दत्तो वस्तिः रक्तं प्रसादयति तत्स्थानगतञ्च पक्वाशयस्य विशुद्धतो वा तत्स्थानत्वाच्च केवलानिलजीत्युक्तम्। उक्तञ्च—'पक्वाशयकटिसक्थ्यष्ठीवाक्षिस्पर्शनेन्द्रियम्। स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः॥' इति। अत एवोक्तं—'शरीरजानां दोषाणां क्रमेण परमौषधम्। वस्तिर्विरेको वमनं तथा तैलं घृतं मधु॥' इति। अथवा वातरोगविषय ज्ञातव्यम्। उक्तञ्च—'दारुणाश्चानिलाभयाः' इति सर्वमवदातम्"।

* "अनाख्याप्या नानुवास्या, स्युरजीर्णोन्मादहृड्दिताः" इत्यपपाठः, छन्दोभङ्गदोषदुष्टत्वात्।

† सुश्रुते "अवश्य स्थापनीयाश्च" इति पाठः, तत्रायमर्थः, उदरीप्रभृतयः, तथा अवश्यमास्थापनीयाः, ये ते कथञ्चन अनुवास्या न इति सुधीभिर्विवेच्यम्।

वलिनेत्रप्रस्तुतविधि ।—

नेत्रं कार्यं सुवर्णादि धातुभिर्वृत्तवेणुभिः।
नलैर्दन्तैर्विषाणाग्रैर्मणिभिर्वा विधीयते ॥ ७ ॥
एकवर्षात्तु षड्वर्षं यावन्मानं षडङ्गुलम।
ततो द्वादशकं यावन्मानं स्याच्च दशाङ्गुलम् ॥ ८ ॥
ततः परं द्वादशभिरङ्गुलैर्नेत्रदीर्घता।

इति। अथ ये तूभयकर्मरहितास्तानाह अजीर्णेति।—अनिर्वाह्यत्वाद्व्याप्तशरीरा (?)। "नाशाप्या नानुबाध्यास्तेऽजीर्णान्माद्दृढदर्दिता" इति वा पाठ। अत्र अजीर्णार्दित इत्यत्र, अजीर्णमवाप विदग्ध वा, न तु विष्टब्धाजीर्णं तत्र तु विहितमेवेत्येके। शेष सुगमम् ॥ ६ ॥

नेत्रमित्यादि।—नेत्र यत्र वलिगतस्नेहक्षयादिद्रव्यनेहत्वान्नेत्रमिति सज्ञा। किमर्थं वलिविधानार्थं वलिदाह्यार्थं, तत्र सुवर्णादिधातुभिर्विधीयते क्रियते। आदियहणात रौप्यताम्रवपुलोहादीना ग्रहणम्। तथा वेणुदारुभिर्वेणुग्रहणम्। नलैर्नलिकादिभि तृणविशेषजातै। दन्तैर्हस्तिदन्तै। विषाणाग्रैरिति—शृङ्गाग्रै, उपरितनसूक्ष्मभागै। मणिभिर्मरकतपद्मरागवैदूर्यादिभि, एतेन शुद्धपाषाणैरपि विधीयते इति सम्प्रदाय। उक्तञ्च हृदबले—"सुवर्णरूप्यवपुस्ताम्रीतिकास्थिशस्त्रदारुनवेणदन्तै। नलैर्विषाणैर्मणिभिश्च तैस्ते कार्याणि नेत्राणि विकर्णिकानि॥ षड्द्वादशाष्टाङ्गलसम्मितानि षड्विंशतिद्वादशवर्षजानाम। स्थूलैकर्कन्धुसतीनवाष्टिच्छिद्राणि वस्त्रा पिहितानि चापि॥ यथावयोऽङ्गष्ठकनिष्ठिकाभ्या मूलायथो' स्थ परिणाहवन्ति। वृत्तानि गोपुच्छसमाकृतीनि श्लक्ष्णानि च स्थूर्णटिकामुखानि॥ स्यात् कर्णिकैकाग्रचतुर्थभागे मूलान्विते वलिनिबन्धने डे। जरद्धवी माहिषहारिणी वा स्याच्छौकरी वलिरजस्य वाऽपि॥" (च० सि० वस्तिसूची०) इति। अथ नेत्रपरिमाणमाह, एकवर्षादिति।—एकवर्षात प्रथमवर्षात षड्वर्षं यावत नेत्रस्य षडङ्गुल मानम, एतत परिमाणमायामेन कथित, षड्वर्षादूर्ध्वं द्वादशवर्षाणि यावत् नेत्रायामपरिमाण दशाङ्गुलम्। एके—"मानं स्यादष्टसम्मितम्" इति पठन्ति व्याख्यानयन्ति च। तत परमिति द्वादशवर्षादारभ्य यावद्विंशतिवर्षाणि तावद्द्वादशाङ्गुल नेत्रायामम, अत परं नेत्रायामता नास्तीत्युक्तत्वात्। वाग्भटे तु—"ऊनेऽब्दे पञ्च पूर्णेऽस्मिन्ना सप्तस्थोऽङ्गुलानि षट्। सप्तमे सप्त तान्यष्टौ द्वादश षोडशे नव॥ द्वादशैव

सुद्गच्छिद्र कलायाभं छिद्र कोलास्थिसन्निभम् ॥ ९ ॥
यथासङ्ख्य भवेन्नेत्रं श्लक्ष्णं गोपुच्छसन्निभम्।
आतुराङ्गुष्ठमानेन मूले स्थूलं विधीयते ॥ १० ॥
कनिष्ठिकापरीणाहमग्रे च गुटिकामुखम्।
तन्मूले कर्णिके द्वे च * कार्य्ये भागाच्चतुर्थकात् ॥ ११ ॥
योजयेत्तत्र वस्तिञ्च बन्धहृद्यविधानतः।
मृगाजशूकरगवां महिषस्यापि वा भवेत् ॥ १२ ॥
मूत्रकोषस्य वस्तिस्तु तदलाभे च चर्मज।
कषायरक्तः सुमृदुर्वस्तिः स्निग्धो दृढो हितः ॥ १३ ॥

पर विशाखोक्त्य वर्षान्तरेषु च। वयोवयशरीराणि प्रमाणमभिवर्द्धयेत ॥" (वा० सू० १९ अ०) इति। अथ नेत्रायरन्ध्रपरिमाणमाह, मुद्गेत्यादि।—षडङ्गुलनेत्रस्य मुद्गप्रमाणम्, आकारेण वर्त्तुलत्वात तच्च † स्निग्धम, एव माषादिरपि स्निग्धमेव, उक्तञ्च वाग्भटे—"मुद्ग माष कलायञ्च स्निग्ध कर्कन्धुक क्रमात" (वा० सू० १९ अ०) इति। कलायोऽत्र वर्त्तुलकलाय सतीनसज्ञ। यथासङ्ख्यमिति—क्रमेण इत्यर्थ। तच्च नेत्र श्लक्ष्ण कोमलम। गोपुच्छसन्निभ मिति आकारेण। आतुराङ्गुष्ठमानेन मूले स्थूल, मूलस्य चर्मबन्धनमुखम (?)। अग्रे च नेत्राग्रे कनिष्ठिकापरिणाहता ज्ञेया। अग्रे इति गुदासन्निहितमुखे (?)। गुटिकामुखमिति—तदग्रमुखे च गुटिका काय्या वर्त्तुला इत्यर्थ। तन्मूले इति—नेत्रस्य मूले वर्मलग्नमुखे (?) द्वे कर्णिके काय्ये, कर्णिका मेखलाशब्दवाच्या योगीश्वर्मपुटकाग्र सलग्नते, अत एवाह—"योजयेत्तत्र वस्तिञ्च बन्धहृद्यविधानत" इति—हृद्या बन्धनाम्ना नेत्रे वस्ति बद्ध्वा गुदादौ योजयेत प्रवेशयेदित्यर्थ। भागा

---

* "कार्य्ये भागाच्चतुर्थकात" इत्यत्र "एका चाग्रे चतुर्थकात" इति पाठो युक्त चरकादौ तादृशपाठदर्शनात तथा च—"स्यात् कर्णिकैकाग्रचतुर्थभागे" (च० सि० बस्तिसूत्री०) इति।

† मुद्गादीना स्निग्धता चक्रपाणिदासाक्षणदत्तादिभि कैरपि न व्याख्याता। केवल मक्षणदत्तेन एवमुक्त यथा—"तत्र वार्षिकस्य मुद्गवाहि यावत षड्वर्षे, सप्तवर्षस्य माषवाहि यावत् एकादशीवर्ष, द्वादशवर्षस्य कलायवाहि, षोडशवर्षस्य स्निग्धकलाय वाहि, एकविंशतिवर्षस्य कर्कन्धुवाहीति क्रमात वय प्रमाणम् "(वा० सू० १९ अ०) इति।

व्रणे वस्तिनेत्रप्रस्तुतविधि ।—

व्रणवस्तेस्तु नेत्रं स्याच्छ्लक्ष्णमष्टाङ्गुलोन्मितम्।
सुच्छिद्रं गृध्रपक्ष-नलिकापरिणाहि च ॥ १४ ॥

वस्तिप्रयोगस्य गुणा ।—

शरीरोपचयं वर्णं बलमारोग्यमायुषः।
कुरुते परिवृद्धिञ्च वस्तिः सम्यगुपासितः ॥ १५ ॥

चतुर्थकादिग्रहादि—एतेन उत्तरमुखे चतुर्थभागपर्य्यन्तम् एका कर्णिका कार्या इति वैद्यसम्प्रदाय, ततस्ता मध्यादौत्कृत्य गुदमध्ये प्रवेशयेदित्यर्थः। उक्तञ्च चक्रदत्ते—"स्यात् कर्णिकैकाग्रचतुर्थभागे मूलाश्रिते वस्तिनिबन्धने हे" (च० सि० वस्तिसूत्रो०) इत्यादि ॥ ७—१३ ॥

वस्तिनेत्रकरणद्रव्यप्रमाणान् व्रणवस्तिमाह, व्रणवस्तेरिति।—तु पुनः व्रणवस्तेः व्रणो नाडीव्रणः तन्निमित्तं यन्नेत्रं यन्त्रं शुद्धं कोमलं तथाऽष्टाङ्गुलोन्मितं परिमाणं कार्य्यम्, एतच्च पूर्वोक्तवस्तिद्रव्यस्य। सुच्छिद्रं नलिकायाश्च सच्छिद्रं बहीरन्ध्रं कार्य्यम्, तथा गृध्रपक्षनलिकापरिणाहि, तेन नलिकापरिणाहमानमुक्तम् ॥ १४ ॥

वस्तिसेवागुणानाह, शरीरमिति।—सम्यक्तया यथोक्ततया उपासितः सेवितो वस्तिः शरीरोपचयादीन् कुरुते, उक्तञ्च—"वस्तिर्हि श्रेष्ठोपचितो सुखायुर्बलाग्निमेधा-स्वरवर्णकृच्च। सवार्थकारी भिषजङ्गयुक्तो नित्यश्च सर्वगदापहश्च॥" (च० सि० कल्पना०) इति। सुश्रुतेऽपि—"वीर्य्येण वस्तिरादत्ते दोषानापादमस्तकात। * पक्वाशयस्थ स्वस्थोऽर्कवायो यद्वन्महीतलात॥" (सु० चि० ३५ अ०) इति। विधिक्रमस्तु तन्त्रान्तरेऽप्युक्त, यथा—"दत्तस्तु प्रथमो वस्ति स्नेहयेत वस्तिवङ्गणौ। सम्यक् दग्धौ द्वितीयस्तु + कोष्ठस्थमनिलं जयेत॥ बलवर्णौ च जनयेत् तृतीयस्तु प्रयोजितः। रसं चतुर्थ रक्तन्तु पञ्चम स्नेहयत्तथा॥ षष्ठस्तु स्नेहयन्मांसं मेदं सप्तम एव च। अष्टमो नवमस्थाश्च मज्जानञ्च यथाक्रमम्॥ एव शुक्रगतान् दोषान् द्विगुण साधु साधयत॥ (सु० चि० ३७ अ०) इति ॥ १५ ॥

---

* मुद्रितसुश्रुतसंहितासु "पक्वाशयस्थोऽम्बरगो भूमेरर्कौ रसानिव" इति पाठो दृश्यते।

† मुद्रितसुश्रुतसंहितासु "कोष्ठस्थम्" इत्यत्र "मूर्द्धस्थम्" इति पाठः। डल्हनेनापि अयमेव पाठः स्वीकृतः।

ऋतुभेदे स्नेहवस्तिप्रयोगस्य काल ।—

दिवा शीते वसन्ते च स्नेहवस्ति प्रदीयते ।
ग्रीष्मवर्षाशरत्काले रात्रौ स्यादनुवासनम् ॥ १६ ॥

स्नेहवास्तिप्रयोगे भोजनविधि ।—

न चातिस्निग्धमश्नन भोजयित्वाऽनुवासयेत् ।
मदं मूर्च्छां च जनयेद्विधा स्नेह प्रयोजितः ॥
रूक्ष भुक्तवता ह्यन्न बल वर्णं च हापयेत् ॥ १७ ॥

अयोगातियोगयुक्तबस्ते निष्फलता ।—

हीनमात्रावुभौ बस्तौ नातिकार्य्येकरौ स्मृतौ ।
अतिमात्रौ तथाऽऽनाह-क्लमातीसारकारकौ ॥ १८ ॥

उत्तमादिभेदेन बस्तेर्मात्रा ।—

उत्तमस्य पलैः षड्भिर्मध्यमस्य पलैस्त्रिभिः ।
पलैकार्द्धेन हीनस्य युक्ता मात्राऽनुवासने ॥ १९ ॥

अथ बस्ते कालनियमनमाह, दिवेति ।—शीत हेमन्तशिशिराख्ये वसन्ते च स्नेह बस्तिर्दिवा दिवसे प्रदीयते, न तु रात्रौ अतिशीतादितत्वात, यदुक्तम्—"उष्णाभिभूतेषु वदन्ति शीतान् शीताभिभूतेषु तथा सुखोष्णान् । तत्प्रत्यनीकौषधसम्प्रयुक्तान् सर्वत्र बस्तीन् प्रविभज्य युञ्जात ॥" (च० सि० कल्पना०) इति । रात्रौ स्यादनुवासनमिति कालस्य समये ? ग्रीष्मवर्षाशरत्काले इति ॥ १६ ॥

नेति ।—अनुवासना निरूहाङ्गत्वेन यथा च विरेचन नौचितं सञ्चितञ्च मल, तस्य च तत्कालापगमार्थं चार बैतरण वा बस्ति दत्त्वा अनुवासन देय, विशुद्धस्य स्नेहवस्त्युपदशात्, तदुक्त—"स्नेहवस्तिर्विशेषेण नाविशुद्धस्य देहिन" (सु० चि० ३७ अ०) इति । क्षुताहारायानुवासन देयमित्यनेकेऽतिस्निग्धभोजनेऽनुवासनं निषिद्धम, तदाह—"द्विधा स्नेह प्रयोजित" इति सुगम ॥ १७ ॥

अथ बस्तेर्हीनातिमात्रयोर्निषेधमाह, हीनेति ।—उभौ बस्तीति—अनुवासननिरूहाख्यौ, आस्थापनानुवासनावित्येके ॥ १८ ॥

अथ च मात्राविधानमाह, उत्तमस्येति ।—उत्तमस्य बलानलादिभिरुत्तमस्य पुरुषस्य, एव मध्यमहीनयोर्बोद्धव्यम् । अस्याधमाधममाह—अक्लीबस्य षट्पला

अनुवासने प्रक्षेप्यद्रव्यस्य उत्तमादिभेदेन मात्रा ।—

शताह्वासैन्धवाभ्याञ्च देयं स्नेहे च चूर्णकम् ।
तन्मात्रात्तममध्यान्ता षट्चतुर्द्वयमाषके ॥ २० ॥

अनुवासनप्रयोगविधि ।—

विरेचनात् सप्तरात्रे गते जातबलाय च ।
भुक्तान्नायानुवास्याय वस्तिर्देयोऽनुवासनः ॥ २१ ॥
अथानुवास्य स्नेयक्तमुष्णाम्बुस्नेदित प्रनैः ।

मात्रा अर्हति तस्य द्विपल प्रथम देय, तत पलार्द्धेन वृद्धि, एव नवभिर्दिनै षट्पला मात्रा स्यात । यस्य मध्यमा त्रिपला मात्रा तस्य पल प्रथम देय, ततश्च कर्षेण वृद्धि एव नवभिर्दिनैस्त्रिपला मात्रा स्यात् । कनीयसी यस्य मात्रा साडा पलमात्रान्विता तस्य प्रथममर्द्धपलोन्मित, ततो वृद्धिरष्टमाषकैरेव नवभिर्दिनै सार्द्धपल स्यात । नवदिनदानमुक्त तेनातोऽवागपि स्नेहलक्षणोदयेऽनुवासननिवृत्ति' कार्या । यदुक्त—"प्रस्तुतस्य पलार्द्धेन पलस्य त्रिचुना तथा । पलार्द्धसार्द्धकर्षेण वृद्धि कार्या यथाक्रमम् ॥" क्रमो यथा, तदुक्त—"प्राग्दोषमाद्ये द्विपल पलार्द्धवृद्धिर्द्वितीये पलमत्रवृद्धि । कर्षद्वय वा वसुमात्रवृद्धिर्वस्तौ तृतीये क्रम एष उक्त ॥" इति । इय मात्रा द्रवविषये ॥ १९ ॥

स च स्नेह कीदृशोपहित देय ? इत्याह, शताह्वेति ।—शताह्वासैन्धवचूर्णस्य माषपरिमाणेन प्रक्षार, तव स्नेहस्य पलमानम् इति पक्षान्तरमित्येके, यत,—"चूर्णमाष पले स्नेहे सिन्धुजन्मशताह्वयो" (हन्द०) इत्यादिवचनात् । एतेन किमुक्तम् ? यस्येवम् अनुवासनो दत्तस्य कदाचित् अन्यत्र न आव्रजेदित्यभिप्राय, तथा हि "यस्यानुवासनो दत्त सकृदप्यनावजेत्" (सु० चि० ३७ अ०) इति । परमार्थतस्तु उत्तमनव्यमाधमेषु षट् चत्वार द्वौ च माषका यथाक्रम ज्ञेया, यदुक्त—"दैवदारुवचाराला शताह्वाकृष्णसैन्धवै । अतचूर्ण प्रदातव्य षट्चतुर्द्वयमाषके ॥" इति ॥ २० ॥

अनुवासनविषयमाह, विरेचनादिति ।—विरेचनात् सप्तरात्रे गते सति विरेचनदिवसात् प्रभृति सप्तरात्र यावद्भवति तदुपरि अनुवासन देयमित्यर्थ, अत एव जातबलाय प्राप्तबलाय बलवते इत्यभिप्राय । भुक्तान्नायेति—कृतभोजनाय । अनुवास्यायेति—अनुवासनयोग्याय । एके भुक्तान्नायानुवास्यायेत्यस्य स्थाने कृताहाराय सायमङ्गि इति पठन्ति व्याख्यानयन्ति च । अथानुवासनस्य विधि वक्तुमाह, अथानुवास्यमिति ।—अनुवास्यम् अनुवासनयोग्य, पुरुषमिति शेष । एके निरूहविषयमेन-

भोजयित्वा यथाशास्त्रं कृतचङ्क्रमणं ततः ॥ २२ ॥
उत्सृष्टानिलविण्मूत्रं योजयेत् स्नेहवस्तिना।
सुप्तस्य वामपार्श्वेन वामजङ्घाप्रसारिणः ॥ २३ ॥
कुञ्चितापरजङ्घस्य नेत्रं स्निग्धे गुदे न्यसेत्।
बद्ध्वा वस्तिमुखं सूत्रैर्वामहस्तेन धारयेत् ॥ २४ ॥
पीडयेद्दक्षिणेनैव मध्यवेगेन धीरधीः।
जृम्भाकासक्षवादींश्च वस्तिकाले न कारयेत् ॥ २५ ॥
त्रिंशन्मात्रामितः कालः प्रोक्तो वस्तेस्तु पीडने।
ततः प्रणिहिते स्नेहे उत्तानो वाक्शतं भवेत् ॥ २६ ॥

मानसान्ति, तत्र अनुवास्यमित्यनेन पूर्वं कृतानुवासन पुरुषमित्यभिप्रायः, यदुक्तम्—"अनुवासितमध्यक्तं स्विन्नदेहं निरूहयेत्" इत्यादि। भोजयित्वा यथाशास्त्रमित्यनेनाति-भोजननिषेधोऽभिमतस्य। उत्सृष्टानिलविण्मूत्रमिति—परित्यक्तविण्मूत्रादिकम् अन्यथा वस्तेरन्त प्रवेशो न भवति, तथा हि—उत्सृष्टानिलविण्मूत्रे नरे वस्तिं निधापयेत्। अन्यथा निहितो वस्तिर्नैवान्तः सम्प्रपद्यते॥" इति, योजयेत् स्नेहवस्तिनेति, वैद्य इति शेषः। कोचान्नरूढ वस्तिविषयमेवेति वदन्ति तन्न न सम्यक् कृतानुवासनस्य निरूहस्योक्तत्वात्, उक्तञ्च—'अनुवासितमध्यक्तं स्विन्नं देहं निरूहयेत्" इति। अथ वास्तं कथं योजयेदित्याह, सुप्तस्य वामपार्श्वेनेति।—सुप्तस्य शयानस्य, भाविनि भूतवदुपचारः, तेन प्रथमं शायितस्य पश्चात् सुप्तस्येत्यर्थः (?), शयने इत्यध्याहार्यम्, उक्तञ्च वाग्भटे—"कृतचङ्क्रमणं मुक्त-श्लेष्माणं शयने सुखे। नात्युच्छ्रिते न नीचोर्ध्वे सविष्टं वामपार्श्वतः॥ सङ्कोच्य दक्षिणं सक्थि प्रसार्य च ततोऽपरम्। अधस्य नेत्रं प्रणयेत् स्निग्धे स्निग्धमुखं गुदे॥" (वा० सू० १९ अ०) इति। वामपार्श्वेनेति वस्तिदानं प्रशस्तं भवति, यदुक्तं—"वामपार्श्वोऽग्निर्यकृत्प्लीहौ गुदश्च तत्पार्श्वस्थस्य सुखोपलब्धिः। लीयन्त एव वलयश्च तस्मात् सव्यं शयानोऽहति वस्तिदानम्॥" (च० सि० वस्तिसू०) इति। अत एव वामजङ्घाप्रसारिणं पुरुषस्य कुञ्चितापरजङ्घस्य, वामजङ्घाया प्रसारिताया तदुपरि दक्षिणजङ्घा आकुञ्चिता कार्या इत्यभिप्रायः। नेत्रमिति—बद्धचर्मपुटाङ्कित-स्नेहयुक्त नालिकाशरं, स्निग्धे गुदे इति—स्निग्धस्निग्धे गुदे गुदमुखे। अथ

जानुमण्डलमावेष्ट्य कुर्याच्छोटिकया युतम्।
एका मात्रा भवेदेषा सर्वत्रैष विनिश्चयः॥ २७॥
प्रसारितैः सर्वगात्रैर्यथा वोर्ध्वं प्रसर्पति।
ताडयेत्तलयोरेन त्रीन् वाराञ्च शनैः शनैः॥ २८॥
स्फिचोश्चैवं ततः श्रोणीं शय्याञ्चैवोत्क्षिपेत्ततः।
जाते विधाने तु ततः कुर्यान्निद्रा यथासुखम्॥ २९॥

पश्चात्कर्माह, तत बस्तिविधानादनन्तर स्नेहे स्नेहबस्तौ प्रणिहिते स्थापिते, अन्तः-प्रविष्ट इति भाव, उत्तान पुरुष वाक्शत यावत्तिष्ठेत् तेन बस्तिदानार्थं पूर्वं वामपार्श्वे भूत्वा पश्चात् बस्तिदाने कृते सति उत्तानो भूत्वा वाक्शतं यावत्तिष्ठेदित्यभिप्राय, वाक्शतमिति—क्षोटिकाशतम्। "तत प्रणिहिते स्नेहे उत्ताने * वाञ्छित भवेत्" इत्यपि पाठ, तत्रापि स एवार्थ। प्रसारितै सर्वगात्रै, कृत्वा यथा पुरुषो भवति तथा बस्तिर्वोर्ध्वं प्रसर्पतीति भाव। अन्यत्रे "आकुञ्चयेच्छनैस्तस्मि सकिथबाहू तत परम्" (चक्र) इति पादद्वय पठन्ति कैचित, तन्मते तु जङ्घाबाहुसहितयोरुत्क्षेपं कृत्वा विकुट्टिचय्य सङ्कोचयेत, सकिथबाहाकुञ्चनञ्च स्नेहस्योर्ध्वविसर्पणार्थम्, एव हि शिरासुखाना स्फुटत्व भवति। ताडयेत्तलयोरेनामत्यादि, तलयोरिति—हस्त-पादतलयो। स्फिचोश्च ताडन वस्ते शीघ्रागमनवारणार्थम्, यदुक्त डल्हणे—"दत्त्वा स्फिचौ पाणितलेन हन्यात स्नेहस्य शीघ्रागमनरक्षणार्थम्" (च० सि० बस्तिसूत्रो०) इति। तत इत्यनेनात्र त्रिवारग्रहण बोद्धव्य, तेन शय्या विकुट्टयेदिति—शय्या प्रति श्रोणी विकुट्टयेत इत्यर्थ। अनेनैव चरकोक्तगात्रमर्दनादिकमपि यथेच्छस्थितिर्हेतु सङ्गृह्यते, यदुक्त—'स्नेहेन पाण्यङ्घ्रितलपिण्डिकाश्च ये वाऽस्य गात्रावयवा रुजार्ता। तान्यावमृज्यात् सुमुख ततश्च निद्रासुपासीत कृतोपधान॥" (च० सि० बस्तिसूत्रो०) इति। अन्यत्रे तु—"एव प्रणिहिते बस्तौ मन्दायासोऽथ मन्दवाक्। उत्तानाङ्गो भवेत्तावत् यावन्मात्राशत भवेत्॥" इति पठन्ति व्याख्यानयन्ति। "कूर्परे जानुनो चैव कुर्यात् त्रीणि गतागतम्। विकसवलना वाऽपि कुर्यात् वारञ्च तन्त्रित॥" इत्यपि श्लोक पठन्ति कैचित। वाग्भटेऽपि—"दत्ते

---

* वाञ्छितमिति पाठ कुत्रापि न दृश्यते नाप्यस्य कश्चित् सदर्थो भवितुमर्हति।

सम्यगनुवासितस्य लक्षणम्।—

सानिलः सपुरीषश्च स्नेहः प्रत्येति यस्य वै।
उपद्रवं विना शीघ्रं स सम्यगनुवासितः॥ २०॥

स्नेहे प्रत्यागते कर्त्तव्यनिर्देशं।—

जीर्णान्नमथ मायाङ्गे स्नेहे प्रत्यागते पुनः।
लघून्नं भोजयेत् कामं दीप्ताग्निस्तु नरो यदि॥ २१॥

अनुवासनव्यापत्तौ चिकित्सा।—

अनुवासिताय दातव्यमितरेऽह्नि सुखोदकम्।
धान्याम्लशुण्ठ्याकषायं वा स्नेहव्यापत्तिनाशनम्॥ २२॥

तूष्णानदेहस्य पाणिना ताडयेत् स्फिचौ। तत्पार्ष्णिभ्यां तथा शय्यां पादतश्च विधूनयेत्॥ ततः प्रसारिताङ्गस्य सोपधानस्य पार्श्वके। आहन्यान्मुष्टिनाऽङ्गेषु स्नेहनाभ्यक्त मर्दयेत्॥" (वा० सू० १९ अ०) इति। तत्र किं कुर्यात्? इत्यत आह, ज्ञात इति।—यथासुखमित्यनेनाचारक्रमं स्मरन् निद्रां कुर्यादित्यर्थः, उक्तञ्च—"स्वास्तीर्णे शयने कामं सौताचारिके रतः" (सु० चि० ३७ अ०) इति॥ २१—२९॥

सम्यगनुवासितलक्षणमाह, सानिल इति।—यस्य स्नेहः सानिलः सवातः सपुरीषः विष्ठासहितः प्रत्येति निःसरति, कथम्? उपद्रवं विना, उपद्रवाऽत्र शोषशोषादिः, अत एव केचिदत्र पठन्ति—"शोषशोषौ विना शीघ्रं स सम्यगनुवासितः" (सु० चि० ३७ अ०) इति। शोषः प्रादेशिको दाहः, शोषो वदनादिशैष्यं पिपासेत्यपरे। सुश्रुतेऽप्ययमेव पाठ इति भानुमतौ। * शीघ्रमिति यामादूर्द्धम्॥ २०॥

स्नेहागते विधिमाह, जीर्णान्नमिति।—† स्नेहे प्रत्यागते सति सम्य इति शेषः, दीप्ताग्निः स नरः यदि तथा कामं भोजयेत्, सायाह्ने प्रत्यागते लघून्नं भोजयेत इति विषमविभागः। केचिदपरेऽह्नि भोजयेदित्याहुः॥ २१॥

अनुवासनव्यापत्तौ प्रतीकारमाह, अनुवासितायेति।—इतरेऽह्नि अपरदिने

---

* "शीघ्रमिति यामसमयानन्तरमेवेत्यर्थः" इति शिवदासः।

† व्याख्येयं न सर्वोधोना, तथा च वाग्भटे "दीप्ताग्नित्वागतस्नेहं सायाह्ने भोजयेल्लघु" अस्य व्याख्यायामरुणदत्तः "दीप्ताग्निं तु पुरुषं निवृत्तस्नेहं सन्तं लघु मात्रया स्वभावतश्च भोजयेत्" (वा० सू० १९ अ०) इति।

वस्तिदानस्य सङ्ख्यानिर्देश ।—

अनेन विधिना षड् वा सप्त वाऽष्टौ नवापि वा।
विधेया वस्तयस्तेषामन्तरा तु निरूहणम् ॥ ३३ ॥

सुखोदकम् उष्णोदकम्। अथवा धान्यगुरुडोकषाय वा तदपि कोष्णम्, उक्तञ्च वाग्भटे—"प्रातर्नागरधान्याम्भ कोष्ण केवलमेव वा" (वा० सू० १९ अ०) इति। अन्यत्रापि केचित पठन्ति—"एकान्तरोपयोगेन धान्यगुरुडोजल पिबेत। तेनाग्नि दीप्यते वह्निर्भक्ताकाङ्क्षा च जायते॥" इति। * तन्मते तु एकान्तरानुवासन, धान्यगुरुडोकाथ परदिने प्रात देय इति। धान्यनागरसिद्धञ्च तोय षडङ्गविधिना इति चक्र। काथोदकञ्च पित्तोत्तरे देयम्, उक्तञ्च चक्रे—"क्वाथार्द्धमात्रया प्रातर्धान्यगुरुडोजल पिबेत्। पित्तोत्तरे कटुष्णाम्बु तावन्मात्र पिबेदनु॥ तेनाग्नि दीप्यते वह्निर्भक्ताकाङ्क्षा च जायते॥" इति ॥ ३२ ॥

अथोक्तप्रकारमुपसहरन् वस्तिदानसङ्ख्यामाह, अनेनेति।—अनेन विधिनेति—पूर्वोक्तप्रकारेण षट्, सप्त, अष्टौ, नव वस्तय क्रमेण विधेया योज्याः। क्रमो यथा कफजे विकारे षट् वा-ग्रहणात् एक त्रयो वा प्राप्ता। पित्तात्मके च सप्त अष्टौ वा चकारात् पञ्चग्रहणप्राप्ति। वाते नव इति वा-ग्रहणादेकादशप्राप्ति। ननु तन्त्रान्तरे—"रूक्षस्य बहुवातस्य द्वौ त्रीन् वाऽप्यनुवासनम। दत्त्वा स्निग्धतनु ज्ञात्वा तत पश्चान्निरूहयेत्॥" (सु० चि० ३७ अ०) इत्यनेन विरोध, तत कथमत्र षट्सप्तादिसङ्ख्या? सत्यम्, रूक्षस्य बहुवातस्य यदि मृदुकोष्ठत्व तदा द्वौ

* चक्रटीकाया शिवदासेन एवमुक्तम्—" एतच्च धान्यगुरुडोजल षडङ्गविधिना कर्त्तव्यमिति चक्र। ततश्च धान्यस्य द्वादशभागका गुरुडाश्च षट् चत्वारो वेति मिलिता कर्षमानत्व ज्ञेयम। एतच्च धान्यगुरुडोजल न प्रत्यह देय किन्तु एकान्तरमिति, तदुक्तम्—'एकान्तरोपयोगेन धान्यगुरुडोजल पिबेत' इति। उत्सर्गतस्त्वावटीकान्तरमेवानुवासनदानम, यस्मिन् दिवसे अनुवासन न दीयते तस्मिन्नेव दिने धान्यगुरुडोजल देयम अनुवासनदिने तु न देयम्, यदाह चरक,—'मुक्तस्नेह द्रवोष्णञ्च लघुपथ्यापसेवनम। भुक्तवान् मात्रया भोज्यमनुवास्यस्त्वहात् व्यहात॥ धान्यनागरसिद्ध तोय दद्यात् विचक्षण। व्युषिताय निशा कल्यमुष्ण वा केवल जलम॥' इति। व्युषितायेति—अनुवासनस्नेह दत्त्वा निशा व्युषतायेत्यर्थ, एतेन यस्मिन् दिने अनुवासनस्नेहो न दीयते तस्मिन्नेव दिने धान्यनागरसिद्ध तोय देयमिति बोधयतीति"।

अष्टादशवारदेयबस्ते प्रत्येकस्य फलम्:—

(दत्तस्तु प्रथमो वस्ति स्नेहयेत् वस्तिवङ्क्षणौ।
सम्यग्दत्तो द्वितीयस्तु मूर्धस्थमनिलं जयेत् ॥
बलं वर्णञ्च जनयेत्तृतीयस्तु प्रयोजितः।
चतुर्थपञ्चमौ दत्तौ स्नेहयेता रसासृजौ ॥
षष्ठो मांस स्नेहयति सप्तमो मेद एव च।
अष्टमो नवमश्चास्थि मज्जानञ्च यथाक्रमम् ॥
एव शुक्रगतान् दोषान् द्विगुण साधु साधयेत् ॥
अष्टादशाष्टादशकान् वस्तीना यो निषेवते।
स कुञ्जरबलाऽश्वस्य जवेस्तुल्योऽमरप्रभः ॥
रूक्षाय बहुवाताय स्नेहवस्ति दिने दिने।
दद्याद्वैद्यस्ततोऽन्येषामग्न्याबाधभयात्त्रयहात् ॥

वा त्रयो वा स्नेहवस्तय, अत एव "स्निग्धतनु ज्ञात्वा" इति कृतवान्। ननु स्निग्धतनुता द्विविधस्नेहवस्तिदानस्य चरके विहितत्वात, यथा—एक तथा द्वौन् कफजे विकारे पित्तात्मके पञ्च च सप्त वाऽपि। वातेन चैकादश वा पुनर्वा वस्तीनयुग्मान् कुशली विदध्यात॥" (च० सि० कल्पना०) इति, उच्यत—अयुग्मदान स्वतन्त्रानुवासनविषय, न तु निरूहाङ्गानुवासनविषय, निरूहाङ्गानुवासने चरकेणापि युग्मदान दर्शितम, यथा—* "द्वौन् पञ्च वा चतुरो वा वस्तीन् दत्त्वोत्तरनिरूहण विना पुन स्नेहदानेन युग्मान् तथा कुर्यात" इति दर्शयति (१) निरूहान्तरित कुर्यादित्यभिप्राय। विषमसङ्ख्योपादान द्विचतुरादिवस्तेरपि मध्यविषय परिग्रहार्थम इति। रूक्षस्नेत्यादिविधानन्तु दोषविषयभेदादावरोध। तेषामन्तरा तु निरूहणमिति—तेषा स्नेहनवस्तीनाम् अन्तरा निरूहण कार्यमित्यर्थ, यदुक्त—"स्नेहवस्ति निरूह वा नैकमेवातिशीलयेत्। स्नेहात् पित्तकफोरक्लेशौ निरूहात् पवनाद्भयम्॥ तस्मान्निरूढोऽनुवास्यो निरूह्यश्चानुवासित'। नैव पित्तकफोरक्लेशौ स्याता न पवनाद्भयम्॥" (सु० चि० ३७ अ०)॥ २३॥

---

* उक्तिरिय चरके नास्ति नाप्यर्थस्य सुगमोऽस्या, इति।

स्नेहोऽल्पमात्रो रूक्षाणां सर्वकालमनत्ययः।
तथा निरूह' स्निग्धानामल्पमात्र प्रशस्यते ॥)

अनुवासनस्नेहे सद्य प्रत्यागते पुनर्दानाविधि ।—

अथवा यस्य तत्कालं स्नेहो निर्याति केवल'।
तस्यान्याऽल्पतरो देयो न हि स्निह्यत्यतिष्ठति ॥ २४ ॥

स्नेहे अनागते दोषनिर्देश चिकित्सा च ।—

अशुद्धस्य मलोन्मिश्र, स्नेहो नैति यदा पुनः।
तदा शैथिल्यमाध्मानं शूलं श्वासश्च जायते ॥ २५ ॥
पक्वाशये गुरुत्वञ्च तत्र दद्यान्निरूहणम्।
तीक्ष्ण तीक्ष्णौषधैर्युक्ता फलवर्त्तिर्हिता तथा ॥ २६ ॥

निरुक्तेऽनुवासने स्नेह पुनरपि अनुवासनमाह, अथवेति।—अथवा अनुवासनस्नेहः यस्य पुरुषस्य तत्काल शीघ्रमेव निर्याति तस्य पुरुषस्यान्योऽल्पतरोऽनुवासनस्नेहो देय। कुत इत्यत आह, अतिष्ठति इत्यादि—अतिष्ठति स्नेहं न हि स्निह्यति। अल्पतर इति पूर्वदत्तात तन्मात्रे तु—"यस्यानुवासनो दत्त सकृदल्पमात्रजित। अल्पौष्ण्या-दतितैक्ष्ण्याद्वा वायुना वा प्रपोडित ॥ सवातोऽधिकमात्रो वा गुरुत्वाद्वा सभेषज। तस्यान्योऽल्पतरो देयो न हि स्निह्यत्यतिष्ठति ॥" (सु० चि० ३७ अ०) इति। अत्र वायुना इति—कोष्ठस्थेन वातेन इत्यर्थ। सवात इति—अनुच्छ्वास्य विहितबस्त्यादिना वस्तिपुटकस्थितवायुसहिते तु स्नेहे सुखकषायता जृम्भा वातरुजाश्च वेपथुर्वेषमज्वर इति ॥ २४ ॥

अथ च स्नेहानिर्गमेऽपि विधानमाह, अशुद्धस्येति।—अशुद्धस्य अकृतशोधनस्य पुरुषस्येत्यर्थ, अत एव मलोन्मिश्र स्नेह इति तथा हि—"स्नेहवस्तिर्विशेषेस्तु नाविशुद्धस्य दीयते। स्नेहशौर्य्ये तथा दत्ते देहज्ञानविनाशनम्॥" (सु० चि० ३७ अ०) इति। यदा नैति न प्रत्यागच्छति स्नेह इति सम्बन्ध तदा शिथिलाद्याध्मो भवति। शिथिलस्थाने सदनमिति पाठान्तरम्। तत्र दद्यान्निरूहणमिति तीक्ष्णमिति निरूहणित्यस्य विशेषणम्, अथवा तीक्ष्णौषधैरेव संयुक्ता फलवर्त्तिरत्रैव विहिता। पाठान्तराऽपि—"तीक्ष्णा तीक्ष्णौषधैर्युक्ता फलवर्त्तिर्हिताऽथवा" इति, फलवर्त्तिस्तु वक्ष्यमाणोत्तरबस्तौ द्रष्टव्या। एवं "तीक्ष्ण तीक्ष्णौषधैरेव सिद्ध वाऽप्यनुवासनम्" इति

यथाऽनुलोमन वायुर्मलं स्नेहश्च जायते।
तथा विरेचनं दद्यात्तीक्ष्णं नस्यञ्च शस्यते ॥ ३७ ॥

स्नेहे अनागतेऽपि अनुपद्रवे कर्त्तव्यनिर्देश।—

* यस्य नोपद्रव कुर्य्यात् स्नेहवस्तिरनि सृतः।
सर्वोऽल्पो वाऽऽहृतो रौक्ष्यादुपेक्ष्यः स विजानता ॥ ३८ ॥

अनागते स्नेहे कर्त्तव्यनिर्देश।—

अनायातं त्वहोरात्रे स्नेहं संशोधनैर्हरेत्।
स्नेहवस्त्यावनायातं नान्य. स्नेहो विधीयते ॥ ३९ ॥

पठन्ति व्याख्यानयन्ति च। "यथानुलोमन वायु मल स्नेहश्च जायते। तदा विरेचनं दद्यात्तीक्ष्णं नस्यञ्च शस्यते॥" तीक्ष्णं विरेचन नस्यञ्च तीक्ष्णमित्यर्थ ॥३५—३७॥

अथानि सृतोऽपि वस्तिर्न विकाराय भवतीत्यत आह, यस्येति।—नोपद्रवमिति—उपद्रवोऽत्र रोग स च सुखकषायत्वादिक, यदुक्त—"तत्र वातामिभूते तु स्नेहे सुखकषायता। जम्भा वातरुजस्तास्ता वेपथुर्विषमज्वर ॥" (सु० चि० ३७ अ०) इति। रौक्ष्यादिति—शरीररौक्ष्यादस्निग्ध यतो रूक्ष शरीर भावयत्तेनोपचीण स खलु स्नेह तत्तेनोपद्रव करोति, अत एवोपेक्ष्य इत्युक्तम्, उपेक्ष्य इति—तन्नि सरणाय प्रतिक्रिया कुर्य्यादित्यर्थ, "अनायातत्वहोरात्रात् स्नेह संशोधनैर्हरेत्। स्नेहवस्त्यावनायातं नान्य स्नेहो विधीयते॥" (सु० चि० ३७ अ०)॥ ३८॥

अहोरात्रादनि सृते प्रतीकारमाह, अनायातमिति।—अनायातम् अनि सृतं स्नेह संशोधने शोधनवस्तिभिर्हरेत। केचित् संशोधनैरित्यत्र सोपद्रवमिति पठन्ति, तत्रोपद्रवा पूर्वोक्ता। अन्य स्नेह स्नेहवस्तिर्न विधीयते स्नेहातिभयात्, शोधनवस्तिस्तु देय। अनायातमित्यस्य श्लोकस्यायें अधिक पठन्ति, यथा—"कुष्ठक्रमुककल्कञ्च पाययेच्चाम्लसयुतम्। औष्ण्यात्तैक्ष्ण्यात् सरत्वाच्च वस्ति साऽस्यानुलोमयेत॥ गोमूत्रण

---

* चरकतात्पर्यटीकायामस्य व्याख्या यथा—"वातादाहृतस्नेहाप्रवर्त्तनमभिधाय अप्रवर्त्तनीय स्नेहमाह, यस्य नोपद्रव कुर्य्यादिति।—अनि.सृतोऽपि वस्तिरुक्तगादीन् न कुर्य्यात् अल्पो वा आहृत इति श्लोको नि सृत श्लोकस्याहृत। आहृतस्य वस्त्याद्यकरणे हेतुमाह, रौक्ष्यादिति।—रूक्षतया शरीरस्य तिष्ठन्नपि स्नेहो न व्यापद आवहतीत्यर्थ। उपेक्ष्य इति न तत्र आहृतस्नेहचिकित्सा कर्त्तव्या इत्यर्थः (च० सि० स्नेहव्यापं०) इति।

अनुवासनार्थे गुडूच्यादि तैलम्।—

गुडूच्येरण्डपूतीक-भार्गीवृषकरोहिषम्।
शतावरीं सहचरं काकनासा पलोन्मिताम्॥ ४०॥
यवमाषातसीकोल-कुलत्थान् प्रसृतोन्मितान्।
चतुर्द्रोणेऽम्भसः पक्त्वा द्रोणशेषेण तेन च॥ ४१॥
पचेत्तैलाढकं पेथे जीवनीये पलोन्मितैः।
अनुवासनमेतद्धि सर्ववातविकारनुत्॥ ४२॥

बस्तिव्यापद सङ्ख्या।—

षट्समतिव्यापदस्तु जायन्ते वस्तिकर्मणा।
दूषिताः समुदायेन ताश्चिकित्स्यास्तु सुश्रुतात्॥ ४३॥

क्षवत्पथ्य'-कल्पस्थाधोऽनुलोमनम्॥" (वा० क० ५ अ०) इत्यादि पाठो बहुपुस्तकेष्वदृष्ट, तस्मादस्माभिरपि न व्याख्यात। "नात्र स्नेहो विधीयते" इत्यत्र "तस्मात्र सेक प्रशस्यते" इति कैचित पाठ पठन्ति॥ ३९॥

अथानुवासनार्थं गुडूच्यादितैलमाह, गुडूचीति।—गुडूच्यादीनि काकनासान्तानि प्रत्येक पलोन्मितानि ग्राह्याणि। तत्र गुडूची छिन्नरुहा। एरण्ड पचाङ्गुल। पूतीक पूतिकरञ्ज। भार्गी द्विजा। वृषो वासक। रोहिष' सुगन्धितृणम्। शतावरी नारायणी। सहचर कुरण्टक। काकनासा प्रसिद्धा इति। यवादीनि प्रसिद्धानि प्रसृतोन्मितानि पलद्वयमितानि प्रत्येक ग्राह्याणि। तैलाढक क्षणतिलस्नेह आढकमित। पेथे जीवनीये पूर्वोक्तकल्पोक्ते प्रत्येक पलोन्मिते इति। जीवनीयगणो यथा—"जीवन्ती सूप्यपर्णीयुक् काकोल्यौ जीवकर्षभौ। मेदे यष्टीति मधुरो जीवनीयो गणो मत॥" इति॥ ४०—४२॥

बस्तिव्यापदश्च सुश्रुताच्चिकित्स्या इत्यत आह,—षडिति। अत्राप्ये कैचिदधिक पाठ पठन्ति तद्यथा—"स्नेहपीतस्य वान्तस्य विरिक्तस्य कृतासृज। निरूढस्य च कायाग्निर्मन्दो भवति देहिन॥ स चाल्पेलबुभिश्चान्नैरुपयुक्तैर्विवर्द्धते। काष्ठैरग्निरिवाल्पैय सन्धुक्षित प्रयत्नत॥" (सु० चि० ३७ अ०)। "यस्तेऽग्नौ जीवति चिर रोगी स्याद्विकृति गते। अन्ते पञ्चत्वमायाति देही तस्मादलोऽनल॥" इति। एतदर्थं चिकित्साऽपि—"प्रातरुत्थोदक देय धान्यनागरसाधितम। तेनास्य दीप्यते वह्निर्भक्ताकाङ्क्षा च जायते॥" (सु० चि० ३७ अ०) इति। स्नेहपीतस्य इत्यादि पाठ, क्षपक इति क्वचि। अस्माभिरत्र नात्र व्याख्यात॥ ४३॥

अनुवासने पथ्यावधि ।—

पानाहारविहारस्य परिहारस्य क्रमशः।
स्नेहपानसमाः कार्या नात्र कार्या विचारणा ॥ ४४ ॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां मध्यमखण्डे वस्तिविधिर्नाम पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः।

अथ निरूहविधिः।—

कारणभेदेन निरूहस्य भेदोक्तिः ।—

निरूहवस्तिर्बहुधा भिद्यते कारणान्तरैः।
तैरेव तस्य नामानि कृतानि मुनिपुङ्गवैः ॥ १ ॥

अनुवासने पानादिपथ्यमाह, पानेति।—स्नेहपानसमा इति—ये पानाहारविहारादय स्नेहपानविषये पूर्वं दर्शिता, तेऽत्यव क्रमश कार्या, तेनात्र विचारणा न कार्या, आगमोक्तत्वात। पानादयोऽत्यव तत्रत्या अवगन्तव्या। अन्यत्रे पठन्ति केचित—"अष्टादशाष्टादशकान् वस्तीना यो निषेवते। यथोक्तेन विधानेन परिहारक्रमेण च॥ स कुञ्जरबलोऽश्वस्य जवेनुल्योऽमरप्रभ। वीतपाप्मा श्रुतिधर सहस्रायुर्नरो भवेत॥" (सु० चि० ३७ अ०) इति। अन्यदपि—"मूलसेकात यथा वृक्ष स्निग्धश्च नवपल्लव। तथा वस्तिप्रदानात स्यान्नर कान्तिबलादिमान्॥" इति ॥ ४४ ॥

इति श्रीवात्स्यान्वयप्रकाशवैद्यश्रीभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायामुत्तरखण्डे वस्तिविधिर्नाम पञ्चमोऽध्यायः ॥ ५ ॥

अथ पारिशेष्यात् निरूहवस्तिविधिमाह। तत्र तद्भेदानाह, निरूहेति।—यो निरूहवस्तिः पूर्वं सङ्गृहीत सोऽत्यव कारणान्तरै कृत्वा बहुधा भिद्यते कथ्यते इत्यर्थः। कारणान्तराणि वक्ष्यमाणदीपन-संशमन शोधन लेखन बृंहणानि पिच्छिल-व्यापनत्वैरण्डवस्तिप्रभृतीनि बोद्धव्यानि। तैरेव कारणान्तरैरेव तस्य निरूहवस्ते नामानि मुनिपुङ्गवै ऋषिश्रेष्ठै कृतानि कथितानि इत्यभिप्रायः ॥ १ ॥

निरूहस्य पर्य्याय निरूहणीय।—

निरूहस्यापर नाम प्रोक्तमास्थापनं बुधै ।
स्वस्थानस्थापनाद्दोष-धातूना स्थापनं मतम् ॥ २ ॥

निरूहस्य उत्तमादिमात्रा।—

निरूहस्य प्रमाणञ्च प्रस्थ पादोत्तरं परम् ।
मध्यम प्रस्थमुद्दिष्टं हीनञ्च कुडवास्त्रय ॥ ३ ॥

दोषहरबलिरित्यादीनि तस्य विशेषनामान्याह, निरूहस्येति।—बुधै पण्डिते निरूहस्य नाम आस्थापन प्रोक्तम आस्थापयति वय इति आस्थापन परमुत्कृष्टम, उत्कृष्टत्वञ्च वय स्थापनेनैव। अथवा दोषधातूना स्वस्थाने स्थापनादास्थापन, तच्च क्षीरेण क्वाथेश्च क्रियते, उक्तञ्च—"क्षेद्वैर्यो दीयते स स्यादनुवासनसामक्ष । पय कषाये सोऽपि निरूहास्थापनो मत ॥" इति। एके "स्वस्थान-स्थापनाद्दोषधातूना स्थापन मतम्" इति नाम पठन्ति व्याख्यानयन्ति च। सुश्रुतेऽपि —"स दोषनिर्हरणात्क्षीररोगहरणाद्वा निरूह" (सु० चि० ३५ अ०) इति, स आस्थापन इति नाम। अन्यानपि निरुक्तो स एव, यथा—"वय स्थापनात् आयु स्थापनाद्वा आस्थापनम्" (सु० चि० ३५ अ०) ततश्च सर्वदोषनिर्हरणान्निरूह । इति वसनाख्यिकम ॥ २ ॥

अथ दोषाद्यपेक्षया मात्रामाह निरूहस्येति।—निरूहस्य निरूहसञ्ज्ञस्यास्थापनस्य परमुत्कृष्ट प्रमाण पादोत्तर प्रस्थ सपादप्रस्थम्। मध्यम प्रस्थम उद्दिष्टम। वय कुडवा-हीन नानम, उक्तञ्च पाराशरे—"निरूहस्य प्रमाणन्तु प्रस्थ पादोत्तर परम्। मध्य-प्रस्थस्तु निर्दिष्टो विज्ञेया कुडवास्त्रय ॥" इति। उत्तमादिमानञ्च दोषबलापेक्षया अवगन्तव्यम्। ननु चरकादावन्यथा पठित, तत् यथा—* "अत ऊर्द्ध प्रवक्ष्यामि निरूहस्योपकल्पनम्। द्वादशप्रसृतस्यादौ ततोऽन्यानुपकल्पयेत ॥" इति। तत कथमत्र विंशतिपलान्युत्तमनामानीति प्रतिपादितानि? सत्यम्, द्वादशप्रसृत नाम निरूहस्य पञ्चाङ्गस्य यूक्त्या दर्शितम, तथा हि—"मधुस्नेहनकल्काख्य-कषायावापत क्रमात्। त्रीणि षट् द्वे दश त्रीणि पलान्यनिलरोगिषु ॥ पित्ते चत्वारि चत्वारि द्वे द्विपञ्च चतुष्टयम। षट् त्रीणि द्वे दश त्रीणि कफे चापि निरूहणम ॥" इति। अन्यत्र— "दत्वाऽत्र सैन्धवस्यादौ मधुन प्रसृतद्वयम्। विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृत-

---

* श्लोकोऽय मुद्रितचरकादौ न दृश्यते।

निरूहानर्हा ।—

अतिस्निग्धोत्क्लिष्टदोषौ क्षतोरस्कः क्षयस्तथा ।
आध्मानच्छर्दिहिक्कार्श-कासश्वासप्रपीडितः ॥ ४ ॥
गुदशोफातिसारार्त्तौ विसूचीकुष्ठसयुत ।
गर्भिणी मधुमेही च नास्थाप्यश्च जलोदरी ॥ ५ ॥

निरूहार्हा ।—

वातव्याधावुदावर्त्ते वातासृग्विषमज्वरे ।
मूर्च्छाष्ठीलोदरानाह-मूत्रकृच्छ्राश्मरीषु च ॥ ६ ॥

इयम् ॥ एकीभूते तत क्षेहे कल्कार्थ प्रक्षत क्षिपेत । सम्मूर्च्छित कषाय त यथाप्रक्षतसम्मितम् ॥ क्षितरेच यथाऽऽवापसन्ते क्षिप्रक्षतान्मितम् । वस्त्रपूत तथोष्णाम्बु कुर्योवाप्येष तापित ॥ एव प्रकल्पिता बस्तिर्हादशप्रक्षतो भवेत् ॥ न धावत्यौषध पाणौ तिष्ठत्यवक्षिप्य च । न करोति च सौमन्त स निरूह सुयोजित ॥" इति । एतेनोत्क्लिष्टदोषबले हादशप्रक्षतमान मध्यबले त्रिंशतिपलानीत्यदोष । सामान्य विशेषकथनाददोष खलीयमते सामान्य परमते विशेष इत्यदोष । यदा शोधनशमनलेखनप्रभृतीना वस्तीना विषयत्वेन विंशतिप्रभृतिक चतुर्विंशतिप्रभृतिकं मानमुपदिशन्ति तदनुमानतो ज्ञातव्य ग्रन्थगौरवभयान्न लिखितमित्यदोष ॥ ३ ॥

अथ अनास्थापनीयानाह, अतीति ।—एते नास्थाप्या, चकारात नानुवास्याश्च, उक्तञ्च—"अथोन्मादक्षया शोषाजीर्णाकृविषमेहिण । मूर्च्छाकुष्ठीदरश्लीप्य-श्वासकासक्षयातुरा ॥ शोथशमनदच्छर्दि-युता वस्त्रमलाचला (?) । नास्थाप्या नानुवास्याश्च वातरोगाढ्ते नरा ॥" इति । कृशग्रहणान्न सर्वाकृश ग्राह्य न चाटकृश तस्य विहितत्वात् । प्रमेहग्रहणात सर्वप्रमेहेषु हितम्, एव जलोदरग्रहणेन अर्शोदरेषु हितम्, उक्तञ्च—"उदरी च प्रमेही च कृशो स्थूलश्च मानव । अवश्य स्थापनीयाश्च नानुवास्या कथञ्चन ॥" (सु० चि० ३५ अ०) इति ॥ ४।५ ॥

अथ निरूहानाह, वातव्याधाविति ।—वातव्याध्यादिषु निरूहणम् आस्थापन-वच्च योजयेत । वातव्याधि आक्षेपकादि । उदावर्त्त उदरापूर । वातासृक् वात-रक्तम । विषमज्वर ऐकाहिकादि । उदरमत जलोदरव्यतिरिक्त सर्वोदर ग्राह्यम । एके—"मूत्रकृच्छ्रोदरानाह मूत्रदोषाश्मरीषु च" इति पठन्ति । तत्र मूत्रदोष मूत्राघात-मपि ज्ञेयम् । अथवा मूत्रग्रहणेन स्त्रीणामपि मूत्रस्तोरशोदोषा अपि गृह्यन्ते,

बृहत्सुन्दरमन्दाग्नि प्रमेहेषु निरूहणम्।
शूलेऽम्लपित्ते हृद्रोगे योजयेद्विधिवद्बुधः॥ ७॥

निरूहस्य स्थानकालावस्थानिर्देश।—

उत्सृष्टानिलविण्मूत्रं स्निग्धस्विन्नमभोजितम्।
मध्याह्ने गृहमध्ये च यथायोग्यं निरूहयेत्॥ ८॥

निरूहदानविधि।—

स्नेहवस्तिविधानेन बुधः कुर्यान्निरूहणम्।
जाते निरूहे च ततो भवेदुत्कटुकासनः॥ ९॥

यदुक्तं—"मूत्रपुरीषदोषान् स्रोत्वा इति निरूहणम्" इति। अत एवार्थे बृहत्सुन्दरग्रहणम्। प्रमेहेषु इत्यत्रापि मधुमेहव्यतिरिक्तपाठे प्रमेहा ग्राह्याः, तस्य निषिद्धत्वात्। विधिवदित्यनेन तन्त्रान्तरोक्तविधान बोद्धव्यम्, तद्यथा—"नात्युच्छ्रित नाप्यतिनीचपाद सपादपीठ शयन प्रशस्तम्। प्रधानबृहत्सारणोपपन्न प्राक्शीर्षक शुक्लपटोत्तरीयम्॥" (च० सि० वस्तिसू०) किञ्च "स्नेह सुनिर्मथ्य ततोऽनु कल्क प्रक्षिप्य वस्तौ मथित खजेन। वस्ति तत सव्यकरे निधाय सुबद्धमुच्छ्राय्य च निम्ननीकम॥ अङ्गुष्ठमध्येन मुख पिधाय नेत्रायसस्थामपनीय वर्त्तिम्। तैलाक्तगात्र कृतमूत्रविट्क नातिक्षुधार्त्त शयने मनुष्यम्॥ समेऽथवेषन्नतशैरसे वा नात्युच्छ्रिते खास्तरणोपपन्ने। सव्येन पार्श्वेन सुख शयान क्षत्वर्जुदेह स्वभुजोपधानम॥ निकुञ्च्य सव्येतरदक्ष सक्थि वाम प्रसार्य्य प्रणयेत्ततस्तम्। स्निग्धे गुदे नेत्रचतुर्थभाग स्निग्ध शनैर्मृदुजुवृष्टवश्यम्॥ आकम्पनाविपनलाघवादीन् पाण्डीगुणास्त्वापि हि दर्शयस्तम्। प्रपीड्य चैकग्रहणेन दत्त नेत्र शनैरव ततोऽपकर्षयेत्॥ तिर्यक् प्रणीते तु न याति धारा गुदे व्रण स्याच्छ्वसिते च नेत्रे। दत्त शनैर्नाशयमेति वस्ति काष्ठ प्रधावत्यतिपीडितश्च॥" (च० सि० वस्तिसू०) इत्यादि॥ ९७॥

एवविध निरूहयेत्, उत्सृष्टेत्यादि।—उत्सृष्ट परित्यक्त वातमूत्रपुरीष येन तम्। स्निग्ध कृतस्नेहनम्। स्विन्न स्वेदितम्। अभोजितमकृतभोजनम्। मध्याह्नेति तत्कालोचितकालत्वख्यापनार्थम्। गृहमध्ये इति वातातपरजोदोषादिनिरासार्थम्॥ ८॥

निरूहदानावधिमाह, स्नेहवस्तीति।—स्नेहवस्तिविधान पूर्वमेवानुवासनाध्याये उक्तम्। बुधयहण निरूहदानेऽतिकुशलत्वख्यापनार्थम्। निरूहदानानन्तरं

तिष्ठेन्मुहूर्त्तमात्रन्तु निरूहागमनेच्छया।
अनायाते मुहूर्त्तेतु निरूहं शोधनैर्हरेत्॥
निरूहैरेव मतिमान् क्षारमूत्राम्लसैन्धवैः॥ १०॥

सम्यक् निरूढस्य लक्षणम्।—

यस्य क्रमेण गच्छन्ति विट्पित्तकफवायवः।
लाघवञ्चोपजायेत सुनिरूढं तमादिशेत्॥ ११॥

असम्यक् निरूढस्य लक्षणम्।—

यस्य स्याद्स्तिरल्पाल्प-वेगो हीनमलानिलः।
मूर्च्छात्तिजाड्यारुचिमान् दुर्निरूढं तमादिशेत्॥ १२॥

किं कर्त्तव्यम्? इत्यत आह, जाते इति।— उत्कटकासन जानुस्थित मुहूर्तं घटिकाद्वयपर्य्यन्तम्। अनायाते निरूह शोधनैर्निरूहैर्हरेत्, शोधनानरूहाः क्षारादिभि कर्त्तव्या। यदा मुहूर्तादुपरि अनायात निरूह स्यात्, तदा शोधनैर्निरूहै कृत्वा आहरत् क्षारमूत्राम्लसैन्धवैर्निरूहैरिति सम्बन्ध। अनायातस्य व्यापत्तिरुक्ता चक्रदत्ते—"अशुद्धस्य मलोन्मार्ग स्नेहो नैति यदा पुन। तदाऽङ्गसदनाध्मान शूना श्वासश्च जायत॥ पक्वाशयगुरुत्वञ्च तत्र दद्यान्निरूहणम्। तीक्ष्ण तीक्ष्णौषधैरेव सिद्धाप्यनुवासनम॥" (सु० चि० ३७ अ०) इति॥ ९।१०॥

अथ सुनिरूढलक्षणमाह, यस्येति।—यस्य क्रमेण तत्कालरोगेऽग्निमूव (?) पुरीषपित्तकफवायव गच्छन्ति लाघवञ्चोपजायते सुनिरूढ तमादिशत्, उक्तञ्च डल्हणेन—"प्रस्रष्टविण्मूत्रमलोरुवह्न्यास्यलाघवान। रोगोपशान्ति प्रकृतिस्थता च बलञ्च तत स्यात सुनिरूढलिङ्गम्॥" (च० सि० कल्पना०) इति। सुनिरूढनिर्व्यादिना चैकादिप्रकृतिनिरूहदानविषयमुक्तम, उक्तञ्च—"एकीऽपकर्षत्यनल स्वमार्गात् पित्त द्वितीयस्तु कफ तृतीय" (च० सि० वस्तिसू०) इत्यादि॥११॥

अथ दुर्निरूढलक्षणमाह यस्येति।—अल्पाल्पवेग इति—वस्तिदानेन स्वल्पद्रवाणामल्प प्रवेशनविषय, उक्तञ्च—"दत्त अनेनाशयमेति वस्ति करण प्रधावत्यातपीडितञ्च" (च० सि० वस्तिसू०) इति। एतेन, तूर्णमवस्थितमिति (?)। हीनमल इति—हीनमलो वस्तिरित्यर्थ, न पुरीषादिनिर्गम, यत,—"अल्पाल्पवेगो

निरूहस्य अनुवासनवत देयतानिर्देश ।—

अनेन विधिना युञ्जान्निरूह वस्तिदानवत् ।
द्वितीय वा तृतीय वा चतुर्थं वा यथोचितम् ॥ १३ ॥

निरूढे दोषभेदेन भोजनादिविधि ।—

पित्तश्लेष्मानिलाविष्ट क्षीरयूषरसै क्रमात् ।
निरूढं भोजयित्वा च ततस्त्वमनुवासयेत् ॥ १४ ॥

विड्भात-हीनो हीननिरूहण । मूर्च्छाकण्डूकफप्रायो महावेगोऽतिशब्दित ॥" इति। मूर्च्छात्तिजाड्यान्वितान् इति—मूर्च्छात्तिस्थाने मूत्रावर्त्तेति पाठान्तरम। जाड्य जडता कफप्रायेत्यभिप्राय । केचिदत्रास्थापनस्नेहवस्त्यो सम्यग्दानलक्षणं पठन्ति, तद्यथा—"विविक्तना मनस्तुष्टि स्निग्धता व्याधिनिग्रह । आस्थापन-स्नेहवस्त्या सम्यग्दाने तु लक्षणम् ॥" (सु० चि० ३८ अ०) इति। विविक्तता मनस्तुष्टि । सुगमम् ॥ १२ ॥

निरूहस्य वस्तिदानवद्दयतामाह, अनेनेति।—अनेन पूर्वोक्तेन विधिना निरूह वस्तिदानवत् वस्तिदानतुल्यम्। वा यद्यपि प्रथमम् एक, पश्चाद्द्वितीय, तदनन्तर तृतीय चतुर्थञ्च, एतेन वस्तिपुटक कथितमिति भाव । यतय वा यथोचितमिति—यथार्हमिति। ननु तृतीयादिकपुट लिखितम, यथा—"स्निग्धोष्ण एक प्रथमे निरूहो द्वौ स्वादुशीतौ मधुमा च पित्ते। वस समुद्रा कटुकाम्ल-सौम्या कफे निरूहा न पर विधेया ॥" (च० सि० वस्तिसूत्री०) इति। नैष, निषेधो बहुपुरुषविषयतया प्रायिक, चतुर्थपुटदानन्तु क्वचिदपि क्रूरकोष्ठ बलौघेषि बहुदोषे पुरुषे तन कृता विरोध ? कश्चिदत्रास्य श्लोक पठन्ति—"सस्नेह एक प्रथमे पित्ते द्वौ मधुरौ सह। कषायकटुसूत्राढ्या कफे क्षीणास्त्रयो हिता ॥" अस्यार्थ पूर्वमेव प्रतिपत्तौ दर्शित नैनात्र कैरपि पठित ॥१३॥

अथ भोजनक्रममाह, पित्तेति।—पित्तादीनामेव क्षीरयूषरसै सह भोजन कार्य्यम्। क्रमादिति अनुक्रमेणैव, अनुक्रमो यथा—पित्ताविष्ट निरूढ क्षीरौदन भोजयित्वा पश्चादनुवासयेत, बृंहणार्थमिति भाव । श्लेष्माविष्ट यूषौदन भोजयित्वा पश्चादनुवासन देयम। अनिलाविष्ट मासरसौदन भोजयित्वा अनुवासयेदिति पदार्थ, उक्तञ्च—"प्रत्यागते कोष्णजलावसिक्त स्नात्वन्नमद्यात्तनुना रसेन। जीर्णे च सायं लघु चाल्पमात्र भुक्तेऽनुवास्य परिवृंहणार्थम् ॥" (च० सि० वस्तिसूत्री०) इति ॥ १४ ॥

सुकुमारादौ तीक्ष्णवस्तिदाने दोषनिर्देश ।—

सुकुमारस्य वृद्धस्य बालस्य च मृदुर्हितः।
वस्तिस्तीक्ष्णः प्रयुक्तस्तु तेषां हन्याद्बलायुषी ॥ १५ ॥

वस्तिदानक्रम ।—

दद्यादुत्क्लेशनं पूर्वं मध्ये दोषहरं ततः।
पश्चात् संशमनीयञ्च दद्याद्बस्तिं विचक्षणः ॥ १६ ॥

उत्क्लेशनवस्ति ।—

एरण्डबीज मधुकं पिप्पली सैन्धवं वचा।
त्रिवृषाफलकल्कश्च वस्तिरुत्क्लेशनः स्मृतः ॥ १७ ॥

दोषहरवस्ति ।—

शताह्वा मधुकं बिल्व कौटज फलमेव च।
सक्षाङ्गिकः सगोमूत्रो वस्तिर्दोषहरो मतः ॥ १८ ॥

शमनवस्ति ।—

प्रियङ्गुर्मधुकं मुस्त तथैव च रसाञ्जनम्।
सत्तोये शस्यते वस्तिर्दोषाणां शमनः स्मृतः ॥ ॥ १९ ॥

इदानीं बालवृद्धयोर्मृदुवस्तिमाह, सुकुमारस्येति।—सुकुमारादीनां मृदुवस्तिर्हितः, तु पुनः तीक्ष्णो वस्तिः प्रयुक्तः तेषां बलायुषी हन्यात्। तत्रान्तरे विशेषः, "विशेषात् सुकुमाराणां हीन एव क्रमो हितः। मृदुर्वस्तिः प्रयोक्तव्यो विशेषात् बालवृद्धयोः ॥" (सु० चि० ३८ अ०) इति ॥ १५ ॥

इदानीं वस्तीनां दानक्रममाह, दद्यादिति।—उत्क्लेशन दोषाणाम्। दोषहर विदोषघ्नम्। शमन दोषाणां समीकरणाच्छमनम। शेष सुगमम् ॥ १६ ॥

अथ तेषां स्वरूपाण्याह, एरण्डेति।—अयमुत्क्लेशनसंज्ञो वस्तिः। शेष सुगमम् ॥ १७ ॥

अथ तेषां दोषहरमाह, शताह्वेति।—सुगमम् ॥ १८ ॥

शमनवस्तिमाह, प्रियङ्गुरिति।—अथ दोषशमनो वस्तिः। प्रियङ्गु कान्ता। रसाञ्जनमत्र रसक्रियासाधनद्रव्यविशेषः, तदभावे दार्वीक्वाथसमुद्भव योज्यम् ॥ १९ ॥

शोधनवस्ति ।—

शोधनद्रव्यनिःक्वाथैस्तत्कल्कैः स्नेहसैन्धवैः ।
युक्त्या खजेन मथिता वस्तयः शोधनाः स्मृताः ॥ २० ॥

लेखनवस्ति ।—

त्रिफलाक्वाथगोमूत्र-क्षौद्रक्षारसमायुताः ।
ऊषकादिप्रतीवापा वस्तयो लेखनाः स्मृताः ॥ २१ ॥

बृंहणवस्ति ।—

बृंहणद्रव्यनिष्क्वाथाः कल्कैर्मधुरकैर्युताः ।
सर्पिर्मांसरसोपेता वस्तयो बृंहणाः स्मृताः ॥ २२ ॥

पिच्छिलवस्ति ।—

बदर्य्यैरावती-श्लेलु-शाल्मली-धन्वनागराः ।
क्षीरसिद्धाः क्षौद्रयुक्ता नाम्ना पिच्छिलसञ्ज्ञिताः ॥ २३ ॥
अजोरभ्रैणरुधिरैर्युक्ता देया विचक्षणैः ।
मात्रा पिच्छिलवस्तीनां पलैर्द्वादशभिर्मता ॥ २४ ॥

शोधनवस्तिमाह, शोधनेति ।—शोधनद्रव्याणि निकुम्भादीनि प्रसिद्धानि, तानि "निकुम्भ त्रिफला-गवाक्षी-स्नुक् शङ्खिनी नीलिनी-तिल्वकानि । अम्लाक-कम्पिल्लक-क्षीरद्रुमा दुग्धञ्च मूत्रञ्च विरेचनानि ॥" (वा० सू० १५ अ०) इत्यादीनि ।* "खजेन" इत्यत्र "चषेण" इति पाठ साधु ॥२०॥

लेखनवस्तिमाह, त्रिफलेति ।—ऊषकादि प्रागुक्त, यथा—"ऊषक-सैन्धवग्निलाजतुकाशीग्रहयष्टिङ्गुनि तुल्यकक्षेति" (सु० सू० ३८ अ०)। शेष सुगमम् ॥ २१ ॥

अथ बृंहणवस्तीनाह, बृंहणेति ।—बृंहणानि काकोली-क्षीरकाकोली-जीवकर्षभक-मेदा-महामेदाप्रभृतीनि । मधुरकैरिति—द्राक्षा-खर्जूर-वातामादिभि । शेष सुबोधम् ॥ २२ ॥

पिच्छिलवस्तिमाह, बदरीति ।—बदरी कोलमिति प्रसिद्धम् । ऐरावती नागबला इति भानुमती । श्लेलु श्लेष्मातक । शाल्मली प्रसिद्धा । धन्वनागरो

---

*खजेन इति पाठ एव सुश्रुतादिसम्मत., खजेन दर्व्या इत्यर्थः ।

निरूहोपयोगिद्रव्याणां परिमाणविधिं ।—

दत्त्वाऽऽढ्यौ सैन्धवस्याद्यं मधुनः प्रसृतिद्वयम्।
विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृतित्रयम् ॥ २५ ॥
एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत्।
सम्मूर्च्छिते कषायन्तु चतुःप्रसृतिसम्मितम् ॥
क्षिप्त्वा विमथ्य दद्याच्च निरूहं कुशलो भिषक् ॥ २६ ॥

धन्वदेशज नागरमुत्तम्। धन्वनागरस्थाने "धन्वनाडुरा" इति पाठः, * धन्वयासनाडुरा। अज छाग। उरभ्रो मेष। एण कृष्णमृग। एके सुश्रुताद्यापिनोऽत्र पठन्ति—'वाराहनाहिषौरभ्र-वैडालैणयकौक्कटम्। सद्यस्क-मृगाज वा दैव पिच्छिलबस्तिषु ॥" (सु० चि० ३८ अ०) इति, व्याख्यानयन्ति च। क्षेपकोऽयमिति मत्यमानत्वात् न सम्यक् लिखितम्। मात्रा पिच्छिलबस्तीनामिति हादशपलैरेवात्र पूर्वोक्ता होनमात्रा निरूहता विशेषेयग्रहणात् ॥ २३।२४ ॥

अथ निरूहार्थ द्रव्याणां परिमाणपूर्वकं विधानमाह, दत्त्वेति।—अत्र सैन्धवपरिमाणन्तु उक्तमात्रायां न गणितम् अत एव "आद्यौ" इति ग्रहणं कृतम्। उक्तमात्रा विंशतिपलैरेव, पूर्वमुक्त यथा—"निरूहस्य प्रमाणन्तु प्रस्थ पादोत्तर परम्। मध्यम प्रस्थपृष्टि होनन्तु कुडवास्त्रय ॥" (शार्ङ्ग० उत्तर० ६ अ०) इति। चक्रदत्ते तु—"दत्त्वाऽऽढ्यौ सैन्धवस्याद्यौ मधुनः प्रसृतिद्वयम्। विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृतित्रयम् ॥ एकीभूते ततः स्नेहे कल्कस्य प्रसृतं क्षिपेत्। सम्मूर्च्छितं कषायं तं चतुःप्रसृतिसम्मितम् ॥ † क्षिप्त्वा विमथ्य दद्याच्च निरूहं कुशलो भिषक्। वाते चतुःपलं क्षौद्रं दद्यात् स्नेहस्य षट्पलम् ॥ पित्ते चतुष्पलं क्षौद्रं स्नेहं दद्यात् पलत्रयम्। कफे च षट्पलं क्षौद्रं क्षिपेत् स्नेहं चतुःपलम् ॥ वितरच्च यथाऽऽवापमन्ते द्विप्रसृतोत्क्षितम्। एव प्रकल्पितो बस्तिर्दोषघ्नः प्रसृतो भवेत् ॥"

---

* "धन्वन धामनिरिति प्रसिद्धस्तरु। बदर्यादीनामङ्कुरा अभिनवपल्लवा" इति शिवदासव्याख्या।

† "क्षिप्त्वा" इत्यारभ्य "स्नेहं चतुष्पलम्" इत्यन्त यावत् पाठ चक्रदत्ते सुश्रुते वा नास्ति।

निरूह दोषभेदेन चौद्रस्नेहयोर्मानभेद ।—

वाते चतुष्पलं चौद्रं दद्यात् स्नेहस्य षट्पलम् ।
पित्ते चतुष्पलं चौद्रं स्नेह दद्यात् पलत्रयम् ॥
कफे च षट्पलं चौद्रं क्षिपेत् स्नेह चतुष्पलम् ॥ २७ ॥

माधुतैलिकवस्ति ।—

एरण्डक्काथतुल्याशं मधु तैलं पलाशकम् ।
शतपुष्पापलार्द्धेन सैन्धवार्द्धेन संयुतम् ॥ २८ ॥
मधुतैलकसञ्ज्ञोऽय वस्तिः खर्जाविलोडितः ।
मेदोगुल्मकृमिप्लीह-मलोदावर्त्तनाशनः ॥
बलवर्णकरश्चैव वृष्यो दीपनलक्षणः ॥ २९ ॥

यापनावस्ति ।—

चौद्राज्य-क्षीर-तैलानां प्रस्तं प्रस्तं भवेत् ।
त्रुषासैन्धवाच्चाशो वस्तिः स्यात् यापनः परः ॥ ३० ॥

(सु० चि० ३८ अ०) इति । एतदपि पञ्चाङ्गमानयुक्त्या समौचौन दार्शतम्, तथा हि—"मधुस्नेहनकल्काख्य कषायावापत क्रमात् । त्रीण षट् दे दश त्रीण पलान्यनिलरोगिणाम् ॥ पित्ते चत्वारि चत्वारि दे क्षिपेच्च चतुष्टयम् । षट् त्रीणि दे दश त्रीणि कफ चापि निरूहणम् ॥" इति ॥ २५।२६ ॥

वातादीना केवलमधुस्नेहयोर्वर्ज्यमानमाह, वात चतु.पल चौद्रमित्यादि ।—सुगमम् ॥ २७ ॥

माधुतैलिकसञ्ज्ञ वस्तिविधानमाह, एरण्डेति ।—मधु तैल पलाशकमित्यस्य स्थाने मधुतैलपलाष्टकमित्यके पठन्ति, तत्र, उक्तञ्च तन्त्रान्तरे—"मधुतैल समे ग्राह्य क्वाथयेरण्डमूलज । पलार्द्ध शतपुष्पाया ततोऽर्द्ध सैन्धवस्य च ॥ फलनैकत्र युक्त खर्जेन च विलोडित । दैव सुखोष्ण भिषजा माधुतैलिकसञ्ज्ञक ॥" (सु० चि० ३८ अ०) इति । मलादावर्त्तनाशन इत्यत्र उदरादावर्त्तनाशन इति पाठः । अथवैव तन्त्रान्तरे * अर्द्धमात्रिकनिरूह कथित, स तु तत्रैव ज्ञातव्य ॥ २८।२९ ॥

अथ यापनवस्तिमाह, चौद्रेत्यादि ।—त्रुषा विषुषा ॥ ३० ॥

---

* चक्रोक्तार्द्धमात्रिकवस्तिना सह अस्य किमपि सादृश्य नास्ति ।

युक्तरथवस्ति ।—

एरण्डमूलनिष्क्वाथो मधु तैलं ससैन्धवम् ।
एष युक्तरथो वस्तिः सवचापिप्पलीफलः ॥ ३१ ॥

सिद्धवस्ति ।—

पञ्चमूलस्य निष्क्वाथस्तैल मागधिका मधु ।
ससैन्धवः समधुकः सिद्धवस्तिरिति स्मृतः ॥ ३२ ॥

निरूहे पथ्यापथ्यविधि ।—

स्नानमुष्णोदके कुर्यात् दिवा स्वप्नमजीर्णताम् ।
वर्जयेदपरं सर्वमाचरेत् स्नेहवस्तिवत् ॥ ३३ ॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां उत्तरखण्डे निरूहवस्तिविधिर्नाम षष्ठोऽध्यायः ॥ ६ ॥

अथ युक्तरथवस्तिमाह, एरण्डेति ।—क्वाथादीनां परिमाणन्तु मधुतैलिकवस्तिवत् ज्ञेयं तस्यान्तर्गतित्वात्, 'यदुक्तं मधुतैलेन क्वाथं सरससैन्धवं । फलपिप्पलीसयुक्तो वस्तिर्युक्तरथः स्मृतः ॥" इति । अत्रापि पूर्वोक्तमेव । फलमत्र मदनफलम् इति युक्तरथः ॥ ३१ ॥

अथ सिद्धवस्तिमाह, पञ्चमूलस्येति ।—सुगमम् । इति सिद्धवस्तिनिरूहः ॥ ३२ ॥

अथ त्याज्यान्याह, स्नानमिति ।—स्नेहवस्तिवदिति—स्नेहवस्तिविधौ यदाचरितं तत् सर्वम् आचरेत्, तत् तत्रैव ज्ञातव्यम् ॥ ३३ ॥

इति श्रीवासुदेवान्वयप्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरसंहिताटीकायां दीपिकायामुत्तरखण्डे निरूहवस्तिविधिर्नाम षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः ।

अथ उत्तरवस्तिविधिः ।—

उत्तरवस्त्यर्थं नेत्रस्वरूपम् ।—

अतः परं प्रवक्ष्यामि वस्तिमुत्तरसंज्ञितम् ।
द्वादशाङ्गुलकं नेत्रं मध्ये च कृतकर्णिकम् ॥
मालतीपुष्पवृन्ताभं छिद्रं सर्षपसन्निभम् ॥ १ ॥

वयोभेदेन स्नेहस्य मात्रानिर्देशः ।—

पञ्चविंशतिवर्षाणामधो मात्रा द्विकार्षिकी ।
तदूर्ध्वं पलमात्रा च स्नेहस्योक्ता भिषग्वरैः ॥ २ ॥

पारिशेष्यादुत्तरवस्तिमाह, अत इति ।—अतः परं वस्तिनिरूहयोरनन्तरम् उत्तरसंज्ञितं वस्तिं वक्ष्यामि इति । उत्तरवस्तिनेत्रस्वरूपमाह, मध्ये च कृतकर्णिकमिति—मध्ये षडङ्गुलोपरि कर्णिका मेखलाकारा मुद्रिका, अत एव मूत्रमार्गे षडङ्गुलं नेत्रं प्रवेशयेदित्युक्तमस्मे । यत्तच्छिद्रमाह—यत्तच्छिद्रन्तु मालतीपुष्पवृन्ताभं सर्षपसन्निभं सर्षपाकारं निर्गमनच्छिद्रमित्यर्थः, कार्यम् । केचित् "सर्षपनिर्गमम्" (सु० चि० ३७ अ०) इति पाठं पठन्ति । "सिद्धार्थकप्रवेशाग्रम्" (वा० सू० १९ अ०) इति तन्त्रान्तरे । ननु क्वचिदपि चतुरंशाङ्गुलमपि पठितं तत्र यथा—"चतुरंशाङ्गुलं नेत्रं तत्र कार्यं विजानता । मालतीपुष्पवृन्ताभं कर्तव्यं छिद्रमेव च ॥" इति । तत्र कथमत्र द्वादशाङ्गुलम् ? उच्यते, कर्णिकार्थन्तु नेत्रं षडङ्गुलमेव सर्वसम्मतं शेषन्तु चर्मपुटकस्य समौचीनग्रथनार्थं कथितमित्यदोषः । चरकादौ तु द्वादशाङ्गुलमेवोक्तत्वात्, अथवा—"मेढ्रायामसमं केचिदिच्छन्ति बुधास्तद्विद" (सु० चि० ३७ अ०) इत्यादि मतमालोच्य चरकमतमेव शार्ङ्गधरेण स्वीकृतमित्यत्र विस्तरेण ॥ १ ॥

स्नेहमात्रामाह पञ्चविंशतीति।—पञ्चविंशतिवर्षाणामधः पञ्चविंशतिवर्षादधोऽवाक् चतुर्विंशतिपर्यन्ते मात्रा स्नेहस्य द्विकार्षिकी । तदूर्ध्वं पञ्चविंशादूर्ध्वं पलमात्रा । भिषग्वरैरिति बहुत्वेन दोषदेशदेहकालानलाद्यपेक्ष्य न्यूनाधिकाऽपि मात्रा योज्या सम्मतापदर्शनात्, अत एवाह—"पञ्चविंशतिवर्षोनमधो (?) मात्रा द्विकार्षिकी" इति क्वचित् पाठोऽपि ॥ २ ॥

उत्तरवस्तिप्रयोगविधि ।—

अथास्थापनशुद्धस्य तप्तस्य स्नानभोजनैः ।
स्थितस्य जानुमात्रे च पीठेऽन्विष्य शलाकया ॥ ३ ॥
स्निग्धया मेढ्रमार्गे च ततो नेत्रं नियोजयेत् ।
शनैः शनैर्घृताभ्यक्त मेढ्रेरन्ध्रेऽङ्गुलानि षट् ॥ ४ ॥
ततोऽवपीडयेद्बस्तिं शनैर्नेत्रञ्च निर्हरेत् ।
ततः प्रत्यागते स्नेहे स्नेहवस्तिक्रमो हित ॥ ५ ॥

अथोत्तरवस्तेर्विधानमाह, अथेति।—अथशब्द आनन्तर्ये। आस्थापन कषायवस्त, कषायैर्दोषनाशनत्वात निरूहमेवास्थापनमित्येके। कस्य? स्नानभोजने तप्तस्य, भोजनग्रहणेन घृतक्षीरमांसादीना ग्रहणम्, उक्तञ्च—"अथातरमुपस्निग्ध स्विन्न प्राग्गलिताशयम्। यथान्न सघृतक्षार पीतवन्त यथाबलम ॥" इत्यादि। जानुमात्रे पीठे इति—जानुपरिमाणे आसने, उन्नतया वोढव्यम, उक्तञ्च—"निषण्णमा-जानुसमे पीठे" (सु० चि० २७ अ०) इत्यादि। अन्विष्य शलाकया इति मेढ्रमार्गे शलाकया अन्विष्य अन्वेषण कृत्वा, किविशिष्टया शलाकया? स्निग्धया श्लक्ष्णया, अथवा घृताभ्यङ्गेन। ततो नेत्र नियोजयेत् इति—नेत्र नलिका उत्तरवस्तिसज्ञस्य। "अथास्थापनशुद्धस्य तप्तस्य स्नानभोजने" अत्राये—'स्नेहक्षारासवीर्यस्य तैलेनोषण युक्तित। तत सम स्थापयित्वा नालनस्य प्रदर्शितम ॥" इत्येके पठन्ति व्याख्यानयन्ति च प्राचीनपुस्तके न दृष्ट। अथ यन्त्रपीडनमाह, नेत्रं यन्त्र घृताभ्यक्त षडङ्गुल मेढ्रेरन्ध्रे मेढ्रमार्गे नियोजयेत् प्रवेशयेत्, वैद्य इति शेष, अत एवोक्त प्राक् "मध्य च क्षतकर्णिकम्" इति, तेन कर्णिकापर्यन्त सास्नग्ध मेढ्रमार्गे प्रवशयेदित्यर्थ। ततोऽनन्तर प्रवेशानन्तर बस्ति स्नेहादिसभृत चर्मपुटक शनैर्यथा स्यात्तथा अवपीडयेत् यथा स्नेहोऽन्त प्रविष्टो भवति। नेत्रञ्च निर्हरेदिति—पुन शनैर्यथा स्यात्तथा नेत्र निर्हरेत् मूत्रमार्गादित्यर्थ। स्नेहे प्रत्यागते स्नेहवस्तिक्रम हित। "स्नेहवस्तिक्रमो हित" इत्यस्य स्थाने—"अपराह्णे विचक्षण। पयसा भोजयेद्रोगी यूषैर्मासरसेन वा ॥" इति केचित्, तदपि युक्त तन्त्रान्तरसवादात। "स्नेहवस्तिक्रमो हित" इति, तत्र यत्यकर्तुरयमाशय,—तत्र सम्यग्दृतस्य लिङ्गानि भवन्ति, व्यापदश्च ता,। ततस्यापक्रमस्य कर्त्तव्य, उक्तञ्च—"सम्यक् दृतस्य लिङ्गानि व्यापद क्रम एव च। वस्तेरुत्तरसज्ञस्य समान, स्नेहवस्तिना ॥" (सु० चि० २७ अ०) इति ॥ ३—५ ॥

स्त्रीणां नेत्रस्वरूपम्।—

स्त्रीणां कनिष्ठिकास्थूलं नेत्रं कुर्य्याद्दशाङ्गुलम्।
मुद्गप्रवेशयोग्यञ्च योन्यन्तश्चतुरङ्गुलम्॥
द्व्यङ्गुलं मूत्रमार्गे च सूक्ष्मं नेत्रं नियोजयेत्॥ ६॥

बालानां नेत्रस्वरूपम्।—

मूत्रकृच्छ्रविकारेषु बालानामेकमङ्गुलम्।
शनैर्निष्कम्पमाधेयं सूक्ष्मनेत्रं विचक्षणैः॥ ७॥

स्त्रीबालयोर्देयस्नेहस्य मात्रानिर्देशः।—

योनिमार्गेषु नारीणां स्नेहमात्रा द्विपालिकी।
मूत्रमार्गे पलोन्मानाः बालानाञ्च द्विकार्षिकी॥ ८॥

स्नेहस्य बालप्रयोगविधिः।—

उत्तानायै स्त्रियै दद्यादूर्ध्वजान्वै विचक्षणः॥ ९॥

पुंसामुत्तरबस्तिनेत्रमुक्त्वा स्त्रीणामुत्तरबस्तिमाह स्त्रीणामिति।—कनिष्ठिका स्त्रियाश्च। दशाङ्गुलमिति दैर्घ्येण। मुद्गप्रवेशयोग्यं रन्ध्रमिति शेषः नेत्रं मुद्गवाहिनलिकाच्छिद्रमित्यर्थः। योन्यन्तश्चतुरङ्गुलमिति—तच्च नेत्रमपत्यमार्गे चतुरङ्गुलप्रमाणमन्तः प्रवेशयेदित्यर्थः, 'उक्तञ्च—"मूत्रस्रोतः परीणाहं मुद्गवाहि दशाङ्गुलम्। तासामपत्यमार्गे तु निदध्याच्चतुरङ्गुलम्॥" (सु० चि० ३७ अ०) इति। द्व्यङ्गुलं मूत्रमार्गे च इति—स्त्रीणामेव मूत्रमार्गे ज्ञेयं तत्र द्व्यङ्गुलनेत्रं प्रवेशयेदिति भावः। तच्च नेत्रं सूक्ष्मकाश्यपं यथा पुरुषमेढ्रमार्गार्थं मालतीपुष्पदन्ताभं कथितं तदेवापि ज्ञेयम्॥६॥

बालानामपि नेत्रपरिमाणमाह, मूत्रकृच्छ्रेति।—मूत्रकृच्छ्रविकारेषु इति पदं पूर्वेण सम्बध्नीयम्। बालानामपि वा मूत्रकृच्छ्रविकारेऽपि। बाल "षोडशवर्षपर्य्यन्तो बालः"। एकमङ्गुलनेत्रेण सम्बन्धनीयम्। सूक्ष्मनेत्रमित्यनेन मालतीपुष्पदन्ताकारत्वात् सूक्ष्मत्वं ज्ञेयम्॥ ७॥

यथापत्यमूत्रमार्गयोर्विषयत्वात् स्नेहपरिमाणमाह, योनिमार्गेष्विति।—योन्यादिमार्गत्रयस्य स्त्रीणामेव। तु पुनर्बालानां द्विकर्षप्रमाणा इति॥ ८॥

अथ स्त्रीणामुत्तरबस्तिः कथं योज्य? इत्याह, उत्तानायै इति।—विचक्षणस्त्वनेनमाहित इति वा पाठः, तत्रापि स एवार्थः। अस्यायं—"अनेन विधिना दद्यात् बालान् वान् चतुरोऽपि वा" (सु० चि० ३७ अ०) इति पठन्ति व्याख्यानयन्ति

अप्रत्यागच्छति भिषक् वस्तावुत्तरसञ्ज्ञिते।
भूयो वस्तिं निदध्याच्च संयुक्तं शोधनैर्गणैः॥ १०॥
फलवर्त्तिं निदध्याद्वा योनिमार्गे दृढा भिषक्।
सूत्रे (१) विनिर्मितां स्निग्धां शोधनद्रव्ययुतां॥ ११॥

वस्तिदाहे प्रतीकार।—

दह्यमाने तथा वस्तौ दद्याद्वस्तिं विशारदः।
क्षारवृक्षकषायेण पयसा शीतलेन वा॥ १२॥

उत्तरवस्तेर्गुण।—

वस्तिं शुक्रकृतं पुंसां स्त्रीणामार्त्तवजा रुजम्।
हन्यादुत्तरवस्तिस्तु नोचितो मेहिनां क्वचित्॥ १३॥

व। अनिर्गमे पुनर्वास्तेर्यं इत्यत आह—उत्तरसञ्ज्ञिते वस्तौ अप्रत्यागच्छति सति भूय पुनरपि वस्तिमुत्तरसञ्ज्ञं निदध्यात् किम्भूतम्? शोधनैर्गणैः संयुक्तम्, शोधनगणौ विरेचनगणः। वा अथवा फलवर्त्तिं निदध्यात्, क्व? योनिमार्गे अपानमार्गे क्रियताम्। दृढात् अधिष्ठितात् अत एव सूत्रेर्विनिर्मिताम् (१), तथा स्निग्धां तथा शोधनद्रव्ययुतां शोधनद्रव्यकल्कसंयुतेत्यर्थः। वस्तिस्तु अयं दह्यमाने ज्ञातव्यः। अध्याये केचिदधिकं पाठं पठन्ति, तत् यथा—"पयोवस्तिं निदध्यात्तु प्रोक्तं गुल्मचिकित्सिते। प्रवेशयेद्वा मतिमान् वस्तिद्वारमधोक्षजम्॥ षोडशैरङ्गुलैर्नाभेर्बलेनोत्तरमुष्टिना। आरम्भवत्सु पर्वसु निर्गुण्ड्या स्वरसेषु च॥ कुल्थाक्षालूबदिष्टेषु वर्त्तीष्वपि सन्धवा। सूत्रेणासर्षपसमा प्रवेश्या वर्षसा तु॥ वस्तेरागमनार्थाय तां निदध्याच्छलाकया॥" (सु० चि० ३७ अ०) इत्यादिपाठा बहुपुस्तकेष्वदर्शनान्न व्याख्यात॥ ९—११॥

अथ वस्तिदाहचिकित्सामाह, दह्यमाने इति।—द्रव्यस्थानिर्गमेनाद्यस्तौ सूक्ष्माग्नये दह्यमाने सति विशारदो वैद्यकशास्त्रक्रियाकुशल क्षारवृक्षकषायेण वस्तिं दद्यात्, क्षारवृक्षा वटोडम्बरादय। एके क्षारवृक्ष राजादनमाहु राजयोति लोके। वा अथवा शीतलेन पयसा वस्तिं दद्यात् पयोऽय पानोपयोगाहु शीतलेति—शीतलद्रव्यसृक्कादियुक्तेन शीतलेन इत्यर्थ, यदुक्त तन्त्रान्तरे—"शर्करामधुमिश्रेण शीतेन सघृतेन वा। दह्यमाने भिषक् वस्तौ पायो वस्तिं प्रदापयेत्॥" (सु० चि० ३७ अ०) इति॥ १२॥

अथानन्तर वस्ते प्रभावपूर्वक निषेधमाह, वस्तिरिति।—पुंसा पुरुषाणा

अनिष्टस्येन उत्तरवस्ति लिङ्गादिनिर्देश ।—

सम्यग्दत्तस्य लिङ्गानि व्यापद क्रम एव च ।
वस्तेरुत्तरसञ्ज्ञस्य समान स्नेहवस्तिना ॥ १४ ॥

फलवर्त्ति स्वरूप प्रयोगविधिश्च ।—

घृताभ्यक्ते गुदे क्षेप्या श्लक्ष्णा स्वाङ्गुष्ठसन्निभा ।
मलप्रवर्त्तनी वर्त्ति फलवर्त्तिश्च सा स्मृता ॥ १५ ॥

इति श्रीदामोदरसूनुना श्रीगाङ्धराचार्येण विरचितायां श्रीगाङ्धरसंहितायाम्
उत्तरखण्डे उत्तरवस्तिविधिनाम सप्तमोऽध्याय ॥ ७ ॥

वस्त्याश्रयिता कुत्र रोगान् स्त्रीणामार्त्तवजा कुत्र असृग्दरादीन् हन्यात । मेढ्रिना प्रमेढ्रिणा नोचित न युक्त, प्रमेढ्रस्य वास्तुगतत्वेऽपि नोचितत्व, यथा अनुवासन कुष्ठप्रमेढ्रिणा निषिद्धम । केचिन्मेढ्रशब्देन मर्म्मनेढ्राहु ॥ १३ ॥

उत्तरवस्ते स्नेहवस्तिसमान गुणदोषानाह समयगिति ।—उत्तरसञ्ज्ञस्य उत्तरवस्ते स्नेहवस्तिना अनुवासनेन समानि लिङ्गानि लक्षणानि तथा व्यापद क्षीणातिमिथ्या-योगजा क्रमश्च उपक्रमश्च समान स्नेहवस्तिना तुल्य इत्यर्थ । तन्त्रान्तरे तु—"दुष्टं शुक्र शोणितञ्चाङ्गनाना पृथोर्द्वक तथ नाभ्रश्च कष्टम । मूत्राघातान मूढदोषान् प्रदद्यात् शोनित्याधि सस्थितिश्चापराया ॥ शुक्रीत्सेक शकरामश्मरीञ्च शूल वस्तौ वङ्क्षणे मेढ्रने च । घोरानन्यान् वास्तजाश्चापि रोगान् हित्वा मेढ्रान् उत्तरो हन्ति वास्त ॥" (सु० चि० ३७ अ०) इति ॥ १४ ॥

अथ पूर्वोक्ता फलवर्त्तिमाह घृताभ्यक्ते इति ।—श्लक्ष्णा कोमला, स्वाङ्गुष्ठसन्निभा आतुराङ्गुष्ठतुल्या स्थूलतया । मल मूत्रपुरीषादिकम , मलशब्देन स्त्रीणामपि रजोदोषादिकम । अपक्वस गै दोषा दुष्टयो फलवर्त्ति स्मृता कथिता ॥१५॥

इति श्रीवाक्यान्वयप्रकाशवैद्यभावविसिद्धात्मजेनाढमल्लेन विरचितायां श्रीगाङ्धर
दीपिकायामुत्तरखण्डे उत्तरवस्तिविधिनाम सप्तमोऽध्याय ॥ ७ ॥

———

अष्टमोऽध्यायः ।

अथ नस्यविधि । (क)—

नस्यस्य निरुक्ति पर्य्यायश्च ।—

नस्य तत् कथ्यते धीरैर्नासाग्राह्यौषधम् ।
नावन नस्यकर्मेति तस्य नामद्वय मतम् ॥ १ ॥

द्विविध नस्य तयो कार्य्यच ।—

नस्यभेदा द्विधा प्रोक्तो रेचन स्नेहनस्तथा ।
रेचनं कर्षणं प्रोक्त स्नेहन बृंहण मतम् ॥ २ ॥

(क) अथ पञ्चकर्मप्रारिप्सोत्प्रथमविधिमध्याय व्याख्यातु प्रतिजानीत—अथेति ।

नस्यस्य निरुक्तिमाह नस्यमिति ।—औषध क्वाथस्नेहादि । नस्यमिति—नासया दीयत इति नस्यम् । तस्य नस्यस्य नामद्वयमुक्त, नावनमेक द्वितीय नस्यमिति ॥ १ ॥

नस्यभेदानाह, नस्येति ।—नासिकया दीयते यत्तत नस्य, तस्य भेदौ द्विप्रकार, एको रेचन द्वितीय स्नेहन, रेचन कर्षण स्नेहन बृंहणम्, उपक्रम्यस्य इत्वात्, उक्तञ्च वाग्भट—'उपक्रम्यत्व हि द्वित्वाद्विधैवोपक्रमो मत । एक सन्तर्पणकृत्व द्वितीयश्चापतर्पण ॥" (वा० सू० १४ अ०) इति । ननु वाग्भटेन त्रिविध नस्य सावधारणमुक्त, तत यथा—"विरेचन बृंहणञ्च शमनञ्च विधाऽपि तत । विरेचन शिर शूल-जाड्यस्तब्धगलग्रह ॥ शोफगण्डकिमिन्यर्बुद-कृष्णापक्ष्मरोपनुत् ॥ बृंहण वातजे शूल सूर्य्यावर्त्ते धरक्षये । नासाऽऽस्यशोषे वाक्सङ्गे क्लैब्यबाधऽवबाहुके ॥ शमन नौलिकाव्यङ्ग-केशदोषाक्षिरागिषु । यथास्व धीमके स्नेहैर्यथास्वञ्च प्रसाधते ॥ कल्पक्वाथादिभिश्चाद्य मधुपट्टासवैरपि ॥ बृंहण धन्वमांसौत्थ-रसाक्षुद्रखपुरैरपि । शमन योजयेत पूर्वं क्षीरेण सलिलेन च ॥" (वा० सू० २० अ०) इति, तत् कथमत्र द्विविधत्वोक्तम् ? उच्यत—शमनस्य बृंहणेऽन्तर्भावात्, उक्तञ्च—"शमन योजयेत पूर्वं क्षीरेण सलिलेन च" (वा० सू० २० अ०) इति । अत एव रविगुप्तादौ पञ्चभेदा, ते यथा—'नस्य शिरोविरेकस्य प्रतिमर्शोऽवपीडनम् । ज्ञेय प्रधमनञ्चैतन्नस्य कर्म तु पञ्चधा ॥" इति । हढबले तु धूमोऽधिकोऽस्ति न च शिरोविरेक इति, तत् यथा—नावनञ्चावपीडश्च धूमपान धूम एव च । प्रतिमर्शश्च विज्ञेयो

नस्यप्रयोगस्य अवस्था कालस्य च।—

कफपित्तानिलध्वंसे पूर्वमध्यापराह्णके।
दिने तु गृह्यते नस्यं रात्रावप्युत्कटे गदे ॥ ३ ॥

नस्यानर्हा।—

नस्यं त्यजेद्भोजनान्ते दुर्दिने चापतर्पिते।
तथा नवप्रतिश्यायी गर्भिणी गरदूषित ॥ ४ ॥

नस्यकर्म तु पञ्चधा॥" (च० सि० विमर्शाध्या०) इति। काश्मीरास्तु षट्प्रकारं पठन्ति, यथा—"अवपीड प्रधमन नस्य रेचनतर्पणम्। प्रतिमर्शश्च धूमश्च नस्यकर्म तु षड्विधम्॥" इति। तेऽप्यवान्तरभावनीया तैस्तैरन्यकृता एवायं स्पष्टतयोक्ता, यथा—शिरोरेचने प्रधमनावपीडनमज्ञे अन्तर्भवति, न तु कषणत्वात् कर्षणेऽन्तर्भूत, प्रतिमर्शनस्यौ तु बृंहणऽन्तर्भूतौ, एवं धूमोऽपि शोधनशमनत्वात् यथास्वान्तर्भावनीय इति सुस्थितमेतत् ॥ २ ॥

नस्यकर्मकालनाह, कफेति।—कफपित्तानिलानां ध्वंसे वृद्धिलक्षणे कोपे, "क्षतुवमु अव रतने' इत्यस्य रूपम्। कुत्र कोप इत्यत आह—दिनस्य पूर्वमध्यापराह्णके, तेनायमर्थ सिद्ध,—दिनस्य पूर्वाह्णे कफकोपे, दिनस्य मध्याह्ने पित्तकोपे दिनस्यापराह्णे वातकोपे इति। अथवा उत्कटे गदे रात्रावपि नस्य देयमिति, उक्तञ्च—'यथादोषोदये काले रोगिणे नावनं भिषक्' इति। अत एव ध्वस्ताद्य अविषयमत्वेन कालो दर्शितस्तत्तत्, तत् यथा—"अरङ्गेमत्तयो स्वस्थे पूर्वाह्णे सम्प्रयोजयेत्। वर्षासु शीतले शीते सायं मध्यन्दिने तथा॥" इति ॥ ३ ॥

नस्य यस्मिन् काले त्याज्य यैश्च त्याज्य तानाह, नस्यमिति।—दुर्दिने मेघच्छन्नेऽह्नि। अपतर्पिते अमन्तर्पिते पुरुषे। मन्तर्पण धातुग्राह्यकरणार्थं तेन धातुबल नस्येन विधेयमिति तात्पर्यार्थ। चक्रारादाम्भट्योक्तास्ते यथा—"योजयेन्न तु नावनम। तोयमद्यगरक्षेद्र-पीतानां पातुमिच्छताम॥ भुक्तभक्ताजिर स्नात स्नातुकामस्रुताक्षणाम। नवपीनसवेगार्त-सूतिकाश्वासकासिनाम॥ यदाना दत्तबस्तीना तथाऽनार्त्तवदिने। अन्यत्रात्ययिकाद्व्याधे—" (वा० सू० २० अ०) इति। नवप्रतिश्यायीति—नवत्व द्विविध निदानभेदेन एक सद्यानवक द्वितीय दोषचयपूर्वकम तत्राद्य यथा—"नाना-प्रकृत्या अरजोऽनलाद्या धूमो रज, शीतमतिव्यवाय.। सन्धारण मूत्रपुरीषयोश्च सद्यः

अजीर्णी दत्तवस्तिश्च पीतस्नेहोदकासवः।
क्षुद्व शोकाभिभूतश्च तृषार्त्तो बृद्धबालकौ॥
वेगावरोधी स्नातश्च स्नातुकामश्च वर्जयेत्॥ ५॥

नस्यार्ह-वयोनिर्देश।—

अष्टवर्षस्य बालस्य नस्यकर्म समाचरेत्।
अप्रौतिवर्षाद्वृद्धस्य नावन नैव दीयते॥ ६॥

वैरेचननस्यस्य द्रव्यनिर्देश।—

अथ वैरेचन नस्य ग्राह्य तैले सुतीक्ष्णकैः।
तीक्ष्णभेषजसिद्धैर्वा स्नेहे क्वाथे रसैस्तथा॥ ७॥

प्रतिश्यायनिदानसूत्रम्॥" (सु० उ० २४ अ०) इति। द्वितीया यथा—"तत्र गता मूर्द्धनि नासतादत्र पृथक् समस्तास्त्रय एव दोषाः। प्रकोप्यमाणा विविधैः प्रकोपैर्नृणां प्रतिश्यायकरा भवन्ति हि॥" (सु० उ० २४ अ०) इति। तेन सप्तानिदानजात प्रतिश्याय सोऽपि नव प्रतिश्याय इति केचित्। अन्य त्वनाहु,—"वातपत्तभेदेन प्रतिश्यायस्य नवपरायणे क्वाथते तेनापि य वातसज्ञक प्रतिश्याय सोऽपि तदुपचन नस्यविषये त्याज्य न तु पक्व इति भाव"। गर कृत्रिम विष तेन व्याप्त, केवलविषग्राह्यत्वपीडस्योक्तत्वात, उक्तञ्च—"श्वेतोविकारविषाभिपन्नाना चूर्ण षडङ्गादिमुखेन नाड्या देयम"। अन्यच्च—"विषाभिघातनस्यास-मूर्च्छामोहापतन्त्रके। महापस्मारशोकार्त्त-चिन्ताक्रोध-भयादिषु॥ मानसेषु च रोगेषु मूढव्याकुलचेतस। सज्ञाप्रबोधइलर्थनवपीड प्रदापयत्॥" इति। बालवृद्धयोरपि उत्कटदोषेषु नस्य देयम्, "भीरुस्त्रीक्षय बालान्" (भाई० उत्तर० ८ अ०) इत्यादिवच्यमाणत्वात्। स्नात, शिर स्नात। स्नातुकामश्च इत्यनेन पूर्वं विधाय पश्चात् स्नान कृत्यादिसेकं व्याख्यानयान्त॥ ४।५॥

अथ बालवृद्धानस्यग्रहणाग्रहणविषय दर्शयन्नाह, अष्टेति।—अष्टवर्षादूर्द्धं नस्य देयम्, अष्टवर्षादुपरि नस्यकर्म कुर्यात, उक्तञ्च वाग्भटे—"न नस्यमूनसप्ताब्द नातीताशीतिवत्सर" (वा० सू० २० अ०) इति। अष्टवर्षादवार्यपि दीर्घरोगादात्ययिक व्याधौ बृहण नस्य देयम्, उक्तञ्च—"भीरुस्त्रीक्षयबालाना नस्य" (भाई० उत्तर० ८ अ०) इति। एव वृद्धस्याशीतिवर्षस्यापि ज्ञेयम्॥ ६॥

अथ वैरेचन नस्यमाह, अथेति।—तैले सुतीक्ष्णकै सर्षपादिभै तीक्ष्णभेषजसिद्धै स्नेहवा, तीक्ष्णद्रव्याणि मरिचपिप्पलीशृङ्गवेरशोभाञ्जनादीनि, तै. सिद्धा ये स्नेहा, क्वाथाश्च इति॥ ७॥

विरेचननस्यस्य मात्रानिर्देश ।—

नासिकारन्ध्रयोरष्टौ षट् चत्वारश्च बिन्दवः ।
प्रत्येक रेचने योज्या मुख्यमध्यान्त्यमात्रया ॥ ८ ॥

नस्यार्थद्रव्याणां परिमाणम् ।—

नस्यकर्मणि दातव्यं शाणैकं तीक्ष्णमौषधम् ।
हिङ्गु स्यात् यवमात्रन्तु माषैकं सैन्धवं मतम् ॥ ९ ॥
क्षीरस्यैवाष्टशाणं स्यात् पानीयञ्च त्रिकार्षिकम् ।
कार्षिकं मधुरं द्रव्यं नस्यकर्मणि योजयेत् ॥ १० ॥

विरेचननस्यस्य द्वौ भेदौ ।—

अवपीडप्रधमनौ द्वौ भेदावपरौ स्मृतौ ।
शिरोविरेचनस्यात्र तौ तु देयौ यथायथम् ॥ ११ ॥

विरेचनस्य मात्रामाह, नासिकेति ।—नासिकारन्ध्रयोरिति—द्वयोरपि नासापुटयोर्नस्य योजनीयम् । अष्टाविंत्यादि—मुख्यमध्यान्त्यमात्रया इति अष्टौ बिन्दव मुख्यमात्रा रेचनस्य, षट् बिन्दव मध्यमा, चत्वार अल्पा मात्रा क्षीणमात्रा इति, उक्तञ्च—"चत्वारो बिन्दव षट् वा यथाऽष्टौ वा यथाबलम् । शिरोविरेचने योज्या ऊर्ध्वगत्रविकारिणाम् ॥" इति । बिन्दुलक्षण वाग्भटे—"अङ्गुष्ठपर्वणोपर्व द्वयान्त्यमनमुद्धृतात् । यावत् पतत्यसौ बिन्दुर्मात्राऽष्टौ षट् क्रमेण ते ॥ सर्वश्रेष्ठोत्कृष्टमध्योना मात्रास्ता एव च क्रमात् । बिन्दुद्वयोना. कल्काद्ये" (वा० सू० २० अ०) इति ॥ ८ ॥

नस्यार्थं द्रव्याणा परिमाणमाह, नस्येति ।—तीक्ष्णमिति—मरिच पिप्पलीहिङ्गुगृञ्जनबेरशोभाञ्जनतुम्बुरुतादिकम् । मधुर द्रव्य सिताप्रभृतिकम् । क्षीरं सुगमम् ॥ ९ १० ॥

अथ शिराविरेचनस्य यौ द्वौ अवपीडप्रधमनसञ्ज्ञौ भेदौ तावाह, अवपीडेति ।—यथायथ यथादोष यथामात्र वा देयौ, तयोर्विधानमाद्ये वक्ष्यमाण श्रेयस् ॥ ११ ॥

अवपीडस्य स्वरूपम्।—

कल्कीकृतादौषधात् यः पीडितो निःसृतो रसः।
सोऽवपीडः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः॥ १२॥

प्रधमनस्य स्वरूपम्।—

षडङ्गुला द्विवक्त्रा या नाडी चूर्णं तया धमेत्।
तीक्ष्णं कोलमितं वक्त्र-वातैः प्रधमनं हि तत्॥ १३॥

वैरेचननस्याहरोगाः।—

ऊर्ध्वजत्रुगते रोगे कफजे स्वरसङ्क्षये।
अरोचके प्रतिश्याये शिरःशूले च पीनसे॥
शोफापस्मारकुष्ठेषु नस्यं वैरेचनं हितम्॥ १४॥

स्नेहननस्याहाः।—

भीरुस्त्रीकृशबालानां नस्यं स्नेहेन शस्यते॥ १५॥

अथावपीडस्य स्वरूपमाह, कल्कीकृतादिति।—कल्कीकृतादौषधात् यो रसो निःसृत सोऽवपीड, किंविशिष्ट? पीडित, आतुरनासापुटे इति शेषः॥ १२॥

प्रधमनस्य स्वरूपमाह षडिति।—प्रधमन तत् यत द्विवक्त्रा नाडी षडङ्गुल प्रमाणा तया चूर्णं प्रधमेत्, किंभूतम्? तीक्ष्ण तीक्ष्णद्रव्यकृतम्। कोल कोलमात्रम्। वक्त्रवातैरिति—वैद्यमुखात्ते कृत्वा प्रधमेदित्यर्थः॥ १३॥

वैरेचननस्यविषयमाह, ऊर्ध्वेति।—ऊर्ध्वजत्रुगते विरेचन हितमिति, ते च शीघ्रगलादिरोगा, दृढबलेऽपि—"स्तब्धसुप्तिगुरुत्वाद्या श्लेष्मिका ये शिरोगदाः। शिरसो रेचन तेषु नस्तः कर्म प्रशस्यते॥" (च० सि० विमर्शी०) इति। कफरोगे इति—कासश्वासादौ। प्रतिश्याये नासास्रावे। पीनसे पुराणे इति रक्तप्रधानकफ। चक्रदत्तेऽपि—'शिरोविरेचन दद्यात् रोगिष्वेतेषु बुद्धिमान्। गौरवे शिरसः शूले जाड्ये स्यन्दे गलामये॥ शोफापस्मारकुष्ठेषु कृमिण्यपस्मारपीनसे॥" इति। अन्यत्राप्यत्र—"शिरोविरेचन श्लेष्मणोऽभिव्याप्ततालुकण्ठशिरसाम् अरोचक-शिरोगौरवशून्यपीनसाऽवभेदकक्रिमिप्रतिश्यायापस्मारगलशालासेषु ऊर्ध्वजत्रुगतेषु कफजेषु विकारेषु शिरोविरेचनद्रव्यैस्तालुस्नेहेन स्नेहन" (सु० चि० ४० अ०) इति॥ १४॥

अथ बृंहणस्य विषयमाह, भीरुस्त्रीति।—स्नेहेन नस्यमिति बृंहणा ज्ञेयम्। यदा

अवपीडनस्याह ।—

गलरोगे सन्निपाते निद्राया विषमज्वरे ।
मनोविकारे कृमिषु युज्यते चावपीडनम् ॥ १६ ॥

प्रधमननस्याह ।—

अत्यन्तोत्कटदोषेषु विसज्ञेषु च दीयते ।
चूर्णं प्रधमनं धीरैस्तद्वि तोक्ष्णतरं यत. ॥ १७ ॥

गुडादि पिप्पल्यादिनस्ये ।—

नस्यं स्यात् गुडशुण्ठीभ्यां पिप्पल्या सैन्धवेन वा।
जलपिष्टेन तेनाक्षि-कर्णनासाशिरोगदा ॥
मन्याहनुगलीढूता नश्यन्ति भुजपृष्ठजा ॥ १८ ॥

रेचननस्यदाने प्रतिषादितरागेरभिभूतानां भीरुपभृतीनां रेचनं दातव्यं तदा लङ्घनतशिरोविरेचनं दीपनमित्यपि द्वितीयार्थे साम्प्रदायिकम् ॥ १५ ॥

अवपीडननस्यस्य विषयमाह गलरोगे इति ।—मनोविकारे इति—मदमूर्च्छा ऽपस्मारसन्यासोन्मादभूतोन्मादादिषु। कृमिशब्देनात्र कृमिजा रोगा अपि ग्राह्या ॥ १६ ॥

प्रधमननस्यविषयमाह, अत्यन्तेति ।—अत्यन्तोत्कटदोषेषु चेतोविकारविषाभिपन्नाध्वयर्थ । एवाविषेष्वप्येषु विसज्ञेषु मदापस्मारादिषु। धीरैरिति—वैद्य, धारत्व दृढशास्त्राभ्यासकर्मत्वेन ज्ञेयम् । यतस्तोक्ष्णतरम् अत्यन्ततीक्ष्णद्रव्यकृतम् । तीक्ष्णद्रव्याणि यथा— "पिप्पल्य शिग्रुबीजानि विडङ्गरिष्टानि च। अवपीड प्रधमाड्य गरचेतोविकारिणाम् ॥" इति ॥ १७ ॥

इदानीमवपीडनप्रधमनयो कतिपयद्रव्यागानाह, नस्यमिति ।—गुडशुण्ठीभ्यामेको योग । पिप्पलीसैन्धवाभ्यां द्वितीय । तेन नस्येनाक्षिकर्णनासाशिरोगदा नश्यन्ति, गदशब्दाऽत्र प्रत्येकमभिसम्बध्यते। तथा मन्याहनुगलीढूता, रोगा इति शेष । भुजपृष्ठजा इति—भुजजास्तु अवबाहुकासशोषादय, पृष्ठजा कुब्जवाङ्गरायामादय । केचित् विरेचनभेदमेव योगद्वयमिच्छन्ति तन्मतेऽवपीडप्रधमनयो-रुक्तत्वात् ॥ १८ ॥

संज्ञाप्रबोधने मधूकसारादिनस्यम्।—

मधूकसारकृष्णाभ्यां वचामरिचसैन्धवैः।
नस्यं कोष्णजले पिष्टं दद्यात् संज्ञाप्रबोधनम्॥
अपस्मारे तथोन्मादे सन्निपातेऽपतन्त्रके॥ १९॥

तन्द्राया सैन्धवादिनस्यम्।—

सैन्धवं श्वेतमरिचं सर्षपाः कुष्ठमेव च।
वस्तमूत्रेण पिष्टानि नस्यं तन्द्रानिवारणम्॥ २०॥

तन्द्राया भावितसैन्धवादिनस्यम्।—

रोहितमत्स्यपित्तेन भावितं सैन्धवं वचा।
मरिचं पिप्पली शुण्ठी कक्कोलं लशुनं पुरम्॥
कट्फलञ्चेति तच्चूर्णं देयं प्रधमनं बुधैः॥ २१॥

स्नेहननस्यस्य भेददयनिर्देशः।—

अथ बृंहणनस्यस्य कल्पना कथ्यतेऽधुना।
मर्शश्च प्रतिमर्शश्च द्वौ भेदौ स्नेहने मतौ॥ २२॥

संज्ञाप्रबोधन नस्यमाह, मधूकेति।—मधूकसारकृष्णाभ्यामेको योगः। मधूको वृक्षविशेषः तस्य सार मध्यस्थितकाष्ठविशेषः। वचामरिचसैन्धवैः कृत्वा पदं, सकलद्रव्यकृतो वा एक एव योगो व्यवहारात्। शेषं सुगमम्॥ १९॥

तन्द्राया नस्यमाह, सैन्धवमिति।—श्वेतमरिचमत्र शिग्रुबीजं तत्प्रशस्तत्वात्। वस्तं छागः। पिष्टानीति, पूर्वोक्तद्रव्याण्यपि इति शेषः। तैषा तन्द्रानिवारणं भवति॥ २०॥

प्रधमनमाह, रोहितेति।—सैन्धवादिकं सर्वं पूर्वं समत्वेन चूर्णं कृत्वा पश्चात् रोहितमत्स्यपित्तेन भावना देया, पश्चाच्चूर्णं कार्यं तच्चूर्णं प्रधमनं देयम्। बुधैरित्यनेन परिभाषीकरणेत्या प्रचारयेदित्यभिप्रायः॥ २१॥

अथ विरेचननस्यस्य विधानादिकमभिधाय सम्प्रति बृंहणनस्यस्य भेदप्रभृतिकं दर्शयन्नाह अथेति।—सुगमम्। तस्य भेदानाह, मर्शश्चेति।—स्नेहने बृंहणाख्ये नस्ये द्वौ भेदाविति, एकः मर्शः, द्वितीयः प्रतिमर्शः॥ २२॥

स्नेहनभेदनशस्य मात्रानिर्देश ।—

मर्शस्य तर्पणी मात्रा मुख्या प्राणैः स्मृताऽष्टभिः ।
मध्यमा च चतुःप्राणैर्हीना प्राणमिता स्मृता ॥ २३ ॥
एकैकस्मिंस्तु मात्रेयं देया नासापुटे बुधैः ।
मर्शस्य हित्वेत्यं वा वीक्ष्य दोषबलाबलम् ॥ २४ ॥

मर्शप्रयोगस्य अवधिनिर्देश ।—

एकान्तरं द्व्यन्तरं वा नस्यं दद्याद्विचक्षणः ।
त्र्यहं पञ्चाहमथवा सप्ताहं वा सुयन्त्रितम् ॥ २५ ॥

अथ नस्यस्य भेदमात्रादिकमाह, मर्शस्येति।—मर्शस्य तर्पणस्नेहस्य या मात्रा सा अष्टभिः प्राणैर्मुख्या स्मृता। मध्यमा चतुर्भिः प्राणैर्हीना प्राणप्रमाणा। चक्रदत्ते —"नस्यस्य स्नेहिकस्याथ देयास्त्रयो तु विन्दवः। प्रत्येकशो नस्तकर्मीर्नृणामिति विनिश्चयः॥ शुक्तिश्च पाणिशुक्तिश्च देयाऽत्र कुशलैर्नरैः॥" इति। विन्दुपरिमाण-मुक्तं वाग्भटे—"प्रदेशिन्यङ्गुलाग्रर्व-द्रवान्नावकनुद्धृतात्। यावत् पतत्यसौ विन्दु दशाष्टौ षट् क्रमेण ते॥ मर्शस्योत्कृष्टमध्योना मात्रास्त्र एव च क्रमात्। विन्दुद्वयोना कल्क्यादेः" (वा० सू० २० अ०) इति। सुश्रुतेऽपि नस्यप्रमाणन्तु "अष्टौ विन्दव प्रदेशिनीपर्वद्वयेनोद्धृता प्रथमा मात्रा, द्वितीया शुक्तिः, तृतीया पाणिशुक्तिः इत्येतास्तिस्रो मात्रा यथाबलं प्रयोज्याः" (सु० चि० ४० अ०) इति। शुक्तिपरिमाणन्तु "द्वात्रिंशद्विन्दवश्चापि शुक्तिरित्यभिधीयते। इह शुक्तौ पाणिशुक्तिश्च देयाऽत्र कुशलैर्नरैः॥" इति। स्नेहनस्य नावगाहितं किन्तु त्यजेदेव, तथा हि सुश्रुत, —"स्नेहनस्य न चावगाहितं कथञ्चिदपि" (सु० चि० ४० अ०) इति। अथैतत् परिमाणमेकवार बहुवार वा देयमिति शङ्कायां समाधानमाह, एकैकेति।— मर्शस्य त्रय मात्रा पूर्वोक्ता एकैकस्मिन्नासापुटे देया, एतन्नैकवारविषय दर्शितम्, यदुक्तं—"प्रत्येकशो नस्तकर्मीर्नृणामिति विनिश्चयः" इति। वा अथवा दोषबलाबलं दृष्ट्वा त्र्यहं वा पञ्चाहं वा सप्ताहं वा सेव मात्रा देया इति॥ २३-२४॥

नस्यदानकालमध्याऽऽह, एकान्तरमिति।—विचक्षणो वैद्य। एकान्तरम् एकदिवसान्तरं द्व्यन्तरं दिनद्वयान्तरं वा प्रयोज्य सप्ताहं यावत्, इत परं दानेन स्नात्म्योभवात्, अत्रापि पुन पुनरिति शेष, यदुक्तं—"सप्ताहन्तु परं दद्यं स्निग्धस्य पुन पुन" इति। वा शब्देन नवाहादपि परि स्नात्म्यं भवति इत्युक्तत्वात्, तथा हि—'परं नवाहमूहेत्तु नवाहात् स्नात्म्यमाप्नुयात्' इति॥ २५॥

मर्शःप्रयोगे विविधव्यापदन्निर्देश ।—

मर्शे शिरोविरेके च व्यापदो विविधा स्मृताः।
दोषोत्क्लेशात् क्षयाच्चैव विद्येयास्ता यथाक्रमम्॥ २६ ॥

मर्शव्यापद चिकित्सा ।—

दोषोत्क्लेशनिमित्तासु युञ्जात् * वमनशोधनम्।
अथ क्षयनिमित्तासु यथास्वं बृंहणं हितम् ॥ २७ ॥

स्नेहनस्यार्हरोगा ।—

शिरोनासाक्षिरोगेषु सूर्यावर्त्तार्द्धभेदके।
दन्तरोगे बले क्षीणे मन्याबाह्वंसजे गदे ॥ २८ ॥
मुखशोषे कर्णनादे वातपित्तगदे तथा।
अकालपलिते चैव केशश्मश्रुप्रपातने ॥
युज्यते बृंहणं नस्यं स्नेहैर्वा मधुरद्रवैः ॥ २९ ॥

मुख्यावक्त्रादौ कुङ्कुमादिनस्यम् ।—

सशर्करं पयःपिष्टं भृष्टमाज्येन कुङ्कुमम्।
नस्यप्रयोगतो हन्याद्वातरक्तभवा रुजः ॥
भ्रूशङ्खाक्षिशिरःकर्ण-सूर्यावर्त्तार्द्धभेदकान् ॥ ३० ॥

मर्शे दोषोत्क्लेशात् व्यापदो भवन्ति इत्यत आह—मर्शे इति ॥ २६ ॥

अथ तयोश्चिकित्सामाह, दोषोत्क्लेशेति।—वमनशोधनमिति शिरोविरचना रूप नस्यम्। यथास्वमिति—यथादोषम्। बृंहणमिति—स्नेहिकं नस्यम् ॥ २७ ॥

बृंहणनस्यविषयमाह शिर इति।—शिरोरोगादिषु बृंहणं नस्यं युज्यते ॥ २८।२९ ॥

बृंहणनस्यमाह, सशर्करमिति।—शर्करा सितोपला। कुङ्कुमं काश्मीरजम। आज्येन घृतेन क्वथ्य घृतेन भर्जयित्वा सशर्करमिति समानशर्करं, तदनु क्षीरेण पिष्ट्वा नस्यं दद्यात्, तत घृत नस्यप्रयोगत भ्रूशङ्खादिरुजं हन्यात् इति ॥ ३० ॥

---

* सुश्रुत "भ्रमनशोधनम्" इति पाठ, स च युक्त ।

मूर्ध्यावर्त्तादौ अणुतैलादिनस्यम्।—

नस्यं स्यादणुतैलेन तथा नारायणेन वा।
माषादिना वा सर्पिर्भिस्तत्तद्भेषजसाधितैः॥ ३१॥

दोषभेदेन नस्ये स्नेहभेदनिर्देशः।—

तैलं कफे स्यात् वाते च केवले पवने वसाम्।
दद्यान्नस्यं सदा पित्ते सर्पिर्मज्जानमेव च॥ ३२॥

पचाघातादौ माषादिनस्यम्।—

माषाऽऽत्मगुप्तारास्नाभिर्बलारुवुकरोहिषैः।
क्षतोऽश्वगन्धया क्वाथो हिङ्गुसैन्धवसंयुतः॥ ३३॥

अथ बृंहणनस्यापराणि तान्याह, नस्यमिति।—अणुतैलेनेति, अणुतैलेन नस्यं वातरक्तभवा रुजो इत्यादिस्थत्र सम्बन्धः। "गवां प्रकृत्याक्वाथविपक्वमुत्तमं हितञ्च तैलं तिमिरेषु भाषितम्। घृतं तथा केवलमेव पैत्तिके त्वजाविकं यन्मधुरैर्विपाचितम्॥ तैलं स्थिरादौ मधुरे च यत् गणे तथाऽणुतैलं पवनास्रगुत्थयोः॥" (सु० उ० १७ अ०) इति। अणुतैलन्तु वातव्याधिचिकित्साप्रकरणत्र ज्ञातव्यम् केषाञ्चित् ज्ञापनार्थं यथा "तिलपरिपोडनोपकरणकाम्पिल्याद्यल्पकाल तैलपरिपीतान्यणूनि यद्गण्डूष कल्पयित्वा अवचुद्य मुहुर्ति कटाहे पाणीय भाषाद्य क्वाथयेत्, तत स्नेहमात्रपृष्ठात् यदुद्रेति तत सरकपाण्डारन्यतरेणादाय वातप्रोषधप्रतीवापच्च स्नेहपाककल्पेन विपचेत्। एतदणुतैलमुपदिशन्ति वातरोगेषु" (सु० चि० ४ अ०) इति। नारायणेन, तैलेनेति शेषः। माषादिनेति अत्रापि तैलेन सम्बन्धः। नारायणतैलं माषतैलञ्च वातव्याधिचिकित्साक्त ज्ञातव्यम्। तत्तद्भेषजसाधितैः सर्पिर्भिरिति—यानि यानि द्रव्याणि वातरक्तहरत्वमिहचतु शिरःकर्णरोगाणां विहितानि तैस्तैर्द्रव्यैरेव साधितानि सर्पींषि तत्र तत्र योज्यानीत्यभिप्रायः॥ ३१॥

अथ चतुःस्नेहस्य दोषविशेषेणोपादेयत्वमाह तैलं कफे स्यादिति।—अत्र सर्वत्र इति पाठान्तरं, केवले वाते स्वतन्त्रे अवाणुतैलमेव प्रधानं, यदुक्तं—"चतुर्विधस्य स्नेहस्य विधिरेष प्रकीर्त्तितः। श्लेष्मण्यानाविरोधित्वात्तेषु तैलं विधीयते॥" (सु० चि० ४० अ०) इति॥ ३२॥

अथापरमपि योगमाह, माषेति।—आत्मगुप्ता कपिकच्छूः। रास्ना सुरभी। बला सामान्यशब्दाच्या। बलुक एरण्डः। रोहिषी गन्धतृणं। अश्वगन्धया सह मिलित्वा

कोष्णो नस्यप्रयोगेण पञ्चाघातं सकम्पनम्।
जयेदर्दितवातञ्च मन्यास्तम्भावबाहुकौ ॥ ३४ ॥

प्रतिमर्शस्य मात्रानिर्देश ।—

प्रतिमर्शस्य मात्रा तु द्विद्विबिन्दुमिता मता।
प्रत्येकशो नस्तकयो स्नेहेनेति विनिश्चितम् ॥ ३५ ॥

बिन्दुमात्राया परिमाणनिर्देश ।—

स्नेहे ग्रन्थिद्वयं यावन्निमग्ना चोद्धृता तत ।
तर्जनीयं स्रवेद्बिन्दु सा मात्रा बिन्दुसञ्ज्ञिता ॥ ३६ ॥

मर्शनस्ये प्राणस्य परिमाणनिर्देश ।—

एवविधैर्बिन्दुसञ्ज्ञैरष्टभि प्राण उच्यते ।
स देयो मर्शनस्ये तु प्रतिमर्शो द्विबिन्दुक ॥ ३७ ॥

प्रतिमर्शनस्यस्य काल ।—

मयया प्रतिमर्शस्य बुधैः प्रोक्ताश्चतुर्दश ।
प्रभाते दन्तकाष्ठान्ते गृहान्निर्गमने तथा ॥ ३८ ॥
व्यायामाध्वक्षयवायान्ते विरमत्रान्तेऽञ्जने कृते ।
कवलान्ते भोजनान्ते दिवा सुप्तोत्थिते तथा ॥
वमनान्ते तथा सायं प्रतिमर्शं प्रयुञ्जते ॥ ३९ ॥

प्रतिमर्शस्य मात्रान्तरनिर्देश ।—

ईषदुच्छिङ्कनात् स्नेहो यदा वक्त्रं प्रपद्यते ।
नस्ये निषिक्त त विद्यात् प्रतिमर्शं प्रमाणतः ॥
उच्छिन्दन्न पिबेच्चैतन्निष्ठीवेन्मुखमागतम् ॥ ४० ॥

क्वाथ, द्विट्लवणयो प्रक्षेप । तत व्यवहारतो द्विट् रक्तिकाद्वय सैन्धव माषैक प्रक्षेप । जयेदर्दितवातञ्चेति चकारग्रहणात् कर्णनादरुजाया ग्रहण इति प्रसिद्धि, यदुक्त—"माषबलाशूकशिम्बीकुलत्थराजीरुक्काश्वगन्धानाम। क्वाथो नस्यनिपीतो वातश्लेष्मान्वित कोष्ण ॥ अपहरति पञ्चवात मन्यास्तम्भ सकर्णनादरुजम्। दुर्जय-मार्दितवात सप्ताहाज्जयति चावश्यम्॥" इति। इति मर्शविधि ॥ ३३।३४ ॥

अथ प्रतिमर्शमाह, प्रतिमर्शस्नेहेति।—"प्रत्येकशो नस्तकयोरुपेति वदनं यथा।

प्रतिमर्शस्य गुणा।—

क्षीणे तृणाम्यशोषार्त्ते बाले वृद्धे च युज्यते।
प्रतिमर्शेन शाम्यन्ति रोगाश्चैवोर्द्ध्वजत्रुजा॥
बलौपलितनाशश्च बलमिन्द्रियजं भवेत्॥ ४१॥

पलिते स्नेहनस्यानि।—

विभीतनिम्बगाम्भारी शिवा शेलुश्च काकिनी।
एकैकतैलनस्येन पलितं नश्यति ध्रुवम्॥ ४२॥

नस्यप्रयोगविधि।—

अथ नस्यविधिं वक्ष्ये नस्यग्रहणहेतवे।
देशे वातरजोमुक्ते कृतदन्तनिघर्षणम्॥ ४३॥
विशुद्ध धूमपानेन स्निग्धभालगलं तथा।
उत्तानशायिन किञ्चित् प्रलम्बशिरस नरम्॥ ४४॥
आस्तीर्णहस्तपादञ्च वस्त्राच्छादितलोचनम्।
समुन्नमितनासाग्र वैद्यो नस्येन योजयेत्॥ ४५॥
कोष्णमाच्छन्नधारञ्च हैमनारादिशुक्तिभिः।
शुक्त्या वा पत्रयुक्त्या वा प्लोतैर्वा नस्यमाचरेत्॥ ४६॥
नस्यप्रासिच्यमानेषु शिरो नैव प्रकम्पयेत्।
न कुप्येन्न प्रभाषेत नोच्छ्वसेन्न हसेत्तथा॥ ४७॥
एतैर्हि विहत स्नेहो नैवान्त. सम्प्रपद्यते।
तत: कासप्रतिश्याय-शिरोऽत्तिगदसम्भव.॥ ४८॥
शृङ्गाटकमभिघ्राव्य ष्ठीवयेन्न गिलेद्भवम्।
पञ्च सप्त दशैव स्युर्मात्रा.नस्यस्य धारणे॥ ४९॥

तथैतैर्विहत स्नेहो नैवान्त सम्प्रपद्यते॥" इति पाठान्तरम्। एतै पदार्थैर्विहत स्नेहो यदा भवति तदान्त न प्राप्नोति इति भाव। अथ पाठ कैनाप्यत्र पाठत॥ ३५—४२॥

नस्यप्रयोगविधिमाह—अथेति। अथ नस्यधारणार्थं मात्रासङ्ख्यामाह, पञ्चेति।—पञ्चसप्तादिसङ्ख्यायहण दीर्घादिस्नेहबलविषयम्। मात्राप्रमाणन्तु वाग्भटे—"यावत्

उपविश्याथ निष्ठीवेन्नासावक्त्रगतं द्रवम्।
वामदक्षिणपार्श्वाभ्यां निष्ठीवेत् सम्मुखे न हि ॥ ५० ॥

नस्यग्रहणानन्तरम् आचारनिर्देशः।—

नीते नस्ये मनस्ताप रजः क्रोधञ्च सन्त्यजेत्।
प्रयीत निद्रां त्यक्त्वा च प्रोत्तानो वाक्शतं नरः॥
तथा वैरेचनस्यान्ते धूमो वा कवलो हितः॥ ५१ ॥

नस्य सम्यग्योगायोगातियोगनिर्देशः।—

नस्ये त्रीण्युपदिष्टानि लक्षणानि प्रयोगतः।
शुद्धिहीनातियोगानि विशेषाच्छास्त्रचिन्तकैः॥ ५२ ॥

नस्य सम्यग्योगलक्षणम्।—

लाघवं मनसः शुद्धिः स्रोतसां व्याधिसङ्क्षयः।
चित्तेन्द्रियप्रसादश्च शिरसः शुद्धिलक्षणम् ॥ ५३ ॥

यर्थेति इत्यादि दक्षिणं जानुमण्डलम्। निमेषोन्मेषकालेन समं मात्रा तु सा स्मृता॥" (वा० सू० २२ अ०) इति। नस्यदानानन्तरं किं कर्त्तव्यम्? इत्यत आह, उपविश्येति।—अथशब्द आनन्तर्ये। नस्यानन्तरं नासादिद्वयं उपविश्य निष्ठीवेत्, काभ्याम्? वामदक्षिणपार्श्वाभ्यां, कथं सम्मुखं न हि निष्ठीवेत्? तिर्यक् निष्ठीवनात् सम्यक् द्रवनिर्गमो भवति इत्यर्थः ॥ ४३—५० ॥

निष्ठीवनानन्तरं कर्त्तव्यमाह नीते इति।—रजो धूलिं। क्रोधञ्चेति, च शब्दः सन्त्वान्तरान्नियहणार्थः, उक्तञ्च—"रजोधूमसन्तापं स्नानक्रोधादि वर्जयेत्" इति। वाक्शतं गुर्वक्षरोच्चारणशतमात्रम्। वैरेचनस्यान्ते इति—शिरोविरेचननस्योत्तरकाले, धूमो वा कवलो हित इति—धूमः, स्निग्धादिरयं वक्ष्यमाणः, कवलः प्रागुक्तलक्षणो हित पथ्यतमत्वात् कर्त्तव्य इत्यर्थः ॥ ५१ ॥

अथ नस्ये कति लक्षणानि भवन्ति? इत्याह, नस्ये इति।—प्रयोगत इति—नस्यप्रयोगात्। शास्त्रचिन्तकैः शास्त्रं वैद्यकशास्त्रं तस्य चिन्तका विचारका इति ॥५२॥

नस्यशुद्धिलक्षणमाह लाघवमिति।—लाघवं शरीरस्य। शरीरग्रहणेनैव शिरोग्रहणे नस्ये पुनः शिरोग्रहणं टेहस्योद्गमूलादपि लाघवप्रतिपादनार्थम्। मनसः शुद्धिः मनसो ह्लादकत्वात् मनसः शुद्धिः। तथा स्रोतसां शुद्धिः स्रोतसां प्राणवात-नलाम्बोऽन्नवाहिना शुद्धता। तथा व्याधिसङ्क्षयः व्याधयो नस्यसाध्या रोगाः। तथा चित्तेन्द्रियप्रसादश्च मनसः, इन्द्रियाणां चक्षुरादीनां प्रसन्नता। तत्कालरे

नस्ये हीनयोगलक्षणम्।—

कण्डूपदेहो गुरुता स्रोतसा कफसम्भवः।
मूर्ध्नि हीनविशुद्धेस्तु लक्षणं परिकीर्त्तितम्॥ ५४॥

नस्ये अतियोगलक्षणम्।—

मस्तुलुङ्गागमो वात-दृष्टिरिन्द्रियविभ्रमः।
शून्यता शिरसश्चापि मूर्ध्नि गाढ़ विरेचिते॥ ५५॥

नस्ये हीनातिसम्यग्योगे क्रियासूत्रम्।—

हीनातिशुद्धे शिरसि कफवातघ्नमाचरेत्।
सम्यक् विशुद्धे शिरसि सर्पिर्नस्ये निषेचयेत्॥ ५६॥

नस्यातियोगे लक्षणान्तर चिकित्सान्तरञ्च।—

कफप्रसेकः शिरसो गुरुतेन्द्रियविभ्रमः।

तु—"प्रसन्नदृष्टिर्दृढदन्तकेश श्मश्रुर्वक्त्र पलितैरहीन। पिकाभिकण्ठ कमलास्यगन्धो नस्योपसेवी भवतीह मर्त्य॥" इति। अन्यत्रापुक्तम्—"इन्द्रियाणाञ्च वैमल्य कृष्यादास्यसुगन्धताम्। हनुदन्तशिरोग्रीवा-विकम्पाहरसा बलम्॥ वलीपलितखालित्यव्यङ्गनाशाप्यसम्भव॥" (सु० चि० ४० अ०) इति॥ ५३॥

अथ हीनशुद्धेर्लक्षणान्याह, कण्डूपदेहेति।—हीनविशुद्धे शिरसि लक्षण, किं तत्? कण्डूपदेहेति—मुखनासिकाटीनाञ्च उपदेह श्लेष्मणाऽभिलिप्त मुख भवतीति। गुरुता चाव शिरस। स्रोतसा कफाद्वहाना कफसम्भव इति—प्रचुरश्लेष्मसम्भव इति तात्पर्यार्थः॥ ५४॥

अतिविरेचितलक्षणमाह, मस्तुलुङ्गेति।—मूर्ध्नि शिरसि अतिविरेचिते सति मस्तुलुङ्गागमादयो भवन्ति, मस्तुलुङ्ग मस्तिष्कम्। वातदृष्टिरित्यत्र वातदुष्टिरिति वा पाठ। इन्द्रियविभ्रम इन्द्रियनाश.। शिरस शून्यता मस्तकशून्यता। "शून्यता मनसश्चापि" इति पाठान्तरम्॥ ५५॥

हीनातिशुद्धौ चिकित्सामाह, हीनेति।—हीनातिशुद्धे शिरसि कफवातघ्नं क्रमादाचरेदिति ज्ञेयम्, हीनशुद्धे शिरसि कफघ्नम्, अतिशुद्धे वातघ्न, सम्यक्शुद्धे शिरसि नस्येन सम्यक शुद्धे सर्पिर्योजयेदित्यर्थः॥ ५६॥

अतिस्निग्धलक्षणचिकित्सामाह, कफात।—अतिस्निग्धे एतल्लक्षणम्, तत्

लक्षणं तदतिस्निग्धे तत्र रूक्षं प्रदापयेत्॥
भोजयेच्चानभिष्यन्दि तस्याचारिकमादिशेत्॥ ५७॥

पञ्चकर्मणां संज्ञानिर्देश।—

वमनं रेचनं नस्यं निरूहश्चानुवासनम्।
एतानि पञ्च कर्माणि कथितानि मुनीश्वरैः॥ ५८॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां-
मुत्तरखण्डे नस्यविधिनामाष्टमोऽध्याय॥ ८॥

नवमोऽध्यायः।

अथ धूमपानविधिः। (क)—

षड्विधधूमानां नामनिर्देश।—

धूमस्तु षड्विधः प्रोक्तः शमनो बृंहणस्तथा।

किम्? कफप्रसेकादि कफप्रसेक स्राव.। शिरस गुरुता शिरोजाड्यम्। इन्द्रियाणां चक्षुरादीना विप्लव। रूक्षम् अन्नं प्रदापयेत्। अनभिष्यन्दि स्रोतसां श्लेष्मकर न भवति। एतन्नाचारिकम आदिशेत्, उक्तञ्च वाग्भटे—"उष्णोदको-पचारी स्यात्नित्यव्यायामी च पाययेत्। न वेगरोधी व्यायाम क्रोधशोकक्षिमातपान्॥ प्रवातयानयानाञ्च भाष्याध्वासनसंस्थिति। नीचात्युच्चोपधानाङ्ग-स्वप्नधूमरजांसि च॥" (वा० सू० १६ अ०) इति॥ ५७॥

प्रकरणार्थमुपसंहरति, वमनमिति।—तानि कानि वमनादीनि॥ ५८॥

इति श्रीवास्त्यान्वयप्रकाशवैद्यभावसिंहात्मजेनाढमल्लेन विरचितायां शार्ङ्गधर-
दीपिकायामुत्तरखण्डे नस्यविधिनाम अष्टमोऽध्याय॥ ८॥

(क) अथ एव कर्मपरिशेषात् शुद्धिकरत्वेन नस्यान्ते धूमपानविधिरारभ्यते, अथेति।—तत्राय सम्बन्ध,—यथा नस्येन ऊर्ध्वजत्रुरोगनाशस्तथा धूमेनापि, उक्तञ्च वाग्भटे—"ऊर्ध्वजत्रुविकारेषु विशेषान्नस्यमिष्यते। ऊर्ध्वं हि कफवातार्त्त-विकाराणामजन्मने॥ उच्छ्वासाय च वाताना पिबेद्धूम सदाऽऽत्मवान्॥" (वा० सू० २१ अ०) इति। तेन नस्याध्यायानन्तर धूमपानाध्याय।

तत्र तावत् पूर्वं धूमसङ्ख्यामाह, धूम इति।—षोढा धूमपानप्रकार.। तत्र शमनं

रेचन कासहा चैव वामनो घ्राणधूपनः ॥ १ ॥

शमनादिक्रियाणां पर्यायकथनम्।—

शमनस्य तु पर्यायौ मध्य प्रायोगिकस्तथा।
बृंहणस्यापि पर्यायौ स्नैहिको मृदुरेव च ॥
रेचनस्यापि पर्यायौ शोधनस्तीक्ष्ण एव च ॥ २॥

धूमपानानर्हाः।—

अधूमार्हांश्च खल्वेते श्रान्तो भीतश्च दुःखितः।
दत्तवस्तिर्विरिक्तश्च रात्रौ जागरितस्तथा ॥ ३ ॥

इति—दुष्टदोषस्यानिहरणपूर्वकं शमनम्, अदुष्टस्यानुदीरणञ्च, व्याधिशमनेन प्रस्तुतव्याधिशमनम्, अप्रस्तुतव्याधेरनुदीरणम्, तदुक्तं वाग्भटे—"न शोधयति यद्दोषान् समान्नोदीरयत्यपि। * समीकरोति च क्रुद्धान् तत् तत्र शमनमुच्यते ॥" (वा० सू० १४ अ०) इति। दोषशब्दोऽत्र दोषेषु दोषकार्येष्वाधिष्वपि वर्त्तते कार्ये कारणोपचारात्। बृंहण इति—बृंहणो बलकरः, धातुवृद्धिकर इत्यर्थः। तदाश्रयत्वाद्धातवो बलम् (१)। रेचन इति—आशयं विरेचयतीति रेचनः। कासहेति—कासनिवारणाय यो दीयते स कासहा कथितः। वामन इति—वामयतीति वामनः। अथ घ्राणधूपन इति—नासिकया पीतो धूमो घ्राणधूपनसंज्ञः। एके घ्राणधूपनस्थाने व्रणधूपन इति पठन्ति व्याख्यानयन्ति च, एतत् संज्ञातम् ॥ १ ॥

अथ तेषां कर्माश्रित् संज्ञान्तराणि दर्शयन्नाह, शमनस्येति।—एकार्थवाचका अप्यमी शब्दाः परस्परं पर्यायाः उच्यन्ते। प्रयोगः कस्यचित् सततोपयोगः, तत्र साधु प्रायोगिकः। स्नेहा यत्र भवन्तीति स्नैहिकः ॥ २ ॥

इदानीं ये धूमपानेषु नार्हास्तानाह, अधूमार्हांश्च खल्वेते इति—एते वक्ष्यमाणाः श्रान्तादयो न धूमयोग्या इति। श्रान्तो भारादिना। भीतो भययुक्तः। दुःखितो धनबन्धुनाशादिना। दत्तवस्तिरिति—†दत्तवस्तिः। बास्तयहणेनानुवासनास्थापनान्यिहोच्यन्ते (१) गृह्यन्ते। विरिक्त इति—विशेषेण रेचितः। रात्रौ जागरित इति—रात्रिजागरणेन वातवृद्धिः स्यात्।

* वाग्भटे "समीकरोति विषमान् शमनं तच्च सप्तधा' इति पाठः।

पिपासितश्च दाहार्त्तस्तालुगोषी तथोदरी।
शिरोऽभितापी तिमिरी कुर्य्याध्मानप्रपीडितः ॥ ४ ॥
चतोरस्क प्रमेहार्त्तः पाण्डुरागी च गर्भिणी।
रूक्षः क्षीणोऽभ्यवहृत-क्षीरक्षौद्रघृतासवः ॥
भुक्तान्नदधिमद्यश्च बालो वृद्धः क्लमस्तथा ॥ ५ ॥

अविधिपीतधूमस्य दोषनिर्देशं प्रतीकारानर्दशयन्।—

अकाले चातिपीतश्च धूमः कुर्य्यादुपद्रवान्।
तत्रेष्टं सर्पिषः पानं नावनाञ्जनतर्पणम् ॥ ६ ॥
सर्पिरिक्षुरसं द्राक्षा पयो वा शर्करास्वं वा।
मधुराम्लो रसो वाऽपि * वमनाय प्रदापयेत् ॥ ७ ॥

शिरोऽभितापी शिरोरोगपीडितः। तिमिरीति—मन्ददृष्टिः। कुर्य्याध्मानप्रपीडित इति—हृदिपीडितं आध्मानपीडितश्च, आध्मानं उदरापूरः। चतोरस्क इति—उरः क्षतः। प्रमेहार्त्त इति—प्रमेहपीडितः। रूक्षो वातप्रकृत्या, अथवा रूक्षाहारेण जनितवायुना पीडितः। क्षीण इति—क्षीणधातुः। अभ्यवहृतक्षीरक्षौद्रघृतासव इति—अभ्यवहृतं विशेषेण भक्षितं क्षीरादिकं येन स तथा, तत्र क्षौद्रं मधु। एते धूमपानविधौ न योग्या इत्यभिप्रायः। तथोक्तं यद्दोषात् दुष्टया अन्येऽपि वोढव्याः ॥ ३—५ ॥

अथ योग्यपीतस्य (?) धूमपानस्य दोषमाह, अकाले इति।—अस्य कालो विरेचनोक्तो वोढव्यः। अतिपीत इति—विहितपरिमाणादिभ्योऽन्यथा पीतः स्वभावात् बहुपीतो वा। नासादिभ्यः अन्यथा धूमो यावता वक्त्रस्रावः इत्यादि (?)। उपद्रवान् धूमोपहतजनितान् ते तु तृष्णादाहज्वरक्षवथुसदनान्ध्राणरोगाध्मानादयः। तत्प्रतीकारमाह, तत्रेति।—धूमपानातिप्रयोगजनितोपद्रवेषु, इष्टं विहितं ग्राह्यमित्यर्थः, नासागतदोषदूरीकरणात्, यतो ह्यूर्ध्वमध्यं न वर्त्तते उपद्रवत्वात्। अञ्जनमप्यत्र तादृक्षितमेव, यतः रोगोपद्रवः पीतलोहिततोच्चैस्तान्नवर्णत्वात् (?)। तर्पणं सत्तर्पणं, तृष्णादाहज्वरोपद्रवत्वात्, यतः,—तृष्णादाहज्वरादीनां स्वभावोऽयं सोदर्तोति—क्रियासु असमर्थो भवतीत्यर्थः, अत एव तर्पयतीति। अपराण्याह,

* "वमनाय" इत्यत्र "शमनाय" इति गूढार्थदीपिकायां पाठः।

धूमयोग्यवयोनिर्देश ।—

धूमस्तु द्वादशाद्वर्षात् गच्छतेऽशीतिकान्न च ॥ ८ ॥

सम्यग्युक्तस्य धूमस्य गुणा ।—

कासश्वासप्रतिश्यायान्मन्याहनुशिरोरुजः ।
वातश्लेष्मविकाराश्च हन्याद्धूमः सुयोजितः ॥ ९ ॥
धूमप्रयोगात् पुरुषः प्रसन्नेन्द्रियवाङ्मनाः ।
दृढकेशद्विजश्मश्रुः सुगन्धिवदनो भवेत् ॥ १० ॥

सामान्यतो धूमनेत्रस्य स्वरूपनिर्देश ।—

धूमनाडी भवेत्तत्र त्रिखण्डा च त्रिपर्विका ।
कनिष्ठिकापरीणाहा राजमाषागमान्तरा ॥ ११ ॥

सर्पिरित्तुरसमित्येको योगः । द्राक्षा पयो वेति द्वितीयः । शर्कराक्षु वेति तृतीयः । मधुराक्षौ रसौ वाऽपीति चतुर्थः । वमनाय प्रदापयेदिति वमनप्राबल्यम्, तत्प्रान्तरोक्तौ यथा—"वमत क्लोष्मणि व्याधुमगत्वस्य नश्यति। विधिनाऽनेन शाम्यन्ति सदनश्चवथुज्वराः ॥" (सु० सू० १२ अ०) इत्यादि ॥ ६।७ ॥

अथ धूमस्य वयोभेदेनोपादेयत्वमाह, धूम इति।—द्वादशवर्षादूर्ध्वं अर्थात् बाल्यावस्थाया धूमपानो योज्य यावदशीतिवर्षाणि भवन्ति उपरि गच्छते, अशीतिवर्षादुपरि धूमपानो न विहित इत्यभिप्रायः। एतद्विधं प्रायोगिकधूमपाने स्वस्योपयोगित्वेन दर्शितम्, यतोऽन्यत्र सर्वैर्निबन्धकारैरपठितत्वात् ॥ ८ ॥

अथ सम्यक् योजितस्य धूमपानस्य गुणमाह—कासेति। धूमप्रयोगात् इति सम्यक् पीत। अथ धूमयोगेन फलमाह इन्द्रियाणि बुद्धीन्द्रियाणि, तेषा प्रसन्नता तद्विषयग्रहणसामर्थ्यमित्यर्थः, वाक् वचनप्रागल्भ्य, मन इन्द्रियत्वेनोभयात्मकत्वात् पृथग्ग्रहणम। दृढकेशद्विजश्मश्रुरिति—केशा शिरोरुहा, द्विजा दन्ता, श्मश्रु नासाधोगलौष्ठीपरिलोमविशेष। सुगन्धिवदनो भवेदित्यस्य स्थाने सुगन्धिविशदानन इति केचित पठन्ति व्याख्यानयन्ति च ॥ ९।१० ॥

इदानी धूमपानार्थं नेत्रस्वरूपमाह, धूमेति।—तत्रेति—धूमपानविषये धूमनाडी धूमपानार्थं नाडी नेत्राभिधाना, कथम्भूता ? त्रिखण्डा, अत एव त्रिपर्विका त्रिग्रन्थियुतेति कथिता। कनिष्ठिकापरीणाहेत्यनेन गोपुच्छाकारा कार्या, गोपुच्छा-

धूमनेत्रस्य शमनादिविशेषित स्वरूपनिर्देश ।—

धूमनाडी भवेद्दीर्घा शमने रोगिणोऽङ्गुलैः।
चत्वारिंशन्मितैस्तद्वद्वात्रिंशद्भिर्मृदौ मता ॥ १२ ॥
तीक्ष्णे चतुर्विंशतिभिः कासघ्नौ षोडशोन्मितैः।
दशाङ्गुलैर्वामनीये तथा स्यात् व्रणनाडिका ॥
कलायमण्डलस्थूला कुलत्थागमरन्ध्रका ॥ १३ ॥

कारत्वच विलक्षणानामिति भाव.। अन्तरे सुषिरन्तु राजमाषवत् वर्तुलानुरूप काश्यमित्यर्थ। एके अन्तरनाडिकाया प्रान्ते राजमाषसदृश रन्ध्र वदन्ति, मूलमुखन्तु राजमाषात किञ्चिदधिक भवति, कर्णिकापरिणाहाकारत्वात ॥ ११ ॥

अथ नाडीस्वरूपमभिधाय सम्प्रति शमनादीनामङ्गुलभेदेन नाडीविभेदमाह, धूमनाडीति।—दशाङ्गुलैर्वामनीय एतत पञ्चप्रकार सुश्रुतानुसरेण नाडीविषयत्वादिङ्गितम्। षोडाससङ्कमवशिष्ट यत् ग्राणभूषन, तस्य नाडीस्वरूप वक्ष्यमाण वोद्धव्यम्। अत एव नाडीभेदेनैव पञ्चप्रकार पूर्वमुक्त, तत यथा—धूमनाडी, शमने इति—शमनाख्यधूमपानयोग्येत्यर्थ, कथम्भूता ? आतुरस्य चत्वारिंशदङ्गुलैर्दीर्घा। ननु तन्त्रान्तरे षष्टचत्वारिंशदङ्गुले परिमिता नाडी प्रायोगिकाभिधाने शमनधूमपाने प्रशस्ता, तथा च—*"एतादिना कुष्ठनताडुतेन चौम विलप्याङ्गुलकाष्ठमानम। प्रायोगिके वर्त्तयितुन नेत्रमष्टाङ्गुल षड्गुणित प्रशस्तम्॥" इति सुश्रुतेनोक्तम्। अपरे तु षट्त्रिंशदङ्गल प्रायोगिक नेत्रमाह, तदुक्त—'साङ्गुलयुत पूर्णो हस्त प्रायोगिकादिषु" (जतु०) इति, तत् कथमत्र चत्वारिंशदङ्गुले परिमित नेत्रम् ? उच्यत, समलक्ष्य तु मध्य (?)। प्रायोगिकस्य तु द्वौ भेदौ दर्शितौ। तद्भेदत्वेन नाडीभेदनपि ज्ञानीयान्न दोष। अथवा श्लेष्मप्रकृतौ बहुदोषे च नरे षड्विंशदङ्गुला नाडी, अन्यत्र त्वष्टचत्वारिंशदङ्गुल तेन विरोध.। स्वमत त्वाचार्यश्च विशेष विचार्य सामप्रतिपालनार्थं (?) मध्यभाव नेत्रपरिमाण लाघवतनित्यदोष। एव वक्ष्यमाणपरिमाणेषु कुत्रचित् विरोधेषु बोद्धव्यम्। मृदाविति—वृद्धाख्ये धूमपाने द्वात्रिंशदङ्गुलमित नेत्रं भवति। तीक्ष्णे इति रेचनाख्ये धूमपाने चतुर्विंशत्यङ्गुलमित नेत्रमत्र। कासघ्ने धूमपाने षोडशाङ्गुलिपरिमितम्। नाडीविषये (?) वामनीये धूमपाने दशाङ्गुल नेत्रमिति पूर्वमुक्तम्। व्रणधूमनार्थं नाडीस्वरूपमन्यत्राह

* मुद्रितसुश्रुतेषु श्लोकोऽय न दृश्यते।

धूमवर्त्तिविधि धूमपानविधिञ्च ।—

अथैषिका प्रलिम्पेच्च सुश्लक्ष्णा हादशाङ्गुलाम् ।
धूमद्रव्यस्य कल्केन लेपयाष्टाङ्गुलं स्मृतः ॥ १४ ॥
कल्कं कर्षमितं लिप्त्वा छायाशुष्कञ्च कारयेत् ।
ईषिकामपनीयाथ स्नेहाक्तां वर्त्तिमादरात् ॥ १५ ॥
अङ्गारैर्दीपिता कृत्वा धृत्वा नेत्रस्य रन्ध्रके ।
वदनेन पिबेद्धूम वदनेनैव मन्त्यजेत् ।
नासिकाभ्या तत पीत्वा मुखेनैव वमेत् सुधीः ॥ १६ ॥

धूमनिमित्तम् ईदृशी नाडिका नेत्राख्या भवति, कीदृशी ? कलायमण्डल-स्थूलेति नाडिका, उत्तरमुख व्रणलग्नार्थं कलायसदृश मण्डल कार्य्यं, कलायो वर्त्तुलकलाय । पुन, कथम्भूता ? कुलत्थागमरन्ध्रेति—कुलत्थोऽन्न-विशेष प्रसिद्ध, तद्वदनशीलो रन्ध्र सुषिरस्तेन सयुत इत्यर्थ., नाडिकारन्ध्रन्तु कुलत्थसदृश कार्य्यमिति भाव ॥ १२।१३ ॥

इदानी वर्त्तिविधानं दर्शयितुमाह, अथेति।—अथ ईषिका प्रलिम्पेदिति, कीदृशं ? पिष्टैर्भेषजै कर्पटावयव प्रलिप्य (?) तेन शरकाण्डमङ्गुलीसममष्टाङ्गुलमानेन वेष्टयित्वा तत परिशोष्य वर्त्ति कार्य्या अवशिष्ट चतुरङ्गुल शरकाण्डयष्ट्याथमुक्तम । स्नेहकादिष्वपि वर्त्तिकरणम् । ईषिका काश उच्यते, "षागुरि" इति लोके। अथ कथ वर्त्ति प्रज्वाल्य नेत्रे धार्य्या ? तत्प्रकारमाह, अङ्गारादिति (?)—दलनव पललेपम । ईषीकावर्त्तिविधानच प्रायोगिके प्रधानतम, रोपणीया वर्त्तिरियम । षड्भागगोधूमेन नेत्रमावर्त्यात्मान प्रशस्यते इति (?)। कोचित स्नेहेनाभ्यज्येदग्निना दग्ध्वा नेत्रे निवेश्य धम पेय । यदा वदनेन मुखेन कृत्वा धूम पिबेत तदा मुखनैव तन्निर्गम कुर्य्यात। नासिकाभ्या पीतमपि मुखेनैवमेव वमेदित्यत्र नासिकाभ्यामिति द्विवचनेन नासिकारन्ध्रद्वयेन सम्बन्ध । तत इत्यनेन मुखपीते-नेतरमेव नासिकया पीतमित्यर्थ , तथा हि "मुखेन तु वमेत पूर्वं नासिकाभ्या तत पिबेत" (सु० चि० ४० अ०) इति। ननु तन्मान्तरे नासिकापीत पश्चान्मुखपीतं धूम दोषकर भवति, तथा च—"मुखपीत मुखेनैव नस्यपीतञ्च नस्यत । यो वमेन्नस्यतो धूम नस्यपीत मुखेन वा ॥ स नेत्रकर्णनासास्य-रोगयान् लभते गदान्॥" इति, तत कथमत्र नासिकाभ्या तत पीत्वा

व्रणधूपनविधि ।—

शरावसम्पुटे क्षिप्त्वा कल्कमङ्गारदीपितम्।
छिद्रे नेत्रं निवेश्याथ व्रणं तेनैव धूपयेत्॥ १७॥

शमनादिधूमानां पृथक् द्रव्यनिर्देश ।—

एलादिकल्के शमने स्निग्धे मर्जरसे मृदौ।

मुखेनैव वमेत् सुधीरिति ग्रहणम्? उच्यते—पक्षीत्युत्तरगणेनात्र विरोधपरिहारः कृतः, यतो धूमपानभेदेन रोगविशेषेऽपि क्वचिन्मुखपीत क्वापि नासिकापीत क्वापि मुखनासिकापीतमिति, तथा चोक्तम्—"ऊर्ध्वकण्ठाश्रये रोगे मुखेनैव पिबेन्नरः। शिरःकण्ठाधिनासौष्ठे नासया सततं पिबेत्॥ तिष्यक्षे तु मुखेनैव नासया न कथञ्चन। प्रगाढे पानमिच्छन्ति धूमस्थाने तद्विदः॥" इति। कथं पिबेदित्यपि दर्शनात् यथा तत्र प्रायोगिके वैक्लीनेच्छ्वासानादद्यात्। प्राणेन प्रीणयेत् वीक्षेतवरी वेति। लौकिके मुखनासाभ्यां यावदश्रुप्रवर्तनम्। नासिकाभ्यां वैरेचनिकमादोषदर्शनात्। मुखेनैव कासहर श्वासयष्टिलांघव शिरसि मम ७० विचार्य्य मुखपीत मुखेनैव वमेत्, नासापीतञ्च नासिकयैव, उभाभ्यां पीत मुखेनैव वमेदित्यदोष, अत एव सुधीपदनिरूपणमत्र विरोधपरिहाराय बोद्धव्यम॥ १४—१६॥

इदानीं धूमपानविषयत्वेन व्रणधूपनमाह, शरावेति।—कल्कमत्र निम्बवचादीनां विहितम्, यत,—"व्रणे निम्बवचादीनां धूपन सम्प्रशस्यते" इति। छिद्रे इति—शरावसम्पुटस्य। नेत्रमिति—नाडीविशेष, सा धूमपानार्थं कथितैव तद्वदत्रापि ज्ञेयम। व्रणधूपनन्तु वेदनास्रावशान्तये इति। अथवा पूर्वमुक्त शमनादिधूमभेद विहितम। अथवा—"शरावसम्पुटयुत व्रणधूम नयेत व्रणे। धूमनेत्रेण मतिमान वेदनास्रावशान्तये॥" इति॥ १७॥

अथ पूर्वमुक्त शमनादिधूमभेद षट्प्रकार तदर्थं कतिपयानि द्रव्याण्याह, एलादीति।—शमने प्रायोगिके एलादिकल्के धूमपानायमाह, एलादिगणोऽत्र सुश्रुतोक्त, तत यथा—"एलागरकुष्ठसमीध्यामकत्वक्पत्रनागपुष्पप्रियङ्गुहरेणुकाम्बष्ठनखमुस्तक्षीरषड्ग्रन्थाश्रीवेष्टकधोचचोरकबालकगुग्गुलुमर्जरसतुरुष्ककुन्दुरुकागुरुसर्जक्षीरभद्रदारुकुष्ठानि पूर्वागमेषु च" (सु० सू० ३८ अ०) इति। तत्र प्रायोगिककल्पनिमित्तत्वेन कुष्ठतगरयो परित्याग; कार्य्य मक्षिकास्रावभयात्, यदुक्त—"नतकुष्ठे स्रावयतो धूमवर्त्तिप्रधीजिने। मक्षुतुड् विप्रियेण तस्मात्ते नैव

रेचने तीक्ष्णकल्कञ्च कासघ्ने क्षुद्रिकोषणम्॥ १८॥
वामने स्नायुचर्माद्यं दद्याद्धूमस्य पानकम्।
व्रणे निम्बवचाद्यञ्च धूपनं सम्प्रशस्यते॥ १९॥

बालग्रहादौ अपराजितो धूप।—

अन्येऽपि धूमा गेहेषु कर्त्तव्या रोगशान्तये।
मयूरपिच्छं निम्बस्य पत्राणि बृहतीफलम्॥ २०॥
मरिच हिङ्गु मासी च वोजं कार्पाससम्भवम्।
छागरोमाहिनिर्मोक विष्ठा वैडालिकी तथा॥ २१॥

योजयेत्॥" (शालाक्य०) इति। बृहदाविति—बृहच्छाख्ये। स्निग्धमिति—एरण्डादिफलसज्ज्ञाप्रायम्। अथवा स्निग्धमित्यनेन समस्तधूमविधान सङ्गेहं काय्यमिति पूर्वोक्तत्वात्। साजरसमिति—सजरसप्राय प्रायोगिकमित्यर्थ, तदुक्त—"स्निग्धसज्जमधूच्छिष्ट-स्नेहगुग्गुलुसज्जके। स्नेहिकी वर्त्तिरभिधु नेव हाविश्व-दङ्गुलम्॥" इति। रेचने तीक्ष्णकल्कमिति, रेचने इति—शोधनाख्यधूमपाने, तीक्ष्णकल्कमिति—शिरोविरेचनद्रव्यकृतवर्त्तिरित्यर्थ। शिरोविरेचनेवर्त्तिर्नेव हस्त-मितमित्युक्तत्वात्। शिरोविरेचनैरिति—अपामार्गबीजादिभि। हस्तमितमिति—चतुर्विंशदङ्गुलम्। कासघ्ने क्षुद्रिकोषणमिति—कासघ्ने धूमपाने क्षुद्रिका कण्टकारिका। ऊषणमत्र विकटक ग्राह्य तन्त्रान्तरदर्शनात्, तत् यथा "वृषण बृहती शृङ्गी चेङ्गुदीत्वक्सनागिला। एषा कासहरा वर्त्तिर्नेव षोडश-काङ्गुलम्॥" इति। वामने स्नायुचर्माद्यमिति—वामने धूमपाने स्नायुचर्माद्य चर्म्म दद्यादित्यर्थ, आदियहणात् अश्वित्वरवस्त्रूरमपि गृह्यते, तदुक्त—"वाम-नार्थे तु वस्त्रूर-स्नायुश्वित्वरचर्मभि। वर्त्तिर्दशाङ्गुल नेव धूम पञ्चविधो मत॥" इति। वस्त्रूर शुष्कनासमिति। एके धूमस्य पानकमित्यनेन घ्राणधूपनस्य व्याख्यान कुर्वन्ति, तत्र धूमस्य घ्राणधूपनस्य पानकमिति—तद्धितद्रव्यमित्यर्थ, इति न सर्वसत, "धूम पञ्चविधो मत" इत्यादिवचनात्॥ १८।१९॥

अथान्ये गृहधूमा सन्ति तानपि प्रसङ्गतो दर्शयन्नाह, अन्ये इति।—अयमपरा-जितसज्ञो धूप प्रसिद्ध एव, तत्र बृहतीफल कण्टकारिकाफलम्। मासी जटाख्या। अहिनिर्मोक सर्पकञ्चुकम्। विष्ठा वैडालिकी मार्जारपुरीषम्। ननु तन्त्रान्तरे

गजदन्तश्च तच्चूर्णं किञ्चिद्घृतविमिश्रितम्।
गेहेषु धूपनं दत्तं सर्वान् बालग्रहान् जयेत्॥
पिशाचान् राक्षसान् जित्वा सर्वज्वरहरं भवेत्॥ २२॥

धूमप्रयोगे अपथ्यनिदेश धूमनेत्रस्य उपादाननिर्देशश्च।—

परिहारस्तु धूमेषु कार्य्यो रेचननस्यवत्।
नेत्राणि धातुजान्याहुर्नलवशादिजान्यपि॥ २३॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्य्येण विरचितायां शार्ङ्गधरसंहितायाम्
उत्तरखण्डे उत्तरबस्तिविधिर्नाम नवमोऽध्यायः॥ ९॥

साङ्गेश्वरधूपसञ्ज्ञोऽयं कथमत्रापराजितश्च? उच्यते—तव साङ्गेश्वरमप्यत्रैव कटनिर्माल्याभिधानत्वाददोषः, तदुक्तं—"कटजटागोशृङ्गविडालविष्ठोरगस्य निर्मोकं। सदनफलभूतकेशीवशत्वगिति निर्माल्यम्॥ यवमसुरचन्द्रकच्छागलरोमाणि सर्वपा सवचा। हिङ्गगवहिजमरिचा समभागा छागमूत्रसम्पिष्टा॥ धूपनविधिना शमयत्येते सर्वज्वरान्प्रियतम्। ग्रहडाकिनीपिशाचप्रेतविकारापहो धूपः॥" इति बहुद्रव्योक्तकल्पनाद्वा न दोषः॥ २०—२२॥

अथ धूमपानपरिहारं नेत्रार्थं द्रव्यञ्च दर्शयन्नाह, परिहार इति।—धूमेष्विति—षड्विधधूमपानविषयेषु परिहारस्त्याज्याभिधः, स च विरेचननस्यवत् कार्य्यः, तत्रस्थैव चातस्यम्। अथवा परिहारस्तु धूमेषु कार्य्यो रेचनवत्तस्थेति पाठान्तरम्। यथा विरेचनोक्ते सति प्रवातसेवाशीतास्बुस्नेहाभ्यङ्गजीर्णतामित्यादिकं न सेवेत तथा धूमपानके सति तत्र वातसेवादिपरित्याग इत्यभिप्रायः। नेत्राणीति—धूमपानार्थं नाडीवत्त्राणि, तान्यपि कार्ष्णधातुजानि नलवशादिजान्यपि बोद्धव्यानि, धातवोऽत्र सुवर्णाद्या आदिग्रहणादन्यकाष्ठदन्तशृङ्गघटितानीत्यर्थः॥ २३॥

इति श्रीवास्त्यान्वयप्रकाशवैद्यभावविशारदात्मजेनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायामुत्तरखण्डे धूमपानविधिर्नाम नवमोऽध्यायः॥ ९॥

दशमोऽध्यायः ।

अथ गण्डूषकवलप्रतिसारणविधिं । (क)—

चतुर्विधगण्डूषकवलयो नामनिर्देश ।—

चतुर्विधः स्याद्गण्डूषः स्नैहिकः शमनस्तथा ।
शोधनो रोपणश्चैव कवलश्चापि तद्विधः ॥ १ ॥

दोषभेदेन तेषां प्रयोगनिर्देश द्रव्यनिर्देशश्च ।—

स्निग्धेषु स्नैहिको वाते स्वादुशीतैः प्रसादनः ।
पित्ते कटूष्णलवणैः * उष्णैः सशोधनः कफे ॥ २ ॥
कषायतिक्तमधुरैः † कटूष्णो रोपणो व्रणे ।
चतुष्प्रकारो गण्डूषः कवलश्चापि कीर्त्तितः ॥ ३ ॥

(क) ऊहगतदोषहरत्वसामान्यात् धूमपानमभिधाय सम्प्रति गण्डूषकवल-प्रतिसारणविधिमारभते—अथेति ।

चतुर्विध इति ।—कवलश्चापि तद्विध इत्यनेन कवलोऽपि स्नैहिकादिचतुर्भेदैरेव योज्य, यथा चतु प्रकारो गण्डूषस्तथैव कवलश्चतु प्रकारो भवतीत्यभिप्राय ॥ १ ॥

अथ यच्चतु प्रकार तत्प्रकारविधानमाह, स्निग्धेरिति ।—स्निग्धेषु स्नैहिक इत्यस्य स्थाने सुश्रुत स्निग्धाद्य, स्नैहिको वाते इति पाठ साधु । स्नैहिके गण्डूषकवलयोभेद कार्य्य इति शेष (१)। स्वादुशीतै प्रसादन पित्ते प्रशस्त स्वादुमधुर शीत स्यर्शात वीर्य्यात वा । ‡ प्रसादनो गण्डूषपर्य्याय, स चात्र शमनभेदो ज्ञेय । कटूष्णलवणैरिति, सशोधन इति— § गण्डूषकवलापरपर्य्याय-वाचकाभिधान कफे प्रशस्त, के कटूष्णादिभिरिति । उष्णैरित्यस्य स्थाने रूक्षैरिति पाठान्तरम् । कषायतिक्तमधुररिति व्रणे सुखज्ञातापडकादिरूपे ।

---

* उष्णै इत्यत्र सुश्रुते रूक्षोष्णै इति पाठ ।

† सुश्रुते कटूष्णै इति पाठ ।

‡ सुश्रुते प्रसादन इति पाठ न तु शमन । किञ्च प्रसादनो न गण्डूष पर्य्याय किन्तु गण्डूषभेद ।

§ अत्रापि सशोधन न गण्डूषादिपर्य्याय किन्तु गण्डूषादिभेद ।

गण्डूषकवलयोर्भेद ।—

असञ्चारी मुखे पूर्णे गण्डूष: कवलस्त्वर ।
तत्र द्रवेण गण्डूष: कल्केन कवल स्मृत: ॥ ४ ॥

गण्डूषकवलयो द्रव्याणा परिमाणनिर्देश ।—

द्रव्याद्द्रवेषु चूर्णाच्च गण्डूषे कोलमात्रकम् ।
कर्षप्रमाण कल्कश्च दीयते कवले बुधै: ॥ ५ ॥

रोपणो * गण्डूषसज्ञ । कटुक्त इत्यस्य स्थाने कटूष्ण इति पाठ प्रचरति। एभिस्तु प्रकारै कृत्वा गण्डूष कथित , न केवल गण्डूष कवलस्यापीदृशोऽवगन्तव्य । अन्यत्रे कैचिदिति पठन्ति—"एव श्लेष्मघ्न चौद्र-रसमूत्रास्रसम्मृता । कषायोष्णो-दकाभ्याच्च कवला दोषतो हिता ॥" (सु० चि० ४० अ०) इति। बहुपुस्तकेषु न लिखित सर्वोक्तेनैव कृतार्थत्वात् ॥ २।३ ॥

अथ गण्डूषकवलयोर्भिन्नत्वप्रतिपादनार्थं विधानमाह, असञ्चारीति।—पूर्णे मुखे सञ्चरणरहिते य असञ्चारी भवति चलनादिरहित स गण्डूष कथित , तद्विपरीत कवल इति। अत एव द्रवद्रव्येण गण्डूष कल्केन कवल इत्यर्थ , तथा चोक्त चक्रदत्ते—"मुख सञ्चार्यते या तु सा मात्रा कवले स्थिता। असञ्चार्या तु या मात्रा गण्डूषे सा प्रकीर्त्तिता ॥" इति। अयमेव पाठ: सम्मत ॥ ४ ॥

गण्डूषकवलयोर्द्रव्याणा परिमाणमाह द्रव्यादिति।—गण्डूषे गण्डूषकरणविधौ चूर्णे वा। गण्डूषे कोलमात्रक कर्षप्रमाणकल्कश्च कवले दीयते बुधै। गण्डूषे गण्डूषकरणविधौ चूर्णं व्याधिविहितद्रव्यकृत रज कोलमात्रमिति कर्षार्द्धं द्रवेषु तोयक्षीरप्रभृतिषु सञ्चार्य द्रव्यादित्यर्थ। द्रवपरिमाणमुक्त, यावता मुख पूर्ण भवति तत्परिमाणञ्चैकवार गण्डूषनिमित्तम , पुन पुनरर्थञ्च बहुतरद्रव्यं सङ्कल्प्य तदनसारेण चूर्णमपि सञ्चार्य देयम , एव सर्वं प्रज्ञातव्यम , तथा चोक्त सुश्रुत—† "तावच्च धारयितव्योऽनन्यमनसा सञ्चारयितव्यश्च, यावद्दोष-प्रातपूर्णगलकपोलतड्डासास्रोता नयनपरिप्लवश्च भवति तदा विमोक्तव्य, पुनश्चान्यो ग्रहीतव्य" (सु० चि० ४० अ०) इति। ग्रथ सुगमम् ॥ ५ ॥

* गण्डूषसज्ञ इत्यत्र गण्डूषभेद इति पाठ समीचीन ।

† मुद्रितसुश्रुतसहितासु "तावच्च धारयितव्योऽनन्यमनसा उन्नतदेहेन यावत् दोषपरिपूर्णकपोलत्व नासास्रोतो—" इत्यादि पाठ ।

गण्डूषकवलयो वयोनिर्देश ।—

धार्य्यन्ते पञ्चमाद्वर्षाद्गण्डूषकवलादयः ॥ ६ ॥

गण्डूषस्य कतिवारकर्त्तव्यतानिर्देश ।—

* गण्डूषान्त स्थित कुर्य्यात् स्विन्नभालगलादिकः ।
मनुष्यस्तीक्ष्णतथा पञ्च सप्त वा दोषनाशनात् ॥ ७ ॥
कफपूर्णास्यता यावच्छेदो दोषस्य वा भवेत् ।
नेत्रघ्राणसुतिर्यावत्तावद्गण्डूषधारणम् ॥ ८ ॥

स्नैहिकगण्डूषस्य द्रव्यम् ।—

तिलकल्कोदकं क्षीरं स्नेहो वा स्नैहिके हितः ॥ ९ ॥

अथ क्षीद्रशो गण्डूषकवलयोग्यत्वमाह, धार्य्यन्ते इति ।—पञ्चमाद्वर्षादुपरि कालाद्वयायामेव गण्डूषकवलादयो धार्य्यन्ते, आदियहणात् प्रतिसारणस्यापि सङ्ग्रहः। पञ्चमवर्षग्रहणं तन्त्रान्तरेऽपि दर्शितम्, तद् यथा—"धूमो द्वादशवर्षस्य कवलः पञ्चमे हितः" इति ॥ ६ ॥

अथ कियत्सङ्ख्याभिर्गण्डूषविषयं तं दर्शयन्नाह, गण्डूषेति।—गण्डूषं अन्तः स्थितं* मुखमध्यस्थितं यस्य स तथा, पुनः स्विन्नं भालगलादि यस्य स तथा, भालं कपालं, आदियहणान्नासाक्षीलोचनादीनां ग्रहणम्, ईदृशो रोगी विवेकं पञ्चवारं वा गण्डूषं कुर्य्यादित्यभिप्रायः। अथवा दोषनाशनात् मर्य्यादीकृत्येत्यर्थः। केचिन्निबन्धकाराः "गण्डूषान्त स्थित" इत्यस्य श्लोकं वक्ष्यमाणं "कफपूर्णास्यता" इति यावत् श्लोकञ्च न पठन्ति, चेपकाविति मन्यमानत्वात्। वक्ष्यमाणो यथा "कफपूर्णास्यता यावच्छेदो दोषस्य वा भवेत्। नेत्रघ्राणसुतिर्यावत्तावद्गण्डूषधारणम्॥" अस्माकं मते तु युक्तार्थत्वेन सङ्गतावेव, बहुपुस्तकेषु लिखितदर्शनात् ॥ ७।८ ॥

इदानीं चतुर्विधयो कवलगण्डूषयो कतिपयान् योगानाह, तिलेति।—स्नैहिके गण्डूषे तिलकल्कवस्त्रविप्लोडितसुदकमिति। क्षीरमत्र सामान्येन गोप्रभृतिजनितम्। स्नेहश्चाप्येवम् ॥ ९ ॥

---

* "गण्डूषान्त स्थित." इत्यत्र "गण्डूषान् सुस्थित." इति गूढार्थदीपिकापाठः समीचीनः।

हनुवक्त्रदाहे गण्डूष ।—

तिला नीलोत्पलं सर्पिः शर्करा क्षौरमेव च।
सक्षौद्रो हनुवक्त्रस्थो गण्डूषो दाहनाशनः॥ १०॥

मुखव्रणादौ गण्डूष ।—

वैशद्यं जनयत्यास्ये सन्दधाति मुखे व्रणान्।
दाहतृष्णाप्रशमन मधुगण्डूषधारणम्॥ ११॥

विषादौ दन्तचाले च गण्डूषौ।—

विषे क्षाराग्निदग्धे च सर्पिर्धार्य्यं पयोऽथवा।
तैलसैन्धवगण्डूषो दन्तचाले प्रशस्यते॥ १२॥

मुखशोषे कफे च गण्डूषौ।—

शोष मुखस्य वैरस्य गण्डूषः काञ्जिको जयेत्।
सिन्धुत्रिकटुराजौभिराद्रैर्वा कफे हितः॥ १३॥

अथ क्षारादिदग्धवक्त्रस्य योगमाह, तिला इति।—तिला इत्यादियोगो व्यस्त समस्तश्च योज्य यदाह कश्चित—"गण्डूषः शर्कराक्षौद्र पिष्टमाक्षपयस्तिले। व्यस्तैः समस्तैर्योज्यस्तु मुखे क्षारादितापिते॥" इति॥ १०॥

वैशद्यमिति।—"सन्दधाति मुखे व्रणान्" इत्यस्य स्थाने * "सन्निहन्ति मुखव्रणान्" इति पाठ साधु। दाहतृष्णादयो मुखस्येति॥ ११॥

विषे इति।—विषे क्षाराग्निदग्धे, मुखे इति शेष, धार्य्यमित्यनेन गण्डूषविषयम्। अपराण्याह, तैल काञ्जिकयोग सैन्धव विहाय क्षारदग्धेऽपि प्रचरति, तथा च सुश्रुते—"ताम्बूलमध्यायितचूर्णकेन दग्धं मुख यस्य भवेत् कथञ्चित्। तैलेन गण्डूषमसौ विदध्यादम्लारनालेन पुनः पुनर्वा॥" इति॥ १२॥

अथ दीपनिशेषेण द्रव्यविशेषजनितान् प्रदर्शयन्नाह, शोषमिति।—सिन्धुत्रिकटु-राजौभिरित्यनेन कवलयोगमाह, सैन्धवादयो व्यस्ता समस्ताश्च योज्या। यद्येतेषा गण्डूषस्तदा कल्क क्वाथ्य पटे विक्षाल्य तद्वदेव गण्डूष कार्य्य इत्यर्थ॥ १३॥

---

* सुश्रुतचक्रदत्तयो. सन्दधाति इत्येव पाठो वर्त्तते।

कफे रक्तपित्ते च गण्डूष ।—

त्रिफलामधुगण्डूष कफासृक्पित्तनाशनः ॥ १४ ॥

मुखपाके गण्डूष ।—

दार्वी गुडूची त्रिफला द्राक्षा जात्याश्च पल्लवाः।
यवासस्येति तत्क्वाथः षष्ठांशक्षौद्रसयुतः॥
शीतो मुखे धृतो हन्यान्मुखपाकं त्रिदोषजम् ॥ १५ ॥

कवलप्रतिसारणयोर्द्रव्यनिर्देश ।—

यस्यौषधस्य गण्डूषस्तस्यैव प्रतिसारणम्।
कवलस्यापि तस्यैव ज्ञेयोऽत्र कुशलैर्नरैः॥ १६ ॥

मुखजाड्यादौ कवल ।—

केशर मातुलुङ्गस्य सैन्धवोषणसयुतम्।
हन्यात् कवलतो जाड्यमरुचिं कफवातजाम् ॥ १७ ॥

त्रिफलेति।—त्रिफलेत्यादियोग क्वथितो बोद्धव्य, कल्क इति केचित। कफासृक्पित्तप्रकोप मुखस्थित इति भाव ॥ १४ ॥

अपरमपि मुखपाकयोगमाह, दार्वीति।—दार्वी दारुहरिद्रा। त्रिफला हरीतकीविभीतकामलकसज्ञा। जाती मालती। यवासस्येति तत्क्वाथ इत्यस्य स्थाने अन्यत्रा चेति तत्क्वाथ पाठ साधु, अन्यतो दर्शनात, तथा हि—"जातीपत्रासृताद्राक्षा-पाठादार्वीफलत्रिके। क्वाथ क्षौद्रयुत शीतो गण्डूषो मुखपाकनुत॥" इति। षष्ठाशक्षौद्रसयुत इति—क्वथितजलस्य यत् षष्ठाश तेन सम क्षौद्रमिति। अथवा षष्ठाशक्षौद्रसयुत इति पाठ समीचीनो ज्ञेय (?), तेन क्वाथस्य पञ्च भागा षष्ठो भाग क्षौद्रस्येति व्याख्यान समीचीनम्। मुखे धृत इत्यनेन गण्डूषविधय ॥ १५ ॥

यस्येति।—"यस्यौषधस्य गण्डूष तस्यैव प्रतिसारणम्। कवलस्यापि तस्यैव ज्ञेयोऽत्र कुशलैर्नरैः॥" अय श्लोको बहुपुस्तकेषु न लिखित, केनचित् लिखित्वा क्षोक्तः। सङ्गतोऽयमिति मन्यमानैरस्माभिरपि न त्याज्य युक्तार्थत्वात ॥ १६ ॥

अथ कवलार्थं योगमाह, केशरमिति।—मातुलुङ्गो बीजपूरक', तस्य केशरं मध्यस्थितावयवविशेषम्, लोके चतूरौन्नामक वाच्यम्। सैन्धवोषणचूर्णं मनाक् देयं, ऊषण मरिचम्। जाड्यमिति मुखस्येति ॥ १७ ॥

प्रतिसारणस्य त्रैविध्यनिर्देश ।—

कल्कोऽवलेहचूर्णश्च त्रिविध प्रतिसारणम्।
अङ्गुल्यग्रप्रणीतश्च यथास्व मुखरोगिणाम् ॥ १८ ॥

दन्तमूलात रक्तस्रावादौ कुष्ठादिप्रतिसारणम् ।—

कुष्ठ दार्वी समङ्गा च पाठा तिक्ता च पोतिका।
तेजनी मुस्तलोध्रे च चूर्ण स्यात् प्रतिसारणम् ॥
रक्तस्रुति दन्तपीडा शोथं दाहञ्च नाशयेत् ॥ १९ ॥

हीनातियोगयुक्तगण्डूषादिदोषम् ।—

हीनयोगात् कफोत्क्लेशो रसाज्ञानारुचौ तथा।

पूर्वमुक्त प्रतिसारणविषय तदिदानी दर्शयन्नाह, कल्क इति।—प्रतिसार्यते क्षुण्यते अनेनेति प्रतिसारणम्। ननु तन्त्रान्तरे प्रतिसारणविषय चतुर्विध, तद्यथा —"विभज्य भेषज युक्त्या कुर्वीत प्रतिसारणम्। कल्को रसक्रिया चौद्र चूर्णश्चेति चतुर्विधम् ॥ अङ्गुल्यग्रप्रणीतन्तु यथास्व मुखरोगिणाम्। तस्मिन् योगमयोगञ्च कवलोक्त विभावयेत् ॥" (सु० चि० ४० अ०) तत कथमत्र त्रिविधम् ? उच्यते, अत्रावलेहस्यैव रसक्रियात्वाद्वयोस्तदन्त प्रवाद', तेनावलेहयहणेन द्वयोरपि यहण-मित्यदोष ॥ १८ ॥

अथ प्रतिसारणचूर्ण दर्शयन्नाह, कुष्ठमिति।—कुष्ठ रुक्। दार्वी दारुहरिद्रा। समङ्गा अङ्गणिकारिका। पाठा अम्बष्ठा। तिक्ता कटुकी। पोतिका हरिद्रा। तेजनी चविका इति चक्र, मूर्वा इति कार्त्तिक। मुस्त मेघ। लोध्र प्रसिद्धम्। रक्तस्रुतिमव दन्तमूलगतदोषस्यैव बोद्धव्यम्। शोथ दाहमपि मुखजनितमेव ॥१९॥

इदानी हीनातियोगत्वेन गण्डूषादीना दोषमाह, हीनयोगात् कफोत्क्लेश इति।—कफाधिक्यत्वेनोत्क्लेश उपस्थितवमनोन्मुखता। रसाज्ञानारुची तथेति—रसाना मधुरादीनाम् अज्ञानं रसनेन्द्रियविषयग्रहानिरित्यभिप्राय। अरुचिस्त्रिविध, अरुचिरन्नाभिनन्दन भक्तद्वेष इति, तत यथा—सत्यां बुभुक्षायामन्नव्यवहारा-ध्यानमर्थानित्यरुचि। अभिलषितमन्नम्न दीयमान न अभ्यवहरतीत्यन्नाभिनन्दनम्। अन्नस्य श्रवणस्मरणदर्शनस्पर्शने, यत्र उद्विजते स भक्तद्वेष इति।

अतियोगात् मुखे पाकः शोषस्तृष्णा क्लमो भवेत् ॥ २० ॥

सम्यग्योगयुक्तगण्डूषादिलक्षणम् ।—

व्याधेरपचयस्तुष्टिर्वैशद्यं वक्त्रलाघवम् ।
इन्द्रियाणां प्रसादश्च गण्डूषे शुद्धिलक्षणम् ॥ २१ ॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायां-
मुत्तरखण्डे गण्डूषकवलप्रतिसारणविधिर्नाम दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः।

अथ प्रलेपमूर्द्धतैलकर्णपूरणविधिः।—

प्रलेपस्य पर्य्यायाः भेदाश्च।—

आलेपश्च च नामानि लिप्तो लेपश्च लेपनम् ।
दोषघ्नो विषहा वर्ण्यो मुखलेपस्त्रिधा मतः ॥ १ ॥

अतियोगादिति गण्डूषकवलादीनामेव। एके क्षीनातियोगविषयं शोधनाख्यगण्डूषं मानयन्ति, तथा चोक्तं— "शोधनीये विशेषेण भवत्येतत्तु लक्षणम्" इति ॥ २० ॥

अथ सम्यक् शोधितस्य गण्डूषस्य शुद्धिलक्षणमाह, व्याधेरिति।—व्याधेरपचयो विनाशः। तुष्टिः सन्तोषः। वैशद्यं मुखस्येति। इन्द्रियाणां श्रवणनयनघ्राण-रसनादीनां प्रसादः स्वविषयग्रहणसामर्थ्यम्। एके अपचयस्थाने अपनयं, गण्डूषस्थाने कवलं इति पठन्ति, तथापि स एवार्थः ॥ २१ ॥

इति श्रीबालव्याख्यायां प्रकाशवैद्यमाधवसिद्धात्मजैनाढमल्लेन विरचितायां शार्ङ्गधरदीपिकायां-
मुत्तरखण्डे गण्डूषकवलप्रतिसारणविधिर्नाम दशमोऽध्यायः ॥ १० ॥

अथ कवलादीनां विधिमभिधाय सम्प्रति लेपमूर्द्धतैलकर्णपूरणविधिमारभते, तत्र तावत् प्रलेपनामान्याह, आलेपश्चेति।—त्रिधा मत इत्यनेन एको दोषघ्न द्वितीयो विषहा कथितः अपरस्तु वर्ण्य इति त्रिधा संज्ञा आम्नायते, अन्यथापि प्रसिद्ध एव। स एव वर्ण्यो मुखलेपः कथितः, न तु चत्वारो भेदाः, वक्ष्यमाणत्वात् ॥ १ ॥

लेपस्य प्रमाणनिर्देश आर्द्रशुष्कयो गुणनिर्देशश्च।—

त्रिप्रमाणश्चतुर्भाग-त्रिभागार्द्राङ्गुलोन्नतः।
आर्द्रो व्याधिहर स स्याच्छुष्को दूषयति च्छविम् ॥ २ ॥

शोथे पुनर्नवादिलेप।—

पुनर्नवा दारु शुण्ठी सिद्धार्थं शिग्रुमेव च।
पिष्ट्वा चैवारनालेन प्रलेपः सर्वशोथजित् ॥ ३ ॥

दाहे विभीतकमज्जालेप।—

विभीतफलमज्जाया लेपो दाहार्त्तिनाशनः ॥ ४ ॥

त्रिप्रमाण इति।—तेषां दोषघ्नादीनां त्रयाणां त्रय एव प्रमाणा यथाऽनुक्रमेण बोद्व्या, स कथम्भूत? चतुर्भागविभागार्द्राङ्गुलोन्नत इति। एतेन किमुक्तम्? दोषघ्ना लेप अङ्गुलस्य चतुर्भागप्रमाणेनोत्सेध कृत्यादित्यभिप्राय। एव त्रिफला लेपस्तु त्रिभागोत्सेध कार्य, त्रिभागता अङ्गुलस्येति सम्बन्ध। वर्ष्यो लेपश्चाङ्गुलोन्नत एव कार्य। अथार्द्रशुष्कयो फलमाह, आर्द्रो व्याधिहर इत्यादि।—स पूर्वोक्तो लेपो यावदार्द्रो भवति तावत् व्याधिहरो ज्ञेय, यदा शुष्को भवति तदा छविं दूषयति, छविं छाया, सा च वर्णप्रभोपलक्षिता, तथा च—"वर्णप्रभाश्रिता या च छाया सा परिकीर्त्तिता" इति। ननु छायाप्रभयोस्तु को भेद? उच्यते—"वर्णमाक्रामति च्छाया प्रभा वर्णप्रकाशिनी। आसन्ना लक्ष्यते छाया प्रभा दूरात्र लक्ष्यते॥" इति। न केवल वर्णप्रभाच्छायाना लक्षणभेद, सङ्ख्याभेदोऽप्यस्तीति, तत यथा—चतुर्वा वर्ण,—गौर श्रेष्ण श्याम गौरश्याम इति। प्रभा च सप्तविधा—रक्ता पीता सिता श्यामा हरिता पाण्डुराऽसितेति। छायाऽपि पञ्चविधा—स्निग्धा विमला रूक्षा मलिना सङ्किता इति॥ २॥

पूर्वमुक्त दोषघ्नो त्रिफला वर्ष्यो लेपस्तथा, तत्र तावद्दोषघ्नो लेपो यथा, पुनर्नवेति।—सिद्धार्थं सर्षप। शिग्रु शोभाञ्जन। आरनाल काञ्जिकभेद, तदभावेऽम्लतक्र ग्राह्यमिति सर्वत्र। अथ लेप सर्वशोथजिदित्यनेन वातकफप्राय शोथ विशेषेण जयतीति प्रचरतीति। शोथोऽत्र दोषजनित शोफरोगसम्भव, न तु व्रणशोथ, तत्राप्यागन्तुजोऽपीति सम्बन्धात् ॥ ३ ॥

अथापर पित्तजदाहघ्नी लेपमाह, विभीतेति।—अत्रापि आरनालेन पेषणमिति सम्बन्धो ज्ञेय ॥ ४ ॥

विसर्पादौ दशाङ्गलेप ।—

* शिरीष मधुयष्टी च नगरं रक्तचन्दनम ।
एला मासौ निशायुग्मं कुष्ठ बालकमेव च ॥ ५ ॥
इति सच्चूर्ण लेपोऽय पञ्चमाशघृतप्लुत: ।
जलेन क्रियते सुश्लैर्दशाङ्ग इति सज्ञित: ॥
विसर्पान् विषविस्फोटान् शोथान् दुष्टव्रणान् जयेत् ॥ ६ ॥

भल्लातकशोथे अजादुग्धादिलेपद्वयम ।—

अजादुग्धतिलैर्लेपो नवनीतेन संयुत: ।
शोथमारुष्करं हन्ति लेपो वा क्षणमृत्तिकै: ॥ ७ ॥

कीटजविस्फोटे लाङ्ल्यादिलेप ।—

लाङ्ल्यतिविषालाबू-जालिनीमूलबीजकै: ।
लेपो धान्याम्बुसम्पिष्ट. कीटविस्फोटनाशन: ॥ ८ ॥

अथ दशाङ्गलेपस्तत्रक लेपमाह, शिरीषमिति ।—अत्र शिरीष शिरीषत्वक्। एके पञ्चाङ्गशिरीषनत्र योजयन्ति प्रयोगान्तरदर्शनात, तथा हि—"शिरीषपञ्चाङ्ग तुषोदकेन कल्कीकृतञ्चैव घृतेन युक्तम। निहन्ति विस्फोटकमुग्ररूप सदाहपाक-स्रुतिरागयुक्तम ॥" इति। अत्र लघूनाम्यपत्रफलान्यङ्गानि पत्रमिति। निशायुग्ममिति —हरिद्राद्वयम। पञ्चमाशघृतप्लुत इति—सकलद्रव्याणा सप्तभागमिलितानां चूर्ण कृत्वा तदन जलेन सम्पिष्य पश्चात पञ्चमाशेन घृतेन सम्भाव्य लेप कार्य। प्रक्षनाशेऽत्र द्रव्यपरिमाणात् ॥ ५।६ ॥

अथ विषफ्लेपमाह, अजेति ।—अरुष्करो भल्लातक तज्जनित शोथ इति ॥ ७ ॥

अपरमाह, लाङ्ल्यति ।—लाङ्ली कलिकारिका। अतिविषा "अतीस"-शब्दवाच्या। अलाबू कटुतुम्बी। जालिनी "तोरई" शब्दवाच्या। मूलक प्रसिद्ध

---

* एतद्दशाङ्गलेपानन्तर "सिन्द्वाथकी वचा हिङ्गु करञ्जौ दन्तदारु च। सक्षिप्ता विफला श्वेता कटभीत्वक् कटुत्रयम् ॥ समाशानि प्रियङ्गुश्च शिरीषो रजनीद्वयम्। वस्त्रसूत्रेण पिष्टोऽयमगद पानमञ्जनम् ॥ नस्यमालेपनञ्चैव स्नान-मुद्वर्तन तथा। अपस्मारविषोन्माद कृत्याकल्कोल्बरापह' ॥ भूतभय भय हन्ति राजद्वारे च जयते। सर्पैरेतेन सिद्ध वा सर्पोमूल तदर्थकृत ॥" इत्यधिक: पाठ. क्वाचित।

व्यङ्गे रक्तचन्दनादिलेप ।—

रक्तचन्दनमञ्जिष्ठा-लाभ्रकुष्ठप्रियङ्गवः ।
वटाङ्कुरा मसूराश्च व्यङ्गघ्ना मुखकान्तिदाः ॥ ९ ॥

मुखपिडकादौ मातुलुङ्गजटादिलेप ।—

मातुलुङ्गजटा सर्पिः शिला गोशकृतो रसः ।
मुखकान्तिकरो लेपः पिडकाव्यङ्गकालजित् ॥ १० ॥

तारुण्यपिडकाया लोध्रादिलेपत्रयम ।—

लोध्रधान्यवचालेपस्तारुण्यपिडकापहः ।
तद्वद्गोरोचनायुक्तं मरिचं मुखलेपनम् ॥
सिद्धार्थकवचालोध्र-सैन्धवैश्च प्रलेपनम् ॥ ११ ॥

व्यङ्गे अर्जुनत्वगादिलेपत्रयम् ।—

व्यङ्गेषु चार्जुनत्वग्वा मञ्जिष्ठा वा समाक्षिका ।

तस्य बीजानि। एके अलाबूप्रभृतीना वराणा बीजानि गृह्णन्ति। धान्याम्लसन्निभ इति—धान्याम्लं काञ्जिकभेद। कीटविस्फोट सविषकीटदशनजनितविस्फोट इत्यर्थ, यथा सुतादौ ॥ ८ ॥

अथ विषहलेपमभिधाय सम्प्रति व्यङ्गलेपमाह, रक्तचन्दनेति।—रक्तचन्दनादीनि व्यङ्गानि समङ्गानि वा सङ्कृत्य जलेनालिप्य लेप कार्य इति सम्बन्ध। अत्र प्रियङ्गुर्लताविशेष, तस्या फलानि। वटाङ्कुरा इति—वटस्याभिनवा पत्रमुकुला। मसूरोऽन्नविशेष ॥ ९ ॥

मातुलुङ्गेति।—मातुलुङ्गो बीजपूरक तस्य जटा मूलम्। शिला मन शिला। गोशकृतो रस इति—गोशकृत गोपुरीषं तस्य रस इत्यर्थ ॥ १० ॥

लोध्रेति।—धान्य धनियाशब्दवाच्यम्। तद्वदिति—तारुण्यपिडकापहोऽन्यश्च लेपो बोद्धव्य। गोरोचना प्रसिद्धा। सिद्धार्थकेति, अत्रापि तारुण्यपिडकापह इति सम्बन्ध, तेन सिद्धार्थादिद्रव्यचतुष्केलेंपो यौवनपिडकापहो भवतीति मतान्तरात् ॥ ११ ॥

व्यङ्गेष्विति।—अर्जुनो वृक्षविशेष, स च कौहाशब्दवाच्य तस्य त्वक् छल्ली। मञ्जिष्ठा प्रसिद्धा। समाक्षिका * धातुमाक्षिकसयुक्ता, सा चार्जुनत्वक् मञ्जिष्ठा

---

* समाक्षिका क्षौद्रसयुता इति वृद्धा ।

लेपः सनवनीता वा श्वेताश्वखुरजा मसी ॥ १२ ॥

मुखकार्ष्ण्ये अर्कक्षीरादिलेप ।—

अर्कक्षीरहरिद्राभ्यां मर्दयित्वा विलेपनात्।
मुखकार्ष्ण्यं शमं याति चिरकालोद्भवं ध्रुवम् ॥ १३ ॥

तारुण्यपिडकादौ वटपत्रादिलेप ।—

वटस्य पाण्डुपत्राणि मालती रक्तचन्दनम् ।
कुष्ठं कालीयकं लोध्रमेभिर्लेपं प्रयोजयेत्।
तारुण्यपिडकाव्यङ्ग-नीलिकादिविनाशनम् ॥ १४ ॥

अरुषिकाया पुराणपिण्याकादिलेप ।—

पुराणमथ पिण्याकं पुरीषं कुक्कुटस्य च।
मूत्रपिष्टः प्रलेपोऽयं शीघ्रं हन्यादरुषिकाम् ॥ १५ ॥

अरुषिकाया खदिरादिलेप ।—

खदिरारिष्टजम्बूना त्वग्भिर्वा मूत्रसंयुतैः।
कुटजत्वक् सैन्धवं च लेपो हन्यादरुषिकाम् ॥ १६ ॥

वा, तेन विकल्पत्वात् त्वच एको योग, मञ्जिष्ठाया द्वितीयो योग अश्वखुरजनितस्य कज्जलस्य तृतीय इति। एके श्वेता अपराजितेति व्याख्यानयन्ति ॥ १२ ॥

अर्कक्षीरेति।—अर्के अर्कक्षीरमिति भिन्नपद हरिद्राभ्यामिति द्विवचनत्वेन हरिद्रा दारुहरिद्रा योज्येति व्याख्यानयन्ति। एतत् सर्वत्र न प्रचरति, तेनार्कक्षीर हरिद्राभ्यामेव योग साधु ॥ १३ ॥

वटस्येति।—वटस्य वटवृक्षस्य पाण्डुपत्राणीति परिणतत्वात् तेषु पाण्डुत्व, तादृशानीत्यर्थः। मालती जाती तस्या पत्राणि। कालीयकम् अगुरुभेद पीतसारमिति लोके। केचित् वटस्य पाण्डुपत्राणीति पठन्ति, तत्र वट इत्यनेन वटवृक्षस्य पत्राणि, पाण्डु पटोलवृक्षस्यापि पत्राणीत्यर्थ। एतत्र सर्वसम्मत अप्रसिद्धत्वात् ॥ १४ ॥

पुराणमिति।—पिण्याक तिलकल्कजनित खलिशब्दवाच्य, तत्र पुरातन वर्षोषित ग्राह्यम्। कुक्कुट ताम्रचूड तस्य पुरीषम्। मूत्रवत् गव्यम् ॥ १५।१६ ॥

दारुणे प्रियालबीजादिलेप ।—

प्रियालबीजमधुक-कुष्ठमाषै ससैन्धवैः ।
कार्यो दारुणके मूर्द्ध्नि प्रलेपो मधुसंयुतः ॥ १७ ॥

दारुणे खाखसबीजलेप ।—

दुग्धेन खाखसं बीज प्रलेपाद्दारुणं जयेत् ॥ १८ ॥

दारुणे आम्रबीजादिलेप ।—

आम्रबीजस्य चूर्णन्तु शिवाचूर्णं समं द्वयम् ।
दुग्धपिष्ट प्रलेपोऽय दारुणं हन्ति दारुणम् ॥ १९ ॥

इन्द्रलुप्ते तिक्तपटोलरसलेप ।—

रसस्तिक्तपटोलस्य पत्राणा तद्विलेपनात् ।
इन्द्रलुप्त शम याति त्रिभिरेव दिनैर्ध्रुवम् ॥ २० ॥

इन्द्रलुप्ते ह्रहतीरसादिलेपत्रयम् ।—

इन्द्रलुप्तापहो लेपो मधुना ह्रहतीरसः ।
गुञ्जामूल फलं वाऽपि भल्लातकरसोऽपि वा ॥ २१ ॥

प्रियालेति ।—प्रियालबीज चिरौञ्जीति प्रसिद्धम । मधुक यष्टीमधु । माषोऽन्नविशेष । मधुसयुत इत्थनेन प्रियालबीजादि बोद्धव्यम् । जलेन सम्पिष्य मनाक् मधुना सङ्काव्य लेप कार्य ॥ १७ ॥

दुग्धेनेति ।—दुग्धमत्र ग्राह्यम् । खाखस बीजमिति दानशब्दवाच्यम् ॥ १८ ॥

आम्रबीजस्येति ।—आम्रबीजस्य चूर्णमिति—आम्रफलमध्यस्थितमज्जाविशेष । शिवा हरीतकी । दारुण रोगविशेष । द्वितीय दारुण दु साध्यमिति विशेषणम् ॥१९॥

रस इति ।—तिक्तपटोल कटकरटोल तस्य पत्राणा रस इत्यर्थ । तद्विलेपनादिति—तत्रत्थ रसस्य लेपनात् । त्रिभिरेव दिनैरित्यनेनास्य विशिष्टत्व दर्शितम्, नाव त्रिदिनैरेव निश्चितप्रमाण यतो बहुदिनसेव्योऽय प्रयोग ॥ २० ॥

इन्द्रलुप्तापह इति ।—ह्रहतीरस इति—पञ्चह्रहतीफलजनितरसस्यैको योग । गुञ्जाया मूल फल वा द्वितीयो योग, अत्रापि मधुप्रचार । भल्लातकरस इतीयो योग । एके भल्लातकरसोऽपि वैद्यस्य स्थाने अविचीरेण सयुतमिति पठन्ति, तेन मेडीदुग्धेन गुञ्जाफल सङ्घृष्य लेप कार्य इति सङ्गत ।

इन्द्रलुप्ते गोक्षुरादिलेप ।—

गोक्षुरास्तिलपुष्पाणि तुल्ये च मधुसर्पिषी ।
शिरःप्रलेपनं तेन केशसवर्द्धनं परम् ॥ २२ ॥

इन्द्रलुप्ते हस्तिदन्तभस्मादिलेप ।—

हस्तिदन्तममीं कृत्वा कृष्णगोदुग्ध रसाञ्जनम् ।
रोमाण्यनेन जायन्ते लेपात् पाण्डितलेष्वपि ॥ २३ ॥

इन्द्रलुप्ते यष्ट्यादिलेप ।—

यष्टीन्दीवरमृद्वीका-तिलाज्यक्षीरलेपनैः ।
इन्द्रलुप्तं शमं याति केशाः स्युः सघना दृढाः ॥ २४ ॥

रोमसञ्जनने चतुष्पदाना त्वगादिभस्मलेप ।—

चतुष्पदाना त्वग्रोम-नखशृङ्गास्थिभस्मभिः ।
तैलेन सह लेपोऽय रोमसञ्जननः परः ॥ २५ ॥

सम्प्रदाये तु इन्द्रलुप्तस्थान प्रक्षाल्य तदभावे सङ्कृष्य पश्चाल्लेप कार्य इति साधु । उक्तमन्यत्रापि—"इङ्गुदीफलरसलिप्तं गुञ्जाफलमूलमिन्द्रलुप्तस्य । कनकविषृष्टस्य सतो दातव्य प्रक्षितस्य मदा ॥" इति ॥ २१ ॥

गोक्षुर इति ।—गोक्षुरः प्रसिद्ध । तिलपुष्पाणि विख्यातानि । तुल्ये साम्ये गोक्षुरे सतिलपुष्पे इत्यर्थ । मधुसर्पिषी च तुल्येऽत्र ग्राह्ये ॥ २२ ॥

हस्तिदन्तेति ।—तसौ कज्जलविशेष, हस्तिदन्त दग्ध्वा कज्जल कार्यम् । रसाञ्जन द्विविधम्—एक कृष्णपाषाणसदृशद्रव्यावशेष, अपर दार्वीक्वाथसमुद्भव, तदभावे दारुहरिद्रैव ग्राह्या । अथ लेप केशवर्द्धनायेत्याह ॥ २३ ॥

यष्टीति ।—यष्टी मधुयष्टी । इन्दीवर नीलोत्पल, तदभावे पद्मबीजमपि ग्राह्यम, पद्मबीज गट्टाशब्दवाच्यम् । मृद्वीका गोस्तनी द्राक्षा । एकं मृद्वीकास्थाने मूर्वेति पाठान्तर पठन्ति व्याख्यानयन्ति च । तिलानि प्रसिद्धानि । आज्य घृतम् । क्षीर गोपय । तिलाज्यक्षीरस्थाने तिलाजक्षीरलेपनैरिति पाठ, तत्र आजक्षीरमित्यर्थ । तिलाज्यक्षीरमार्कवैरित्यपि पाठान्तर सङ्गतम्, तथा ह्युक्त—"मधुकेन्दीवरमूर्वातिलाज्यगोक्षीरभृङ्गलेपेन । अचिरात् भवन्ति केशा घनदृढमूलायता मृदव ॥" इति ॥ २४ ॥

चतुष्पदानामिति ।—चतुष्पदा गोऽश्वाज्यजेभैणखरोष्ट्राद्य., तेषा त्वक् चर्म,

पलिते इन्द्रवारुणीबीजतैलाभ्यङ्ग ।—

इन्द्रवारुणिकाबीज-तैलेनाभ्यङ्गमाचरेत् ।
प्रत्यहं तेन जायन्ते कुन्तला भृङ्गसन्निभाः ॥ २६ ॥

पलित अयस्पूर्णादिलेप ।—

अयोरजो भृङ्गराजस्त्रिफला कृष्णमृत्तिका ।
क्षितमिक्षुरसे मासं लेपनात् पलितं जयेत् ॥ २७ ॥

पलिते त्रिफलादिलेप ।—

धात्रीफलत्रयं पथ्ये द्वे तथैकं विभीतकम् ।
पञ्चाम्लमज्जा लोहस्य कर्षैकञ्च प्रदीयते ॥ २८ ॥
पिष्ट्वा लोहमये भाण्डे स्थापयेदुषितं निशि ।
लेपोऽयं हन्ति न चिराटकालपलितं महत् ॥ २९ ॥

पलित त्रिफलादिलेप ।—

त्रिफला नीलिकापत्रं लोहं भृङ्गरजः समम् ।
अजामूत्रेण सम्पिष्टं लेपात् कृष्णीकरं स्मृतम् ॥ ३० ॥

रोमनखग्रहाक्षीणि प्रसिद्धानि, तेन लगादीनि दग्ध्वा भस्म कार्यम्। तैलं तिलसम्भवम् ॥ २५ ॥

इन्द्रवारुणिकेति ।—सुगमम् ॥ २६ ॥

अयोरज इति ।—यथोरजो लोहचूर्णं, तदभावे लोहमलमित्येके। इक्षुरसे इक्षुरसपूरिते भाण्डे मासमेकं यावत् स्थितं भवति। अयं कृष्णीकरणत्वात् पलितं जयेदित्यर्थः ॥ २७ ॥

धात्रीति ।—केचिदत्र धात्रीफलादीनामपि कर्षाणि ग्राह्याणि, लोहचूर्णकर्ष-परिमाणदर्शनात्, तेन धात्रीफलानां कर्षत्रयं, हरीतक्याः कर्षद्वयमिता कर्षैक विभीतकफलम्, आम्लाम्लिमज्जा पञ्च कर्षा इति, नैतत् सर्वसम्मतम्। अम्लाम्लप्रदाये तु धात्रीफलत्रयमेव ग्राह्यम्, एव हरीतकीफलद्वयम् एक विभीतकफलम्, आम्लफलानां पञ्चसङ्ख्यका मज्जा एव प्रचरति। प्रलेपोऽत्र जलेन ॥ २८-२९ ॥

त्रिफलेति ।—त्रिफला हरीतक्यादिकम्। नीलिका नीलिनी विख्याता तस्या पत्रम्। लोहं लोहचूर्णम्। भृङ्गो माकव। सममिति—सकल समभागम्।

पलिते त्रिफलादिलेप ।—

त्रिफला लोहचूर्णञ्च दाडिमत्वक् विसं तथा ।
प्रत्येक पञ्चपलिक चूर्णं कुर्य्यादिचक्षण. ॥ ३१ ॥
भृङ्गराजरसस्यापि प्रस्थषट्कं प्रदापयेत् ।
क्षिप्त्वा लोहमये पात्रे भूमिमध्ये निधापयेत् ॥ ३२ ॥
मासमेक तत कुर्य्याच्छागोदुग्धेन लेपनम् ।
कूर्चे शिरसि रात्रौ च संवेष्ट्यैरण्डपत्रकै: ॥ ३३ ॥
स्वपेत् प्रातस्तत कुर्य्यात् स्नान तेन च जायते ।
पलितस्य विनाशश्च त्रिभिर्लेपैर्न संशय: ॥ ३४ ॥

रोमशातने शङ्खचूर्णादिलेप ।—

शङ्खचूर्णस्य भागौ द्वौ हरितालञ्च भागिकम् ।
मन:शिला चार्द्धभागा स्वर्जिका चैकभागिका ॥ ३५ ॥
लेपोऽयं वारिपिष्टस्तु केशानुत्पाट्य दीयते ।
अनया लेपयुक्त्या च सप्तवेलं प्रयुक्तया ॥
निर्मूलं केशस्थान स्यात् क्षपणस्य शिरो यथा ॥ ३६ ॥

अजामूत्रेण सम्पिष्टनित्यस्य स्थाने अविमूत्रेण सम्पिष्टम् इति पाठ, अवि' भेडी ॥ ३० ॥

त्रिफलेति ।—दाडिमत्वगित्यनेन दाडिमफलस्य त्वक् वल्कल ग्राह्यम । त्रिविमिति—मृणाल कमलनालमित्यर्थ । प्रत्येक पञ्चपलिकमित्यनेन त्रिफलाया' पञ्चटङ्कपलानि ग्राह्याणि। भृङ्गराजरसस्य षट्प्रस्था तेन षष्ठवतिपलानि रसस्येत्यर्थ । एतत सिद्ध यदा भवति तदा आजदुग्धेन सह लेपन देयमिति भाव । शेष सुबोधम् ॥ ३१—३४ ॥

अथ रोमशातनमाह, शङ्खचूर्णस्येति ।—शङ्खचूर्णस्य भर्जित देयमिति सम्प्रदाय । हरितालस्यैको भाग, मन शिला चार्द्धभागेति, तेन एकभागापेक्षया अर्द्धभागा एके स्वर्जिका चैकभागिका वा पाठ (?)। शेष सुगमम् ॥ ३५।३६ ॥

रोमशातने तालकादिलेप ।—

तालक शाणयुग्म स्यात् षट्शाणं शङ्खचूर्णकम् ।
हिशाणिक पलाशस्य क्षारं दत्त्वा प्रमर्दयेत् ॥ ३७ ॥
कदलीटण्डतोयेन रविपत्ररसेन वा ।
अस्यापि सप्तभिर्लेपै रोमा शातनमुत्तमम् ॥ ३८ ॥

श्वित्रे सुवर्णपुष्यादिलेप ।—

सुवर्णपुष्पी कासीस विडङ्गानि मन शिला ।
रोचना सैन्धवश्चैव लेपनाच्छ्वित्रनाशनम् ॥ ३९ ॥

श्वित्र वायस्यादिलेप ।—

वायस्येडगजाकुष्ठ-कृष्णाभिर्गुटिका कृता ।
* वत्समूत्रेण सम्पिष्टा प्रलेपाच्छ्वित्रनाशिनी ॥ ४० ॥

श्वित्रे तालकादिलेप ।—

तालक शाणमात्र स्याच्चतुःशाणा च वाकुची ।
गोमूत्रपिष्ट तच्चूर्णं लेपनाच्छ्वित्रनाशनम् ॥ ४१ ॥

तालकमिति ।—तालक हरिताल शाणद्वय ग्राह्यम् । कदलीकन्दतोयेन इति पाठ साधु । रविपत्ररसेन अर्कपत्ररसेन वा । अयमपि शङ्खचूर्ण प्रचरति (?) अन्यतो दर्शनात् । तथा हि—"पलाशभस्माचितलवण (?) चूर्णं रक्षास्थूमिश्रेरुपलिप्य भूय । कन्दगेहे मृगलोचनाना रोमाणि रोहन्ति कदापि नैव ॥" अस्यापि सप्तभिर्लेपैरित्यनेन पूर्ववत् कार्य ॥ ३७।३८ ॥

अथ श्वित्रनाशनायाह, सुवर्णपुष्पीति ।—सुवर्णपुष्पी सोनीशब्दवाच्यो विटप-विशेष, तदभावे हुडहुला ग्राह्या । अपरे वस्थुलक (?) गृह्णन्ति । सौसं सौमकम । सोमकस्थाने कासीसमिति पाठ साधु । रोचना गोरोचन. प्रसिद्धा । लेपोऽत्र श्लेष्म ॥ ३९ ॥

वायस्येति ।—वायसी काकमाची । एडगज प्रपुन्नाड तस्य बीजानि । कृष्णा पिप्पली । वत्स इति—गोवत्स अथवा छाग इति पाठ ॥ ४० ॥

तालकमिति ।—तालक हरितालम् । वाकुची सोमराजी तस्या फलानि प्रसिद्धानि । शेष सुगमम् ॥ ४१ ॥

---

* "वत्समूत्रेण" इत्यत्र "वत्समूत्रेण" इति पाठ चक्रगूढार्थदीपिकासम्मत ।

सिध्मे वाकुच्यादिलेप ।—

वाकुची वेतसो लाक्षा काकोडुम्बरिका कणा ।
रसाञ्जनमयश्चूर्णं तिलाः कृष्णास्तटेकत' ॥ ४२ ॥
चूर्णयित्वा गवा पित्तैः पिष्ट्वा च गुटिका कृता ।
अस्याः प्रलेपाच्छित्वाणि प्रणश्यन्त्यतिवेगतः ॥ ४३ ॥

सिध्मे धात्र्यादिलेप ।—

धात्री मर्जरमश्चैव यवक्षारश्च चूर्णितः ।
सौवीरेण प्रलेपोऽयं प्रयोज्य' सिध्मनाशने ॥ ४४ ॥

सिध्मे दार्व्यादिलेप ।—

दार्वी मूलकबीजानि तालकं सुरदारु च ।
ताम्बूलपत्र सर्वाणि कार्षिकाणि पृथक् पृथक् ॥ ४५ ॥
शङ्खचूर्णं शाणमात्रं सर्वाण्येकत्र कारयेत् ।
लेपोऽयं वारिणा पिष्ट' सिध्माना नाशनः परः ॥ ४६ ॥

वाकुचीति।—वाकुची प्रसिद्धा। वेतसो निचुल, जलवेतस इति लोके वृक्षविशेष। लाक्षा लक्षाजननी। काकोडुम्बरिका कटभरिशब्दवाच्या। कणा पिप्पली। रसाञ्जनं प्रसिद्धम्, तदभावे दारुहरिद्रा ग्राह्या सत्सम्बन्धत्वात्। अयश्चूर्णं लोहचूर्णम्। कृष्णास्तिला इति श्वेततिलनिषेधार्थम्। गवा पित्तैरिति—गोयकृत-खण्डैकदेशजन्य द्रवरूप पित्तमिति वाच्यम्, तदभावे गोमूत्रेण प्रचार इति सर्वत्र ॥ ४२।४३ ॥

अथ सिध्मरोगे, धात्रीति।—धात्री धामलकीफलम्। सर्जरस राल। सौवीरक काञ्जिकभेद, तत्र गोधूमजनितमित्येके। तथा च—"सौवीरक सुवीराम्ल श्रेय गोधूमसम्भवम्" इति। धात्री रस सर्जरस इति पाठान्तरम्, तत्र रसो रसाञ्जनमिति व्याख्यानयन्ति केचित्, नैतादृश किन्तु पूर्वेण प्रचार सङ्गत एव ॥ ४४ ॥

दार्वीति।—दार्वी दारुहरिद्रा। मूलक प्रसिद्ध तद्बीजानीति। तालकं हरितालम्। सुरदारु देवदारु। शेष सुबोधम् ॥ ४५।४६ ॥

नेत्ररोगे हरीतक्यादिलेप ।—

हरीतकी सैन्धवञ्च गैरिकञ्च रसाञ्जनम् ।
विडालकी जले पिष्ट सर्वनेत्रामयापहः ॥ ४७ ॥

अञ्जननामिकाया रसाञ्जनादिलेप ।—

रसाञ्जनं व्योषयुत सम्पिष्ट वटकीकृतम् ।
कण्डूपाकान्विता हन्ति लेपादञ्जननामिकाम् ॥ ४८ ॥

दद्रादौ प्रपुन्नाडबीजादिलेप ।—

प्रपुन्नाडस्य बीजानि वाकुची सर्षपास्तिलाः।
कुष्ठ निशाद्वयं मुस्त पिष्ट्वा तक्रेण चैकतः ॥
प्रलेपादस्य नश्यन्ति दद्रुकण्डूविचर्चिकाः ॥ ४९ ॥

पामादौ हैमचौर्यादिलेप ।—

हैमचौरी विडङ्गानि दरद गन्धकस्तथा ।
दद्रुघ्न कुष्ठसिन्दूरे सर्वाण्येकत्र मर्दयेत् ॥ ५० ॥
धुस्तूरनिम्बताम्बूली-पत्राणा स्वरसै. पृथक् ।
अस्य प्रलेपमात्रेण पामादद्रुविचर्चिका· ॥
कण्डूश्च रकसा चैव प्रशम यान्ति वेगत: ॥ ५१ ॥

अथ नेत्ररोगे, हरीतकीति ।—रसाञ्जन क्षणपाषाणसदृशद्रव्यविशेष, तदभावे दार्वीक्वाथसमुद्भव ग्राह्यम्, तदप्रतीरलाभे च दारुहरिद्रा ग्राह्येति सर्वत्र प्रचार । विडालक इति—बहिर्लेपमत्र, तैलाद्यौषधोपरि लेप कार्य इति तात्पर्यार्थ । अथ नेत्रोऽभिष्यन्दादिरोगे प्रायश प्रचरति ॥ ४७ ॥

रसाञ्जनमिति ।—रसाञ्जन प्रसिद्ध तच्च द्विविध पूर्व व्याख्यातम्। व्योष त्रिकटुक, तच्च शुण्ठीमरिचपिप्पलीसञ्जम । पेषणमत्र जलेनानुज्ञात्वात् ॥ ४८ ॥

अथ कण्डूदद्रुघ्नतौनाच्च योगनाह, प्रपुन्नाडस्येति।—प्रपुन्नाड चक्रमर्दक, तस्य बीजान्यत्र देयानि। वाकुची सोमराजी प्रसिद्धा तस्या अपि बीजानि। निशाद्वय हरिद्राद्वयम्। शेष सुबोधम् ॥ ४९—५१ ॥

कण्डूादौ दूर्वादिलेप ।—

दूर्वाऽभया सैन्धवञ्च चक्रमर्दं कुठेरकः।
एभिस्तक्रयुतो लेपः कण्डूदद्रुविनाशन ॥ ५२ ॥

कण्डूादौ दूर्वादिलेप ।—

दूर्वानिशायुतो लेपः कण्डूपामाविनाशनः।
कृमिदद्रुहरश्चैव शीतपित्तापहः स्मृतः ॥ ५३ ॥

दद्रुरोगे सिद्धार्थादिलेप ।—

सिद्धार्थरजनीकुष्ठ-प्रपुन्नाडतिलैः सह।
कटुतैलेन सम्मिश्र दद्रुघ्नञ्च प्रलेपनम् ॥ ५४ ॥

वातवीसर्पे रास्नादिलेप ।—

रास्ना नीलोत्पलं दारु चन्दन मधुकं वला।
घृतक्षीरयुतो लेपो वातवीसर्पनाशन. ॥ ५५ ॥

पित्तवीसर्पे मृणालादिलेप ।—

मृणाल चन्दन लोध्रमुशीरं कमलोत्पलम्।
सारिवाऽऽमलकी पथ्या लेपः पित्तविसर्पनुत् ॥ ५६ ॥

दूर्वेति ।—अभया हरीतकी। चक्रमर्द प्रसिद्ध लोके पमाडशब्दाच्च। कुठेरको वन्यिपर्णी निजनाम्ना प्रसिद्ध, स च द्विधा, एक क्षुद्रपत्र, अपरो वटपत्र इति ॥ ५२ ॥

दूर्वेति।—निशा हरिद्रा। अत्रापि तक्रपिष्टो बोद्धव्य ॥ ५३ ॥

सिद्धार्थेति।—सिद्धार्थ सर्षप। रजनी हरिद्रा। प्रपुन्नाड एडगल प्रसिद्ध। एतत् सकल जलेनापाथ्य पश्चात् कटुतैलेन सम्प्रात्योद्वर्त्तन कार्य्यमिति भाव। एके सिद्धार्थरजनीकल्कैरिति पठन्ति व्याख्यानयन्ति च ॥ ५४ ॥

अथ विसर्परोगे रास्नेति।—रास्ना सुरभी। नीलोत्पल नीलकमलम्। दारु देवदारु। चन्दन रक्तचन्दनम्। मधुक यष्टिमधुकम्। वला प्रसिद्धा लोके सोमसशब्दाच्या। वलास्थाने वचा इति पाठान्तर न मनोहरम्, अप्रसिद्धत्वात्। घृतक्षीरैश्च गोसम्भवे ग्राह्ये ॥ ५५ ॥

मृणालमिति।—मृणाल कमलनालम्। चन्दनमत्र रक्तम्। उशीर सुगन्धमूल तृणविशेष। कमल रक्तकमलम्। उत्पल नीलोत्पलम्। केचिदुत्पलमिति कुष्ठं

श्लेष्मवीसर्पे त्रिफलादिलेप ।—

त्रिफला पद्मकोशीर ममङ्गा करवीरकम् ।
नलमूलमनन्ता च लेप श्लेष्मविसर्पहा ॥ ५७ ॥

वातरक्त-रक्तपित्तयो माक्षादिलेप ।—

माक्षो सर्जरसो लोध्र मधुक सहरेणुकम् ।
मूर्वा नीलोत्पलं पद्म शिरीषकुसुमैः सह ॥
प्रलेप. पित्तवातास्र शतधौतघृतप्लुत: ॥ ५८ ॥

नासास्रुतरक्ते आमलकीलेप ।—

आमलं घृतभृष्टन्तु पिष्ट काञ्जिकवारिभिः ।
जयेन्मूर्ध्नि प्रलेपेन रक्तं नासिकया सुतम् ॥ ५९ ॥

वातशिरोरोगे कुष्ठादलेपद्वयम ।—

कुष्ठमेरण्डतैलेन लेपात् काञ्जिकपेषितम् ।

व्याख्यानयन्ति। सारिवा माक्षोता, सा च गोपवल्लीति प्रसिद्धा। आमलकी धात्रीफलम्। पथ्या हरीतकी। अत्रापि चीरेण प्रचार। अनुक्तत्वात् जलेनेति सर्वत्र ॥ ५६ ॥

त्रिफलेति।—त्रिफला हरीतकीप्रभृतिक फलत्रयम्। पद्मक काष्ठविशेष, पद्माख इति लोके। उशीर प्रसिद्धम्। ममङ्गा लज्जालुका मञ्जिष्ठा वा। करवीरको द्वयमारक्त। एके करवीरजमिति पठन्ति, तत्र करवीरस्य मूल ग्राह्यम्। अनन्ता श्यामालक। श्लेष्म सुगमम् ॥ ५७ ॥

अथ वातरक्ते पित्तरक्ते च लेपानाह, माक्षोति।—माक्षो जटाख्या। सर्जरसो राल इत्यन्ये। मधुक यष्टीमधु। रेणुक द्रव्यविशेष हरेणुका इति वाच्यम् तदभावे निर्गुण्डीबीजमिति सर्वत्र। मूर्वा चोरलाय मोरइरीति लोके। पद्मनिति—अत्र रक्तकमलम्। शतधौतघृतमिति—शतवार यावत् जलेन प्रक्षालित घृत शतधौतमुच्यते ॥ ५८ ॥

आमलमिति।—आमल घृतभृष्टन्तु पिष्ट काञ्जिकवारिभिरिति—काञ्जिकतोये। एके आमलक घृतसृष्टमिति पठन्ति, तत्र पूर्वं घृतेन आमलक मनाक् भर्जयित्वा पश्चात् काञ्जिकेन सह साम्यथ्य लेप कार्य्य, काञ्जिकाभावे शीतलजलमिति सर्वत्र ॥ ५९ ॥

अथ शिरोरोगे, कुष्ठमिति।—कुष्ठन्तु काञ्जिकेन सह कल्कीकृत्य एरण्ड

शिरोऽर्त्तिं वातजा हन्यात् पुष्पं वा मुचुकुन्दजम् ॥ ६० ॥

वातशिरोरोगे देवदार्वादिलेप ।—

देवदारु नतं कुष्ठं नलदं विश्वभेषजम् ।
सकाञ्जिकं स्नेहयुक्तो लेपो वातशिरोऽर्त्तिनुत् ॥ ६१ ॥

रक्तपित्तजशिरोरोगे चन्दनादिलेप ।—

चन्दनोशीरयष्ट्याह्व-बलाव्याघ्रनखोत्पलैः ।
क्षीरपिष्टैः प्रलेपः स्याद्रक्तपित्तशिरोऽर्त्तिजित् ॥ ६२ ॥

पित्तशिरोरोगादौ धात्र्यादिलेप ।—

धात्रीकसेरुक्लोवेर-पद्मपद्मकचन्दनैः ।
* मूर्वोशीरनलानाञ्च मूलैः कुर्य्यात् प्रलेपनम् ॥
शिरोऽर्त्तिं पित्तजां हन्याद्रक्तपित्तरुजं तथा ॥ ६३ ॥

कफशिरोरोगे हरेखादिलेप ।—

हरेणुनतशैलेय-मुस्तेलागुरुदारुभिः ।

तैलेनाघ्राप्य लेप कार्य्य । एरण्डतैलेनेत्यस्य स्थाने एरण्डमूलेनेति पाठान्तर समीचीनम् । विकल्पेन मुचुकुन्दज पुष्पम् अनेनैव विधानेन तत्कार्य्यकर भवति । मुचुकुन्द कुन्दभेद प्रसिद्ध एव, स तु शुक्लरक्तपुष्पभेदेन ज्ञातव्य ॥ ६० ॥

देवदार्वेति ।—नतमत्र तगरम् । नलद मासी, उशीरमिति केचित् । विश्वभेषज शुण्ठी । पूर्वं काञ्जिकेन सह सम्पिष्य पश्चात स्नेहेनाघ्राप्य देय । स्नेहोऽत्राप्येरण्डसम्बधी ज्ञेय, तदसम्भवे तिलतैलमिति ॥ ६१ ॥

चन्दनेति ।—चन्दन रक्तचन्दनम् । व्याघ्रनख नखभेद, शुक्तिकाकार सुगन्ध-द्रव्यविशेष । उत्पल कमलविशेष । क्षीरमत्र गव्यम् आज वा ॥ ६२ ॥

धात्रीति ।—धात्री आमलकीफलम् । कसेरु प्रसिद्ध । क्लोवेर बालकम् । पद्म कमलम् । पद्मक काष्ठविशेष पद्माख इति लोके । चन्दन रक्तम् । मूर्वोशीर नलानां त्रयाणां मूलानि, तत्र मूर्वा क्षीरखायु । उशीर गन्धमूलतृणभेद । नल प्रथित तत्र सुषिरपर्य्याय काण्डशरकारम् । अत्र पेषणार्थं क्षीरमाहुरिके, सम्प्रदायतस्तु अनुक्तत्वाज्जलमिति ॥ ६३ ॥

---

* "मूर्वा" इत्यत्र "दूर्वा" इति गू० दी० ।

मासोराम्रारुवृकैश्च कोष्णो लेप कफार्त्तिनुत् ॥ ६४ ॥

कफशिरोरोगे शुण्ठ्यादिलेप ।—

शुण्ठीकुष्ठप्रपुन्नाड देवकाष्ठैः सरोहिषैः।
सुखोष्णैर्मूत्रपिष्टैश्च लेप श्लेष्मशिरोऽर्त्तिनुत् ॥ ६५ ॥

सूर्यावर्त्ताद्यभेदकयो सारिवादिलेप ।—

सारिवाकुष्ठमधुक-वचाकृष्णोत्पलैस्तथा।
लेपः सकाञ्जिकस्नेह सूर्यावर्त्तार्द्धभेदयोः ॥ ६६ ॥

शङ्खकाननलवातयो शताव्र्यादिलेप ।—

वरो नीलोत्पल दूर्वा तिलाः कृष्णाः पुनर्नवा।
शङ्खकेऽनन्तवार्ते च लेपः सर्वशिरोऽर्त्तिजित् ॥ ६७ ॥

प्रलेपस्य द्वैविध्यनिर्देश ।—

अथ लेपविधिश्चान्यः प्रोच्यते सुश्रुतोक्तः।
द्वौ तस्य कथितौ भेदौ प्रलेपाख्यप्रदेहकौ ॥ ६८ ॥

हरेणुकेति।—हरेणु रेणुकाशब्दवाच्य । नत तगरम्। शैलेय शिलापुष्प छल इति लोके। अगुरु प्रसिद्धम्। मासो जटेति सुगन्धद्रव्यम्। रास्ना सुरभी। रुवुकम् एरण्ड, तस्याव खेड्डो ग्राह्य । कफार्त्तिनुदित्यनेन कफजनितशिरोरोगपीडा नाशयेदित्यर्थ ॥ ६४ ॥

शुण्ठीति।—प्रपुन्नाडश्चक्रमर्द । देवकाष्ठ सुरकाष्ठ, सुरदारु। रोहिष गन्धतृण विख्यातम्। सुखोष्ण गव्यम्। शेष सुबोधम् ॥ ६५ ॥

सारिवेति।—सारिवा गोपवल्लीसज्ञा, आस्फोता इति लोके। मधुक यष्टीमधु। कृष्णोत्पल नीलकमल, तदभावे कमलबीजमिति। एके कृष्णोत्पलशब्देन अरिष्टक फल रोठाशब्दवाच्यद्रव्यविशेष व्याख्यानयन्ति, तन्न सर्वसतम्। लेप सकाञ्जिक-स्नेह इति—काञ्जिकस्नेहाभ्या सह लेप कार्य इत्यभिप्राय, स्नेहग्रहणेनात्र सर्पि स्नेह वा यथादोषापेनया देयम ॥ ६६ ॥

वरोति।—उक्तञ्चान्यत्र "वरो नीलोत्पल मूर्वा तिला कृष्णा पुनर्नवा" (?)। वयाभ्र प्रसिद्ध एव (?)। शङ्खकमनलवातञ्च शिरोरोगे पठितम् ॥ ६७ ॥

अथान्यो लेपविधिस्तमपि दर्शयन्नाह, अथ लेपविधिश्चान्य इति।—त्रयोदश प्रकरणे प्राचुर्यमस्य। तस्य लेपविधे द्वौ भेदाविति—प्रलेपप्रदेहाख्यावित्यर्थ ॥ ६८ ॥

द्विविधयोस्तयोर्लक्षणे।—

चर्मार्द्रं मांसिषं यद्वत् प्रोन्नतं सा मितिस्तयोः।
शीतस्तनुर्विशोषी च प्रलेप परिकीर्त्तितः॥
आर्द्रो घनस्तथोष्णः स्यात् प्रदेहः श्लेष्मवातहा॥ ६९॥

तयो प्रयोगविधि।—

रोमाभिमुखमादेयौ प्रलेपाख्यप्रदेहकौ।
वीर्य्यं सम्यग्विशत्याशु रोमकूपैः शिरामुखैः॥ ७०॥
न रात्रौ लेपन कुर्य्याच्छुष्यमाणं न धारयेत्।
शुष्यमाणमुपेक्षेत प्रदेहं पीडन प्रति॥ ७१॥

तत्र कियत्प्रमाणोत्सेध तत्साङ्गमाह, चर्मार्द्रमिति।—तयोरिति—प्रलेपप्रदेहयो। क्वचिदपि प्रायेण प्रदेहस्तु महिषार्द्रचर्मोच्छ्रायापेक्षया स्थूल इति मन्यन्ते घनाभिधानात्। तनुत्व प्रदेहगुण ये मन्यन्ते, तेषा मत किञ्चिन्न प्रदेह प्रलपस्येतत्प्रतिव्यवहार। अथ तयोर्लक्षणान्याह, शीत इति।—एक विशोषीत्यस्य स्थाने निवशोषीति पठन्ति निवशोषी—अविशोषो अपीडयितव्ये व्रणशोफे, विशोषी पीडयितव्ये, यतोऽन्ये त्वाचार्या शीतस्तनुरित्यादिलक्षण प्रदेहस्येति वदन्ति, तत्र तनुरिति—पक्तल। घनो निबिड, सघन (?) इत्यर्थ। उष्ण उष्णा शीतो वेति विषयापेक्षया, तत्र वातबहुले कफबहुले वोष्ण पित्तरक्तबहुले शीत। उष्णादिलक्षण प्रलेपस्येति केचिन्मन्यन्ते, यत प्रलेपप्रदेहयोरन्तर भेद। अथ तनुत्व घनभावश्च प्रलेपस्य गृह्य॥ ६९॥

इदानी तत्प्रतिलोमाभिलिप्तत्वेन फलमाह, रोमाभिमुखमिति।—तौ तु रोमाभिमुख यथावत्कादौ (?) लिम्पेदित्यभिप्राय, यतस्तेन सम्यगौषधमवतिष्ठते, अत एवाव प्रविशति च वीर्य्यमौषधस्येत्यत्र, के क्वत्येत्याह, रोमकूपैरिति—स्वेदवाहिभि शिरामुखै, एतेन रोमकूपान्तर्गत प्रलेपयेदिति तात्पर्य्यार्थ। अथ लेपविशेषमाह, नेति।—न रात्रौ लेपन कुर्य्यादित्यनेन श्लेष्मपिहितोष्मण स्वदनिर्गमाधिकारप्रवृत्तिरिति, तथा चोक्त—"तमसा पिहितो ह्युष्मा रोमकूपमुखे स्थित। विना लेपेन नियाति रात्रौ नालेपयेदत॥" इति। लेपन मिश्रणेनात्र प्रलेपस्य विधि सूच्यते। ननु प्रदेहस्यायती वा श्लैष्मिकपाकशोथे (?) तु रात्रौ प्रदेह उपयोक्तव्य, तथा विदह्यमाने शोथे प्रदेह एव, चते तु कल्कादपि

(तमसा पिहितो ह्यूष्मा रोमकूपमुखे स्थितः।
विना लेपेन निर्याति रात्रौ नो लेपयेदतः॥)

अवस्थाविशेषे रात्रौ प्रलेपदानस्य कर्त्तव्यतानिर्देश।—

(रात्रावपि प्रलेपादि-विधिः कार्य्यो विचक्षणैः।
अपक्वशोथे गम्भीरे रक्तश्लेष्मसमुद्भवे॥)

व्रणस्य सप्तविधोपक्रमाः।—

आदौ शोथहरो लेपो द्वितीयमवसेचनम्।
तृतीयश्शोधनाद्यः स्याच्चतुर्थं पाटनक्रमः॥ ७२॥
पञ्चमः शोधनो भूयात् षष्ठो रोपण इष्यते।
सप्तमो वर्णकरणो व्रणस्यैते क्रमा मताः॥ ७३॥

रात्रौ दातव्य इति, तथा पित्तजे शोथे वातपित्तजे च घृतधौतघृताभ्यङ्गादि दातव्यमिति, तथा हि—"रात्रावपि प्रलेपादि विधिः कार्य्यो विचक्षणैः। अपक्वशोथे गम्भीरे रक्तश्लेष्मसमुद्भवे॥" इति। शुष्यमाणं न धारयेदिति—शुष्यमाणं, लुप्यमिति शेषः, यतः शुष्को लूपार्थको रूक्षकरश्च भवति। प्रदेहस्तु पीडनं प्रति शुष्यमाणं यावदुपेक्षेत पीडनं व्रणविशेषपीडनद्रव्यैर्मिश्रकाभ्यां शोधनैर्वा व्रणं पीडनीयस्य प्रतीक्ष्यार्थं, तस्मादत्यन्तशुष्यमाणं नोपेक्षेतेत्यर्थः। अन्यायं केचिदिति पठन्ति—"न च पर्युषितं दद्याद्दूतञ्च पतितं तथा। न चापि मुखनालिम्पेत्तेन दोषः प्रसिच्यते॥" इति बहुपुस्तकेष्वदृष्टत्वादस्माभिरपि न लिखितं, न त्वसङ्गतोऽयं श्लोकः, ग्रन्थान्तरेष्वपि लिखितं॥ ७०।७१॥

इदानीं व्रणविषयक्रममाह, आदाविति।—आदौ शोथहरो लेप इत्यस्य स्थाने आदौ विस्रापनं कार्य्यमिति पठन्ति, विस्रापनमिति—अङ्गुल्यादिमर्दनेन शोथविलयनम्। परमार्थतस्तु नैतत् पाठान्तरं, किन्तु द्वयोरपि कोऽभिप्रायः, यतो विस्रापनशब्दो बहिः प्रमार्जने शास्त्रविस्रापनकरलेपपारिषेकाभ्यङ्गस्वेदादौ वर्त्तते, तत्र आदौ शोथहरो लेप इत्यत्र साधुः। द्वितीयमवसेचनमिति—विस्रापनानन्तरं लालीकादिभिः रक्तविस्रावणम्। विस्रापनं विनाऽपि रक्तस्रावणं प्रचरति। अपरे त्विति वदन्ति—अवसेचनशब्दोऽत्र बमनविरेचनशोणितविस्रावणाद्यन्तर्बहिः प्रमार्जने वर्त्तते, न तु केवले एव रक्तविस्रावणे। उपनाहो बन्धनं, पाचनो पनाहनमपि पाचने वर्त्तते। चतुर्थं पाटनक्रम इति—पाटनं शस्त्रादिना। पाटनस्थाने

स यथा—

वातजव्रणशोथे बीजपूरजटादिलेप ।—

बीजपूरजटा हिङ्गु देवदारु महौषधम् ।
रास्नाऽग्निमन्था लेपोऽयं वातशोथविनाशनः ॥ ७४ ॥

पित्तजव्रणशोथे मधुकादिलेप ।—

मधुकं चन्दन * मूर्वा नलमूलञ्च पद्मकम् ।
उशीरं बालक पद्म पित्तशोथे प्रलेपनम् ॥ ७५ ॥

कफजव्रणशोथे कृष्णादिलेप ।—

कृष्णा पुराणपिण्याक शिग्रुत्वक् सिकता * शिवा ।
मूत्रपिष्टः सुखोष्णोऽयं प्रदेह श्लेष्मशोथहा ॥ ७६ ॥

पाचनमाह कोचित्। शोधन रोपण व्रणस्यैव। सप्तमो वर्णकरण इति—सवर्णकरण मांसजनन वैशद्यमिति, अत एव तन्त्रान्तरे "सप्तमो वैक्लवापह" (सु० सू० १७ अ०) इति वचनात् ॥ ७२-७३ ॥

इदानी स यथेत्यनेन व्रणस्य सप्तविधोपक्रमाणां प्रत्येक योगानाह, बीजपूरेति।—अय विस्रावण, वारिणा वातशोथप्रत्यनीकत्वात् प्रलेप कार्य्य इति, तेन तथा कार्य्यो यथा पीडयितव्यो व्रणशोथ इत्यभिप्राय। अत्र हिङ्गु हृद्दहिङ्गु। महौषध शुण्ठी। राम्ना सुरभी। अग्निमन्थोऽरणि प्रसिद्ध ॥ ७४ ॥

मधुकमिति।—मधुकादीन्यत्र प्रसिद्धानि (१)। चन्दनमत्र रक्तम्। पद्मक काष्ठविशेष पद्माख इति लोके। पद्म कमलम्। पित्तशोथे इति—पित्तजनित-व्रणशोथे। अन्यत्रे केचिदिति पठन्ति—"शीतलास्य गणा सर्वे प्रलेप पित्तशोथहृत्" (सु० सू० ३८ अ०) इति सुश्रुतोक्त अयमपि सङ्गत। तत्र शीतलगण काकोली-क्षीरशुक्लादिन्यग्रोधादय सुश्रुतोक्ता बोद्धव्या ॥ ७५ ॥

कृष्णेति।—कृष्णा पिप्पली। एके कृष्णेत्यनेन कृष्णसदृशत्व प्रचार साधयन्ति वदन्ति। पुराणपिण्याकमिति—पुराण वर्षोषित तिलकल्कजनित खलिशब्दवाच्यम्। शिग्रु शोभाञ्जनक तस्य त्वक् छल्ली। सिकता वालुका। शिवा हरीतकी। मूत्रमत्र गव्यम्। प्रदेह इति—प्रलेपभेद, स च पूर्वं व्याख्यात एव ॥ ७६ ॥

---

* 'मूर्वा' इत्यत्र 'दूर्वा' इति पाठ सुश्रुते चक्रदत्ते च।

* "शिवा" इत्यत्र "अतसी" इति पाठ वाग्भटे। चक्रदत्तेऽपि "उमा" इति पाठ। उमा अतसी।

रक्तजागन्तुव्रणशोथयो लेपादिलेप ।—

हे निशे चन्दने हे च शिवा दूर्वा पुनर्नवा ।
उशीरं पद्मकं लोध्रं गैरिकञ्च रसाञ्जनम् ॥
आगन्तुजे रक्तजे च शोथे कुर्य्यात् प्रलेपनम् ॥ ७७ ॥

व्रणशोथे पाचन व्रणबीजादिलेप ।—

व्रणमूलकशिग्रूणां फलानि तिलसर्षपाः ।
सवच किण्वमतसी प्रदेहः पाचनः स्मृतः ॥ ७८ ॥

व्रणशोथे दारणो दन्त्यादिलेप ।—

दन्ती चित्रकमूलत्वक् क्षुद्रार्कपयसी गुडः ।
भल्लातकास्थ्य कासीस सैन्धवं दारणः स्मृतः ॥ ७९ ॥

अथागन्तुजे रक्तजे च व्रणे विस्रावनमशक्त प्रलेपमाह, हे इति ।—हे निशे हरिद्राद्वयम् । चन्दने हे चेति श्वेतरक्तभेदेन । शिवा हरीतकी । रसाञ्जनं क्वाथ्यमुद्भवम्, एके कृष्णपाषाणवट्टव्यभिशेष रसाञ्जनमामनन्ति, एतद्वयोरलाभे द्विगुणैव दारुहरिद्रा देया । शोथोऽत्र व्रणशोथ ॥ ७७ ॥

पूर्वमुक्तम् उपनाहोऽपि पाचने वर्त्तते तद्विषयत्वात् पाचनमप्याह, व्रणेति ।—व्रण परिपाके सम्बन्धफल प्रसिद्ध, मूलकोऽपि विख्यात, शिग्रु शोभाञ्जनक, पनषा वर्षाणा फलानि याज्ञाणीत्यर्थ । तिलसर्षपे प्रसिद्धे । किण्वन्तु सुराबीज, तच्च यत्र वह्नि प्राचुर्येण । सवच इत्यत्र स्थाने शक्तव इति पठन्ति, तत्र शक्तव शीतवीर्यत्वेऽपि सर्षपगव्रणेषु प्रभावविशेषात् पाचना । एके "शक्तव किण्वमतसी द्रव्याण्येतानि पाचनम्" इति पठन्ति, तवीषाद्रव्याणि उषाबीज्यानि तान्यि कृष्णागुरुप्रभृतीनि । एतेनानुक्तपाचनद्रव्यसङ्ग्रह उक्त । पाचन व्रणशोथस्येत्यभिप्राय ॥ ७८ ॥

अथ पूर्वमुक्त चतुर्थ पाटन क्रम, स च शस्त्रसाधनो भवति, तदभावात् प्रलेपादिभिर्वेदारण कार्य्य, तद्विधानमाह, दन्तीति ।—दन्ती दन्तीबीजम् । चित्रक प्रसिद्ध, तस्य मूलत्वक् । क्षुद्रार्कयो क्षीर, स्वक् सेहुण्ड । गुड प्रतीत । कासीस सहिरेव भल्लातदल्यस्थ, अस्य भेद पुष्पकासीस, स च किञ्चित् पीत । दारण इति—प्रलेपदारेण पक्वव्रणस्य पाटनवद्विदारणो भवति ॥ ७९ ॥

व्रणशोथे दारुण चिरविल्वादिलेप ।—

चिरविल्वोऽग्निको दन्ती चित्रको हयमारकः।
कपोतकङ्कगृध्राणा मल लेपेन दारुणम् ॥ ८० ॥

व्रणशोथे दारुण खर्जिकादिलेपद्वयम् ।—

खर्जिकायावशूकाद्या: क्षारा लेपेन दारुणाः।
हैमक्षौर्य्यास्तथा लेपो व्रणे परमदारुणः ॥ ८१ ॥

व्रणशोथे शोधन तिलादिलेप ।—

तिलसैन्धवयष्ट्याह्व-निम्बपत्रनिशायुगैः।
त्रिवृद्घृतयुतै पिष्टैः प्रलेपो व्रणशोधनः ॥ ८२ ॥

अपरमपि दारुणमाह चिरविल्व इति ।—चिरविल्वो हुचकरञ्ज "चिरहुल" इति लोके। अग्निक कलिकारिकाकन्द अन्ये भल्लातकमाहु । दन्ती "दान्ती" वाच्यम। चित्रक प्रसिद्ध । हयमारक कनेर । कपोतकङ्कगृध्राणा मलमिति—कपोतो वनवासी पाण्डकशब्दवाच्य, कङ्क कङ्कमल्ल, न पुन काक, गृध्रो मासाशी पक्षिविशेष, मल पुरीषम् । कपोतकङ्कगृध्राणामिति बहुवचनत्वेनान्येषामपि पुरीषेण दारुण बोद्धव्यम्, यथा दृश्यते हि कुक्कुट-पारावतादीना मलेन विदारण भवति, आदित्यहरणादीदृशान्यप्यन्यानि ज्ञेयानि ॥ ८० ॥

खर्जिकेति ।—एके "क्षारद्रव्याणि वा यानि क्षारो वा दारुण परम्" इति पठन्ति व्याख्यानयन्ति च। तत्र क्षारद्रव्याणि सुष्ककदुटजपलाशार्कक्षणपारिभद्रादीनि । क्षारो वेति—एतैर्द्रव्यै सिद्ध, स च प्रतिसारणीयसज्ञ क्षार । परमिति—क्रूर-दारुणत्वमस्य प्रभावात् अत एव बालवृद्धादिष्वयोजनीयम्, यत हि विध हि पक्वशोथदारुण, सुकुमार क्रूरश्चेति, तत्र कपोतपुरीषादि सुकुमार, क्षार क्रूरमिति ॥ ८१ ॥

इदानीं दारुणमभिधायानन्तर शोधनमाह, तिलेति ।—यष्ट्याह्व यष्टीमधु । निम्ब-युग हरिद्राद्वयम् । त्रिवृन्निशोद्ध । घृतमत्र मध्यम् । पेषणमत्र मलेन बोद्धव्यम् । व्रणशोधन दुष्टपूयस्येति ॥ ८२ ॥

व्रणशोथे शोधनरोपण निम्बपत्रादिलेप ।—

निम्बपत्रघृतक्षौद्र-दार्वीमधुकसंयुतः ।
तिलैश्च सह संयुक्तो लेप शोधनरोपणः ॥ ८३ ॥

व्रणशोथे क्रिमिघ्ना करञ्जादिलेपा ।—

करञ्जारिष्टनिर्गुण्डी-लेपो हन्यात् व्रणक्रिमीन् ।
लगुनस्याथवा लेपो सिङ्गुनिम्बभवोऽथवा ॥ ८४ ॥

दूषितव्रणशोथे शोधनरोपण निम्बपत्रादिलेप ।—

निम्बपत्रं तिला दन्ती विद्वत् सैन्धवमाक्षिकम् ।
दुष्टव्रणप्रशमनो लेपः शोधनरोपणः ॥ ८५ ॥

शूल मदनफलादिलेप ।—

मदनस्य फल तिक्ता पिष्ट्वा काञ्जिकवारिणा ।
कोष्ण कुर्य्यान्नाभिलेप शूलशान्तिर्भवेत्तत. ॥ ८६ ॥

वातजविद्रधौ शिग्रुमूलादिलेप ।—

शिग्रुशैफालिकैरण्ड-यवगोधूमसुङ्गकैः ।
सुखोष्णा सहलो लेप प्रयोज्यो वातविद्रधौ ॥ ८७ ॥

अथ शोधनरोपणान्याह, निम्बेति ।—क्षौद्र मधु । दार्वी दारुहरिद्रा । शेष सुगमम् ॥ ८३।८४ ॥

निम्बपत्रादीति ।—योगोऽय व्यक्त सनत्वो वा योज्य, तेन साक्षिकसैन्धवं शोधने प्रायशो योज्य, निम्बपत्र तिलाश्च रोपणे । हृद्वल्ली च रोपणे चेति व्यवहार । दुष्टव्रण नाडीव्रणप्रभृतिकम्, अत एव निम्बपत्रादीना कल्कस्य वर्त्तिमाहुरके । शोधन पुनरष्टविध व्रणस्येति, तद्यथा—कषायवर्त्तिकल्कघृततैल-रसक्रियाचूर्णधूपनभेदेनाष्टविध मतम् ॥ ८५ ॥

मदनस्येति ।—अथ मदनफलादियोग कैश्चिदपि सनत्वादेव लिखित, अग्रामङ्गिकवात । यदा—भल्लातविद्रधिजनितशूलशान्त्यर्थं कथित इत्येके ॥ ८६ ॥

इदानी व्रणरोपणकर्मद्वारेण सर्वथा व्रणजातीना शमनयोगानाह, तत्र तावत् पूर्वं विद्रधौ, शिग्रुरिति ।—अनेन स्वेद उपनाहश्च कर्त्तव्य इति सम्प्रदाय । उपनाह काञ्जिकल्केन, तच्च सपिषु (?) प्रलेपो वोढव्य । स्वेदस्तु शाल्मलस्वेदवत् काय्य । तेषु शिग्रु शोभाञ्जनक । शैफालिका निर्गुण्डी । एरण्डस्य खेट., तद्भावे वटा । यवगोधूमसुङ्गायास्तण्डुलविशेषा प्रसिद्धा ॥ ८७ ॥

पित्तजविद्रधौ लाजादिलेपद्वयम्।—

पैत्तिके सर्पिषा लाजा-मधुके शर्करान्विते:।
प्रलिम्पेत् क्षीरपिष्टैर्वा पयस्योशीरचन्दनै॥ ८८॥

कफजविद्रधौ इष्टकादिलेप।—

इष्टका सिकता लोह-किट्टं गोशकृता सह।
सुखोष्णं स्यात् प्रदेहोऽयं मूत्रै स्याच्छ्लेष्मविद्रधौ॥ ८९॥

रक्तागन्तुजविद्रध्यौ रक्तचन्दनादिलेप।—

रक्तचन्दनमञ्जिष्ठा-निशामधुकगैरिकै।
क्षीरेण विद्रधौ लेपो रक्तागन्तुनिमित्तजे॥ ९०॥

वातजगलगण्डे निचुलादिलेप।—

निचुल: शिग्रुबीजानि दशमूलमथापि वा।
प्रदेहो वातगण्डेषु सुखोष्णं सम्प्रदीयते॥ ९१॥

पैत्तिके इति।—पैत्तिके पित्तजनितविद्रधौ। सर्पिषा गोघृतेन। लाजा भृष्टधान्योद्भवा। तथा द्वितीयो योग, पयस्योशीरचन्दनैरिति, अत्रापि क्षीरपिष्टैरिति सम्बन्ध, तत्र पयस्या क्षीरविदारी तस्या कन्द। उशीर सुगन्धमूलत्वणविशेष। चन्दन रक्त ग्रहणात्॥ ८८॥

इष्टकेति।—इष्टका प्रसिद्धा। सिकता बालुका। लोहकिट्ट लोहसिद्धाणकम। गोशकृत गोमय। मूत्रैरित्यत्र गोमूत्रै। "इष्टकासिकतालोह गोशकृच्छुषपायुभि" इति पाठान्तरम् तत्र लोह लोहचूर्णम्। तुष यवगोधूमजनित त्वग्विशेष, व्यवहारतस्तु यवगोधूमा एव ह्येया। पायुभिरित्यनेन सत यावा, सा श्याव पीता कृष्णा वा। एके तुषपायुभिरित्यनेन तुषदग्धभस्मभिरिति व्याख्यानयन्ति॥ ८९॥

रक्तचन्दनेति।—निशा हरिद्रा। मधुक यष्टीमधु। क्षीर गव्यम्। आगन्तुज: शस्त्रलगुडादिप्रहारजनित॥ ९०॥

अथ गण्डमालाया, निचुल इति।—निचुलो जलवेतस। शिग्रु शोभाञ्जन: तस्य बीजानि। एतद्वयेन एको योग। दशमूलेन कृत्वा द्वितीय, दशमूल प्रसिद्धम्, दशद्व्याणि मूलैर्मिलित दशमूलम्, तद्यथा—"शालपर्णी पृश्निपर्णी द्वेऽपी कण्टकारिका। तथा गोक्षुरको बिल्व, श्योनाक, पाटलस्तथा॥

कफजगलगण्डे देवदार्वादिलेप ।—

(देवदारु विशाला च कफगण्डे प्रदेहकः ॥)

गण्डमालादौ निचुलादिलेप ।—

* वातगण्डे प्रदेहार्थमौषधं यदुदीरितम् ।
सर्षपान् शिग्रुबीजानि शणबीजातसीयवान् ॥ ९२ ॥
मूलकस्य च बीजानि तक्रेणास्त्रेन पेषयेत् ।
गण्डमालार्बुदं गण्डं लेपेनानेन शाम्यति ॥ ९३ ॥

अपबाहुकादौ गुञ्जाफललेप ।—

तक्षयित्वा क्षुरेणाङ्गं केवलानिलपीडितम् ।
तत्र प्रदेहं दद्याच्च पिष्टगुञ्जाफलैः कृतम् ॥ ९४ ॥
तेनापबाहुजा पीडा विस्फोटो गृध्रसी तथा ।
अन्याऽपि वातजा पीडा प्रशमं याति वेगतः ॥ ९५ ॥

अग्निमन्थश्च गाधारी दशमूलमिति स्मृतम् ॥" इति। अत्र पेषणार्थे छागमूत्रं देयं व्याधिसाधर्म्यत्वेन वक्ष्यमाणत्वात्। अस्यार्थे "देवदारु विशाला च कफगण्डे प्रदेहकः" इति पठन्ति केचित ॥ ९१ ॥

वातगण्ड इति।—† "वातगण्डे प्रदेहार्थमौषधं यदुदीरितम्" इत्यस्य स्थाने छागमूत्रेण तत् पिष्टमपचीन्न प्रलेपनात्"। वातगण्डे द्रव्यं निचुल शिग्रुबीजानि दशमूलक तदवापि योज्यम्। अनयोर्भेदस्तु प्रदेहप्रलेपविषयत्वात्। एवं "वातगण्डे प्रदेहार्थमौषधं यदुदीरितम्" इत्यस्य स्थाने "सर्षपारिष्टपत्राणि दग्ध्वा भल्लातकैः सह" इति पठन्ति व्याख्यानयन्ति च। अयं लेपो ग्रन्थिष्वपि योज्यः। सर्षपादयो विख्याता एव ॥ ९२—९५ ॥

---

* "वातगण्डे" इत्यादिस्थले "सर्षपारिष्टपत्राणि दग्ध्वा भल्लातकैः सह। छागमूत्रेण सम्पिष्टमपचीन्न प्रलेपनम्॥" इति गूढार्थदीपिकाधृतपाठ एव साधुः।

† टीकेयं सङ्गतिविरुद्धा ग्रन्थान्तरविरुद्धा अबोध्या च।

श्लीपदे धत्तूरादिलेप ।—

धुस्तूरैरण्डनिर्गुण्डी-वर्षाभूशिग्रुमर्षपैः ।
प्रलेपः श्लीपदं हन्ति चिरोत्थमपि दारुणम् ॥ ९६ ॥

कुरण्डे अजाज्यादिलेप ।—

अजाजीहवुषाकुष्ठमैरण्डबदरान्वितम् ।
काञ्जिकेन तु सम्पिष्टं कुरण्डघ्नं प्रलेपनम् ॥ ९७ ॥

उपदंशे करवीरमूललेप ।—

करवीरस्य मूलेन परिपिष्टेन वारिणा ।
असाध्योऽपि व्रजत्यस्तं लिङ्गोत्था रुक् प्रलेपनात् ॥९८॥

उपदंशे त्रिफलाचारलेप ।—

दहेत् कटाहे त्रिफला सा मसी मधुसंयुता ।
उदंशे प्रलेपोऽयं सद्यो रोपयति व्रणम् ॥ ९९ ॥

उपदंशे रसाञ्जनादिलेप ।—

रसाञ्जनं शिरीषेण पथ्यया च समन्वितम् ।
सक्षौद्रं लेपनं योज्यमुपदंशगदापहम् ॥ १०० ॥

अथ श्लीपदे, धुस्तूरेति ।—वर्षाभूः पुनर्नवाशब्दवाच्या । प्रलेपोऽत्र गोमूत्रेण व्यवहारात्, तदभावे जलेन प्रचारः ॥ ९६ ॥

अथ कुरण्डे, अजाजीति ।—अजाजी कृष्णजीरकः । हवुषा द्रव्यविशेषः विटपमज्ञः, इत्यन्यत्रवाच्यः वदन्त्येके । बदरान्वितमिति—बदरफलान्वितम् । अयमपि लेपो व्रध्नरोगे प्रशस्तः ॥ ९७ ॥

अथोपदंशे, करवीरस्येति ।—एतेनोपदंशादिजनितव्यथा अस्त व्रजति नाशं यातीत्यर्थः । असौ योगोऽपि लिङ्गलेपात् बोध्यस्तत्करत्वेन दर्शितः । द्रावणं योगोऽपि कार्यते ॥ ९८ ॥

दहेदिति ।—कटाहे लोहपात्रे । त्रिफला हरीतकीप्रभृतिकम् । एके सा मसी इत्यस्य स्थाने समाषामिति वदन्तः व्याख्यानयन्ति च, तथा चाहुः—"समाषा त्रिफला लोहपात्रे भृष्टा विचूर्णयेत् । हन्ति क्षौद्रेण लेपोऽस्य लिङ्गदोषानशेषतः ॥" इति ॥९९॥

रसाञ्जनमिति ।—रसाञ्जनं शिरीषेण पथ्यया च समन्वितम् । सक्षौद्रं लेपनं

* अस्यार्धे क्वचित् "त्रिफलानीलमसीचूर्णमुपदंशगदापहम्" इत्यधिकपाठः ।

अग्निदग्धे तुगाक्षीर्यादिलेप ।—

अग्निदग्धे तुगाक्षीरी-प्लक्षचन्दनगैरिकैः।
सासृतैः सर्पिषा स्निग्धैरालेप कारयेद्भिषक् ॥ १०१ ॥

अग्निदग्धे तिन्दुकत्वग्लेप ।—

तिन्दुकत्वक्कषायैर्वा घृतमिश्रैः प्रलेपयेत् ॥ १०२ ॥

अग्निदग्धे यवभस्मलेप ।—

यवान् दग्ध्वा मसी कार्य्या तैलेन युतया तया।
दद्यात् सर्वाग्निदग्धेषु प्रलेपो व्रणरोपणः ॥ १०३ ॥

याज्यमुपदंशमवदाहम् ॥" रसाञ्जनमत्र दार्वीक्काथोऽत्र याह्य, तदभावे दारुहरिद्रैव। शिरीषेणेति—शिरीषस्य त्वचा। पथ्या हरीतकी तया सह। शर्म सुखीभम् ॥ १०० ॥

अथाग्निदग्धे, अग्निदग्धे इति।—तुगाक्षीरी वाह्यी। प्लक्षो पारिभद्र इति लोके। सासृतैरिति—असृता गुडूची तया सहितै। ननूष्णवीर्या गुडूची दाहनिवारणाय कथ समर्था? उच्यते गुडूचो व्यवहारादुष्णवीर्या, स्वभावात सुशीतलैव। तर्हि शीतस्पर्शकाङ्क्षिकादौ विद्यमाने गुडूच्येव चरकेणाक्तेति न वाच्यम, यत स्वभावादिय शीतस्पर्शेषु विशेषेण दाहशमना एव, एष भट्टारहरिचन्द्राभिप्राय, गुडूच्या दाहनिवापकत्वम् इति। चक्रस्तु उष्णवीर्या या।प्याऽपि गुडूची आचार्यपाठानुरोधेन द्रव्यान्तरसयोगमाहित्वा न दोष ॥ १०१ ॥

तिन्दुकेति।—तिन्दुक प्रसिद्ध, तस्य त्वक् छल्ली, तज्जनितकषायैरिति—कषायशब्देनात्र पञ्चप्रकार सूच्यते, तद्यथा—स्वरसक्काथफाण्टशिमकल्कस्वरूपम। घृतमिश्रैरिति पञ्चप्रकारेष्वपि घृतप्रचार' ॥ १०२ ॥

द्वितीययोगमाह, यवानित्यादि।—यवोऽत्रविशेष, तान् दग्ध्वा मसी कज्जल कार्या। तैलेन तिलतैलेन। तया मसीकृतया, दग्धयवमसीजनितप्रलेपेनेत्यर्थ। सर्वाग्निदग्धेष्विति—चतुर्विधाग्निदग्धेष्वित्यर्थ, यत,—दुष्ट दुदग्ध सम्यक् दग्धमति-दग्धमिति। एषा विस्तरोऽत्र ज्ञातव्य ॥ १०३ ॥

शिथिलयोनौ पलाशफलादिलेप ।—

पलाशोडुम्बरफलैस्तिलतैलसमन्वितै ।
मधुना योनिमालिम्पेद्गाढीकरणमुत्तमम् ॥ १०४ ॥

शिथिलयोनौ माकन्दफलादिलेप ।—

* माकन्दमूलसयुक्त-मधुकपूरलेपनात् ।
गतेऽपि यौवने स्त्रीणा योनिर्गाढाऽभिजायते ॥१०५॥

लिङ्गवृद्ध्यादौ मरिचादिलेप ।—

मरिच सैन्धवं कृष्णा तगर † बृहतीफलम् ।
अपामार्गस्तिला कुष्ठ यवा माषाश्च सर्षपा ॥ १०६ ॥
अश्वगन्धा च तच्चूर्णं मधुना सह योजयेत् ।
अस्य मन्ततलेपेन मर्दनाच्च प्रजायते ॥
लिङ्गवृद्धि स्तनात्लेध सहतिर्भुजकर्णयो ॥ १०७ ॥

लिङ्गवृद्धौ सितादिलेप ।—

सिताऽश्वगन्धासिन्धूत्थ-काकोलीक्षीरपूर्त पचेत् ।
तल्लेपान्मर्दनाल्लिङ्ग-वृद्धि सञ्जायते परा ॥ १०८ ॥

योनिद्रावणे इन्द्रवारुणिकादिलेप ।—

इन्द्रवारुणिकापत्र-रसे. सूत विमर्दयेत् ।

इदानी लेपप्रकरणवाटन्यानपि लेपानाह तत्रादौ भगसङ्कोचे, पलाशेति ।—पलाशोडम्बरौ प्रसिद्धौ तयो फलानि । शेष सुबोधम ॥ १०४ ॥

माकन्देति ।—माकन्द सहकार तस्य मूल जटा आसजटेत्यर्थ । मधुको वृक्षविशेष, पूरलेपनाद्दृढलेपनात्तु भगसङ्कोचन ॥ १०५ ॥

अथ लिङ्गवृद्धौ योनिसङ्कोचे, मरिचमिति ।—लिङ्गलेपमाहुरेके ।

* "माकन्दफलसयुक्त-मधुकर्पूरलेपनात्" इति गूढार्थदीपिकाधृतपाठ एव समीचीन । चक्रदत्ते "मदफलमधुकर्पूरपूरितम्" इति पाठ । "मद कस्तूरी, फल जातीफल, किंवा मदफल मदनफलम्" इति शिवदासकृतव्याख्या ।

† "बृहतीद्वयम्" इति क्वचित् पाठ ।

रक्तस्य करवीरस्य काष्ठेन च मुहुर्मुहुः।
तल्लिप्तलिङ्गसंयोगात् योनिद्वारोऽभिजायते ॥ १०८ ॥

गावदौर्गन्ध्ये ताम्बूलपत्रादिलेप ।—

ताम्बूलपत्रचूर्णन्तु चूर्णं कुष्ठशिवाभवम्।
वारिणा लेपनं कुर्य्याद्गात्रदौर्गन्ध्यनाशनम् ॥ ११० ॥

गावदौर्गन्ध्य कुलत्थाद्यवधूलनम ।—

कुलत्थशक्तव कुष्ठ मासी चन्दनजं रज ।
शक्तवश्चणकस्यैव त्वक्चैवैकत्र कारयेत् ॥
स्वेददौर्गन्ध्यनाशश्च जायतेऽस्यावधूलनात ॥ १११ ॥

वशीकरणे वचादिलेप ।—

वचा सौवर्चल कुष्ठं रजन्यौ मरिचानि च ।
एतल्लेपप्रभावेण वशीकरणमुत्तमम् ॥ ११२ ॥

मूर्द्धतैलस्य चतुर्विधत्वनिर्देश ।—

अभ्यङ्ग परिषेकश्च पिचुर्वस्तिरिति क्रमात्।
मूर्द्धतैलं चतुर्द्धा स्यात् बलवच्च यथोत्तरम् ॥ ११३ ॥

अभ्यङ्गादीना विधि ।—

त्रयोऽभ्यङ्गादय पूर्वे प्रसिद्धा: सर्वत: स्मृता ।
शिरोवस्तिविधिश्चात्र प्रोच्यते सुश्रुतसम्मत. ॥ ११४ ॥

अथ श्लोक चेपक इति मन्यमानैरस्माभिरपि न स्वीकृत। बहुपुस्तकेष्वदृष्टत्वात ॥ १०९—११२ ॥

अथ मूर्द्धतैलस्य विधानमाह, अभ्यङ्ग इति।—अभ्यङ्गादिचतुःप्रकारे कृत्वा मूर्द्धतैलमाह, तच्च यथोत्तर बलवत बोद्धव्य, यो यस्मादुत्तरो यथोत्तर, तेनाभ्यङ्गात् परिषेको बलवत्तरो भवति, परिषेकात् पिचु, पिचोर्वस्तिरिति। अभ्यङ्गस्य पटनमात्र (?) शिरस्येव। परिषेकोदरादिभि (?) सेचनरूप। पिचु प्रोत स च क्लिन्ने तूलपटल निषिच्य शिरसि देय इति पिचुसज्ञ। वस्तिर्वक्ष्यमाण विधानत्वात्प्रगट (?) एव ॥ ११३ ॥

अथ चतुर्भेदेषु वस्तिविधिरधुनोच्यते, अथ इति।—शिरोवस्तिविधिरिति

शिरोवस्तिश्चर्मणा स्याद्विमुखो द्वादशाङ्गुल।
शिरःप्रमाण तद्बद्ध्वा मस्तके माषपिष्टकै॥ ११५॥
सन्धिरोध विधायाशु स्नेहै कोष्णै प्रपूरयेत्।
तावद्धार्यस्तु यावत् स्यान्नामाकर्णमुखस्रुति॥ ११६॥
वेदनोपशमो वाऽपि मात्राणा वा सहस्रकम्।
विना भोजनमेवात्र शिरोवस्ति प्रशस्यते॥ ११७॥

शिरोवस्तिकर्त्तव्यविधान शिरसश्चर्मनिर्म्मितपात्राकारैवस्तिरित्युच्यते। सुश्रुतस्तु इत्यनेन स्वयुद्या न लिखित इत्यभिप्राय। तद्विधानौ वस्ते स्वरूपमाह विमुख इति—उभयतो मुख। द्वादशाङ्गुल इत्यौन्नत्येन। शिरःप्रमाणमिति विस्तारभेदेन। ननु तन्त्रान्तरे शिरोवस्तिप्रमाण षोडशाङ्गुलोत्सेध दर्शितम, तथा हि—"आशिरो व्याप्तं चर्म षोडशाङ्गुलम्" इति, तत कथ द्वादशाङ्गुलमुक्तम? उच्यते तन्त्रमं वाङ्गुलवस्त्रपट्टेन शिरसि बद्ध्वा तदधो माषकल्केन लेपयेत, उपरिभाग त्वेकाङ्गुलपरिमित चर्म तैलक्षीरं कार्यमिति व्यवहार, तेन द्वादशाङ्गुल चर्म तैलेन पूर्य्यते इति भाव। यत "चर्मणोध्वाङ्गुलैर्हीन कृत्वोर्द्ध्वाङ्गुलोन्मितम। षोडशाङ्गुलि यच्छेष तत्तैलेन प्रपूरयेत॥" इति सम्मटाधोक्तत्वात। तस्मादाचार्य्येण तैलपूरणार्थमेव द्वादशाङ्गुल स्वीकृत, शेषन्तु व्यवहारतो दृष्ट्वा चतुरङ्गुल कार्य्यमित्यदोष। आशु इत्यनेन तत्कालमेव तैलनिक्षेपण कुर्य्यात् यावन्माषपिष्ट शुष्क न भवतीत्याशुपदाभिप्राय, यत शुष्केण माषपिष्टेन तैलस्तरण भवति आर्द्रेण तत्र भवतीत्यर्थ। स्नेहैरिति—यथाव्याधिविधिस्नेहैः। अथ कियत्काल वस्तिधारणम? तमाह—एतत् वस्तिधारणमङ्गेनवय दोषकालादिविषयम। नामाकर्णमुखस्रुतिरित्यनेन तन्मूलस्रवण, कृत शिरश्छिद्रलोमकूपगतैलप्रभावात दोषसवलनाद्वा। अथवा—वेदनाया यावदुपशम भवति तावच्छिरोवस्तिर्धार्य्य इत्यर्थ। एतद्वितयस्य कदाचिदनियतत्वात तृतीयं नियतकालनाह, मात्राणा वा सहस्रकमिति—यावत् सहस्रमात्राणि भवन्ति तावदेव धार्य्ये। वा-ग्रहणेनापि पञ्चशतमात्रा अष्टशतं वा दोषापेक्षयाऽवगन्तव्या इति प्रचार। अन्यत्रे केचिदिति पठन्ति "धारयेदा कृत शान्तेर्याम यामार्द्धमेव वा" इति। अय तन्त्रान्तरादव केनचिल्लिखित, न स्वमत, पूर्वमेव कृताद्यत्वात। अय व्याख्या—या कृत शान्तेर्धारयेत् वाते, पित्ते याम, यामार्द्ध कफे इति। मात्रालक्षणञ्च यथा वाग्भटे—"यावत् पर्य्येति हस्ताय दक्षिण जानुमण्डलम।

शिरोवस्तिदानस्य दिनसङ्ख्या।—

प्रयोज्यस्तु शिरोवस्ति पञ्च सप्ताहमेव वा ॥ ॥ ११८ ॥

शिरोवस्तेरनन्तर कर्त्तव्यनिर्देश।—

विमोच्य शिरसो वस्तिं गृह्णीयाच्च समन्ततः।
ऊर्ध्वकाय ततः कोष्ण-नीरैः स्नानञ्च कारयेत् ॥ ११९ ॥

वस्तेर्गुण।—

अनेन दुर्जया रोगा वातजा यान्ति सङ्क्षयम्।
शिर कम्पादयस्तेन सर्वकालेषु युज्यते ॥ १२० ॥

निमेषोन्मेषकालेन सम मात्राऽस्य सा स्मृता ॥" (वा० सू० २२ अ०) इति। अथ कस्मिन् काले शिरोवस्ति कार्य्यतमाह, विनेति।—भोजन विनेत्यनेन पूर्वाह्णेऽस्य प्रचार समीकौन। अनेति—चतुर्द्धामूर्द्धतेजो, तेन केवलवस्तिरेव भोजनादौ कार्य्य, नात्यङ्गादितिपयमिप्रभिप्राय ॥ ११४—११७॥

अथ यावद्दिनपर्य्यन्त वस्तियोगो विधेय तावद्दिनसङ्ख्या दर्शयितुमाह, प्रयोज्य इति।—पञ्चाह सप्ताह यावद्दोषादिबलापेक्षया अवगन्तव्यम्। पञ्चसप्तदिनग्रहणमत्र सामान्य व्यवहारस्त्वेकादिनमारभ्य यावद्रोगसङ्क्षयस्तावद्दिनपर्य्यन्त कार्य्य इत्यस्मदीयसम्प्रदायस्याभिप्राय ॥ ११८ ॥

अथ केन प्रकारेण वस्त्यपनयन तनाह विमोच्येति।—शिरसो मस्तकात् वस्ति चर्मपुटकं विमोच्य यत्नेन दूरीकृत्य समन्तत परितो गृह्णीयात्, नैवमिति शेष, अर्थात पूर्व तद्गृहतैलशैथिल्यादि निश्चितवस्ति विमोचयेदिति भाव। पश्चात कार्य्यमाह, ऊर्द्धकायमित्यादि।—ऊर्द्धकाय मस्तक कोष्णनीरैरिति—दुष्टदोषे। ननूष्णजले शिर परिषेको न पथ्यतम तथा च "उष्णाम्बुनाऽध कायस्य परिषेको बलावह। तेनैव तूत्तमाङ्गस्य बलहृत केशचक्षुषाम्॥" (वा० सू० २ अ०) इति, तत कथमत्र विहितम? उच्यते—अत्र कोष्णनीरैरित्यनेन किञ्चिदुष्णजलेन सकृदेव स्नान, न तु बहुलोष्णजलेनेत्यर्थ ॥ ११९ ॥

इदानीं वस्तिविधाने कृते सति तद्गुणविशेषमाह, अनेनेति।—अनेन वस्तिविधानेन दुर्जया वातजा रोगा शिर कम्पादय, सङ्घातरोगत्वाद्वातजनिता दुर्जया एव। वातग्रहणेनैव पित्तकफगता अपि रोगा वेदितव्या, तत्प्रधानत्वात्,

कर्णपूरणविधि ।—

स्नेदयेत् कर्णदेशन्तु किञ्चिन्नः पार्श्वशायिनः।
मूत्रै. स्नेहै रसै क्षौणैस्ततः श्रोत्रं प्रपूरयेत् ॥ १२१ ॥

कर्णपूरणधारणार्थं मात्रानिर्देश ।—

कर्णञ्च पूरित स्नेच्छत पञ्चशतानि वा ।
सहस्र वाऽपि मात्राणा श्रोत्रकण्ठशिरोगदे ॥ १२२ ॥

मात्रालक्षणम ।—

स्वजानुनः करावर्त्तं कुर्य्याच्छोटिकया युतम् ।
एषा मात्रा भवेदेका सर्वत्रैवैष निश्चयः ॥ १२३ ॥

यत "एक प्रकुपितो दोष सर्वानेव प्रकोपयेत" इति वचनात्, अत एव सर्वकालेषु युज्यते इति—सर्वकाल श्रोताश्रयवर्षलक्षण, तेन षड्ऋतुषु शिरोवस्ति. कार्य इति तात्पर्यार्थ ॥ १२० ॥

पूर्वमुक्त स्नेहमृदुतैलकर्णपूरण तदिदानी कर्णपूरणमाह, स्नेहयेदिति ।—मूत्रैरिति बहुवचनत्वेनाष्टाना मूत्राणा मध्येऽन्यतमेन कटुकेन कर्णपूरण कार्यम; तथा च तन्त्रान्तरे "अष्टानामिह मूत्राणा मूत्रेणान्यतमेन वा। कोष्णेन पूरयेत् कर्णं कर्णमूलोपशान्तये ॥" (सु० उ० २१ अ०) इति। मूत्राष्टक यथा—'मूत्रं गोनागमहिषोऽश्याजाविखरोष्ट्रकम्' इति। स्नेहैरिति—घृततैलादिभि पक्वैरपक्वैर्वेति प्रकार, अथवापि कोष्णैरिति सम्बन्ध। रसैरिति—स्वरसै, तेन सक्षीरसै. क्षीरितरसैर्वेति व्यवहार, यत्रास्त्रिविधो रसोऽत्र रसकल्पनाया प्रतिपादित, तत् तत्रैव ज्ञातव्यम, अथवापि ईषदुष्णैरिति योज्यम ॥ १२१ ॥

अथ यावत्काल कर्णपूरण कार्यं तावत्कालप्रमाणमाह, कर्णमिति ।—पूरणमत्र तैलमूत्रादिभि । अत पञ्चशतानि वेति मात्राविषय, मात्रालक्षण—"यावत पश्यति हस्ताग्र दक्षिण जानुमण्डलम्। निमेषोन्मेषकालेन सम मात्रा तु सा स्मृता ॥" (वा० सू० २२ अ०) इति। श्रोत्रकण्ठशिरोगदे इति—श्रोत्रगदे कण्ठगदे शिरोगदे इति। एतत किमुक्तम् ? श्रोत्रगदे शतमात्र, कण्ठगदे पञ्चशतमात्र, शिरोगदे सहस्रमात्रमित्यभिप्राय ॥ १२२ १२३ ॥

कर्णपूरणाद्रव्यभेदात् कालभेद ।—

रसाद्यै पूरणं कर्णे भोजनात् प्राक् प्रशस्यते ।
तैलाद्यै पूरणं कर्णे भास्करेऽस्तमुपागते ॥ १२४ ॥

तद्यथा—

कर्णशूले अर्कपत्ररसपूरणम् ।—

पीतार्कपत्रमाज्येन लिप्तं वक्त्रौ प्रतापयेत् ।
तद्रसं श्रवणे क्षिप्तं कर्णशूलहरः परः ॥ १२५ ॥

कर्णशूले छागमूत्रादिपूरणम् ।—

कर्णशूलातुरे कोष्णं वस्तमूत्रं ससैन्धवम् ।
निक्षिपेत्तेन शाम्यन्ति शूलपाकादिका रुजः ॥ १२६ ॥

कर्णशूले शृङ्गवेरादिपूरणम् ।—

* शृङ्गवेरञ्च मधु च सैन्धवं तैलमेव च ।
कटुष्णं कर्णयोर्देयमेतद्धा वेदनापहम् ॥ १२७ ॥

इदानीं कर्णपूरणस्य तैलरसविषयत्वात् कालविभागमाह, रसाद्यैरिति।—रसाद्यैरित्यादिग्रहणात् क्षाद्यकल्कपुटपाकादिभिः। भोजनात् प्राक् प्रातःकाले। तैलाद्यैरिति आदिशब्दान्मूत्रघृतक्षीरादिभिः। भास्करेऽस्तमुपागते इति—सायंकाले ॥ १२४ ॥

तद्यथा इत्यनेन सम्मति कर्णपूरणार्थं योगवरानाह, पीतेति।—पीत पीतवर्णं यदर्कस्य पत्रं तत आज्येन घृतेन लिप्त्वा वक्त्रौ प्रताप्य तद्रसो ग्राह्यः। पीतत्वमस्य परिपाकात् भवति ॥ १२५ ॥

कर्णशूलातुरे इति।—अत्र आदिपदं लुप्तं ज्ञेयं, तेन इत्यादिशब्दात् सप्तस्वपि कर्णरोगेऽस्य प्रचारः ॥ १२६ ॥

शृङ्गवेरमिति।—शृङ्गवेरमार्द्रकं, तदभावे शुण्ठीति सर्वत्र। मधु चेत्यस्य स्थाने मधूकपाठः सङ्गतः, तत्र मधुयष्टी। शुण्ठ्यादीनां प्रत्येकं प्रयोगः

---

* "शृङ्गवेरञ्च मधूक मधु सैन्धवमालभम्। तिलपर्णीरसस्नैल टङ्कण निम्बुकद्रवम्॥ कटुष्णं कर्णयोर्देयमेतद्धा वेदनाऽपहम्॥" इति गूढार्थदीपिकाधृतपाठः।

कर्णशूले कपित्थादिपूरणम्।—

कपित्थमातुलुङ्गाम्ल-शृङ्गवेररसै. शुभै.।
सुखोष्णै. पूरयेत् कर्णं कर्णशूलोपशान्तये ॥ १२८ ॥

कर्णशूले पुटपक्वार्करसपूरणम्।—

अर्काङ्कुरानम्लपिष्टास्तेलाक्तान्लवणान्वितान्।
सन्निदध्यात् स्नुहीकाण्डे कीरिते तच्छदावृते ॥ १२९ ॥
पुटपाकक्रमं कृत्वा रसैस्तच्च प्रपूरयेत्।
सुखोष्णैस्तेन शाम्यन्ति कर्णपीडाः सुदारुणाः ॥ १३० ॥

कर्णशूले दीपिकातैलम्।—

महत. पञ्चमूलस्य काण्डान्यष्टाङ्गुलानि च।
क्षौमेणावेष्ट्य ससिच्य तैलेनादीपयेत्ततः ॥ १३१ ॥
यत्तैलं च्यवते तेभ्य सुखोष्णं तेन पूरयेत्।
ज्ञेयं तद्दीपिकातैलं सद्यो गृह्णाति वेदनाम् ॥
एवं स्याद्दीपिकातैलं कुष्ठे देवतरौ तथा ॥ १३२ ॥

कार्यं। केचित्तु शृङ्गवेरप्रभृतीना कल्केन तैलं सम्याच्च देयमिति व्याख्यानयन्ति ॥ १२७ ॥

कपित्थेति।—कपित्थादीना स्वरसेन कर्णपूरणं कार्यं, तद्वान् व्यक्तं समर्थो वा ग्राह्यः। कपित्थो दधिफलम्। मातुलुङ्गो बीजपूरक। अम्लोऽम्लवेतसः। शृङ्गवेरमार्द्रकम्। शुभैरित्यनेन तेषा सद्गो दृष्टः, न तु श्रुतपीडनादिगुणार्थम् ॥ १२८ ॥

अर्काङ्कुरानिति।—अर्काङ्कुरोऽत्र कोमलपल्लव तत्सम्भवत्वात्। अम्लपिष्टानिति—अम्ल काञ्जिकः। तैलं तिलसम्भवम्। लवणं सैन्धवं। स्नुही सेहुण्ड। तच्छदा सेहुण्डपत्राणि। पुटपाकक्रमं पुटपाकविधानेन बोद्धव्यम्। शेषं सुगमम् ॥ १२९।१३० ॥

महत इति।—महत्पञ्चमूलस्य प्रत्येकम् अष्टाङ्गुलमितानि काष्ठानि, महत् पञ्चमूलं यथा—"बिल्वाग्निमन्थ. श्योनाक. काश्मर्य. पाटला महत्" इति। देवतरुर्देवदारु ॥ १३१।१३२ ॥

कर्णशूले स्योनाकतैलम्।—

तैलं स्योनाकमूलेन मन्देऽग्नौ परिपाचितम्।
हरेदाशु त्रिदोषोत्थं कर्णशूलं प्रपूरणात्॥ १३३॥

कर्णनादे यष्टिमधुकादितैलम्।—

कल्ककाथेन यष्ट्याह्व-काकोलीमाषधान्यकैः।
शूकरस्य वसा पक्वा कर्णनादार्त्तिनाशिनी॥ १३४॥

कर्णनादादौ स्वर्जिकादितैलम्।—

स्वर्जिका मूलक शुष्कं हिङ्गु कृष्णासमन्वितम्।
शणपुष्पी च तैस्तैल पक्वं शुक्तचतुर्गुणम्॥
प्रणाद शूलबाधिर्य्यं स्राव कर्णस्य नाशयेत्॥ १३५॥

बाधिर्य्यादौ अपामार्गक्षारतैलम्।—

अपामार्गक्षारजले तत्क्षार कल्कितं क्षिपेत्।
तेन पक्वं जयेत्तैलं बाधिर्य्यं कर्णनादकम्॥ १३६॥

तैलमिति।—स्योनाकमूलस्य कल्ककाथेनेत्यर्थः॥ १३२॥

कल्केति।—कल्ककाथेनेत्यादि योगः सुगमः॥ १३४॥

स्वर्जिकेत्यादि।—स्वर्जिका क्षारविशेषः। मूलक प्रसिद्धं तस्य शुष्कं ग्राह्यम्। शणपुष्पी। हिङ्गु रामठम्। शुक्तं काञ्जिकं, तस्य चतुर्गुणं ग्राह्यम्। स्वर्जिकादीनामभावे जलेन कल्कमाहुः। एके हिङ्गु कृष्णासमन्वितमित्यस्य स्थाने हिङ्गु कृष्णा महौषधमिति पठन्ति, * महौषधं शुण्ठीति प्रचारोऽस्ति॥ १३५॥

अपामार्गेति।—अपामार्गं प्रसिद्धं तस्य क्षारोदके कल्कितं तत्क्षारमिति—† अपामार्गपञ्चाङ्गकल्कं तत्र क्षारयित्वा तेन तैलं विपाच्य देयमित्यर्थः

* महौषधमिति पाठश्चक्रदत्तसम्मतः।

† अस्य शिवदासकृतव्याख्या—"अपामार्गक्षारपलानि षोडश, जलस्य तु द्रवद्रोणात् चतुर्विंशतिशरावा, एकविंशतिवारान् परिस्राव्य अत क्षारजलात् षडञ्जलिशरावा ग्राह्याः। तत्कृतकल्केनेति—अपामार्गक्षारकृतकल्केन, स च तैलगौरवभयात् जलेनार्द्रीकृत्य तैले देयः, यदा तु पिण्डीभूतात् कल्कात् तैलं सम्यक् पृथग्भवत इष्यते तदैव तैलं पात्रान्तरे कृत्वा ग्राह्यं, न तु कल्को गालनीयः क्षारनिर्यताभयात्। अन्ये तु समासात्तगैतमपि मार्गपद तच्छब्देन समाकृष्य अपामार्गमूलमेव कल्कमाहुः," इति।

कर्णनाड्या शम्बूकतैलम्।—

शम्बूकस्य तु मासेन पचेत्तैलन्तु मार्षपम्।
तस्य पूरणमात्रेण कर्णनाडी प्रशाम्यति ॥ १३७ ॥

कर्णस्रावे पञ्चकषायादिपूरणम्।—

चूर्णं पञ्चकषायाणां कपित्थरसमेव च।
कर्णस्रावे प्रशंसन्ति पूरणं मधुना सह ॥ १३८ ॥

पञ्चकषायाः।—

तिन्दुकान्यभया लोध्रं समङ्गा चामलक्यपि।
ज्ञेयाः पञ्च कषायास्तु कर्मण्यस्मिन् भिषग्वरैः ॥ १३९ ॥

कर्णस्रावादौ बीजपूररसपूरणम्।—

खर्जिकाचूर्णसंयुक्तं बीजपूररसं क्षिपेत्।
कर्णस्रावरुजादाहा प्रणश्यन्ति न संशयः ॥ १४० ॥

पूतिकर्णे आम्रादितैलम्।—

आम्रजम्बूप्रवालानि मधुकस्य वटस्य च।
एभिः संसाधितं तैलं पूतिकर्णोपशान्तिकृत् ॥ १४१ ॥

तन्त्रान्तरेऽपि—"अपामार्गक्षारजलेन तत्कल्कलेन साधितं तिलजम्" इत्यादि। परिभाषोक्तत्वात् क्षारोदकं तैलाच्चतुर्गुणं देयम्। कल्कन्तु चतुर्थांशमिति ॥ १३६ ॥

शम्बूकस्येति।—शम्बूको जलशुक्ति स्यात्, तन्मध्यगतमांसविशेषेण * तैलाच्चतुर्गुणेन मांसक्वाथजलेनेत्यर्थः। मांसन्तु तैलसाम्यमिति व्यवहारात् ॥ १३७ ॥

चूर्णमिति।—चूर्णं पञ्चकषायाणामित्येको योगः। कपित्थरसेन मधुयुक्तेन द्वितीयः। एके पञ्चकषायाणामेव चूर्णं कपित्थरसेनालोड्य मधुयुक्तञ्च कर्णपूरणमाहुः ॥ १३८ ॥

पञ्चकषायाणि यथा—तिन्दुकानीति। एके आरग्वधशिरीषजम्बू-अश्वत्थसज्ञानां पञ्चकषायत्वं कथयन्ति ॥ १३९ ॥

खर्जिकेति।—बीजपूरफलस्वरसं, तस्य सलाक् खर्जिकाचारप्रक्षिप्तं देयम् ॥ १४० ॥

आम्रेति।—आम्रजम्बूप्रवालानि जम्बूाम्रयोरुत्पन्नपत्राणीत्यर्थः। एवं मधुकस्य वटस्य चेति। तैलमत्र तिलकल्कस्वरसपञ्चमांशमितमपि देयम्, तथा च—"एते, घृत

---

*'शम्बूकमांसस्य कल्कं, जलं चतुर्गुणम्' इति शिवदासव्याख्या।

कर्णकोटे गोमूत्रहरितालादिपूरणद्वयम्।—

पूरणं हरितालेन गवां मूत्रयुतेन च।
अथवा सार्षपं तैलं कर्णकोटहरं परम् ॥ १४२ ॥

कर्णकोटे शिग्रुरसादिपूरणम्।—

स्वरसं शिग्रुमूलस्य सूर्य्यावर्त्तरसं तथा।
व्याघ्रणं चूर्णितञ्चैव कपिकच्छुजटारसम्।
कृत्वैकत्र क्षिपेत् कर्णे कर्णकोटहरं परम ॥ १४३ ॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्य्येण विरचितायां शार्ङ्गधरसंहितायाम्
उत्तरखण्डे लेपमूर्द्धतैलकर्णपूरणविधिनाम एकादशोऽध्यायः ॥ ११ ॥

निम्बकरञ्जतैलं समार्षपं सावहरं प्रदिष्टम्" इति। निम्बादीनां तैलं जलेन साम्यं मिलितत्वात् ॥ १४१ ॥

पूरणमिति।—मूत्रयुतेन हरितालेनैको योगः। केवलसार्षपतैलेन द्वितीयः। अस्मत्सम्प्रदाये तु गोमूत्रेण हरितालं सम्पिष्य तेन कटुतैलं विपाच्य तत्तैलं ग्राह्यमिति प्रचरति। "अथवा सार्षपं तैलं कर्णकोटहरं परम्" इत्यस्य स्थाने "वृषन कर्णदौर्गन्ध्ये गुग्गलुं श्रेष्ठ उच्यते" इति केचित् पठन्ति व्याख्यानयन्ति च ॥ १४२ ॥

स्वरसमिति।—सूर्य्यावर्त्तं सुवर्चला, सा द्विधा, एका मोचलीशब्दवाच्या, अपरा ब्रह्मसुवर्चलेति। व्याघ्रणं विकटुकम्। कपिकच्छू वानरी। शेषं सुबोधम् ॥ १४३ ॥

इति श्रीवात्स्यायनवंशप्रकाशवैद्यभावविरुदाल्लजेनाढमल्लेन विरचितायां शार्ङ्गधर-
दीपिकायामुत्तरखण्डे लेपमूर्द्धतैलकर्णपूरणविधिनाम एकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ।

अथ शोणितस्रावविधि' ।—

स्राव्यरक्तस्य सामान्यनिर्देश ।—

शोणितं स्रावयेज्जन्तोरामय प्रसमीक्ष्य च ।
प्रस्थ प्रस्थार्द्धकं वाऽपि प्रस्थार्द्धार्द्धमथापि वा ॥ १ ॥

रक्तस्रावणाद् ऋतु रक्तस्रावणस्य गुणश्च ।—

शरत्काले स्वभावेन कुर्य्याद्रक्तस्रुति नरः ।
त्वग्दोषग्रन्थिशोथाद्या न स्यू रक्तस्रुतैर्यतः ॥ २ ॥

अथ शोणितविस्रावणविधिरधुना विधीयते । सम्बन्धश्चायं, यथा लेपादयो दैहकान्तिकरास्तद्वच्छोणितविस्रावणमपि, अत शोणितस्रावणमाह शोणितमिति । —प्रस्थमत्र सार्द्धत्रयोदशपलानि, तथा चोक्त—"वमने च विरेके च तथा शोणितमोक्षणे । सार्द्धत्रयोदशपलं प्रस्थमाहुमनीषिण ॥" इति । ननु तन्त्रान्तरे प्रस्थ प्रस्थद्वयञ्च क्रमेण रक्तस्रावणे कथित, तथा हि—"लघ्वन्नमध्यप्रवरं वेगास्त्रयार इष्टा वमने षडष्टौ । दशैव ते द्विगुणा विरेके * प्रस्थत्रया शोणितमोक्षणे च ॥" इति, तत कथमत्र प्रस्थ प्रस्थार्द्धञ्च कथितम् ? उच्यत, तन्त्रान्तर यदिह तत बहुदोषस्य बलिन पुरुषस्य पर प्रमाणमामनन्ति, अत्र तु सप्तैषदोष रक्त रक्षणीयमित्याशोचार्य्येण प्रस्थादिमर्द्ध इह कृत इत्यदोष ॥ १ ॥

शरदिति ।—तथा हि—"रक्त स्वभावादृतुविहितत्वादनातुरस्यापि रक्तस्रुति प्रशस्ता" इति, यत पित्त शरदि कुप्यति इति वचनात रक्तस्यापि कोपो

---

* 'प्रस्थत्रया शोणितमोक्षणे च" इत्यत्र चरके "प्रस्थत्रया द्विविचतुर्गुणश्च' इति तथा वाग्भटे "प्रस्थत्रया स्याद्द्विचतुर्गुणश्च" इति पाठ । किञ्च "लघ्वन्नमध्य—" इत्यादि श्लोक वमनविरेचनयो वैगिकोमानिकीयुक्तिविषयक न तु शोणित-विस्रावणविषयक । अपरञ्च प्रस्थाधिकरक्तविस्रावणविधि सुश्रुतादौ न दृश्यते, तथा च सुश्रुत —"बलिनो बहुदोषस्य वयस्थस्य शरीरिण । पर प्रमाणमिच्छन्ति प्रस्थ शोणितमोक्षणे ॥" (सु० शा० ८ अ०) इति। श्लोकोऽस्मिन् प्रस्थमत्र पर प्रमाणमित्युक्तम् अतोऽधिक प्रमाण नास्ति, एवञ्च टीकाकृद्व्याख्यान न समीचीनतया प्रतिभाति इति ।

रक्तस्य स्वरूपम्।—

मधुरं वर्णतो रक्तमशीतोष्णं तथा गुरु।
शोणितं स्निग्धविस्रं स्याद्विदाहश्चास्य पित्तवत् ॥ ३ ॥

रक्ते पाञ्चभौतिकगुणा।—

विस्रता द्रवता रागश्चलनं विलयस्तथा।
भूम्यादिपञ्चभूतानामिते रक्ते गुणाः स्मृताः ॥ ४ ॥

भवतीति नियम, तथा च—"पित्तप्रकोपणैरेव शोणितञ्च प्रकुप्यति" इति, तस्माच्छरादौ शोणितविस्रावणं विहितं, तस्रावणात् लग्दोषादयोऽपि न स्युः। लग्दोषा अष्टादश कुष्ठानि न्यच्छनीलिकादयश्च। गुल्मयो वातादिनिमित्ता शिरायन्त्रिश्च। शीथा दोषदुष्टिभवा व्रणशोथादयः। आदिग्रहणात् अन्येऽपि शोणितजा रोगा रक्तगुल्मविद्रधिविसर्पादयः ॥ २ ॥

अथ शोणितस्य प्रकृतिं वक्तुमाह, मधुरमिति।—मधुरं रसतः, मक्षिकापिपीलिकादीनां प्राचुर्यमुपसर्पणान्माधुर्यस्यैव प्रतीतम्। वर्णतो रक्तमिति—रक्तमारक्तम्, इन्द्रगोपप्रकाशमित्येके। देव(?) पद्माक्षतगुञ्जाफलवर्णमप्युक्तम्, अथवा वस्त्रादिलग्नं सत् प्रक्षाल्यमानमपि न विवर्णता यातीत्यपरे। अशीतोष्णमिति—न चैकान्तत शीतं नात्युष्णमिति, यतोऽग्नीषोमीयत्वाद्रक्तस्य तत्तुल्यगुणयोरस्रशीतयोरभिलाषो रक्तक्षये भवतीति दर्शनात्। अथवा प्रकोपोऽस्य दोषैरेव तन्मूलत्वात् दोषानुरूपमनुष्णशीतम्, तथा हि—"यस्मात् रक्तं विना दोषैर्न कदाचित् प्रकुप्यति। तस्मात्तस्य यथादोषं कालं विद्यात् प्रकोपणे॥" (सु० सू० २१ अ०) इति। स्निग्धविस्रं स्यादिति—स्निग्धं विस्रसम् (?)। विस्रसामगन्धि। विदाहश्चास्य पित्तवदिति—पित्तस्य येन वस्तुना यथा च विदाहस्तेन वस्तुना तथा च विदाहः शोणितस्यापीत्यर्थः ॥ ३ ॥

अथ शोणिते पाञ्चभौतिकत्वं प्रतिपादयन्नाह, विस्रतेति।—यस्मादेते विस्रतादय पृथिव्यादीनां गुणा शोणिते दृश्यन्ते तस्मात् रक्तं पाञ्चभौतिकमिति। तत्र विस्रता आमगन्धता भूमिगुणः। द्रवता द्रवभावः, अयमप्बहुगुणः। रागो रक्तता तेजोगुणः। चलनं नैकत्र स्थितिशीलम्, अयं वातगुणः, स्यन्दनमित्यपरे। विलय इति—विलयनम्, अयमप्याकाशगुणः, एके विलयस्थाने लघुतेति पठन्ति व्याख्यानयन्ति। भूम्यादिपञ्चभूतानामिति—आदिशब्देन अग्नेर्जीवायुराकाशानि गृह्यन्ते ॥ ४ ॥

दूषितरक्तस्य लक्षणम्।—

रक्ते दुष्टे वेदना स्यात् पाको दाहश्च जायते।
रक्तमण्डलता कण्डू शोथश्च पिडकोद्गमः ॥ ५ ॥

प्रदूषरक्तस्य लक्षणम्।—

वृद्धे रक्ताक्ष्णेवत्वं शिराणां पूर्णता तथा।
गात्राणां गौरव निद्रा - मेदो दाहश्च जायते ॥ ६ ॥

क्षीणरक्तस्य लक्षणम्।—

क्षीणेऽस्रमधुराकाङ्क्षा मूर्च्छा च त्वग्विरूक्षता।
शैथिल्यञ्च शिराणा स्यात् † घातादुन्मार्गगामिता ॥ ७ ॥

इदानीं दुष्टरक्तस्यापि लक्षणमाह, रक्ते इति।—दुष्टे वातादिदोषदूषिते वेदना पीडा। पाको दाहश्च व्रणेष्वव प्राच्यमस्याभिहितम्। रक्तमण्डलतेति—रक्तवर्ण-मण्डलात्यर्थम्। कण्डू पामाधिक्यम्। शोथो व्रणशोथ। पिडका ग्रन्थ्यादय ॥ ५ ॥

अथ रक्तातिवृद्धौ सत्यां किं लक्षणं तदाह, वृद्धे इति।—रक्ताक्ष्णेवत्वमिति—तेन रक्ताक्ष्णेवता च भवति। शिराणां पूर्णता तथेति—शिराश्वाव रक्तवहाः ग्रेया, तासां पूर्णता रक्तेनेत्यर्थः। मेदो मेदोवृद्धि प्रार्थनावाप्तिगतमेदोवृद्धि स्यादित्यव विषयः, यत "स्थूलास्त्रिषु विशेषेण मज्जा लभ्यन्तराश्रित। अन्येतरेषु सर्वेषु सरक्तं मेद उच्यते॥" (सु० शा० ४ अ०) इति ॥ ६ ॥

क्षीणे इति।—क्षीणे रक्ते अस्रमधुराकाङ्क्षेति—शोणितक्षये सति वातवृद्धौ सत्यां तत्प्रतीकारार्थत्वादस्रस्येच्छा, तथा रक्तस्य द्रवत्वात्तत्क्षये सति तेजोवृद्धौ सत्यां मधुरप्रार्थना। एके क्षीणेऽस्रमोतलाकाङ्क्षेति पठन्ति, तत्रापि स एवार्थः। त्वग्विरूक्षतेति वातवृद्धित। शिराणां रक्तवहानाञ्च शैथिल्यं भवति, ‡ अतिरक्तक्षयात्। घातात् प्रहारात् उन्मार्गगामिता रक्तस्येत्यर्थ ॥ ७ ॥

* "मेद" इत्यत्र "मद" इति गूढार्थदीपिकाधृतपाठ एव सुश्रुतादिसम्मत।

† "घातात्" इत्यत्र "वातात्" इति गूढार्थदीपिकापाठ एव सङ्गत, घातक्षये वातवृद्धे सम्भाव्यत्वात्, वृद्धिक्षयप्रस्तावे घातोक्तेरप्रासङ्गिकत्वाच्च इति।

‡ अतिरक्तक्षयात् इति पाठस्तु सर्वथा विरुद्ध एव, क्षीणे रक्ते रक्तातिप्रवृत्तेरसम्भाव्यत्वात्।

वातेन दुष्टरक्तस्य लक्षणम्।—

अरुणं फेनिलं रूक्षं परुषं तनु शीघ्रगम्।
अस्कन्दि सूचिनिस्रोति रक्तं व्याद्वातदूषितम्॥ ८॥

पित्तेन दुष्टरक्तस्य लक्षणम्।—

पित्तेन पीतं हरित नील श्यावञ्च विस्रकम्।
अस्कन्यरुण मक्षिकाणा पिपीलानामनिष्टकम्॥ ९॥

कफेन दुष्टरक्तस्य लक्षणम्।—

शीतलं बहलं स्निग्ध गैरिकोदकसन्निभम्।
मासपेशीप्रभं स्कन्दि मन्दगं कफदूषितम्॥ १०॥

द्विदोषेण दुष्टरक्तस्य लक्षणम्।—

द्विदोषदुष्टं सस्रष्टं त्रिदुष्ट पूतिगन्धकम्।
सर्वलक्षणसयुक्त काङ्क्षिकाभञ्च जायते॥ ११॥

इदानीं दुष्टरक्तस्य वातादीना प्रत्येकलक्षणान्याह, अरुणमिति।—अरुणादयस्त लक्षणे कृत्वा वातदूषित रक्त ज्ञातव्यात्। तत्र अरुणमीषद्रक्त कृष्णाभाव व्याख्यानयन्ति। फेनिल फेनयुक्तम। परुषमपिच्छिलम। तनु अच्छम। शीघ्रगमाशुप्रवृत्ति, अत एवास्कन्दि अस्कन्दि स्थानवरहितम्। सूचीभिरिव निस्रोतन गावेषु॥ ८॥

पित्तेन यदा दुष्ट रक्त स्यात्तदा एतादृश भवति, कि तत? पित्तेनेति।—पीत पीतवर्ण, तच्च निरामावस्थाया भवति। हरित श्यामवत् प्रतिभासम। नील हरित श्याव तच्च सामावस्थाया भवति। श्याव हरितकृष्णम्। विस्रकमामगन्धिकम्। अस्कन्दि चेति स्थानवरहितम्। मक्षिकाणा पिपीलानामनिष्टकमिति—अनिष्टमप्रियम, यत तासामननुसरणादनिष्टत्वमवगन्तव्यम्॥ ९॥

कफदूषित रक्तमीदृश भवति, शीतलमिति।—शीतल स्पर्शादीर्घ्यात्च। बहल घनम्। गैरिकोदकसन्निभमिति—पाण्डुलोहित कथितम्। मासपेशीप्रभमिति—अतिस्थानत्वात् पाण्डुलोहितमिति भाव। अत एव स्कन्दि कथितम। स्कन्दित्वादेव मन्दगत्वमप्युक्तम॥ १०॥

अथ ससर्गसन्निपातान्वितरक्तविकृतेर्लक्षणान्याह द्विदोषेति।—द्विदोषदुष्ट शोणितमिति शेष, यतो द्वाभ्या दोषाभ्या दूषित तत सस्रष्टमिति कथितम, एतेन द्वाभ्या त्रयाणा वा मिलित भवतीति भाव। त्रिदुष्ट रक्त सन्निपातदूषित

विषेण दुष्टरक्तस्य लक्षणम्।—

विषदुष्टं भवेच्छ्यावं नासिकोन्मार्गगं तथा।
विस्रं काञ्जिकसङ्काशं सर्वकुष्ठकरं बहु ॥ १२ ॥

प्रकृतिस्थरक्तस्य लक्षणम्।—

इन्द्रगोपप्रभं ज्ञेयं प्रकृतिस्थमसंहतम् ॥ १३ ॥

रक्तस्रावणाईरोगाः।—

श्लीपे दाहेऽङ्गपाके च रक्तवर्णोऽसृजः स्रुतौ।
वातरक्ते तथा कुष्ठे सपीडे दुर्जयेऽनिले ॥ १४ ॥
पाणिरोगे श्लीपदे च विषदुष्टे च शोणिते।
ग्रन्थ्यर्बुदापचीक्षुद्र-रोगरक्ताधिमन्थिषु ॥ १५ ॥

कथित, विभिर्दोषैर्दूषित विदुष्ट, तच्च पूतिमन्धिक भवति। सर्वलक्षणसयुक्तमिति—सर्वेषा वातपित्तकफाना लक्षणैर्युक्तमिति। तदेव काञ्जिकाभञ्च भवतीति ॥ ११ ।

इदानीं विषदुष्टस्य रक्तस्याकृति दर्शयन्नाह, विषेति।—विष स्थावरजङ्गम, तेन दुष्ट दूषितमित्यर्थ। ईदृश केन लक्षित तदाह, श्यावमिति—इषत्कृष्ण वर्णयुक्त भवति। नासिकोन्मार्गग तथेति—नासिकया उन्मार्गगामि भवति, तेन नाक प्रवर्त्तते इति तात्पर्य्यार्थ विषप्रभावात्। नासिकोपलक्षितत्वात्तेन मुखनेत्रकर्णेभ्यो प्रवर्त्तते इति भाव। विस्रमिति—आमगन्धि। सर्वकुष्ठकरमिति विषप्रभावात् लभ्य हि—"विषेण दूषित रक्त सर्वकुष्ठकर मतम" इति ॥ १२ ॥

अथ विकृतरक्तमभिधाय प्रकृतिस्थ दर्शयन्नाह, इन्द्रगोपेति।—इन्द्रगोप प्रावृट्कालजो जन्तुविशेष इन्द्रवधूरिति लोके, स चानेकप्रकारवर्ण, अत्र तु रक्त एव गृह्यते। असहतमिति—नात्यच्छ नातिघनम्। न स्यादतीत्यन्ये ॥ १३ ॥

अथ रक्तस्रावो येषा विहितस्तानाह, श्लीपे इति।—श्लीपे व्रणश्लीपे एकाङ्गजेऽपि साध्यम, यत सर्वाङ्गश्लीप चोपस्य च अस्रभोजननिमित्त पाण्डुरोगग्रथशोफादि आशिमभिशोनाश्च स्वयमौ निषिद्धश्च स। अङ्गदाहे अङ्गपाके च। रक्तवर्णोऽसृज स्रुताविति—केवलरक्तपित्ते। सपीडे दुर्जयेऽनिले इति—तथा हि, उष्णाम्ललवण वातहरक्षोपयोगात कुपितेन शोणितेनावृतो वातो यदा वेदनाकारी तदा शिराव्य इति। पाणिरोगे दाहादौ, तेन बाह्यरोगोऽपि गृह्यते, यदुक्त—शोणितावृतवात सलिलयोर्बाह्यशोषावबाहुकयोरप्यधोरन्तरे शिराव्यध। अपच्यामिति, उत्पन्नभावाय।

विदारीस्तनरोगेषु गात्राणां सादगौरवे।
रक्ताभिष्यन्दतन्द्राया पूतिघ्राणास्यदेहके ॥ १६ ॥
यक्ष्मतप्लीहविसर्पेषु विद्रधौ पिडकोद्गमे।
कर्णौष्ठघ्राणवक्त्राणां पाके दाहे शिरोरुजि ॥
उपदंशे रक्तपित्ते रक्तस्रावः प्रशस्यते ॥ १७ ॥

रक्तस्रावणोपायाः।—

एषु रोगेषु शृङ्गैर्वा जलौकाऽलाबुकैरपि।
अथवाऽपि शिरामोक्षैः कुर्याद्रक्तस्रुतिं नरः ॥ १८ ॥

शिरामोक्षे रक्तस्रावणानर्हाः।—

न कुर्वीत शिरामोक्षं क्रुशस्यातिव्यवायिनः।
क्लीबस्य भीरोर्गर्भिण्याः सूतिकापाण्डुरोगिणाम् ॥ १९ ॥
पञ्चकर्मविशुद्धस्य पीतस्नेहस्य चार्शसाम्।

नित्यर्थः, न तु कठाया तस्याम्। क्षुद्ररोगेषु अक्षिकादिषु। विद्रधाविति—षड्विधविद्रधिषु मध्ये पञ्च विस्राव्या "स्राव्या विद्रधय पञ्च भवेयुः सर्वजाहते" (सु० सू० २५ अ०) इति। उपदंशे इति, उपदंशग्रहणात् परिवर्त्तिकाशुक्रव्यापत्सु च मेढ्रमध्ये शिरान्यधः। रक्तपित्ते इति—रोमकूपोद्भूते इत्येके। शेषं सुबोधम् ॥१४—१७॥

अथ शोणितविस्रावणं यैर्यस्मिन् कुर्य्यात्तानि दर्शयन्नाह, एष्विति।—एषु पूर्वोक्तेषु शोथप्रभृतिषु रोगेषु शृङ्गादिषु प्रकारा यथायोग्यानुरूपतो योज्याः। शृङ्गन्तु गोशृङ्गं, तच्च सप्ताङ्गुलविस्तीर्णं भवति, तथा च—"विषाणं श्वेतगोरिन्द्रं वक्रं सप्ताङ्गुलायतम्। चिच्चाऽन्तं पिचुपेशीकं योज्यं वातयुतेऽन्तिमे ॥ अङ्गुष्ठमूलवन्मूलं छिद्रं मध्येऽस्य सुश्लक्ष्णतः। वस्त्रपट्टावनद्धञ्च रक्तमाचूषणाङ्कितं ॥" (भालु०) इति। जलौकाः प्रसिद्धाः, तास्तु द्वादशधा भवन्ति, तासां षट् सविषा तावत्य एव निर्विषाश्च। विस्तारोऽपि तासामत्यल्पं ज्ञातव्यः, अत एव ग्रन्थगौरवभयान्न लिखितः। अलाबुका तुम्बी प्रसिद्धवाच्या, तस्या लक्षणं केनचिदिति दर्शितम्, तत् यथा—"अष्टाङ्गुलपरिणाहा चतुरङ्गुलनालसम्मिता सुमुखा कृष्णसुदालिप्ततनुः श्रेष्ठा रक्तावसेचनेऽलाबूः स्यान्तर्दोषयुता" (भालु०), तथा च विस्रावयेद्रक्तमिति। शिरामोक्षैरिति—शिरा रक्तवहास्तासां मोक्षः शस्त्रेण कुर्य्यादिति। मोक्षो रुधिरस्येति ॥ १८॥

अथ येषां शिरामोक्षं न कुर्य्यात्तानाह, नेति।—क्रुशस्य कृशस्य पुंसः। क्लीबो

सर्वाङ्गशोथयुक्तानामुदरश्वासकासिनाम् ॥ २० ॥
क्षयतोसारदुष्टानामतिस्निग्धतनोरपि ।
ऊनषोडशवर्षस्य गतसप्ततिकस्य च ॥
आघातक्षतरक्तस्य शिरामोक्षो न शस्यते ॥ २१ ॥

रक्तस्रावणानर्हाणामवस्थाविशेषे स्रावणविधि ।—

एषाञ्चात्ययिके रोगे जलौकाभिस्तु निर्हरेत् ।
तथा च विषदुष्टाना शिरामोक्षोऽपि शस्यते ॥ २२ ॥

नपुंसक । पञ्चकर्माणीति—वमनविरेचननिरूहानुवासनस्यानि, तै शोधितस्य पुन । सर्वाङ्गशोथयुक्तानामिति, सर्वाङ्गेन व्रणशोथा एकाङ्गजा अपि गृह्यन्ते । आघातात् प्रहारादिना क्षुत रक्त यस्य तस्य । शिरामोक्षो द्विविध, प्रच्छान. शिराव्यधश्च । "न कुर्वीत शिरामोक्ष क्षतक्षयातिव्यवायिन" इत्यादिव्याख्या पूर्व प्रतिपादिता, अधुनाऽपि विशेषमाह, क्षतस्य गर्भिणीनाञ्चोपक्षीणधातुत्वाद्वेद-सन्देहभयात् । अतिव्यवायिनो वातप्रकोपभयान्न विध्येत् । क्लीबस्य प्रधानधातुक्षयेण अल्पसत्त्वेन च निश्चितविनाशात् । भीरोश्च तमोबहुलत्वाल्लोहितदर्शनेन मूर्च्छाभयान्न विध्येत् । सूतिकाया गर्भिणीवत् । पञ्चकर्मविशुद्धस्येत्यादि—वान्तविरिक्तयो रक्तसंसर्जनयोरपीतस्नेहयोर्वमनविरेचनानन्तरमेव वातप्रकोपभयाच्छिरा न विध्येत । आस्थापितजागरितभोजनस्यापि प्रकोपभयान्न विध्येत् । अनुवासितस्य सन्देहतो भूयोऽग्निमान्द्यभयात् । अन्ये अन्यथा अनुमानतो निरूपणीया । शिरामोक्षो न शस्यते इति हिरुक्के सति विशेषेण शिरानिषेधपरत्वात् वाच्य. (?) । आत्ययिके तु रक्तात्यावुत्तजलौकाप्रभृतिपरत्वाच्चावेत्य (?) ॥ १९—२१ ॥

अथात्ययिके क्षतादीनामपि शोणितविस्रावविषय वक्तुमाह, एषामिति ।—एषा पूर्वोक्तानां क्षतादीनामपि यदि आत्ययिक रोग. स्यात् तदा जलौकाभिर्निर्हरेत्, परमसुकुमारयोगत्वात्, निर्हरेद्विस्रावयेत्, शोणितमिति शेष । अत्ययो विनाशो भवत्यस्मादित्यात्ययिको विद्रध्यादिरनन्यसाध्य । तथा विषदुष्टाना पुरुषाणामपि जलौकाभिस्तु निर्हरण कर्त्तव्यम्, न केवल जलौकाभि शिरामोक्षेणापि विष-प्रभावेण सकलशरीरदूषितत्वात् सर्वं रक्त दूषितमेव, अत एव शिरामोक्ष, यत. "शिरा सर्वाङ्गशोधिनी" (भाई० उ० १२ अ०) इति वचनात् ॥ २२ ॥

वातादिदूषितरक्तस्य स्रावणोपाया ।—

गोसृङ्नेण जलौकाभिरलाबूभिरपि त्रिधा ।
वातपित्तकफैर्दुष्टं शोणितं स्रावयेद्भिषक् ॥ २३ ॥

द्विदोषदूषितरक्तस्य स्रावणोपाय ।—

द्विदोषाभ्यान्तु सन्दुष्टं त्रिदोषैरपि दूषितम् ।
शोणितं स्रावयेद्युक्त्या शिरामोक्षै. पदैस्तथा ॥ २४ ॥

रक्तस्रावणोपायाना शक्तिनिर्देश. ।—

गच्छति शोणितं शृङ्गं दशाङ्गुलमितं बलात् ।
जलौका हस्तमात्रन्तु तुम्बी च द्वादशाङ्गुलम् ॥
पदमङ्गुलमात्रस्य शिरा सर्वाङ्गशोधिनी ॥ २५ ॥

अथ दोषविशेषेण शृङ्गादिविषय विभजन्नाह गोसृङ्नेणेति ।—भिषगिति शेषणाद्दुष्टकर्मा ज्ञेय, तेन वातदुष्टं शृङ्गेण, यत,—"उष्णं समधुर स्निग्ध गवां शृङ्ग प्रकीर्तितम्। तच्छ्रातोपसृष्टेषु हितं तदवसेचने ॥" (सु० सू० १३ अ०) इति । पित्तदुष्टन्तु रुधिरं जलौकाभिर्नर्हरेत, तथा हि—"शीताधिवासा सुखरा जलौका वारिसम्भवा। तस्मात् पित्तोपसृष्टे तु हिता सा स्रवसेचने ॥" (सु० सू० १३ अ०) इति। कफदुष्टन्तु अलाबुभिरिति ॥ २३ ॥

अथाति (१) व्यस्तमभिधाय द्विदिोषदुष्टस्य रक्तस्रावसेचनोपायमाह, द्विदोषाभ्यामिति।—युक्त्येत्यनेन यथायोग्यानुरूप योज्यम्, तेन पदोपरक्षितत्वाच्छृङ्गालाबुप्रचारोऽवगन्तव्य, यदुक्त— "सर्वाणि सर्वैर्वा" (सु० सू० १३ अ०) सर्वाणि वातपित्तकफदुष्टानि शोणितानि सर्वैरिति शृङ्गादिभिर्यथा-योग्यमित्यभिप्राय । पदै प्रच्छानै ॥ २४ ॥

अथ शृङ्गादीना कियद्दूरे प्रचारस्य दर्शयन्नाह, गच्छतीति।—दशाङ्गुलमित्युपचर्य, तेन चतुर्दिक्षु दशाङ्गुलमिति भाव । एव सर्वत्र विषये। पदं प्रच्छानम्, अत एवाह कश्चित्—'अवगाढे जलौका स्यात् प्रच्छान पिण्डितं हितम्। शिराऽङ्गुल्यापके रक्ते शृङ्गालाबू लघि स्थिते ॥" (सु० शा० ८ अ०) इति ॥ २५ ॥

प्रयुक्तोऽपि स्रावणोपाये तद्वार्थतामेति ।—

शीते निरन्ने * मूर्च्छायां तन्द्राभीतिमदश्रमैः।
युताना न स्रवेद्रक्तं तथा विण्मूत्रसङ्गिनाम् ॥ २६ ॥

अप्रवर्त्तितरक्ते तत्प्रवर्त्तनविधिं ।—

अप्रवर्त्तितरक्ते च कुष्ठत्रिकटुसैन्धवैः ।
मदयेद्व्रणवक्त्रं च तेन सम्यक् प्रवर्त्तते ॥ २७ ॥

रक्तस्रावणस्य कालावस्थादिनिर्देशं ।—

तस्मान्न शीते नात्युष्णे † नास्निग्धे नातितापिते ।
पीत्वा यवागूं हृतस्य स्रावयेच्छोणितं बुधः ॥ २८ ॥

अथ शोणित यैषा न स्रावयेत्तानाह, शीते इति।—शीते शीतकाले शीतादिते देशे पुरुषे च। निरन्ने इति—लङ्घिते। अतितन्द्रा निद्रातिशय, (?), यदुक्त—"मदमूर्च्छायमाक्रान्ता वातविण्मूत्रसङ्गिनाम्। निद्राभिभूतशीताना वृथा नासृक् प्रवर्त्तते॥" (सु० सू० १४ अ०) इति। विण्मूत्रसङ्गिनामिति—विण्मूत्रादीना सङ्गोऽप्रवर्त्तितदृग्युक्तानामित्यर्थ। विण्मूत्रवङ्क्षणेनैव वातसङ्ग्याप्यवरोध ॥ २६ ॥

इदानीमप्रवर्त्तितस्य शोणितस्य चिकित्सायोग वक्तमाह, अप्रवर्त्तितेति।—यदा शीतादिहेतुभिर्न स्रवेत्तदा कुष्ठादिचूर्ण कृत्वा व्रण घर्षयेत। कुष्ठ प्रसिद्ध सैन्धवञ्च। त्रिकटक शुण्ठीमरिचपिप्पलीसङ्गम्। शेष सुगमम् ॥ २७ ॥

इदानी सुखविस्रावणार्थं हितोपदेशमाह, तस्मादिति।—तस्मात् पूर्वोक्ता-प्रवर्त्तितरक्तविषयदर्शनात्। न शीते नात्युष्णे इति—साधारणकाले, अत एवोक्त सुश्रुते—"व्यधे वर्षासु विध्येत शीतकाले तु शीतले। हैमन्तकाले मध्याह्ने शस्त्रकालास्त्रय स्मृता॥" (सु० शा० ८ अ०) इति। नास्निग्धे इति—अस्नेहिते। नातितापिते इति—अजीर्णादिभि सन्तप्ते, सुश्रुतादित्यन्ये। पीत्वा यवागू हृतस्येति—यवागूरव तिलयवागू तथा सद्य स्नेहनीयत्वात्, रक्तोत्क्लेदकारित्वाच्च अन्ये तु यवागूर्विरलद्रवा वहुसिक्था हृतस्येति कथनात ॥ २८ ॥

---

* "मूर्च्छास्तिनिद्रा" इति पाठान्तरम्।

† "न स्निग्धे" "नातिस्निग्धे" इति पाठद्वयमसाधु, सुश्रुतविरोधात्।

रक्तस्य अतियोगे हेतु ।—

* अतिस्विन्नस्योष्णकाले तथैवातिशिराव्यधात् ।
अतिप्रवर्त्तते रक्तं तत्र कुर्य्यात् प्रतिक्रियाम् ॥ २९ ॥

अतिप्रवृत्तरक्ते चिकित्सा ।—

अतिप्रवृत्ते रक्ते च लोध्रमर्जरसाञ्जनैः ।
यवगोधूमचूर्णैर्वा धवधन्वनगैरिकैः ॥ ३० ॥
सर्पनिर्मोकचूर्णैर्वा भस्मना क्षौमवस्त्रयोः ।
मुखं व्रणस्य बद्ध्वा च शीतैश्चोपचरेत् व्रणम् ॥
विध्येदूर्द्ध्वं शिरा तस्य दहेत् क्षारेण वाऽग्निना ॥ ३१ ॥

अतिप्रवृत्तरक्ते चतुर्विधप्रयोगस्य फलम् ।—

व्रणं कषायः सन्धत्ते रक्तं स्कन्दयते हिमम् ।

अथ केन हेतुना रक्तातिप्रवृत्तिस्तद्दर्शयन्नाह, अतीति ।—अतिस्विन्नस्य अत्यर्थं स्वेदितस्य पुरुषस्य देशस्य वा। उष्णकाले ग्रीष्मर्त्तौ शरदृतौ वा। अतिशिराव्यधादिति—अत्रप्रयुक्तेन शस्त्रेणावगाढव्यधनाद्रक्तातिस्रुतिर्भवति ॥ २९ ॥

पूर्वमुक्तं तत्र कुर्य्यात् प्रतिक्रियामित्यत्र तां प्रतिक्रियां दर्शयन्नाह, अतिप्रवृत्ते इति।—धव सर्जरसौ राल। अञ्जन प्रसिद्ध, तत्र दार्वीकाथसमुद्भव रसाञ्जनमञ्जन। केचिदिति व्याख्यानयन्ति, सज्ज शालभेद। रसाञ्जन तदेव। धवो वृक्षविशेष प्रसिद्ध। धन्वनो धामन इति प्रसिद्ध। लोध्रादित्वमिश्चूर्णीकृताभिर्व्रण मुखमवचूर्ण्याङ्गुल्यग्रेणावपीडयेदिति प्रचार। सर्पनिर्मोक सर्पकञ्चुक। क्षौम वस्त्रयोर्भस्मेति—पट्टाम्बरदग्धभस्म, क्षौमं अतसीभव, तद्दग्ध्वा भस्म कार्य्यम्, एव वस्त्रस्य, वस्त्रग्रहणात् कार्पासस्यापि भस्मापि। मुख व्रणस्य बद्ध्वेति—यथोक्तव्रण बन्धनद्रव्यैर्गाढ बद्ध्वेत्यादित्यर्थ। शीतैश्चोपचरेत् व्रण शीताच्छादनभोजनागारे शीते पट्टपरिषेकैश्च व्रण शस्त्रादिजनितम् उपचरेत्। वा पक्षान्तरप्रकारमाह, विध्येदूर्द्ध्वमित्यादि—प्राक्तनव्यधात परस्थाने तामेव पूर्वविद्धा शिरा विध्येत् रक्तगतिच्छेदनार्थम्। क्षारेणाग्निना वा दहेदिति शस्त्रपदस्थेत्यभिप्राय ॥३०।३१ ॥

अथ लोध्रादीना शोणितातिप्रवृत्तौ प्रयुक्तानां प्रत्येकफलमाह, व्रणमिति ।—

---

* "अतिस्विन्ने सोष्णकाले" इति पाठस्तु न मनोरम.।

* व्रणास्यं पाचयेत् क्षारो दाह: सङ्कोचयेच्छिराम् ॥ ३२ ॥

सुष्कशोथे शिरादाहविधि ।—

(वामाङ्गशोथे दक्षस्य करस्याङ्गुष्ठमूलजाम् ।
दहेच्छिरां व्यत्यये तु वामाङ्गुष्ठशिरां दहेत् ॥
शिरादाहप्रभावेण सुष्कशोथः प्रणश्यति ॥

विसूचिकाया शिरादाहविधि ।—

विसूच्या पार्ष्णिदाहेन जायतेऽग्नेः प्रदीपनम् ।
सङ्कुचन्ति यतस्तेन रसश्लेष्मवहा: शिरा ॥

यकृत्प्लीहवृद्धौ शिरादाहविधि ।—

यदा वृद्धियकृत्प्लीह्नो शिरोः सञ्जायतेऽसृजः ।
तदा तत्स्थानदाहेन सङ्कुचन्त्यसृजः शिराः ॥)

अतिरक्तस्रावणनिषेध ।—

रक्ते दुष्टेऽवशिष्टेऽपि व्याधिर्नैव प्रकुप्यति ।
† ततः स्थेयं सावशेषे रक्ते नातिक्रमो हितः ॥ ३३ ॥

कषायोऽत्र क्षीप्रसर्जरसाञ्जनप्रभृतिकः, स च व्रणधर्षणार्थं पूर्वमेवाव दर्शित । अन्ये तु हरीतक्यादिक पञ्चवल्कलादिक वा आहु, एतेन किमुक्तम् ? अथ कषाय व्रण प्रक्षालयतीत्यत रुधिर सस्पृष्टे निवारयतीत्यर्थं व्रणग्रहणेन जलौकामुखच्युतजलमपि गृह्यम् । हिम शीतल रक्तमित्यतिप्रवृत्तिं स्खन्दनेन स्थानीभूत करोतीत्यर्थं । क्षारोऽत्र विहितोऽपामार्गादिजनित, क्षौमादिजनितो वेत्यत्र विहित, स च व्रणास्य व्रणमुख पाचयेत तेनातिप्रवृत्तिरक्त सम्यक् प्रशोष्येदित्यभिप्राय । दाहोऽग्निकृत शलाकाप्रभृतिभि, स च शिरा रक्तवहा सङ्कोचयेत्, तेनातिप्रवर्त्तिं सम्यगवतिष्ठते ॥ ३२ ॥

इदानीं रक्तातिस्रावे दोष दर्शयन्नाह, रक्ते इति ।—तत स्थेय सावशेषे इति ।—सावशेषे दोषे रक्त पुन सशमनादिभिर्जयेदित्यभिप्राय ॥ ३३ ॥

---

* "व्रणास्य पाचयेत्" इत्यत्र "व्रण सम्पाचयेत्" इति पाठकरण युक्तम्, तथा सम्पाचयेत्" इति सुश्रुतसवादात्।

† "अत, स्थेय सावशेष रक्तम्" इति गूढार्थदीपिका।

अतिरक्तस्रावणे दोषा।—

आस्यमाक्षेपक तृष्णा तिमिरं शिरसो रुजम्।
पक्षाघात श्वासकासौ हिक्का दाहश्च पाण्डुताम्॥
कुरुतेऽतिस्रुत रक्तं मरण वा करोति च॥ ३४॥

रक्तरक्षाया हेतुनिर्देश:।—

देहस्योत्पत्तिरसृजा देहस्तेनैव धार्य्यते।
विना तेन व्रजेज्जीवो रक्षेद्रक्तमतो बुध:॥ ३५॥

रक्तस्रावजानतवातकोपे प्रतीकार।—

शीतोपचारै: कुपिते स्रुतरक्तस्य मारुते।
कोष्णेन सर्पिषा शोथ सव्यथं परिषेचयेत्॥ ३६॥

क्षीणरक्तस्य प्रतीकार।—

क्षीणस्यैणशशोरभ्र-हरिणच्छागमासज:।
रस समुचित: पाने क्षीरं वा यष्टिका हिता:॥ ३७॥

अथातियोगनि सृतस्य रक्तस्य व्यापत् दर्शयन्नाह, आस्यमिति।—आस्यमन्धताम्। अक्षीक्षिजगतरोग शिरस्यतिप्रवृत्त रक्त करोति। शेष सुबोधम्॥ ३४॥

अथ रक्तस्रावणे भूयो भूयोऽतिक्रमो न करणीय इत्याह, देहस्योत्पत्तिरिति।—उत्पत्तिस्थितिप्रलयेषु शोणितमेव हेतु, तेनैव शोणितेन धार्य्यते स्थाप्यत। शेष सुगमम्॥ ३५॥

अथ शोणितावसेकै पश्चातकर्म दर्शयन्नाह, शीतोपचारैरिति।—शीतोपचारा मेकाद्या। एतेन किमुक्तम्? अनतिशीतादिक प्रयत्नत उपाचरणीयमिति सुबोधम् अत एव कोष्णेन सर्पिषेति—ईषदुष्णेन सर्पिषेत्यर्थ॥ ३६॥

अथ रक्तातिक्रमेण क्षीणस्य पुरुषस्यानन्तर भेषजमाह, क्षीणस्येति।—क्षीणस्य रक्तक्षीणपुरुषस्येत्यर्थ। एण कृष्णमृग। उरभ्रो मेष:। हरिणश्यामवर्णो मृग। एषा मासै रसुतो रस इति। एके "हरिणच्छागसम्भवम्। रक्त समुचितम्' इति पठन्ति व्याख्यानयन्ति च। क्षीर वा यष्टिका हिता इति—क्षीरादिसिक्तमौदद्दु मुञ्जीत्यभिप्राय॥ ३७॥

सम्यक्स्रुतरक्तस्य लक्षणम् ।—

पीडाशान्तिर्लघुत्वञ्च व्याधेरुद्रेकसङ्क्षयः ।
मनःस्वास्थ्यं भवेच्चिह्नं सम्यक् विस्रावितेऽसृजि ॥ ३८ ॥

रक्तमोक्षणे अपथ्यम् ।—

व्यायाममैथुनक्रोध-शीतस्नानप्रवातकान् ।
एकाशनं दिवास्वप्नं क्षारात्कटुभोजनम् ॥
शोकं वादमजीर्णञ्च त्यजेदाबलदर्शनात् ॥ ३९ ॥

इति श्रीदासीदरसूनुना श्रीआर्द्धराचार्य्येण विरचितायां आर्द्धरसंहितायामुत्तरखण्डे शोणितस्रावविधिर्नाम द्वादशोऽध्याय ॥ १२ ॥

त्रयोदशोऽध्यायः ।

अथ नेत्रकर्मविधिः ।—

नेत्रप्रसादनकर्माणि ।—

सेक आश्योतनं पिण्डो विडालस्तर्पणं तथा ।

अथ रक्तस्रावणात् सम्यक् शुद्धिलक्षणान्याह, पीडाशान्तिरिति ।—पीडाशान्तिर्वेदनाव्यपगमः । लघुत्वं शरीरस्येति, एतच्छारीरं विस्रावितलिङ्गम् । मनःस्वास्थ्यमिति—मनसः प्रसादः, एतेन मानसं लिङ्गम् । शेषं सुगमम् ॥ ३८ ॥

इदानीं रक्तस्रुते किं त्याज्यं तत् दर्शयन्नाह, व्यायामेति ।—अत्यातिशयेन निषिद्धं न तु सकृदेव । शोकं घनवन्धुनाशादिजनितम् । वादमिति—अतिभाषणम् । आबलदर्शनादिति—रक्तस्रुतस्य यावत् बलं न भवति तावद्व्यायामादयो निषिद्धा इत्यभिप्रायः ॥ ३९ ॥

इति श्रीवास्त्व्यान्वयप्रकाशवैद्यभावमिश्रात्मजेनाढमल्लेन विरचितायां आर्द्धरदीपिकायामुत्तरखण्डे शोणितस्रावविधिर्नाम द्वादशोऽध्यायः ॥ १२ ॥

अथेदानीं नेत्रप्रसादनकर्माणि व्याख्यास्यामः, तानि कानि कर्माणीत्याह, सेक इति ।—सम्बन्धमात्रे, शिराव्यधेनापि नेत्रप्रसादनं भवति, तद्वत् सेकादिभिरपि

पुटपाकोऽञ्जनश्चैभि कल्पैर्नेत्रमुपाचरेत् ॥ १ ॥

सेकविधि ।—

सेकस्तु सूक्ष्मधाराभि सर्वस्मिन्नयने हितः।
मीलिताच्यस्य मर्त्यस्य प्रदेयश्चतुरङ्गुलम् ॥ २ ॥

दोषभेदेन सेकस्य वैविध्यनिर्देश ।—

स चापि स्नेहनो वाते रक्ते पित्ते च रोपणः।
लेखनश्च कफे कार्य्यस्तस्य मात्राऽधुनोच्यते ॥ ३ ॥

इति। सेकोऽव धारादिना स्नेहरूप। आश्योतन नेत्रमध्ये तैलादिक्षेपणरूपम्। निमीलितोन्मीलिताक्षिभेदेन सेकाश्योतनयोभेदमाह। पिण्डीति प्रसिद्धा। अक्ष्णावक्षिलेप स विडालमज्ञ। तर्पणमिति—नेत्रतर्पिकर कर्म, तच्च नेत्रवस्तिरिति प्रसिद्धम्। पुटपाक इति, पुटपाकयुक्त्या द्रव्यस्य रसो नेत्रप्रसादने विहित स पुटपाक कथित, अस्यापि द्विविधकर्म व्याचक्षत, एक तर्पणवत् कार्यम् अपरम् आश्योतनवदिति। अञ्जन प्रसिद्ध, तच्च नानाविधम्। चक्षारात् शस्त्रकर्माण्यत्र बोद्धव्यमिति केचित्, न खलतम्। तदन्यच्च ज्ञातव्यम् ॥ १ ॥

पूर्वमुक्त सेक आश्योतन पिण्डीत्यादिक, तत्र तावत् सेकविधिरधुना विधीयते, सेक इति।—सूक्ष्मधारा नेत्राञ्जनशलाकानुरूपा निर्गता द्रवधारात्। सर्वस्मिन्नयने इति—सवाचिरोगे, यथादोषापेक्षया वा सवयवेषु, समस्तनेत्रमण्डले इत्येके। चतुरङ्गुलमिति—चतुरङ्गुल यथा स्यात, तेन चतुरङ्गुलोत्सेध धारा कृत्वा सिचयेदित्यभिप्राय, यद्वा यथासुखोत्सेध सिचयेदित्यपि, अथवा चतुरङ्गुलेनाक्षिविस्तार यावत् तावत् मध्यादौकृत्य द्रव्यकल्क कृत्वा कर्पटे वद्धा अक्षिसेक, कर्त्तव्य इति सम्प्रदाय, तथा च्युक्तम्—"अव्यक्तोऽक्षिगदे कार्य्य श्रोतस्येवं मुखेन वहि" इत्यादि ॥२॥

अथ दोषविशेषेण सेकस्य कमविशेषमाह, स इति।—वाते केवलानिलजनित अक्षिरोगे, स्नेहन स्नेहकृतस्वेद कार्य्य इत्यर्थ, यथा—"सर्पिर्मासवसामज्जा-सेट स्नेहौषधै कृत। स्नेहन इति विख्यात"। रक्ते पित्ते इति व्यस्ते मिलिते वा रोपण स्नेह। रोपणस्तु तन्त्रान्तरे यथा—"स्नेह्याज्ज्वलमभ्राज्य तिक्तद्रव्य-सिद्ध च। दृष्टेवनार्थं श्रोतस्य स्नेह कार्योऽपि रोपण ॥" इति। कफे कफप्राये-ऽक्षिरोगे लेखन स्नेह इति—लेखनो दोषलेखन इति, स च स्निग्धस्य विधेय, तथा हि—'स्नेहो हितोऽतिरूक्षस्य स्निग्धस्यापि हि लेखन। जाङ्गलाना यकृन्मासे लेखनद्रव्यसयुते ॥ क्षणक्षोहरजस्काम शङ्खविद्रुमसिन्धुजै। समुद्रफेनकासीस-

सेकप्रयोगस्य कालमाह।—

* षड्वाक्शते स्नेहनेषु चतुर्भिश्चैव रोपणे।
वाचामेकशतैः कार्य्यः सेको लेखनकर्मणि ॥ ४ ॥

सेकप्रयोगस्य कालं।—

कार्य्यस्तु दिवसे सेको रात्रौ वाऽऽत्ययिके गदे ॥ ५ ॥

स यथा—

स्रोतोगदधिमस्तुभि। लेखने लेखनस्नेहो विहितोऽयं भिषग्वरैः ॥" इति। तस्येति विविधसेकस्य मात्रां परिमाणं कार्यकालं वा अधुना इदानीम् ॥ ३ ॥

तस्य मात्राऽधुनोच्यते इत्युक्तं प्राक् तदिदानीं तन्मात्राविशेषमाह, षडिति।—स्नेहनेषु स्नेहेषु षट्शतवाक्यानि यावत् भवन्ति तावत् स्नेहस्नेहः कर्त्तव्य इत्यभिप्रायः, गर्वंचरोच्चारणं वा, तथा हि—† "निमेषोन्मेषणं प्रसारसङ्कल्पा क्षोटिकाऽथवा। गुर्वंचरोच्चारणं वा मात्रेयं स्मृता बुधैः ॥" इति। अत्रैके लघ्वक्षरोच्चारणं वामिति पठन्ति। रोपणे स्नेहस्तृप्तिरिति—चतुःशतवाक्यैः। लेखनकर्मणीति—लेखनस्नेहैः, एकशतवाक्यैः कृत्वा तावत् स्नेहः कार्य्य इत्यर्थः ॥ ४ ॥

अथात्तिस्नेहस्य कालमाह, कार्य्य इति।—आत्ययिके गदे प्रकुपितेऽचिरोगे, रक्तादिभिः पीडिते इत्यर्थः। रात्रौ वैद्यस्य वा-ग्रहणात् निशायाः प्रथमो यामोऽभिप्रेतः, तथा हि—"स्निग्धोष्णैर्वातजे पित्ते रक्तजे मृदुशीतलैः। तीक्ष्णरूक्षोष्ण

---

* अत्र स्नेहनस्य षट्शतवाक्योच्चारणं रोपणस्य चतुःशतवाक्योच्चारणं लेखनस्य एकशतवाक्योच्चारणं कालं इत्युक्तं, सुश्रुते पुनः स्नेहनस्य चतुःशतवाक्योच्चारणं रोपणस्य षट्शतवाक्योच्चारणं लेखनस्य च द्विशतवाक्योच्चारणं कालं इति दृश्यते, तथा च—"स्नेहने पुटपाकस्य धार्य्यो द्वे वाक्शते तु सः। लेखनो वाक्शतं तस्य पर धारणमुच्यते ॥ लेखनात्त्रिगुणो धार्य्य पुटपाकस्तु रोपणे। सेकस्य द्विगुणः काल पुटपाकात् परो मतः ॥" (सु० उ० १८ अ०) इति। गूढार्थदीपिकायां 'वाचामेकशते" इत्यत्र "वाक्शतैश्च त्रिभिः" इति पाठः।

† शिवदासस्तङ्कनादिभिः लघ्वक्षरोच्चारणकाल मात्रा इति पठितम्, तथा च—"निमेषोन्मेषणे पुंसां स्फोटनं वा तथाऽङ्गुलेः। अक्षरस्य लघोर्वाऽपि मात्रा तूच्चारणं भवेत् ॥" इति।

वाताभिष्यन्दे एरण्डादिक्षीरसेक ।—

एरण्डत्वक्पत्रमूले घृतमाजं पयो हितम् ।
सुखोष्ण सेचनं नेत्रे वाताभिष्यन्दनाशनम् ॥ ६ ॥

वाताभिष्यन्दे दग्धादिमेकहायम ।—

परिषेको हितो नेत्रे पयः * कोष्णं ससैन्धवम् ।
रजनीदारुसिद्ध वा सैन्धवेन समन्वितम् ॥ ७ ॥

विशद प्रसाद्यति कफात्मक ॥ तीक्ष्णोष्णकटुभोजनाना व्यत्यासात सान्निपातिक । तस्य कालो दिवा सर्वो यामा स्यात प्रथमो निशि ॥" इति ॥ ५ ॥

अथ त्रिविधाक्षिरोगाना प्रयोगद्वारेण क्रमं दर्शयन्नाह, स यथेत्यादिना दर्शयति स्म चकार, एरण्डेति।—एतच्च वाताभिष्यन्दे प्रशस्तम्। अभिष्यन्दो नेत्रावयव सरक्तपाकरूप (१), अयमपि सर्वाक्षिरोगोत्पादक इत्यत्र, तथा हि "वातात पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विध । प्रायेण जायते घोर सर्वनेत्रामयाकर ।" इति। एरण्डपत्रेत्यादिप्रयोगे क्षीरमाक्षिक क्षीरपरिभाषयैव बोद्धव्यम। तत्रान्तरेऽयमधिमन्थनाम्ना विहित, तत्र कण्टकारीघृतमिति पठन्ति तथा च—"कण्टकारीमिक्षैरण्ड-मूल-वक्पत्रसाधितम्। क्षीरमाज हित सेके नेत्र स्यन्दाधिमन्थयो" ॥" इति ॥ ६ ॥

अन्यच्च "परिषेके हित नेत्रे पय कोष्ण ससैन्धवम्। रजनीदारुसिद्धं वा सैन्धवेन समन्वितम् इति।— परिषेक सेकाभिधानम्। पयोऽत्राज गव्य वा, नान्यमिति केचित्। कोष्णमीषदुष्णम। ससैन्धवमिति—सैन्धवचूर्णप्रक्षिप्तम। अथवा रजनीदारुसिद्ध पय इति योग। क्षीरपाकोऽत्र क्षीरपरिभाषया कर्त्तव्य। रजनीदारु दारुहरिद्रा, एके रजनी दारु द्रव्यद्वय वदन्ति, तत्र रजनी हरिद्रा, दारु दवदारु ॥ ७ ॥

---

* सुश्रुते "शीतम" इति पाठ, तथा च—"परिषेके हितश्चात्र पय शीत ससैन्धवम" (सु० उ० ६ अ०) इति।

† अभिष्यन्द अधिमन्थनाम्ना क्वापि न प्रसिद्ध, प्रबलोऽभिष्यन्द अधिक्लिन्नसंज्ञ अधिमन्थरूपेण परिणतो भवतीति। अन्ये "तत्रान्तरे योगो ऽयमधिमन्थेऽपि विहित" इत्येव पाठो भाव्य कण्टकारीत्यादियोगदर्शनात्।

मारुतपर्य्याय शुष्काग्निपाकयो सेक ।—

वाताभिष्यन्दशमनं हित मारुतपर्य्यये ।
शुष्काग्निपाके च हितमिदं सेचनकं सदा ॥ ८ ॥

पित्तरक्ताभिष्यन्दे सावरादिसेक ।—

सावर मधुकं तुल्य घृतभृष्ट सुचूर्णितम् ।
छागक्षीरे स्थित सेकात् पित्तरक्ताभिघातजित् ॥ ९ ॥

रक्ताभिष्यन्दे त्रिफलादिसेक ।—

त्रिफलालोध्रयष्टीभि भद्रमुस्तकैः ।
पिष्टै. शीताम्बुना सेको रक्ताभिष्यन्दनाशन: ॥ १० ॥

रक्ताभिष्यन्दे लाक्षादिसेक ।—

लाक्षामधुकमञ्जिष्ठा-लोध्रकालानुसारिवा: ।
पुण्डरीकयुत: सेको रक्ताभिष्यन्दनाशन: ॥ ११ ॥

वाताभिष्यन्दशमन हित मारुतपर्य्यये। शुष्काग्निपाके च हितमिद सेचनकं सदा ॥" इति।—मारुतपर्य्यायेऽपि हितमेवत, मारुतपर्य्यायस्तु सर्वाक्षिरोगे पठन्ति, तद्यथा—"वार वारञ्च पश्यति भ्रुवौ नेत्रे च मारुत। रुजय विविधास्तीव्रा स ज्ञेयो वातपर्य्यय ॥" इति। शुष्काग्निपाके च इदमेव सेचन सदा सर्वस्मिन् काले ऋतौ वा हितमित्यर्थ। शुष्काग्निपाकोऽपि सर्वाक्षिगत एव बोद्धव्य, तत यथा—"यत कृष्णित दारुणरूक्षवत्स * सलक्षनेत्राविलदर्शन यत्। सरुक्षण यत् प्रतिबोधने च शुष्काग्निपाकोपहत तदक्षि ॥" इति ॥ ८ ॥

इदानी रक्ता[illegible]भिष्यन्दनाशनार्थं योगमाह, सावरमिति।—पित्ताभिघातोऽभिष्यन्द एव ॥ ९ ॥

त्रिफलेति।—यष्टी यष्टीमधु। भद्रमुस्तक श्रेष्ठमुस्त, नागरमोथा इति लोके। पिष्टै इति कल्कीकृतै। अय पोट्टलक वस्त्रेण छेदो विहित (?)। पोट्टलकद्वारेणैव तदधरासेक इत्यन्ये (?) ॥ १० ॥

लाक्षेति।—तगरम (?)। सारिवा आस्फोता। पुण्डरीक कमल, तदभावे तद्बीजान्यत्र गृह्यन्ते। अत्र क्वाथरूपेण सेको बोद्धव्य ॥ ११ ॥

---

* सुश्रुते "त्रिदोषजे चाविलदर्शन यत। सुदारुण यत्—" इत्यादि पाठ.।

अभिष्यन्दजशूले श्वेतलोध्रसेक ।—

श्वेतलोध्र घृते भृष्टं चूर्णितं पटविस्रुतम्।
उष्णाम्बुना विस्रुदितं सेकाच्छूलघ्नमक्ष्णके ॥ १२ ॥

आश्योतनविधि ।—

अथाश्योतनक कार्य्यं निशाया न कथञ्चन।
उन्मीलितेऽक्षिणि दृष्ट्वाध्वे विन्दुभिर्द्वादृङ्नाड्वितम् ॥ १३ ॥

लेखनादिभेदेन त्रिविधाश्योतनस्य विन्दुमात्रानिर्देश ।—

विन्दवोऽष्टौ लेखनेषु स्नेहने दश विन्दव'।
रोपणे द्वादश प्रोक्ता:—" ॥ १४ ॥

शीतोष्णभेदेन तस्य प्रयोगविधि ।—

"—ते शीते कोष्णरूपिण:।
उष्णे च शीतरूपा' स्यु' सर्वत्रैवेष निश्चय: ॥ १५ ॥

अथाक्षिसादनहरयोगमाह, श्वेतेति।—अय धाराभिघातोऽपि स्वेद पोट्टलकेन वद्वा कर्त्तव्य इति सम्प्रदाय। अक्ष्णके नेत्रे ॥ १२ ॥

अथाश्योतनमाह, अथेति।—आश्योतन नेत्रसेचन, तच्चादावेव सर्वेषामक्षि-रोगाणाम्, उक्तञ्च वाग्भटे—"सर्वेषामक्षिरोगाणामादावाश्योतन हितम्। रूक्षतोदकण्डूघर्षाश्रु-दाहरागनिवर्हणम्॥" (वा० सू० २३ अ०) इति। आदाविति नामावस्थाया वातपित्तवर्जनेयम्। निरामावस्था च रूक्षाद्यपलक्षिता ज्ञेया, उक्तञ्च विदेहे—"अभिष्यन्देऽधिमन्थे च नेत्रयो कफसम्भवे। उत्पन्न एव कर्त्तव्य नेत्रयो कफनाशनम्॥ लाल्यास्राव्यो (?) परीषेकस्तीक्ष्णाश्योतनादिकम्॥" इति। अव नामनिरामलक्षणञ्च यथा—उदीर्णवेदन नेत्र रागशोथसमन्वितम्। घर्षनिस्तोदशूलाश्रु युक्तनामान्वित विदु॥ मन्दवेदनता कण्डू सरमाश्रुप्रशान्तता। प्रसन्नवत्मता चाक्ष्णो' सम्यक् दोषक्षयादिशेत्॥" इति। निशाया न कथञ्चन इति—रात्रौ न कर्त्तव्यमेवेत्यनेन दिवा कर्त्तव्यताऽस्य प्रतिपादिता। द्वादृङ्नाडितमिति—द्वादृङ्नाड्येव कृत्वा, द्वादृङ्नाडीनो-पादेयमित्यर्थ। विन्दुभिरिति, विन्दुपरिमाणञ्च वाग्भटे—"प्रदेशिन्यङ्गुलीपर्व-द्वयान्मयनमुद्धृतात्। यावत् पतत्यसौ विन्दु" (वा० सू० २० अ०) इति ॥ १३ ॥

लेखनादिषु विन्दुसङ्ख्यामाह, विन्दव इति।—विन्दवो लेखनेऽष्टौ, स्नेहने दश, रोपणे द्वादश ॥ १४ ॥

ते शीत कोष्णरूपिण इति।—ते विन्दव: शीते शीतकाले हेमन्ते शिशिरे च

दोषभेदेन आश्योतने तिक्तरसादिप्रयोगविधि ।—

वाते तिक्त तथा स्निग्ध पित्ते मधुरशीतलम् ।
तिक्तोष्णरूक्षञ्च कफे क्रमादाश्योतन हितम् ॥ १६ ॥

आश्योतनधारणस्य कालमात्रा ।—

आश्योतनेषु सर्वेषु मात्रा स्याद्वाक्शतं हिता ॥ १७ ॥

वाताभिष्यन्दे बिल्वाद्याश्योतनम् ।—

बिल्वादिपञ्चमूलेन बृहत्येरण्डशिग्रुभिः ।
क्षाय आश्योतने कोष्णा वाताभिष्यन्दनाशनः ॥ १८ ॥

वाताद्यभिष्यन्दे लोध्राश्योतनम ।—

अम्बुपिष्टैर्निम्बपत्रैस्त्वचं लोध्रस्य लेपयेत् ।
प्रताप्य वह्निना पिष्टा तद्रसो नेत्रपूरणात् ॥
वातोत्थं रक्तपित्तोत्थमभिष्यन्दं विनाशयेत् ॥ १९ ॥

क्षीणरूपिण कोष्णा, एवम् उष्णकाले शीतरूपिण, एष निश्चय सर्वत्र लेखनादौ ज्ञेय ॥ १५ ॥

वातादिक्रमात स्निग्धादिक्रमाह, वाते इति।—वातेऽत्र वातजनेत्राभिष्यन्दादौ तिक्तरसप्राय स्निग्धञ्च हितम्। पित्ते मधुरशीतलप्राय, कफे तिक्तोष्णरूक्षञ्च आश्योतन नेत्रसेचनरूपम् इति ॥ १६ ॥

अथाश्योतने मात्रास्वरूपमाह, आश्योतनेष्विति।—सर्वेषु लेखनादिषु, वाक्शतनिति—गुर्वक्षरोच्चारण वाक् नेत्रसेचने तु स्नेहनादिषु मात्राविशेष प्रोक्त। अत्र तु नेत्रमध्ये बिन्दुत्रिपणत्वेन सर्वेषु वाक्शतमात्रमेव। केचिदत्र मात्रालक्षण पठन्ति तत् यथा—"निमेषोन्मेषण पुसामङ्गुल्या क्षोटिकाऽथवा। गुर्वक्षरोच्चारण वा वाङ्मात्रेय स्मृता बुधै ॥" इति। अथ पाठो बहुपुस्तकेषु नास्ति ॥ १७ ॥

अथाश्योतनार्थं योगानाह, बिल्वादीति।—अरणि अग्निमन्थभेद, तदभावे अग्निमन्थ एव द्विगुण काथ्य इति परिभाषोक्तत्वात ॥ १८ ॥

अथान्यप्रकारमाह, अम्बुपिष्टैरिति।—लोध्रो वृक्षविशेष, तस्य त्वक्, त्वच एव लोध्रसज्ञा विख्याता। अत्र स्त्रीदुग्ध सम्मिश्राश्योतन काय्यमिति व्यवहार, तन्त्रान्तरेऽपि—"निश्चित्य पत्रै परिलिप्य लोध्र खेदाग्निना चूर्णमथापि कल्कम्। आश्योतन मानुषदुग्धयुक्त पित्तास्रदाहापहमत्र्युक्तम् ॥" इति ॥ १९ ॥

सर्वाभिष्यन्दे त्रिफलाद्यद्योतनम्।—

त्रिफलाद्यद्योतनं नेत्रे सर्वाभिष्यन्दनाशनम् ॥ २० ॥

रक्ताद्यभिष्यन्दे स्तन्याद्यद्योतनम्।—

स्त्रीस्तन्याद्योतनं नेत्रे रक्तपित्तानिलार्त्तिजित् ॥ २१ ॥

वातरक्ताभिष्यन्दे क्षीरघृताद्याद्योतनम्।—

क्षीरसर्पिर्घृतं वाऽपि वातरक्तरुजं जयेत् ॥ २२ ॥

पिण्डीविधिः।—

पिण्डी कवलिका प्रोक्ता बध्यते पट्टवस्त्रकैः।
नेत्राभिष्यन्दयोग्या सा व्रणेष्वपि निबध्यते ॥
अभिष्यन्देषु सर्वेषु बध्नीयात् पिण्डिकां बुधः ॥ २३ ॥

अपरमपि, त्रिफलेति।—'त्रिफलाद्यद्योतनं नेत्रे सर्वाभिष्यन्दनाशनम्, त्रिफलाद्योतनमिति क्वाथरूपम्, अथवा त्रिफलाक्वाथरूपं बोद्धव्यम्, कल्करूपमित्येके, यदुक्तम्—"जाता रोगा विनश्यन्ति न भवन्ति कदाचन। त्रिफलाया कषायेण प्रातर्नयनधावनात्॥" ॥ २० ॥

स्त्रीस्तन्याद्योतनं नेत्रे रक्तपित्तानिलार्त्तिजित इति।—स्त्रीस्तन्यादियोगोऽयमपि आगन्तुजदोषे प्रयुक्त इत्याहुः, तन्नालरीयोक्तत्वात्, यदुक्तम्—"आगन्तुदोषप्रसक्तौ त्वक्कार्ये वस्त्रामया खेदनमादितस्तु। आद्योतनं स्त्रीपयसा च सद्यो यद्यपि पित्तयुतं जायेत स्यात्॥" इति ॥ २१ ॥

क्षीरेति।—क्षीरसर्पिर्घृतं वाऽपि वातरक्तरुजं जयेत्, क्षीरसर्पिरिति—दोहनसंवेशेनोत्पन्नं तं हेयङ्गवीनमित्याहुः, क्षीरमत्र गव्यम्, तथा च—'गव्यक्षीरोत्थितं सर्पिस्तर्पणाद्यं विधीयते। दृष्टिप्रसादनं श्रेष्ठं तिमिरघ्नमपि कथितम्॥" इति। यद्वा—क्षीरेण साधितं सर्पिः क्षीरसर्पिः। घृतमिति केवलं गव्यमाज वा ग्राह्यम् ॥ २२ ॥

इदानीं पिण्डिकाविधानमाह, पिण्डीति।—व्रणेष्वपि निबध्यते इति—व्रणमत्र अल्पक्षाराग्निकृतं जलौकापातनकृतं वा, तत्रैव बोद्धव्यम्। अन्यत्र व्रणञ्च यत्रैवमोदोषजनितम्। तथा आगन्तुजे पिण्डी विहिता। अथाभ्यङ्गेऽभिष्यन्दाधिमन्थयोः कर्मान्तरोक्तं श्लोकद्वयमाहुरेके, एतद्दूषणं प्रकरणान्तरोक्तत्वेनास्माभिरपि नात्र वर्णितम्, असङ्गतत्वात्। अथ सर्वाभिष्यन्दे पिण्डिकाविषयमाह, अभिष्यन्देष्विति।—सर्वेष्विति—वातपित्तकफरक्तक्षतेषु। बुध इति यङ्कर्मेण यथायोग्यं द्रव्यादिकं विचार्य बध्नी-

अभिष्यन्दादौ क्रियाविशेष ।—

(अभिष्यन्देऽधिमन्थे च सञ्जाते श्लेष्मसम्भवे ।
स्निग्धस्विन्नोत्तमाङ्गस्य शिरस्तोऽणैर्विरेचयेत् ॥
अधिमन्थेषु सर्वेषु ललाटे व्यधयेच्छिराम् ।
अशान्ते सर्वथा मन्थे भ्रुवोरुपरि दाहयेत् ॥)

वाताभिष्यन्दे एरण्डादिपिण्डौ ।—

वाताभिष्यन्दशान्त्यर्थं स्निग्धाष्णा पिण्डिका भवेत् ।
एरण्डपत्रमूलत्वङ्निर्मिता वातनाशिनी ॥ २४ ॥

पित्ताभिष्यन्दे धात्रीपिण्डौ महानिम्बपिण्डौ च ।—

पित्ताभिष्यन्दनाशाय धात्रीपिण्डौ सुखावहौ ।
महानिम्ब * फलोद्भूता पिण्डौ वा पित्तनाशिनौ ॥ २५ ॥

श्लेष्माभिष्यन्दे शिग्रुपिण्डौ ।—

शिग्रुपत्रकृता पिण्डौ श्लेष्माभिष्यन्दनाशिनौ ॥ २६ ॥

पित्तश्लेष्माभिष्यन्दे निम्बादिपिण्डौद्वयम् ।—

निम्बपत्रकृता पिण्डौ श्लेष्मपित्तहरौ भवेत् ।
त्रिफलापिण्डिका प्रोक्ता नाशने श्लेष्मपित्तयोः ॥ २७ ॥

यादित्यर्थ, अत एव वाताभिष्यन्दे स्निग्धोष्णा पिण्डिका देया। एवं पित्तरक्तादिकं मधुरशीतेत्यभिप्रायः ॥ २३ ॥

इदानीं पिण्डिकार्थं प्रयोगवरानाह, तत्र वाताभिष्यन्दनाशनौ यथा, वातेति।—अत्रैरण्डस्य पत्राणि मूलं त्वक् चाङ्गुल्य सङ्गृह्य कल्कमाहरेत्। कल्कार्थत्वाच्च पत्रमित्यपरे, सामान्यत्वेन जलं देयमिति सर्वत्र। वातनाशिनौत्यनेनैव केवलं वाताभिष्यन्दे कथितं, किन्तु अधिमन्थादीनां वातरुजायामपि शस्तमेतत्। एवं पित्तकफयोरपि बोद्धव्यम् ॥ २४ ॥

अथ पित्ताभिष्यन्दनाशनाथ पिण्डीयोगमाह, पित्तेति।—धात्री आमलकीफलम्। अत्र पेषणार्थं काञ्जिकं, जलं वा सर्वत्र। महानिम्बो निम्बार्कः, स च वकायनिम्बशब्दवाच्यः। अत्राप्यनुक्तं जलम् ॥ २५ ॥

अथ श्लेष्माभिष्यन्दे योगमाह, शिग्रुपत्रेति।—शिग्रु शोभाञ्जनकः। श्लेष्मपित्तयो-

---

* "दलोद्भूता" इति क्वचित् पाठः।

रक्ताभिष्यन्दे लोध्रपिण्डी।—

पिष्ट्वा काञ्जिकतोयेन घृतभृष्टा च पिण्डिका।
लोध्रस्य हरति क्षिप्रमभिष्यन्दमसृग्भवम्॥ २८॥

चक्षु शोथादौ गुण्ड्यादिपिण्डी।—

गुण्ठोनिम्बदले पिण्डी सुखोष्णा खल्यसैन्धवा।
धार्य्या चक्षुषि संयोगा शोथकण्डूव्यथापहा॥ २९॥

विडालकविधि।—

विडालको वह्निलेपो नेत्रे पक्ष्मविवर्जिते।
तस्य मात्रा परिज्ञेया मुखलेपविधानवत्॥ ३०॥

स यथा—

सर्वाक्षिरोगे यष्ट्यादिविडालक।—

यष्टोगैरिकसिन्धूत्थ-दार्वीतार्क्ष्यैः समाशकैः।
जलपिष्टैर्वह्निलेपः सर्वनेत्रामयापहः॥ ३१॥

रिति (१) विफला हरीतक्यादिकम्। अथापि कल्कार्थं यथायोग्यं विहित द्रव देयम्। एके शिग्रुवक्रतेत्यादिक पाठमन्यथा पठन्ति—"शिग्रुवक्रता पिण्डी श्लेष्माभिष्यन्दहारिणी। निम्बपक्रता पिण्डी वातपित्तविनाशिनी॥" इति॥ २६।२७॥

अथ रक्ताभिष्यन्दार्थं योगमाह पिष्ट्वा काञ्जिकतोयेन घृतभृष्टेति।—काञ्जिकतोयेनेति—काञ्जिकद्रवभागेन, तदभावे जलमत्र ग्राह्यम्, तेन पूर्वं लोध्रं काञ्जिकेन सम्पिष्य पश्चात् घृतेन सम्भाज्य पिण्डिका कार्य्या॥ २८॥

अथाभिष्यन्दादौना शोथकण्डूहरणार्थं योगोत्तमनाह, गुण्ठोति।—अत्र गुण्ठी निम्बदलापेक्षया खल्पा देया। खल्पसैन्धवेति गुण्ठीनानाम्लघतरा। सयोगा पिण्डीविशेषण, तेन सयोगयुक्ता वस्त्रपट्टादिभि सुसहता इत्यर्थं। एके सयोगादिति पञ्चम्यन्त पठन्ति तदाख्या सयोगादेव शोथादयो यान्तीति भाव॥ २९॥

इदानी विडालकविषयमाह, विडालक इति।—मुखलेपविधानवदित्यनेन यथा मुखलेपविधिस्तद्वदापि बोद्धव्यम्, मुखलेपविधिस्तु पूर्वाध्याये लेपनमूर्द्धतैलकर्णपूरणाख्ये ज्ञातव्य॥ ३०॥

अथ लेपमाह, स यथेत्यनेन योगान् दर्शयति ग्रन्थकार', यष्टीति।—यष्टी मधुयष्टी। एके यष्टीस्थाने पथ्या पठन्ति व्याख्यानयन्ति च, पथ्या हरीतकी। सिन्धूत्थ

सर्वाक्षिरोगे रसाञ्जनादिविडालकः।—

रसाञ्जनेन वा लेपः पथ्याविश्वटलैरपि।
* (कुमारिकाऽग्निपत्रैर्वा दाडिमोपल्लवैरपि।)
वचाहरिद्रा † विश्वैर्वा तथा नागरगैरिकैः॥ ३२॥

सर्वाक्षिरोगे सैन्धवादिविडालकः।—

‡ बद्ध्वा ससैन्धवं लोध्रं मधूच्छिष्टयुते घृते।
पिष्टमञ्जनलेपाभ्यां सद्यो नेत्ररुजापहम्॥ ३३॥

सर्वाक्षिरोगे निम्बुकविडालकः।—

लोहपात्रेण सङ्घृष्टो रसो निम्बूफलोद्भवः।
किञ्चिद्घनो वह्निलेपो नेत्रबाधा व्यपोहति॥ ३४॥

सैन्धवम्। दार्वी दारुहरिद्रा। तार्क्ष्यं रसाञ्जनं, तदभावे दारुहरिद्रा द्विगुणा ग्राह्या, तद्वत्त्वात्॥ ३१॥

अपरमपि वक्ष्यमाणचतुष्टयं सर्वनेत्ररोगेषु विहितम्, किं तदाह, रसाञ्जनेनेति।—रसाञ्जनं लेप एकः योगः, रसाञ्जनं दार्वीक्वाथसमुद्भवं द्रव्यविशेषः। पथ्याविश्वटलैरपि द्वितीयो योगः, पथ्या हरीतकी विश्वं शुण्ठी एतयोर्दलानि पत्राणि, अथवा—दलस्थाने लवणपाठं तत्र लवणं बालकम्। वचाहरिद्राविश्वैः कृत्वा तृतीयो योगः। नागरगैरिकैश्चतुर्थः, विश्वनागरशब्दाभ्यां शुण्ठी कथिता॥ ३२॥

बद्ध्वेति।—बद्ध्वा ससैन्धवं लोध्रं मधूच्छिष्टयुते घृते। पिष्टमञ्जनलेपाभ्यां सद्यो नेत्ररुजापहम्॥ सैन्धवमत्र मनाक् देयम्। मधूच्छिष्टं सिक्थकं, लोके मोमशब्दवाच्यम्। घृतमत्र गव्यम्। लेपोऽत्र पुनर्जलेन प्रचरति। अञ्जनन्तु घृतेनैव व्यवहारः। सद्यो नेत्ररुजापहमिति—अभिष्यन्दाधिमन्थादीनां वेदनापहमिति॥ ३३॥

लोहेति।—लोहपात्रेण सङ्घृष्टो रसो निम्बूफलोद्भवः। किञ्चिद्घनो वह्निलेपो नेत्रबाधा व्यपोहति—निम्बूफलरसन्तु लोहपात्रे प्रक्षिप्य तदन्तु लोहदण्डेनापि घर्षयेत् यावत् स घनो भवति। एके लोहपात्रेणेत्यस्य स्थाने काचपात्रेणेति पठन्ति मानयन्ति च। नेत्रबाधामिति—नेत्रव्यथां, तेनाभिष्यन्दादीनामित्यर्थः॥ ३४॥

---

* स्त्रीकाङ्क्षीऽयं गूढार्थदीपिकासम्मतः, न तु दीपिकासम्मतः।

† "विश्वैः" इत्यत्र "निम्बैः" इति पाठान्तरम्।

‡ "बद्ध्वा" इत्यत्र "दग्ध्वा" इति गू० दी०।

अर्मणि मरिचविडालक ।—

मञ्चूर्णं मरिचं केश-राजस्वरसमर्दनात।
लेपनादर्मणा नाशं करोत्येष प्रयोगराट् ॥ ३५ ॥

अञ्जननामिकाया शिलादिविडालक ।—

स्निग्धा भित्त्वा विनिष्पीड्य * भिन्नामञ्जननामिकाम्।
शिलैलानतसिन्धूत्थै सचौद्रैः प्रतिसारयेत् ॥ ३६ ॥

तर्पणाहंरोगा ।—

अथ तर्पणक वक्ष्मि नेत्रहृष्टिकरं परम्।
यदूर्ध्वं परिशुष्कञ्च नेत्र कुटिलमाविलम् ॥ ३७ ॥
शीर्णपक्ष्मशिरोत्पात-कृच्छ्रोन्मीलनसयुतम्।
तिमिरार्जुनशुक्राद्यैरभिष्यन्दाधिमन्थकैः ॥ ३८ ॥

अथार्मनाशनार्थं योगमाह, सचूर्णेति।—केशराजो भार्कव, लोके घनराजशब्दवाच्य। अर्मेति—रक्तार्मसङ्गम्। नेत्राभ्यन्तरेऽस्य प्रचार इत्येके। प्रयोगराट् प्रयोगश्रेष्ठ ॥ ३५ ॥

स्निग्धा भित्त्वा विनिष्पीड्य भिन्नामञ्जननामिकाम। शिलैलानतसिन्धूत्थै सचौद्रै प्रतिसारयेदिति।—स्निग्धामिति ता पूर्वं सस्नेह पश्चात् शस्त्रेण भित्त्वा विदार्य्य तदनु विनिष्पीड्य इति—पूयमानीय पश्चात् प्रतिसारयेत, अत एव भिन्नामिति विशेषणमस्या। शिलैलानतसिन्धूत्थैरिति—शिला मन शिला। एला चुद्रैला। नत तगरम्। सिन्धूत्थ सैन्धवम्। प्रतिसारयेदित्यनेन शिलादिक चूर्णं कृत्वा चौद्रेण सङ्गाप्य योज्य, कुर्य योज्यम् ? तदाह, अञ्जननामिकामिति—गुह्याञ्जनीति लोके, सा च पटलान्ते पक्ष्मसमीपे भवति ॥ ३६ ॥

इदानी तर्पणविधान दर्शयन्नाह, अथेत्यादि।—विडालानन्तर तर्पणक दृष्टिप्रसादनक कर्म वक्ष्मि। कीदृश नेत्र तर्पणयोग्य भवति तमाह, यदूर्ध्वमित्यादि।—यत् ऊर्ध्व परिशुष्कमिति वाताभिष्यन्दादेव। आविल कलुषम्। शीर्णपक्ष्मेति—रोमशातनम्। शिरोत्पात इति यथा—"अवेदना वाऽपि सवेदना वा यस्याधिराज्यो हि भवन्ति तासा। सुदुर्विरज्यन्ति च या स तादृग्व्याधि शिरोत्पात इति प्रदिष्ट॥" (सु० उ० ६ अ०) इति। कृच्छ्रोन्मीलनसयुतमिति—

---

* "भिन्नाम्" इत्यत्र "भिषक्" इति पाठान्तर साधु।

शुष्काक्षिपाकशोथाभ्यां युक्तं वातविपर्य्ययैः।
तन्नेत्रं तर्पणे योज्यं नेत्ररोगविशारदैः॥ ३९॥

तर्पणानर्हकालादय।—

दुर्दिनात्युष्णशीतेषु * चिन्तायासभ्रमेषु च।
अशान्तोपद्रवे चाक्षि तर्पणं न प्रशस्यते॥ ४०॥

क्लक्ष्णीलन कुचनसञ्ज, यथा—"वाताद्या वत्मसङ्घौच जनयन्ति यदा यदा। तदा द्रष्टुं न शक्नोति कुचनं नाम तद्विदुः॥" इति। तिमिरार्जुन-शुक्लादीरिति—तिमिरन्तु लिङ्गनाशस्य मूलमेव, यतश्चतुर्थपटलगतो दोषश्चिभिर करोति तच्च नानारूप भवति। अर्जुनमिति—शुक्लनागगतरोगविशेष, यदुक्तम्—"एको य शशरुधिरोपमस्य विन्दु शुक्लस्थो भवति तमर्जुन वदन्ति" (सु० उ० ४ अ०) इति। शुक्लमिति—क्लष्णभागगत, तच्च विविध, शुद्धशुक्ल शिराशुक्ल चतशुक्लचेति। शुक्लमत्र पुष्पशब्दवाच्य फुल्लीति लोके। आदिग्रहणादेतादृशैरन्यैरपि। अभिष्यन्दाधिमन्थकैरिति—अभिष्यन्दो नेत्रामय, अयमपि सर्वनेत्ररोगोत्पादक इत्यर्थ। आधमन्थो नेत्रे शोथरूपो रुजावाय भवति, स च हृङ्नाभिष्यन्दवद अक्रियावता पुरुषाणा चतुर्विधो जायते। शुष्काक्षिपाकशोथाभ्यामिति—शुष्काक्षि-पाक सर्वाक्षिगतरोगे पठित, स यथा—"यत् क्लाम्यत दारुणरूक्षचर्म सलक्ष्यते चाविलदर्शन यत्। सुदारुण यत् प्रतिबोधने च शुष्काक्षिपाकोपहत तदक्षि॥" (सु० उ० ६ अ०) इति। शोथ इति—शोथजनेत्रपाक, यत,—"कण्डूपटेहाश्रु युत पक्ष्मोड्डुम्बरसन्निभ। सरुजो पच्यते यस्तु नेत्रपाक स शोथज॥" (सु० उ० ६ अ०) इति। वातविपर्य्ययैर्युक्तम् इति—वातविपर्य्ययो नेत्ररोगविशेष, अयमपि सर्वाक्षिगतरोगे पाठत, यथा—"बार बारच पर्य्येति भ्रुवौ नेत्रे च मारुत। रुजस्य विविधाश्चैत्रा स ज्ञेयो वातपर्य्यय॥" इति। तन्नेत्र तर्पणे योज्यमिति—यत् पूर्वोक्तरोगविशेषे वर्णित तन्नेत्रमित्यर्थ। तर्पणन्तु वक्ष्यमाण बोद्धव्यम्॥ ३७—३९॥

अथ तर्पणक्रियायामयोग्यविषयमाह, दुर्दिनेति।—दुर्दिनात्युष्णशीतेष्वित्यनेन शीतोष्णवर्षास्वरूप काल तर्पणविहित, प्राप्तिनिषेधत्वात्। दुर्दिनमिति—वर्षा, मेघच्छन्नाकुल दिन निषिद्ध नान्यत। एवमत्युष्णमिति—ग्रीष्मे खरतरकिरणतापित-

---

* "चिन्ताया सभ्रमेषु च" इति सुश्रुते पाठ।

तर्पणप्रयोगविधि ।—

वातातपरजोहीने देशे चोत्तानशायिनः।
आधारो माषचूर्णेन क्लिन्नेन परिमण्डलौ ॥
समौ दृढावसम्बाधौ कर्त्तव्यौ नेत्रकोशयोः ॥ ४१ ॥
पूरयेद्घृतमण्डेन विलीनेन सुखोदकैः।
अथवा शतधौतेन सर्पिषा क्षीरजेन वा ॥ ४२ ॥

दिवस । अतिशीत वातादिव्याप्त दिनमिति। समेष्विति—समस्वकाकृढस्येवार्थासविति । अशान्तोपद्रवे चाक्ष्णीति—आमदोषजन्योपद्रवसहित नाचि तर्पयेदित्यभिप्राय , तत यथा—"उदीर्णवेदन नेत्र रागशोथसमन्वितम्। घर्षनिस्तोदशूलाश्रु यूकासान्वित विदु ॥" इति ॥ ४० ॥

इदानी तर्पणस्य कर्त्तव्यविधावपि कर्मविधानमाह वातेति।—तर्पणार्थी पुरुष प्रथममेव शोभन स्थानमन्विच्छेत, तत्र वातातपरजोहीने इति , एतल्लोपलक्षणत्वेनाग्निधूमरहिते इति ग्रहणम्, यदुक्त—"प्रतिसूर्य्याग्निरहिते नीरजोधूमसारुते। गृहे सुखे निराबाध तर्पणञ्च समाचरेत ॥" इति। उत्तानशायिन इत्यनेन निश्चलस्य वीतक्रोधभयस्य चावरोध तत्वान्तरदर्शनात, "उत्तानशायिन कार्य्यं निश्चलस्य यथासुखम्। तर्पण नेत्रयुगले वीतक्रोधभयस्य च ॥" इति, अथ पश्चात्कमाह, आधारौ माषचूर्णेनेति।—नेत्रकोशयोरिति—नेत्रपुटौ द्वौ आधारौ कुर्य्यात, आधारो माषपिष्टोनय पालीमज्ञ । क्लिन्नेन माषचूर्णेनेति—क्लिन्न जलेन मर्दितम्। कथम्भूतावाधाराविति, परिमण्डलौ परि सर्वतोभावेन मण्डलाकारौ, तेनाङ्गुलोल्लेख इङ्गुलाविस्तार यथा स्यात् कुर्य्यादित्यभिप्राय , तथा हि—"अङ्गुलीहविस्तार यथा स्यान्नाचिराधकात्" इति। पुन कथम्भूतावाधारौ ? समौ अनिम्नान्नतौ न विषमौ। दृढाविति—न शीर्णौ। असम्बाधाविति—सम्बाधरहितौ एतेन तन्निपुणेन कार्य्याविति शेष। इदानीं तर्पणार्थं द्रव्यविशेषमाह पूरयेदिति।—पूरयेत, नेत्राधाराविति शेष। केन पूरयेत्तमाह घृतमण्डेनेत्यादि, विलीनघृतस्य घनीभूतस्योपरितनो भागो घृतमण्ड इत्युच्यते। कीदृशेन ? सुखोदकै कृत्वा विलीनेन। एके सुखोदकैरेवाभिपूरणमाहु, तदसङ्गतम्। अथवेत्यनेन द्रव्यान्तरमाह, शतधौतेन शतवार धौतेन सर्पिषेत्यर्थ,। क्षीरमथनात् समुद्भूत नवनीतघृत क्षीरघृतमित्युच्यते, क्षीरमत्र गव्य ग्राह्य तद्धितत्वात्,

निमग्नान्यक्षिपक्ष्माणि यावत् स्युस्तावदेव हि।
पूरयेन्मीलिते नेत्रे तत उन्मीलयेच्छनैः ॥ ४३ ॥

वर्त्मादिगतरोगे तर्पणधारणस्य कालपरिमाणम्।—

* धारयेद्वर्त्मरोगेषु वाङ्मात्राणां शतं बुधः।
स्वस्थे कफे सन्धिरोगे मात्रा पञ्चशतं हितम् ॥ ४४ ॥
शुक्ले च षट्शतं कृष्ण-रोगे सप्तशतं मतम्।
दृष्टिरोगेष्वष्टशतमधिमन्थे सहस्रकम् ॥
सहस्रं वातरोगेषु धार्यमेवं हि तर्पणम् ॥ ४५ ॥

तथा हि—गव्यघोराद्यत सर्पिस्तर्पणार्थं विधीयते। दृष्टिप्रसादन श्रेष्ठ तिमिरस्यापकर्षणम्॥" इति। अथ कियत्परिमाणेन पूरण कार्यं तमाह, निमग्नानीति।—एके पक्ष्माणि यावन्मज्जन्ति रोमन्ता (?) यदा भ्रुवोरिति पठन्ति व्याख्यानयन्ति च। तत उन्मीलयेच्छनैरिति—उन्मीलनन्तु शनै कुर्यात, शनैरित्यनेन कर्मान्तर सूचयति। कथमुन्मीलयेत्तदाह चरक.—† "तती वस्त्रेण पीतेन नीलेन हारितेन वा। पवेराच्छाद्य नयने तत पश्येत यथासुखम॥" इति ॥ ४१—४२ ॥

अथ तर्पणस्य धारण कियत्कालेन कार्यं तदाह, धारयेदिति।—वर्त्मरोगेष्विति—क्लिन्नोन्मीलनपक्ष्मशातप्रभृतिषु। वाङ्मात्राणा शतमिति ‡ गुर्वक्षरोच्चारणा वाक् तेषा शतमित्यर्थ, अथवा अङ्गुल्यो क्षोटिकास्वरूप वाङ्मात्रा कथिता, तथा च —"निमेषोन्मेषण पुसामङ्गुल्या क्षोटिकाऽथवा। गुर्वक्षरोच्चारण वा वाङ्मात्रेय स्मृता बुधै॥" इति। स्वस्थे कफे इति—प्रकृतिस्थे कफे, अथवा स्वस्थे पुरुषे नीरोगे निरुपद्रवे इत्यर्थे, अत एव सोपद्रवे दोषे तर्पण न विहितमिति पूर्वोक्तमेव। सन्धिरोगे जलस्रावप्रभृतिके। कृष्णरोगे शुक्लशुक्लशिराशुक्लप्रमुखे। § कफे च विकारा

* सुश्रुतेन सन्धिरोगे विशत कफे षट्शत शुक्ले पञ्चशत वाङ्मात्रा उक्ता। वाग्भटेन तु स्वस्थे षट्शत पित्तेऽपि षट्शत मात्रा उक्ता इति।

† श्रीकोऽय मुद्रितचरकसुश्रुतवाग्भटेषु कुत्रापि नास्ति।

‡ लघूच्चरोच्चारण मात्रा इति तु जिवदासडल्हनादिमतम।

§ "कफे च" इत्यारभ्य "पित्ते" इति यावत् व्याख्या सङ्गतिविरुद्धा मूलविरुद्धा ग्रन्थान्तरविरुद्धा च दुर्व्याख्या।

तर्पणजनितदृढकफप्रतिकार ।—

स्निग्धेन यवपिष्टेन स्नेहवीर्य्येरितं ततः।
यथास्य धूमपानेन कफमस्य विशोधयेत् ॥ ४६ ॥

तर्पणप्रयोगस्य दिननियम ।—

एकाह्नं वा त्र्यह्नं वापि पञ्चाहञ्चेष्यते परम् ॥ ४७ ॥

सम्यक् तर्पणस्य लिङ्गानि ।—

तर्पणे लक्षणान्येतानि नेत्रेष्वेतानि भावयेत्।
सुखस्वप्नावबोधत्वं वैशद्यं वर्णपाटवम् ॥

भिषग्ने यत एव षट्शतमित्यर्थः । पञ्चशतान् दृष्टिरोगेष्विति पित्ते नकुलान्ध्यप्रभृतिषु । दृष्टिरोगेष्विति बहुवचनत्वेन पित्तजे रक्तजे चाष्टौ शतानि कुर्यात्। अधिमन्थे सहस्रकमित्यस्य स्थाने अधिमन्थे नवशतमिति पठन्ति। सहस्रं वातरोगेष्विति बहुवचनत्वेनापि सन्निपातात्मके व्याधौ सहस्रमात्रं यावद्देयम्, तन्मात्रे सप्तशतमात्राभिः सन्निपाते विहितम्, तथा च—"वाचा सहस्रमावा स्याद्वारयेन्मात्रतस्त्र्यहे। पित्तजे रक्तजे चापि घाण्याख्यशतानि च ॥ सन्निपातात्मके सप्त पञ्च स्वस्थविधौ तथा ॥" इति विषयोऽवगन्तव्यः ॥ ४४।४५ ॥

अथ कफस्नेहोपनयनं (१) कुर्य्यात्तमाह—स्निग्धेनेति ॥ ४६ ॥

इदानीं दोषादिविशेषेण तर्पणविशेषस्य दिनान्तरमाह, एकाह्नमिति।—एकाह्नम् एकदिनान्तरं, वस्त्यन्तरदर्शनात्, तथा च—"अहन्यहनि वातोत्थे पित्तरक्ते दिनान्तरम्। तर्पणं सन्निपातोत्थे द्व्यन्तरं द्व्यन्तरं कफे ॥" (वैदेह०) इति। तत्र पित्तरक्तादिदोषे तर्पणं कार्य्यम्, वा यत्नेन वातोत्थेऽपि अहन्यहनि कार्य्यं, द्वितीय-वा-यत्नेनापि द्व्यन्तरं बोद्धव्यं सन्निपातविषयम्। एके कटूष्णमिति पठन्ति (१)। त्र्यह्नमिति त्रिदिनान्तरं, तच्च कफेत्युक्ते (१) स्वस्थादावपि। पञ्चाहमिति—पञ्चदिनान्तरम् ॥ ४७ ॥

अथ तर्पणलिङ्गानि यस्य भवन्ति तानाह, तर्पणे इति।—सुखं यथा स्यात्

---

* सुश्रुते "स्निग्धेन यवपिष्टेन" इत्यस्य प्राक् "ततश्चापाङ्गतः स्नेहं स्रावयित्वा ऽक्षि श्रीषयेत्" इति पाठः। अस्य डल्हनव्याख्या—"अपाङ्गतः स्नेहं स्रावयित्वा शलाकाकृतद्वारेण स्निग्धेन यवपिष्टेन अक्षि श्रीषयेत्। ततः स्नेहवीर्य्येरितं स्नेहशक्त्या प्रेरितं, कृतस्नेहोपनयनानन्तरं यथास्य धूमपानेन कफप्रत्यनीकेन शिरोविरेचनधूमपानेन कफं विशोधयेत्" इति।

निर्वृतिर्व्याधिशान्तिश्च क्रियालाघवमेव च ॥ ४८ ॥

अतितर्पण हीनतर्पणयो लिङ्गानि।—

अथ साश्रु गुरु स्निग्धं नेत्रं स्यादतितर्पितम्।
रूक्षमस्राविलं * रागं नेत्रं स्याद्धीनतर्पितम् ॥ ४९ ॥

अतितर्पण-हीनतर्पणयो चिकित्सा।—

रूक्षस्निग्धोपचाराभ्यामितयोः स्यात् प्रतिक्रिया ॥ ५० ॥

पुटपाकविधि ।—

अत ऊर्ध्वं प्रवक्ष्यामि पुटपाकस्य साधनम्।
द्वौ बिल्वमात्रौ मांसस्य पिण्डौ स्निग्धौ सुपेषितौ ॥ ५१ ॥
द्रव्याणां बिल्वमात्रन्तु द्रवाणां कुडवौ मतः।
तटेकस्थ समालोड्य पत्रैः सुपरिवेष्टितम् ॥ ५२ ॥
पुटपाकेन तत् पक्त्वा गृह्णीयात्तद्रसं बुधः।
तर्पणोक्तविधानेन यथावदवचारयेत्॥
दृष्टिमध्ये निषिञ्चेत् स्यान्नित्यमुत्तानशायिनः ॥ ५३ ॥

स्वप्नावबोधो भवति। वैशद्य नेत्रस्येति। वर्णपाटवमिति—वर्णं श्वेतकृष्णादिकं तस्य पाटवं निर्मलत्वम्, एतेन व्यक्तवर्त्मने (?) भवत। निर्वृतिरवलोकनप्रचारो दृढतरो भवति। क्रियालाघवमिति—सूक्ष्मावलोकनेऽपि समर्थदृष्टिभवतीत्यर्थ ॥ ४८ ॥

अथातितर्पितस्य लक्षणान्याह, अथेति।—सुगमम। अथ हीनतर्पितस्य लक्षणमाह रूक्षमिति।—रूक्षमस्निग्धम्। अस्राविलम् अस्रेनैव्रणलेशाविल कलुषीकृतम्। रागमारक्तताम्। हीनतर्पितं नेत्रमिति ॥ ४९ ॥

अथ हीनातितर्पितस्य नेत्रस्य किञ्चित् प्रतिकारमाह, रूक्षेति।—एतयोर्हीनातितर्पितयो, तेनातितर्पितस्य नेत्रस्य किञ्चित् प्रतिकारतो रूक्षक्रिया हीनतर्पितस्य स्निग्धा क्रियेत्यभिप्रायः ॥ ५० ॥

अथ पुटपाकविधानमाह,—अत इति। सत्त्वमस्याय, तर्पणोक्तविधानक्रियाव्यापत्तिसमानधर्मत्वात पुटपाकस्य इति ॥ ५१—५३ ॥

---

* "रागम्" इत्यत्र "कृष्णम्" इति गु० हो०।

विविधपुटपाकाना नामानि।—

स्नेहनो लेखनश्चैव रोपणश्चेति स त्रिधा ॥ ५४ ॥

विविधपुटपाकाना प्रयोगविषय ।—

हितः स्निग्धोऽतिरूक्षस्य स्निग्धस्यापि हि लेखनः।
दृष्टेर्बलार्थमितरः पित्तासृग्व्रणवातनुत् ॥ ५५ ॥

स्नेहनपुटपाकस्य द्रव्याणि धारणस्य कालपरिमाणञ्च।—

सर्पिर्मांसवसामज्जा मेदःस्थाद्यौषधैः कृतः।
स्नेहनः पुटपाकश्च धार्य्यो द्वे वाक्शते दृशोः ॥ ५६ ॥

लेखनपुटपाकस्य द्रव्याणि धारणस्य कालपरिमाणञ्च।—

जाङ्गलाना यकृन्मांसैर्लेखनद्रव्यसंयुतैः।
क्षणलोहरजस्ताम्र-शङ्खविद्रुमसिन्धुजैः ॥ ५७ ॥

अथ पुटपाकस्य वैविध्यमाह, स्नेहन इति।—स पुटपाक ॥ ५४ ॥

अथ तेषा त्रयाणा मध्ये क स्यस्य विहितत्वमाह, हित इति।—अतिरूक्षस्य पुरुषस्य। स्निग्धस्यापि, पुरुषस्येति शेष। लेखनो लेखन पुटपाक। दृष्टेबलार्थं दृष्टिदृढीकरणार्थम्। इतर रोपणपुटपाक, स एव पित्तासृग्व्रणवातनुत्, व्रणवातादयो नेत्रगता एव बोद्धव्या ॥ ५५ ॥

इदानी स्नेहनपुटपाकमादौ प्रदर्शयन्नाह, सर्पिरिति।—वसा मांसाश्रित स्नेह, तथा च—"शुद्धमांसभव स्नेह स वसा परिकीर्त्तिता" (सु० शा० ४ अ०)। मज्जा मस्तकमज्जा स्थूलास्थिषु च भवति। मेद उदरस्थमखास्थिषु च, तथा चोक्त—"स्थूलास्थिषु विशेषेण मज्जा तत्थल्लराश्रित। अन्येतरेषु सर्वेषु सरक्तं मेद उच्यत॥" (सु० शा० ४ अ०) इति। दृशो इति—दृष्टिमध्ये, निशेच्य इति विशेष ॥ ५६ ॥

अथ लेखनपुटपाकमाह, जाङ्गलानामिति।—जाङ्गलाना जन्तूना यकृन्मांसैरिति—यकृत कालखण्ड। यद्यपि जाङ्गलवर्गोऽष्टविध कथित, तद्यथा—जङ्गाला, विष्किरा, प्रतुदा, गुहाशया, प्रसहा, पर्णमृगा, विलेशया, ग्राम्याश्चेति, तथाऽपि केषाञ्चिन्मते पञ्चैव श्रेष्ठतमा जङ्गाल-विष्किर-प्रतुद-पर्णमृग विलेशयाश्च। ते च जङ्गालाद्याश्चान् केषाञ्चित् ज्ञापनायमाह, एण हरिणवर्ग्य कुरङ्गादयो जङ्गाला।

समुद्रफेनकासीस-स्रोतोजदधिमस्तुभिः।
लेखनो वाक्शत धार्य्यस्तस्यैतावद्विधारणम् ॥ ५८ ॥

रोपणपुटपाकस्य द्रव्याणि धारणस्य कालपरिमाणञ्च।—

स्तन्यजाङ्गलमध्याज्य-तिक्तकद्रव्यपाचित।
लेखनाच्चिगुणो धार्य्यं पुटपाकस्तु रोपणः ॥ ५९ ॥

पुटपाकव्यापत्तौ चिकित्सा।—

वितरेत्तर्पणोक्तान्तु क्रिया व्यापत्तिदर्शने ॥ ६० ॥

लाव-तित्तिर कपिञ्जल-वर्त्तीरादय विष्किरा। कपोत पारावत कुलिङ्गादय प्रतुदा। सिंह व्याघ्र ऋक्ष शृगाल-मार्जारादयो गुहाशया। काक-कङ्क-कुरर-बाज-भासादय, प्रसहा। मङ्ग मूषिक छुच्छुन्दरिका वानरप्रभृतय पर्णमृगा। श्वाविच्छ्रु-गोधा-नकुलादयो बिलेशया। अश्वाश्वतर-गो खरोष्ट्र वस्तीरस-मेद पुच्छप्रभृतयो ग्राम्या इति जाङ्गलवर्ग समासेन प्रोक्त। यत यस्य दोषस्य विहित तत्तत्रैव ज्ञातव्यम्। लेखनद्रव्य-सयुतैरिति—लेखनद्रव्यैर्वक्ष्यमाणक्षणलोहरज प्रभृतिकै र्दुष्टशेषेत्यभिप्राय। क्षण-लोहरज क्षणायसचूर्ण, तास्ररजश्च। विद्रुम प्रवालम्। सिन्धुज सैन्धवम्। कासीस द्विविधम्, एक भक्ष्यसदृश किञ्चिदम्लवणरस, द्वितीय पुष्पकासीसम् ईषत् पीत तुवर तद्वेद एव। स्रोतोजमिति—रसाञ्जनशब्दवाच्य, तच्च द्विविधम्, एक स्रोतोऽञ्जनं क्षणायाषाणाकृति द्रव्यम्, अपरन्तु दारुहरिद्राक्वाथेन कृत्रिम पीतलोहितम्। नस्तु दग्धलोमविशेष, तथा च—"दग्धस्तु यदधस्ताय तन्नस्तु परिकीर्त्तितम्" इति ॥ ५७।५८ ॥

अथातो रोपणपुटपाकमाह, स्तन्येति।—स्तन्य स्त्रीदुग्ध, तदभावे गव्यमाज वा। * जाङ्गलशब्देन जाङ्गलप्राणिना वसा मज्जा मेदो ग्राह्य, रोपणक्रियाया विहितत्वात्। मधु क्षौद्रम्। आज्य घृतम्। तिक्तकद्रव्य निम्बप्रभृतकम्। लेखनाच्चिगुणो धार्य इत्यनेन वाक्शतत्व सूचितम् ॥ ५९ ॥

अथ पुटपाकव्यापत्तिचिकित्सामाह, वितरेदिति।—पुटपाकव्यापत्तिदर्शने क्षीणातियोगे तर्पणोक्ता क्रिया चिकित्सा कारयेत्, एतेन तानि लक्षणानि अवापि ज्ञेयानि इति ग्रन्थकृता सूचितम्, तथा हि—"तर्पण पुटपाकञ्च नस्यानञ्च न

---

* "जाङ्गल, मासमिति शेष." इति निबन्धसङ्ग्रह।

ऋतुभेदे अञ्जनप्रयोगस्य समय।—

अथ सम्पक्वदोषस्य प्राग्भक्तमञ्जनमाचरेत्।
हेमन्ते शिशिरे चैव मध्याह्नेऽञ्जनमिष्यते ॥ ६१ ॥
पूर्वाह्णे चापराह्णे च ग्रीष्मे शरदि चेष्यते।
वर्षासु नाभ्रे नात्युष्णे वसन्ते च सदैव हि ॥ ६२ ॥

विविधाञ्जनानां नामानि तथा द्रव्याणि च।—

लेखनं रोपणञ्चैव तथा स्यात् स्नेहनाञ्जनम्।
लेखनं क्षारतीक्ष्णाम्ल-रसैरञ्जनमिष्यते ॥ ६३ ॥
कषायतिक्तरसयुक् सस्नेहं रोपणं मतम्।
मधुरं स्नेहसम्पन्नमञ्जनन्तु प्रसादनम् ॥ ६४ ॥

विविधाञ्जनानां तथा श्रेष्ठत्वादिनिर्देशश्च।—

गुटिकारसचूर्णानि त्रिविधान्यञ्जनानि च।

योजयेत्। यावन्त्यहानि युञ्जीत हितस्तो हितमाक् भवेत्॥" (वा० सू० २४ अ०) इति ॥ ६० ॥

अथ अञ्जनप्रकारमाह, अथेति।—अथ शब्दोऽत्रामदोषानन्तर सूचने, तेन अपरिपक्वदोषस्य प्राग्भक्तमञ्जनमप्रशस्तमित्यभिप्राय, यत,—"अञ्जन पूरण क्षाद्यानमासे न शस्यते" इति। प्राग्भक्तमञ्जनमिति—यत यस्य समयस्योक्त तत्रैव योज्यमिति, प्राग्भक्तशब्देन वर्णितम्। अथ कथमाचरेत्तमाह, हेमन्त इत्याद्यञ्जनविषय सामान्यम ॥ ६१।६२ ॥

विशेषो यथा, अथ विविधाञ्जनमाह, लेखनमिति।—लेखन शुक्लादिषु। रोपण क्लेदकण्डूपच्यप्ररोहणादिषु। स्नेहन दृष्टिप्रसादन, तच्च तिमिरादिषु। अथ त्रयाणा सामान्येन द्रव्याण्याह, लेखनमिति।—चारादिवस्तुनिर्मित लेखनाञ्जन कथित, चारं यवक्षारप्रभृतिकम्। तीक्ष्ण मरिचादिकम्। अम्लरसम् अम्लीकामातुलुङ्गप्रमृतम्। रोपणाञ्जनन्तु कषायादिनिर्मित भवति, कषायो हरीतक्यादि। तिक्तो निम्बादि। सस्नेहमिति—स्नेह घृततैलादिकम। प्रसादाञ्जनन्तु स्नेहनसञ्ज्ञ कथित, तत्तु मधुरादिनिर्मित भवति, मधुर मधुररसप्राय द्रव्य गुडादि। घृतादिस्नेहसम्पन्नमिति स्नेहाढ्यम्, अत एव स्नेहन कथितम ॥ ६३।६४ ॥

अथ त्रिविधाञ्जनस्य रूपमाह, गुटिकेति।—गुटिकारसचूर्णादीना लक्षणं

कुर्याच्छलाकयाऽङ्गुल्या हीनानि च यथोत्तरम् ॥ ६५ ॥

अञ्जनानर्हौ।—

श्रान्ते प्ररुदिते भीते पीतमद्ये नवज्वरे।
अजीर्णे वेगघाते च नाञ्जनं सम्प्रशस्यते ॥ ६६ ॥

तीक्ष्णाद्यञ्जनवर्त्तीनां मात्रा।—

त्रुटिमात्रा कुर्वीत वर्त्तिं तीक्ष्णाञ्जने भिषक्।
प्रमाणं मध्यमेऽध्यर्धं द्विगुणन्तु मृदौ भवेत् ॥ ६७ ॥

रसक्रियाया उत्तमादिमात्रा।—

रसक्रिया तूत्तमा स्यात्त्रिविडङ्गमिता हिता।
मध्यमा द्विविडङ्गा स्याद्धीना त्वेकविडङ्गिका ॥ ६८ ॥

वीडव्यम्। तत्र त्रिविधमञ्जनन्तु शलाकया अङ्गुल्या वा यथायोग्यं कुर्यादिति; तानि यथोत्तरन्तु हीनानि ज्ञातव्यानि, यो यस्मादुत्तर यथोत्तर, तेन त्रुटिकाञ्जनाद्रसक्रियाञ्जनं हीन रसाचूर्णाञ्जनमिति ॥ ६५ ॥

अथ येषां रोगिणामञ्जन न प्रशस्त तानाह, श्रान्ते इति।—श्रान्ते पुरुषे, श्रान्तता च रुदनवाहनजा भवति। प्ररुदिते प्रकर्षरोदने कृते। भीते भययुक्ते। पीतमद्ये पीत मद्य येन तथोक्ते। अजीर्णे आमाजीर्णे, विष्टब्धे तु शूलादौ चिकित्सितमेतत्। वेगघाते मूत्रपुरीषादीनाम्। चकाराद्भुक्तवति रात्रिजागरणे च नाञ्जन विहितम्; तथा च उक्त—"भुक्तवाञ्च शिरःस्नात श्रान्त रुदनवाहने। रात्रौ जागरितवापि नात्तिज्वरित एव च॥" इति ॥ ६६ ॥

अथाञ्जनस्य परिमाणमाह, त्रुटिमात्रानिति।—त्रुटिर्नखत्रिपुटकलाय, रेणुकेत्यपरे। मध्यमेऽञ्जने सार्द्धकप्रमाण यथा स्यादिति कुर्यादित्यभिप्राय। मृद्वादिष्वञ्जने द्विगुण त्रुटिमेव यथा स्यात्तथा, वर्त्तिं कुर्यादिति शेष ॥ ६७ ॥

अथ रसक्रियाऽञ्जनमाह, रसक्रियेति।—रसक्रिया वक्ष्यमाणाञ्जनसमूहाञ्जनविशेषोऽवगन्तव्य। उत्तममात्रा गृहीत। विडङ्ग द्रव्यविशेषो व्याख्यात। मध्यमेति—न तीक्ष्णा न मृदुरिति। हीनेति तीक्ष्णाञ्जन इत्यर्थ, एकविडङ्गपरिमिता रसक्रियावर्त्तीमात्रा बोद्धव्या, तदुक्त—"विडङ्गमात्रमल्पपरे मध्य द्वाभ्युत्तमवयम्। रसक्रियाया वर्त्तीनां प्रमाण परिकीर्त्तितम्॥" इति ॥ ६८ ॥

नेत्रवैरेचनिकचूर्णाना तीक्ष्णादिमात्रा।—

वैरेचनिकचूर्णन्तु द्विशलाक विधीयते।
मृदौ तु त्रिशलाक स्याच्चतस्रः स्नेहनेऽञ्जने ॥ ६९ ॥

अञ्जनशलाकाया स्वरूपम्।—

मुखयो' कुण्ठिता श्लक्ष्णा शलाकाऽष्टाङ्गुलोन्मिता।
अश्मजा धातुजा वा स्यात् कलायपरिमण्डला ॥ ७० ॥

लेखनाद्यञ्जनशलाकाना द्रव्याणि।—

ताम्रलोहाश्मसञ्जाता शलाका लेखने मता।
सुवर्णरजतोद्भूता शलाका स्नेहने मता ॥
अङ्गुलीव मृदुत्वेन कथिता रोपणे बुधैः ॥ ७१ ॥

अथापराञ्जनाना माननत्यत्तमाह, वैरेचनिकेति।—वैरेचनिक चूर्णमञ्जनप्रस्तावे बोद्धव्य, तच्च तीक्ष्णाञ्जन कथितम्, अत एव द्विशलाकोन्मितमेव। मृदाविति—मृदुचूर्णाञ्जने। स्नेहनेऽञ्जने चतस्र शलाका, तेन चतु शलाकोन्मिताञ्जन प्रोक्तमित्यर्थ। शलाकालक्षण विधानमपि वक्ष्यमाण बोद्धव्यम् ॥ ६९ ॥

अथाञ्जनशलाकामाह, मुखयोरिति।—शलाकाया ऊर्ध्वाधोभागगतयोरेव मुखशब्दो वाच्य, तत्र तु कुण्ठिता विगतधारा कार्या इत्यभिप्राय, तेन मुकुलाकारा इत्यपरे, तथा च—"वक्त्रान्ते मुकुलाकारा कलायपरिमण्डला' (सु० उ० १८ अ०) इत्यादि। श्लक्ष्णेति—सर्वत्रैव श्लक्ष्णा कार्या मृदुत्वेन सस्निग्धेत्यर्थ। अष्टाङ्गुलोन्मिता अष्टभिरङ्गुलै कृता परिमिता कार्या। अश्मजा स्फटिकादिपाषाणरचिता। न केवल पाषाणजनिता, धातुजा वा, धातुशब्देन सुवर्णादिक गृह्यते, तेन सुवर्णरौप्यताम्रकाष्ठास्थिमयी कृता शलाका अञ्जने श्लक्ष्णा अष्टाङ्गुलमिता शुभा इति। कलायपरिमण्डलेत्यनेन परि समन्ताद्वर्तुला कार्या इत्यभिप्राय:। कलायो वर्तुलकलाय। अत्रापे केचिदिति पठन्ति "वामे करतले कृत्वा सजल निकषोपलम्। दक्षिणेनाञ्जन नीत्वा करेण निकषेच्छने ॥ तेन कल्केन मतिमान् शलाकाग्र प्रलिप्य च। उत्थाप्य चोत्तर वर्त्म वामेनाङ्गुष्ठपर्वणा ॥ वर्त्मगुल्कान्तरे चाल्पा शलाका सुप्रवर्तयेत। प्रथम सव्यमक्ष्ण पश्चादक्ष्णात्तु दक्षिणम् ॥ शलाकाऽङ्गुष्ठदेशिन्या न वाऽन्तर्नयन स्पृशेत्॥" इत्यादि कैश्चित्तन्त्रान्तरादवगम्यात्र लिखित न खलतम् ॥ ७० ॥

लेखनेति।—लेखने लेखनाञ्जने। स्नेहने स्नेहनाञ्जने। रोपणे रोपणाञ्जने;

अञ्जनप्रयोगस्य कालः।—

सायं प्रातर्वाऽञ्जनं स्यात्तत् सदा नैव कारयेत्।
नातिशीतोष्णवाताभ्र-वेलाया सम्प्रशस्यते ॥ ७२ ॥

अञ्जनप्रयोगस्य स्थानम्।—

कृष्णभागादधः कुर्यादपाङ्गं यावदञ्जनम् ॥ ७३ ॥

तिमिरादौ चन्द्रोदया वर्त्तिः।—

अञ्जनाभिर्विभीतस्य मज्जा पथ्या मनःशिला।
पिप्पली मरिचं कुष्ठं वचा चेति समांशकम् ॥ ७४ ॥
छागीक्षीरेण सम्पिष्य वर्त्तिं कृत्वा यवोन्मिताम्।

रोपणाञ्जनन्तु दृष्टिप्रसादनम् (?)। बुधैरिति ग्रहणेन यथायोग्यम् अन्यवस्तु-जनिता ग्लानिका योज्या ॥ ७१ ॥

अथाञ्जनकर्मणः कालमाह, सायमिति।—सायं प्रात इत्यनेन सायं तीक्ष्णाञ्जनं कुर्य्यात्, प्रातः गण्डूषानन्तरं यथा सदाचारे रसाञ्जनादिकं तद्वदन्यदपि (?)। सदा सर्वकाले तदञ्जनं न कारयेदित्यर्थः, यतः,—"चक्षुस्तेजोमयं तस्य विशेषात् श्लेष्मतो भयम्। योजयेत् सप्तरात्रे तु स्रावणार्थं रसाञ्जनम्॥" इति। तीक्ष्णाञ्जनं यथा—"दिवा तद्वत् प्रयोक्तव्यं नेत्रयोस्तीक्ष्णमञ्जनम्। विरेकदुर्बला दृष्टिरादित्यं प्राप्य सीदति॥ तस्मात् स्राव्यं निशायान्तु ध्रुवमञ्जनमिष्यते। रात्रौ स्वप्नगुणादाच्च पुष्यत्यञ्जनकर्षितम्॥" (विटेश्व०) इति। न केवलं सर्वकालं निषिद्धं किन्तु यदा अतिशीतोष्णवातादयश्च भवन्ति तदा तस्या वेलायामपि नाञ्जनं कार्य्यमित्यर्थः ॥ ७२ ॥

कुत्र स्थाने अञ्जनं कुर्य्यात्तदाह, कृष्णभागादित्यादि।—सुगमम् ॥ ७३ ॥

पूर्वमुक्तं लेखन-रोपण स्नेहनभेदेन विविधाञ्जनेषु वर्त्ति-रस चूर्णविविधरूपं, तत्रादौ लेखनी वर्त्तिरधुना विधीयते, अञ्जनाभिरिति।—इयं चन्द्रोदया वर्त्तिर्लेखनी कथिता। रात्र्याञ्जनयोगेन चन्द्रोदयाभिधानमस्याः, तीक्ष्णाञ्जनत्वात्। अञ्जनाभिरिति—मध्ये

---

* प्राक् स्नेहनाञ्जनं दृष्टिप्रसादनमुक्तं टीकाकृता इति सुधीभिः द्रष्टव्यम्।

† पञ्चरात्रेऽष्टरात्रे वा स्रावणार्थं रसाञ्जनम्" (च० सू० नात्राग्नितो०) इति पाठः।

हरेणुमात्रा सङ्कृष्य जलैः कुर्य्यादथाञ्जनम् ॥ ७५ ॥
तिमिरं मांसदृद्धिञ्च काचं पटलमर्बुदम्।
रात्र्यान्ध्य वार्षिक पुष्पं वर्त्तिस्वन्द्रोदया जयेत् ॥ ७६ ॥

नेत्रपुष्पे करञ्जबीजवर्त्ति ।—

पलाशपुष्पस्वरसैर्बहुशः परिभाविता।
करञ्जबीजवर्त्तिस्तु दृष्टेः पुष्पं विनाशयेत् ॥ ७७ ॥

नेत्रशुक्रादौ समुद्रफेनादिवर्त्ति ।—

समुद्रफेनसिन्धूत्थ-शङ्खदन्ताण्डवल्कलैः।
भिग्रुबीजयुतैर्वर्त्तिः शुक्रान्ध्यं शुक्लवर्त्मसु खेत् ॥ ७८ ॥

नेत्रशुक्रे दन्त्यादिवर्त्ति ।—

दन्तैर्दन्तिवराहोष्ट्र-गोहयाजखरोद्भवैः।

आवर्त्तनेन लघु चक्राकार द्रव्यविशेष समुद्रफेनशङ्ख शङ्खनाभिशब्देन वाच्य ; अथ वा शङ्खस्य नाभिर्मध्यो ग्राह्य, अतिनिम्नत्वात्। विभीतस्य मज्जा विभीतकफलमज्जा। पथ्या हरीतकी। यवीश्चितामिति— परिमाणा वर्त्ति कुर्य्यादित्यर्थ । अञ्जनार्थन्तु हरेणुमात्रा सङ्कृष्याञ्जयेत्, लेखनाञ्जनत्वात। जलैरित्यनेन पूर्वं वर्त्ति चौरेण सम्पिष्य कुर्यात् पश्चादञ्जनसमये पानीयेन सह घृष्याञ्जयेदिति बोध्य । मांसदृद्धिरर्शादिजनिता। शेष सुगमम् ॥ ७४—७६ ॥

अथ पुष्पार्थं लेखनीवर्त्तिद्वयमाह, पलाशेति ।—पलाशपुष्प किंशुकाभिधानम्। बहुश इत्यनेन सप्तवारमित्यभिप्राय । करञ्जबीजवर्त्तिरिति—करञ्जो डहलकरञ्ज' ॥ ७७ ॥

अन्य योगमाह, समुद्रफेनेत्यादि ।—समुद्रफेन प्रसिद्धम्। सिन्धूत्थ सैन्धवम्। शङ्ख प्रसिद्ध । दन्ताण्डवल्कलैरिति—दन्त कुक्कुट तस्याण्डवल्कलेव ग्राह्या। एके समुद्रफेन इत्यादिक विपरीत पठन्ति, तत् यथा—"समुद्रफेनदन्ताण्डवल्क-सिन्धूत्थैः समाधिके । भिग्रुबीजयुतैर्वर्त्ति शुक्रान्धे भिग्रुवारिणा ॥" इति । व्याख्यानयन्ति—तत्र साधिक धातुसाधिकम्। भिग्रुवारिणा भिग्रुस्वरसेन। शुक्लवर्त्मलेखनेन लेखनी कथिता ॥ ७८ ॥

अथ लेखनीदन्तवर्त्तिमाह, दन्तैरिति ।—दन्ती हस्तीति [illegible] वराहः शूकरः।

शङ्खमुक्ताऽम्बुधिफेन-युतैः सर्वैर्विचूर्णितैः ॥
दन्तवर्त्तिं कृता श्लक्ष्णा शुक्लाणा नाशिनी परा ॥ ७९ ॥

अतिनिद्रायां नीलोत्पलादिवर्त्ति ।—

नीलोत्पल शिग्रुबीजं नागकेशरकं तथा
एतत्कल्कैः कृता वर्त्तिरतिनिद्रां निवारयेत् ॥ ८० ॥

तिमिरादौ कुसुमिकावर्त्ति ।—

तिलपुष्पाक्षगोतिः स्युः षष्टिः पिप्पलितण्डुलाः ।
जातीकुसुमपञ्चाशन्मरिचानि च षोडश ॥ ८१ ॥
सूक्ष्म पिष्ट्वा जलैर्वर्त्तिं कृता कुसुमिकाऽभिधा ।
तिमिरार्जुनशुक्राणा नाशिनी मासहृद्धितृत् ॥ ८२ ॥

नक्तान्ध्ये रसाञ्जनादिवर्त्ति ।—

रसाञ्जनं हरिद्रे द्वे मालतीनिम्बपल्लवाः ।

ष्ठ क्रमेलकः । गौ वृषभः । हयो घोटकः । अजो वस्तः, छागसञ्ज्ञः । खरो गर्दभः, एतेषां दन्तैरित्यर्थः । कथम्भूतैः ? शङ्खमुक्ताऽम्बुधिफेनयुतैरिति—शङ्खेन सर्वत्र शङ्खनाभिर्ग्राह्या । मुक्ता मौक्तिकम् । अम्बुधिफेन समुद्रफेनम् । श्लक्ष्णा इति सूक्ष्मत्वेन सस्निग्धा यथा स्यात् । परा उत्कृष्टा । अवानुक्तत्वात् पेषणार्थं जलमेव ग्राह्यम् ॥ ७९ ॥

नीलोत्पलमित्यादि ।—इयमपि लेखनीवर्त्ति कथिता । नीलोत्पल नीलकमल, तदभावे पद्मबीज ग्राह्यमिति सर्वत्र । कल्कार्थमत्र जलमाह अनुक्तत्वात् ॥ ८० ॥

इदानीं रोपणीवर्त्तिविधानमाह, तिलपुष्पाक्षेति ।—इथ रोपणी कुसुमिकावर्त्तिः कथिता । अत्र तिलपुष्पाणि अशीतिसङ्ख्याकानि । पिप्पलितण्डुला पिप्पलीमध्यगत बीजानि सर्षपाकाराणि षष्टिसङ्ख्याकानि ग्राह्याणि । जाती सुमना, तस्या पुष्पाण्यपि पञ्चाशत्सङ्ख्यितानि । मरिचानि च षोडशसङ्ख्याकानीत्यर्थः । जलैरिति बहुवचनत्वेन कुत्रापि चीरेण प्रचार । तिमिरोपलक्षितत्वेन गत चक्षु निवर्त्तयेदित्यपि योज्य रोपणत्वात् । केचिदत्राग्रे इति पठन्ति—"एतस्याञ्जने मात्रा प्राक्ता सार्द्धहरेणुका" एतत पूर्व कथितमेव तस्मात् बहुभिर्न स्वीकृत पौनरुक्त्य भयात् । एके "षष्टि पिप्पलीतण्डुला" इत्यस्य स्थाने "षष्टिसङ्ख्या कणा स्मृता" इति पठन्ति, एतन्न मनोहरम् ॥ ८१।८२ ॥

अथान्या रोपणीवर्त्तिमाह, रसाञ्जनमिति ।—रसाञ्जन क्षुद्रपाषाणाकृतिधातुद्रव्य,

गोशकृद्रससंयुक्ता वर्त्तिर्नक्तान्ध्यनाशिनी ॥ ८३ ॥

नेत्रस्रावे धात्र्यादिवर्त्ति ।—

धात्र्याश्चपथ्याबीजानि एकद्वित्रिगुणानि च ।
पिष्ट्वा वर्त्तिं जले कुर्य्यादञ्जनं हिङ्गरेणुकम् ॥
नेत्रस्रावं हरत्याशु वातरक्तकृजं तथा ॥ ८४ ॥

वर्त्मरोगादौ तुत्थादिरसक्रिया ।—

तुत्थमाक्षिकसिन्धूत्थं सिताशङ्खमनःशिलाः ।
गैरिकोदधिफेनञ्च मरिचञ्चेति चूर्णयेत् ॥ ८५ ॥
संयोज्य मधुना कुर्य्यादञ्जनार्थं रसक्रियाम् ।
वर्त्मरागमतिमिर-काचशुक्लहरां पराम् ॥ ८६ ॥

नेत्रपुष्पे कर्पूररसक्रिया ।—

वटक्षीरेण संयुक्तो मुख्य कर्पूरजः कणः ।
क्षिप्रमञ्जनतो हन्ति कुसुमन्तु * हिमासिकम् ॥ ८७ ॥

तदभावे दार्वीक्वाथसमुद्भव ग्राह्यम् । हरिद्रे हे हरिद्रा दारुहरिद्रा । मालतीनिम्ब-पल्लवा इति—मालती जाती, निम्ब प्रसिद्ध एतयो पल्लवा कोमलपत्राणि । गोशकृद्रस इति—गोपुरीषस्वरस । शकृदित्यस्य स्थाने यकृदिति पाठान्तरम् ॥ ८३ ॥

धात्रीति ।—इयं लेखनी वर्त्तिः कथिता । एकद्वित्रिगुणानि यथाक्रम योज्यानि । वातरक्तकृज तथेत्यनेन वातजनिता रक्तजनितामभिष्यन्दादीना रुज हरतीत्यर्थे व्याख्यानयन्ति, सम्मतोऽयमन्यवीक्षणात्, यथा—'पथ्याऽक्षधात्रीफलमध्यबीजै-स्त्रिद्व्येकभागैर्वदधीत वर्त्तिम् । तयाऽञ्जयेदस्रुमतिप्रवृद्धमच्छाहरैत कष्टमपि प्रकोपम ॥" इति ॥ ८४ ॥

अथ रसक्रियामाह, तुत्थेति ।—इयञ्च लेखनीसञ्ज्ञका रसक्रिया अञ्जनार्थं विहिता । अत्र तु माक्षिक धातुमाक्षिकम् । सिन्धूत्थ सैन्धवम् । सिता शर्करा । शङ्ख शङ्खनाभि । उदधिफेन समुद्रफेनश्चेति चूर्णयेदिति, अनेन समानमानमेतेषा ग्राह्यम् । संयोज्य मधुना कुर्य्यादिति कोऽर्थ ? एतच्चूर्ण मध्वाक्तशलाकया सङ्गृह्य शुक्लादिदेश घर्षयदित्यभिप्राय । मधुप्लाविता वर्त्तिमाहुरेके ॥ ८५।८६ ॥

अथापरा लेखनी रसक्रियामाह, वटक्षीरेणेति ।—कर्पूरज कण कर्पूरजशकल,

---

* चक्रसङ्गहे "हिमासिकम्" इत्यत्र "हिमार्षिकम्" इति पाठ.।

अतिनिद्राया मरिचरसक्रिया।—

क्षौद्राश्वलालासङ्गृष्टैर्मरिचैर्नेत्रमञ्जयेत्।
अतिनिद्रा शमं याति तमः सूर्योदयादिव ॥ ८८ ॥

तन्द्राया जातीपुष्पादिरसक्रिया।—

जातीपुष्पं प्रवालञ्च मरिचं कटुको वचा।
सैन्धवं वस्तमूत्रेण पिष्ट तन्द्राघ्नमञ्जनम् ॥ ८९ ॥

रुजाजनने शिरीषबीजादिरसक्रिया।—

शिरीषबीजगोमूत्र-कृष्णामरिचसैन्धवैः।
अञ्जन स्यात् प्रबोधाय मरसोनशिलावचैः ॥ ९० ॥

नेत्रदाहादौ दार्व्यादिरसक्रिया।—

दार्वी पटोलं मधुकं सनिम्बपद्मकोत्पलम्।

तेन कर्पूरशकल सङ्गृह्य वटचीरेण सह सङ्कुट्याञ्जयेदित्यर्थ। मुख्य इति—उत्तम, यत कर्पूरस्त्रिविधो भवति, तद यथा—"दुग्धावासो हिमसंज्ञ पीताभय इति त्रिधा। अपक्के कथ्यते भेद कर्पूरे तु भिषग्वरै ॥" लक्षणेनापि "दुग्धावासो भृश श्वेतो हिमसज्ञस्तु पाण्डुर। श्वेत पीताभय सर्वे रसवीर्यविपाकत ॥ प्रभावेणापि ते प्रोक्ता पूर्वपूर्वगुणाधिका। तत्रापि योऽनघ क्षुद्र स्फटिकाभ स उत्तम ॥" इति मुख्य-शब्दन व्याख्यात। एके "वटचीरेण सयुक्त सूक्ष्म कर्पूरज रज। चिप्रमञ्जनतो हन्ति तम सूर्योदयादिव ॥" इति पठन्ति ॥ ८७ ॥

क्षौद्रेति।—क्षौद्र मधु। अश्वलाला घोटकवक्त्रजनितो द्रवविशेष। अतिनिद्राऽपि सन्निपातज्वरजनिता बोद्धव्या। इयमपि लेखनी रसक्रिया कथिता ॥ ८८ ॥

जातीपुष्पमिति।—जातीपुष्प मालतीपुष्पम्। प्रवाल विद्रुमम्। कटुको कटरोहिणी। वस्तमूत्र छागमूत्रम्। शेष सुबोधम। इयमपि छागमूत्रेण कल्कीकृत्य वर्त्तिरूपा लेखनी रसक्रिया कथिता ॥ ८९ ॥

शिरीषेति।—अथवा कृष्णा पिप्पली। कथम्भूतो शिरीषबीजादिभि (१)। मरसोन-शिलावचैरिति—रसोनो लशुनवाच्य। शिला मन शिला। वचा विख्याता। एतानि द्रव्याणि गोमूत्र विहाय समभागानि ग्राह्याणि, गोमूत्रमानन्तु कल्काधँ यावत। प्रबोधायेत्यनेन सन्निपातज्वरजनिततन्द्रोविनाशनायाञ्जनमाह ॥ ९० ॥

इदानी लेखनीरसक्रियामभिधाय रोपणीरसक्रियामाह, दार्वीति।—दार्वी

प्रपौण्डरीकश्वेतानि पचेत्तोये चतुर्गुणे ॥ ९१ ॥
विपाच्य पादशेषन्तु पूतं नीत्वा पुनः पचेत्।
शीते तस्मिन्मधु सिता दद्यात् पादाग्निका नरः ॥
रसक्रियेषा दाहाश्रु-रक्तरागरुजो हरेत् ॥ ९२ ॥

प्रक्लिन्नवर्त्मनि रसाञ्जनादिरसक्रिया।—

रसाञ्जनं सर्जरसो जातीपुष्पं मनःशिला।
समुद्रफेनो लवणं गैरिकं मरिचानि च ॥ ९३ ॥
एतत् समांशं मधुना पिष्ट्वा प्रक्लिन्नवर्त्मनि।
अञ्जनं क्लेदकण्डूघ्नं पक्ष्मणाञ्च प्ररोहणम् ॥ ९४ ॥

पिल्लादौ गुडूचीस्वरसादिरसक्रिया।—

गुडूचीस्वरसं कर्षं क्षौद्रं स्यान्माषकोन्मितम्।
सैन्धवं क्षौद्रतुल्यं स्यात् सर्वमेकत्र मर्दयेत् ॥ ९५ ॥
अञ्जयेन्नयनं तेन पिल्वार्मतिमिरं जयेत्।
काचं कण्डूं लिङ्गनाशं शुक्लकृष्णगतान् गदान् ॥ ९६ ॥

दारुहरिद्रा। मधुकं यष्टीमधु। पद्मक काष्ठविशेष, पद्माख इति लोके। यत्र पद्ममिति तत्र कमल ग्राह्य सर्वत्र, कमलाभावे पद्मबीजमिति सर्वत्र। चतुर्गुणता च क्वाथद्रव्येभ्य, क्वाथद्रव्यन्तु दार्व्यादिकत्व समभाव ज्ञेय, पादशेष चतुर्थांशं प्रस्थ क्वथित तच्च पादशेष पुन पचेदित्यर्थ। सान्द्रीभूते हिमसदृशे तस्मिन सिता मधु च मेलयित्वा पादाग्न चिपेदिति। पादाग्न क्वाथशेषात्। नर इति—वैद्य। इति रोपणी रसक्रिया प्रोक्ता। दाहादयोऽत्र नेत्रस्येति सम्बन्ध ॥ ९१।९२ ॥

रसाञ्जनमिति।—इयमपि रोपणी रसक्रिया अञ्जनसमूहे विहिता। तत्र रसाञ्जन दार्वीक्वाथोऽत्रवम्। सर्जरसोऽग्निवल्लभ, लोके राल इति। लवणमत्र सैन्धवं ज्ञेय-हितत्वात, तथा च—"मधुयवपादाभ्यङ्ग' शतावरीमुद्गसैन्धवामलकी। चक्षुष्य: सङ्ग्रेपाहर्ग' कथितो भिषग्भिरयम ॥" इति। शेष सुगमम ॥ ९३।९४॥

अथान्या रोपणी रसक्रियामपि दर्शयन्नाह, गुडूचीति।—गुडूचीस्वरस इत्यनेन लताया' सद्यो रस'। सैन्धव क्षौद्रतुल्यमिति—क्षौद्रतुल्यं माषपरिमितम्। सर्वमनेन काचे दाहजे वा पात्रे इत्यवदोषसम्प्रदाय,। शेषं सुबोधम् ॥ ९५।९६ ॥

नेत्रकण्डादौ पुनर्नवास्वरसक्रिया।—

दुग्धेन कण्डू क्षौद्रेण नेत्रस्रावश्च सर्पिषा।
पुष्यतैलेन तिमिरं काञ्जिकेन निशान्धताम्॥
पुनर्नवा जयेदाशु भास्करस्तिमिरं यथा॥ ९७॥

नेत्रस्रावे बब्बूलरसक्रिया।—

बब्बूलत्वनि क्वाथो लेहीभूतस्तटङ्कनात्।
नेत्रस्रावं जयत्येष मधुयुक्तो न संशयः॥ ९८॥

नेत्रस्रावे हिज्जलरसक्रिया।—

हिज्जलस्य फलं घृष्ट्वा पानीये नित्यमञ्जनम्।
चक्षुस्रावोपशान्त्यर्थं कार्यमेतन्महौषधम्॥ ९९॥

नेत्रप्रसादने कतकरसक्रिया।—

कतकस्य फलं घृष्ट्वा मधुना नेत्रमञ्जयेत्।
ईषत्-कर्पूरसहितं स्मृतं नेत्रप्रसादनम्॥ १००॥

शिरोत्पाते रसाञ्जनरसक्रिया।—

सर्पिः क्षौद्रञ्चाञ्जनं स्याच्छिरोत्पातस्य शान्तये॥ १०१॥

दुग्धेनेति।—अत्र क्षौद्रादीना त्र्यूषेण कल्कं कृत्वा सर्वा रोपणी रसक्रिया ज्ञातव्या। दुग्धमत्र स्त्रीक्षीरम्। सर्पिरत्राज गव्यं वा। तैलं तिलसम्भवम्। काञ्जिकं शुक्तविशेषः प्रसिद्धम। पुनर्नवेति—पुनर्नवास्वरस॥ ९७॥

बब्बूलेति।—बब्बूलत्वक्चतुर्गुणं पानीयं दत्त्वा निक्वाथ्य पादशेषं पटे विस्राव्य शीतं कृत्वा पुनर्विपचेत् यावत् स्नान्दी भवति, ततः पादयुक्तेन मधुना सलाव्याञ्जयेदित्यभिप्रायः। इयमपि रोपणी रसक्रिया व्याख्याता॥ ९८॥

हिज्जलस्येति।—हिज्जलस्य फलं कतकफलमिति प्रसिद्धम्। एतन्महौषधमिति—महाञ्जनवरमेतदित्यर्थः। अयमपि योगो रोपणीरसक्रियायां कथितः॥ ९९॥

इदानीं स्नेहनी रसक्रिया, कतकस्येति।—नेत्रप्रसादनं दृष्टिप्रसादनं तस्या प्रसन्नत्वेन नेत्रस्यापि प्रसन्नत्वम्, तथा चोक्तं दृष्टान्तेन—"यथा हि कनकादीना मलैना विविधात्मनाम्। धौतानां निर्मला शुद्धिस्तैलचेलकचादिभिः॥ एव नेत्रेषु मृत्यानामञ्जनाश्चोतनादिभिः। दृष्टिर्निराकुला याति निर्मले नभसीन्दुवत्॥" च० सू० साचाश्चितौ०) इति॥ १००॥

सर्पिरिति।—सुगमम्॥ १०१॥

आम्ये कृष्णसर्षपवसादिरसक्रिया।—

कृष्णसर्षपवसा शङ्ख' कतकात् फलमञ्जनम्।
रसक्रियेयमचिराद्धाना दर्शनप्रदा ॥ १०२ ॥

नेत्रपुष्पादौ कुक्कुटाण्डादिचूर्णाञ्जनम्।—

दत्ताण्डत्वक्शिलाकाच-शङ्खचन्दनसैन्धवैः।
द्रव्यैरञ्जनयोगोऽय पुष्पार्मादिविलेखनः ॥ १०३ ॥

नक्तान्ध्ये पिप्पली मरिचाञ्जनद्वयम्।—

कणा छागयकृन्मध्ये पक्वा नेत्रयुगेऽञ्जिता।
अचिराद्धन्ति नक्तान्ध्य तद्वत् सक्षौद्रभूषणम् ॥ १०४ ॥

अथ विविधरसक्रियामभिधाय सम्प्रति चूर्णाञ्जनविषये कैश्चित् प्रतिपादितामेकां रसक्रियामाह, कृष्णेति।—अञ्जन रसाञ्जनम्। शङ्खप्रभृतीना चूर्णं कृत्वा पूर्वं सर्षपवसाक्षीरया पश्चात् चूर्णक्रियया अञ्जनमेदिति भाव। कुत्रचित् रसाञ्जन विना प्रचरति, तच्चाञ्जनशब्देन कज्जलमेतत् कार्यमिति शेष ॥ १०२ ॥

अथ लेखन चूर्णाञ्जनमाह दत्ताण्डेति।—दत्त कुक्कुट। शिला मन शिला। चन्दनमत्र रक्त नेत्रहितकरत्वात्। दत्ताण्डत्वगित्यादियोगश्चूर्णाञ्जनम्। अक्षत्यम्यदार्ये तु मध्वाक्तशलाकया च गृहीत्वा अञ्जन कार्यम, एव सर्वत्र चूर्णाञ्जने। एके "नेत्रयुगे" इत्यस्य स्थाने "गैरिकै" इति पठन्ति, "द्रव्यैरञ्जनयोगोऽयम" इत्यस्य स्थाने 'तत्स्य रसाञ्जन देयम" इति कथयन्ति। एतत पटद्वयमपि सङ्गत तत्तात्पर्यदर्शनात्, तथा च—"दत्ताण्डत्वक्शिलाशङ्ख काचचन्दनगैरिकै'। * तत्स्य रसाञ्जन देय पुष्पार्मादिविलेखनम ॥' इति ॥ १०३ ॥

अपरमपि लेखनाञ्जनमाह कणेति।—कणा पिप्पली। छागयकृत्मध्ये छागकालखण्डम्। कैश्चित "पक्वा नेत्रयुगेऽञ्जिता" इत्यस्य स्थाने "पक्वा तदमपेषिता" इति पठन्ति, तत्र तदसपेषितेति—उत्स्वेदाम्बुना पिष्टा इत्यभिप्राय। तद्वदिति—छागयकृन्मध्ये च क्षिप्त तदसमुपिष्टच जलेन मरिचम्। क्षौद्रमत्र योगद्वयेऽपि प्रचरति। कैश्चित मधुना सह भक्षणयोगश्चयमिदमाह। कैषाञ्चिन्मते

---

* चक्रसङ्ग्रहे "तत्स्यैरञ्जनयोगोऽय पुष्पार्मादिविलेखन" इति पाठ'। अत्र रसाञ्जनोल्लेखो नास्ति।

नेत्रकण्डादौ मरिचादिचूर्णाञ्जनम्।—

शाणार्द्धं मरिचं द्वौ च पिप्पल्यर्णवफेनयोः।
शाणार्द्धं सैन्धव शाणा नव सौवीरकाञ्जनात् ॥ १०५ ॥
पिष्टं सुसूक्ष्मं चित्रायां चूर्णाञ्जनमिदं शुभम्।
कण्डूकाचकफार्त्तानां मलानाञ्च विशोधनम् ॥ १०६ ॥

सर्वनेत्रगतरोगे रसकादिचूर्णाञ्जनम्।—

शिलाया रसक पिष्ट्वा सम्यगाप्लाव्य वारिणा।
गृह्णीयात्तज्जलं सर्वं त्यजेच्चूर्णमधोगतम् ॥ १०७ ॥
शुष्कञ्च तज्जलं सर्वं पर्पटीसन्निभं भवेत्।
विचूर्ण्य भावयेत् सम्यक् त्रिवेल त्रिफलारसैः ॥ १०८ ॥
कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत्।
अञ्जयेन्नयने तेन सर्वदोषहरं हि तत् ॥
सर्वरोगहर चूर्णं चक्षुषोः सुखकारि च ॥ १०९ ॥

वल्कदित्यपलचणत्वेन तक्रग्रं पित्तं गाह्यम; तस्माध्ये पिप्पलीमरिचं मेलयित्वा घाय्यं पश्चात् शुष्कं तत मधुना सङ्घृष्याञ्जयेदिति न स्वमतम् ॥ १०४ ॥

अथान्यच्च लेखनाञ्जनमाह, शाणार्द्धमिति।—शाणार्द्धं नाषकद्वयमितं मरिचमिति। पिप्पल्यर्णवफेनयोश्च द्वौ शाणौ, तेन प्रत्येक शाणमितमित्यर्थः; अर्णवफेन समुद्रफेन। एके द्वावित्यनेन मिलित्वा शाणैकमाहुः, तन्न मनोहरम्। सौवीरकाञ्जनाद्व शाणा याह्या, शाणषट्कं कथितं, स चतुर्माषकाग्रमितो ज्ञेयः। सौवीराञ्जन सुरमाशब्दवाच्य, तच्च क्षणदोसम्भव भवति, तदभावे रसाञ्जनमेव ग्राह्यम्। मलस्य नेत्रसम्भव एव ॥ १०५।१०६ ॥

इदानीं रोपणचूर्णाञ्जनमाह, शिलायामिति।—एतन्मृदुचूर्णाञ्जनत्वेन रोपणत्वेन कथितम्। शिलाया रसक पिष्ट्वेत्यादि—शिला पेषणार्थं पाषाणघटितपात्रविशेष * रसक खपरक, तच्च तुत्थभेद, खपरीयाशब्दवाच्यं लोके। सम्यगाप्लाव्य वारिणा अम्लाम्लदाये तु तत् रसक जलेनैव दृषदि सम्पिष्य पश्चान्निर्मलपात्रे बहुजले सम्प्लाव्य शुष्कं विलम्ब्य तदुपरि स्वच्छ जलमपनीयाध स्थित यत् पर्पटसन्निभ द्रव्य भवति तत् ग्राह्यमित्यर्थः। कर्पूरचूर्णं दशमांश पर्पटीस्वरूपद्रव्यात्। सर्वदोषमिति—वातपित्त-

सर्वनेत्रगतरोगे सौवीरचूर्णाञ्जनम्।—

अग्नितप्तं हि सौवीरं निषिञ्चेच्चित्फलारसैः।
सप्तवेलं तथा स्तन्ये स्त्रीणां सिक्तं विचूर्णितम्॥ ११०॥
अञ्जयेत्तेन नयनं प्रत्यहं चक्षुषाहितम्।
सर्वानक्षिविकारांस्तु हन्यादेतन्न संशयः॥ १११॥

सर्वनेत्रगतरोगे नागशलाका।—

त्रिफलाभृङ्गशुण्ठीनां रसैस्तद्वच्च सर्पिषा।
गोमूत्रमध्वजाचीरैः सिक्तो नागः प्रतापितः॥
तच्छलाका हरत्येव सर्वान्नेत्रभवान् गदान्॥ ११२॥

कफरुधिरम्। सर्वरोगमिति—नेत्राभिष्यन्दाधिमन्थप्रभृतिकम्। चक्षुषो सुखकारीत्यनेन दृष्टिप्रसादन कथितम्॥ १०७—१०९॥

अथ क्षेत्रनामिकं प्रसादनसञ्जक चूर्णाञ्जनमाह, अग्नितप्तं हि सौवीरमिति।—सौवीरं सौवीराञ्जन, तच्च सुरमाशब्दवाच्यम्। त्रिफला हरीतक्यादिका, तस्या सप्तो रस क्वथितरसो वा। तथेत्यनेन क्षीरदुग्धेनापि सप्तवेलमाह। स्तन्यैरिति बहुत्वेनाज गव्यमपि वा क्षीर ग्राह्यम्। सिक्तमित्यवाप्यग्नितप्तमिति सम्बन्ध॥ ११०।१११॥

अथ दृष्टिप्रसादनी नागशलाका विख्याता, तामपि दर्शयन्नाह, त्रिफलेति।—तद्वदित्यनेन पूर्वोक्तसौवीराञ्जनविधानवदत्रापि सप्तवारं प्रत्येकत्रिफलादिद्रव्येण निषापयेदाह, उक्तञ्चान्यत्रापि—"त्रिफलाभृङ्गसशौषधसर्पिर्गोमूत्रमध्वजाचीरैः। नाग सप्त निषिक्त करोति गरुडोपम चक्षु॥" इति। अन्यत्रोक्त दृष्टान्तेन द्रढयति,—"त्रिफलसलिलयोगे भृङ्गराजद्रवे च। हरिविषि च विधमित्रे क्षीर आजे मधूये। प्रतिदिनमथ तप्त सप्तधा सोसमेक प्रथितमथ पश्चात् कारयेच्छलाकाम्॥ तिमिरपटलकण्डूस्रावरक्तप्रकोपानुपचितबहुदोषानर्मसङ्ज्ञांस्तु रोगान्। सवितुरुदयकाले साञ्जना व्यञ्जना वा हरति नयनरोगान् सेव्यमाना शलाका॥" (चन्द्राट०) इति। वाग्भटेऽपि—श्रेष्ठाशङ्ख भृङ्गरस सविषाज्यमजापय.। यष्टीरसञ्च यत् सीस सप्तकृत्व पृथक् पृथक्॥ तप्त तप्त पाचित तच्छलाका नेत्रे युक्ता साञ्जनाऽञ्जना वा। तैमिर्यार्मसास्रावपैच्छिल्यपेल्लं कण्डू लाञ्च रक्तरागोच्च हन्ति॥" (वा० उ० १२ अ०) इति॥ ११२॥

प्रत्यञ्जनाविधि ।—

गतदोषमपेताक्षु सम्पश्यन् सम्यगम्भसि ।
प्रक्षाल्याक्षि यथादोषं कार्य्य प्रत्यञ्जन ततः ॥ ११३ ॥
न वाऽनिर्गतदोषेऽक्षिण धावनं सम्प्रयोजयेत् ।
प्रत्यञ्जन तीक्ष्णतप्ते नेत्रे चूर्णं प्रसादनम् ॥ ११४ ॥

सुवर्णेवगतरागे नयनाञ्जनम् ।—

शुद्धे नागे द्रुते शुद्ध तुल्य सूत विनिक्षिपेत् ।
कृष्णाञ्जन तयोस्तुल्यं सर्वमेकत्र चूर्णयेत् ॥ ११५ ॥
दशमाशेन कर्पूरं तस्मिंश्चूर्णं प्रदापयेत् ।
एतत् कृताञ्जनं नेत्र-गदजिन्नयनामृतम् ॥ ११६ ॥

सर्पविषे सञ्जीवनाञ्जनम् ।—

जयपालभवा मज्जा भावयेन्निम्बकद्रवैः ।
एकविंशतिवेलन्तु ततो वर्त्तिं प्रकल्पयेत् ॥ ११७ ॥
मनुष्यलालया घृष्ट्वा ततो नेत्रे तयाऽञ्जयेत् ।
सर्पदष्टविषं जित्वा सञ्जीवयति मानवम् ॥ ११८ ॥

इदानी चूर्णाञ्जनालगैत प्रत्यञ्जनविधानमाह गतदोषमिति ।—अक्षि प्रक्षाल्य ततः प्रत्यञ्जन कार्य्यम् । नेत्रे तीक्ष्णप्रतप्ते प्रसादन चूर्णं हितम् । शेष सुगमम् ॥ ११३।११४ ॥

अथ प्रसादन चूर्णाञ्जनमाह, शुद्धे इति ।— नाग सीसकम् , नागशुद्धिस्तु पूर्वं धातुशोधनाध्याये कथिता । सूत पारद शुद्धमिति—शोधितम् । रसस्य शुद्धि पूर्वं रसशोधनाध्याये प्रतिपादिता । कृष्णाञ्जनमिति—रसाञ्जनशब्दवाच्य, तच्च द्विविधम्, एक कृष्णपाषाणाकृतिधातुद्रव्यम्, अपरन्तु दारुहरिद्राक्वाथेन कृत्रिम पीतलोहितम् । तयोस्तुल्यमिति—पारदसीसकसाम्य रसाञ्जनमित्यर्थ । दशमाशेनाव कर्पूरमिति । इद नयनामृत नाम प्रसादनाञ्जनचूर्णं प्रसिद्धमेव । कृताञ्जनस्थाने प्रत्यञ्जनमिति पाठान्तरम् ॥ ११५।११६ ॥

अथ नेत्रप्रकरणपरिशेषात् विषहरीवर्त्तिमाह, जयपालभवामिति ।—जयपालं दन्तिबीज प्रसिद्ध, तन्मध्यगता मज्जा ग्राह्या , मज्जेति—मेद्रीशब्दवाच्या । सर्पदष्ट-विषमपि (?) विषसाधर्म्यात स्थावरविषभक्षणेऽप्यस्या. प्रचार.। एके सन्निपातविषयेऽञ्जनमस्या. प्रवदन्ति ॥ ११७।११८ ॥

तिमिरे मुष्टियोग ।—

भुक्ता पाणितलं दृष्ट्वा चक्षुषोर्दीयते यदि।
जाता रोगा विनश्यन्ति तिमिराणि तथैव च ॥ ११९ ॥

तिमिरे मुष्टियोग ।—

शोताम्बुपूरितमुखः प्रतिवासरं यः
कालत्रयेण नयनद्वितय जलेन।
आसिञ्चति ध्रुवमसौ न कदाचिदक्षि-
रोगव्यथाविधुरता भजते मनुष्यः ॥ १२० ॥

चक्षूरक्षाया आवश्यकता ।—

चक्षूरक्षाया सर्वकालं मनुष्यै-
र्यत्नः कर्त्तव्यो जीविते यावदिच्छा।
व्यर्थो लोकोऽयं तुल्यरात्रिन्दिवाना
पुंसामन्धाना विद्यमानेऽपि वित्ते ॥ १२१ ॥

ग्रन्थकृन्निवेदनम् ।—

आयुर्वेदसमुद्रस्य गूढोऽर्थमणिसञ्चयः।
ज्ञातः केषित् बुधैस्तैस्तु कृता विविधसंहिताः ॥ १२२ ॥

अथ दृष्टिप्रसादनार्थं सार्वकालिक योगद्वयमाह, भुक्ता पाणितलमित्यादि।—सुगमम्। "जाता रोगा" इत्यादि पदस्य केचिदन्यथा पठन्ति, यथा—"अचिरेणैव तद्वारि तिमिराणि व्यपोहति" इति। द्वितीययोगे—प्रतिवासर प्रतिदिनम्। कालत्रय प्रातर्मध्याह्नापराह्नादिकम्। जलेनेति मुख (?) गण्डूषजलेन। आसिञ्चतीत्यनेन वारवार सेचनमभिहितम्, तथा चोक्त—"जलगण्डूषैः प्रातर्बहुशोऽभीक्ष्णं प्रपूर्य मुखरन्ध्रम्। निदयमुच्चक्षि चक्षयति तिमिराणि नाशयेत्॥" इति। एके "भुक्ता पाणितलम्" इत्यादि योगद्वय नात्र पठन्ति, नासङ्गतमिति मन्यमानैरस्माभिरपि लिखितम् ॥ ११९।१२० ॥

अथ नेत्रविषयप्रधानत्वेन तदर्थं सर्वकाल यत्नो विधेय इति मत्वा तत्प्रतिपालनायमुपदेशमाह, चक्षूरक्षायामिति।—अयमपि तन्त्रान्तरादाहृत्य केनापि लिखित न स्वमतम्। अन्यत्तु सुगम एव ॥ १२१ ॥

अथ विद्वज्जनानां पारिप्लवात् कविरपि स्वगुणप्रकर्षता लोकुण्ठनवचनेन

किञ्चिदर्थं ततो नीत्वा कृतेयं सहिता मया।
कृपाकटाक्षनिक्षेपमस्या कुर्वन्तु साधवः॥ १२३॥

शार्ङ्गधरसंहितायां उपयोगिता।—

विविधगदार्त्तिदारिद्र्यनाशन या
हरिरमणीव करोति योगरत्नैः।
विलसतु शार्ङ्गधरस्य संहिता सा
कविहृदयेषु सरोजनिर्मलेषु॥ १२४॥

द्योतयति, आयुर्वेदेति।—आयुर्वेदमसुद्रस्य अर्थमणिसञ्चय गूढ गुप्तः एव, यथा समुद्रे मणिसमूह प्रच्छन्न सर्वैरेव न दृश्य तथा आयुर्वेदेऽपि अर्थोऽभिप्राय, सर्वैरेव नाधिगत इत्यर्थ, अत एव कैश्चित बुधैज्ञात, अर्थमणिसञ्चय इति सम्बन्ध। यैरेव ज्ञातस्तैस्तु विविधा संहिता कृता, विविधसंहिता द्वारोतमुच्यतेऽत्र ग्रन्थेग्रादय। अथ कवि स्वात्मोद्यविषयमाह, किञ्चिदर्थमित्यादि।—तत इति—संहितासमूहात मया शार्ङ्गधराचार्य्येण किञ्चिदर्थं स्वबुद्ध्या एकदेशीय प्रयोजन नीत्वा आहृत्य इय संहिता कृता निबद्धेत्यभिप्राय, न तु स्वकपोलकल्पिता, एतेन मुनिप्रणीतत्व सङ्ग्रहत्वञ्च दर्शितम्। अथ कविर्विज्ञप्तिमाह, कृपाकटाक्षनिक्षेपमित्यादि—अस्या संहिताया साधव सज्जना कृपाकटाक्षनिक्षेपं कृपया कटाक्षस्य दृष्ट किञ्चिद्भागस्य निक्षेप कुर्वन्तु, अनुमतार्थक्रिया अवश्यमेव इति भाव सूचयति, तेन अवश्यमेव कटाक्षनिक्षेपं कुर्वन्तु, यत कटाक्षनावावलोकनेनापि हृदयङ्गमा चमा भवति, किमुत सकलदृष्ट्या। एतेन ग्रन्थस्य समीचीनता दर्शिता॥ १२२।१२३॥

इदानीं कविरेव निजग्रन्थस्योत्कृष्टत्वमाह, विविधेति।—या इय संहिता हरिरमणीव लक्ष्मीरिव योगरत्नै प्रयोगमणिसमूहै कृत्वा विविधगदार्त्तिदारिद्र्य-नाशन करोति, विविधगदाना व्याधीनाम आर्त्तिरेव दारिद्र्य तस्य नाशन, यथा लक्ष्मीर्बहुधनप्रदानेन अकिञ्चनपुरुषस्य दारिद्र्यनाश करोति, तथा इयमपि संहिता सु योगै कृत्वा नानारोगजनितपीडा हरतीति भाव। एतेनास्या प्रयोगसाफल्य दर्शितम्। तत्प्रयोगसाफल्यस्य व्यापारमाह, विलसत्वित्यादि।—सा संहिता, संहितानिबन्धेषु पूर्वाचार्य्ये दर्शिता। शार्ङ्गधराचार्य्यस्य सा संहिता शार्ङ्गधराचार्य्य-निर्मिता सा नान्या इत्यभिप्राय, एतेन ग्रन्थस्य सर्वमतानुवन्धत्व दर्शितम्

शार्ङ्गधरपाठस्य उपयोगिता।—

अल्पायुषामल्पधियामिदानीं
कृतं समस्तश्रुतिपाठयत्नैः।
तदत्र युक्तं प्रतिबीजमात्र-
मभ्यस्यतामात्महितं प्रयत्नात् ॥ १२५ ॥

इति श्रीदामोदरसूनुना श्रीशार्ङ्गधराचार्येण विरचितायां शार्ङ्गधरसंहितायाम्
उत्तरखण्डे नेवकर्मविधिनाम त्रयोदशोऽध्यायः ॥ १३ ॥

सरोजनिर्मलेषु कविहृदयेषु विलसतु विलासं करोतु, कमलनिर्मलहृदयपुरुषेषु स्थितिं करोतु इत्यभिप्रायः न तु पिशुनहृदयेषु तद्धृदयानिर्मलत्वात् न तत्र स्थितेरवकाशः, यतस्ते स्व-भावबलात् कथं परगुणमवधारयितुं समर्थाः ? तस्मात् सज्जनहृदयेष्वेव विलासं इति भावः, सहृदयत्वात्। एतेन ग्रन्थस्य निर्मलत्वं सूचितं यतो निर्मलस्य निर्मले सह सख्यं सुखकरं एव ॥ १२४।१२५ ॥

विविधमुनिनिबन्धा ये महत्सु प्रसिद्धा
सुमतिदुरवबोधास्ते मया नैव दृष्टाः।
तदपि गुरुवचोभ्यात् यत्कृतं तत् व्यलेखि
ह्यटनलभिषजाऽल्पा भावसिद्ध्यात्मजेन ॥ १ ॥

अभिनवनिबन्धरचना श्रोतुं कः कोऽत्र लोलुपो भवति ?।
यः कृपया परकाव्यं पश्यति सुदृशा (?) स वै धीरः ॥ २ ॥

एकादशसहस्राणि तथा ..... ।
श्लोकानामाढमल्लेन पञ्जिकेयं विनिर्ममे ॥ ३ ॥

गोवर्द्धनोद्धरणदृष्टबलप्रतापनानास्तुतिश्रवणलज्जितमानसस्य।
इन्द्रो बलासमुनिमल्लशमं दधद्भूत्वा चिरं हरिरवतु क्षितिं वः ॥ ४ ॥

इति श्रीवात्स्यायनप्रणीतायां वैद्यविद्याभरणाभिधाढमल्लेन विरचितायां शार्ङ्गधर-
संहितायामुत्तरखण्डे नेवकर्मादिविधिनाम त्रयोदशोऽध्यायः ॥ १३ ॥

